वेदनिधि ग्रन्थमाला ...101DV

# ऋग्वेदीय
# शाकल संहिता

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## अवधूत दत्तपीठम्

श्रीगणपति सच्चिदानन्द आश्रमः,  दत्त नगरम्

मैसूरु 570025

वेदनिधि ग्रन्थमाला – 101DV

ऋग्वेदीय शाकल संहिता

May 2017

Editorial Team

**Dr.Vamshi Krishna Ghanapathi**

**Vidwan K Santosha Kumar Ghanapathi**

**Vidwan Sri M Satya Narayana Bhat**

**Vidwan Sri Nikhil Joshi**

**Vidwan Sri V Pavan Kumar**

Printed by

**Ma Prints,** Bengaluru

Published by

**SVAMI (SGS VedaNidhi Academy & Masters' Institute)**

**Avadhoota Datta Peetham**

**Sri Ganapathy Sachchidananda Ashrama**

Datta Nagara, Ooty Road, Mysore 570025 India

**Email - veda@dattapeetham.com**

Website - www.vedanidhi.in/books



अवधूत दत्तपीठाधीश्वराणां जगद्गुरूणां

परमपूज्यानां

श्री श्री श्री गणपति सच्चिदानन्द स्वामिश्रीचरणानां

# आविष्कार वचांसि

।। नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणम् ।।

महतां सज्जनानां सम्पत्तिः - ऋचः, यजूंषि, सामानि, तद्विनियोजकानि प्रख्यापकानि ब्राह्मणवाक्यानि - इति श्रुतिः ब्रवीति। तथाविध सम्पत्तिमन्तः नैके महान्तः श्रोत्रियाः ब्रह्मनिष्ठागरिष्ठाः शब्दब्रह्मोपासनधुरीणाः वर्षेऽस्मिन् भारते राराजन्ते स्म। ऋषिकल्पानां तादृशां महतां परम्परा अद्यापि प्रकर्षेण वर्तते, यस्याः परिपोषणाय छात्राणामधीतिः निदानमास्ते। तदधीत्यै उपकुर्वन्ति महान्ति उपकरणानि बहूनि वर्तन्ते, यदन्यतमं पुस्तकजातम् - इति सम्प्रति वैदिकलोकः गाढं विश्वसिति।।

आचार्योपदिष्टानि वेदवाक्यानि समामनन्तः छात्राः, स्वेषामध्ययनाय मुद्रितग्रन्थानेव सर्वधा आद्रियन्ते। अतः गुरुणा उपदिष्टान्, उपदेष्टव्यान्, विकार- लोप- आगम- आदेशात्मकान् विषयान् सङ्कलय्य मुद्रापितो वेदग्रन्थः, नितरां छात्रोपकाराय कल्पते। तथा च मन्त्रसम्बन्धि ऋषि-च्छन्दो- दैवत-विनियोग-प्रकरणादिकं तत्तद्देशेषु निविष्टं सत्, पाठकेषु सुकृतं सम्पादयेत्।

एवंविधग्रन्थसहायेन अध्ययनसम्पत्त्या समासादितयशसः संसाधितपरमेश्वरानुग्रहाः भूयासुरिति सङ्कल्पः दत्तगुरोरनुग्रहेण पूर्वं समजनि।

तदीयमहितकृपावशेन, सद्यः अस्माकं दत्तपीठस्य वेदनिधिबृन्दः पूर्वोदित-बह्वंश-कलितं वेदग्रन्थसमुदायं प्रकाशयतीति महान्तमानन्दमनुबोभूयामहे।

तदस्य ग्रन्थजातस्य पठनेन, अधीयाना अपि भूयिष्ठानन्दभाजस्सन्तः, शब्दब्रह्मोपासनधुरं ससुखं वहन्तः श्रेयसे पारयेयुरिति श्रीदत्त सद्गुरुं प्रार्थयामहे।

प्रायेण संवत्सराष्टकात् सञ्चलतः वेदग्रन्थप्रकाशनस्य आविष्कृतिरूपा समुद्गतिः महत्यस्मिन् वज्रोत्सवे विधीयत इति विषयं, दत्तगुरोः समधिकवरिवस्याफलत्वेन सम्भावयामः। महतोऽस्मात् वज्रोत्सवादारभ्य वैदिकलोकः निरायासं निश्शुल्कं ग्रन्थजातमिदं (अन्तर्जालात्) वेदनिधि निवेशनात् (वॆब्सैट् द्वारा) प्राप्नुवन्तु - इति श्रीदत्तस्मरणपूर्वकं समाशास्महे।

शेवधिर्यः पुमर्थानां षडध्वातीत विग्रहः।

राद्धान्तो निगमार्थानां प्रसद्यात् दत्तसद्गुरुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# विज्ञापनम्

**विद्वान् वंशीकृष्ण घनपाठी**

निर्देशकः - वेदनिधि प्रकाशनम्

**तद्विश्वमुप जीवति।**

यददो ब्रह्म- विश्वस्य अधिष्ठानत्वेन परस्सहस्रैः श्रौत स्मार्त पौराणिक वाक्य प्रमाणैः सङ्कीर्तितं- तदिदं विश्वं सञ्जीवयति, तदाधारेण विश्वमिदं उपजीवतीति भारतीयेषु सम्प्रदायसिद्धं सत्यम्। विश्वसिसृक्षोः अभितप्ताद्ब्रह्मणः- त्रयो लोकाः, त्रयो वेदाः, गायत्र्यास्त्रयः पादाः, तिस्रो व्याहृतयो जज्ञिर इति मन्त्रेभ्यः, तदुपबृंहक ब्राह्मणवाक्येभ्यश्च अवगम्यते।

तदासु वेदवाक्यराजीषु सर्वप्रथमतया विजेगीयमानः ऋगात्मको मन्त्रः इति वैदिकलोके नितरां रूढ एव विषयः। ऋच (स्तवने ) धातोः उत्पन्नः ऋक् शब्दः, योगरूढ इति ज्ञायते। यज्ञकर्मणि उपासनाविशेषेषु च स्तुतिपरतया देवतानामधेय- गुण शंसकतया च उपयुज्यमाना मन्त्राः ऋक्-नामकाः सर्वमन्त्र मूर्धन्यतया राराजन्ते। पद्यात्मकता- मिताक्षरता- सच्छन्दस्कता चेत्येतत्त्रय.मृचां लक्षणमिति स्पष्टं विभाव्यते। सर्ववेद ग्रन्थेषु सतीष्वप्यृक्षु, शाकल संहितामन्तरा नान्यत्र ऋग्वेद इति प्रसिद्धि मुपलभामहे। प्राचुर्येण बाहुल्येन तदितरलक्षणयुक्त.वाक्यविरहितत्वेन च ऋङ्मयता शाकलसंहितायामेव लभ्यते।

ऋचां वेदः, ऋग्भि र्लक्षितो वा वेदः इति ऋग्वेदपदस्य व्युत्पत्तिः कथ्यते, यत्र शाकल बाष्कल नामिके शाखे आस्तामिति वेदलक्षणग्रन्थेषु कथ्यते। तेषां ऋङ्मन्त्राणां विनियोग- समुद्गम- प्रशंसकवाक्य.समूहाऽऽत्मकौ ग्रन्थावुभौ ऐतरेय-शाङ्खायन ब्राह्मणनामकौ वर्तेते इति च जानीमः। परन्तु संप्रति अध्ययन क्रमे शाकल संहिता- ऐतरेय ब्राह्मणारण्यक ग्रन्थावेव वरिवर्त इति लोकसिद्धमेव। (बाष्कल ग्रन्थस्य अनुपलब्धिं, शाङ्खायन ग्रन्थस्य लुप्त प्रायकत्वञ्च लोकेऽधुना पश्यामः।) प्रकृतः शाकल संहिता ग्रन्थः 10,600 ऋग्भिः, 2,150 वर्गैः, 1,028 सूक्तैः, दश मण्डलैः, अथवा चतुष्षष्ठ्या अध्यायैः, अष्ट अष्टकैः विराजमानः पृथिव्यामधुना अधीयते। एकैकेन ऋषिणा तदनुयायिभिश्च संप्रवर्तितो मन्त्रराशिः तत्तदृषि नामक मण्डलतया प्रसिध्यति।

यद्यपि स्तावकत्वेन ऋचां प्रसिद्धिरस्ति, तथाऽपि पूर्वोदन्त- नामधेय- संवाद- समालोचक- तत्त्वप्रतिपादकादि बहुविषयप्रकारैः, पाठकान् श्रोतृंश्च ऋचस्सम्मोदयन्तीति अनुभवैकसंवेद्यमेव भवति। इत्थम्भूतः ऋग्वेदसंहिताग्रन्थः, बहुभिः धार्मिकैः बहुवारं मुद्रितोऽपि तत्तत्कालिकच्छात्र पठितृवर्ग प्रयोजनाय, पौनःपुन्येन बहुधा प्राकाश्यं नीयत इति मोदस्य महत आस्पदं भवति।

सम्प्रति पाठकोपकाराय श्रीमदवधूत दत्तपीठाधीश्वराणां श्री **श्री गणपति सच्चिदानन्द स्वामि** श्रीचरणानां दिव्याशीर्मञ्जूषया, दत्तपीठस्य विद्वांसः नैकान् वर्षानधीत्य ग्रन्थमेनं प्रकाशयन्तीति, तेषु गुरुकृपा वृष्टिर्नूनं भूयोभूयो भवेदिति समाशासाना निवेदयामः। तथा च वेदनिधि.ग्रन्थमालायां बहवो वैदिका ग्रन्थाः देशभाषासु मुद्राप्यन्त इति, तत्तत्सम्पादका विपश्चितो वेदविद्व.दुपकारैकपथिकाः वेदपुरुषस्वरूपं सद्गुरुवर्यं सेवमाना इति, तेषु सर्वेषु- आदिगुरो.र्दत्तात्रेयस्य वात्सल्य.दृक्पातो निरन्तरं संपद्यतामिति च प्रार्थयन्तो विरमामः।

समानी व आकूति स्समाना हृदयानि वः।।

******

## अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि

आदौ अष्टक - अध्याय संख्या (यथा - प्रथमाष्टके प्रथमाध्यायः)

वेदः - स्तरः1, शाखा - स्तरः 2, ग्रन्थः - स्तरः 3

ʊ अष्टक/ काण्ड प्रारम्भः (स्तरः 4)

अध्याय/ प्रपाठक प्रारम्भः (स्तरः 5)

सूक्त/ अनुवाक प्रारम्भः (स्तरः 6)

❀ वर्गः/ पञ्चाशत/ दशतिः (स्तरः 7)

卐 मन्त्र/ ब्राह्मण वाक्य समूहः (स्तरः 8)

✡ परिशिष्टम्  गणान्तः (ऋग्वेदे)

। वाक्यावसानः  ।। (ऋक्/ यजुः/ साम मन्त्र) वाक्यसमूहावसानः

‡ मन्द्रस्थायिना वक्तव्यम् अथवा इतः प्राक् पाठं नावसादयेत्।

ऽऽ आकार प्रश्लेषः, ऽअकार प्रश्लेषः

ॢ उपध्मानीय/जिह्वामूलीये

अनुदात्तः (यथा – अग्निमीळे), स्वरितः (यथा - पवस्व सोम),

अध्यर्ध स्वरितः (यज्ञेषु वर्धते), " दीर्घ स्वरितः (सोमो धेनुम्)

ॅ अनुस्वार आगमः (देवाॅ एह)

^ विसर्जनीय स्थलानि (यथा शिवा^ नॢ प्रदिशः)

अयावाद्यादेश स्थलम्, उच्चारणे धारणे वा विशिष्टं स्थलम्,

ँ सानुनासिक यकार/वकार/ लकार विशिष्टः (अर्धानुस्वारः) (यँ वयम्, त्र्यम्बकँ यजामहे)

ं अनुस्वारः

द्विमात्रादि कालोच्चारण संकेतः ‘2’, ‘3’, ‘4’

क्लिष्टा दशतिः☞, मन्त्रविशेषाः ✍,

# ऋग्वेद् शाकल संहिता विषय सूचिका

आविष्कार वचांसि ........ 2
विज्ञापनम् ........ 3
ऋग्वेद् शाकल संहिता विषय सूचिका ........ 5
अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि ........ 4
प्रथमं मण्डलम् ∪ प्रथमाष्टकम् ........ 8
प्रथमाष्टके प्रथमाध्यायः। (वर्गाः 1-37) ........ 8
प्रथमाष्टके द्वितीयाध्यायः। वर्गाः(1-38) ........ 18
प्रथमाष्टके तृतीयाध्यायः (वर्गाः 1-35) ........ 31
प्रथमाष्टके चतुर्थाध्यायः। वर्गाः(1-29) ........ 43
प्रथमाष्टके पञ्चमाध्यायः। वर्गाः(1-31) ........ 58
प्रथमाष्टके षष्ठाध्यायः। वर्गाः(1-32) ........ 72
प्रथमाऽष्टके सप्तमाध्यायः। वर्गाः(1-37) ........ 86
प्रथमाष्टके अष्टमाध्यायः। वर्गाः(1-26) ........ 103
∪ द्वितीयाष्टकम् ........ 116
द्वितीयाष्टके प्रथमाध्यायः। वर्गाः(1-26) ........ 116
द्वितीयाष्टके द्वितीयाध्यायः। वर्गाः(1-27) ........ 130
द्वितीयाष्टके तृतीयाध्यायः। वर्गाः(1-26) ........ 144
द्वितीयाष्टके चतुर्थाध्यायः। वर्गाः(1-29) ........ 157
द्वितीयाष्टके पञ्चमाध्यायः। वर्गाः(1-29) ........ 171
द्वितीयं मण्डलम् ........ 179
द्वितीयाष्टके षष्ठाध्यायः। वर्गाः(1-32) ........ 185
द्वितीयाष्टके सप्तमाध्यायः। (वर्गाः 1-25) ........ 201
द्वितीयाष्टके अष्टमाध्यायः। वर्गाः(1-27) ........ 215
∪ तृतीयं मण्डलम्।। ........ 221
∪ तृतीयाष्टकम् ........ 229
तृतीयाष्टके प्रथमाध्यायः। (वर्गाः 1-34) ........ 229
तृतीयाष्टके द्वितीयाध्यायः। (वर्गाः 1-26) ........ 243
तृतीयाष्टके तृतीयाध्यायः। (वर्गाः 1-31) ........ 256
तृतीयाष्टके चतुर्थाध्यायः। (वर्गाः 1-25) ........ 270
∪ चतुर्थं मण्डलम्। ........ 276
तृतीयाष्टके पञ्चमाध्यायः। (वर्गाः 1-26)।। ........ 282

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

तृतीयाष्टके षष्ठाध्यायः। (वर्गाः 1-30)।। ........ 295
तृतीयाष्टके सप्तमाध्यायः। (वर्गाः 1-27) ........ 308
तृतीयाष्टके अष्टमाध्यायः। (वर्गाः 1-26) ........ 322
पञ्चमं मण्डलम् ........ 328
चतुर्थाष्टकम् ........ 335
चतुर्थाष्टके प्रथमाध्यायः। वर्गाः(1-33) ........ 335
चतुर्थाष्टके द्वितीयाध्यायः। वर्गाः(1-28) ........ 349
चतुर्थाष्टके तृतीयाध्यायः। वर्गाः(1-31) ........ 363
चतुर्थाष्टके चतुर्थाध्यायः। वर्गाः(1-36) ........ 377
षष्ठं मण्डलम्।। ........ 393
चतुर्थाष्टके पञ्चमाध्यायः। वर्गाः(1-30) ........ 394
चतुर्थाष्टके षष्ठाध्यायः। (वर्गाः 1-25) ........ 407
चतुर्थाष्टके सप्तमाध्यायः। वर्गाः(1-35) ........ 420
चतुर्थाष्टके अष्टमाध्यायः। वर्गाः(1-32) ........ 436
पञ्चमाष्टकम् ........ 449
पञ्चमाष्टके प्रथमाध्यायः (वर्गाः 1-27) ........ 449
सप्तमं मण्डलम् ........ 460
पञ्चमाष्टके द्वितीयाध्यायः (वर्गाः 1-30) ........ 461
पञ्चमाष्टके तृतीयाध्यायः (वर्गाः 1-30) ........ 475
पञ्चमाष्टके चतुर्थाध्यायः (वर्गाः 1-30) ........ 488
पञ्चमाध्याये पञ्चमाध्यायः (वर्गाः 1-27) ........ 503
पञ्चमाष्टके षष्ठाध्यायः(वर्गाः 1-25) ........ 516
पञ्चमाष्टके सप्तमाध्यायः (वर्गाः 1-33) ........ 528
अष्टमं मण्डलम्।। ........ 533
पञ्चमाष्टके अष्टमाध्यायः (वर्गाः 1-36) ........ 540
षष्ठाष्टकम् ........ 549
षष्ठाष्टके प्रथमाध्यायः (वर्गाः 1-40) ........ 549
षष्ठाष्टके द्वितीयाध्यायः (वर्गाः 1-40) ........ 560
षष्ठाष्टके तृतीयाध्यायः (वर्गाः 1-49) ........ 571
षष्ठाष्टके चतुर्थाध्यायः (वर्गाः 1-54) ........ 586
षष्ठाष्टके पञ्चमाध्यायः (वर्गाः1-37) ........ 606
षष्ठाष्टके षष्ठाध्यायः (वर्गाः 1-38) ........ 616


Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

षष्ठाष्टके सप्तमाध्यायः (वर्गाः 1-39) ........ 628
षष्ठाष्टके अष्टमाध्यायः (वर्गाः 1-33) ........ 639
सप्तमाष्टकम् ........ 649
सप्तमाष्टके प्रथमाध्यायः (1-41) ........ 649
सप्तमाष्टके द्वितीयाध्यायः (वर्गाः 30) ........ 658
सप्तमाष्टके तृतीयाध्यायः (वर्गाः 1-26) ........ 671
सप्तमाष्टके चतुर्थाध्यायः (वर्गाः 1-28) ........ 683
सप्तमाष्टके पञ्चमाध्यायः (वर्गाः 1-33) ........ 694
दशमं मण्डलम्।। ........ 705
सप्तमाष्टके षष्ठाध्यायः (वर्गाः 1-28) ........ 708
सप्तमाष्टके सप्तमाध्यायः (वर्गाः 1-30) ........ 720
सप्तमाष्टके अष्टमाध्यायः (1-29) ........ 733
अष्टमाष्टकम् ........ 746
अष्टमाष्टके प्रथमाध्यायः (वर्गाः 1-30) ........ 746
अष्टमाष्टके द्वितीयाध्यायः (वर्गाः 1-24) ........ 759
अष्टमाष्टके तृतीयाध्यायः (वर्गाः 1-28) ........ 772
अष्टमाष्टके चतुर्थाध्यायः (वर्गाः 1-31) ........ 784
अष्टमाष्टके पञ्चमाध्यायः (वर्गाः 1-27) ........ 798
अष्टमाष्टके षष्ठाध्यायः (वर्गाः 1-27) ........ 810
अष्टमाष्टके सप्तमाध्यायः (वर्गाः 1-30) ........ 822
अष्टमाष्टके अष्टमाध्यायः (वर्गाः 1-49) ........ 842

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •



ऋग्वेद.श्श्वेतवर्ण.स्स्या-द्विभुजो रासभाननः।
अक्षमालाधर.स्सौम्यः प्रीत.श्चाध्ययनोद्यतः।।

साक्षान्मूल.प्रमाणाय विष्णो.रमिततेजसे।
आद्याय सर्ववेदाना-मृग्वेदाय नमो नमः।।

## प्रथमं मण्डलम् ॶ प्रथमाष्टकम्

### प्रथमाष्टके प्रथमाध्यायः। (वर्गाः 1-37)

1.01 अग्निमीळ इति नवर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- अग्नि- र्गायत्री।।

❀01.01.01 卐अग्नि.मीळे पुरोहितँ- यज्ञस्य देव.मृत्विजम्। होतारं रत्नधातमम्।।

卐 अग्नि॰ पूर्वेभिर् ऋषिभि- रीड्यो नूतनै रुत। स देवा᳚ एह वक्षति।।

卐 अग्निना रयि.मश्नव-त्पोष.मेव दिवेदिवे। यशसँ वीरवत्तमम्।।

卐 अग्ने यँ यज्ञ.मध्वरँ- विश्वत॰ परिभू रसि। स इद्देवेषु गच्छति।।

卐 अग्नि.र्होता कविक्रतु- स्सत्य श्चित्रश्रवस्तमः। देवो देवेभि राऽगमत्।।

❀01.01.02 卐यदङ्ग दाशुषे त्व-मग्ने भद्र.ङ्करिष्यसि। तवेत्त.त्सत्य.मङ्गिरः।।

卐 उप त्वाऽग्ने दिवेदिवे- दोषावस्त र्धिया वयम्। नमो भरन्त^ एमसि।।

卐 राजन्त.मध्वराणा-ङ्गोपा.मृतस्य दीदिविम्। वर्धमानं स्वे दमे।।

卐 स न॰ पितेव सूनवे-ऽग्ने सूपायनो भव। सचस्वा न स्स्वस्तये।।

1.02 वायवा याहीति नवर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- आद्यतृचस्य वायुः- द्वितीयतृचस्येन्द्रवायू- तृतीय तृचस्य मित्रावरुणौ- गायत्री।।

❀01.01.03 卐वाय~ वा याहि दर्श-तेमे सोमा^ अरङ्कृताः। तेषां पाहि श्रुधी हवम्।।

卐 वाय~ उक्थेभि र्जरन्ते- त्वा.मच्छा जरितारः। सुतसोमा^ अहर्विदः।।

卐 वायो~ तव प्रपृञ्चती- धेना जिगाति दाशुषे। उरूची सोमपीतये।।

卐 इन्द्रवायू~ इमे सुता^- उप प्रयोभि रा गतम्। इन्दवो वा.मुशन्ति हि।।

卐 वाय~ विन्द्रश्च चेतथ- स्सुतानाँ वाजिनीवसू~। ता वा यात.मुप द्रवत्।।

❀ 01.01.04 वाय~ विन्द्रश्च सुन्वत^- आ यात.मुप निष्कृतम्। मक्ष्वि1(इ)त्था धिया नरा।।

卐 मित्रं हुवे पूतदक्षँ- वरुणञ्च रिशादसम्। धिय.ङ्घृताचीं साधन्ता।।

卐 ऋतेन मित्रावरुणा- वृतावृधा.वृतस्पृशा। क्रतुं बृहन्त.माशाथे~।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 कवी~ नो मित्रावरुणा- तुविजाता उरुक्षया। दक्ष.न्दधाते~ अपसम्।।

1.03 अश्विना यज्वरीरिति द्वादशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- आद्य तृचस्याश्विनौ- द्वितीयतृचस्येन्द्र- स्तृतीयतृचस्य विश्वे देवा-श्चतुर्थतृचस्य सरस्वती- गायत्री।।

❀ 01.01.05 卐अश्विना यज्वरी.रिषो - द्रवत्पाणी~ शुभस्पती~। पुरुभुजा चनस्यतम्।।

卐 अश्विना पुरुदंससा - नरा शवीरया धिया। धिष्ण्या वनत.ङ्गिरः।।

卐 दस्रा युवाकव स्सुता^- नासत्या वृक्तबर्हिषः। आ यातं रुद्रवर्तनी~।।

卐 इन्द्रा ऽऽयाहि चित्रभानो~- सुता^ इमे त्वायवः। अण्वीभि स्तना पूतासः।।

卐 इन्द्राऽऽ याहि धियेषितो- विप्रजूत स्सुतावतः। उप ब्रह्माणि वाघतः।।

卐 इन्द्रा ऽऽयाहि तूतुजान^- उप ब्रह्माणि हरिवः। सुते दधिष्व न.श्चनः।।

❀01.01.06 卐 ओमास श्चर्षणीधृतो - विश्वे देवास^ आ गत। दाश्वांसो दाशुष स्सुतम्।।

卐 विश्वे देवासो अप्तुर- स्सुतमा गन्त तूर्णयः। उस्राइव स्वसराणि।।

卐 विश्वे देवासो अस्रिध- एहिमायासो अद्रुहः। मेध.ञ्जुषन्त वह्नयः।।

卐 पावका न स्सरस्वती - वाजेभि र्वाजिनीवती। यज्ञँ वष्टु धियावसुः।।

卐 चोदयित्री सूनृताना-श्चेतन्ती सुमतीनाम्। यज्ञ.न्दधे सरस्वती।।

卐 महो अर्ण स्सरस्वती- प्र चेतयति केतुना। धियो विश्वा^ वि राजति।।

1.04 सुरूपकृत्नुमिति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा-इन्द्रो- गायत्री।।

❀01.01.07 卐सुरूपकृत्नु.मूतये- सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि।।

卐 उप न स्सवनाऽऽगहि- सोमस्य सोमपाः पिब। गोदा^ इद्रेवतो मदः।।

卐 अथा ते अन्तमानाँ- विद्याम सुमतीनाम्। मा नो अति ख्य^ आ गहि।।

卐 परेहि विग्र.मस्तृत- मिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य^ आ वरम्।।

卐 उत ब्रुवन्तु नो निदो- निरन्यत श्चिदारत। दधाना^ इन्द्र इद्दुवः।।

❀01.01.08 卐 उत न.स्सुभगाँ अरि- र्वोचेयु र्दस्म कृष्टयः। स्यामे.दिन्द्रस्य शर्मणि।।

卐 एमाशु.माशवे भर- यज्ञश्रिय.न्नृमादनम्। पतय.न्मन्दयत्सखम्।।

卐 अस्य पीत्वा शतक्रतो~ - घनो वृत्राणा.मभवः। प्राऽऽवो वाजेषु वाजिनम्।।

卐 तन्त्वा वाजेषु वाजिनँ - वाजयाम श्शतक्रतो~। धनाना.मिन्द्र सातये।।

卐 यो रायो3(ओ)ऽवनि- र्महा.न्त्सुपार स्सुन्वत स्सखा। तस्मा इन्द्राय गायत।।

1.04 आत्वेतेति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- इन्द्रो- गायत्री।।

❀ 01.01.09 卐 आ त्वेता निऽषीद-तेन्द्र.मभि प्र गायत। सखाय स्स्तोमवाहसः।।

卐 पुरूतमं पुरूणा-मीशानँ वार्याणाम्। इन्द्रं सोमे सचा सुते।।

卐 स घा नो योग आ भुव-त्स^ राये स पुरन्ध्याम्। गम.द्वाजेभि.रा स नः।।

卐 यस्य संस्थे न वृण्वते- हरी~ समत्सु शत्रवः। तस्मा इन्द्राय गायत।।

卐 सुतपाव्ने सुता^ इमे- शुचयो यन्ति वीतये। सोमासो दध्याशिरः।।

❀01.01.10 卐 त्वं सुतस्य पीतये - सद्यो वृद्धो अजायथाः। इन्द्र ज्यैष्ठ्याय सुक्रतो~।।

卐 आ त्वा विश.न्त्वाशव- स्सोमास इन्द्र गिर्वणः। शन्ते सन्तु प्रचेतसे।।

卐 त्वां स्तोमा^ अवीवृध-न्त्वा.मुक्था शतक्रतो~। त्वाँ वर्धन्तु नो गिरः।।

卐 अक्षितोति स्सनेदिमँ - वाज.मिन्द्र स्सहस्रिणम्। यस्मि.न्विश्वानि पौंस्या।।

卐 मा नो मर्ता^ अभि द्रुह-न्तनूना.मिन्द्र गिर्वणः। ईशानो यवया वधम्।।

1.05 युञ्जन्तीति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- आद्यानां तिसृणामिन्द्र-स्तत ष्षण्णां मरुतो (वीळुचिदिन्द्रेणेति द्वयोरिन्द्रश्च वा) दशम्या इन्द्रो- गायत्री।।

❀01.01.11 卐 युञ्जन्ति ब्रध्न.मरुष-ञ्चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि।।

卐 युञ्ज.न्त्यस्य काम्या- हरी~ विपक्षसा रथे। शोणा धृष्णू~ नृवाहसा।।

卐 केतु.ङ्कृण्व.न्नकेतवे- पेशो मर्या^ अपेशसे। स.मुषद्भि.रजायथाः।।

卐 आदह स्वधा.मनु- पुन र्गर्भत्व.मेरिरे। दधाना^ नाम यज्ञियम्।।

卐 वीळु चि.दारुजत्नुभि- र्गुहा चिदिन्द्र वह्निभिः। अविन्द^ उस्रिया^ अनु।।

❀01.01.12 卐देवयन्तो यथा मति-मच्छा विदद्वसु.ङ्गिरः। महा.मनूषत श्रुतम्।।

卐 इन्द्रेण सं हि दृक्षसे - सञ्जग्मानो अबिभ्युषा। मन्दू~ समानवर्चसा।।

卐 अनवद्यै.रभिद्युभि- र्मख.स्सहस्व.दर्चति। गणै.रिन्द्रस्य काम्यैः।।

卐 अतः परिज्म.न्नागहि- दिवो वा रोचना.दधि। समस्मि.न्नृञ्जते गिरः।।

卐 इतो वा साति.मीमहे- दिवो वा पार्थिवा.दधि। इन्द्रं महो वा रजसः।।

☬ 1.07 इन्द्रमिदिति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- इन्द्रो-गायत्री।।

❀01.01.13 卐इन्द्र.मिद्गाथिनो बृह-दिन्द्र.मर्केभि.रर्किणः। इन्द्रँ वाणी रनूषत।।

卐 इन्द्र^ इद्धर्यो स्सचा- संमिश्ल^ आ वचोयुजा। इन्द्रो वज्री हिरण्ययः।।

卐 इन्द्रो दीर्घाय चक्षस- आ सूर्यं रोहय.द्दिवि। वि गोभि रद्रि.मैरयत्।।

卐 इन्द्र वाजेषु नोऽव- सहस्रप्रधनेषु च। उग्र^ उग्राभि रूतिभिः।।

卐 इन्द्रँ वयं महाधन- इन्द्र मर्भे हवामहे। युजँ वृत्रेषु वज्रिणम्।।

❀01.01.14 卐 स नो वृष.न्नमु.ञ्चरुं- सत्रादाव.न्नपा वृधि। अस्मभ्य.मप्रतिष्कुतः।।

卐 तुञ्जेतुञ्जे य उत्तरे- स्तोमा^ इन्द्रस्य वज्रिणः। न विन्धे अस्य सुष्टुतिम्।।

卐 वृषा यूथेव वंसगः- कृष्टी.रिय.त्र्योजसा। ईशानो अप्रतिष्कुतः।।

卐 य^ एक श्चर्षणीनाँ- वसूना.मिरज्यति। इन्द्रः पञ्च क्षितीनाम्।।

卐 इन्द्रँ वो विश्वत.स्परि- हवामहे जनेभ्यः। अस्माक.मस्तु केवलः।।

☬ 1.08 एन्द्रेति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- इन्द्रो-गायत्री

❀01.01.15 卐एन्द्र सानसिं रयिं - सजित्वानं सदासहम्। वर्षिष्ठ.मूतये भर।।

卐 नि येन मुष्टिहत्यया - नि वृत्रा रुणधामहै। त्वोतासो न्यर्वता।।

卐 इन्द्र त्वोतास^ आ वयँ- वज्र.ङ्घना ददीमहि। जयेम सँ युधि स्पृधः।।

卐 वयं शूरेभि रस्तृभि- रिन्द्र त्वया युजा वयम्। सासह्याम पृतन्यतः।।

卐 महाँ इन्द्रः परश्च नु - महित्व.मस्तु वज्रिणे। द्यौर्न प्रथिना शवः।।

❀01.01.16 卐समोहे वा य आशंत- नर.स्तोकस्य सनितौ। विप्रासो वा धियायवः।।

卐 य॰ कुक्षि स्सोमपातम- स्समुद्र^इव पिन्वते। उर्वी.रापो न काकुदः।।

卐 एवा ह्यस्य सूनृता- विरप्शी गोमती मही। पक्वा शाखा न दाशुषे।।

卐 एवा हि ते विभूतय^- ऊतय^ इन्द्र मावते। सद्यश्चि.त्सन्ति दाशुषे।।

卐 एवा ह्यस्य काम्या- स्तोम^ उक्थञ्च शंस्या। इन्द्राय सोमपीतये।।

☬ 1.09 इन्द्रेहीति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- इन्द्रो- गायत्री

❀01.01.17 卐इन्द्रेहि मत्स्यन्धसो- विश्वेभि स्सोमपर्वभिः। महा९ अभिष्टि रोजसा।।

卐 एमेनं सृजता सुते - मन्दि.मिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये।।

卐 मत्स्वा सुशिप्र मन्दिभि- स्स्तोमेभि र्विश्वचर्षणे। सचैषु सवनेष्वा।।

卐 असृग्र.मिन्द्र ते गिर॰- प्रति त्वा.मु.दहासत। अजोषा^ वृषभं पतिम्।।

卐 सञ्चोदय चित्र.मर्वा-ग्राध^ इन्द्र वरेण्यम्। अस.दित्ते विभु प्रभु।।

❀01.01.18 卐 अस्मा.न्त्सु तत्र चोद-येन्द्र राये रभस्वतः। तुविद्युम्न यशस्वतः।।

卐 सङ्गोम.दिन्द्र वाजव-दस्मे पृथु श्रवो बृहत्। विश्वाऽऽयु र्धेह्यऽक्षितम्।।

卐 अस्मे धेहि श्रवो बृह-द्युम्नं सहस्रसातमम्। इन्द्र ता^ रथिनी रिषः।।

卐 वसो रिन्द्रँ वसुपति-ङ्गीर्भि र्गृणन्त^ ऋग्मियम्। होम गन्तार.मूतये।।

卐 सुतेसुते न्योकसे- बृह.द्बृहत एदरिः। इन्द्राय शूष.मर्चति।।

☬ 1.10 गायन्तीति द्वादशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दा- इन्द्रोऽनुष्टुप्।।

❀01.01.19 卐गायन्ति त्वा गायत्रिणो-ऽर्च.न्त्यर्क.मर्किणः। ब्रह्माण.स्त्वा शतक्रत-~ उ.द्वंशमिव येमिरे।।

卐 यत्सानो.स्सानु.माऽरुह-द्भूर्यऽस्पष्ट कर्त्वम्। त.दिन्द्रो अर्थ.ञ्चेतति- यूथेन वृष्णि रेजति।।

卐 युक्ष्वा हि केशिना हरी~- वृषणा कक्ष्यप्रा। अथा न^ इन्द्र सोमपा^- गिरा.मुपश्रुति.ञ्चर।।

卐 एहि स्तोमा९ अभि स्वरा-ऽभि गृणीह्या रुव। ब्रह्म च नो वसो~ स-चेन्द्र यज्ञ.ञ्च वर्धय।।

Sri Sachchidananda Avadhoota Datta Peetham

卐 उक्थ.मिन्द्राय शंस्यँ - वर्धनं पुरुनिःष्षिधे। शक्रो यथा सुतेषु णो- रारणं.त्सख्येषु च।।

卐 तमि.त्सखित्व ईमहे- तं राये तं सुवीर्ये। स शक्र^ उत नं.श्शक- दिन्द्रो वसु दयमानः।।

❀01.01.20 卐 सुविवृतं सुनिरज-मिन्द्र त्वादातमि.द्यशः। गवा.मप व्रजँ वृधि- कृणुष्व राधो अद्रिवः।।

卐 नहि त्वा रोदसी उभे~- ऋघायमाण.मिन्वतः। जेष स्स्वर्वती रप- स्सङ्गा^ अस्मभ्य.न्धूनुहि।।

卐 आश्रुत्कर्ण श्रुधी हव-न्नू चिद्दधिष्व मे गिरः। इन्द्र स्तोम.मिमं मम- कृष्वा युज श्चिदन्तरम्।।

卐 विद्मा हि त्वा वृषन्तमँ- वाजेषु हवनश्रुतम्। वृषन्तमस्य हूमह- ऊतिं सहस्रसातमाम्।।

卐 आ तू न^ इन्द्र कौशिक- मन्दसान स्सुतं पिब। नव्य.मायुः प्र सू तिर- कृधी सहस्रसा.मृषिम्।।

卐 परि त्वा गिर्वणो गिर^- इमा^ भवन्तु विश्वतः। वृद्धाऽऽयु.मनु वृद्धयो- जुष्टा^ भवन्तु जुष्टयः।।

1.11 इन्द्रँ विश्वा इत्यष्टर्चस्य सूक्तस्य, जेता माधुच्छन्दस-इन्द्रोऽनुष्टुप्।।

❀01.01.21 卐इन्द्रँ विश्वा^ अवीवृध-न्त्समुद्रव्यचस.ङ्गिरः। रथीतमं रथीनाँ- वाजानां सत्पतिं पतिम्।।

卐 सख्ये त इन्द्र वाजिनो- मा भेम शवस.स्पते। त्वामभि प्र णोनुमो- जेतार.मपराजितम्।।

卐 पूर्वी रिन्द्रस्य रातयो- न वि दस्य.न्त्यूतयः। यदी वाजस्य गोमत- स्स्तोतृभ्यो मंहते मघम्।।

卐 पुरां भिन्दु युवा कवि- रमितौजा^ अजायत। इन्द्रो विश्वस्य कर्मणो- धर्ता वज्री पुरुःष्टुतः।।

卐 त्वँ वलस्य गोमतो-ऽपाव रद्रिवो बिलम्। त्वान्देवा^ अबिभ्युष- स्तुज्यमानास आविषुः।।

卐 तवाहं शूर रातिभिः- प्रत्यायं सिन्धु .मावदन्न्। उपाऽतिष्ठन्त गिर्वणो- विदुःष्टे तस्य कारवः।।

卐 मायाभि रिन्द्र मायिन-न्त्वं शुष्ण.मवातिरः। विदुःष्टे तस्य मेधिरा- स्तेषां श्रवां.स्युत्तिर ।।

卐 इन्द्र.मीशान.मोजसा-ऽभि स्तोमा^ अनूषत। सहस्रँ यस्य रातय^- उत वा सन्ति भूयसीः।।

1.12 अग्निन्दूतमिति द्वादशर्चस्य सूक्तस्य, काण्वो मेधातिथि- रग्नि- र्गायत्री-अग्निनाऽग्निरित्यस्य निर्मन्थ्याऽऽहवनीयावग्नी देवता।।

❀01.01.22 卐अग्नि.न्दूतँ वृणीमहे- होतारँ विश्व.वेदसम्। अस्य यज्ञस्य सुक्रतुम्।।

卐 अ॒ग्निम॑ग्निं॒ हवी॑मभिः॒- स्सदा॑ हवन्त वि॒श्पति॑म्। ह॒व्यवा॑हं पुरुप्रि॒यम्॥

卐 अग्ने॑ दे॒वाँ इ॒हाऽऽव॑ह- जज्ञा॒नो वृ॒क्तब॑र्हिषे। असि॒ होता॑ न॒ ईड्यः॑॥

卐 ताँ उ॑श॒तो वि बो॑धय- यद॑ग्ने॒ यासि॑ दू॒त्य॑म्। दे॒वै रास॑त्सि ब॒र्हिषि॑॥

卐 घृता॑ऽऽहवन दीदिवः॒- प्रति॑ ष्म॒ रिष॑तो दह। अग्ने॒ त्वं र॑क्ष॒स्विनः॑॥

卐 अ॒ग्निना॒ऽग्नि स्सम॑िध्यते- क॒विर्गृ॒हप॑ति॒र्युवा॑। ह॒व्यवा॒ड्जु॒ह्वा᳚स्यः॥

❀01.01.23 卐क॒वि.म॒ग्नि.मुप॑ स्तुहि- स॒त्यध॑र्माण.मध्व॒रे। दे॒व.म॑मीव॒चात॑नम्॥

卐 य स्त्वा.म॑ग्ने ह॒विष्प॑ति- र्दू॒त.न्दे॑व स॒पर्य॑ति। तस्य॑ स्म प्रावि॒ता भ॑व॥

卐 यो अ॒ग्नि.न्दे॒ववी॑तये- ह॒विष्मा॑ँ आ॒विवा॑सति। तस्मै॑ पावक मृळय॥

卐 स नः॑ पावक दीदि॒वो-ऽग्ने॑ दे॒वाँ इ॒हाऽऽव॑ह। उप॑ य॒ज्ञं ह॒वि.श्च॑ नः॥

卐 स न॒ स्स्तवा॑न॒ आ भ॑र- गाय॒त्रेण॒ नवी॑यसा। र॒यिं वी॒रव॑ती.मि॒षम्॥

卐 अग्ने॑ शु॒क्रेण॑ शो॒चिषा॒- विश्वा॑भि र्दे॒वहू॑तिभिः। इ॒मं स्तोम॑.ञ्जुषस्व नः॥

1.13 सुसमिद्ध इति द्वादशर्चस्य सूक्तस्य, काण्वो मेधातिथिः- प्रथमाया इध्मो(समिद्धोऽग्निर्वा)- द्वितीयाया स्तनूनपात्-तृतीयाया नराशंस-श्चतुर्थ्या इळः-पञ्चम्या बर्हिः-पष्ठ्या देव्यो द्वार- स्सप्तम्या उषासानक्ता-अष्टम्या दैव्यौ होतारौ-(प्रचेतसावितिगुणः) नवम्या स्सरस्वतीळाभारत्यो-दशम्यास्त्वाष्टा- एकादश्या वनस्पतिः-द्वादश्या स्स्वाहाकृतयो देवताः- गायत्रीछन्दः (एतदाप्रीसूक्तं)॥

❀卐 01.01.24 卐सुस॑मिद्धो न॒ आ व॑ह- दे॒वाँ अ॑ग्ने ह॒विष्म॑ते। होतः॑ पावक॒ यक्षि॑ च॥

卐 मधु॑मन्त.न्तनूनपा-द्य॒ज्ञ.न्दे॒वेषु॑ नः कवे। अ॒द्या कृ॑णुहि वी॒तये॑॥

卐 न॒रा॒शंस॑.मि॒ह प्रि॒य-म॒स्मिन्य॒ज्ञ उप॑ ह्वये। मधु॑जिह्वं ह॒वि॒ष्कृत॑म्॥

卐 अग्ने॑ सु॒खत॑मे॒ रथे॑- दे॒वाँ ई॑ळि॒त आ व॑ह। असि॒ होता॒ मनु॑र्हितः॥

卐 स्तृ॒णी॒त ब॒र्हि रा॑नु॒ष-ग्घृ॒तपृ॑ष्ठं मनीषिणः। यत्रा॒ऽमृत॑स्य॒ चक्ष॑णम्॥

卐 वि श्र॑यन्ता.मृता॒वृधो॒- द्वारो॑ दे॒वी र॑स॒श्चतः॑। अ॒द्या नू॒न.ञ्च॒ यष्ट॑वे॥

❀01.01.25 卐नक्तो॒षासा॑ सु॒पेश॑सा-ऽस्मि.न्य॒ज्ञ उप॑ ह्वये। इ॒द.न्नो॑ ब॒र्हि रा॒सदे॑॥

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 ता सुजिह्वा उप ह्वये- होतारा दैव्या कवी~। यज्ञ.न्नो यक्षता.मिमम्।।

卐 इळा सरस्वती मही- तिस्रो देवी मयोभुवः। बर्हि स्सीद.न्त्वस्रिधः।।

卐 इह त्वष्टार.मग्रियँ- विश्वरूप.मुप ह्वये। अस्माक.मस्तु केवलः।।

卐 अव सृजा वनस्पते- देव देवेभ्यो हविः। प्र दातु रस्तु चेतनम्।।

卐 स्वाहा यज्ञ.ङ्कृणोत-नेन्द्राय यज्वनो गृहे। तत्र देवा॰ उप ह्वये।।

1.14 1-4-3 ऐभिरग्नइति द्वादशर्चस्य सूक्तस्य, काण्वो मेधातिथि- र्विश्वेदेवा गायत्री- (वैश्वदेवत्वं सूक्तभेदप्रयोगे यल्लिङ्गं सा देवतेति पक्षे आद्ययो र्द्वयोरग्निः-तृतीयाया विश्वेदेवाः-ततो नवाना मग्निः-एवं द्वादशर्चम्)।।

01.01.26 卐ऐभि.रग्ने दुवो गिरो- विश्वेभि स्सोमपीतये। देवेभि र्याहि यक्षि च।।

卐 आ त्वा कण्वा^ अहूषत- गृणन्ति विप्र ते धियः। देवेभि रग्न आ गहि।।

卐 इन्द्रवायू~ बृहस्पतिं- मित्राऽग्निं पूषणं भगम्। आदित्या.न्मारुत.ङ्गणम्।।

卐 प्र वो भ्रियन्त इन्दवो- मत्सरा^ मादयिष्णवः। द्रप्सा^ मध्व श्चमूषदः।।

卐 ईळते त्वामवस्यव॰- कण्वासो वृक्तबर्हिषः। हविष्मन्तो अर.ङ्कृतः।।

卐 घृतपृष्ठा^ मनोयुजो- ये त्वा वहन्ति वह्नयः। आ देवा.न्त्सोमपीतये।।

01.01.27 卐तान्यजत्रा॰ ऋतावृधो-ऽग्ने पत्नीवत स्कृधि। मध्व स्सुजिह्व पायय।।

卐 ये यजत्रा^ य ईड्या- स्ते ते पिबन्तु जिह्वया। मधो रग्ने वष.ङ्कृति।।

卐 आकीं सूर्यस्य रोचना-द्विश्वा.न्देवा॰ उषर्बुधः। विप्रो होतेह वक्षति।।

卐 विश्वेभि स्सोम्यं- मध्वग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिः।।

卐 त्वं होता मनुर्हितो-ऽग्ने यज्ञेषु सीदसि। सेम.न्नो अध्वरँ यज।।

卐 युक्ष्वा ह्यरुषी रथे- हरितो देव रोहितः। ताभि र्देवा॰ इहाऽऽवह।।

1.15 इन्द्र सोममिति द्वादशर्चस्य सूक्तस्य, काण्वो मेधातिथिः-आद्यानां षण्णामिन्द्रो मरुतस्त्वष्टाऽग्निरिंद्रो मित्रावरुणौ ततश्चतसृणा न्द्रविणोदा अग्निः-एकादश्या अश्विनौ-द्वादश्या अग्निर्गायत्री-(ऋतुदेवता एताः)।।

01.01.28 इन्द्र सोमं पिब ऋतुना-ऽऽत्वा विश.न्त्विन्दवः। मत्सरास स्त.दोकसः।।

मरुतः पिबत ऋतुना- पोत्रा.द्यज्ञं पुनीतन। यूयं हि ष्ठा सुदानवः।।

अभि यज्ञ.ङ्गृणीहि नो- ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि।।

अग्ने देवा इहाऽऽवह- सादया योनिषु त्रिषु। परि भूष पिब ऋतुना।।

ब्राह्मणा.दिन्द्र राधसः- पिबा सोम.मृतू रनु। तवेद्धि सख्य.मस्तृतम्।।

युव.न्दक्ष.न्धृतव्रत- मित्रावरुण दूळभम्। ऋतुना यज्ञ.माशाथे।।

01.01.29 द्रविणोदा द्रविणसो- ग्रावहस्तासो अध्वरे। यज्ञेषु देव.मीळते।।

द्रविणोदा ददातु नो- वसूनि यानि शृण्विरे। देवेषु ता वनामहे।।

द्रविणोदाः पिपीषति- जुहोत प्र च तिष्ठत। नेष्ट्रा.दृतुभि रिष्यत।।

यत्त्वा तुरीय.मृतुभि- र्द्रविणोदो यजामहे। अध स्मा नो ददि र्भव।।

अश्विना पिबतं मधु- दीद्यग्नी शुचिव्रता। ऋतुना यज्ञवाहसा।।

गार्हपत्येन सन्त्य- ऋतुना यज्ञनी रसि। देवा.न्देवयते यज।।

1.16 आत्वावहन्त्विति नवर्चस्य सूक्तस्य, काण्वो मेधातिथि- रिन्द्रो- गायत्री।।

01.01.30 आ त्वा वहन्तु हरयो- वृषणं सोमपीतये। इन्द्र त्वा सूरचक्षसः।।

इमा धाना घृतस्नुवो- हरी इहोप वक्षतः। इन्द्रं सुखतमे रथे।।

इन्द्रं प्रात र्हवामह- इन्द्रं प्रय.त्यध्वरे। इन्द्रं सोमस्य पीतये।।

उप न स्सुतमा गहि- हरिभि रिन्द्र केशिभिः। सुते हि त्वा हवामहे।।

सेमन्न स्स्तोममा गह्यु-पेदं सवनं सुतम्। गौरो न तृषितः पिब।।

01.01.31 इमे सोमास इन्दव- स्सुतासो अधि बर्हिषि। ता इन्द्र सहसे पिब।।

卐 अयन्ते स्तोमो अग्रियो- हृदिस्पृ.गस्तु शन्तमः। अथा सोमं सुतं पिब।।

卐 विश्वमि.त्सवनं सुत-मिन्द्रो मदाय गच्छति। वृत्रहा सोमपीतये।।

卐 सेमन्नः कामम्मा पृण- गोभि रश्वै श्शतक्रतो~। स्तवाम त्वा स्वाध्यः।।

1.17 इन्द्रावरुणयोरिति नवर्चस्य सूक्तस्य, काण्वो मेधातिथि- रिन्द्रावरुणौ- गायत्री- युवाकु हि द्वृचौ पादनिचृतौ (इन्द्रस्सहस्रेति ह्रसीयसी वा)।।

01.01.32 卐इन्द्रावरुणयो रहं- सम्राजो रव^ आ वृणे। ता नो मृळात^ ईदृशे।।

卐 गन्तारा हि स्थोऽवसे- हवँ विप्रस्य मावतः। धर्तारा चर्षणीनाम्।।

卐 अनुकाम.न्तर्पयेथा-मिन्द्रावरुण राय^ आ। ता वा.न्नेदिष्ठ.मीमहे।।

卐 युवाकु हि शचीनाँ- युवाकु सुमतीनाम्। भूयाम वाजदान्नाम्।।

卐 इन्द्र स्सहस्रदान्नाँ- वरुण श्शंस्यानाम्। क्रतु र्भव.त्युक्थ्यः।।

01.01.33 卐तयो रिदवसा वयं- सनेम नि च धीमहि। स्यादुत प्ररेचनम्।।

卐 इन्द्रावरुण वामहं- हुवे चित्राय राधसे। अस्मा.न्त्सु जिग्युष.स्कृतम्।।

卐 इन्द्रावरुण नू नु वां- सिषासन्तीषु धीष्वा। अस्मभ्यं शर्म यच्छतम्।।

卐 प्र वा.मश्नोतु सुष्टुति- रिन्द्रावरुण यां हुवे। या मृधाथे~ सधस्तुतिम्।।

1.18 सोमानमिति नवर्चस्य सूक्तस्य, काण्वो मेधातिथिः-आद्याना न्तिसृणां ब्रह्मणस्पतिः-चतुर्थ्या इन्द्र सोम ब्रह्मणस्पतयः-पञ्चम्या इन्द्रसोमब्रह्मणस्पतयो दक्षिणा च-ततश्चतसृणां सदसस्पतिः (अन्त्याया नराशंसो वा) गायत्री।।

01.01.34 卐सोमानं स्वरण-ङ्कृणुहि ब्रह्मण.स्पते। कक्षीवन्तँ य^ औशिजः।।

卐 यो रेवान्यो अमीवहा- वसुवि.त्पुष्टिवर्धनः। स न स्सिषक्तु यस्तुरः।।

卐 मा न श्शंसो अररुषो- धूर्तिः प्रण.ङ्मर्त्यस्य। रक्षा णो ब्रह्मण.स्पते।।

卐 स घा वीरो न रिष्यति- यमिन्द्रो ब्रह्मण.स्पतिः। सोमो हिनोति मर्त्यम्।।

卐 त्वन्तं ब्रह्मण.स्पते- सोम^ इन्द्रश्च मर्त्यम्। दक्षिणा पात्वंहसः।।

❀01.01.35 卐सदस.स्पति.मद्भुतं- प्रिय.मिन्द्रस्य काम्यम्। सनिं मेधा.मयासिषम्।।

卐 यस्मा.दृते न सिध्यति- यज्ञो विपश्चितश्चन। स धीनाँ योग.मिन्वति।।

卐 आदृध्नोति हविष्कृतिं- प्राञ्च.ङ्कृणो.त्यध्वरम्। होत्रा देवेषु गच्छति।।

卐 नराशंसं सुधृष्टम-मपश्यं सप्रथस्तमम्। दिवो न सद्ममखसम्।।

1.19 प्रतित्यमिति नवर्चस्य सूक्तस्य, काण्वो मेधातिथि-रग्निामरुतो-गायत्री।।

❀01.01.36 卐प्रति त्यञ्चारु.मध्वर-ङ्गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि।।

卐 नहि देवो न मर्त्यो- मह.स्तव क्रतुं परः। मरुद्भि रग्न आ गहि।।

卐 ये महो रजसो विदु- र्विश्वे देवासो अद्रुहः। मरुद्भि रग्न आ गहि।।

卐 य उग्रा^ अर्क.मानृचु- रनाधृष्टास^ ओजसा। मरुद्भि रग्न आ गहि।।

卐 ये शुभ्रा^ घोरवर्पस- स्सुक्षत्रासो रिशादसः। मरुद्भि रग्न आ गहि।।

❀01.01.37 卐ये नाकस्याधि रोचने- दिवि देवास^ आसते। मरुद्भि रग्न आ गहि।।

卐 य ईङ्खयन्ति पर्वता-न्तिर स्समुद्र.मर्णवम्। मरुद्भि रग्न आ गहि।।

卐 आ ये तन्वन्ति रश्मिभि- स्तिर.स्समुद्र.मोजसा। मरुद्भि रग्न आ गहि।।

卐 अभि त्वा पूर्वपीतये- सृजामि सोम्यं मधु। मरुद्भि रग्न आ गहि।।

Sri Sachchidananda Avadhoota Datta Peetham

इति प्रथमाध्याय स्समाप्तः ।।

## प्रथमाष्टके द्वितीयाध्यायः। वर्गाः(1-38)

1.20 अयन्देवायेत्यष्टर्चस्य सूक्तस्य, काण्वो मेधातिथि-र्ऋभवो- गायत्री।।

❀01.02.01 अय.न्देवाय जन्मने- स्तोमो विप्रेभि रासया। अकारि रत्नधातमः।।

卐 य इन्द्राय वचोयुजा- ततक्षु र्मनसा हरी~। शमीभि र्यज्ञ.माशत।।

卐 तक्ष.न्नासत्याभ्यां- परिज्मानं सुखं रथम्। तक्ष.न्धेनुं सबर्दुघाम्।।

卐 युवाना पितरा पुन~- स्सत्यमन्त्रा^ ऋजूयवः। ऋभवो विष्ट्यऽक्रत।।

卐 सँ वो मदासो अग्मते-न्द्रेण च मरुत्वता। आदित्येभिश्च राजभिः।।

❀01.02.02 卐उत त्यञ्चमस.न्नव-न्त्वष्टु र्देवस्य निष्कृतम्। अकर्त चतुरः पुनः~।।

卐 ते नो रत्नानि धत्तन- त्रिरा साप्तानि सुन्वते। एकमेकं सुशस्तिभिः।।

卐 अधारयन्त वह्न-योऽभजन्त सुकृत्यया। भाग.न्देवेषु यज्ञियम्।।

1.21 इहेन्द्राग्नी इति षळृचस्य सूक्तस्य, काण्वो मेधातिथि-रिन्द्राग्नी- गयत्री।।

❀01.02.03 卐इहेन्द्राग्नी~ उप ह्वये- तयोरि.त्स्तोम.मुश्मसि। ता सोमं सोमपातमा।।

卐 ता यज्ञेषु प्र शंसते-न्द्राग्नी~ शुम्भता नरः। ता गायत्रेषु गायत।।

卐 ता मित्रस्य प्रशस्तय- इन्द्राग्नी~ ता हवामहे। सोमपा सोमपीतये।।

卐 उग्रा सन्ता हवामह- उपेदं सवनं सुतम्। इन्द्राग्नी~ एह गच्छताम्।।

卐 ता महान्ता सदस्पती~- इन्द्राग्नी~ रक्ष^ उब्जतम्। अप्रजा स्सन्त्वत्रिणः।।

卐 तेन सत्येन जागृत-मधि प्रचेतुने पदे। इन्द्राग्नी~ शर्म यच्छतम्।।

1.22 प्रातर्युजेत्येकविंशत्यृचस्य सूक्तस्य, काण्वो मेधातिथिः-आद्यानाञ्चतसृणामश्विनौ-ततश्चतसृणां सविता-ततो द्वयोरग्निः-तत एकस्या देव्यः-तत एकस्या इन्द्राणी वरुणान्यग्नाय्यः-ततो द्वयोर्द्यावापृथिव्यौ-तत एकस्याः पृथिवी-तत ष्षण्णाँ विष्णुः (अतो देवा इत्यस्या देवा वा) गायत्री-( कात्यायनीय सर्वानुक्रमण्यां अतो देवा इत्यस्याः ऋग्देवी देवदेवत्या वैष्णवी वा )

❀01.02.04 卐प्रातर्युजा वि बोधया-श्विनावेह गच्छताम्। अस्य सोमस्य पीतये।।

卐 या सुरथा रथीत-मोभा देवा दिविस्पृशा। अश्विना ता हवामहे।।

卐 या वाङ्कशा मधुम-त्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम्।।

卐 नहि वामस्ति दूरके- यत्रा रथेन गच्छथः। अश्विना सोमिनो गृहम्।।

卐 हिरण्यपाणि.मूतये- सवितार.मुप ह्वये। स चेत्ता देवता पदम्।।

❀01.02.05 卐अपा.न्नपात.मवसे- सवितार.मुप स्तुहि। तस्य व्रता.न्युश्मसि।।

卐 विभक्तारं हवामहे- वसो श्चित्रस्य राधसः। सवितार.न्नृचक्षसम्।।

卐 सखाय^ आ नि षीदत- सविता स्तोम्यो नु नः। दाता राधांसि शुम्भति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अग्ने पत्नी रिहाऽऽवह- देवाना.मुशती रुप। त्वष्टारं सोमपीतये।।

卐 आ ग्ना^ अग्न इहावसे- होत्राँ यविष्ठ भारतीम्। वरूत्री.न्धिषणाँ वह।।

❀01.02.06 卐अभि नो देवी रवसा- मह श्शर्मणा नृपत्नीः। अच्छिन्नपत्रा स्सचन्ताम्।।

卐 इहेन्द्राणी.मुप ह्वये- वरुणानीं स्वस्तये। अग्नायीं सोमपीतये।।

卐 मही द्यौः पृथिवी च न^- इमँ यज्ञं मिमिक्षताम्। पिपृता.न्नो भरीमभिः।।

卐 तयो.रिद्धृतव.त्पयो- विप्रा रिहन्ति धीतिभिः। गन्धर्वस्य ध्रुवे पदे।।

卐 स्योना पृथिवि भवा-नृक्षरा निवेशनी। यच्छा न श्शर्म सप्रथः।।

❀01.02.07 卐अतो देवा^ अवन्तु नो- यतो विष्णु र्विचक्रमे। पृथिव्या स्सप्त धामभिः।।

卐 इदँ विष्णु र्वि चक्रमे- त्रेधा नि दधे पदम्। समूळ्ह.मस्य पांसुरे।।

卐 त्रीणि पदा वि चक्रमे- विष्णु र्गोपा^ अदाभ्यः। अतो धर्माणि धारयन्न्।।

卐 विष्णोः कर्माणि पश्यत- यतो व्रतानि पस्पशे। इन्द्रस्य युज्य स्सखा।।

卐 तद्विष्णोः परमं पदं- सदा पश्यन्ति सूरयः। दिवीव चक्षु राततम्।।

卐 तद्विप्रासो विपन्यवो- जागृवांस स्समिन्धते। विष्णो र्यत्परमं पदम्।।

☸ 1.23 तीव्रा स्सोमास इति चतुर्विंशत्यृचस्य सूक्तस्य, काण्वो मेधातिथिः-आद्यायावायुः-ततो द्वयो रिन्द्रवायू-तत स्तिसृणां मित्रावरुणौ-तत स्तिसृणां मरुतः-(मरुत्वानिन्द्र इति केचित्) ततस्तिसृणां विश्वेदेवाः- ततस्तिसृणां पूषा- तत स्सप्तानामापः-तत एकस्या अग्न्यापः-तत एकस्या अग्निः-अप्स्वन्तरिति पुरउष्णिक्-अप्सु म इत्यनुष्टुप्-इदमाप इत्याद्यास्तिस्रोऽनुष्टुभः-आपः पृणीतेति प्रतिष्ठा-शेषा गायत्र्यः-अग्न्याप इत्यत्रापशब्दस्य पूर्वनिपाते-" प्राप्ते द्वन्द्वे घि " इति सूत्रादग्नि शब्दस्य पूर्वनिपातः कृतः।।-

❀01.02.08 卐तीव्रा स्सोमास^ आ ग-ह्याशीर्वन्त स्सुता^ इमे। वायो~ तान्प्रस्थिता.न्पिब।।

卐 उभा देवा दिविस्पृ-शेन्द्रवायू~ हवामहे।अस्य सोमस्य पीतये।।

卐 इन्द्रवायू~ मनोजुवा- विप्रा^ हवन्त ऊतये। सहस्राक्षा धिय.स्पती~।।

卐 मित्रँ वयं हवामहे- वरुणं सोमपीतये। जज्ञाना पूतदक्षसा।।

卐 ऋतेन या वृतावृधा-वृतस्य ज्योतिष.स्पती~। ता मित्रावरुणा हुवे।।

❀01.02.09 वरुण॰ प्राविता भुव-न्मित्रो विश्वाभि रूतिभिः। करता.न्न स्सुराधसः।।

卐 मरुत्वन्तं हवामह- इन्द्रमा सोमपीतये। सजू गणेन तृम्पतु।।

卐 इन्द्रज्येष्ठा^ मरुद्गणा- देवास॰ पूषरातयः। विश्वे मम श्रुता हवम्।।

卐 हत वृत्रं सुदानव^- इन्द्रेण सहसा युजा। मा नो दुश्शंस^ ईशत।।

卐 विश्वा.न्देवा.न्हवामहे- मरुत स्सोमपीतये। उग्रा^ हि पृश्निमातरः।।

❀01.02.10 卐जयतामिव तन्यतु- मरुता.मेति धृष्णुया। यच्छुभँ याथना नरः।।

卐 हस्कारा.द्विद्युत स्पर्यतो- जाता^ अवन्तु नः। मरुतो मृळयन्तु नः।।

卐 आ पूष.श्चित्रबर्हिष-माघृणे धरुण.न्दिवः। आऽजा नष्टँ यथा पशुम्।।

卐 पूषा राजान.माघृणि- रपगूळ्ह.ङ्गुहा हितम्। अविन्द चित्रबर्हिषम्।।

卐 उतो~ स मह्य.मिन्दुभि- ष्षड्युक्ता॰ अनुसेऽषिधत्। गोभि र्यवन्न चर्कृषत्।।

❀01.02.11 卐अम्बयो यन्त्यध्वभि- र्जामयो अध्वरीयताम्। पृञ्चती र्मधुना पयः।।

卐 अमू र्या^ उप सूर्ये- याभि.र्वा सूर्य.स्सह। ता^ नो हिन्व.न्त्वध्वरम्।।

卐 अपो देवी रुप ह्वये- यत्र गाव॰ पिबन्ति नः। सिन्धुभ्य॰ कर्त्वं हविः।।

卐 अप्स्व1(अ)न्त रमृत.मप्सु भेषज-मपा.मुत प्रशस्तये। देवा^ भवत वाजिनः।।

卐 अप्सु मे सोमो अब्रवी-दन्त र्विश्वानि भेषजा। अग्निञ्च विश्वशंभुव-मापश्च विश्वभेषजीः।।

❀01.02.12 卐आप॰ पृणीत भेषजँ- वरुथ.न्तन्वे3(ए) मम। ज्योक्च सूर्य.न्दृशे।।

卐 इद.माप॰ प्र वहत- यत्किञ्च दुरितं मयि। यद्वाऽह.मभिदुद्रोह- यद्वा शेप उतानृतम्।।

卐 आपो अद्यान्वचारिषं- रसेन समगस्महि। पयस्वा.नग्न आ गहि- तं मा सं सृज वर्चसा।।

卐 सं माऽग्ने वर्चसा सृज- सं प्रजया समायुषा। विद्युर्मे अस्य देवा^- इन्द्रो विद्या.त्सह ऋषिभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

1.24 कस्य नूनमिति पञ्चदशर्चस्य सूक्तस्य, आजीगर्ति श्शुनश्शेप स्सकृत्रिमो वैश्वामित्रो देवरातः- आद्यायाः कः-द्वितीयाया अग्निः-ततस्तिसृणां सविता-(भगभक्तस्येत्यस्या भगो वा) नहि ते क्षत्रमित्याद्यानां वरुण स्त्रिष्टुप्-अभित्वेत्यादि तिस्रो गायत्र्यः।।

01.02.13 कस्यं नूनं कृतम स्यामृतानां- मनामहे चारु देवस्य नामं। को नो मह्या अदितये पुनर्दा- त्पितरञ्च दृशेयं मातरञ्च।।

अग्ने र्वयं प्रथम.स्यामृतानां- मनामहे चारु देवस्य नामं। स नो मह्या अदितये पुनर्दा- त्पितरञ्च दृशेयं मातरञ्च।।

अभि त्वा देव सवित-रीशानँ वार्याणाम्। सदाऽव.न्भाग.मीमहे।।

यश्चिद्धि तं इत्था भगं- श्शशमानः पुरा निदः। अद्वेषो हस्तयो र्दधे।।

भगभक्तस्य ते वय-मुदशेम तवावसा। मूर्धानं राय आरभे।।

01.02.14 नहि ते क्षत्रन्न सहो न मन्युँ- वयं श्चनामी पतयन्त आपुः। नेमा आपो अनिमिष.श्चरन्ती- र्न ये वातस्य प्रमिन.न्त्यभ्वम्।।

अबुध्ने राजा वरुणो वनस्यो-र्ध्वं स्तूप.न्ददते पूतदक्षः। नीचीनास्स्थु रुपरि बुध्न एषा-मस्मे अन्त र्निहिताः केतव स्स्युः।।

उरुं हि राजा वरुण श्चकार- सूर्याय पन्था.मन्वेतवा उ। अपदे पादा प्रतिधातवेऽक- रुतापवक्ता हृदयाविधश्चित्।।

शतन्ते राज.न्भिषज स्सहस्र-मुर्वी गभीरा सुमति ष्टे अस्तु। बाधस्व दूरे निर्ऋतिं पराचैः- कृत.श्चिदेनः प्र मुमु.ग्ध्यस्मत्।।

अमी य ऋक्षा निहितास उच्चा- नक्त.न्ददृश्रे कुहं चिद्दिवेयुः। अदब्धानि वरुणस्य व्रतानि- विचाकश.च्चन्द्रमा नक्त.मेति।।

01.02.15 तत्त्वा यामि ब्रह्मणा वन्दमान- स्तदा शास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्यु-रुशंस मा न आयुः प्र मोषीः।।

卐 तदि.न्नक्त.न्तद्दिवा मह्य.माहु- स्तद.यङ्केतो हृद^ आ वि चष्टे। शुनश्शेपो यमह्व.द्गृभीत- स्सो अस्मा.न्राजा वरुणो मुमोक्तु।।

卐 शुनश्शेपो ह्यह्व.द्गृभीत- स्त्रिष्वादित्य.न्द्रुपदेषु बद्धः। अवैनं राजा वरुण स्ससृज्या-द्विद्वा॰ अदब्धो वि मुमोक्तु पाशान्।।

卐 अव ते हेळो वरुण नमोभि- रव यज्ञेभि रीमहे हविर्भिः। क्षय.न्नस्मभ्य.मसुर प्रचेता^ राज.न्नेनांसि शिश्रथः कृतानि।।

卐 उदुत्तमँ वरुण पाश.मस्म-दवाधमँ वि मध्यमं श्रथाय। अथा वय.मादित्य व्रते त-वानागसो अदितये स्याम।।

1.25 यच्चिद्धि त इत्येकविंशत्यृचस्य सूक्तस्य, आजीगार्ति श्शुनश्शेपो-वरुणो-गायत्री।।

❀01.02.16 卐यच्चिद्धि ते विशो यथा- प्र देव वरुण व्रतम्। मिनीमसि द्यविद्यवि।।

卐 मा नो वधाय हत्नवे- जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे।।

卐 वि मृळीकाय ते मनो- रथी रश्व.न्न सन्दितम्। गीर्भि र्वरुण सीमहि।।

卐 परा हि मे विमन्यवः-पतन्ति वस्यइष्टये। वयो न वसती रुप।।

卐 कदा क्षत्रश्रिय.न्नर-मा वरुण.ङ्करामहे। मृळीका.योरुचक्षसम्।।

❀01.02.17 卐तदि.त्समान.माशाते~- वेनन्ता न प्र युच्छतः। धृतव्रताय दाशुषे।।

卐 वेदा यो वीनां पद-मन्तरिक्षेण पतताम्। वेद नाव स्समुद्रियः।।

卐 वेद मासो धृतव्रतो- द्वादश प्रजावतः। वेदा य^ उपजायते।।

卐 वेद वातस्य वर्तनि-मुरोर् ऋष्वस्य बृहतः। वेदा ये अध्यासते।।

卐 नि षसाद धृतव्रतो- वरुणः पस्त्या3(आ)स्वा। साम्राज्याय सुक्रतुः।।

❀01.02.18 卐अतो विश्वा.न्यद्भुता- चिकित्वाँ अभि पश्यति। कृतानि या च कर्त्वा।।

卐 स नो विश्वाहा सुक्रतु- रादित्य स्सुपथा करत्। प्र ण^ आयूंषि तारिषत्।।

卐 बिभ्र.द्द्रापिं हिरण्ययँ- वरुणो वस्त निर्णिजम्। परि स्पशो नि षेदिरे।।

卐 न य.न्दिप्सन्ति दिप्सवो- न द्रुह्वाणो जनानाम्। न देव.मभिमातयः।।

卐 उत यो मानुषेष्वा- यश.श्चक्रे असाम्या। अस्माक.मुदरेष्वा।।

❀01.02.19 卐परा मे यन्ति धीतयो- गावो न गव्यूती.रनु। इच्छन्ती रुरुचक्षसम्।।

卐 सन्नु वोचावहै पुन- र्यतो मे मध्वाऽभृतम्। होतेव क्षदसे प्रियम्।।

卐 दर्श.न्नु विश्वदर्शत-न्दर्शं रथ.मधि क्षमि। एता^ जुषत मे गिरः।।

卐 इमं मे वरुण श्रुधी हव-मद्या च मृळय। त्वामवस्यु रा चके।।

卐 त्वँ विश्वस्य मेधिर- दिवश्च ग्मश्च राजसि। स यामनि प्रति श्रुधि।।

卐 उदुत्तमं मुमुग्धि नो- वि पाशं मध्य.मञ्चृत। अवाधमानि जीवसे।।

1.26 वसिष्वेति दशर्चस्य सूक्तस्य, आजीगर्ति श्शुनश्शेपोऽग्नि-गायत्री।।

❀01.02.20 卐वसिष्वा हि मियेध्य- वस्त्रा.ण्यूर्जां पते। सेमन्नो अध्वरँ यज।।

卐 नि नो होता वरेण्य- स्सदा यविष्ठ मन्मभिः। अग्ने दिवित्मता वचः।।

卐 आ हि ष्मा सूनवे पिता-ऽपि र्यज.त्यापये। सखा सख्ये वरेण्यः।।

卐 आ नो बर्ही रिशादसो- वरुणो मित्रो अर्यमा। सीदन्तु मनुषो यथा।।

卐 पूर्व्य होत रस्य नो- मन्दस्व सख्यस्य च। इमा^ उ षु श्रुधी गिरः।।

❀01.02.21 卐यच्चिद्धि शश्वता तना- देव.न्देवँ यजामहे। त्वे इद्धूयते हविः।।

卐 प्रियो नो अस्तु विश्पति- र्होता मन्द्रो वरेण्यः। प्रिया स्स्वग्नयो वयम्।।

卐 स्वग्नयो हि वार्य-न्देवासो दधिरे च नः। स्वग्नयो मनामहे।।

卐 अथा न^ उभयेषा-ममृत मर्त्यानाम्। मिथ स्सन्तु प्रशस्तयः।।

卐 विश्वेभि रग्ने अग्निभि- रिमँ यज्ञ.मिदँ वचः। चनो धा स्सहसो यहो~।।

1.27 अश्वन्न त्वेति त्रयोदशर्चस्य सूक्तस्य, आजीगर्ति श्शुनश्शेपोऽग्नि- गायत्री- नमो महद्भ्य इत्यस्या- देवा- स्त्रिष्टुप्।।

❀01.02.22 卐अश्वन्न त्वा वारवन्तँ- वन्दध्या अग्नि.न्नमोभिः। सम्राजन्त.मध्वराणाम्।।

卐 स घा न स्सूनु श्शवसा- पृथुप्रगामा सुशेवः। मीढ्वा॰ अस्माकं बभूयात्।।

卐 स नो दूरा.च्चासाच्च- नि मर्त्या.दघायोः। पाहि सदमि.द्विश्वाऽऽयुः।।

卐 इममू ्षु त्वमस्माकं- सनि.ङ्गायत्र.न्नव्यांसम्। अग्ने देवेषु प्र वोचः।।

卐 आ नो भज परमेष्वा- वाजेषु मध्यमेषु। शिक्षा वस्वो अन्तमस्य।।

❀01.02.23 卐विभक्ताऽसि चित्रभानो~- सिन्धो रूर्मा उपाक आ। सद्यो दाशुषे क्षरसि।।

卐 यमग्ने पृत्सु मर्त्य-मवा^ वाजेषु यञ्जुनाः। स यन्ता शश्वती रिषः।।

卐 नकि रस्य सहन्त्य- पर्येता कयस्य चित्। वाजो अस्ति श्रवाय्यः।।

卐 स वाजँ विश्वचर्षणि- रर्वद्भि रस्तु तरुता। विप्रेभि रस्तु सनिता।।

卐 जराबोध तद्विविड्ढि- विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम्।।

❀01.02.24 卐स नो महा॰ अनिमानो- धूमकेतुः पुरुश्चन्द्रः। धिये वाजाय हिन्वतु।।

卐 स रेवा॰ इव विश्पति- र्दैव्यः केतु श्शृणोतु नः। उक्थै रग्नि.र्बृहद्भानुः।।

卐 नमो महद्भ्यो नमो अर्भकेभ्यो- नमो युवभ्यो नम^आशिनेभ्यः। यजाम देवा.न्यदि शक्नवाम- मा ज्यायस श्शंसमा वृक्षि देवाः।।

☸ 1.28 यत्र ग्रावेति नवर्चस्य सूक्तस्य, आजीगर्ति श्शुनश्शेपः-आद्याना ञ्चतसृणामिन्द्रः-ततो द्वयोरुलूखलं-ततो द्वयोरुलूखलमुसले-अन्त्यायाः प्रजापति र्हरिश्चन्द्रः (अधिषवण चर्मदेवता वा)-आद्या ष्षळनुष्टुभः-अन्त्यास्तिस्रो गायत्र्यः।।

❀01.02.25 卐यत्र ग्रावा पृथुबुध्न^- ऊर्ध्वो भवति सोतवे। उलूखलसुताना-मवेद्विन्द्र जल्गुलः।।

卐 यत्र द्वाविव जघना-ऽधिषवण्या कृता। उलूखलसुताना- मवेद्विन्द्र जल्गुलः।।

卐 यत्र नार्यपच्यव-मुपच्यवञ्च शिक्षते। उलूखलसुताना- मवेद्विन्द्र जल्गुलः।।

卐 यत्र मन्थाँ विबध्नते- रश्मी.न्यमितवाइव। उलूखलसुताना- मवेद्विन्द्र जल्गुलः।।

卐 यच्चिद्धि त्वङ्गृहेगृह- उलूखलक युज्यसे। इह द्युमत्तमँ वद- जयता.मिव दुन्दुभिः।।

❀01.02.26 卐उत स्म ते वनस्पते- वातो वि वात्यग्र.मित्। अथो~ इन्द्राय पातवे- सुनु सोम .मुलूखल।।

卐 आयजी~ वाजसातमा- ता ह्यु1(उ)च्चा विजर्भृतः। हरीइवा~ न्धांसि बप्सता।।

卐 ता नो अद्य वनस्पती~- ऋष्वावृष्वेभि स्सोतृभिः। इन्द्राय मधुम.त्सुतम्।।

卐 उच्छिष्ट.ञ्चम्वो भर- सोमं पवित्र आ सृज। नि धेहि गोरधि त्वचि।।

☃ 1.29 यच्चिद्धि सत्येति सप्तर्चस्य सूक्तस्य, आजीगर्ति श्शुनश्शेप- इन्द्रः- पङ्क्तिः।।

❀01.02.27 卐यच्चिद्धि सत्य सोमपा^- अनाशस्ताइव स्मसि।आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

卐 शिप्रि.न्वाजानां पते- शचीव स्तव दंसना।आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

卐 नि ष्वापया मिथूदृशा- सस्ता.मबुध्यमाने~। आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

卐 ससन्तु त्या^ अरातयो- बोधन्तु शूर रातयः। आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

卐 समिन्द्र गर्दभं मृण- नुवन्तं पापयाऽमुया। आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

卐 पताति कुण्डृणाच्या- दूरँ वातो वना.दधि। आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

卐 सर्वं परिक्रोश.ञ्जहि- जम्भया कृक.दाश्वम्। आ तू न^ इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।।

☃ 1.30 आ व इन्द्रमिति द्वाविंशत्यृचस्य सूक्तस्य, आजीगर्ति श्शुनश्शेप- इन्द्र- स्सप्तदश्यादि तिसृणा मश्विनौ-तत स्तिसृणामुषा- गायत्री-अस्माकमिति पादनिचृत्-शश्वदिन्द्र इति त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀01.02.28 卐आ व इन्द्र.ङ्क्रिविँ यथा- वाजयन्त श्शतक्रतुम्। मंहिष्ठं सिञ्च इन्दुभिः।।

卐 शतँ वा य श्शुचीनां- सहस्रँ वा समाशिराम्। एदु निम्न.न्न रीयते।।

卐 सँ यन्मदाय शुष्मिण- एना ह्यस्योदरे। समुद्रो न व्यचो दधे।।

卐 अयमु ते समतसि- कपोत^इव गर्भधिम्। वच स्तच्चिन्न^ ओहसे।।

卐 स्तोत्रं राधानां पते- गिर्वाहो वीर यस्य ते। विभूति रस्तु सूनृता।।

❀01.02.29 卐ऊर्ध्व स्तिष्ठा न^ ऊतये-ऽस्मि.न्वाजे शतक्रतो~। समन्येषु ब्रवावहै।।

卐 योगेयोगे तवस्तरँ- वाजेवाजे हवामहे। सखाय^ इन्द्र.मूतये।।

卐 आ घा गमद्यदि श्रव-त्सहस्रिणीभि रूतिभिः। वाजेभि रुप नो हवम्।।

卐 अनु प्रत्नस्यौकसो- हुवे तुविप्रति.न्नरम्। यन्ते पूर्वं पिता हुवे।।

卐 तन्त्वा वयँ विश्ववारा-ऽऽशास्महे पुरुहूत। सखे वसो~ जरितृभ्यः।।

❀01.02.30 अस्माकं शिप्रिणीनां- सोमपा स्सोमपाव्नाम्। सखे वज्रि.न्त्सखीनाम्।।

卐 तथा तदस्तु सोमपा- स्सखे वज्रि.न्तथा कृणु। यथा त उश्म.सीष्टये।।

卐 रेवतीर्न स्सधमाद- इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभि र्मदेम।।

卐 आ घ त्वावा.न्त्मनाऽऽप्त- स्स्तोतृभ्यो धृष्ण~ वियानः। ऋणो रक्षन्न चक्र्योः।।

卐 आ यद्दुव श्शतक्रत~- वा काम.ञ्जरितृणाम्। ऋणो रक्षन्न शचीभिः।।

❀01.02.31 卐शश्व.दिन्द्रः पोप्रुथ.द्भि र्जिगाय- नानद.द्भि श्शाश्वसद्भि र्धनानि। स नो हिरण्यरथ.न्दंसनावा-न्त्स न स्सनिता सनये स नोऽदात्।।

卐 आऽश्विना वश्वाव-त्येषा यातं शवीरया। गोम.द्दस्रा हिरण्यवत्।।

卐 समानयोजनो हि वां- रथो दस्रा वमर्त्यः। समुद्रे अश्वि.नेयते।।

卐 न्य1(अ)घ्न्यस्य मूर्धनि- चक्रं रथस्य येमथुः। परि द्यामन्य.दीयते।।

卐 कस्त उषः कधप्रिये- भुजे मर्तो अमर्त्ये। कन्नक्षसे विभावरि।।

卐 वयं हि ते अमन्म.ह्या-ऽन्तादा पराकात्। अश्वे न चित्रे अरुषि।।

卐 त्वन्त्येभिरा गहि- वाजेभि र्दुहित र्दिवः। अस्मे रयि.न्नि धारय।।

1.31 त्वमग्न इत्यष्टादशर्चस्य सूक्तस्य, आङ्गिरसो हिरण्यस्तूपोऽग्नि-र्जगती-अष्टमी षोळश्यन्त्यास्त्रिष्टुभः।।

❀01.02.32 卐त्वमग्ने प्रथमो अङ्गिरा^ ऋषि- र्देवो देवाना.मभव श्शिव.स्सखा। तव व्रते कवयो विद्म.नापसो-ऽजायन्त मरुतो भ्राज.दृष्टयः।।

卐 त्वमग्ने प्रथमो अङ्गिरस्तमः- कवि र्देवानां परि भूषसि व्रतम्। विभु र्विश्वस्मै भुवनाय मेधिरो- द्विमाता शयुः कतिधा चिदायवे।।

卐 त्वमग्ने प्रथमो मातरिश्वन- आवि र्भव सुक्रतूया विवस्वते। अरेजेतां रोदसी होतृवूर्ये-ऽसघ्नो र्भार .मयजो महो वसो~।।

卐 त्वमग्ने मनवे द्यामवाशयः- पुरूरवसे सुकृते सुकृत्तरः। श्वात्रेण यत्पित्रो र्मुच्यसे प-र्या त्वा पूर्व.मनय .न्नापरं पुनः~।।

卐 त्वमग्ने वृषभः पुष्टिवर्धन^- उद्यतस्रुचे भवसि श्रवाय्यः। य^ आहुतिं परि वेदा वषट्कृति- मेकायु रग्रे विश^ आविवाससि।।

❀01.02.33 卐त्वमग्ने वृजिनवर्तनि.न्नरं- सक्म.न्पिपर्षि विदथे विचर्षणे। य श्शूरसाता परितक्म्ये धने- दभ्रेभि श्चित्समृता हंसि भूयसः।।

卐 त्वन्त.मग्ने अमृतत्व उत्तमे- मर्त.न्दधासि श्रवसे दिवेदिवे। यस्तातृषाण^ उभयाय जन्मने- मयः कृणोषि प्रय^ आ च सूरये।।

卐 त्वन्नो अग्ने सनये धनानाँ- यशस.ङ्कारु.ङ्कृणुहि स्तवानः। ऋध्याम कर्मापसा नवेन- देवै र्द्यावापृथिवी~ प्रावतन्नः।।

卐 त्वन्नो अग्ने पित्रो रुपस्थ आ- देवो देवे.ष्वनवद्य जागृविः। तनूकृ.द्बोधि प्रमति.श्च कारवे- त्वङ्कल्याण वसु विश्व.मोपिषे।।

卐 त्वमग्ने प्रमति स्त्वं पिताऽसि न- स्त्वँ वयस्कृ.त्तव जामयो वयम्। सन्त्वा राय श्शतिन स्सं सहस्त्रिण- स्सुवीरँ यन्ति व्रतपा.मदाभ्य।।

❀01.02.34 卐त्वामग्ने प्रथम.मायु.मायवे- देवा^ अकृण्व.न्नहुषस्य विश्पतिम्। इळा.मकृण्व.न्मनुषस्य शासनी- पितु र्यत्पुत्रो ममकस्य जायते।।

卐 त्वन्नो अग्ने तव देव पायुभि- र्मघोनो रक्ष तन्वश्च वन्द्य। त्राता तोकस्य तनये गवाम-स्यनिमेषं रक्षमाण स्तव व्रते।।

卐 त्वमग्ने यज्यवे पायु रन्तरो-ऽनिषङ्गाय चतुरक्ष^ इध्यसे। यो रातहव्योऽवृकाय धायसे- कीरेश्चि.न्मन्त्रं मनसा वनोषि तम्।।

卐 त्वमग्न उरुशंसाय वाघते- स्पार्हँ यद्रेक्णः परमँ वनोषि तत्। आध्रस्य चित्प्रमति रुच्यसे पिता- प्र पाकं शास्सि प्र दिशो विदुष्टरः।।

卐 त्वमग्ने प्रयतदक्षिण.न्नरँ- वर्मेव स्यूतं परि पासि विश्वतः। स्वादुक्षद्मा यो वसतौ स्योनकृ-ज्जीवयाजं यजते सोपमा दिवः।।

❀01.02.35 卐इमा.मग्ने शरणिं मीमृषो न-^ इम.मध्वानँ यमगाम दूरात्। आपिः पिता प्रमति स्सोम्यानां- भृमिर.स्यृषिकृ.न्मर्त्यानाम्।।

卐 मनुष्व.दग्ने अङ्गिरस्व.दङ्गिरो- ययातिव.त्सदने पूर्वव.च्छुचे। अच्छ याह्या वहा दैव्य.ञ्जन-मा सादय बर्हिषि यक्षि च प्रियम्।।

卐 एते.नाग्ने ब्रह्मणा वावृधस्व- शक्ती वा यत्ते चकृमा विदा वा। उत प्र णेष्यभि वस्यो अस्मा-न्त्सन्न स्सृज सुमत्या वाजवत्या।।

1.32 इन्द्रस्य न्विति पञ्चदशर्चस्य सूक्तस्य, आङ्गिरसो हिरण्यस्तूप- इन्द्र- स्त्रिष्टुप्।।

❀01.02.36 卐इन्द्रस्य नु वीर्याणि प्र वोचँ- यानि चकार प्रथमानि वज्री। अहन्नहि.मन्वप स्ततर्द- प्र वक्षणा^ अभिन.त्पर्वतानाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अह.न्नहिं पर्वते शिश्रियाण-न्त्वष्टाऽस्मै वज्रं स्वर्य.न्ततक्ष। वाश्राइव धेनव स्स्यन्दमाना^- अञ्ज स्समुद्र.मव जग्मु रापः।।

卐 वृषायमाणोऽवृणीत सोम-न्त्रिकद्रुके.ष्वपिब.त्सुतस्य। आ सायकं मघवाऽदत्त वज्र-महन्नेनं प्रथमजा. महीनाम्।।

卐 यदिन्द्राह.न्प्रथमजा.महीना-मान्मायिना.मर्मिना॰ प्रोत मायाः। आत्सूर्य.ञ्जनय.न्द्यामुषास-न्तादीत्ना शत्रुन्न किला विवित्से।।

卐 अह.न्वृत्रँ वृत्रतरँ व्यंस-मिन्द्रो वज्रेण महता वधेन। स्कन्धांसीव कुलिशेना विवृक्णा-ऽहि श्शयत उपपृ क्पृथिव्याः।।

❀02.02.37 卐अयोद्धेव दुर्मद^ आ हि जुह्वे- महावीर.न्तुविबाध.मृजीषम्। नातारीदस्य समृतिँ वधानां- सं रुजाना॰ पिपिष इन्द्रशत्रुः।।

卐 अपा.दहस्तो अपृतन्य.दिन्द्र-माऽस्य वज्र.मधि सानौ जघान। वृष्णो वध्रि॰ प्रतिमानं बुभूष-न्पुरुत्रा वृत्रो अशय.द्व्यस्तः।।

卐 नदन्न भिन्न.ममुया शयानं- मनो रुहाणा^ अति यन्त्यापः। याश्चि.द्वृत्रो महिना पर्यतिष्ठ-त्तासा.महि॰ पत्सुतश्शी.र्बभूव।।

卐 नीचावया^ अभव.द्वृत्रपु-त्रेन्द्रो अस्या^ अव वध जभार। उत्तरा सू रधर॰ पुत्र आसी-द्दानुश्शये सहवत्सा न धेनुः।।

卐 अतिष्ठन्तीना.मनिवेशनाना-ङ्काष्ठानां मध्ये निहितं शरीरम्। वृत्रस्य निण्यँ वि चरन्त्यापो- दीर्घ.न्तम आऽशय.दिन्द्रशत्रुः।।

❀01.02.38 卐दासपत्नी रहिगोपा^ अतिष्ठ-न्निरुद्धा^ आप॰ पणिनेव गावः। अपां बिल.मपिहितँ यदासी-द्वृत्र.ञ्जघन्वा॰ अप तद्ववार।।

卐 अश्व्यो वारो अभव स्तदिन्द्र-सृके यत्त्वा प्रत्यह.न्देव^ एकः। अजयो गा^ अजय श्शूर सोम-मवासृज स्सर्तवे सप्त सिन्धून्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 नास्मै विद्युन्न तन्यतु ꠱स्सिषेध- न यां मिह.मकिर.द्धादुनिञ्च। इन्द्रश्च यद्युयुधाते~ अहि-श्चोतापरीभ्यो मघवा वि जिग्ये।।

卐 अहे र्यातार.ङ्कमपश्य^ इन्द्र- हृदि यत्ते जघ्नुषो भीरगच्छत्। नव च यन्नवतिञ्च स्रवन्ती- श्श्येनो न भीतो अतरो रजांसि।।

卐 इन्द्रो यातोऽवसितस्य राजा- शमस्य च शृङ्गिणो वज्रबाहुः। सेदुराजा क्षयति चर्षणीना-मरान्न नेमिः परि ता बभूव।।

**इति द्वितीयाध्याय स्समाप्तः।।**

**प्रथमाष्टके तृतीयाध्यायः (वर्गाः 1-35)**

1.33 एतायामेति पञ्चदशर्चस्य सूक्तस्य, आङ्गिरसो हिरण्यस्तूप- इन्द्र- स्त्रिष्टुप्।।

❀01.03.01 卐एतायामोप गव्यन्त^ इन्द्र-मस्माकं सु प्रमतिं वावृधाति। अनामृणः कुवि.दादस्य रायो- गवा.ङ्केतं पर.मावर्जते नः।।

卐 उपे दह.न्धनदा.मप्रतीत-ञ्जुष्टान्न श्येनो वसतिं पतामि। इन्द्र.न्नमस्य.न्नुपमेभि रर्कै- र्यस्स्तोतृभ्यो हव्यो अस्ति यामन्न्।।

卐 नि सर्वसेन^ इषुधीं रसक्त- समर्यो गा^ अजति यस्य वष्टि। चोष्कूयमाण^ इन्द्र भूरि वामं-मा पणि र्भूरस्म.दधि प्रवृद्ध।।

卐 वधीर्हि दस्यु.न्धनिनं.ङ्घनेन- एक श्चर.न्नुपशाकेभि रिन्द्र। धनो रधि विषुणक्ते व्याय-न्नयज्वान स्सनकाः प्रेतिमीयुः।।

卐 परा चिच्छीर्षा ववृजु स्त इ-न्द्रायज्वानो यज्वभि स्स्पर्धमानाः। प्र यद्दिवो हरिव स्स्थात रुग्र-निरव्रता अधमो रोदस्योः।।

❀01.03.02 卐अयुयुत्स.न्ननवद्यस्य सेना-मयातयन्त क्षितयो नवग्वाः। वृषायुधो न वध्रयो निरष्टाः-प्रवद्भि रिन्द्रा.च्चितयन्त^ आयन्न्।।

卐 त्वमेता.न्रुदतो जक्षत-श्चाऽयोधयो रजस इन्द्र पारे। अवाऽदहो दिव^ आ दस्युं.मुच्चा- प्र सुन्वत स्स्तुवत श्शंस.मावः।।

卐 चक्राणासः॰ परीणहं पृथिव्या^- हिरण्येन मणिना शुम्भमानाः। न हिन्वानास स्तितिरु स्त इन्द्रं- परि स्पशो अदधा.त्सूर्येण।।

卐 परि यदिन्द्र रोदसी उभे~- अबुभोजी महिना विश्वत स्सीम्। अमन्यमाना॰ अभि मन्यमानै- र्निर्ब्रह्मभि रधमो दस्यु.मिन्द्र।।

卐 न ये दिव॰ पृथिव्या^ अन्त.मापु-र्न मायाभि र्धनदां पर्यभूवन्न्। युजँ वज्रँ वृषभ श्चक्र इन्द्रो- निर्ज्योतिषा तमसो गा^ अदुक्षत्।।

❀0103.03 卐अनु स्वधा.मक्षर.न्नापो अ-स्यावर्धत मध्य आ नाव्यानाम्। सध्रीचीनेन मनसा तमिन्द्र^- ओजिष्ठेन हन्मनाऽह.न्नभि द्यून्।।

卐 न्याविध्य.दिलीबिशस्य दृळ्हा- वि श्रृङ्गिण.मभिन.च्छुष्ण.मिन्द्रः। यावत्तरो मघव.न्याव.दोजो- वज्रेण शत्रु.मवधी॰ पृतन्युम्।।

卐 अभि सिध्मो अजिगा.दस्य शत्रू-न्वि तिग्मेन वृषभेणा पुरोऽभेत्। सँ वज्रेणा सृज.द्वृत्र.मिन्द्र॰- प्र स्वां मति.मतिर.च्छाशदानः।।

卐 आव॰ कुत्स.मिन्द्र यस्मि.ञ्चाक-न्प्रा वो युध्यन्तँ वृषभ.न्दशद्युम्। शफच्युतो रेणु र्नक्षत द्या- मुच्छ्वैत्रेयो नृ॰षाह्याय तस्थौ।।

卐 आव श्शमँ वृषभ.न्तुग्र्यासु- क्षेत्रजेषे मघव.ञ्छ्वित्र्य.ङ्गाम्। ज्योक्चिदत्र तस्थिवांसो अक्र- ञ्छत्रूयता.मधरा वेदनाऽकः~।।

1.34 त्रिश्चिदिति द्वादशर्चस्य सूक्तस्य, आङ्गिरसो हिरण्यस्तूपोऽश्विनौ-जगती-नवम्यन्त्ये त्रिष्टुभौ।।

❀01.02.04 卐त्रिश्चिन्नो अद्या भवत.न्नवेदसा- विभुवाँ याम^ उत राति रश्विना। युवो र्हि यन्त्रं हिम्येव वाससो-ऽभ्यायं सेन्या भवतं मनीषिभिः।।

卐 त्रयः॰ पवयो मधुवाहने रथे- सोमस्य वेना.मनु विश्व इद्विदुः। त्रय स्स्कम्भास स्स्कभितास^ आरभे-त्रिर्नक्तँ याथ स्त्रिर्वश्विना दिवा।।

卐 समाने अह.न्त्रिरवद्यगोहना- त्रि रद्य यज्ञं मधुना मिमिक्षतम्। त्रि र्वाजवती रिषो अश्विना युव-न्दोषा^ अस्मभ्य.मुषसश्च पिन्वतम्।।

卐 त्रि र्वर्ति र्यात न्त्रि रनुव्रते जने- त्रि स्सुप्राव्ये त्रेधेव शिक्षतम्। त्रि र्नान्द्यँ वहत.मश्विना युव-न्त्रिः॰ पृक्षो अस्मे अक्षरेव पिन्वतम्।।

卐 त्रि र्नो रयिँ वहत.मश्विना युव-न्त्रि र्देवताता त्रि रुतावत न्धियः। त्रि स्सौभगत्व.न्त्रिरुत श्रवांसि न-स्त्रिष्ठँ वां सूरे दुहिताऽऽ रुह.द्रथम्।।

卐 त्रि र्नो अश्विना दिव्यानि भेषजा- त्रिः॰ पार्थिवानि त्रिरु~ दत्त.मद्भ्यः। ओमानं शँयो र्ममकाय सूनवे-त्रिधातु शर्म वहतं शुभस्पती~।।

❀01.03.05 त्रिर्नो अश्विना यजता दिवेदिवे- परि त्रिधातु पृथिवी.मशायतम्। तिस्रो नासत्या रथ्या परावत^- आत्मेव वात स्स्वसराणि गच्छतम्।।

卐 त्रिरश्विना सिन्धुभि स्सप्तमातृभि- स्त्रय^ आहावा स्त्रेधा हविष्कृतम्। तिस्रः॰ पृथिवी रुपरि प्रवा दिवो-नाकं रक्षेथे~ द्युभि रक्तुभि र्हितम्।।

卐 क्व1(अ)त्री चक्रा त्रिवृतो रथस्य- क्व1(अ)त्रयो वन्धुरो ये सनीळाः। कदा योगो वाजिनो रासभस्य-येन यज्ञ.न्नास.त्योपयाथः।।

卐 आ नासत्या गच्छतं हूयते हवि- र्मध्वः॰ पिबतं मधुपेभि रासभिः। युवो र्हि पूर्वं सवि.तोषसो रथ-मृताय चित्र.ङ्घृतवन्त.मिष्यति।।

卐 आ नासत्या त्रिभि रेकादशै रिह- देवेभि र्यातं मधुपेय.मश्विना। प्राऽऽयु स्तारिष्ट.न्नी रपांसि मृक्षतं-सेधत.न्द्वेषो भवतं सचाभुवा।।

卐 आ नो अश्विना त्रिवृता रथे-नार्वाञ्चं रयिँ वहतं सुवीरम्। शृण्वन्ता वामवसे जोहवीमि- वृधे च नो भवतँ वाजसातौ।।


Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

1.35 ह्वयामीत्येकादशर्चस्य सूक्तस्य, आङ्गिरसो हिरण्यस्तूप- स्सविता- त्रिष्टुप्- आद्यायाश्चतुर्षु पादेषु क्रमेणाग्नि मित्रावरुण रात्रि सवितारो देवताः-आद्या नवम्यौ जगत्यौ।।

01.03.06 ह्वया.म्यग्निं प्रथमं स्वस्तये- ह्वयामि मित्रावरुणा विहावसे। ह्वयामि रात्री.ञ्जगतो निवेशनीं- ह्वयामि देवं सवितार.मूतये।।

आ कृष्णेन रजसा वर्तमानो- निवेशय.न्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेनाऽऽ-देवो याति भुवनानि पश्यन्न्।।

याति देवः प्रवता यात्युद्वता- याति शुभ्राभ्याँ यजतो हरिभ्याम्। आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः।।

अभीवृतङ्कृशनै विश्वरूपं- हिरण्यशम्यँ यजतो बृहन्तम्। आऽस्था.द्रथं सविता चित्रभानुः- कृष्णा रजांसि तविषी.न्दधानः।।

वि जना.ञ्छ्यावा श्शितिपादो अख्य-न्रथं हिरण्यप्रउगँ वहन्तः। शश्व.द्विश स्सवितु दैव्य-स्योपस्थे विश्वा भुवनानि तस्थुः।।

तिस्रो द्यावा सवितु द्वा उपस्थाँ- एका यमस्य भुवने विराषाट्। आणि.न्न रथ्य.ममृताऽधि तस्थु- रिह ब्रवीतु य उ तच्चिकेतत्।।

01.03.07 वि सुपर्णो अन्तरिक्षा.ण्यख्य-द्गभीरवेपा असुर स्सुनीथः। के3(ए)दानीं सूर्यः कश्चिकेत- कतमा.न्द्यां रश्मि रस्याऽऽ ततान।।

अष्टौ व्यख्य.त्ककुभः पृथिव्या- स्त्री धन्व योजना सप्त सिन्धून्। हिरण्याक्ष स्सविता देव आऽगा- द्दध द्रत्ना दाशुषे वार्याणि।।

हिरण्यपाणि स्सविता विचर्षणि- रुभे द्यावापृथिवी अन्त रीयते। अपामीवां बाधते वेति सूर्य-मभि कृष्णेन रजसा द्यामृणोति।।

हिरण्यहस्तो असुर स्सुनीथ स्सुमृळीक स्स्ववाँ यात्वर्वाङ्। अपसेध.न्रक्षसो यातुधाना-नस्था देवः प्रतिदोष.ङ्गृणानः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 ये ते पन्था स्सवितः पूर्व्यासो-ऽरेणव स्सुकृता अन्तरिक्षे। तेभि र्नो अद्य पथिभि स्सुगेभी- रक्षा चनो अधि च ब्रूहि देव।।

1.36 प्र वो यह्वमिति विंशत्यृचस्य सूक्तस्य, घौरः कण्वोऽग्निः-ऊर्ध्व ऊ षु ण इति द्वयो र्यूपः प्रगाथः।।

❀01.03.08 卐प्र वो यह्वं पुरूणाँ- विशा.न्देवयतीनाम्। अग्निं सूक्तेभि र्वचोभि रीमहे- यं सी.मिदन्य ईळते।।

卐 जनासो अग्नि.न्दधिरे सहोवृधं- हविष्मन्तो विधेम ते। स त्व न्नो अद्य सुमना इहाविता- भवा वाजेषु सन्त्य।।

卐 प्र त्वा दूतँ वृणीमहे- होतारँ विश्ववेदसम्। महस्ते सतो वि चर.न्त्यर्चयो- दिवि स्पृशन्ति भानवः।।

卐 देवास स्त्वा वरुणो मित्रो अर्यमा- स.न्दूतं प्रत्न.मिन्धते। विश्वं सो अग्ने जयति त्वया धनँ- यस्ते ददाश मर्त्यः।।

卐 मन्द्रो होता गृहपति-रग्ने दूतो विशा.मसि। त्वे विश्वा सङ्गतानि व्रता ध्रुवा- यानि देवा अकृण्वत।।

❀01.03.09 卐त्वे इदग्ने सुभगे यविष्ठ्य- विश्वमा हूयते हविः। स त्वन्नो अद्य सुमना उतापरँ- यक्षि देवा.न्त्सुवीर्या।।

卐 त.ङ्घेमित्था नमस्विन- उप स्वराज.मासते। होत्राभि रग्निं मनुष स्समिन्धते- तितिर्वांसो अति स्त्रिधः।।

卐 घ्नन्तो वृत्र.मतर.न्रोदसी अप- उरु क्षयाय चक्रिरे। भुव.त्कण्वे वृषा द्युम्न्याऽऽहुतः- क्रन्ददश्वो गविष्टिषु।।

卐 सं सीदस्व महा असि- शोचस्व देववीतमः। वि धूम.मग्ने अरुषं मियेध्य- सृज प्रशस्त दर्शतम्।।

卐 यन्त्वा देवासो मनवे दधु रिह- यजिष्ठं हव्यवाहन। यङ्कण्वो मेध्यातिथि र्धनस्पृतँ- यँ वृषा यमुपस्तुतः।।

❀01.03.10 यमग्निं मेध्यातिथिः- कण्वˆ ईध ऋता.दधि। तस्य प्रेषो दीदियु स्तमिमाˆ ऋच- स्तमग्निं वर्धयामसि।।

卐 राय स्पूर्धि स्वधावोऽस्ति हि ते-ऽग्ने देवे.ष्वाप्यम्। त्वँ वाजस्य श्रुत्यस्य राजसि- स नो मृळ महाँ असि।।

卐 ऊर्ध्व ऊ षु णˆ ऊतये- तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदञ्जिभि- र्वाघद्भि र्विह्वयामहे।।

卐 ऊर्ध्वो नः पाह्यंहसो नि केतुना- विश्वं समत्रिण.न्दह। कृधी न ऊर्ध्वा.ञ्चरथाय जीवसे- विदाˆ देवेषु नो दुवः।।

卐 पाहि नो अग्ने रक्षसः- पाहि धूर्ते रराव्णः। पाहि रीषतˆ उत वा जिघांसतो- बृहद्भानो~ यविष्ठ्य।।

❀01.03.11 घनेव विष्वग्वि जह्यराव्ण- स्तपुर्जम्भ यो अस्मध्रुक्। यो मर्त्य.श्शिशीते अत्यक्तुभि- र्मा नस्स रिपु रीशत।।

卐 अग्नि.र्वव्ने सुवीर्य-मग्निः कण्वाय सौभगम्। अग्निः प्राऽऽव.न्मित्रोत मेध्यातिथि-मग्नि स्साता उपस्तुतम्।।

卐 अग्निना तुर्वशँ यदुं परावतˆ- उग्रादेवं हवामहे। अग्नि र्नय.न्नववास्त्वं बृहद्रथ-न्तुर्वीति.न्दस्यवे सहः।।

卐 नि त्वामग्ने मनुर्दधे- ज्योति र्जनाय शश्वते। दीदेथ कण्व ऋतजातˆ उक्षितो- यन्नमस्यन्ति कृष्टयः।।

卐 त्वेषासो अग्ने रमवन्तो अर्चयो- भीमासो न प्रतीतये। रक्षस्विन स्सदमि.द्यातुमावतो- विश्वं समत्रिण न्दह।।

1.37 क्रीळँ व इति पञ्चदशर्चस्य सूक्तस्य, घौरः कण्वो- मरुतो- गायत्री।।

❀01.03.12 卐क्रीळँ व श्शर्धो मारुत-मनर्वाणं रथेशुभम्। कण्वाˆ अभि प्र गायत।।

卐 ये पृषतीभिर् ऋष्टिभि- स्साकँ वाशीभि रञ्जिभिः। अजायन्त स्वभानवः।।

卐 इहेव श्रृण्व एषा-ङ्कशा हस्तेषु यद्वदान्। नि यामञ्चित्र.मृञ्जते।।

卐 प्र व॒ श्शर्धा᳚य॒ घृष्व॑ये- त्वेषद्यु᳚म्नाय शु॒ष्मिणे᳚। दे॒वत्तं॒ ब्रह्म॑ गायत।।

卐 प्र शं॑सा॒ गोष्वघ्न्य᳚-ङ्क्रीळँ यच्छर्धो॒ मारु॑तम्। जम्भे॒ रस॑स्य वावृधे।।

❀01.03.13 卐को वो॒ वर्षि॑ष्ठ^ आ न॑रो- दि॒वश्च ग्मश्च॑ धूतयः। यत्सी॒मन्त॒.न्न धू᳚नु॒थ।।

卐 नि वो॒ यामा᳚य॒ मानु॑षो- द॒ध्र उ॒ग्राय॑ म॒न्यवे᳚। जिही᳚त॒ पर्व॑तो गि॒रिः।।

卐 येषा॒.मज्मे᳚षु पृथि॒वी- जु॑जु॒र्वा॑ इ॒व वि॒श्पतिः॑। भि॒या यामे᳚षु॒ रेज॑ते।।

卐 स्थि॒रं हि जान॑.मेषाँ॒- वयो᳚ मा॒तु निरे᳚तवे। यत्सी॒.मनु॑ द्वि॒ता शवः॑।।

卐 उदु॑ त्ये सू॒नवो॒ गिर॒ः- काष्ठा॒^ अज्मे᳚ ष्वत्नत। वा॒श्रा^ अ॑भि॒ज्ञु यात॑वे।।

❀01.03.14 卐त्यञ्चि॑द्धा॒ दी॒र्घं पृ॒थुं- मि॒हो नपा᳚त॒.मम॑ृध्रम्। प्र च्या॑वयन्ति॒ याम॑भिः।।

卐 मरु॑तो॒ यद्ध॑ वो॒ बल॒-ञ्जना᳚ँ अचुच्यवीतन। गि॒रीँ रचु॑च्यवीतन।।

卐 यद्ध॒ यान्ति॑ म॒रुत॒- स्सं ह॑ ब्रुवते॒ऽध्वन्ना। शृणोति॑ कश्चि॑ दे॒षाम्।।

卐 प्र या᳚त॒ शीभ॑.माशुभि॒- स्सन्ति॒ कण्वे᳚षु वो॒ दुवः॑। तत्रो॒~षु मा᳚दयाध्वै।।

卐 अस्ति॒ हि ष्मा॒ मदा᳚य व॒-स्स्मसि॑ ष्मा॒ वय॒.मे᳚षाम्। विश्व॒.ञ्चि॒दायु॑ जी॒वसे᳚।।

1.38 कद्ध नूनमिति पञ्चदशर्चस्य सूक्तस्य, घौरः कण्वो- मरुतो- गायत्री

❀01.03.15 卐कद्ध॑ नू॒न.ङ्क॑धप्रियः॒- पि॒ता पु॒त्र.न्न हस्त॑योः। द॒धि॒ध्वे वृ॑क्तबर्हिषः।।

卐 क्व॑ नू॒न.ङ्कद्वो॒ अर्थ॒-ङ्गन्ता᳚ दि॒वो न पृ॑थि॒व्याः। क्व॑ वो॒ गावो॒ न र॑ण्यन्ति।।

卐 क्व॑ व स्सु॒म्ना नव्या᳚ंसि॒- मरु॑तः॒ क्व॑ सुवि॒ता। क्वो᳚3(ओ)~ विश्वा᳚नि॒ सौभ॑गा।।

卐 यद्यू॒यं पृ॑श्निमातरो॒- मर्ता᳚स स्स्यात॑न। स्तो॒ता वो᳚ अ॒मृत॑ स्स्यात्।।

卐 मा वो᳚ मृ॒गो न यव॑से- जरि॒ता भू॒दजो᳚ष्यः। प॒था य॒मस्य॑ गा॒दुप॑।।

❀01.03.16 卐मो᳚~ षु णः॒ परा᳚परा- निर्ऋ॑ति॒ र्दु॒र्हणा᳚ वधीत्। प॒दी॒ष्ट तृष्ण॑या स॒ह।।

卐 स॒त्यन्त्वे॒षा^ अम॑वन्तो॒- धन्व᳚.ञ्चि॒दा रु॒द्रिया᳚सः। मिह॒.ङ्कृण्व॒.न्त्यवा॒ताम्।।

卐 वा॒श्रेव॑ वि॒द्यु.न्मि॑माति- व॒त्सन्न मा॒ता सि॑षक्ति। यदे᳚षाँ वृ॒ष्टि रस॑र्जि।।

卐 दिवा᳚ चि॒त्तमः॑ कृण्वन्ति- प॒र्जन्ये᳚.नोदवा॒हेन॑। यत्पृ॑थि॒वीँ व्यु॒न्दन्ति॑।।

卐 अध स्वना.न्मरुताँ- विश्वमा सद्म पार्थिवम्। अरेजन्त प्र मानुषाः।।

❀01.03.17 卐मरुतो वीळुपाणिभि- श्चित्रा रोधस्वती रनु। याते.मखिद्रयामभिः।।

卐 स्थिरा वः स्सन्तु नेमयो- रथा^ अश्वास एषाम्। सुसंस्कृता^ अभीशवः।।

卐 अच्छा वदा तना गिरा- जरायै ब्रह्मण.स्पतिम्। अग्निं मित्रन्न दर्शतम्।।

卐 मिमीहि श्लोक.मास्ये- पर्जन्य^इव ततनः। गाय गायत्र.मुक्थ्यम्।।

卐 वन्दस्व मारुत.ङ्गण-न्त्वेषं पनस्यु.मर्किणम्। अस्मे वृद्धा^ असन्निह।।

☬ 1.39 प्र यदित्थेति दशर्चस्य सूक्तस्य, घौरः कण्वो- मरुतो- बार्हतप्रगाथः- (अयुजो बृहत्यो युज स्सतोबृहत्यः)

❀01.03.18 卐प्र यदित्था परावत- श्शोचिर्न मान.मस्यथ। कस्य क्रत्वा मरुतः कस्य वर्पसा- कँ याथ कं ह धूतयः।।

卐 स्थिरा^ वः स्सन्त्वायुधा पराणुदे- वीळू उत प्रतिष्कभे। युष्माक.मस्तु तविषी पनीयसी- मा मर्त्यस्य मायिनः।।

卐 परा ह यत्स्थिरं हथ- नरो वर्तयथा गुरु। वि याथन वनिनः पृथिव्या^- व्याशाः पर्वतानाम्।।

卐 नहि व श्शत्रु र्विविदे अधि द्यवि- न भूम्यां रिशादसः। युष्माक.मस्तु तविषी तना युजा- रुद्रासो नू चिदाधृषे।।

卐 प्र वेपयन्ति पर्वता-न्वि विञ्चन्ति वनस्पतीन्। प्रो~ आरत मरुतो दुर्मदा^इव- देवास स्सर्वया विशा।।

❀01.03.19 卐उपो~ रथेषु पृषती रयुग्ध्वं- प्रष्टि र्वहति रोहितः। आ वो यामाय पृथिवी चिदश्रो-दबीभयन्त मानुषाः।।

卐 आ वो मक्षू तनाय कं- रुद्रा^ अवो वृणीमहे। गन्ता नूनन्नोऽवसा यथा पु-रेत्था कण्वाय बिभ्युषे।।

卐 युष्मेषितो मरुतो मर्त्येषित^- आ यो नो अभ्व^ ईषते। वि तँ युयोत शवसा व्योजसा- वि युष्माकाभि रूतिभिः।।

卐 असामि हि प्रयज्यवः- कण्व.न्दद प्रचेतसः। असामिभि र्मरुत आ न ऊतिभि- र्गन्ता वृष्टिन्न विद्युतः।।

卐 असा.म्योजो बिभृथा सुदानवो-ऽसामि धूतय श्शवः। ऋषिद्विषे मरुतः परिमन्यव- इषुन्न सृजत द्विषम्।।

☙ 1.40 उत्तिष्ठेत्यष्टर्चस्य सूक्तस्य, घौर कण्वो- ब्रह्मणस्पतिः प्रगाथः (अयुजो बृहत्यो युज स्सतोबृहत्यः)।।

❀01.03.20 卐उत्तिष्ठ ब्रह्मण.स्पते- देवयन्त स्त्वेमहे। उप प्र यन्तु मरुत स्सुदानव- इन्द्र प्राशू र्भवा सचा।।

卐 त्वामिद्धि सहस.स्पुत्र मर्त्य- उपब्रूते धने हिते। सुवीर्यं मरुत आ स्वश्व्य-न्दधीत यो व आचके।।

卐 प्रैतु ब्रह्मण.स्पतिः- प्र देव्येतु सूनृता। अच्छा वीर.न्नर्यं पङ्क्तिराधस-न्देवा यज्ञ.न्नयन्तु नः।।

卐 यो वाघते ददाति सूनरँ वसु- स धत्ते अक्षिति श्रवः। तस्मा इळां सुवीरा.मायजामहे- सुप्रतूर्ति.मनेहसम्।।

卐 प्र नूनं ब्रह्मण.स्पति- र्मन्त्रँ वद.त्युक्थ्यम्। यस्मि.न्निन्द्रो वरुणो मित्रो अर्यमा- देवा ओकांसि चक्रिरे।।

❀01.03.21 卐तमि.द्वोचेमा विदथेषु शंभुवं- मन्त्र.न्देवा अनेहसम्। इमाञ्च वाचं प्रतिहर्यथा नरो- विश्वे द्वामा वो अश्नवत्।।

卐 को देवयन्त.मश्नव-ज्जन.ङ्को वृक्तबर्हिषम्। प्रप्र दाश्वा.न्पस्त्याभि रस्थि-तान्तर्वावत् क्षय.न्दधे।।

卐 उप क्षत्रं पृञ्चीत हन्ति राजभि-र्भये चित्सुक्षिति.न्दधे। नास्य वर्ता न तरुता महाधने- नार्भे अस्ति वज्रिणः।।

☙ 1.41 यं रक्षन्तीति नवर्चस्य सूक्तस्य, घौरः कण्वः-आद्याना न्तिसृणामन्त्यानां तिसृणां च वरुण मित्रार्यमण- स्तृतीयादि तिसृणा मादित्या-गायत्री।।

❀01.03.22 卐यं रक्षन्ति प्रचेतसो- वरुणो मित्रो अर्यमा। नू चित्स दभ्यते जनः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यं बाहुतेव पिप्रति- पान्ति मर्त्यं रिषः। अरिष्ट स्सर्व^ एधते।।

卐 वि दुर्गा वि द्विषः पुरो- घ्नन्ति राजान^ एषाम्। नयन्ति दुरिता तिरः।।

卐 सुगः पन्था^ अनृक्षर^- आदित्यास ऋतँ यते। नाऽत्राऽवखादो अस्ति वः।।

卐 यँ यज्ञ.न्नयथा नर^- आदित्या^ ऋजुना पथा। प्र व स्स धीतये नशत्।।

❀01.03.23 卐स रत्नं मर्त्यो वसु- विश्व.न्तोक.मुत त्मना। अच्छा गच्छ.त्यस्तृतः।।

卐 कथा राधाम सखाय- स्स्तोमं मित्र.स्यार्यम्णः। महि प्सरो वरुणस्य।।

卐 मा वो घ्नन्तं मा शपन्तं- प्रति वोचे देवयन्तम्। सुम्नै रिद्व आ विवासे।।

卐 चतुरश्चि.द्ददमाना-द्बिभीया.दानिधातोः। न दुरुक्ताय स्पृहयेत्।।

1.42 पूषन्निति दशर्चस्य सूक्तस्य, घौरः कण्वः- पूषा-गायत्री।।

❀01.03.24 卐सं पूष.न्नध्वन स्तिर- व्यंहो विमुचो नपात्। सक्ष्वा देव प्र ण स्पुरः।।

卐 यो नः पूष.न्नघो वृको- दुश्शेव^ आदिदेशति। अप स्म तं पथो जहि।।

卐 अप त्यं परिपन्थिनं- मुषीवाणं हुरश्चितम्। दूर.मधि स्रुते रज।।

卐 त्वन्तस्य द्वयाविनो-ऽघशंसस्य कस्य चित्। पदाऽभि तिष्ठ तपुषिम्।।

卐 आ तत्ते दस्र मन्तुमः- पूष.न्नवो वृणीमहे। येन पितृ.नचोदयः।।

❀01.03.25 卐अधा नो विश्वसौभग- हिरण्यवाशीमत्तम। धनानि सुषणा कृधि।।

卐 अति न स्सश्चतो नय- सुगा न स्सुपथा कृणु। पूष.न्निह क्रतुँ विदः।।

卐 अभि सूयवस.न्नय- न नवज्वारो अध्वने। पूष.न्निह क्रतुँ विदः।।

卐 शग्धि पूर्धि प्र यंसि च- शिशीहि प्रास्युदरम्। पूष.न्निह क्रतुँ विदः।।

卐 न पूषणं मेथामसि- सूक्तै रभि गृणीमसि। वसूनि दस्म.मीमहे।।

1.43 कद्रुद्रायेति नवर्चस्य सूक्तस्य, घौरः कण्वो- रुद्र-स्तृतीयाया मित्रावरुणौ च-सप्तम्यादि तृचस्य सोमो- गायत्र्यन्त्याऽनुष्टुप्।।

❀01.03.26 卐कद्रुद्राय प्रचेतसे- मीळ्हुष्टमाय तव्यसे। वोचेम शन्तमं हृदे।।

卐 यथा नो अदितिः कर-त्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियम्।।

卐 यथा नो मित्रो वरुणो- यथा रुद्र.श्चिकेतति। यथा विश्वे सजोषसः।।

卐 गाथपतिं मेधपतिं- रुद्रं जलाषभेषजम्। तच्छँयो स्सुम्न.मीमहे।।

卐 य श्शुक्रइव सूर्यो- हिरण्यमिव रोचते। श्रेष्ठो देवानाँ वसुः।।

❀01.03.27 卐शन्नः कर.त्यर्वते- सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे।।

卐 अस्मे सोम श्रिय.मधि- नि धेहि शतस्य नृणाम्। महि श्रव.स्तुविनृम्णम्।।

卐 मा न स्सोमपरिबाधो- माऽरातयो जुहुरन्त। आ न इन्दो~ वाजे भज।।

卐 यास्ते प्रजा अमृतस्य- परस्मि.न्धाम.न्नृतस्य। मूर्धा नाभा सोम वेन- आभूषन्ती स्सोम वेदः।।

1.44 अग्ने विवस्वदिति चतुर्दशर्चस्य सूक्तस्य, काण्वः प्रस्कण्वोऽग्निराद्ये अश्व्युषश्च प्रगाथः (अयुजो बृहत्यो युज स्सतोबृहत्यः)

❀01.03.28 卐अग्ने विवस्व.दुषस-श्चित्रं राधो अमर्त्य। आ दाशुषे जातवेदो वहा त्व-मद्या देवाँ उषर्बुधः।।

卐 जुष्टो हि दूतो असि हव्यवाहनो-ऽग्ने रथी रध्वराणाम्। सजू रश्विभ्या.मुषसा सुवीर्य-मस्मे धेहि श्रवो बृहत्।।

卐 अद्या दूतँ वृणीमहे- वसु.मग्निं पुरुप्रियम्। धूमकेतुं भाऋजीकँ व्युष्टिषु- यज्ञाना.मध्वरश्रियम्।।

卐 श्रेष्ठँ यविष्ठ.मतिथिं स्वाहुतं- जुष्ट.ञ्जनाय दाशुषे। देवाँ अच्छा यातवे जातवेदस-मग्नि.मीळे व्युष्टिषु।।

卐 स्तविष्यामि त्वा महँ- विश्व.स्याऽमृत भोजन। अग्ने त्रातार.ममृतं मियेध्य- यजिष्ठं हव्यवाहन।।

❀01.03.29 卐सुशंसो बोधि गृणते यविष्ठ्य- मधुजिह्व स्स्वाहुतः। प्रस्कण्वस्य प्रतिर.न्नायु.र्जीवसे- नमस्या दैव्यञ्जनम्।।

卐 होतारँ विश्ववेदसं- सं हि त्वा विश इन्धते। स आ वह पुरुहूत प्रचेतसो-ऽग्ने देवाँ इह द्रवत्।।

卐 सवितार.मुषस.मश्विना भग-मग्निँ व्युष्टिषु क्षपः। कण्वास स्त्वा सुतसोमास इन्धते- हव्यवाहं स्वध्वर।।

卐 पति.ह्यऽध्वराणा-मग्ने दूतो विशा.मसि। उषर्बुध^ आ वह सोमपीतये- देवा॰ अद्य स्वर्दृशः।।

卐 अग्ने पूर्वा^ अनूषसो विभावसो~- दीदेथ विश्वदर्शतः। असि ग्रामे.ष्ववितिा पुरोहितो-ऽसि यज्ञेषु मानुषः।।

❀01.03.30 卐नि त्वा यज्ञस्य साधन-मग्ने होतार.मृत्विजम्। मनुष्व.द्देव धीमहि प्रचेतस-ञ्जीर.न्दूत ममर्त्यम्।।

卐 यद्देवानां मित्रमहः पुरोहितो-ऽन्तरो यासि दूत्यम्। सिन्धोरिव प्रस्वनितास ऊर्मयो-ऽग्नेर्भ्राजन्ते अर्चयः।।

卐 श्रुधि श्रुत्कर्ण वह्निभि- र्देवै.रग्ने सयावभिः। आ सीदन्तु बर्हिषि मित्रो अर्यमा- प्रातर्यावाणो अध्वरम्।।

卐 शृण्वन्तु स्तोमं मरुत स्सुदानवो-ऽग्निजिह्वा^ ऋतावृधः। पिबतु सोमं वरुणो धृतव्रतो-ऽश्विभ्या.मुषसा सजूः।।

☙ 1.45 त्वमग्ने वसूनिति दशर्चस्य सूक्तस्य, काण्वः प्रस्कण्वोऽग्निरन्त्याया देवा-श्चानुष्टुप्।।

❀01.03.31 卐त्वमग्ने वसू॰ रिह- रुद्रा॰ आदित्या॰ उत। यजा स्वध्वर.ञ्जनं- मनुजात.ङ्घृतप्रुषम्।।

卐 श्रुष्टीवानो हि दाशुषे- देवा^ अग्ने विचेतसः। तान्रोहिदश्व गिर्वण- स्त्रयस्त्रिंशत.मा वह।।

卐 प्रियमेधव.दत्रिव-ज्जातवेदो विरूपवत्। अङ्गिरस्व.न्महिव्रत- प्रस्कण्वस्य श्रुधी हवम्।।

卐 महिकेरव^ ऊतये- प्रियमेधा ^अहूषत। राजन्त.मध्वराणा-मग्निं शुक्रेण शोचिषा।।

卐 घृताऽऽहवन स-न्त्येमा^ उ षु श्रुधी गिरः। याभिः कण्वस्य सूनवो- हवन्तेऽवसे त्वा।।

❀01.03.32 卐त्वाञ्चित्रश्रवस्तम- हवन्ते विक्षु जन्तवः। शोचिष्केशं पुरुप्रिया-ग्ने हव्याय वोऽळ्हवे।।

卐 नि त्वा होतार.मृत्विज-न्दधिरे वसुवित्तमम्। श्रुत्कर्णं सप्रथस्तमँ- विप्रा^ अग्ने दिविष्टिषु।।

卐 आ त्वा विप्रा^ अचुच्यवु- स्सुतसोमा^ अभि प्रयः। बृहद्भा^ बिभ्रतो हवि-रग्ने मर्ताय दाशुषे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 प्रातर्याव्णं स्सहस्कृत- सोमपेयाय सन्त्य। इहाऽद्य दैव्य.ञ्जनं- बर्हिरा सादया वसो~।।

卐 अर्वाञ्च.न्दैव्य.ञ्जन-मग्ने यक्ष्व सहूतिभिः। अयं सोम स्सुदानव- स्तं पात तिरोअह्न्यम्।।

1.46 एषो उषा इति पञ्चदशर्चस्य सूक्तस्य, काण्वः प्रस्कण्वोऽश्विनौ-गायत्री।।

❀01.03.33 卐एषो~ उषा^ अपूर्व्या- व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत्।।

卐 या दस्रा सिन्धुमातरा- मनोतरा रयीणाम्। धिया देवा वसुविदा।।

卐 वच्यन्ते वाङ्ककुहासो- जूर्णाया.मधि विष्टपि। यद्वां रथो विभि ष्पतात्।।

卐 हविषा जारो अपां- पिपर्ति पपुरि र्नरा। पिता कुटस्य चर्षणिः।।

卐 आदारो वां मतीना-न्नासत्या मतवचसा। पातं सोमस्य धृष्णुया।।

❀01.03.34 卐या नः पीपर.दश्विना- ज्योतिष्मती तम.स्तिरः। तामस्मे रासाथा.मिषम्।।

卐 आ नो नावा मतीनाँ- यातँ पाराय गन्तवे। युञ्जाथा.मश्विना रथम्।।

卐 अरित्रँ वा.न्दिव.स्पृथु- तीर्थे सिन्धूनां रथः। धिया युयुज्र इन्दवः।।

卐 दिव.स्कण्वास^ इन्दवो- वसु सिन्धूनां पदे। स्वँ वव्रि.ङ्कुह धित्सथः।।

卐 अभूदु भा^ उ अंशवे- हिरण्यं प्रति सूर्यः। व्यख्य.ज्जिह्वयाऽसितः।।

❀01.03.35 卐अभूदु पार.मेतवे- पन्था^ ऋतस्य साधुया। अदर्शि वि स्रुति.र्दिवः।।

卐 तत्तदि.दश्विनो रवो- जरिता प्रति भूषति। मदे सोमस्य पिप्रतोः।।

卐 वावसाना विवस्वति- सोमस्य पीत्या गिरा। मनुष्वच्छंभू~ आ गतम्।।

卐 युवोरुषा^ अनु श्रियं- परिज्मनो रुपाचरत्। ऋता वनथो अक्तुभिः।।

卐 उभा पिबत.मश्वि-नोभा न श्शर्म यच्छतम्। अविद्रियाभि रूतिभिः।।

इति तृतीयाध्याय स्समाप्तः।।

## प्रथमाष्टके चतुर्थाध्यायः। वर्गाः(1-29)

1.47 अयं वामिति दशर्चस्य सूक्तस्य, काण्वः प्रस्कण्वोऽश्विनौ-प्रगाथः (अयुजो बृहत्यो युज स्सतोबृहत्यः)।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀01.04.01 卐अयँ वां मधुमत्तम- स्सुत स्सोम^ ऋतावृधा। तमश्विना पिबत.न्तिरोअह्न्य-न्धत्तं रत्नानि दाशुषे।।

卐 त्रिवन्धुरेण त्रिवृता सुपेशसा- रथेना ऽऽयात.मश्विना। कण्वासो वां ब्रह्म कृण्व.न्त्यध्वरे- तेषां सु शृणुतं हवम्।।

卐 अश्विना मधुमत्तमं- पातं सोम.मृतावृधा। अथा ऽद्य दस्रा वसु बिभ्रता रथे- दाश्वांस.मुप गच्छतम्।।

卐 त्रिषधस्थे बर्हिषि विश्ववेदसा- मध्वा यज्ञं मिमिक्षतम्। कण्वासो वां सुतसोमा^ अभिद्यवो- युवां हवन्ते अश्विना।।

卐 याभिः कण्व.मभिष्टिभिः- प्राऽऽवतँ युव.मश्विना। ताभि ष्ष्व1(अ)स्माँ अवतं शुभ.स्पती~- पातं सोम मृतावृधा।।

❀01.04.02 卐सुदासे दस्रा वसु बिभ्रता रथे- पृक्षो वहत.मश्विना। रयिं समुद्रा.दुत वा दिवस्प-र्यस्मे धत्तं पुरुस्पृहम्।।

卐 यन्नासत्या परावति- यद्वा स्थो अधि तुर्वशे। अतो रथेन सुवृता न^ आ गतं- साकं सूर्यस्य रश्मिभिः।।

卐 अर्वाञ्चा वां सप्तयोऽध्वरश्रियो- वहन्तु सव.नेदुप। इषं पृञ्चन्ता सुकृते सुदानव- आ बर्हि स्सीदत.न्नरा।।

卐 तेन नासत्याऽऽगतं- रथेन सूर्यत्वचा। येन शश्व.दूहथु र्दाशुषे वसु- मध्व स्सोमस्य पीतये।।

卐 उक्थेभि रर्वा.गवसे पुरुवसू~- अर्कैश्च नि ह्वयामहे। शश्व.त्कण्वानां सदसि प्रिये हि कं- सोमं पपथु रश्विना।।

1.48 सह वामेनेति षोळशर्चस्य सूक्तस्य, काण्वः प्रस्कण्व- उषाः- प्रगाथः (अयुजो बृहत्यो युज स्सतोबृहत्यः)।।

❀01.04.03 卐सह वामेन न^ उषो- व्युच्छा दुहित र्दिवः। सह द्युम्नेन बृहता विभावरि- राया देवि दास्वती।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अश्वा॑व॒ती गोम॑ती वि॒श्वसु॑वि॒दो- भूरि॑ च्यवन्त॒ वस्त॑वे। उदी॑रय॒ प्रति॑ मा सू॒नृता॑ उष॒- श्चोद॒ राधो॑ म॒घोना॑म्।।

卐 उ॒वा.सोषा॑ उ॒च्छा.च्च॒ नु- दे॒वी जी॒रा रथा॑नाम्। ये अ॒स्या॑ आ॒चर॑णेषु दध्रि॒रे- स॑मु॒द्रे न श्र॑व॒स्यव॑ः।।

卐 उषो॒ ये ते॒ प्र यामे॑षु यु॒ञ्जते॒- मनो॑ दा॒नाय॑ सू॒रय॑ः। अत्राह॒ तत्कण्व॑ एषा॒-ङ्कण्व॑तमो॒ नाम॑ गृणाति नृ॒णाम्।।

卐 आ घा॑ योषे॑व सू॒नर्यु॒-षा॑ याति प्रभुञ्ज॒ती। ज॒रय॑न्ती॒ वृज॑नं प॒द्व.दी॑यत॒- उत्पा॑तयति प॒क्षिण॑ः।।

❀01.04.04 卐वि या सृ॒जति॒ सम॑नँ॒ व्य१(अ)॒र्थिन॑ः- प॒द.न्न वे॒त्योद॑ती। वयो॒ नकि॑ ष्टे पप्ति॒वांस॑ आसते॒- व्यु॑ष्टौ वाजिनीवति।।

卐 ए॒षाऽयु॑क्त परा॒वत॒- स्सूर्य॑.स्यो॒दय॑ना॒.दऽधि॑। श॒तं रथे॑भि स्सु॒भगो॒षा॑- इ॒यँ वि या॑त्य॒भि मानु॑षान्।।

卐 विश्वं॑.मस्या॑ ना॑नाम॒ चक्ष॑से॒- जग॒.ज्ज्योति॑.ष्कृणोति सू॒नरी॑। अप॒ द्वेषो॑ म॒घोनी॑ दुहि॒ता दि॒व॑- उ॒षा॑ उ॑च्छ॒.दप॒ स्त्रिध॑ः।।

卐 उष॒ आ भा॑हि भा॒नुना॑- च॒न्द्रेण॑ दुहित॒ र्दिव॑ः। आ॒वह॑न्ती॒ भूर्य॒स्मभ्य॒ं सौभ॑गँ- व्यु॒च्छन्ती॒ दिवि॑ष्टिषु।।

卐 विश्व॑स्य॒ हि प्राण॑न॒.ञ्जीव॑न॒.न्त्वे- वि यदु॒च्छसि॑ सूनरि। सा नो॒ रथे॑न बृह॒ता वि॑भावरि- श्रु॒धि चि॑त्रामघे॒ हव॑म्।।

❀01.04.05 उषो॒ वाज॒ं हि वंस्व- य श्चि॒त्रो मानु॑षे॒ जने॑। तेनाऽऽव॑ह सु॒कृतो॑ अध्व॒राॅं उप॒- ये त्वा॑ गृ॒णन्ति॒ वह्न॑यः।।

卐 विश्वा॑.न्दे॒वाॅं आ व॑ह॒ सोम॑पीत-ये॒ऽन्तरि॑क्षा.दु॒ष स्त्वम्। साऽस्मासु॑ धा॒ गोम॒.दश्वा॑व॒.दुक्थ्य॑१-(अ॒)मुषो॒ वाज॒ं सु॒वीर्य॑म्।।

卐 यस्या॒ रुश॑न्तो अ॒र्चय॑ः- प्रति॑ भ॒द्रा अदृ॑क्षत। सा नो॑ र॒यिँ विश्ववा॑रं सु॒पेश॑स-मु॒षा॑ द॑दातु॒ सुग्म्य॑म्।।

卐 ये चि॒द्धि त्वामृष॑य॒ः पूर्वे॑ ऊ॒तये॑- जुहू॒रेऽव॑से महि। सा न॒ स्स्तोमा॑ॅं अ॒भि गृ॑णीहि॒ राध॒-सोष॑ श्शु॒क्रेण॑ शो॒चिषा॑।।

卐 उषो यदद्य भानुना- वि द्वारा वृणवो दिवः। प्र नो यच्छता.दवृकं पृथु च्छर्दिः- प्र देवि गोमती रिषः।।

卐 सन्नो राया बृहता विश्वपेशसा- मिमिक्ष्वा समिळाभिरा। सन्द्युम्नेन विश्वतु.रोषो महि- सँ वाजै र्वाजिनीवति।।

☸ 1.49 उषो भद्रेभिरिति चतुर्ऋचस्य सूक्तस्य, काण्वः प्रस्कण्व- उषा- अनुष्टुप्।।

❀01.04.06 卐उषो भद्रेभि रागहि- दिवश्चि.द्रोचना.दधि। वह.न्त्वरुणप्सव- उप त्वा सोमिनो गृहम्।।

卐 सुपेशसं सुखं रथँ- यमध्यस्था उष.स्त्वम्। तेना सुश्रवस.ञ्जनं- प्रावाद्य दुहित र्दिवः।।

卐 वय.श्चित्ते पतत्रिणो- द्विप.च्चतुष्प.दर्जुनि। उषः प्रार.न्नृतूः रनु- दिवो अन्तेभ्य स्परि।।

卐 व्युच्छन्ती हि रश्मिभि- र्विश्व.माभासि रोचनम्। ता.न्त्वा.मुष र्वसूयवो- गीर्भिः कण्वा अहूषत।।

☸ 1.50 उदु त्यमिति त्रयोदशर्चस्य सूक्तस्य, काण्वः प्रस्कण्व- स्सूर्यो-नवाद्या गायत्र्यः- अन्त्याश्चतस्त्रोऽनुष्टुभः (अन्त्यस्तृचो रोगघ्न उपनिषदन्त्योर्धर्चो द्विषघ्न इति गुणः)।।

❀01.04.07 卐उदु त्यञ्जातवेदस-न्देवँ वहन्ति केतवः। दृशे विश्वाय सूर्यम्।।

卐 अप त्ये तायवो यथा- नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे।।

卐 अदृश्र.मस्य केतवो- वि रश्मयो जनाः अनु। भ्राजन्तो अग्नयो यथा।।

卐 तरणि र्विश्वदर्शतो- ज्योतिष्कृदसि सूर्य। विश्व.माभासि रोचनम्।।

卐 प्रत्य.ङ्देवानाँ विशः- प्रत्य.ङ्ङुदेषि मानुषान्। प्रत्य.ङ्विश्वं स्वर्दृशे।।

❀01.04.08 卐येना पावक चक्षसा- भुरण्यन्त.ञ्जनाः अनु। त्वँ वरुण पश्यसि।।

卐 वि द्या.मेषि रज स्पृथ्व-हा मिमानो अक्तुभिः। पश्य.न्जन्मानि सूर्य।।

卐 सप्त त्वा हरितो रथे- वहन्ति देव सूर्य। शोचिष्केशँ विचक्षण।।

卐 अयुक्त सप्त शुन्ध्युव- स्सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः।।

卐 उद्वय.न्तमस स्परि- ज्योति.ष्पश्यन्त उत्तरम्। देव.न्देवत्रा सूर्य-मगन्म ज्योति रुत्तमम्।।

卐 उद्य.न्नद्य मित्रमह- आरोह.न्नुत्तरा.न्दिवम्। हृद्रोगं मर्म सूर्य- हरिमाणञ्च नाशय।।

卐 शुकेषु मे हरिमाणं- रोपणाकासु दध्मसि। अथो~ हारिद्रवेषु मे- हरिमाण.न्नि दध्मसि।।

卐 उदगा.दय.मादित्यो- विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धय-न्मो~ अहं द्विषते रधम्।।

卐 ✡ अथ परिशिष्टम्।।

卐 शनैश्चिदद्य सूर्येणा-ऽऽदित्येन सहीयसा। अहँ यशस्विनाँ यशो- विद्यारूप.मुपाऽऽददे।।

卐 उद्य.न्नद्य वि नो भज- पिता पुत्रेभ्यो यथा। दीर्घाऽऽयुत्वस्य हेशिषे- तस्य नो धेहि सूर्य।।

卐 उद्य.न्तन्त्वा मित्रमह^- आरोहन्तँ विचक्षण। पश्येम शरद श्शत-ञ्जीवेम शरद श्शतम्।। इति परिशिष्टम्।।

1.51 अभित्यमिति पञ्चदशर्चस्य सूक्तस्य, आङ्गिरस स्सव्य- इन्द्रो-जगती-अन्त्ये द्वे त्रिष्टुभौ।।

❀01.04.09 卐अभि त्यं मेषं पुरुहूत.मृग्मिय-मिन्द्रं गीर्भि.र्मदता वस्वो अर्णवम्। यस्य द्यावो न विचरन्ति मानुषा- भुजे मंहिष्ठ.मभि विप्र.मर्चत।।

卐 अभी.मवन्व.न्त्स्वभिष्टि.मूतयो-ऽन्तरिक्षप्रा.न्तविषीभि रावृतम्। इन्द्र.न्दक्षास ऋभवो मदच्युतं- शतक्रतु.ञ्जवनी सूनृताऽऽरुहत्।।

卐 त्वङ्गोत्र.मङ्गिरोभ्योऽवृणो रपो-ताऽत्रये शतदुरेषु गातुवित्। ससेन चिद्विमदा.याऽवहो वस्वा-जावद्रिं वावसानस्य नर्तयन्न्।।

卐 त्वमपा.मपिधानाऽवृणो रपा-धारयः पर्वते दानुम.द्वसु। वृत्रँ यदिन्द्र शवसाऽवधी रहि-मादि.त्सूर्य न्दिव्याऽऽरोहयो दृशे।।

卐 त्वं मायाभि रप मायिनोऽधम- स्स्वधाभि र्ये अधि शुप्तावजुह्वत। त्वं पिप्रो र्नृमणः प्रारुजः पुरः- प्र ऋजिश्वान.न्दस्युहत्ये.ष्वाविथ।।

❀01.04.10 卐त्वङ्कुत्सं शुष्णहत्ये.ष्वाविथा-रन्धयोऽतिथिग्वाय शम्बरम्। महान्त.ञ्चिदर्बुद.न्नि क्रमीः पदा- सना.देव दस्युहत्याय जज्ञिषे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 त्वे विश्वा तविषी सध्र्य.ग्घिता- तव राधः सोमपीथाय हर्षते। तव वज्र श्चिकिते बाह्वो र्हितो- वृश्चा शत्रो रव विश्वानि वृष्ण्या।।

卐 वि जानी.ह्यार्यान् ये च दस्यवो- बर्हिष्मते रन्धया शास.दव्रतान्। शाकी भव यजमानस्य चोदिता- विश्वेत्ता ते सधमादेषु चाकन।।

卐 अनुव्रताय रन्धय.न्नपव्रता-नाभूभि.रिन्द्र श्श्नथय.न्ननाभुवः। वृद्धस्य चिद्वर्धतो द्यामिनक्षत- स्स्तवानो वम्रो वि जघान सन्दिहः।।

卐 तक्ष.द्यत्त उशना सहसा सहो- वि रोदसी मज्मना बाधते शवः। आ त्वा वातस्य नृमणो मनोयुज- आ पूयमाण.मवह.न्नभि श्रवः।।

❀01.04.11 卐मन्दिष्ट यदुशने काव्ये सचाँ- इन्द्रो वङ्कू~ वङ्कुतराऽधि तिष्ठति। उग्रो ययि.न्निरप स्स्रोतसा सृज-द्वि शुष्णस्य दृंहिता ऐरय.त्पुरः।।

卐 आ स्मा रथँ वृषपाणेषु तिष्ठसि- शार्यातस्य प्रभृता येषु मन्दसे। इन्द्र यथा सुतसोमेषु चाकनो- ऽनर्वाणं श्लोकमा रोहसे दिवि।।

卐 अददा^ अर्भां महते वचस्यवे- कक्षीवते वृचया.मिन्द्र सुन्वते। मेनाऽभवो वृषणश्वस्य सुक्रतो~- विश्वेत्ता ते सवनेषु प्रवाच्या।।

卐 इन्द्रो अश्रायि सुध्यो निरेके- पज्रेषु स्तोमो दुर्यो न यूपः। अश्वयु र्गव्यू रथयु र्वसूयु- रिन्द्र^ इद्रायः ≈क्षयति प्रयन्ता।।

卐 इद.न्नमो वृषभाय स्वराजे- सत्यशुष्माय तवसेऽवाचि। अस्मि.न्निन्द्र वृजने सर्ववीरा- स्स्म.त्सूरिभि स्तव शर्म.न्त्स्याम।।

1.52 त्यं सु मेषमिति पञ्चदशर्चस्य सूक्तस्य, आङ्गिरस स्सव्य- इन्द्रो-जगती-त्रयोदश्यन्त्ये त्रिष्टुभौ।।

❀01.04.12 卐त्यं सु मेषं महया स्वर्विदं- शतँ यस्य सुभ्व स्साक.मीरते। अत्य.न्न वाजं हवनस्यदं रथ- मेन्द्रँ ववृत्या.मवसे सुवृक्तिभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 स पर्वतो न धरुणे.ष्वच्युत- स्सहस्रमूति स्तविषीषु वावृधे। इन्द्रो यद्वृत्र.मवधी.न्नदीवृत-मुब्ज.न्नर्णांसि जर्हृषाणो अन्धसा।।

卐 स हि द्वरो.द्वरिषु वव्र ऊधनि- चन्द्रबुध्नो मदवृद्धो मनीषिभिः। इन्द्र.न्तमह्वे स्वपस्यया धिया- मंहिष्ठरातिं स हि पप्रि.रन्धसः।।

卐 आ यं पृणन्ति दिवि सद्मबर्हिष- स्समुद्र.न्न सुभ्व1(अ)स्स्वा अभिष्टयः। तँ वृत्रहत्ये अनुतस्थु रूतय- श्शुष्मा इन्द्र.मवाता अह्रुतप्सवः।।

卐 अभि स्ववृष्टिं मदे अस्य युध्यतो- रघ्वी.रिव प्रवणे सस्रु रूतयः। इन्द्रो यद्वज्री धृषमाणो अन्धसा- भिन.द्वलस्य परिधीँ॑रिव त्रितः।।

❀01.04.13 卐परी.ङ्घृणा चरति तित्विषे शवो-ऽपो वृत्वी रजसो बुध्न.माऽशयत्। वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो- निजघन्थ हन्वो रिन्द्र तन्यतुम्।।

卐 ह्रद.न्न हि त्वा न्यृष.न्त्यूर्मयो- ब्रह्मा.णीन्द्र तव यानि वर्धना। त्वष्टा चित्ते युज्यँ वावृधे शव- स्ततक्ष वज्र .मभिभू.त्योजसम्।।

卐 जघन्वा उ हरिभि स्सम्भृतक्रत-- विन्द्र वृत्रं मनुषे गातुय.न्नपः। अयच्छथा बाह्वो र्वज्र.मायस- मधारयो दिव्या सूर्य.न्दृशे।।

卐 बृह.त्स्वश्चन्द्र.मम.व.द्यदुक्थ्य1-(अ)मकृण्वत भियसा रोहण.न्दिवः। यन्मानुषप्रधना इन्द्र.मूतय- स्स्व र्नृषाचो मरुतोऽमदन्ननु।।

卐 द्यौश्चि.दस्यामवा अहे स्स्वना-दयोयवी.द्भियसा वज्र इन्द्र ते। वृत्रस्य यद्बद्बधानस्य रोदसी- मदे सुतस्य शवसाऽभिन.च्छिरः।।

❀01.04.14 卐यदि.न्न्विन्द्र पृथिवी दशभुजि- रहानि विश्वा ततनन्त कृष्टयः। अत्राह ते मघव.न्विश्रुतं सहो- द्यामनु शवसा बर्हणा भुवत्।।

卐 त्वमस्य पारे रजसो व्योमन- स्स्वभूत्योजा अवसे धृषन्मनः। चकृषे भूमिं प्रतिमान.मोज-सोप स्स्वः~ परिभू रेष्या दिवम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 त्वं भुव॒ः प्रतिमानं पृथिव्या॒- ऋष्ववीरस्य बृहत॒ः पतिर्भूः। विश्व.माऽप्रा॒ अन्तरिक्षं महित्वा- सत्य मद्धा नकि रन्य स्त्वावान्।।

卐 न यस्य द्यावापृथिवी~ अनु व्यचो- न सिन्धवो रजसो अन्त.मानशुः। नोत स्ववृष्टिं मदे अस्य युध्यत॒- एको अन्य.च्चकृषे विश्व.मानुषक्।।

卐 आर्च.न्नत्र मरुत स्ससस्मि.न्नाजौ- विश्वे देवासो अमद.न्ननु त्वा। वृत्रस्य यद्भृष्टिमता वधेन- नि त्वमिन्द्र प्रत्यान.ञ्जघन्थ।।

1.53 न्यू षु वाचमित्येकादशर्चस्य सूक्तस्य, आङ्गिरस स्सव्य- इन्द्रो- जगती-अन्त्ये द्वे त्रिष्टुभौ।।

❀01.04.15 卐न्यू3(ऊ) षु वाचं प्र महे भरामहे- गिर॒ इन्द्राय सदने विवस्वतः। नू चिद्धि रत्नं ससतामि.वाविद-न्न दुष्टुति र्द्रविणोदेषु शस्यते।।

卐 दुरो अश्वस्य दुर॒ इन्द्र गोरसि- दुरो यवस्य वसुन॒ इनस्पतिः। शिक्षानर॒ः प्रदिवो अकामकर्शन- स्सखा सखिभ्य स्तमिद.ङ्गृणीमसि।।

卐 शचीव॒ इन्द्र पुरुकृ.द्युमत्तम- तवेदिद.मभित श्चेकिते वसु। अत स्सङ्गृ.भ्याभिभूत आ भर- मा त्वायतो जरितु॒ः काम.मूनयीः।।

卐 एभि र्द्युभि स्सुमना॒ एभि रिन्दुभि- र्निरुन्धानो अमति.ङ्गोभि रश्विना। इन्द्रेण दस्यु.न्दरयन्त॒ इन्दुभि- र्युतद्वेषस स्समिषा रभेमहि।।

卐 समिन्द्र राया समिषा रभेमहि- सँ वाजेभि॒ः पुरुश्चन्द्रै रभिद्युभिः। सन्देव्या प्रमत्या वीरशुष्मया- गोअग्रयाऽश्वावत्या रभेमहि।।

❀01.04.16 卐ते त्वा मदा॒ अमद.न्तानि वृष्ण्या- ते सोमासो वृत्रहत्येषु सत्पते। यत्कारवे दश वृत्रा.ण्यप्रति- बर्हिष्मते नि सहस्राणि बर्हयः।।

卐 युधा युध.मुप घेदेषि धृष्णुया- पुरा पुरं समिदं हंस्योजसा। नम्या यदिन्द्र सख्या परावति- निबर्हयो नमुचि.न्नाम मायिनम्।।

卐 त्वङ्करञ्ज.मुत पर्णयँ वधी- स्तेजिष्ठ.यातिथिग्वस्य वर्तनी। त्वं शता वङ्गृद.स्याभिन.त्पु-रोनानुदः परिषूता ऋजिश्वना।।

卐 त्वमेता.ञ्जनराज्ञो द्विर्दशा-बन्धुना सुश्रव.सोपजग्मुषः। षष्टिं सहस्रा नवति.न्नव श्रुतो- नि चक्रेण रथ्या दुष्पदावृणक्।।

卐 त्वमाविथ सुश्रवस.न्तवोतिभि- स्तव त्रामभि रिन्द्र तूर्वयाणम्। त्वमस्मै कुत्स.मतिथिग्व.मायुं- महे राज्ञे यूने अरन्धनायः।।

卐 य उद्द.चीन्द्र देवगोपा- स्सखाय स्ते शिवतमा असाम। त्वां स्तोषाम त्वया सुवीरा- द्राघीय आयुः प्रतर.न्दधानाः।।

1.54 मा नो अस्मिन्नित्येकादशर्चस्य सूक्तस्य, आङ्गिरस स्सव्य- इन्द्रो- जगती-षष्ठ्यष्टमी नवम्येकादश्यस्त्रिष्टुभः।।

❀01.04.17 卐मा नो अस्मि.न्मघव.न्पृत्स्वंहसि- नहि ते अन्त श्शवसः परीणशे। अक्रन्दयो नद्यो3(ओ) रोरुवद्वना- कथा न क्षोणी भियसा समारत।।

卐 अर्चा शक्राय शाकिने शचीवते- शृण्वन्त.मिन्द्रं महय.न्नभि ष्टुहि। यो धृष्णुना शवसा रोदसी उभे- वृषा वृषत्वा वृषभो न्यृञ्जते।।

卐 अर्चा दिवे बृहते शूष्य1(अँ) वच- स्स्वक्षत्रँ यस्य धृषतो धृष.न्मनः। बृहच्छ्रवा असुरो बर्हणा कृतः- पुरो हरिभ्याँ वृषभो रथो हि षः।।

卐 त्वन्दिवो बृहत स्सानु कोपयो-ऽव त्मना धृषता शम्बरं भिनत्। यन्मायिनो व्रन्दिनो मन्दिना धृष- च्छिता.ङ्गभस्ति.मशनिं पृतन्यसि।।

卐 नि यद्वृणक्षि श्वसनस्य मूर्धनि- शुष्णस्य चिद्व्रन्दिनो रोरुव.द्वना। प्राचीनेन मनसा बर्हणावता- यदद्या चित्कृणवः कस्त्वा परि।।

❀01.04.18 卐त्वमाविथ नर्य.न्तुर्वशँ यदु-न्त्व.न्तुर्वीतिँ वय्यं शतक्रतो। त्वं रथ.मेतश.ङ्कृत्व्ये धने- त्वं पुरो नवति.न्दम्भयो नव।।

卐 स घा॒ राजा॒ सत्प॑ति श्शूशुव॒.ज्जनो॒- रा॒तह॑व्य॒ः॒प्रति॒ यश्शास॒.मिन्व॑ति। उ॒क्था वा॒ यो अ॑भिगृ॒णाति॒ राध॑सा॒- दानु॑रस्मा॒ उप॑रा पिन्वते दि॒वः।।

卐 अस॑म.ङ्क्ष॒त्र.मस॑मा मनी॒षा- प्र सो॑म॒पा^ अप॑सा सन्तु॒ नेमे॑। ये त॑ इन्द्र द॒दुषो॑ व॒र्धय॑न्ति॒- महि॑ क्ष॒त्रं स्थवि॑रँ॒ वृष्ण्य॑ञ्च।।

卐 तुभ्ये॒.दे॒ते ब॑हु॒ला^ अद्रि॑दुग्धा- श्च॒मू॒षद॑ श्च॒म॒सा^ इ॑न्द्र॒पानाः। व्य॑श्नुहि त॒र्पया॒ काम॑.मेषा॒-मथा॒ मनो॑ वसु॒देया॑य कृष्व।।

卐 अ॒पा.म॑तिष्ठ.द्धरुण॑ह्वर.न्तमो-ऽन्त वृ॑त्रस्य॑ ज॒ठरे॑षु पर्व॑तः। अ॒भी.मिन्द्रो॑ न॒द्यो॑ व॒व्रिणा॑ हि॒ता- विश्वा॑^ अनु॒ष्ठाः प्र॑व॒णेषु॑ जिघ्नते।।

卐 स शे॑वृ॒ध.मधि॑ धा^ द्युम्न.म॒स्मे- महि॑ क्ष॒त्र.ञ्ज॑ना॒षा.ळि॑न्द्र॒ तव्य॑म्। रक्षा॑ च नो म॒घोनः॑ पा॒हि सू॒री- न्रा॒ये च॑न स्स्वप॒त्या॑ इ॒षे धाः।।

1.55 दिवश्चिदित्यष्टर्चस्य सूक्तस्य, आङ्गिरस स्सव्य- इन्द्रो- जगती।।

❀01.04.19 卐 दि॒वश्चि॑दस्य व॒रि॒मा वि॑पप्र॒थ॒- इन्द्र॒न्न म॒ह्ना पृ॑थि॒वी च॒न प्रति॑। भी॒म स्तुवि॑ष्मा.ञ्चर्ष॒णिभ्य॑^ आ॒तप- श्शिशी॑ते॒ वज्र॒.न्तेज॑से॒ न वंस॑गः।।

卐 सो अर्ण॑वो न न॒द्य॑ स्समु॒द्रियः॒- प्रति॑ गृ॒भ्णाति॒ विश्रि॑ता॒^ वरी॑मभिः। इन्द्र॒ स्सोम॑स्य पी॒तये॑ वृषा॑यते- स॒नात्स॒^ यु॒ध्म^ ओज॑सा पनस्यते।।

卐 त्वन्त.मि॑न्द्र॒ पर्व॑त॒.न्न भोज॑से- म॒हो नृ॒म्णस्य॒ धर्म॑णा.मिरज्यसि। प्र वी॒र्ये॑ण दे॒वताऽति॑ चेकि॒ते- विश्व॑स्मा उ॒ग्रः कर्म॑णे पु॒रोहि॑तः।।

卐 स इद्व॑ने॒ नम॒स्युभि॒ र्व॑चस्यते॒- चारु॒ जने॑षु प्रब्रुवा॒ण^ इ॑न्द्रि॒यम्। वृषा॒ छन्दु॑ र्भ॑वति हर्य॒तो वृषा॒- क्षेमे॑ण धे॒नां म॒घवा॒ यदिन्व॑ति।।

卐 स इन्म॒हानि॑ समि॒थानि॑ म॒ज्मना॑- कृ॒णोति॑ यु॒ध्म^ ओज॑सा॒ जने॑भ्यः। अधा॒ च॒न श्रद्द॑धति॒ त्विषी॑मत॒- इन्द्रा॒य वज्र॒.न्निघनि॑घ्नते॒ व॒धम्।।

❀01.04.20 卐स हि श्रवस्यु स्सदनानि कृत्रिमा- क्ष्मया वृधान^ ओजसा विनाशयन्न्। ज्योतींषि कृण्व.न्नवृकाणि यज्यवे-ऽव सुक्रतु स्सर्तवा अप स्सृजत्।।

卐 दानाय मन स्सोमपाव.न्नस्तु ते-ऽर्वाञ्चा हरी~ वन्दनश्रु.दाकृधि। यमिष्ठास स्सारथयो य इन्द्र ते- न त्वा केता^ आ दभ्नुवन्ति भूर्णयः।।

卐 अप्रक्षितँ वसु बिभर्षि हस्तयो- रषाळ्हं सह स्तन्वि श्रुतो दधे। आवृतासोऽ वतासो न कर्तृभि- स्तनूषु ते क्रतव^ इन्द्र भूरयः।।

☙ 1.56 एष प्र पूर्वीरिति षळर्चस्य सूक्तस्य, आङ्गिरसस्सव्य- इन्द्रो- जगती।।

❀01.04.21 卐एष^ प्र पूर्वी रव तस्य चम्रिषो-ऽत्यो न योषा.मुदयंस्त भुर्वणिः। दक्षं महे पाययते हिरण्ययं- रथ.मावृत्या हरियोग.मृभ्वसम्।।

卐 तङ्गूर्तयो नेम.न्निषः परीणस- स्समुद्र.न्न सञ्चरणे सनिष्यवः। पति.न्दक्षस्य विदथस्य नू सहो- गिरि.न्न वेना^ अधि रोह तेजसा।।

卐 स तुर्वणि र्महा॰ अरेणु पौंस्ये- गिरे र्भृष्टिर्न भ्राजते तुजा शवः। येन शुष्णं मायिन.मायसो मदे- दुध्र ^आभूषु रामय.न्नि दामनि।।

卐 देवी यदि तविषी त्वावृधोतय- इन्द्रं सिषक्त्युषस.न्न सूर्यः। यो धृष्णुना शवसा बाधते तम^- इयर्ति रेणुं बृह.दर्हरिष्वणिः।।

卐 वि यत्तिरो धरुण.मच्युतं रजो-ऽतिष्ठिपो दिव^ आतासु बर्हणा। स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याह-न्वृत्र न्निरपा.मौब्जो अर्णवम्।।

卐 त्वन्दिवो धरुण.न्धिष ओजसा- पृथिव्या^ इन्द्र सदनेषु माहिनः। त्वं सुतस्य मदे अरिणा^ अपो- वि वृत्रस्य समया पाष्याऽरुजः।।

☙ 1.57 प्र मंहिष्ठायेति षळर्चस्य सूक्तस्य, आङ्गिरस स्सव्य- इन्द्रो-जगती।।

❀01.04.22 卐प्र मंहिष्ठाय बृहते बृहद्रये- सत्यशुष्माय तवसे मतिं भरे। अपा.मिव प्रवणे यस्य दुर्धरं- राधो विश्वाऽऽयु शवसे अपावृतम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अध॑ ते॒ विश्व॒.मनु॒ हास.दि॒ष्टय॒- आपो᳚ नि॒म्नेव॒ सव॑ना ह॒विष्म॑तः। यत्पर्व॑ते॒ न स॒मशी᳚त हर्य॒त॒- इन्द्र॑स्य॒ वज्र॒ श्श्नथि॑ता हि॒रण्यय॑ः।।

卐 अ॒स्मै भी॒माय॒ नम॑सा॒ सम॑ध्व॒र- उषो॒ न शु॑भ्र॒ आ भ॑रा॒ पनी᳚यसे। यस्य॒ धाम॒ श्रव॑से॒ नामे᳚न्द्रि॒य-ञ्ज्योति॒ रका᳚रि ह॒रितो॒ नाय॑से।।

卐 इ॒मे त॑ इन्द्र॒ ते व॒यं पु॑रुष्टुत॒- ये त्वा॒ऽरभ्य॒ चरा᳚मसि प्रभूवसो। न॒हि त्वद॒न्यो गि᳚र्वणो॒ गिर॒ स्सघ॑- त्क्षो॒णीरि॑व॒ प्रति॑ नो हर्य॒ तद्वच॑ः।।

卐 भूरि॑ त इन्द्र वी॒र्य॑1(अ॒)न्तव॑ स्मस्य-स्य स्तो॒तु म॑घव॒.न्काम॒मा पृ॑ण। अनु॑ ते॒ द्यौर्बृ॑ह॒ती वी॒र्य᳚ मम॒- इ॒य.ञ्च॑ ते पृथि॒वी ने᳚म॒ ओज॑से।।

卐 त्वन्त.मि᳚न्द्र॒ पर्व॑तं म॒हा.मु॒रुं- व॒ज्रे᳚ण वज्रि॒.न्पर्व॒श श्च॑कर्तिथ। अवा᳚सृजो॒ निवृ॑ता॒ स्सर्त॒वा अ॒प- स्स॒त्रा विश्व᳚.न्दधिषे॒ केव॑लं॒ सह॑ः।।

🕉 1.58 नू चिदिति नवर्चस्य सूक्तस्य, गौतमो नोधा- अग्नि-र्जगती अन्त्याश्चतस्त्रस्त्रिष्टुभः।।

❀01.04.23 卐नू चि॒त्सहो॒जा अ॒मृतो॒ नि तु᳚न्दते॒- होता॒ यद्दू॒तो अभ॑व.द्वि॒वस्व॑तः। वि साधि॑ष्ठेभिः॒ प॒थिभी॒ रजो᳚ मम॒- आ दे॒वता᳚ता ह॒विषा᳚ विवासति।।

卐 आ स्वमद्म॑ यु॒वमा᳚नो अ॒जर॑- स्तृ॒ष्व॑वि॒ष्य.न्न॒तसे॑षु॒ तिष्ठति। अत्यो॒ न पृ॒ष्ठं प्रु॑षि॒तस्य॑ रोचते- दि॒वो न सानु॑ स्त॒नय᳚.न्नचिक्रदत्।।

卐 क्रा॒णा रु॒द्रेभि॒ र्वसु॑भिः पु॒रोहि॑तो- होता॒ निष॑त्तो रयि॒षा.ळम॑र्त्यः। रथो॒ न वि॒क्ष्वृ॒.ञ्जसा॒न आ॒युषु॒- व्या᳚नु॒ष.ग्वार्या᳚ दे॒व ऋ॑ण्वति।।

卐 वि वात॑जूतो अत॒से॑षु तिष्ठते- वृथा᳚ जु॒हूभि॒ स्सृण्या᳚ तुवि॒ष्वणि॑ः। तृषु यद॑ग्ने व॒निनो᳚ वृषा॒यसे॒- कृ॒ष्णन्त॒ एम॒ रुश॑दूर्मे अजर।।

卐 तपु॑र्जम्भो॒ वन॒ आ वात॑चोदितो- यूथे न सा॒ह्वाँ अव॑ वाति॒ वंस॑गः। अ॒भि॒व्रज॒.न्नक्षि॑तं॒ पाज॑सा॒ रज॑- स्स्था॒तु श्च॒रथ᳚ं भयते प॒तत्रिण॑ः।।

❀01.04.24 卐दधृष्वा भृगवो मानुषेष्वा- रयि.न्न चारुं सुहव.ञ्जनेभ्यः। होतार.मग्ने अतिथिँ वरेण्यं-
मित्र.न्न शेव.न्दिव्याय जन्मने।।
卐 होतारं सप्त जुह्वो3(ओ) यजिष्ठँ- यँ वाघतो वृणते अध्वरेषु। अग्निँ विश्वेषा.मरतिँ वसूनां- सपर्यामि
प्रयसा यामि रत्नम्।।
卐 अच्छिद्रा सूनो~ सहसो नो अद्य- स्तोतृभ्यो मित्रमह श्शर्म यच्छ। अग्ने गृणन्त.मंहस- उरु.ष्योर्जो
नपा.त्पूर्भि रायसीभिः।।
卐 भवा वरूथ.ङ्गृणते विभावो- भवा मघव.न्मघव.द्भ्य श्शर्म। उरु.ष्याग्ने अंहसो गृणन्तं- प्रात मंक्षू
धियावसु जगम्यात्।।
1.59 वया इति सप्तर्चस्य सूक्तस्य, गौतमो नोधा- वैश्वानरोऽग्नि-स्त्रिष्टुप्।।
❀01.04.25 ☞卐वया^ इदग्ने अग्नयस्ते अन्ये- त्वे विश्वे अमृता^ मादयन्ते। वैश्वानर नाभि रसि
क्षितीनां- स्थूणेव जना॰ उपमि.द्ययन्थ।।
卐 मूर्धा दिवो नाभि रग्निः॰ पृथिव्या^- अथा भव.दरती रोदस्योः। तन्त्वा देवासोऽजनयन्त देवँ- वैश्वानर
ज्योति रिदार्याय।।
卐 आ सूर्ये न रश्मयो ध्रुवासो- वैश्वानरे दधिरेऽग्ना वसूनि। या पर्वते.ष्वोषधी.ष्वप्सु- या मानुषे.ष्वसि
तस्य राजा।।
卐 बृहतीइव~ सूनवे रोदसी गिरो- होता मनुष्यो3(ओ) न दक्षः। स्वर्वते सत्यशुष्माय पूर्वी- वैश्वानराय
नृतमाय यह्वीः।।
卐 दिव.श्चित्ते बृहतो जातवेदो- वैश्वानर प्र रिरिचे महित्वम्। राजा कृष्टीना.मसि मानुषीणाँ- युधा देवेभ्यो
वरिव श्चकर्थ।।
卐 प्र नू महित्वँ वृषभस्य वोचँ- यं पूरवो वृत्रहणं सचन्ते। वैश्वानरो दस्यु.मग्नि र्जघन्वा॰- अधूनो.त्काष्ठा
अव शम्बरं भेत्।।

卐 वैश्वानरो महिम्ना विश्वकृष्टि- र्भरद्वाजेषु यजतो विभावा। शातवनेये शतिनीभि रग्नि॰- पुरुणीथे जरते सूनृतावान्।।

☫ 1.60 वह्निं यशसमिति पञ्चर्चस्य सूक्तस्य, गौतमो नोधा- अग्नि-स्त्रिष्टुप्।।

❀01.04.26 卐वह्निं यशसँ विदथस्य केतुं- सुप्राव्य.न्दूतं सद्योअर्थम्। द्विजन्मानं रयिमिव प्रशस्तं- रातिं भर.द्भृगवे मातरिश्वा।।

卐 अस्य शासु रुभयास स्सचन्ते- हविष्मन्त^ उशिजो ये च मर्ताः। दिवश्चि.त्पूर्वो न्यसादि होता- ऽऽपृच्छ्यो विश्पति र्विक्षु वेधाः।।

卐 तन्नव्यसी हृद^ आ जायमान-मस्म.त्सुकीर्ति र्मधुजिह्व.मश्याः। यमृत्विजो वृजने मानुषास॰- प्रयस्वन्त^ आयवो जीजनन्त।।

卐 उशि.क्पावको वसु र्मानुषेषु- वरेण्यो होताऽधायि विक्षु। दमूना गृहपति र्दम आ॰- अग्नि र्भुव.द्रयिपती रयीणाम्।।

卐 तन्त्वा वयं पति.मग्ने रयीणां- प्र शंसामो मतिभि र्गोतमासः। आशुन्न वाजंभरं मर्जयन्त॰- प्रात र्मक्षू धियावसु र्जगम्यात्।।

☫ 1.61 अस्मा इद्विति षोळशर्चस्य सूक्तस्य, गौतमो नोधा- इन्द्र-स्त्रिष्टुप्।।

❀01.04.27 卐अस्मा इदु प्र तवसे तुराय- प्रयो न हर्मि स्तोमं माहिनाय। ऋचीषमा.याध्रिगव ओह- मिन्द्राय ब्रह्माणि राततमा।।

卐 अस्मा इदु प्रयइव प्र यंसि- भरा.म्याङ्गूषं बाधे सुवृक्ति। इन्द्राय हृदा मनसा मनीषा- प्रत्नाय पत्ये धियो मर्जयन्त।।

卐 अस्मा इदु त्यमुपमं स्वर्षां- भरा.म्याङ्गूष.मास्येन। मंहिष्ठ.मच्छोक्तिभि र्मतीनां- सुवृक्तिभि स्सूरिँ वावृधध्यै।।

卐 अस्मा इदु स्तोमं सं हिनोमि- रथ.न्न तष्टेव तत्सिनाय। गिर.श्च गिर्वाहसे सुवृ-क्तीन्द्राय विश्वमिन्वं मेधिराय।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अस्मा इदु सप्तिं.मिव श्रव-स्येन्द्रायार्कं.ञ्जुह्वा3(आ) समञ्जे। वीर.न्दानौर्कसँ वन्दध्यै- पुरा.ङ्गूर्तश्रवस
.न्दर्माणम्।।

❀01.04.28 卐अस्मा इदु त्वष्टा तक्ष.द्वज्रं- स्वपस्तमं स्वर्यं1(अं) रणाय। वृत्रस्य चिद्विद.द्येन मर्म-
तुज.न्नीशान स्तुजता कियेधाः।।

卐 अस्येदु मातु स्सवनेषु सद्यो- महः पितुं पपिवा.ञ्चार्वन्ना। मुषाय द्विष्णुः पचतं सहीया-न्विध्य.द्वराह
.न्तिरो अद्रि.मस्ता।।

卐 अस्मा इदु ग्नाश्चि.द्देवपत्नी-रिन्द्रायार्क.महिहत्य ऊवुः~। परि द्यावापृथिवी~ जभ्र उर्वी~- नास्य ते~
महिमानं परि ष्टः~।।

卐 अस्ये.देव प्र रिरिचे महित्व-न्दिव स्पृथिव्याः पर्यन्तरिक्षात्। स्वरा.ळिन्द्रो दम आ विश्वगूर्त- स्स्वरि
रमत्रो ववक्षे रणाय।।

卐 अस्ये.देव शवसा शुषन्तँ- वि वृश्च.द्वज्रेण वृत्र.मिन्द्रः। गा^ न व्राणा^ अवनी रमुञ्च-दभि श्रवो दावने
सचेताः।।

❀01.04.29 卐अस्येदु त्वेषसा रन्त सिन्धवः- परि यद्वज्रेण सीमऽयच्छत्। ईशानकृ.द्दाशुषे दशस्य-
न्तुर्वीतये गाध.न्तुर्वणिः कः~।।

卐 अस्मा इदु प्र भरा तूतुजानो- वृत्राय वज्र.मीशानः कियेधाः। गोर्न पर्व विरदा तिर-
श्चेष्यन्नर्णां.स्यपा.ञ्चरध्यै।।

卐 अस्येदु प्र ब्रूहि पूर्व्याणि- तुरस्य कर्माणि नव्य^ उक्थैः। युधे यदिष्णान^ आयुधा-न्यृघायमाणो
निरिणाति शत्रून्।।

卐 अस्येदु भिया गिरयश्च दृळ्हा^- द्यावा च भूमा जनुष स्तुजेते~। उपो~ वेनस्य जोगुवान ^ओणिं-
सद्यो भुव.द्वीर्याय नोधाः।।

卐 अस्मा इदु त्यदनु दाय्येषा-मेको यद्वव्ने भूरे रीशानः। प्रैतशं सूर्ये पस्पृधानं- सौवश्व्ये ष्सुष्विं.माव
.दिन्द्रः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 एवा ते हारियोजना सुवृ-क्तीन्द्र ब्रह्माणि गोतमासो अक्रन्न्। ऐषु विश्वपेशस.न्धियन्धाः- प्रात र्मक्षू धियावसु र्जगम्यात्।।

## इति चतुर्थाध्यायः।।

## प्रथमाष्टके पञ्चमाध्यायः। वर्गाः(1-31)

1.62 प्र मन्मह इति त्रयोदशर्चस्य सूक्तस्य, गौतमो नोधा- इन्द्र- स्त्रिष्टुप्।।

01.05.01 卐प्र मन्महे शवसानाय शूष-माङ्गूष.ङ्गिर्वणसे अङ्गिरस्वत्। सुवृक्तिभि स्स्तुवत ऋग्मिया-याचामार्क.न्नरे विश्रुताय।।

卐 प्र वो महे महि नमो भरध्व-माङ्गूष्यं शवसानाय साम। येना नः पूर्वे पितरः पदज्ञा- अर्चन्तो अङ्गिरसो गा अविन्दन्न्।।

卐 इन्द्र.स्याङ्गिरसा.ञ्चेष्टौ- विद.त्सरमा तनयाय धासिम्। बृहस्पति र्भिन.दद्रिं विदद्गा- स्समुस्रियाभि र्वावशन्त नरः।।

卐 स सुष्टुभा स स्तुभा सप्त विप्रै- स्स्वरेणाद्रिं स्वर्यो3(ओ) नवग्वैः। सरण्युभिः फलिग.मिन्द्र शक्र-वलं रवेण दरयो दशग्वैः।।

卐 गृणानो अङ्गिरोभि र्दस्म विर्व-रुषसा सूर्येण गोभि रन्धः। वि भूम्या अप्रथय इन्द्र सानु- दिवो रज उपर.मस्तभायः।।

01.05.02 卐तदु प्रयक्षतम.मस्य कर्म- दस्मस्य चारुतम.मस्ति दंसः। उपह्वरे यदुपरा अपिन्व-न्मध्वर्णसो नद्य1(अ) श्चतस्रः।।

卐 द्विता वि वव्रे सनजा सनीळे- अयास्य स्स्तवमानेभि रर्कैः। भगो न मेने परमे व्योम-न्नधारय.द्रोदसी सुदंसाः।।

卐 सना.द्दिवं परि भूमा विरूपे- पुनर्भुवा युवती स्वेभि रेवैः। कृष्णेभि रक्तोषा रुशद्भि- र्वपुर्भि रा चरतो अन्याऽन्या।।

卐 सनेमि सख्यं स्वपस्यमान- स्सूनु दाधार शवसा सुदंसाः। आमासु चिद्दधिषे पक्व.मन्तः~- पयः कृष्णासु रुश.द्रोहिणीषु।।

卐 सना.त्सनीळा^ अवनी रवाता^- व्रता रक्षन्ते अमृता स्सहोभिः। पुरू सहस्रा जनयो न पत्नी- र्दुवस्यन्ति स्वसारो अह्रयाणम्।।

❀01.05.03 卐सनायुवो नमसा नव्यो अर्कै- र्वसूयवो मतयो दस्म दद्रुः। पतिन्न पत्नी रुशती रुशन्तं- स्पृशन्ति त्वा शवसाव.न्मनीषाः।।

卐 सना.देव तव रायो गभस्तौ- न क्षीयन्ते नोप दस्यन्ति दस्म। द्युमा९ असि क्रतुमा९ इन्द्र धीर- श्शिक्षा शचीव स्तव न श्शचीभिः।।

卐 सनायते गोतम^ इन्द्र नव्य-मतक्ष.द्ब्रह्म हरियोजनाय। सुनीथाय न श्शवसान नोधाः- प्रात र्मक्षू धियावसु जगम्यात्।।

☸ 1.63 त्वं महानिति नवर्चस्य सूक्तस्य, गौतमो नोधा इन्द्रस्त्रिष्टुप्।।

❀01.05.04 卐त्वं महा९ इन्द्र यो ह शुष्मै- र्द्यावा जज्ञानः पृथिवी~ अमे धाः। यद्ध ते विश्वा गिरय श्चिदभ्वा- भिया दृळ्हासः किरणा^ नैजन्।।

卐 आ यद्धरी~ इन्द्र विव्रतावे- रा ते वज्र.ञ्जरिता बाह्वो.र्धात्। येना ऽविहर्यतक्रतो~ अमित्रा-न्पुर^ इष्णासि पुरुहूत पूर्वीः।।

卐 त्वं सत्य^ इन्द्र धृष्णु रेता-न्त्वमृभुक्षा^ नर्यस्त्वं षाट्। त्वं शुष्णँ वृजने पृक्ष आणौ- यूने कुत्साय द्युमते सचाऽहन्न्।।

卐 त्वं ह त्यदिन्द्र चोदी स्सखा- वृत्रँ यद्वज्रि.न्वृषकर्म.न्नुभ्नाः। यद्ध शूर वृषमणः पराचै- र्वि दस्यू९ र्योना वकृतो वृथाषाट्।।

卐 त्वं ह त्यदिन्द्रारिषण्य-न्दृळ्हस्य चिन्मर्ताना.मजुष्टौ। व्य1(अ)स्मदा काष्ठा अर्वते व-र्घनेव वज्रि.ञ्छ्नथि. ह्यमित्रान्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀01.05.05 卐त्वां ह त्यदिन्द्रार्णसातौ- स्वर्मीळ्हे नर^ आजा हवन्ते। तव स्वधाव^ इयमा समर्य-ऊति र्वाजे.ष्वतसाय्या भूत्।।

卐 त्वं ह त्यदिन्द्र सप्त युध्य-न्पुरो वज्रि.न्पुरुकुत्साय दर्दः~। बर्हिर्न यत्सुदासे वृथा व-र्गंहो राज .न्वरिवः पूरवे कः~।।

卐 त्व न्त्यान्न^ इन्द्र देव चित्रा-मिष.मापो नपीपयः परिज्मन्न्। यया शूर प्रत्यस्मभ्यँ यंसि- त्मन.मूर्ज.न्न विश्वध क्षरध्यै।।

卐 अकारि त इन्द्र गोतमेभि- र्ब्रह्मा.ण्योक्ता नमसा हरिभ्याम्। सुपेशसँ वाज.माभरा नः- प्रात र्मक्षू धियावसु र्जगम्यात्।।

1.64 वृष्णे शर्धायेति पञ्चदशर्चस्य सूक्तस्य, गौतमो नोधा मरुतो जगती अन्त्या त्रिष्टुप्।।

❀01.05.06 卐वृष्णे शर्धाय सुमखाय वेधसे- नोध स्सुवृक्तिं प्र भरा मरुद्भ्यः। अपो न धीरो मनसा सुहस्त्यो- गिर स्समञ्जे विदथे.ष्वाभुवः।।

卐 ते जज्ञिरे दिव^ ऋष्वास^- उक्षणो रुद्रस्य मर्या^ असुरा^ अरेपसः। पावकास श्शुचय स्सूर्याइव- सत्वानो न द्रप्सिनो घोरवर्पसः।।

卐 युवानो रुद्रा^ अजरा^ अभोग्घनो- ववक्षु रध्रिगावः पर्वताइव। दृळ्हा चिद्विश्वा भुवनानि पार्थिवा- प्र च्यावयन्ति दिव्यानि मज्मना।।

卐 चित्रै रञ्जिभि र्वपुषे व्यञ्जते- वक्षस्सु रुक्माऽ अधि येतिरे शुभे। अंसे.ष्वेषा.न्निमिमृक्षुर् ऋष्टय-स्साक.ञ्जज्ञिरे स्वधया दिवो नरः।।

卐 ईशानकृतो धुनयो रिशादसो- वाता.न्विद्युत स्तविषीभि रक्रत। दुह.न्त्यूध र्दिव्यानि धूतयो- भूमिं पिन्वन्ति पयसा परिज्रयः।।

❀01.05.07 卐पिन्व.न्त्यपो मरुत स्सुदानवः- पयो घृतव.द्विदथे.ष्वाभुवः। अत्य.न्न मिहे वि नयन्ति वाजिन-मुत्स.न्दुहन्ति स्तनयन्त.मक्षितम्।।

卐 महिषासो मायिनं श्चित्रभानवो- गिरयो न स्वतवसो रघुष्यदः। मृगाइव हस्तिनः खादथा वना-यदारुणीषु तविषी रयुग्ध्वम्।।

卐 सिंहाइव नानदति प्रचेतसः- पिशाइव सुपिशो विश्ववेदसः। क्षपो जिन्वन्तः पृषतीभिर् ऋष्टिभि-स्समि.त्सबाध श्शवसाऽहिमन्यवः।।

卐 रोदसी आ वदता गणश्रियो- नृषाच श्शूरा श्शवसाऽहिमन्यवः। आ वन्धुरे.ष्वमतिर्न दर्शता-विद्युन्न तस्थौ मरुतो रथेषु वः।।

卐 विश्ववेदसो रयिभि स्समोकस- स्संमिश्लास स्तविषीभि र्विरप्शिनः। अस्तार इषु.न्दधिरे गभस्त्यो-रनन्तशुष्मा वृषखादयो नरः।।

❀01.05.08 卐हिरण्ययेभिः पविभिः पयोवृध- उज्जिघ्नन्त आपथ्यो3(ओ)न पर्वतान्। मखा अयास स्स्वसृतो ध्रुवच्युतो- दुध्रकृतो मरुतो भ्राज.दृष्टयः।।

卐 घृषुं पावकँ वनिनँ विचर्षणिं- रुद्रस्य सूनुं हवसा गृणीमसि। रजस्तुर.न्तवसं मारुत.ङ्गण-मृजीषिणँ वृषणं सश्चत श्रिये।।

卐 प्र नू स मर्त श्शवसा जनाँ अति- तस्थौ व ऊती मरुतो यमावत। अर्वद्भि र्वाजं भरते धना नृभि-रापृच्छ्य.ङ्क्रतु.माक्षेति पुष्यति।।

卐 चर्कृत्यं मरुतः पृत्सु दुष्टर-न्द्युमन्तं शुष्मं मघवत्सु धत्तन। धनस्पृत.मुक्थ्यँ विश्वचर्षणि-न्तोकं पुष्येम तनयं शतं हिमाः।।

卐 नू ष्ठिरं मरुतो वीरवन्त-मृतीषाहं रयि.मस्मासु धत्त। सहस्रिणं शतिनं शूशुवांसं- प्रात र्मक्षू धियावसु र्जगम्यात्।।

1.65 पश्वा नेति दशर्चस्य सूक्तस्य, शाक्त्यः- पराशरोऽग्नि- र्द्विपदाविराट्।।

❀01.05.09 卐पश्वा न तायु.ङ्गुहा चतन्त-न्नमो युजान.न्नमो वहन्तम्।।

卐 सजोषा धीराः पदै रनु ग्म-न्नुप त्वा सीद.न्विश्वे यजत्राः।।

卐 ऋतस्य देवा अनु व्रता गु- र्भुव.त्परिष्टि र्द्यौर्न भूम।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 वर्धन्तीमापः पन्वा सुशिश्वि-मृतस्य योना गर्भे सुजातम्।।

卐 पुष्टि र्न रण्वा क्षिति र्न पृथ्वी- गिरि र्न भुज्म क्षोदो न शंभु।।

卐 अत्यो नाज्म.न्त्सर्गप्रतक्त- स्सिन्धु र्न क्षोदः क^ ईं वराते।।

卐 जामि स्सिन्धूनां भ्रातेव स्वस्रा-मिभ्यान्न राजा वना.न्यत्ति।।

卐 यद्वातजूतो वना व्यस्था-दग्निर्ह दाति रोमा पृथिव्याः।।

卐 श्वसि.त्यप्सु हंसो न सीद-न्क्रत्वा चेतिष्ठो विशा.मुषर्भुत्।।

卐 सोमो न वेधा^ ऋतप्रजातः- पशु र्न शिश्वा विभु दूरेभाः।।

1.66 रयिर्नेति दशर्चस्य सूक्तस्य, शात्त्यः- पराशरोऽग्नि- र्द्विपदाविराट्।।

❀01.05.10 卐रयि र्न चित्रा सूरो न सन्द-गायुर्न प्राणो नित्यो न सूनुः।।

卐 तक्वा न भूर्णि र्वना सिषक्ति- पयो न धेनु श्शुचि र्विभावा।।

卐 दाधार क्षेम मोको न रण्वो- यवो न पक्वो जेता जनानाम्।।

卐 ऋषि र्न स्तुभ्वा विक्षु प्रशस्तो- वाजी न प्रीतो वयो दधाति।।

卐 दुरोकशोचिः क्रतु र्न नित्यो- जायेव योना वरँ विश्वस्मै।।

卐 चित्रो यदभ्रा.ट्छ्वेतो न विक्षु- रथो न रुक्मी त्वेष स्समत्सु।।

卐 सेनेव सृष्टाऽमन्दधा-त्यस्तु र्न दिद्यु.त्त्वेषप्रतीका।।

卐 यमो ह जातो यमो जनित्व-ञ्जारः कनीनां पति र्जनीनाम्।।

卐 तँ व श्चराथा वयँ वसत्या-ऽस्तन्न गावो नक्षन्त इद्धम्।।

卐 सिन्धुर्न क्षोदः प्र नीची रैनो-न्नवन्त गाव स्स्व1(अ)र्दृशीके।।

1.67 वनेष्विति दशर्चस्य सूक्तस्य, शात्त्यः- पराशरोऽग्नि-र्द्विपदाविराट्।।

❀01.05.11 卐वनेषु जायु र्मर्तेषु मित्रो- वृणीते श्रुष्टिं राजे.वाजुर्यम्।।

卐 क्षेमो न साधुः क्रतु र्न भद्रो- भुव.त्स्वाधी र्होता हव्यवाट्।।

卐 हस्ते दधानो नृम्णा विश्वा-न्यमे देवा.न्धा.द्गुहा निषीदन्न्।।

卐 विद.न्ती.मत्र नरो धियन्धा^- हृदा यत्तष्टा.न्मन्त्रा॰ अशंसन्न्।।

卐 अजो न क्षा.न्दाधार पृथिवी-न्तस्तम्भ द्यां मन्त्रेभि स्सत्यैः।।

卐 प्रिया पदानि पश्वो नि पाहि- विश्वाऽऽयु रग्ने गुहा गुह.ङ्गाः।।

卐 य^ ईञ्चिकेत गुहा भवन्त-मा य स्ससाद धारा.मृतस्य।।

卐 वि ये चृत.न्त्यृता सपन्त^- आदि.द्वसूनि प्रववा.चास्मै।।

卐 वि यो वीरुत्सु रोध.न्महि-त्वोत प्रजा^ उत प्रसू.ष्वन्तः~।।

卐 चित्ति रपा.न्दमे विश्वाऽऽयु- स्सद्मेव धीरा स्संमाय चक्रुः।।

1.68 श्रीणन्निति दशर्चस्य सूक्तस्य, शात्त्यः- पराशरोऽग्नि-र्द्विपदाविराट्।।

❀01.05.12 卐श्रीण.न्नुपस्था.द्दिवं भुरण्यु- स्स्थातु श्चरथ.मक्तू.न्व्यूर्णोत्।।

卐 परि यदेषा.मेको विश्वेषां- भुव.द्देवो देवानां महित्वा।।

卐 आदित्ते विश्वे क्रतु.ञ्जुषन्त- शुष्का.द्यद्देव जीवो जनिष्ठाः।।

卐 भजन्त विश्वे देवत्व.न्नाम- ऋतं सपन्तो अमृत.मेवैः।।

卐 ऋतस्य प्रेषा^ ऋतस्य धीति- र्विश्वाऽऽयु र्विश्वे अपांसि चक्रुः।।

卐 यस्तुभ्य.न्दाशा.द्यो वा ते शिक्षा-त्तस्मै चिकित्वा.न्नयि.न्दयस्व।।

卐 होता निषत्तो मनो रपत्ये- स चिन्न्वासां पती रयीणाम्।।

卐 इच्छन्त रेतो मिथ स्तनूषु- सञ्जानत स्वै र्दक्षै रमूराः।।

卐 पितु र्न पुत्राः क्रतु.ञ्जुषन्त- श्रोष.न्ये अस्य शास.न्तुरासः।।

卐 वि राय^ और्णो.द्दुरः पुरुक्षुः- पिपेश नाकं स्तृभि र्दमूनाः।।

1.69 शुक्र इति दशर्चस्य सूक्तस्य, शात्त्यः- पराशरोऽग्नि-र्द्विपदाविराट्।।

❀01.05.13 卐शुक्र श्शुशुक्वा॰ उषो न जारः- पप्रा समीची~ दिवो न ज्योतिः।।

卐 परि प्रजातः क्रत्वा बभूथ- भुवो देवानां पिता पुत्र स्सन्न्।।

卐 वेधा^ अदृप्तो अग्नि र्विजान-न्नूधर्न गोनां स्वाद्मा पितूनाम्।।

卐 जने न शेवं आहूर्य स्स-न्मध्ये नि॒षत्तो रण्वो दुरोणे।।

卐 पुत्रो न जातो रण्वो दुरोणे- वाजी न प्रीतो विशो वि तारीत्।।

卐 विशो यदह्वे नृभि स्सनीळा- अग्नि र्देवत्वा विश्वा.न्यश्याः।।

卐 नकि॒ष्ट एता व्रता मिनन्ति- नृभ्यो यदेभ्य श्श्रुष्टि.ञ्चकर्थ।।

卐 तत्तु ते दंसो यदह.न्त्समानै- र्नृभि र्यद्युक्तो विवे रपांसि।।

卐 उषो न जारो विभा.वोस्र- स्संज्ञातरूप श्चिकेत.दस्मै।।

卐 त्मना वहन्तो दुरो व्यृण्व-न्नवन्त विश्वे स्व1(अ)र्दृशीके।।

1.70 वनेमेत्येकादशर्चस्य सूक्तस्य, शाक्त्यः- पराशरोऽग्नि-र्द्विपदाविराट्।।

❀01.05.14 卐वनेम पूर्वी रर्यो मनीषा- अग्नि स्सुशोको विश्वा.न्यश्याः।।

卐 आ दैव्यानि व्रता चिकित्वा- ना मानुषस्य जनस्य जन्म।।

卐 गर्भो यो अपा.ङ्गर्भो वनाना-ङ्गर्भश्च स्थाता.ङ्गर्भ श्चरथाम्।।

卐 अद्रौ चिदस्मा अन्त दुरोणे- विशान्न विश्वो अमृत स्स्वाधीः।।

卐 स हि क्षपावाँ अग्नी रयीणा-न्दाश द्यो अस्मा अरं सूक्तैः।।

卐 एता चिकित्वो भूमा नि पाहि- देवाना.ञ्जन्म मर्ताँश्च विद्वान्।।

卐 वर्धान्यं पूर्वीः क्षपो विरूपा- स्स्थातुश्च रथ.मृतप्रवीतम्।।

卐 अराधि होता स्व1(अ)र्नि॒षत्तः- कृण्व.न्विश्वा.न्यपांसि सत्या।।

卐 गोषु प्रशस्तिँ वनेषु धिषे- भरन्त विश्वे बलिं स्वर्णः।।

卐 वि त्वा नरः पुरुत्रा सपर्य-न्पितुर्न जिव्रेर्वि वेदो भरन्त।।

卐 साधु र्न गृध्नु रस्तेव शूरो- यातेव भीम स्त्वेष स्समत्सु।।

1.71 उप प्र जिन्वन्निति दशर्चस्य सूक्तस्य, शाक्त्यः- पराशरोऽग्नि-स्त्रिष्टुप्।।

❀01.05.15 卐उप प्र जिन्व.न्नुशती रुशन्तं- पति.न्न नित्य.ञ्जनय स्सनीळाः। स्वसारश्श्यावी .मरुषी.मजुष्र-श्चित्र.मुच्छन्ती.मुषस.न्न गावः।।

卐 वीळु चिद्दृळ्हा पितरो न उक्थै- रद्रिं रुज.न्नङ्गिरसो रवेण। चक्रु र्दिवो बृहतो गातु.मस्मे- अहः स्स्वर्विविदुः केतु.मुस्राः।।

卐 दध.न्नृत.न्धनय.न्नस्य धीति-मादि.दर्यो दिधिष्वो3(ओ) विभृत्राः। अतृष्यन्ती रपसो यन्त्यच्छा- देवा.न्जन्म प्रयसा वर्धयन्तीः।।

卐 मथी.द्यदीं विभृतो मातरिश्वा- गृहेगृहे श्येतो जेन्यो भूत्। आदीं राज्ञे न सहीयसे सचा- सन्ना दूत्य1(अं) भृगवाणो विवाय।।

卐 महे यत्पित्र ईं रस-न्दिवे क रवत्सर.त्पृशन्य श्चिकित्वान्। सृज.दस्ता धृषता दिद्यु मस्मै- स्वाया.न्देवो दुहितरि त्विषि.न्धात्।।

❀01.05.16 卐स्व आ यस्तुभ्य.न्दम आ विभाति- नमो वा दाशा.दुशतो अनु द्यून्। वर्धो अग्ने वयो अस्य द्विबर्हा- यास.द्राया सरथं यञ्जुनासि।।

卐 अग्निं विश्वा अभि पृक्ष स्सचन्ते- समुद्रन्न स्रवत स्सप्त यह्वीः। न जामिभि र्वि चिकिते वयो नो- विदा देवेषु प्रमति.श्चिकित्वान्।।

卐 आ यदिषे नृपति.न्तेज आन-ट्छुचि रेतो निषिक्त.न्द्यौ रभीके। अग्नि श्शर्ध.मनवद्यं युवानं- स्वाध्य.ञ्जनय.त्सूदयच्च।।

卐 मनो न योऽध्वन स्सद्य ए-त्येक स्सत्रा सूरो वस्व ईशे। राजाना मित्रावरुणा सुपाणी- गोषु प्रिय ममृतं रक्षमाणा।।

卐 मा नो अग्ने सख्या पित्र्याणि- प्र मर्षिष्ठा अभि विदु ष्कवि स्सन्। नभो न रूप.ञ्जरिमा मिनाति- पुरा तस्या अभिशस्ते रधीहि।।

1.72 नि काव्येति दशर्चस्य सूक्तस्य, शाक्त्यः- पराशरोऽग्नि-स्त्रिष्टुप्।।

❀01.05.17 卐नि काव्या वेधस श्शश्वत स्क- र्हस्ते दधानो नर्या पुरूणि। अग्नि र्भुव.द्रयिपती रयीणां- सत्रा चक्राणो अमृतानि विश्वा।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अस्मे वत्सं परि षन्तन्न विन्द-न्निच्छन्तो विश्वे अमृता^ अमूराः। श्रमयुवः पदव्यो धियन्धा-स्तस्थुः पदे परमे चार्वग्नेः।।

卐 तिस्रो यदग्ने शरद स्त्वामि-च्छुचि.ङ्घृतेन शुचय स्सपर्यान्। नामानि चिद्दधिरे यज्ञिया-न्यसूदयन्त तन्व1(अ) स्सुजाताः।।

卐 आ रोदसी बृहती~ वेविदानाः- प्र रुद्रिया जभ्रिरे यज्ञियासः। विद.न्मर्तो नेमधिता चिकित्वा-नग्निं पदे परमे तस्थिवांसम्।।

卐 सञ्जानाना^ उप सीद.न्नभिज्ञु- पत्नीवन्तो नमस्य.न्नमस्यन्न्~। रिरिक्वांस स्तन्वः कृण्वत स्वा- स्सखा सख्यु र्निमिषि रक्षमाणाः।।

❀01.05.18 卐त्रि स्सप्त यद्गुह्यानि त्वे इ-त्पदाविद.न्निहिता यज्ञियासः। तेभी रक्षन्ते अमृतं सजोषाः- पशू.ञ्च स्थातृ.ञ्चरथञ्च पाहि।।

卐 विद्वाꣳ अग्ने वयुनानि क्षितीनां- व्यानुष.क्छुरुधो जीवसे धाः। अन्तर्विद्वाꣳ अध्वनो देवयाना-नतन्द्रो दूतो अभवो हविर्वाट्।।

卐 स्वाध्यो दिव^ आ सप्त यह्वी- रायो दुरो व्यृतज्ञा^ अजानन्न्। विद.द्गव्यं सरमा दृꣳह.मूर्वं- येना नु कं मानुषी भोजते विट्।।

卐 आ ये विश्वा स्वपत्यानि तस्थुः- कृण्वानासो अमृतत्वाय गातुम्। मह्ना महद्भिः पृथिवी वि तस्थे-माता पुत्रै रदिति र्धायसे वेः~।।

卐 अधि श्रिय.न्नि दधु श्चारु.मस्मि-न्दिवो यदक्षी~ अमृता^ अकृण्वन्न्। अध क्षरन्ति सिन्धवो न सृष्टाः-प्र नीची रग्ने अरुषी रजानन्न्।।

☬ 1.73 रयिर्नेति दशर्चस्य सूक्तस्य, शाक्त्यः- पराशरोऽग्नि-स्त्रिष्टुप्।।

❀01.05.19 卐रयि र्न यः पितृवित्तो वयोधा- स्सुप्रणीति श्चिकितुषो न शासुः। स्योनशी रतिथि र्न प्रीणानो- होतेव सद्म विधतो वि तारीत्।।

卐 देवो न य स्सविता सत्यमन्मा- क्रत्वा निपाति वृजनानि विश्वा। पुरुप्रशस्तो अमति र्न सत्य^- आत्मेव शेवो दिधिषाय्यो भूत्।।

卐 देवो न यः पृथिवीँ विश्वधाया^- उपक्षेति हितमित्रो न राजा। पुरस्सद श्शर्मसदो न वीरा^- अनवद्या पतिजुष्टेव नारी।।

卐 तन्त्वा नरो दम आ नित्य.मिद्ध-मग्ने सचन्त क्षितिषु ध्रुवासु। अधि द्युम्न.न्नि दधु र्भूर्यस्मि-न्भवा विश्वाऽयु र्धरुणो रयीणाम्।।

卐 वि पृक्षो अग्ने मघवानो अश्यु- र्विसूरयो ददतो विश्व.मायुः। सनेम वाजं समिथे.ष्वर्यो- भाग.न्देवेषु श्रवसे दधानाः।।

❀01.05.20 卐ऋतस्य हि धेनवो वावशाना- स्स्मदूध्नीः पीपयन्त द्युभक्ताः। परावत स्सुमतिं भिक्षमाणा^- वि सिन्धव स्समया सस्रु रद्रिम्।।

卐 त्वे अग्ने सुमतिं भिक्षमाणा^- दिवि श्रवो दधिरे यज्ञियासः। नक्ता च चक्रु रुषसा विरूपे~- कृष्णञ्च वर्ण.मरुण.ञ्च सन्धुः~।।

卐 यात्राये मर्ता.न्त्सुषूदो अग्ने- ते स्याम मघवानो वयञ्च। छायेव विश्वं भुवनं सिस-क्ष्यापप्रिवा.न्रोदसी अन्तरिक्षम्।।

卐 अर्वद्भि रग्ने अर्वतो नृभि र्नृ-न्वीरै र्वीरा.न्वनुयामा त्वोताः। ईशानासः पितृवित्तस्य रायो- वि सूरय श्शतहिमा^ नो अश्युः।।

卐 एता ते अग्न उचथानि वेधो- जुष्टानि सन्तु मनसे हृदे च। शकेम राय स्सुधुरो यम.न्ते-ऽधि श्रवो देवभक्त.न्दधानाः।।

1.74 उपप्रयन्त इति नवर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नि-र्गायत्री।।

❀01.05.21 卐उपप्रयन्तो अध्वरं- मन्त्रँ वोचे.माग्नये। आरे अस्मे च शृण्वते।।

卐 य स्स्नीहितीषु पूर्व्य- स्सञ्जग्मानासु कृष्टिषु। अरक्ष.द्दाशुषे गयम्।।

卐 उत ब्रुवन्तु जन्तव^- उदग्नि र्वृत्रहाऽजनि। धनञ्जयो रणेरणे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यस्य दूतो असि क्षये- वेषि हव्यानि वीतये। दस्म.त्कृणो.ष्यध्वरम्।।

卐 तमि.त्सुहव्य.मङ्गिर- स्सुदेवं सहसो यहो~। जना^ आहु स्सुबर्हिषम्।।

❀01.05.22 卐आ च वहासि ता९ इह- देवा९ उप प्रशस्तये। हव्या सुश्चन्द्र वीतये।।

卐 न यो रुपब्दि रश्व्य- श्शृण्वे रथस्य कच्चन। यदग्ने यासि दूत्यम्।।

卐 त्वोतो वाज्यह्वयो-ऽभि पूर्वस्मा.दपरः। प्र दाश्वा९ अग्ने अस्थात्।।

卐 उत द्युम.त्सुवीर्यं- बृह.दग्ने विवाससि। देवेभ्यो देव दाशुषे।।

1.75 जुषस्वेति पञ्चर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नि-र्गायत्री।।

❀01.05.23 卐जुषस्व सप्रथस्तमँ- वचो देवप्सरस्तमम्। हव्या जुह्वान^ आसनि।।

卐 अथा ते अङ्गिरस्त-माग्ने वेधस्तम प्रियम्। वोचेम ब्रह्म सानसि।।

卐 कस्ते जामि र्जनाना-मग्ने को दाश्वध्वरः। को ह कस्मि.न्नसि श्रितः।।

卐 त्वञ्जामि र्जनाना-मग्ने मित्रो असि प्रियः। सखा सखिभ्य^ईड्यः।।

卐 यजा नो मित्रावरुणा- यजा देवा९ ऋतं बृहत्। अग्ने यक्षि स्वन्दमम्।।

1.76 का त इति पञ्चर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नि-स्त्रिष्टुप्।।

❀01.05.24 卐का त 卐उपेति र्मनसो वराय- भुव.दग्ने शन्तमा का मनीषा। को वा यज्ञैः परि दक्षन्त आप- केन वा ते मनसा दाशेम।।

卐 एह्यग्न इह होता नि॰षी-दादब्ध स्सु पुरएता भवा नः। अवतान्त्वा रोदसी विश्वमिन्वे~- यजा महे सौमनसाय देवान्।।

卐 प्र सु विश्वा.न्रक्षसो धक्ष्यग्ने- भवा यज्ञाना.मभिशस्तिपावा। अथाऽवह सोमपतिं हरिभ्या-मातिथ्य.मस्मै चकृमा सुदाव्ने।।

卐 प्रजावता वचसा वह्निरासा-ऽच हुवे नि च सत्सीह देवैः। वेषि होत्र.मुत पोत्रँ यजत्र- बोधि प्रयन्त र्जनित र्वसूनाम्।।

卐 यथा विप्रस्य मनुषो हविर्भि- र्देवा॰ अयजः कविभिः कवि स्सन्न्। एवा होत~ स्सत्यतर- त्वमद्याग्ने मन्द्रया जुह्वा यजस्व।।

☃ 1.77 कथा दाशेमेति पञ्चर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नि-स्त्रिष्टुप्

❀01.05.25 卐कथा दाशे.माग्नये काऽस्मै- देवजु.ष्टोच्यते भामिने गीः। यो मर्त्ये.ष्वमृत^ ऋतावा- होता यजिष्ठ^ इत्कृणोति देवान्।।

卐 यो अध्वरेषु शन्तम^ ऋतावा- होता तमू नमोभि राकृणुध्वम्। अग्नि र्यद्वे मर्ताय देवा-न्त्सचा बोधाति मनसा यजाति।।

卐 स हि क्रतु स्स मर्य स्स साधु- र्मित्रो न भूद.द्भुतस्य रथीः। तं मेधेषु प्रथम.न्देवयन्ती- र्विश^ उप ब्रुवते दस्ममारीः।।

卐 स नो नृणा.न्नृतमो रिशादा^- अग्नि र्गिरोऽवसा वेतु धीतिम्। तना च ये मघवान श्शविष्ठा^- वाजप्रसूता^ इषयन्त मन्म।।

卐 एवाग्नि र्गोतमेभिर् ऋतावा- विप्रेभि रस्तोष्ट जातवेदाः। स एषु द्युम्नं पीपय.त्स^ वाजं- स पुष्टिं याति जोषमा चिकित्वान्।।

☃ 1.78 अभि त्वेति पञ्चर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नि-र्गायत्री।।

❀01.05.26 卐☞अभि त्वा गोतमा^ गिरा- जातवेदो विचर्षणे। द्युम्नै रभि प्र णोनुमः।।

卐 तमु त्वा गोतमो गिरा- रायस्कामो दुवस्यति। द्युम्नै रभि प्र णोनुमः।।

卐 तमु त्वा वाजसातम-मङ्गिरस्व.द्धवामहे। द्युम्नै रभि प्र णोनुमः।।

卐 तमु त्वा वृत्रहन्तमँ- यो दस्यू॰ रवधूनुषे। द्युम्नै रभि प्र णोनुमः।।

卐 अवोचाम रहूगणा^- अग्नये मधुम.द्वचः। द्युम्नै रभि प्र णोनुमः।।

☃ 1.79 हिरण्यकेश इति द्वादशर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नि-र्गायत्री-आद्यास्तिस्रोऽनुष्टुभः- ततस्तिस्र उष्णिहः (आद्यानां तिसृणां मध्यमोऽग्निः- पार्थिवो वा)

❀01.05.27 卐हिरण्यकेशो रजसो विसारे-ऽहि र्धुनि र्वातइव ध्रजीमान्। शुचिभ्राजा^ उषसो नवेदा^- यशस्वती रपस्युवो न सत्याः।।

卐 आ ते सुपर्णा^ अमिनन्तँ एवैः- कृष्णो नोनाव वृषभो यदीदम्। शिवाभि र्न स्मयमानाभि राऽगा- त्पतन्ति मिह स्स्तनय.न्त्यभ्रा।।

卐 यदी.मृतस्य पयसा पियानो- नय.न्नृतस्य पथिभी रजिष्ठैः। अर्यमा मित्रो वरुणः परिज्मा- त्वचं पृञ्च. न्त्युपरस्य योनौ।।

卐 अग्ने वाजस्य गोमत^- ईशान स्सहसो यहो~। अस्मे धेहि जातवेदो महि श्रवः।।

卐 स इधानो वसुष्कवि- रग्नि रीळेन्यो गिरा। रेव.दस्मभ्यं पुर्वणीक दीदिहि।।

卐 क्षपो राज.न्नुत त्मना-ऽग्ने वस्तो रुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति।।

❀01.05.28 卐अवा नो अग्न ऊतिभि- र्गायत्रस्य प्रभर्मणि। विश्वासु धीषु वन्द्य।।

卐 आ नो अग्ने रयिं भर- सत्रासाहँ वरेण्यम्। विश्वासु पृत्सु दुष्टरम्।।

卐 आ नो अग्ने सुचेतुना- रयिँ विश्वायुपोषसम्। मार्डीक.न्धेहि जीवसे।।

卐 प्र पूता स्तिग्मशोचिषे- वाचो गोत.माग्नये। भरस्व सुम्नयु र्गिरः।।

卐 यो नो अग्नेऽभिदास-त्यन्ति दूरे पदीष्ट सः। अस्माक.मिद्वृधे भव।।

卐 सहस्राक्षो विचर्षणि- रग्नी रक्षांसि सेधति। होता गृणीत उक्थ्यः।।

1.80 इत्था हीति षोळशर्चस्य सूक्तस्य, राहूगणो गोतम इन्द्रोऽन्त्याया दध्यङ्ङनुरथर्वा च पङ्क्तिः।।

❀01.05.29 ☞卐इत्था हि सोम इन्मदे- ब्रह्मा चकार वर्धनम्। शविष्ठ वज्रि.न्नोजसा- पृथिव्या^ निश्शशा^ अहि-मर्च.न्ननु स्वराज्यम्।।

卐 स त्वाऽमद.द्वृषा मद- स्सोम श्श्येनाऽऽभृत स्सुतः। येना वृत्र.न्निरद्भ्यो- जघन्थ वज्रि.न्नोज-सार्च.न्ननु स्वराज्यम्।।

卐 प्रेह्य.भीहि धृष्णुहि- न ते वज्रो नि यंसते। इन्द्र नृम्णं हि ते शवो- हनो वृत्रञ्जया^ अपो-ऽर्च.न्ननु स्वराज्यम्।।

卐 निरिन्द्र भूम्या^ अधि- वृत्र.ञ्जघन्थ नि र्दिवः। सृजा मरुत्वती रव- जीवधन्या^ इमा^ अपो-ऽर्च.न्ननु स्वराज्यम्।।

卐 इन्द्रो वृत्रस्य दोधत-स्सानुँ वज्रेण हीळितः। अभिक्र.म्याव जिघ्नते-ऽप.स्समाय चोदय-न्नर्च.न्ननु स्वराज्यम्।।

❀01.05.30 卐अधि सानौ नि जिघ्नते- वज्रेण शतपर्वणा। मन्दान^ इन्द्रो अन्धस-स्सखिभ्यो गातु.मिच्छ-त्यर्च.न्ननु स्वराज्यम्।।

卐 इन्द्र तुभ्य.मिदद्रिवो-ऽनुत्तँ वज्रि.न्वीर्यम्। यद्ध त्यं मायिनं मृग-न्तमु त्वं मायया वधी-रर्च.न्ननु स्वराज्यम्।।

卐 वि ते वज्रासो अस्थिर-न्नवति.न्नाव्या3(आ) अनु। महत्त इन्द्र वीर्यं- बाह्वो स्ते बलं हित-मर्च.न्ननु स्वराज्यम्।।

卐 सहस्रं साक.मर्चत- परि ष्टोभत विंशतिः। शतैन.मन्वनोनवु- रिन्द्राय ब्रह्मोद्यत-मर्च.न्ननु स्वराज्यम्।।

卐 इन्द्रो वृत्रस्य तविषी-न्नि रह.न्त्सहसा सहः। मह.त्तदस्य पौस्यँ- वृत्र.ञ्जघन्वा॰ असृज-दर्च.न्ननु स्वराज्यम्।।

❀01.05.31 卐इमे चित्तव मन्यवे- वेपेते~ भियसा मही। यदिन्द्र वज्रि.न्नोजसा- वृत्रं मरुत्वा॰ अवधी-रर्च.न्ननु स्वराज्यम्।।

卐 न वेपसा न तन्यते-न्द्रँ वृत्रो वि बीभयत्। अभ्येनँ वज्र^ आयस- स्सहस्रभृष्टि राय-तार्च.न्ननु स्वराज्यम्।।

卐 यद्वृत्र.न्तव चाशनिँ- वज्रेण समयोधयः। अहि.मिन्द्र जिघांसतो- दिवि ते बद्बधे शवो-ऽर्च.न्ननु स्वराज्यम्।।

卐 अभिष्टने ते अद्रिवो- यत्स्था जगच्च रेजते। त्वष्टा चित्तव मन्यव- इन्द्र वेविज्यते भिया-ऽर्चन्ननु स्वराज्यम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 नहि नु यादधीम-सीन्द्र.ङ्को वीर्या परः। तस्मि.न्नृम्ण.मुत क्रतु-न्देवा^ ओजांसि सन्दधु-रर्च.न्ननु स्वराज्यम्।।

卐 यामथर्वा मनुष्पिता- दध्य.ङ्िय.मत्नत। तस्मि.न्ब्रह्मा.णि पूर्व-थेन्द्र उक्था समग्म-तार्च.न्ननु स्वराज्यम्।।

**इति पञ्चमाध्याय स्समाप्तः।।**

**प्रथमाष्टके षष्ठाध्यायः। वर्गाः(1-32)**

1.81 इन्द्रो मदायेति नवर्चस्य सूक्तस्य, राहूगणो गोतम- इन्द्रः- पङ्क्तिः।।

❀01.06.01 卐इन्द्रो मदाय वावृधे- शवसे वृत्रहा नृभिः। तमि.न्मह.त्स्वाजि-षूते.मर्भे हवामहे- स वाजेषु प्र नोऽविषत्।।

卐 असि हि वीर सेन्यो-ऽसि भूरि परादृदिः। असि दभ्रस्य चिद्वृधो- यजमानाय शिक्षसि- सुन्वते भूरि ते वसु।।

卐 यदुदीरत आजयो- धृष्णवे धीयते धना। युक्ष्वा मदच्युता हरी~- कं हनः कँ वसौ द-धोऽस्मा इन्द्र वसौ दधः।।

卐 क्रत्वा महा अनुष्वधं- भीम^ आ वावृधे शवः। श्रिय ऋष्व^ उपाकयो- र्नि शिप्री हरिवा.न्दधे- हस्तयो वज्र.मायसम्।।

卐 आ पप्रौ पार्थिवं रजो- बद्बधे रोचना दिवि। न त्वावा इन्द्र कश्चन- न जातो न जनिष्यते-ऽति विश्वँ ववक्षिथ।।

❀01.06.02 卐यो अर्यो मर्तभोजनं- परादृदाति दाशुषे। इन्द्रो अस्मभ्यं शिक्षतु- वि भजा भूरि ते वसु- भक्षीय तव राधसः।।

卐 मदेमदे हि नो ददि- र्यूथा गवा.मृजुक्रतुः। सङ्गृभाय पुरू श-तोभयाहस्त्या वसु- शिशीहि राय^ आ भर।।

卐 मादयस्व सुते सचा- शवसे शूर राधसे। विद्मा हि त्वा पुरूवसु-.मुप कामा.न्त्ससृज्महे-ऽथा नोऽविता भव।।

卐 एते त इन्द्र जन्तवो- विश्वं पुष्यन्ति वार्यम्। अन्त र्हि ख्यो जनाना-मर्यो वेदो अदाशुषा-न्तेषा.न्नो वेद^ आ भर।।

1.82 उपो ष्विति षळर्चस्य सूक्तस्य, राहूगणो गोतम- इन्द्रः- पङ्क्तिरन्त्या जगती।।

❀01.06.03 卐उपो~ षु शृणुही गिरो- मघव.न्माऽतथाइव। यदा न स्सूनृतावत४- कर^ आदर्थयास इ-द्योजा न्विन्द्र ते हरी~।।

卐 अक्ष.न्नमी मदन्त-ह्यव प्रिया^ अधूषत। अस्तोषत स्वभानवो- विप्रा^ नविष्ठया मती- योजा न्विन्द्र ते हरी~।।

卐 सुसन्दृश.न्त्वा वयं- मघव.न्वन्दिषीमहि। प्र नूनं पूर्णवन्धुर- स्स्तुतो याहि वशा८ अनु- योजा न्विन्द्र ते हरी~।।

卐 स घा तँ वृषणं रथ-मधि तिष्ठाति गोविदम्। य४ पात्रं हारियोजनं- पूर्ण.मिन्द्र चिकेतति- योजा न्विन्द्र ते हरी~।।

卐 युक्तस्ते अस्तु दक्षिण^- उत सव्य श्शतक्रतो। तेन जाया.मुप प्रियां- मन्दानो याह्यन्धसो- योजा न्विन्द्र ते हरी~।।

卐 युनज्मि ते ब्रह्मणा केशिना हरी~- उप प्र याहि दधिषे गभस्त्योः। उत्त्वा सुतासो रभसा^ अमन्दिषु४- पूषण्वा.न्वज्रि.न्त्समु पत्न्याऽमदः।।

1.83 अश्वावतीति षळृचस्य सूक्तस्य, राहूगणो गोतम- इन्द्रो- जगती।।

❀01.06.04 卐अश्वावति प्रथमो गोषु गच्छति- सुप्रावी रिन्द्र मर्त्य स्तवोतिभिः। तमि.त्पृणक्षि वसुना भवीयसा- सिन्धु.मापो यथाऽभितो विचेतसः।।

卐 आपो न देवी रुप यन्ति होत्रिय-मव४ पश्यन्ति विततँ यथा रजः। प्राचै र्देवास४ प्र णयन्ति देवयुं- ब्रह्मप्रिय.ञ्जोषयन्ते वराइव।।

卐 अधि द्वयो रदधा^ उक्थ्य1(अँ) वचो- यतस्रुचा मिथुना या सपर्यतः। असँयत्तो व्रते ते क्षेति पुष्यति-भद्रा शक्ति र्यजमानाय सुन्वते।।

卐 आदङ्गिराः प्रथम.न्दधिरे वय^- इद्धाग्नय श्शम्या ये सुकृत्यया। सर्वं पणे स्समविन्दन्त भोजन-मश्वावन्त.ङ्गोमन्त.मा पशु.न्नरः।।

卐 यज्ञै रथर्वा प्रथमः पथ स्तते- तत स्सूर्यो व्रतपा^ वेन^ आऽजनि। आ गा^ आज.दुशना काव्य स्सचा- यमस्य जात.ममृतँ यजामहे।।

卐 बर्हिर्वा यत्स्वपत्याय वृज्यते-ऽर्को वा श्लोक.माघोषते दिवि। ग्रावा यत्र वदति कारु रुक्थ्य1-(अ) स्तस्ये.दिन्द्रो अभिपित्वेषु रण्यति।।

1.84 असावीति विंशत्यृचस्य सूक्तस्य, राहूगणो गोतम- इन्द्र-आद्याः ष्षळनुष्टुभः-सप्तम्याद्यास्तिस्र उष्णिहः- दशम्याद्यास्तिस्रः पङ्क्तयः-त्रयोदशाद्यास्तिस्रो गायत्र्यः-षोळश्याद्यास्तिस्रस्त्रिष्टुभः-अन्त्ये द्वे बृहती सतोबृहत्यौ।।

❀01.06.05 卐असावि सोम^ इन्द्र ते- शविष्ठ धृष्ण~वा गहि। आ त्वा पृण.क्त्विन्द्रियं- रज स्सूर्यो न रश्मिभिः।।

卐 इन्द्र.मिद्धरी~ वहतो-ऽप्रतिधृष्टशवसम्। ऋषीणा ञ्च स्तुती रुप- यज्ञ.ञ्च मानुषाणाम्।।

卐 आ तिष्ठ वृत्रह.न्रथँ- युक्ता ते ब्रह्मणा हरी~। अर्वाचीनं सु ते मनो- ग्रावा कृणोतु वग्नुना।।

卐 इम.मिन्द्र सुतं पिब- ज्येष्ठ.ममर्त्यं मदम्। शुक्रस्य त्वाऽभ्यक्षर-न्धारा^ ऋतस्य सादने।।

卐 इन्द्राय नून.मर्चतो-क्थानि च ब्रवीतन। सुता^ अमत्सु रिन्दवो- ज्येष्ठ.न्नमस्यता सहः।।

❀01.06.06 नकि.ष्ट्वद्रथीतरो- हरी~ यदिन्द्र यच्छसे। नकि.ष्ट्वाऽनु मज्मना- नकि स्स्वश्व^ आनशे।।

卐 य^ एक^ इद्विदयते- वसु मर्ताय दाशुषे। ईशानो अप्रतिष्कुत- इन्द्रो अङ्ग।।

卐 कदा मर्त.मराधसं- पदा क्षुम्प.मिव स्फुरत्। कदा न श्शुश्रव.द्गिर^- इन्द्रो अङ्ग।।

卐 यश्चिद्धि त्वा बहुभ्य^ आ- सुतावाँ आविवासति। उग्र.न्तत्पत्यते शव^- इन्द्रो अङ्ग।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स्वादो रित्था विषूवतो- मध्व॰ पिबन्ति गौर्यः। या^ इन्द्रेण सयावरी- र्वृष्णा मदन्ति शोभसे- वस्वी रनु स्वराज्यम्।।

❀01.06.07 卐ता अस्य पृशनायुव- स्सोमं श्रीणन्ति पृश्नयः। प्रिया^ इन्द्रस्य धेनवो- वज्रं हिन्वन्ति सायकँ- वस्वी रनु स्वराज्यम्।।

卐 ता^ अस्य नमसा सह- स्सपर्यन्ति प्रचेतसः। व्रता.न्यस्य सश्चिरे- पुरूणि पूर्वचित्तये- वस्वी रनु स्वराज्यम्।।

卐 इन्द्रो दधीचो अस्थभि- र्वृत्रा.ण्यप्रति॰ष्कुतः। जघान नवती र्नव।।

卐 इच्छ.न्नश्वस्य यच्छिर॰- पर्वते.ष्वपश्रितम्। तद्विद.च्छर्यणावति।।

卐 अत्राह गो रमन्वत- नाम त्वष्टु रपीच्यम्। इत्था चन्द्रमसो गृहे।।

❀01.06.08 卐को अद्य युङ्क्ते धुरि गा^ ऋतस्य- शिमीवतो भामिनो दु^र्हृणायून्। आसन्निषू.न्हृत्स्वसो मयोभू-न्य^ एषां भृत्या.मृणधत्स^ जीवात्।।

卐 क^ ईषते तुज्यते को बिभाय- को मंसते सन्त.मिन्द्रङ्को अन्ति। क स्तोकाय क^ इभा.योत राये-ऽधि ब्रव.त्तन्वे3(ए)को जनाय।।

卐 को अग्नि.मीट्टे हविषा घृतेन- स्रुचा यजाता ऋतुभि र्ध्रुवेभिः। कस्मै देवा^ आ वहा.नाशु.होम- को मंसते वीतिहोत्र स्सुदेवः।।

卐 त्वमङ्ग प्र शंसिषो- देव श्शविष्ठ मर्त्यम्। न त्वदन्यो मघव.न्नस्ति मर्डि-तेन्द्र ब्रवीमि ते वचः।।

卐 मा ते राधांसि मा त ऊतयो वसो~-ऽस्मा.न्कदा चना दभन्न्। विश्वा च न^ उपमिमीहि मानुष- वसूनि चर्षणिभ्य^ आ।।

1.85 प्र ये शुम्भन्त इति द्वादशर्चस्य सूक्तस्य, राहूगणो गोतमो-मरुतो- जगती- पञ्चम्यन्त्ये त्रिष्टुभौ।।

❀01.06.09 卐प्र ये शुम्भन्ते जनयो न सप्तयो- याम.न्रुद्रस्य सूनव स्सुदंससः। रोदसी हि मरुत श्चक्रिरे वृधे- मदन्ति वीरा^ विदथेषु घृष्वयः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 त उक्षितासो महिमान.माशत- दिवि रुद्रासो अधि चक्रिरे सदः। अर्चन्तो अर्क.ञ्जनयन्त इन्द्रिय-
मधि श्रियो दधिरे पृश्निमातरः।।
卐 गोमातरो यच्छुभयन्ते अञ्जिभि- स्तनूषु शुभ्रा दधिरे विरुक्मतः। बाधन्ते विश्व.मभिमातिन.मप-
वर्त्मा.न्येषा.मनु रीयते घृतम्।।
卐 वि ये भ्राजन्ते सुमखास ऋष्टिभिः- प्रच्यावयन्तो अच्युता चिदोजसा। मनोजुवो यन्मरुतो रथे.ष्वा-
वृषव्रातासः पृषती रयुग्ध्वम्।।
卐 प्र यद्रथेषु पृषती रयुग्ध्वँ- वाजे अद्रिं मरुतो रंहयन्तः। उतारुषस्य वि ष्यन्ति धारा- श्चर्मे.वोदभि
र्व्युन्दन्ति भूम।।
卐 आ वो वहन्तु सप्तयो रघुष्यदो- रघुपत्वानः प्र जिगात बाहुभिः। सीदताऽबर्हि रुरु व स्सद स्कृतं-
मादयध्वं मरुतो मध्वो अन्धसः।।
❀01.06.10 卐तेऽवर्धन्त स्वतवसो महित्वना- नाक.न्तस्थु रुरु चक्रिरे सदः। विष्णु र्यद्धाऽव.द्वृषणं
मदच्युतँ- वयो न सीद.न्नधि बर्हिषि प्रिये।।
卐 शूराइवे.द्युयुधयो न जग्मय- श्श्रवस्यवो न पृतनासु येतिरे। भयन्ते विश्वा भुवना मरुद्भ्यो- राजान.इव
त्वेषसन्दृशो नरः।।
卐 त्वष्टा यद्वज्रं सुकृतं हिरण्ययं- सहस्रभृष्टिं स्वपा अवर्तयत्। धत्त इन्द्रो नर्यपांसि कर्तवे-ऽह.न्वृत्र.न्नि
.रपा.मौब्ज.दर्णवम्।।
卐 ऊर्ध्व.न्नुनुद्रेऽवत.न्त ओजसा- दादृहाण.ञ्चिद्बिभिदु र्वि पर्वतम्। धमन्तो वाणं मरुत स्सुदानवो- मदे
सोमस्य रण्यानि चक्रिरे।।
卐 जिह्म.न्नुनुद्रेऽवत.न्तया दि-शाऽसिञ्च.न्नुत्स.ङ्गोतमाय तृष्णजे। आ गच्छन्ती.मवसा चित्रभानवः-
कामँ विप्रस्य तर्पयन्त धामभिः।।
卐 या व श्शर्म शशमानाय सन्ति- त्रिधातूनि दाशुषे यच्छ.ताधि। अस्मभ्य.न्तानि मरुतो वि यन्त-
रयिन्नो धत्त वृषण स्सुवीरम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

☸ 1.86 मरुतो यस्येति दशर्चस्य सूक्तस्य, राहूगणो गोतमो- मरुतो- गायत्री।।

❀01.0611 卐 मरुतो यस्य हि क्षये- पाथा दिवो विमहसः। स सुगोपातमो जनः।।

卐 यज्ञैर्वा यज्ञवाहसो- विप्रस्य वा मतीनाम्। मरुत श्शृणुता हवम्।।

卐 उत वा यस्य वाजिनो-ऽनु विप्र.मतक्षत। स गन्ता गोमति व्रजे।।

卐 अस्य वीरस्य बर्हिषि- सुत स्सोमो दिविष्टिषु। उक्थं मदश्च शस्यते।।

卐 अस्य श्रोष.न्त्वा भुवो- विश्वा^ य श्चर्षणी रभि। सूर.ञ्चित्सस्रुषी रिषः।।

❀01.06.12 卐 पूर्वीभि र्हि ददाशिम- शरद्भि र्मरुतो वयम्। अवोभि श्चर्षणीनाम्।।

卐 सुभग स्स प्रयज्यवो- मरुतो अस्तु मर्त्यः। यस्य प्रयांसि पर्षथ।।

卐 शशमानस्य वा नर- स्स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः।।

卐 यूय.न्तत्सत्यशवस- आवि ष्कर्त महित्वना। विध्यता विद्युता रक्षः।।

卐 गूहता गुह्य.न्तमो- वि यात विश्व.मत्रिणम्। ज्योति ष्कर्ता यदुश्मसि।।

☸ 1.87 प्रत्वक्षस इति षळृचस्य सूक्तस्य, राहूगणो गोतमो- मरुतो- जगती।।

❀01.06.13 卐 प्रत्वक्षसः प्रतवसो विरप्शिनो-ऽनानता^ अविथुरा^ ऋजीषिणः। जुष्टतमासो नृतमासो अञ्जिभि^- र्व्यानज्रे के चिदुस्राइव स्तृभिः।।

卐 उपह्वरेषु यदचिध्वँ ययिँ- वय^इव मरुतः केन चित्पथा। श्चोतन्ति कोशा^ उप वो रथे.ष्वा- घृत.मुक्षता मधुवर्ण.मर्चते।।

卐 प्रैषा.मज्मेषु विथुरेव रेजते- भूमि र्यामेषु यद्ध युञ्जते शुभे। ते क्रीळयो धुनयो भ्राज.दृष्टय- स्स्वयं महित्वं पनयन्त धूतयः।।

卐 स हि स्वसृ.त्पृषदश्वो युवा गणो3-(ओ)ऽया ईशान स्तविषीभि रावृतः। असि सत्य^ ऋणयावाऽनेद्यो-ऽस्या^ धियः प्रावि.ताथा वृषा गणः।।

卐 पितुः प्रत्नस्य जन्मना वदामसि- सोमस्य जिह्वा प्र जिगाति चक्षसा। यदी.मिन्द्रं शम्यृक्वाण^ आश- ताऽदि.न्नामानि यज्ञियानि दधिरे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 श्रियसे कं भानुभि स्सं मिमिक्षिरे- ते रश्मिभि स्त ऋक्वभि स्सुखादयः। ते वाशीमन्त इष्मिणो अभीरवो- विद्रे प्रियस्य मारुतस्य धाम्नः।।

1.88 आ विद्युन्मद्भिरिति षळृचस्य सूक्तस्य, राहूगणो गोतमो- मरुत-स्त्रिष्टुप्-आद्यान्त्ये प्रस्तारपङ्क्ती- पञ्चमी विराड्रूपा।।

❀01.06.14 卐आ विद्युन्मद्भि र्मरुत स्स्वर्कै- रथेभि र्यात ऋष्टिमद्भि रश्वपर्णैः। आ वर्षिष्ठया न इषा- वयो न पप्तता सुमायाः।।

卐 तेऽरुणेभि र्वरमा पिशङ्गै- श्शुभे कँ यान्ति रथतू.र्भि रश्वैः। रुक्मो न चित्र स्स्वधितीवा-न्पव्या रथस्य जङ्घनन्त भूम।।

卐 श्रिये कँ वो अधि तनूषु वाशी- र्मेधा वना न कृणवन्त ऊर्ध्वा। युष्मभ्य.ङ्कं मरुत स्सुजाता- स्तुविद्युम्नासो धनयन्ते अद्रिम्।।

卐 अहानि गृध्राः पर्या व आऽगु- रिमा.न्धियँ वार्कार्या.ञ्च देवीम्। ब्रह्म कृण्वन्तो गोतमासो अर्कै- रूर्ध्व.न्नुनुद्र उत्सधिं पिबध्यै।।

卐 एत.त्त्यन्न योजन.मचेति- सस्व र्ह यन्मरुतो गोतमो वः। पश्य.न्हिरण्यचक्रा.नयोदंष्ट्रा-न्विधावतो वराहून्।।

卐 एषा स्या वो मरुतोऽनुभर्त्री- प्रतिष्टोभति वाघतो न वाणी। अस्तोभय.द्वृथाऽसा- मनु स्वधा.ङ्गभस्त्योः।।

1.89 आ नो भद्रा इति दशर्चस्य सूक्तस्य, राहूगणो गोतमो- विश्वे देवा-स्त्रिष्टुप्- आद्याः पञ्च सप्तमी च जगत्य - ष्षष्ठी विराड्स्थाना- (सूक्तभेदप्रयोगपक्षे तु आद्याना ञ्चतसृणां विश्वे देवाः-तत एकस्या इन्द्रापूषणौ तत श्चतसृणां विश्वे देवा - स्तत एकस्या अदितिः- एवं दश)

❀01.06.15 卐आ नो भद्राः क्रतवो यन्तु विश्वतो-ऽदब्धासो अपरीतास उद्भिदः। देवा नो यथा सदमि.द्वृधे अस-न्नप्राऽयुवो रक्षितारो दिवेदिवे।।

卐 देवानां भद्रा सुमतिर् ऋजूयता-न्देवानां राति रभि नो नि वर्तताम्। देवानां सख्य.मुप सेदिमा वय-न्देवा^ न^ आयुः प्र तिरन्तु जीवसे।।

卐 तान्पूर्वया निविदा हूमहे वयं- भगं मित्र.मदितिन्दक्ष.मस्त्रिधम्। अर्यमणँ वरुणं सोम.मश्विना-सरस्वती न.स्सुभगा मयस्करत्।।

卐 तन्नो वातो मयोभु वातु भेषज-न्तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाण स्सोमसुतो मयोभुव-स्तदश्विना शृणुत.न्धिष्ण्या युवम्।।

卐 तमीशान.ञ्जगत.स्तस्थुष.स्पति-न्धियञ्जिन्व.मवसे हूमहे वयम्। पूषा नो यथा वेदसा.मस.द्वृधे-रक्षिता पायु रदब्ध.स्स्वस्तये।।

❀01.06.16 卐स्वस्ति न^ इन्द्रो वृद्धश्रवा-स्स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति न स्तार्क्ष्यो अरिष्टनेमि- स्स्वस्ति नो बृहस्पति र्दधातु।।

卐 पृषदश्वा^ मरुतः पृश्निमातर-श्शुभँयावानो विदथेषु जग्मयः। अग्निजिह्वा^ मनव स्सूरचक्षसो- विश्वे नो देवा^ अवसाऽगम.न्निह।।

卐 भद्र.ङ्कर्णेभि श्शृणुयाम देवा^- भद्रं पश्ये.माक्षभि र्यजत्राः। स्थिरै.रङ्गै॰स्तुष्टुवांस स्तनूभि- व्यशेम देवहितँ यदायुः।।

卐 शत.मिन्नु शरदो अन्ति देवा^- यत्रा न श्चक्रा जरस.न्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति- मा नो मध्या रीरिषताऽयु र्गन्तोः।।

卐 अदिति र्द्यौ रदिति रन्तरिक्ष-मदिति र्माता स पिता स पुत्रः। विश्वे देवा^ अदितिः पञ्च जना^- अदिति र्जात.मदिति र्जनित्वम्।।

1.90 ऋजुनीती न इति नवर्चस्य सूक्तस्य, राहूगणो गोतमो- विश्वेदेवा- गायत्री- अन्त्याऽनुष्टुप्-(वैश्वदेव सूक्तेऽप्यस्मिन्न् भेदप्रयोगकरणा शक्यत्वा न्नवानामपि विश्वेदेवा एव)।।

❀01.06.17 卐ऋजुनीती नो वरुणो- मित्रो नयतु विद्वान्। अर्यमा देवै. स्सजोषाः।।

卐 ते हि वस्वो वसवाना-स्ते अप्रमूरा^ महोभिः। व्रता रक्षन्ते विश्वाहा।।

卐 ते अस्मभ्यं शर्म यंस-न्नमृता^ मर्त्येभ्यः। बाधमाना^ अप द्विषः।।

卐 वि नः पथ स्सुवितार्य- चिय.न्त्विन्द्रो मरुतः। पूषा भगो वन्द्यासः।।

卐 उत नो धियो गोअग्राः- पूष.न्विष्ण~वेवयावः। कर्ता न.स्स्वस्तिमतः।।

❀01.06.18 卐मधु वाता^ ऋतायते- मधु क्षरन्ति सिन्धवः। माध्वी र्न.स्स.न्त्वोषधीः।।

卐 मधु नक्त.मुतोषसो- मधुम.त्पार्थिवं रजः। मधु द्यौ रस्तु नः पिता।।

卐 मधुमा.न्नो वनस्पति- र्मधुमाँ अस्तु सूर्यः। माध्वी र्गावो भवन्तु नः।।

卐 श.न्नो मित्र.श्शँ वरुण-श्श.न्नो भव.त्वर्यमा। श.न्न^ इन्द्रो बृहस्पति-श्श.न्नो विष्णु रुरुक्रमः।।

1.91 त्वं सोमेति त्रयोविंशत्यृचस्य सूक्तस्य, राहूगणो गोतम- स्सोम-स्त्रिष्टुप्-पञ्चम्यादि द्वादश गायत्र्य- स्सप्तदश्युष्णिक्।।

❀01.06.19 त्वं सोम प्र चिकितो मनीषा- त्वं रजिष्ठ.मनु नेषि पन्थाम्। तव प्रणीती पितरो न^ इन्दो~- देवेषु रत्न.मभजन्त धीराः।।

卐 त्वं सोम क्रतुभि स्सुक्रतु र्भू-स्त्व.न्दक्षै स्सुदक्षो विश्ववेदाः। त्वँ वृषा वृषत्वेभि र्महित्वा- द्युम्नेभि र्द्युम्न्यभवो नृचक्षाः।।

卐 राज्ञो नु ते वरुणस्य व्रतानि- बृह.द्गभीर.न्तव सोम धाम। शुचि.ष्ट्व.मसि प्रियो न मित्रो- दक्षाय्यो अर्यमे.वासि सोम।।

卐 या ते धामानि दिवि या पृथिव्याँ- या पर्वते.ष्वोषधी.ष्वप्सु। तेभि र्नो विश्वै स्सुमना^ अहेळ-न्राज.न्त्सोम प्रति हव्या गृभाय।।

卐 त्वं सोमासि सत्पति-स्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः।।

❀01.06.20 卐त्व.ञ्च सोम नो वशो- जीवातु.न्न मरामहे। प्रियस्तोत्रो वनस्पतिः।।

卐 त्वं सोम महे भग-न्त्वँ यून ऋतायते। दक्ष.न्दधासि जीवसे।।

卐 त्वन्न.स्सोम विश्वतो- रक्षा राज.न्नघायतः। न रिष्ये.त्त्वावत.स्सखा।।

卐 सोम या.स्ते मयोभुव^- ऊतय स्सन्ति दाशुषे। ताभिर्नोऽविता भव।।

卐 इमँ यज्ञ.मिदँ वचो- जुजुषाण^ उपाऽऽगहि। सोम त्वन्नो वृधे भव।।

❀01.06.21 卐सोम गीर्भि.ष्ट्वा वयँ- वर्धयामो वचोविदः। सुमृळीको न^ आ विश।।

卐 गयस्फानो अमीवहा- वसुवि.त्पुष्टिवर्धनः। सुमित्र.स्सोम नो भव।।

卐 सोम रारन्धि नो हृदि- गावो न यवसे.ष्वा। मर्य इव स्व ओक्ये।।

卐 य.स्सोम सख्ये तव- रारण.द्देव मर्त्यः। तन्दक्ष.स्सचते कविः।।

卐 उरुष्याणो अभिशस्ते- स्सोम नि पाह्यंहसः। सखा सुशेव^ एधि नः।।

❀01.06.22 卐आ प्यायस्व समेतु ते- विश्वत सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे।।

卐 आ प्यायस्व मदिन्तम- सोम विश्वेभि रंशुभिः। भवा न स्सुश्रवस्तम.स्सखा वृधे।।

卐 सन्ते पयांसि समु यन्तु वाजा-स्सँवृष्ण्या.न्यभिमातिषाहः। आप्यायमानो अमृताय सोम- दिवि श्रवां.स्युत्तमानि धिष्व।।

卐 या ते धामानि हविषा यजन्ति- ता ते विश्वा परिभू रस्तु यज्ञम्। गयस्फानः प्रतरण.स्सुवीरो-ऽवीरहा प्र चरा सोम दुर्यान्।।

卐 सोमो धेनुं सोमो अर्वन्त.माशुं- सोमो वीर.ङ्कर्मण्य.न्ददाति। सादन्यँ विदथ्यं सभेयं- पितृश्रवणँ यो ददाश.दस्मै।।

❀01.06.23 卐अषाळ्हँ युत्सु पृतनासु पप्रिं- स्वर्षा.मप्साँ वृजनस्य गोपाम्। भरेषुजां सुक्षितिं सुश्रवस-ञ्जयन्त.न्त्वा.मनु मदेम सोम।।

卐 त्वमिमा^ ओषधी.स्सोम विश्वा-स्त्वमपो अजनय.स्त्व.ङ्गाः। त्वमा तत.न्थोर्व1 (अ)न्तरिक्ष-न्त्व. ञ्ज्योतिषा वि तमो ववर्थ।।

卐 देवेन नो मनसा देव सोम- रायो भागं सहसाव.न्नभि युध्य। मा त्वाऽऽतन.दीशिषे वीर्यस्यो-भयेभ्यः प्र चिकित्सा गविष्टौ।।

1.92 एता उ त्या इत्यष्टादशर्चस्य सूक्तस्य, राहूगणो गोतम- उषाः-अन्त्यानां तिसृणामश्विनौ- आद्याश्चतस्रो जगत्यः- ततोऽष्टौत्रिष्टुभः-अन्त्या ष्षळुष्णिहः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀01.06.24 卐एता^ उ त्या^ उषसः॒ केतु.मक्रत- पूर्वे अर्धे रजसो भानु.मञ्जते। निष्कृण्वाना^ आयुधानीव धृष्णवः॒- प्रति गावोऽरुषी र्यन्ति मातरः।।

卐 उदपप्त.न्नरुणा भानवो वृथा- स्वायुजो अरुषी र्गा^ अयुक्षत। अक्र.न्नुषासो वयुनानि पूर्वथा- रुशन्तं भानु.मरुषी रशिश्रयुः।।

卐 अर्चन्ति नारी रपसो न विष्टिभि-स्समानेन योजनेनाऽऽपरावतः। इषँ वहन्ती.स्सुकृते सुदानवे- विश्वेदह यजमानाय सुन्वते।।

卐 अधि पेशांसि वपते नृतूरि-वापोर्णुते वक्ष^ उस्रेव बर्जहम्। ज्योति र्विश्वस्मै भुवनाय कृण्वती- गावो न व्रजँ व्यु1(उ)षा^ आव~र्तमः।।

卐 प्रत्यर्ची रुश.दस्या^ अदर्शि- वि तिष्ठते बाधते कृष्ण.मभ्वम्। स्वरु.न्न पेशो विदथे.ष्वञ्ज-श्चित्र.न्दिवो दुहिता भानु.मश्रेत्।।

❀01.06.25 卐अतारिष्म तमस.स्पार.म-स्योषा^ उच्छन्ती वयुना कृणोति। श्रिये छन्दो न स्मयते विभाती- सुप्रतीका सौमनसा.याजीगः~।।

卐 भास्वती नेत्री सूनृताना-न्दिवस्स्तवे दुहिता गोतमेभिः। प्रजावतो नृवतो अश्वबुध्या-नुषो गोअग्रा॒ उप मासि वाजान्।।

卐 उष.स्त.मश्याँ यशसं सुवीर-न्दासप्रवर्गं रयि.मश्वबुध्यम्। सुदंससा श्रवसा या विभासि- वाजप्रसूता सुभगे बृहन्तम्।।

卐 विश्वानि देवी भुवनाऽभिचक्ष्या- प्रतीची चक्षु रुर्विया वि भाति। विश्व.ञ्जीव.ञ्चरसे बोधयन्ती- विश्वस्य वाच.मविद.न्मनायोः।।

卐 पुनः॒पुन र्जायमाना पुराणी- समानँ वर्ण.मभि शुम्भमाना। श्वघ्नीव कृत्नु र्विज^आमिनाना- मर्तस्य देवी जरय.न्त्यायुः।।

❀01.06.26 卐व्यूर्णवती दिवो अन्ता॒ अबो-ध्यप स्वसारं सनुत र्युयोति। प्रमिनती मनुष्या युगानि- योषा जारस्य चक्षसा वि भाति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 पशू.न्न चित्रा सुभगा प्रथाना- सिन्धु र्न क्षोर्द^ उर्विया व्यश्वैत्। अमिनती दैव्यानि व्रतानि- सूर्यस्य चेति रश्मिभि र्दृशाना।।

卐 उष. स्तच्चित्र.मा भरा-स्मभ्यँ वाजिनीवति। येन तोक.ञ्च तनय.ञ्च धामहे।।

卐 उषो अद्येह गोम-त्यश्वावति विभावरि। रेव.दस्मे व्युच्छ सूनृतावति।।

卐 युक्ष्वा हि वाजिनीव-त्यश्वा॰ अद्यारुणा॰ उषः। अथा नो विश्वा सौभगा.न्या वह।।

❀01.06.27 卐अश्विना वर्ति रस्मदा- गोम.द्दस्रा हिरण्यवत्। अर्वा.ग्रथं समनसा नि यच्छतम्।।

卐 यावित्था श्लोकमा दिवो- ज्योति र्जनाय चक्रथुः। आ न^ ऊर्जँ वहत.मश्विना युवम्।।

卐 एह देवा मयोभुवा- दस्रा हिरण्यवर्तनी~। उषर्बुधो वहन्तु सोमपीतये।।

☗ 1.93 अग्नीषोमाविति द्वादशर्चस्य सूक्तस्य, राहूगणो गोतमोऽग्नीषोमौ- त्रिष्टुप्-आद्यास्तिस्रोऽनुष्टुभो (अष्टमी जगती वा) नवम्यादितिस्रो गायत्र्यः।।

❀01.06.28☞卐अग्नीषोमा विमं सु मे- शृणुतँ वृषणा हवम्। प्रति सूक्तानि हर्यतं- भवत.न्दाशुषे मयः।।

卐 अग्नीषोमा यो अद्य वा-मिदँ वच स्सपर्यति। तस्मै धत्तं सुवीर्य-ङ्गवां पोषं स्वश्व्यम्।।

卐 अग्नीषोमा य^ आहुतिँ- यो वान्दाशा.द्धविष्कृतिम्। स प्रजया सुवीर्यँ- विश्व.मायु र्व्यश्नवत्।।

卐 अग्नीषोमा चेति तद्वीर्यँ वाँ- यदमुष्णीत.मवसं पणि.ङ्गाः। अवातिरतं बृसयस्य शेषो-ऽविन्दत.ञ्ज्योति रेकं बहुभ्यः।।

卐 युव.मेतानि दिवि रोचना-न्यग्नि.श्च सोम सक्रतू~ अधत्तम्। युवं सिन्धू॰ रभिशस्ते रवद्या-दग्नीषोमा वमुञ्चत.ङ्गृभीतान्।।

卐 आऽन्य.न्दिवो मातरिश्वा जभा-रामथ्ना.दन्यं परि श्येनो अद्रेः। अग्नीषोमा ब्रह्मणा वावृधा -नोरुँ यज्ञाय चक्रथुरु लोकम्।।

❀01.06.29 卐अग्नीषोमा हविषः प्रस्थितस्य- वीतं हर्यतँ वृषणा जुषेथाम्। सुशर्माणा स्ववसा हि भूत-मथा धत्तँ यजमानाय शँ योः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 यो अग्नीषोमा हविषा सपर्या-देवद्रीचा मनसा यो घृतेन। तस्य व्रतं रक्षतं पात.मंहसो- विशे जनाय महि शर्म यच्छतम्।।

卐 अग्नीषोमा सवेदसा- सहूती~ वनत.ङ्गिरः। सन्देवत्रा बभूवथुः।।

卐 अग्नीषोमा वनेन वाँ- यो वाङ्घृतेन दाशति। तस्मै दीदयतं बृहत्।।

卐 अग्नीषोमा विमानि नो- युवं हव्या जुजोषतम्। आ यात.मुप न स्सचा।।

卐 अग्नीषोमा पिपृत.मर्वतो न^-आ प्यायन्ता.मुस्त्रिया^ हव्यसूदः। अस्मे बलानि मघवत्सु धत्त-ङ्कृणुतन्नो अध्वरं श्रुष्टिमन्तम्।।

1.94 इमं स्तोममिति षोळशर्चस्यसूक्तस्य, कुत्सोऽग्निः- पूर्वो देवा इत्यस्या देवा अग्निश्च- तन्नो मित्र इत्यन्त्यार्धर्चस्य- मित्रवरुणाऽदिति सिन्धु पृथिवी द्यावो- जगती-अन्त्ये त्रिष्टुभौ- (यद्दैवत्यं वा-सूक्तमिति पक्षेऽग्निरेव देवता)

❀01.06.30☞卐इमं स्तोम.मर्हते जातवेदसे- रथ.मिव सं महेमा मनीषया। भद्रा हि नः प्रमति रस्य संस-द्यग्ने सख्ये मा रिषामा वय.न्तव।।

卐 यस्मै त्व.मायजसे स साध-त्यनर्वा क्षेति दधते सुवीर्यम्। स तूताव नैन.मश्नो.त्यंहति- रग्ने सख्ये मा रिषामा वय.न्तव।।

卐 शकेम त्वा समिधं साधया धिय-स्त्वे देवा^ हवि रद.न्त्याहुतम्। त्वमादित्याँ आ वह ता.न्ह्यु1(उ)श्म- स्यग्ने सख्ये मा रिषामा वय.न्तव।।

卐 भरा.मेध्म.ङ्कृणवामा हवींषि ते- चितयन्तः पर्वणापर्वणा वयम्। जीवातवे प्रतरं साधया धियो-ऽग्ने सख्ये मा रिषामा वय.न्तव।।

卐 विशा.ङ्गोपा^ अस्य चरन्ति जन्तवो- द्विप.च्च यदुत चतुष्प.दक्तुभिः। चित्रः प्रकेत^ उषसो महाँ अ-स्यग्ने सख्ये मा रिषामा वय.न्तव।।

❀01.06.31 卐त्वमध्वर्यु रुत होताऽसि पूर्व्यः- प्रशास्ता पोता जनुषा पुरोहितः। विश्वा विद्वाँ आर्त्विज्या धीर पुष्य- स्यग्ने सख्ये मा रिषामा वय.न्तव।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

卐 यो विश्वत स्सुप्रतीक.स्सदृ.ङ्ङसि- दूरे चित्स.न्तळिदि.वाति रोचसे। रात्र्या श्चिदन्धो अति देव पश्य-स्यग्ने सख्ये मा रिषामा वय.न्तव।।

卐 पूर्वो देवा भवतु सुन्वतो रथो-ऽस्माकं शंसो अभ्यस्तु दूढ्यः। तदा जानी.तोत पुष्यता वचो-ऽग्ने सख्ये मा रिषामा वय.न्तव।।

卐 वधै दुश्शंसाँ अप दूढ्यो जहि- दूरे वा ये अन्ति वा के चिदत्रिणः। अथा यज्ञाय गृणते सुग.ङ्कृ-ध्यग्ने सख्ये मा रिषामा वय.न्तव।।

卐 यदयुक्था अरुषा रोहिता रथे- वातजूता वृषभस्येव ते रवः। आदिन्वसि वनिनो धूमकेतुना-ऽग्ने सख्ये मा रिषामा वय.न्तव।।

❀01.06.32 卐अध स्वना.दुत बिभ्युः पतत्रिणो- द्रप्सा यत्ते यवसादो व्यस्थिरन्न्। सुग.न्तत्ते तावकेभ्यो रथेभ्यो-ऽग्ने सख्ये मा रिषामा वय.न्तव।।

卐 अयं मित्रस्य वरुणस्य धायसे-ऽवयातां मरुतां हेळो अद्भुतः। मृळा सु नो भूत्वेषां मनः पुन- रग्ने सख्ये मा रिषामा वयन्तव।।

卐 देवो देवाना.मसि मित्रो अद्भुतो- वसु र्वसूना.मसि चारु रध्वरे। शर्म.न्त्स्याम तव सप्रथस्तमे-ऽग्ने सख्ये मा रिषामा वय.न्तव।।

卐 तत्ते भद्रँ यत्समिद्ध.स्स्वे दमे- सोमाऽऽहुतो जरसे मृळयत्तमः। दधासि रत्न.न्द्रविण.ञ्च दाशुषे-ऽग्ने सख्ये मा रिषामा वय.न्तव।।

卐 यस्मै त्वं सुद्रविणो ददाशो-ऽनागास्त्व.मदिते सर्वताता। यं भद्रेण शवसा चोदयासि- प्रजावता राधसा ते स्याम।।

卐 स त्वमग्ने सौभगत्वस्य विद्वा-नस्माक.मायुः प्र तिरेह देव। तन्नो मित्रो वरुणो मामहन्ता-मदिति. स्सिन्धुः पृथिवी उत द्यौः।।

**इति षष्ठाध्याय स्समाप्तः।।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

1.95 द्वे विरूपे इत्येकादशर्चस्य सूक्तस्य, कुत्स उषोऽग्नि-स्त्रिष्टुप्- (इत आरभ्य जातवेदस इत्यन्तं शुद्धोऽग्निर्वा) ।।

01.07.01 द्वे~ विरूपे~ चरत स्स्वर्थे~- अन्याऽन्या वत्स.मुप धापयेते~। हरि रन्यस्यां भवति स्वधावा-ञ्छुक्रो अन्यस्या.न्ददृशे सुवर्चाः।।

दशेम.न्त्वष्टु र्जनयन्त गर्भ-मतन्द्रासो युवतयो विभृत्रम्। तिग्मानीकं स्वयशस.ञ्जनेषु- विरोचमानं परि षी.न्नयन्ति।।

त्रीणि जाना परि भूष.न्त्यस्य- समुद्र एक.न्दिव्येक.मप्सु। पूर्वा.मनु प्र दिशं पार्थिवाना-मृतू.न्प्रशास .द्विदधा वनुष्टु।।

क इमँ वो निण्यमा चिकेत- वत्सो मातृ र्जनयत स्वधाभिः। बह्वीना.ङ्गर्भो अपसा.मुपस्था-न्महा.न्कवि र्निश्चरति स्वधावान्।।

आविष्ट्यो वर्धते चारु रासु- जिह्मानां.मूर्ध्व.स्स्वयशा उपस्थे। उभे~ त्वष्टु र्बिभ्यतु र्जायमाना-त्प्रतीची सिंहं प्रति जोषयेते~।।

01.07.02 उभे~ भद्रे~ जोषयेते~ न मेने~- गावो न वाश्रा उप तस्थु रेवैः। स दक्षाणा.न्दक्षपति र्बभूवा-ऽञ्जन्ति य.न्दक्षिणतो हविर्भिः।।

उद्यँयमीति सवितेव बाहू~- उभे~ सिचौ यतते भीम ऋञ्जन्। उच्छुक्र.मत्क.मजते सिमस्मा-न्नवा मातृभ्यो वसना जहाति।।

त्वेषं रूप.ङ्कृणुत उत्तरँ य-त्संपृञ्चान.स्सदने गोभि रद्भिः। कवि र्बुध्नं परि मर्मृज्यते धी-स्सा देवताता समिति र्बभूव।।

उरु ते ज्रयः पर्येति बुध्नँ- विरोचमानं महिषस्य धाम। विश्वेभि रग्ने स्वयशोभि रिद्धो-ऽदब्धेभिः पायुभिः पाह्यस्मान्।।

卐 धन्व.न्त्स्रोतः कृणुते गातु.मूर्मिं- शुक्रै रूर्मिभि रभि नक्षति क्षाम्। विश्वा सनानि जठरेषु धत्ते-ऽन्त र्नवासु चरति प्रसूषु।।

卐 एवा नो अग्ने समिधा वृधानो- रेव.त्पावक श्रवसे वि भाहि। तन्नो मित्रो वरुणो मामहन्ता-मदिति .स्सिन्धुः पृथिवी उत द्यौः।।

1.96 स प्रत्नथेति नवर्चस्य सूक्तस्य, कुत्सो द्रविणोदा- अग्नि-स्त्रिष्टुप्।।

01.07.03 卐स प्रत्नथा सहसा जायमान-स्सद्यः काव्यानि बळधत्त विश्वा। आपश्च मित्र.न्धिषणा च साध-न्देवा^ अग्नि.न्धारय.न्द्रविणोदाम्।।

卐 स पूर्वया निविदा कव्यताऽयो- रिमाः प्रजा^ अजनय.न्मनूनाम्। विवस्वता चक्षसा द्यामपश्च- देवा ^अग्नि.न्धारय.न्द्रविणोदाम्।।

卐 तमीळत प्रथमँ यज्ञसाधँ- विश^ आरी राहुत.मृञ्जसानम्। ऊर्जः पुत्रं भरतं सृप्रदानु-न्देवा^ अग्नि.न्धारय.न्द्रविणोदाम्।।

卐 स मातरिश्वा पुरुवारपुष्टि- र्विद.द्गातु.न्तनयाय स्वर्वित्। विशा.ङ्गोपा^ जनिता रोदस्यो- र्देवा^ अग्नि.न्धारय.न्द्रविणोदाम्।।

卐 नक्तोषासा वर्ण.मामेम्याने~- धापयेते~ शिशु.मेकं समीची~। द्यावाक्षामा रुक्मो अन्त र्वि भाति- देवा^ अग्नि.न्धारय.न्द्रविणोदाम्।।

01.07.04 卐रायो बुध्न.स्सङ्गमनो वसूनाँ- यज्ञस्य केतु र्मन्मसाधनो वेः~। अमृतत्वं रक्षमाणास एन-न्देवा^ अग्नि.न्धारय.न्द्रविणोदाम्।।

卐 नू च पुरा च सदनं रयीणा-ञ्जातस्य च जायमानस्य च क्षाम्। सतश्च गोपां भवतश्च भूरे- र्देवा^ अग्नि.न्धारय.न्द्रविणोदाम्।।

卐 द्रविणोदा^ द्रविणस.स्तुरस्य- द्रविणोदा.स्सनरस्य प्र यंसत्। द्रविणोदा^ वीरवती.मिषन्नो- द्रविणोदा रासते दीर्घ.मायुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 एवा नो अग्ने समिधा वृधानो- रेव.त्पावक श्रवसे वि भाहि। तन्नो मित्रो वरुणो मामहन्ता-मदितिः स्सिन्धुः पृथिवी उत द्यौः।।

☫ 1.97 अप न इत्यष्टर्चस्य सूक्तस्य, कुत्स श्शुचि-रग्नि-र्गायत्री।।

❀01.07.05☞卐अप नश्शोशुच.दघ-मग्ने शुशुग्ध्या रयिम्। अप न श्शोशुच.दघम्।।

卐 सुक्षेत्रिया सुगातुया- वसूया च यजामहे। अप न श्शोशुच.दघम्।।

卐 प्र यद्भन्दिष्ठ एषां- प्रास्माकासश्च सूरयः। अप न श्शोशुच.दघम्।।

卐 प्र यत्ते अग्ने सूरयो- जायेमहि प्र ते वयम्। अप न श्शोशुच.दघम्।।

卐 प्र यदग्ने स्सहस्वतो- विश्वतो यन्ति भानवः। अप न श्शोशुच.दघम्।।

卐 त्वं हि विश्वतोमुख- विश्वतः परिभूरसि। अप न श्शोशुच.दघम्।।

卐 द्विषो नो विश्वतोमु-खाति नावेव पारय। अप न श्शोशुच.दघम्।।

卐 स न.स्सिन्धुमिव नावया-ऽति पर्षा स्वस्तये। अप न श्शोशुच.दघम्।।

☫ 1.98 वैश्वानरस्येति तृचस्य सूक्तस्य, कुत्सो वैश्वानरोऽग्नि-स्त्रिष्टुप्।।

❀01.07.06 卐वैश्वानरस्य सुमतौ स्याम- राजा हि कं भुवनाना.मभिश्रीः। इतो जातो विश्व.मिदं वि चष्टे- वैश्वानरो यतते सूर्येण।।

卐 पृष्टो दिवि पृष्टो अग्निः पृथिव्यां- पृष्टो विश्वा ओषधी रा विवेश। वैश्वानर.स्सहसा पृष्टो अग्नि-स्स नो दिवा स रिषः पातु नक्तम्।।

卐 वैश्वानर तव तत्सत्य.मं-स्त्वस्मा.न्रायो मघवान.स्सचन्ताम्। तन्नो मित्रो वरुणो मामहन्ता-मदिति स्सिन्धुः पृथिवी उत द्यौः।।

☫ 1.99 जातवेदस इत्येकर्चस्य सूक्तस्य, मारीचः कश्यपो जातवेदा- अग्नि-स्त्रिष्टुप्।।

❀01.07.07 卐जातवेदसे सुनवाम सोम-मरातीयतो नि दहाति वेदः। स नः पर्ष.दति दुर्गाणि विश्वा-नावेव सिन्धु.न्दुरिताऽत्यग्निः।।

☬ 1.100 स यो वृषेत्येकोनविंशत्यृचस्य सूक्तस्य, वार्षगिरा ऋज्राश्वाम्बरीष सहदेव भयमान सुराधस-इन्द्र-स्त्रिष्टुप्- (इत आरभ्य मरुत्वानिन्द्र इति कश्चित्- तन्न- सर्वानुक्रमादिभि रनादृतत्वात्-)

❀01.07.08☞ 卐स यो वृषा वृष्ण्येभि.स्समोका^- महो दिवः पृथिव्याश्च सम्राट्। सतीनसत्वा हव्यो भरेषु- मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 यस्यानाप्त.स्सूर्य.स्येव यामो- भरेभरे वृत्रहा शुष्मो अस्ति। वृषन्तम.स्सखिभि स्स्वेभि रेवै-र्मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 दिवो न यस्य रेतसो दुघानाः- पन्थासो यन्ति शवसाऽपरीताः। तरद्द्वेषा.स्सासहिः पौंस्येभि-र्मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 सो अङ्गिरोभि रङ्गिरस्तमो भू-द्वृषा वृषभि स्सखिभि स्सखा सन्न्। ऋग्मिभिर् ऋग्मी गातुभि र्ज्येष्ठो-मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 स सूनुभि र्न रुद्रेभिर् ऋभ्वा- ¤नृषाह्ये सासह्वाँ॰ अमित्रान्। सनीळेभि श्श्रवस्यानि तूर्व-न्मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

❀01.07.09 卐स मन्युमी.स्समदनस्य कर्ता-ऽस्माकेभि र्नृभि स्सूर्यं सनत्। अस्मि.न्नह.न्त्सत्पतिः पुरुहूतो- मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 तमूतयो रणय.ञ्छूरसातौ- तङ्क्षेमस्य क्षितयः कृण्वत त्राम्। स विश्वस्य करुण.स्येश एको-मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 तम्प्सन्त शवस उत्सवेषु नरो नर.मवसे तन्धनाय। सो अन्धे चित्तमसि ज्योति.र्विद-न्मरुत्वा.न्नो भव.त्विन्द्र^ऊती।।

卐 स सव्येन यमति व्राधत श्चि-त्स दक्षिणे सङ्गृभीता कृतानि। स कीरिणा चित्सनिता धनानि-मरुत्वा.न्नो भवत्वि.न्द्र^ ऊती।।

卐 स ग्रामेभि.स्सनिता स रथेभि- र्विदे विश्वाभिः कृष्टिभि र्न्व1(अ)द्य। स पौंस्येभि रभिभू रशस्ती-र्मरुत्वा.न्नो भव.त्विन्द्र^ऊती।।

❀01.07.10 卐स जामिभि र्यत्समजाति मीळ्हे-ऽजामिभि र्वा पुरुहूत^ एवैः। अपा.न्तोकस्य तनयस्य जेषे- मरुत्वा.न्नो भव.त्विन्द्र^ऊती।।

卐 स वज्रभृ.द्दस्युहा भीम^ उग्र-स्सहस्रचेता.श्शतनीथ^ ऋभ्वा। चम्रीषो न शवसा पाञ्चजन्यो- मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 तस्य वज्रः क्रन्दति स्मत्स्वर्षा- दिवो न त्वेषो रवथ श्शिमीवान्। तं सचन्ते सनयस्त.न्धनानि- मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 यस्याजस्रं शवसा मान.मुक्थं- परिभुज.द्रोदसी विश्वत स्सीम्। स पारिष.त्क्रतुभि र्मन्दसानो- मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

卐 न यस्य देवा^ देवता न मर्ता^- आप.श्चन शवसो अन्त.मापुः। स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च- मरुत्वा.न्नो भव.त्विन्द्र^ ऊती।।

❀01.07.11 卐रोहि.च्छ्यावा सुमदंशु र्ललामी- र्द्युक्षा राय ऋज्राश्वस्य। वृषण्वन्तं बिभ्रती धूर्षु रथं- मन्द्रा चिकेत नाहुषीषु विक्षु।।

卐 एत.त्त्यत्त इन्द्र वृष्ण उक्थं- वार्षागिरा^ अभि गृणन्ति राधः। ऋज्राश्वः प्रष्टिभि रम्बरीष-स्सहदेवो भयमान.स्सुराधाः।।

卐 दस्यू.ञ्छिम्यूँ.श्च पुरुहूत^- एवै र्हत्वा पृथिव्यां शर्वा नि बर्हीत्। सन.त्क्षेत्रं सखिभि श्श्वित्न्येभि-स्सन.त्सूर्यं सन.दप.स्सुवज्रः।।

卐 विश्वा.हेन्द्रो अधिवक्ता नो अ-स्त्वपरिह्वृता.स्सनुयाम वाजम्। तन्नो मित्रो वरुणो मामहन्ता-मदिति स्सिन्धुः पृथिवी उत द्यौः।।

1.101 प्र मन्दिन इत्येकादशर्चस्य सूक्तस्य, कुत्स इन्द्रो- जगती-अन्त्याश्चतस्र स्त्रिष्टुभः- (आद्या गर्भस्राविणीति गुणः)

❀01.07.12☞ प्र मन्दिने पितुम.दर्चता वचो- यः कृष्णगर्भा^ निरह.न्नृजिश्वना। अवस्यवो वृषणं वज्रदक्षिणं- मरुत्वन्तं सख्याय हवामहे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यो व्यंस.ञ्जाहृषाणेन मन्युना- य.श्शम्बरँ यो अह.न्पिप्रु.मव्रतम्। इन्द्रो यश्शुष्ण.मशुष. न्न्यावृण-
ङ्मरुत्वन्तं सख्याय हवामहे।।

卐 यस्य द्यावापृथिवी~ पौंस्यं मह-द्यस्य व्रते वरुणो यस्य सूर्यः। यस्येन्द्रस्य सिन्धव.स्सश्चति व्रतं-
मरुत्वन्तं सख्याय हवामहे।।

卐 यो अश्वानाँ यो गवा.ङ्गोपति र्वशी- य^ आरित४ कर्मणिकर्मणि स्थिरः। वीळो श्चिदिन्द्रो यो
असुन्वतो वधो- मरुत्वन्तं सख्याय हवामहे।।

卐 यो विश्वस्य जगत४ प्राणत.स्पति- र्यो ब्रह्मणे प्रथमो गा^ अविन्दत्। इन्द्रो यो दस्यू९ रधरा९
अवातिर-न्मरुत्वन्तं सख्याय हवामहे।।

卐 य.श्शूरेभि र्हव्यो यश्च भीरुभि- र्यो धावद्भि र्हूयते यश्च जिग्युभिः। इन्द्रँ यँ विश्वा भुवनाऽभिसन्दधु-
र्मरुत्वन्तं सख्याय हवामहे।।

❀01.07.13 卐रुद्राणा.मेति प्रदिशा विचक्षणो- रुद्रेभि र्योषा तनुते पृथु ज्रयः। इन्द्रं मनीषा अभ्यर्चति
श्रुतं- मरुत्वन्तं सख्याय हवामहे।।

卐 यद्वा मरुत्व४ परमे सधस्थे- यद्वाऽवमे वृजने मादयासे। अत^ आ याह्यध्वर.न्नो अच्छा -त्वाया हवि
श्चकृमा सत्यराधः।।

卐 त्वायेन्द्र सोमं सुषुमा सुदक्ष- त्वाया हवि श्चकृमा ब्रह्मवाहः। अधा नियुत्व.स्सगणो मरुद्भि-
रस्मि.न्यज्ञे बर्हिषि मादयस्व।।

卐 मादयस्व हरिभि र्ये त इन्द्र- विष्यस्व शिप्रे~ वि सृजस्व धेने~। आ त्वा सुशिप्र हरयो वह-
न्तूशन्हव्यानि प्रति नो जुषस्व।।

卐 मरुत्स्तोत्रस्य वृजनस्य गोपा^- वय.मिन्द्रेण सनुयाम वाजम्। तन्नो मित्रो वरुणो मामहन्ता-मदिति
स्सिन्धु४ पृथिवी उत द्यौः।।

1.102 इमान्त इत्येकादशर्चस्य सूक्तस्य, कुत्स इन्द्रो- जगती- अन्त्या त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀01.07.14 卐इमा.न्ते धियं प्र भरे महो मही-मस्य स्तोत्रे धिषणा यत्त आनजे। तमुत्सवे च प्रसवे च सासहि-मिन्द्र.न्देवास.श्शवसाऽमद.न्ननु।।

卐 अस्य श्रवो नद्य.स्सप्त बिभ्रति- द्यावाक्षामा पृथिवी दर्शतँ वपुः। अस्मे सूर्याचन्द्रमसा ऽभिचक्षे- श्रद्धे कमिन्द्र चरतो वितर्तुरम्।।

卐 तं स्मा रथं मघव.न्प्राव सातये- जैत्रँ यन्ते अनुमदाम सङ्गमे। आजा न इन्द्र मनसा पुरुष्टुत- त्वायद्भ्यो मघव.ञ्छर्म यच्छ नः।।

卐 वय.ञ्जयेम त्वया युजा वृत-मस्माक.मंश.मुदवा भरेभरे। अस्मभ्य.मिन्द्र वरिव.स्सुग.ङ्कृधि- प्र शत्रूणां मघव.न्वृष्ण्या रुज।।

卐 नाना हि त्वा हवमाना जना इमे- धनाना.न्धर्त रवसा विपन्यवः। अस्माकं स्मा रथमा तिष्ठ सातये- जैत्रं हीन्द्र निभृतं मन स्तव।।

❀01.07.15 卐गोजिता बाहू अमितक्रतु स्सिमः- कर्मन्कर्म.ञ्छतमूतिः खजङ्करः। अकल्प इन्द्रः प्रतिमान.मोजसा-ऽथा जना विह्वयन्ते सिषासवः।।

卐 उत्ते शता.न्मघव.न्नुच्च भूयस- उत्सहस्रा.द्रिरिचे कृष्टिषु श्रवः। अमात्र.न्त्वा धिषणा तित्विषे म-ह्यधा वृत्राणि जिघ्नसे पुरन्दर।।

卐 त्रिविष्टिधातु प्रतिमान.मोजस-स्तिस्रो भूमी नृपते त्रीणि रोचना। अतीदँ विश्वं भुवनँ ववक्षि-थाशत्रु रिन्द्र जनुषा सना.दसि।।

卐 त्वान्देवेषु प्रथमं हवामहे- त्वं बभूथ पृतनासु सासहिः। सेमन्नः कारु.मुपमन्यु.मुद्भिद-मिन्द्रः कृणोतु प्रसवे रथं पुरः।।

卐 त्वञ्जिगेथ न धना रुरोधि-थार्भे.ष्वाजा मघव.न्महत्सु च। त्वामुग्र.मवसे सं शिशीम-स्यथा न इन्द्र हवनेषु चोदय।।

卐 विश्वाहेन्द्रो अधिवक्ता नो अ-स्त्वपरिह्वृता.स्सनुयाम वाजम्। तन्नो मित्रो वरुणो मामहन्ता-मदिति स्सिन्धुः पृथिवी उत द्यौः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

1.103 तत्त इत्यष्टर्चस्य सूक्तस्य, कुत्स इन्द्र-स्त्रिष्टुप्।।

❀01.07.16 卐तत्त इन्द्रियं परमं पराचै रधारयन्त कवयः पुरेदम्। क्षमेद.मन्य द्दिव्य1(अ)न्य.दस्य-समी~ पृच्यते समनेव केतुः।।

卐 स धारय.त्पृथिवीं पप्रथच्च- वज्रेण हत्वा निरप.स्ससर्ज। अह.न्नहि.मभिन.द्रौहिणँ व्यह-न्व्यंसं मघवा शचीभिः।।

卐 स जातूभर्मा श्रद्दधान^ ओजः- पुरो विभिन्द.न्नचर.द्वि दासीः। विद्वा.न्वज्रि.न्दस्यवे हेति.मस्या-ऽर्यं सहो वर्धया द्युम्न.मिन्द्र।।

卐 तदूचुषे मानु.षेमा युगानि- कीर्तेन्यं मघवा नाम बिभ्रत्। उपप्रय.न्दस्युहत्याय वज्री- यद्ध सूनु श्श्रवसे नाम दधे।।

卐 तद.स्येदं पश्यता भूरि पुष्टं- श्रदिन्द्रस्य धत्तन वीर्याय। स गा^ अविन्द.त्सो अविन्द.दश्वा-न्त्स^ ओषधी.स्सो अप.स्स^ वनानि।।

❀01.07.17 卐भूरिकर्मणे वृषभाय वृष्णे- सत्यशुष्माय सुनवाम सोमम्। य^ आदृत्या परिपन्थीव शूरो-ऽयज्वनो विभज.न्नेति वेदः।।

卐 तदिन्द्र प्रेव वीर्य.ञ्चकर्थ- यत्ससन्तँ वज्रेणाबोध.योऽहिम्। अनु त्वा पत्नी हृषितँ वयश्च- विश्वे देवासो अमद.न्ननु त्वा।।

卐 शुष्णं पिप्रु.ङ्कुयवँ वृत्र.मिन्द्र- यदाऽवधी र्वि पुर.श्शम्बरस्य। तन्नो मित्रो वरुणो मामहन्ता-मदिति.स्सिन्धुः पृथिवी उत द्यौः।।

1.104 योनिष्ट इति नवर्चस्य सूक्तस्य, कुत्स इन्द्र-स्त्रिष्टुप्।।

❀01.07.18 卐योनिष्ट इन्द्र निषदे अकारि- तमा नि षीद स्वानो नार्वा। विमुच्या वयोऽवसायाश्वा-न्दोषा वस्तो र्वहीयसः प्रपित्वे।।

卐 ओ~ त्ये नर^ इन्द्र.मूतये गु- र्नू चित्ता.न्त्सद्यो अध्वनो जगम्यात्। देवासो मन्यु.न्दासस्य श्चम्न-न्ते न आ वक्ष.न्त्सुविताय वर्णम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अव त्मना भरते केतवेदा^- अव त्मना भरते फेन.मुदन्न्। क्षीरेण स्नातः कुयवस्य योषे~- हते~ ते~ स्यातां प्रवणे शिफायाः।।

卐 युयोप नाभि रुपरस्याऽयोः- प्र पूर्वाभि.स्तिरते राष्टि शूरः। अञ्जसी कुलिशी वीरपत्नी- पयो हिन्वाना^ उदभि र्भरन्ते।।

卐 प्रति यत्स्या नीथाऽदर्शि दस्यो- रोको नाच्छा सदन.ञ्जानती गात्। अध स्मा नो मघव.ञ्चर्कृताऽदि-न्मा नो मघेव निष्षपी परा दाः।।

❀01.07.19 卐स त्वन्न^ इन्द्र सूर्ये सो अ-प्स्वनागास्त्व आ भज जीवशंसे। माऽन्तरां भुज.मा रीरिषो न- श्श्रद्धितन्ते महत इन्द्रियाय।।

卐 अधा मन्ये श्रत्ते अस्मा अधायि- वृषा चोदस्व महते धनाय। मा नो अकृते पुरुहूत योना-विन्द्र क्षुध्यद्भ्यो वय^ आसुति.न्दाः।।

卐 मा नो वधी रिन्द्र मा परा दा- मा नः प्रिया भोजनानि प्र मोषीः। आण्डा मा नो मघव.ञ्छक्र निर्भे-न्मा नः पात्रा भेत्सहजानुषाणि।।

卐 अर्वा.ङेहि सोमकाम.न्त्वाऽऽहु- रयं सुत.स्तस्य पिबा मदाय। उरुव्यचा^ जठर आ वृषस्व- पितेव न श्शृणुहि हूयमानः।।

1.105 चन्द्रमा इत्येकोनविंशत्यृचस्य सूक्तस्य, आप्त्यस्त्रितो विश्वेदेवाः- पङ्क्तिः-अन्त्या त्रिष्टुप्-अष्टमी महा बृहती यवमध्या- (सूक्तभेदप्रयोगपक्षे तु आद्याया विश्वेदेवाः-द्वितीयाया रोदसी-तृतीयाया विश्वेदेवाः-चतुर्थ्या अग्नि रोदस्यः-ततस्तिसृणां विश्वेदेवाः-अष्टम्या इन्द्ररोदस्यः-नवम्या स्सूर्यरश्मिरोदस्यः-दशम्या विश्वेदेवाः-एकादश्याः सुर्यरश्मि रोदस्यः-द्वादश्या विश्वेदेवाः-ततो द्वयोरग्नि रोदसी- तत एकस्या वरुण रोदस्यः-ततो द्वयो र्विश्वेदेवाः- तत एकस्या रोदसी- अन्त्याया विश्वेदेवाः- उत्तरसूक्तद्वये विश्वेदेवा एव)।।

❀01.07.20 卐चन्द्रमा^ अप्स्व1(अ)न्त-रा सुपर्णो धावते दिवि। न वो हिरण्यनेमयः- पदँ विन्दन्ति विद्युतो- वित्तं मे अस्य रोदसी।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अर्थ.मिद्वा उ अर्थिन^- आ जाया युवते पतिम्। तुञ्जाते~ वृष्ण्यं पयः- परिदाय रस.न्दुहे- वित्तं मे अस्य रोदसी।।

卐 मो~ष्षु देवा^ अद स्स्व-1(अ)रव पादि दिव.स्परि। मा सोम्यस्य शंभुव-श्शूने भूम कदा चन- वित्तं मे अस्य रोदसी।।

卐 यज्ञं पृच्छा.म्यवमं- स तद्दूतो वि वोचति। क्व ऋतं पूर्व्य.ङ्गत-ङ्क स्त.द्बिभर्ति नूतनो- वित्तं मे अस्य रोदसी।।

卐 अमी ये देवा^ स्थन- त्रिष्वा रोचने दिवः। कद्व ऋत.ङ्कदनृत-ङ्क प्रत्ना व^ आहुति- र्वित्तं मे अस्य रोदसी।।

❀01.07.21 卐कद्व^ ऋतस्य धर्णसि- कद्वरुणस्य चक्षणम्। कदर्यम्णो मह.स्पथा-ऽति क्रामेम दूढ्यो- वित्तं मे अस्य रोदसी।।

卐 अहं सो अस्मि यः पुरा- सुते वदामि कानि चित्। तं मा व्यन्त्याध्यो3(ओ)- वृको न तृष्णजं मृगँ- वित्तं मे अस्य रोदसी।।

卐 सं मा तप.न्त्यभित-स्सपत्नीरिव पर्शवः। मूषो न शिश्ना व्यदन्ति माऽऽध्य- स्स्तोतारन्ते शतक्रतो~- वित्तं मे अस्य रोदसी।।

卐 अमी ये सप्त रश्मय- स्तत्रा मे नाभि रातता। त्रित.स्तद्वेदाऽऽप्त्य-स्सजामित्वाय रेभति- वित्तं मे अस्य रोदसी।।

卐 अमी ये पञ्चोक्षणो- मध्ये तस्थु र्महो दिवः। देवत्रा नु प्रवाच्यं- सध्रीचीना^ नि वावृतु- र्वित्तं मे अस्य रोदसी।।

❀01.07.22 卐सुपर्णा^ एत आसते- मध्य आरोधने दिवः। ते सेधन्ति पथो वृक-न्तरन्तँ यह्वती रपो- वित्तं मे अस्य रोदसी।।

卐 नव्य.न्तदुक्थ्यं हित-न्देवास.स्सुप्रवाचनम्। ऋत.मर्षन्ति सिन्धव-स्सत्य.न्तातान सूर्यो- वित्तं मे अस्य रोदसी।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अग्ने तव त्यदुक्थ्य-न्देवे.ष्वस्त्याप्यम्। स न.स्सत्तो मनुष्वदा- देवा.न्यक्षि विदुष्टरो- वित्तं मे अस्य रोदसी।।

卐 सत्तो होता मनुष्वदा- देवा अच्छा विदुष्टरः। अग्नि र्हव्या सुषूदति- देवो देवेषु मेधिरो- वित्तं मे अस्य रोदसी।।

卐 ब्रह्मा कृणोति वरुणो- गातुविद.न्तमीमहे। व्यूर्णोति हृदा मति-न्नव्यो जायता.मृतं- वित्तं मे अस्य रोदसी।।

❀01.07.23 卐असौ यः पन्था आदित्यो- दिवि प्रवाच्य.ङ्कृतः। न स देवा अतिक्रमे- तं मर्तासो न पश्यथ- वित्तं मे अस्य रोदसी।।

卐 त्रितः कूपेऽवहितो- देवा.न्हवत ऊतये। तच्छुश्राव बृहस्पतिः- कृण्व.न्नंहूरणा.दुरु- वित्तं मे अस्य रोदसी।।

卐 अरुणो मा सकृ.द्वृकः- पथा यन्त.न्ददर्श हि। उज्जिहीते निचाय्या- तष्टेव पृष्ट्यामयी- वित्तं मे अस्य रोदसी।।

卐 एनाऽऽङ्गूषेण वय.मिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः। तन्नो मित्रो वरुणो मामहन्ता-मदिति. स्सिन्धुः पृथिवी उत द्यौः।।

1.106 इन्द्रं मित्रमिति सप्तर्चस्य सूक्तस्य, कुत्सो विश्वेदेवा- जगती-अन्त्या त्रिष्टुप्।।

❀01.07.24 卐इन्द्रं मित्रँ वरुण.मग्नि.मूतये- मारुतं शर्धो अदितिं हवामहे। रथ.न्न दुर्गा.द्वसव. स्सुदानवो- विश्वस्मा.न्नो अंहसो नि ष्पिपर्तन।।

卐 त आदित्या आ गता सर्वतातये- भूत देवा वृत्रतूर्येषु शंभुवः। रथ.न्न दुर्गा.द्वसव.स्सुदानवो- विश्वस्मा.न्नो अंहसो नि ष्पिपर्तन।।

卐 अवन्तु नः पितर.स्सुप्रवाचना- उत देवी देवपुत्रे ऋतावृधा। रथ.न्न दुर्गा.द्वसव.स्सुदानवो- विश्वस्मा.न्नो अंहसो नि ष्पिपर्तन।।

卐 नराशंसँ वाजिनँ वाजय.न्निह- क्षय.द्वीरं पूषणं सुम्नै रीमहे। रथ.न्न दुर्गा.द्वसव.स्सुदानवो-विश्वस्मा.न्नो अंहसो नि ष्पिपर्तन।।

卐 बृहस्पते सद.मिन्न स्सुग.ङ्कृधि- शँ यो यत्ते मनु र्हित.न्तदीमहे। रथ.न्न दुर्गा.द्वसव.स्सुदानवो-विश्वस्मा .न्नो अंहसो नि ष्पिपर्तन।।

卐 इन्द्र.ङ्कुत्सो वृत्रहणं शचीपति-ङ्काटे निबाळ्ह^ ऋषि रह्व.दूतये। रथ.न्न दुर्गा.द्वसव.स्सुदानवो-विश्वस्मा.न्नो अंहसो नि ष्पिपर्तन।।

卐 देवै र्नो देव्यदिति र्नि पातु- देव स्त्राता त्रायता.मप्रयुच्छन्न्। तन्नो मित्रो वरुणो मामहन्ता-मदिति.स्सिन्धुः पृथिवी उत द्यौः।।

1.107 यज्ञो देवानामिति तृचस्य सूक्तस्य, कुत्सो विश्वेदेवा-स्त्रिष्टुप्।।

❀01.07.25 卐यज्ञो देवानां प्रत्येति सुम्न-मादित्यासो भवता मृळयन्तः। आ वोऽर्वाची सुमति र्ववृत्या-दंहो श्चिद्या वरिवोवित्तराऽसत्।।

卐 उप नो देवा^ अवसाऽऽगम-न्त्वङ्गिरसां सामभि स्स्तूयमानाः। इन्द्र इन्द्रियै र्मरुतो मरुद्भि- रादित्यै र्नो अदिति.श्शर्म यंसत्।।

卐 तन्न^ इन्द्र.स्तद्वरुण स्तदग्नि-स्तदर्यमा तत्सविता चनो धात्। तन्नो मित्रो वरुणो मामहन्ता-मदिति.स्सिन्धुः पृथिवी उत द्यौः।।

1.108 य इन्द्राग्नी इति त्रयोदशर्चस्य सूक्तस्य, कुत्स इन्द्राग्नी- त्रिष्टुप्।।

❀01.07.26 卐य^ इन्द्राग्नी~ चित्रतमो रथो वा-मभि विश्वानि भुवनानि चष्टे। तेनाऽऽयातं सरथ.न्तस्थिवांसा-ऽथा सोमस्य पिबतं सुतस्य।।

卐 यावि.दिदं भुवनँ विश्व.म-स्त्युरुव्यचा वरिमता गभीरम्। तावा॰ अयं पातवे सोमो अ-स्त्वर.मिन्द्राग्नी~ मनसे युवभ्याम्।।

卐 चक्राथे~ हि सध्य्र1(अ)ङ्नाम भद्रं- सध्रीचीना वृत्रहणा उत स्थः। ताविन्द्राग्नी~ सध्य्रञ्चा निषद्या-वृष्ण.स्सोमस्य वृषणाऽऽवृषेथाम्।।

卐 समिद्धे.ष्वग्नि.ष्वानजाना- यतस्रुचा बर्हिरु~ तिस्तिराणा। तीव्रै स्सोमै॰ परि॰षिक्तेभि रर्वा-गेन्द्राग्नी~ सौमनसाय यातम्।।

卐 यानीन्द्राग्नी~ चक्रथु र्वीर्याणि- यानि रूपा.ण्युत वृष्ण्यानि। या वां प्रत्नानि सख्या शिवानि- तेभि स्सोमस्य पिबतं सुतस्य।।

❀01.07.27 卐यदब्रवं प्रथमँ वाँ वृणानो-3(ओ)ऽयं सोमो असुरै र्नो विहव्यः। तां सत्यां श्रद्धा.मभ्या हि यात-मथा सोमस्य पिबतं सुतस्य।।

卐 यदिन्द्राग्नी~ मदथ.स्स्वे दुरोणे- यद्ब्रह्मणि राजनि वा यजत्रा। अत॰ परि वृषणावा हि यात-मथा सोमस्य पिबतं सुतस्य।।

卐 यदिन्द्राग्नी~ यदुषु तुर्वशेषु- यद्द्रुह्यु.ष्वनुषु पूरुषु स्थः। अत॰ परि वृषणावा हि यात-मथा सोमस्य पिबतं सुतस्य।।

卐 यदिन्द्राग्नी~ अवमस्यां पृथिव्यां- मध्यमस्यां परमस्या.मुत स्थः। अत॰ परि वृषणावा हि यात-मथा सोमस्य पिबतं सुतस्य।।

卐 यदिन्द्राग्नी~ परमस्यां पृथिव्यां-मध्यमस्या.मवमस्या.मुत स्थः। अत॰ परि वृषणावा हि यात.मथा सोमस्य पिबतं सुतस्य।।

卐 यदिन्द्राग्नी~ दिवि ष्ठो यत्पृथिव्याँ- यत्पर्वते.ष्वोषधी.ष्वप्सु। अत॰ परि वृषणावा हि यात.मथा सोमस्य पिबतं सुतस्य।।

卐 यदिन्द्राग्नी~ उदिता सूर्यस्य- मध्ये दिव स्स्वधया मादयेथे~। अत॰ परि वृषणावा हि यात-मथा सोमस्य पिबतं सुतस्य।।

卐 एवेन्द्राग्नी~ पपिवांसा सुतस्य- विश्वाऽस्मभ्यं सञ्जयत.न्धनानि। तन्नो मित्रो वरुणो मामहन्ता- मदिति. स्सिन्धु॰ पृथिवी उत द्यौः।।

1.109 वि ह्यख्य मित्यष्टर्चस्य सूक्तस्य, कुत्स इन्द्राग्नी- त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

❀01.07.28 卐वि ह्यख्यं मनसा वस्यं^ इच्छ-न्निन्द्राग्नी~ ज्ञास उत वा सजातान्। नान्या युव.त्प्रमति रस्ति मह्यं- स वान्धियँ वाजयन्ती.मतक्षम्।।

卐 अश्रवं हि भूरिदावत्तरा वाँ- विजामातु रुत वा घा स्यालात्। अथा सोमस्य प्रयती युवभ्या-मिन्द्राग्नी~ स्तोम.ञ्जनयामि नव्यम्।।

卐 मा च्छेद्म रश्मी॰ रिति नाधमाना॰- पितृणां शक्ती रनुयच्छमानाः। इन्द्राग्निभ्या.ङ्कँ वृषणो मदन्ति- ता ह्यद्री~ धिषणाया^ उपस्थे।।

卐 युवाभ्या.न्देवी धिषणा मदा-येन्द्राग्नी~ सोम.मुशती सुनोति। तावश्विना भद्रहस्ता सुपाणी~- आ धावतं मधुना पृङ्क्त.मप्सु।।

卐 युवा.मिन्द्राग्नी~ वसुनो विभागे- तवस्तमा शुश्रव वृत्रहत्ये। तावासद्या बर्हिषि यज्ञे अस्मि-न्प्रचर्षणी~ मादयेथां सुतस्य।।

❀01.07.29 卐प्र चर्षणिभ्य॰ पृतनाहवेषु- प्र पृथिव्या रिरिचाथे~ दिवश्च। प्र सिन्धुभ्य॰ प्र गिरिभ्यो महित्वा- प्रेन्द्राग्नी~ विश्वा भुवनाऽत्यन्या।।

卐 आऽभरतं शिक्षतँ वज्रबाहू~- अस्मा॰ इन्द्राग्नी अवतं शचीभिः। इमे नु ते रश्मय.स्सूर्यस्य- येभि स्सपित्वं पितरो न^ आसन्न्।।

卐 पुरन्दरा शिक्षतँ वज्रहस्ता-स्मा॰ इन्द्राग्नी~ अवतं भरेषु। तन्नो मित्रो वरुणो मामहन्ता-मदिति स्सिन्धु॰ पृथिवी उत द्यौः।।

1.110 ततं म इति नवर्चस्य सूक्तस्य, कुत्स ऋभवो- जगती-पञ्चम्यन्त्ये त्रिष्टुभौ।।

❀01.07.30 卐ततं मे अप.स्तदु तायते पुन~-स्स्वादिष्ठा^ धीति रुचथाय शस्यते। अयं समुद्र^ इह विश्वदेव्य-स्स्वाहाकृतस्य समु तृप्णुत ऋभवः।।

卐 आभोगयं प्र यदिच्छन्त^ ऐत.नापाका॰ प्राञ्चो मम के चिदापयः। सौधन्वनास श्चरितस्य भूमना-ऽगच्छत सवितु र्दाशुषो गृहम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 तत्सविता वोऽमृतत्व.माऽसुव-दगोह्यँ यच्छ्रवयन्त^ ऐतन। त्यञ्चि.च्चमस.मसुरस्य भक्षण-मेकं सन्त.मकृणुता चतुर्वयम्।।

卐 विष्ट्वी शमी तरणित्वेन वाघतो- मर्तास.स्सन्तो अमृतत्व.मानशुः। सौधन्वना^ ऋभव.स्सूरचक्षस -स्सँवत्सरे समपृच्यन्त धीतिभिः।।

卐 क्षेत्र.मिव वि ममु.स्तेजनेनँ- एकं पात्र.मृभवो जेहमानम्। उपस्तुता^ उपम.न्नाधमाना^- अमर्त्येषु श्रव^ इच्छमानाः।।

❀01.07.31 卐आ मनीषा.मन्तरिक्षस्य नृभ्य-स्स्रुचेव घृत.ञ्जुहवाम विद्मना। तरणित्वा ये पितु रस्य सश्चिर- ऋभवो वाज.मरुह.न्दिवो रजः।।

卐 ऋभुर्न^ इन्द्र.श्शवसा नवीया-नृभु वाजेभि र्वसुभि र्वसु र्ददिः। युष्माक.न्देवा^ अवसाऽहनि प्रिये-3(ए)ऽभि तिष्ठेम पृत्सुती रसुन्वताम्।।

卐 निश्चर्मण^ ऋभवो गामपिंशत- सँ वत्से.नासृजता मातरं पुनः~। सौधन्वनास.स्स्वपस्यया नरो- जिव्री~ युवाना पितरा ऽकृणोतन।।

卐 वाजेभि र्नो वाजसाता वविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः। तन्नो मित्रो वरुणो मामहन्ता-मदिति.स्सिन्धुः पृथिवी उत द्यौः।।

1.111 तक्षन्रथमिति पञ्चर्चस्य सूक्तस्य, कुत्स ऋभवो- जगती-अन्त्या त्रिष्टुप्।।

❀01.07.32 卐तक्ष.न्रथं सुवृतँ विद्मनाऽपस-स्तक्ष.न्हरी~ इन्द्रवाहा वृषण्वसू~। तक्ष.न्पितृभ्या.मृभवो युव.द्वय-स्तक्ष.न्वत्साय मातरं सचाभुवम्।।

卐 आ नो यज्ञाय तक्षत ऋभुमद्वयः- क्रत्वे दक्षाय सुप्रजावती.मिषम्। यथा क्षयाम सर्ववीरया विशा- तन्न श्शर्धाय धासथा स्विन्द्रियम्।।

卐 आ तक्षत साति.मस्मभ्य.मृभव-स्सातिं रथाय साति.मर्वते नरः। सातिन्नो जैत्रीं सं महेत विश्वहा- जामि .मजामिं पृतनासु सक्षणिम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ऋभुक्षण.मिन्द्र.माहुव ऊतय- ऋभू.न्वाजा.न्मरुत स्सोमपीतये। उभा मित्रावरुणा नून.मश्विना- ते नो हिन्वन्तु सातये धिये जिषे।।

卐 ऋभु र्भराय सं शिशातु सातिं- समर्यजि.द्वाजो अस्मा॑ अविष्टु। तन्नो मित्रो वरुणो मामहन्ता- मदिति. स्सिन्धुः पृथिवी उत द्यौः।।

1.112 ईळे द्यावापृथिवी इति पञ्चविंशत्यृचस्य सूक्तस्य, कुत्सः-आद्याया द्यावापृथिव्यग्न्यश्विनः- शिष्टानामश्विनौ- जगती-अन्त्ये द्वे त्रिष्टुभौ।।

❀01.07.33 卐ईळे द्यावापृथिवी~ पूर्वचित्तये-ऽग्नि.ङ्घर्मं सुरुचँ याम.न्निष्टये। याभि र्भरे कार.मंशाय जिन्वथ-स्ताभिरू ष्वु ऊतिभि रश्विनाऽऽगतम्।।

卐 युवो र्दानाय सुभरा॑ असश्चतो- रथमा तस्थु र्वचस.न्न मन्तवे। याभि र्धियोऽवथः कर्म.न्निष्टये- ताभिरू ष्वु ऊतिभि रश्विनाऽऽगतम्।।

卐 युव.न्तासा.न्दिव्यस्य प्रशासने- विशा.ङ्क्षयथो अमृतस्य मज्मना। याभि.र्धेनु.मस्व1(अं) पिन्वथो नरा- ताभिरू ष्वु ऊतिभि रश्विनाऽऽगतम्।।

卐 याभिः परिज्मा तनयस्य मज्मना- द्विमाता तूर्षु तरणि र्विभूषति। याभि स्त्रिमन्तु रभव.द्विचक्षण- स्ताभिरू ष्वु ऊतिभि रश्विनाऽऽगतम्।।

卐 याभी रेभ.न्निवृतं सित.मद्भ्य॑- उद्वन्दन.मैरयतं स्वर्दृशे। याभिः कण्वं प्र सिषासन्त.मावत-न्ताभिरू ष्वु ऊतिभि रश्विनाऽऽगतम्।।

❀01.07.34 卐याभि रन्तक.ञ्जसमान.माऽरणे-भुज्युं याभि रव्यथिभि र्जिजिन्वथुः। याभिः कर्कन्धुँ वय्यञ्च जिन्वथ-स्ताभिरू ष्वु ऊतिभि रश्विना ऽऽगतम्।।

卐 याभि.श्शुचन्ति.न्धनसां सुषंसद.न्तप्त.ङ्घर्म.मोम्यावन्त.मत्रये। याभिः पृश्निगुं पुरुकुत्स.मावत- न्ताभिरू ष्वु ऊतिभि रश्विना ऽऽगतम्।।

卐 याभि.श्शचीभि र्वृषणा परावृजं- प्रान्धं श्रोण.ञ्चक्षस एतवे कृथः। याभि र्वर्तिका.ङ्ग्रसिता.ममुञ्चत- न्ताभिरू ष्वु ऊतिभि रश्विना ऽऽगतम्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

卐 याभि.स्सिन्धुं मधुमन्त.मसश्चतँ- वसिष्ठँ याभि रजरा वजिन्वतम्। याभिः कुत्सं श्रुतर्य.न्नर्य. मावत-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभि विश्पला.न्धनसा.मथर्व्यं- सहस्रमीळ्ह आजा वजिन्वतम्। याभि वंश.मश्व्यं प्रेणि.मावत-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
❀01.07.35 卐याभि स्सुदानू~ औशिजाय वणिजे- दीर्घश्रवसे मधु कोशो अक्षरत्। कक्षीवन्तं
स्तोतारँ याभि रावत-न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभी रसा.ङ्क्षोदसोद्नः पिपिन्वथु- रनश्वँ याभी रथ.मावत.ञ्जिषे। याभि स्त्रिशोक^ उस्रिया^ उदाजत-
ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभि स्सूर्यं परियाथः परावति- मन्धातार.ङ्क्षैत्रपत्ये.ष्वावतम्। याभि विप्रं प्र भरद्वाज.मावत-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभि र्महा.मतिथिग्व.ङ्कशोजुव-न्दिवोदासं शम्बरहत्य आवतम्। याभिः पूर्भिद्ये त्रसदस्यु .मावत-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभि र्वम्रँ विपिपान.मुपस्तुत-ङ्कलिँ याभि र्वित्तजानि.न्दुवस्यथः। याभि र्व्यश्व.मुत पृथि.मावत-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
❀01.07.36 卐याभि र्नरा शयवे याभि रत्रये- याभिः पुरा मनवे गातु.मीषथुः। याभि श्शारी राजतं
स्यूमरश्मये- ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभिः पठर्वा जठरस्य मज्मना-ऽग्नि र्नादीदे.च्चित ^इद्धो अज्मन्ना। याभि श्शर्यात.मवथो महाधने-
ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभि रङ्गिरो मनसा निरण्यथो-ऽग्रङ्ग.च्छथो विवरे गोअर्णसः। याभि र्मनुं शूर.मिषा समावत-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।
卐 याभिः पत्नी र्विमदाय न्यूहथु-रा घ वा याभि ररुणी रशिक्षतम्। याभि.स्सुदास ऊहथु स्सुदेव्य1(अ)-
न्ताभिरू ¤षु ऊतिभि रश्विना ऽऽगतम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 याभि.श्शन्ताती~ भवथो ददाशुषे- भुज्युँ याभि रवथो याभि रध्रिगुम्। ओम्यावतीं सुभरा. मृतस्तुभ-न्ताभिरू षु ऊतिभि रश्विना ऽगतम्।।

❀01.07.37 卐याभिः कृशानु.मसने दुवस्यथो- जवे याभि यूनो अर्वन्त.मावतम्। मधु प्रियं भरथो यत्सरड्भ्य-स्ताभिरू षु ऊतिभि रश्विना ऽगतम्।।

卐 याभि नर.ङ्गोषुयुध.न्नृषाह्ये- क्षेत्रस्य साता तनयस्य जिन्वथः। याभी रथा अवथो याभि रवत-स्ताभिरू षु ऊतिभि रश्विना ऽगतम्।।

卐 याभिः कुत्स.मार्जुनेयं शतक्रतू~ प्र तुर्वीतिं प्र च दभीति.मावतम्। याभि ध्वसन्तिं पुरुषन्ति .मावत-न्ताभिरू षु ऊतिभि रश्विना ऽगतम्।।

卐 अप्नस्वती.मश्विना वाच.मस्मे- कृतन्नो दस्रा वृषणा मनीषाम्। अद्यूत्येऽवसे नि ह्वये वाँ- वृधे च नो भवतँ वाजसातौ।।

卐 द्युभि रक्तुभिः परि पात.मस्मा-नरिष्टेभि रश्विना सौभगेभिः। तन्नो मित्रो वरुणो मामहन्ता-मदिति स्सिन्धुः पृथिवी उत द्यौः।।

इति सप्तमाध्यायः।।

## प्रथमाष्टके अष्टमाध्यायः। वर्गाः(1-26)

1.113 इदं श्रेष्ठमिति विंशत्यृचस्य सूक्तस्य, कुत्स उषाः-द्वितीयाया अर्धर्चो- रात्रि-स्त्रिष्टुप्।।

❀01.08.01 卐इदं श्रेष्ठ.ञ्ज्योतिषा.ञ्ज्योति राऽगा-च्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितु स्सवायँ- एवा रात्र्युषसे योनि.मारैक्।।

卐 रुश.द्वत्सा रुशती श्वेत्यागा-दारैगु कृष्णा सदना न्यस्याः। समानबन्धू~ अमृते~ अनूची~- द्यावा वर्ण.ञ्चरत आमिनाने~।।

卐 समानो अध्वा स्वस्रो रनन्त-स्तमन्याऽन्या चरतो देवशिष्टे~। न मेथेते~ न तस्थतु.स्सुमेके~- नक्तोषासा समनसा विरूपे~।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 भास्वती नेत्री सूनृताना-मचेति चित्रा वि दुरो न^ आवः~। प्राप्र्या जग.द्व्यु नो रायो अख्य-दुषा^ अजीग भुवनानि विश्वा।।

卐 जिह्मश्ये3(ए) चरितवे मघो-न्याभोगय इष्टये राय उ त्वम्। दभ्रं पश्यद्भ्य^ उर्विया विचक्ष- उषा^ अजीग भुवनानि विश्वा।।

❀01.08.02 卐क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै। विसदृशा जीविताऽभिप्रचक्ष- उषा^ अजीग भुवनानि विश्वा।।

卐 एषा दिवो दुहिता प्रत्यदर्शि- व्युच्छन्ती युवति.श्शुक्रवासाः। विश्व.स्येशाना पार्थिवस्य वस्व^- उषो अद्येह सुभगे व्युच्छ।।

卐 परायतीना.मन्वेति पाथ^- आयतीनां प्रथमा शश्वतीनाम्। व्युच्छन्ती जीव.मुदीरय-न्त्युषा मृत.ङ्कञ्चन बोधयन्ती।।

卐 उषो यदग्निं समिधे चकर्थ- वि यदाव श्चक्षसा सूर्यस्य। यन्मानुषा.न्यक्ष्यमाणा९ अजीग- स्तद्देवेषु चकृषे भद्र.मप्नः।।

卐 किया॑त्या यत्समया भवाति- या^ व्यूषु र्याश्च नूनँ व्युच्छान्। अनु पूर्वा४ कृपते वावशाना- प्रदीध्याना जोष.मन्याभि रेति।।

❀01.08.03 卐ईयु^ ष्टे ये पूर्वतरा.मपश्य-न्व्युच्छन्ती.मुषसं मर्त्यासः। अस्माभि रू नु प्रतिचक्ष्या ऽभू-दो~ ते यन्ति ये अपरीषु पश्यान्।।

卐 या॑वयद्द्वेषा^ ऋतपा^ ऋतेजा-स्सुम्नावरी सूनृता^ ईरयन्ती। सुमङ्गली र्बिभ्रती देववीति-मिहाऽद्योष श्श्रेष्ठतमा व्युच्छ।।

卐 शश्व.त्पुरोषा^ व्युवास दे-व्यथो~ अद्येदँ व्यावो मघोनी। अथो~ व्युच्छा.दुत्तरा९ अनु द्यू-नजरामृता चरति स्वधाभिः।।

卐 व्यं1(अ)ञ्जिभि र्दिव^ आता.स्वद्यौ-दप कृष्णा.न्निर्णिज.न्देव्यावः~। प्रबोधय.न्त्यरुणेभि रश्वै-रोषा याति सुयुजा रथेन।।

卐 आवहन्ती पोष्या वार्याणि- चित्र.ङ्केतु.ङ्कृणुते चेकिताना। ईयुषीणा.मुपमा शश्वतीनाँ- विभातीनां प्रथ.मोषा व्यश्वैत्।।

❀01.08.04 卐उदीर्ध्वं.ञ्जीवो असु र्न आऽगा-दप प्रागात्तम^ आ ज्योति रेति। आरै.क्पन्थाँ यातवे सूर्या.यागन्म यत्र प्रतिरन्त आयुः।।

卐 स्यूमना वाच^ उदियर्ति वह्नि-स्स्तवानो रेभ^ उषसो विभातीः। अद्या तदुच्छ गृणते मघो-न्यस्मे आयु र्निदिदीहि प्रजावत्।।

卐 या^ गोमती रुषस.स्सर्ववीरा^- व्युच्छन्ति दाशुषे मर्त्याय। वायोरिव सूनृताना.मुदर्के- ता^ अश्वदा^ अश्नव.त्सोमसुत्वा।।

卐 माता देवाना.मदिते रनीकँ- यज्ञस्य केतु र्बृहती वि भाहि। प्रशस्तिकृ.द्ब्रह्मणे नो व्यु1(उ)च्छा-ऽऽ नो जने जनय विश्ववारे।।

卐 यच्चित्र.मप्न^ उषसो वहन्ती-जानाय शशमानाय भद्रम्। तन्नो मित्रो वरुणो मामहन्ता-मदिति. स्सिन्धुः पृथिवी उत द्यौः।।

1.114 इमा रुद्रायेत्येकादशर्चस्य सूक्तस्य, कुत्सो रुद्रो- जगती-अन्त्ये द्वे त्रिष्टुभौ।।

❀01.08.05 卐इमा^ रुद्राय तवसे कपर्दिने- क्षयद्वीराय प्र भरामहे मतीः। यथा शमस.द्द्विपदे चतुष्पदे- विश्वं पुष्ट.ङ्ग्रामे अस्मि.न्ननातुरम्।।

卐 मृळा नो रुद्रोत नो मय.स्कृधि- क्षयद्वीराय नमसा विधेम ते। यच्छञ्च योश्च मनु रायेजे पिता- तदश्याम तव रुद्र प्रणीतिषु।।

卐 अश्याम ते सुमति.न्देवयज्यया- क्षयद्वीरस्य तव रुद्र मीढ्वः। सुम्नाय.न्निद्विशो अस्माक.मा च- रारिष्टवीरा^ जुहवाम ते हविः।।

卐 त्वेषँ वयं रुद्रँ यज्ञसाधँ- वङ्कु.ङ्कवि.मवसे नि ह्वयामहे। आरे अस्म.द्दैव्यं हेळो अस्यतु- सुमति.मिद्वय .मस्या ऽऽवृणीमहे।।

卐 दिवो वराह.मरुष.ङ्कपर्दिन-न्त्वेषं रूप.न्नमसा नि ह्वयामहे। हस्ते बिभ्र.द्भेषजा वार्याणि- शर्म वर्म च्छर्दि रस्मभ्यँ यंसत्।।

❀01.08.06 卐इदं पित्रे मरुता.मुच्यते वच-स्स्वादो स्स्वादीयो रुद्राय वर्धनम्। रास्वा च नो अमृत मर्तभोजन-न्त्मने तोकाय तनयाय मृळ।।

卐 मा नो महान्त.मुत मा नो अर्भकं- मा न^ उक्षन्त.मुत मा न^ उक्षितम्। मा नो वधीः पितरं मोत मातरं- मा नः प्रिया.स्तन्वो रुद्र रीरिषः।।

卐 मा न.स्तोके तनये मा न^ आयौ- मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधी-र्हविष्मन्त.स्सदमि त्त्वा हवामहे।।

卐 उप ते स्तोमा.न्पशुपाइवा करं- रास्वा पित मरुतां सुम्न.मस्मे। भद्रा हि ते सुमति र्मृळयत्तमा-ऽथा वय.मव^ इत्ते वृणीमहे।।

卐 आरे ते गोघ्न.मुत पूरुषघ्न-ङ्क्षयद्वीर सुम्न मस्मे ते अस्तु। मृळा च नो अधि च ब्रूहि दे-वाधा च न श्शर्म यच्छ द्विबर्हाः।।

卐 अवोचाम नमो अस्मा अवस्यव-श्शृणोतु नो हवं रुद्रो मरुत्वान्। तन्नो मित्रो वरुणो मामहन्ता-मदिति.स्सिन्धुः पृथिवी उत द्यौः।।

1.115 चित्र न्देवनामिति षळृर्चस्यसूक्तस्य, कुत्स आंगीरस- स्त्रिष्टुप्।।

❀01.08.07 卐चित्र.न्देवाना.मुदगा.दनीक-ञ्चक्षु र्मित्रस्य वरुण.स्याग्नेः। आऽप्रा द्यावापृथिवी~ अन्तरिक्षं- सूर्य^ आत्मा जगत.स्तस्थुषश्च।।

卐 सूर्यो देवी.मुषसं रोचमानां- मर्यो न योषा.मभ्येति पश्चात्। यत्रा नरो देवयन्तो युगानि- वितन्वते प्रति भद्राय भद्रम्।।

卐 भद्रा^ अश्वा^ हरित.स्सूर्यस्य- चित्रा^ एतग्वा^ अनुमाद्यासः। नमस्यन्तो दिव^ आ पृष्ठ.मस्थुः- परि द्यावापृथिवी~ यन्ति सद्यः।

卐 तत्सूर्यस्य देवत्व.न्तन्महित्वं- मध्या कर्तोर्विततं सञ्जभार। यदे दयुक्त हरित.स्सधस्था-दाद्रात्री वास स्तनुते सिमस्मै।।

卐 तन्मित्रस्य वरुण.स्याभिचक्षे- सूर्यो रूप.ङ्कृणुते द्यो रुपस्थे। अनन्त.मन्य.द्रुश.दस्य पाज॰- कृष्ण.मन्य .द्धरित.स्सं भरन्ति।।

卐 अद्या देवा उदिता सूर्यस्य- निरंहस॰ पिपृता निरवद्यात्। तन्नो मित्रो वरुणो मामहन्ता-मदिति. स्सिन्धु॰ पृथिवी उत द्यौः।।

1.116 नासत्याभ्यामिति पञ्चविंशत्यृचस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- अश्विनौ- त्रिष्टुप्।।

❀01.08.08 卐नासत्याभ्यां बर्हिरिव प्र वृञ्जे- स्तोमा॰ इय.र्म्यभ्रियेव वातः। यावर्भगाय विमदाय जायां- सेनाजुवा न्यूहतू रथेन।।

卐 वीळुपत्मभि राशुहेमभि र्वा- देवानाँ वा जूतिभि.श्शाशदाना। तद्रासभो नासत्या सहस्र-माजा यमस्य प्रधने जिगाय।।

卐 तुग्रो ह भुज्यु.मश्वि.नोदमेघे- रयिन्न कश्चि न्ममृवा॰ अवाहाः। तमूहथु र्नौभि रात्मन्वतीभि- रन्तरिक्षप्रुद्भि रपोदकाभिः।।

卐 तिस्रः ≈ क्षप स्त्रि रहाऽतिव्रजद्भि- र्नासत्या भुज्यु.मूहथु॰ पतङ्गैः। समुद्रस्य धन्व.न्नार्द्रस्य पारे- त्रिभी रथै श्शतपद्भि ष्षळश्वैः।।

卐 अनारम्भणे तदवीरयेथा-मनास्थाने अग्रभणे समुद्रे। यदश्विना ऊहथु र्भुज्यु.मस्तं- शतारित्रा.न्नाव. मातस्थिवांसम्।।

❀01.08.09 卐यमश्विना ददथु श्श्वेत-मश्व.मघाश्वाय शश्व.दित्स्वस्ति। तद्वा.न्दात्रं महि कीर्तेन्यं भू- त्पैद्वो वाजी सदमि.द्धव्यो अर्यः।।

卐 युवन्नरा स्तुवते पज्रियाय- कक्षीवते अरदतं पुरन्धिम्। कारोतरा.च्छफा.दश्वस्य वृष्ण-श्शत.ङ्कुम्भा॰ असिञ्चतं सुरायाः।।

卐 हिमे.नाग्नि.ङ्घ्रंस.मवारयेथां- पितुमती.मूर्जे.मस्मा अधत्तम्। ऋबीसे अत्रि.मश्विनाऽवनीत-मुन्निन्यथु.
स्सर्वगणं स्वस्ति।।

卐 पराऽवत.न्नासत्या नुदेथा-मुच्चाबुध्न.ञ्चक्रथु र्जिह्मबारम्। क्षर.न्नापो न पायनाय राये- सहस्राय तृष्यते
गोतमस्य।।

卐 जुजुरुषो नास.त्योत वव्रिं- प्रामुञ्चत.न्द्रापिर्मिव च्यवानात्। प्रातिरत.ञ्जहित.स्यायु र्द-स्रादि.त्पति
.मकृणुत.ङ्कनीनाम्।।

❀01.08.10 卐तद्वा.न्नरा शंस्यं राध्य-ञ्चाभिष्टिम.न्नासत्या वरूथम्। यद्विद्वांसा निधिमिवा.पगूळ्ह-
मुद्दर्शता दूपथु र्वन्दनाय।।

卐 तद्वा.न्नरा सनये दंस^ उग्र-माविर्ष्कृणोमि तन्यतु र्न वृष्टिम्। दध्यङ्ङ यन्मध्वाथर्वणो वा-मश्वस्य
शीर्ष्णा प्र यदी.मुवाच।।

卐 अजोहवी.न्नासत्या करा वां- महे याम.न्पुरुभुजा पुरन्धिः। श्रुत.न्तच्छासुरिव वध्रिमत्या^-
हिरण्यहस्त. मश्विना वदत्तम्।।

卐 आस्नो वृकस्य वर्तिका.मभीके- युवन्नरा नासत्याऽमुमुक्तम्। उतो~ कविं पुरुभुजा युवं ह-कृपमाण
.मकृणुतँ विचक्षे।।

卐 चरित्रं हि वेरि.वाच्छेदि पर्ण-माजा खेलस्य परितक्म्यायाम्। सद्यो जङ्घा.मायसीं विश्पलायै- धने
हिते सर्तवे प्रत्यधत्तम्।।

❀01.08.11 卐शतं मेषा.न्वृक्ये चक्षदान-मृज्राश्वन्तं पिताऽन्ध.ञ्चकार। तस्मा अक्षी~ नासत्या
विचक्ष- आऽधत्त.न्दस्रा भिषजा वनर्वन्न्।।

卐 आ वां रथ.न्दुहिता सूर्यस्य- कार्ष्मेवातिष्ठ.दर्वता जयन्ती। विश्वे देवा^ अन्वमन्य.न्त हृद्भि- स्समु
श्रिया नासत्या सचेथे~।।

卐 यदयात.न्दिवोदासाय वर्ति र्भरद्वाजायाश्विना हयन्ता।रेव.दुवाह सचनो रथो वाँ वृषभश्च शिंशुमारश्च
युक्ता।।

卐 रयिं सुक्षत्रं स्वपत्य.मायु- स्सुवीर्य.न्नासत्या वहन्ता। आ जह्नावीं सम॑न.सोप वाजै- स्त्रिरह्नो भाग.न्दध॑ती.मयातम्।।

卐 परि॑विष्ट.ञ्जाहुषँ विश्वत-स्सीं सुगेभि नक्त.मूहथू रजोभिः। विभिन्दुना नासत्या रथेन- वि पर्वता॰ अजरयू~ अयातम्।।

❀01.08.12 卐एकस्या^ वस्तो रावतं रणाय- वश.मश्विना सनये सहस्रा। निरहत.न्दुच्छुना^ इन्द्रवन्ता- पृथुश्रवसो वृषणा वरातीः।।

卐 शरस्य चिदार्चत्क.स्यावतादा- नीचा.दुच्चा चक्रथुः पातवे वाः~। शयवे चिन्नासत्या शचीभि- र्जसुरये स्तर्यं पिप्यथु र्गाम्।।

卐 अवस्यते स्तुवते कृष्णियाय- ऋजूयते नासत्या शचीभिः। पशुन्न नष्टमिव दर्शनाय- विष्णाप्व.न्ददथु र्विश्वकाय।।

卐 दश रात्री रशिवेना नव द्यू-नवनद्धं श्नथित.मप्स्व1(अ)न्तः~। विप्रुतं रेभ.मुदनि प्रवृक्त-मुन्निन्यथु .स्सोममिव स्रुवेण।।

卐 प्र वान्दंसां.स्यश्विना ववोच-मस्य पतिः.स्स्यां सुगव.स्सुवीरः। उत पश्य.न्नश्नुव.न्दीर्घ.मायु- रस्तमि.वे ज्जरिमाण.ञ्जगम्याम्।।

1.117 मध्व स्सोमस्येति पञ्चविंशत्यृचस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- अश्विनौ-त्रिष्टुप्।।

❀01.08.13 卐मध्व स्सोम स्याश्विना मदाय- प्रत्नो होता ऽविवासते वाम्। बर्हिष्मती राति र्विश्रिता गी-रिषा यात न्नासत्योप वाजैः।।

卐 यो वा मश्विना मनसो जवीया-न्रथ स्स्वश्वो विश आजिगाति। येन गच्छथ स्सुकृतो दुरोण-न्तेन नरा वर्ति रस्मभ्यँ यातम्।।

卐 ऋषिन्नरा वंहसः पाञ्चजन्य- मृबीसा दत्रिं मुञ्चथो गणेन। मिनन्ता दस्यो रशिवस्य माया^- अनुपूर्वँ वृषणा चोदयन्ता।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अश्वन्न गूळ्ह मश्विना दुरेवै-र् ऋषिन्नरा वृषणा रेभ मप्सु। सन्तं रिणीथो विप्रुत.न्दंसोभि- र्न वाञ्जूर्यन्ति पूर्व्या कृतानि।।

卐 सुषुप्वांसन्न निर्ऋते रुपस्थे- सूर्यन्न दस्रा तमसि क्षियन्तम्। शुभे रुक्मन्न दर्शत न्निखात-मुदूपथु रश्विना वन्दनाय।।

❀01.08.14 卐तद्वा.न्नरा शंस्यं पज्रियेर्ण- कक्षीवता नासत्या परिज्मन्न्। शफा.दश्वस्य वाजिनो जनाय- शत.ङ्कुम्भा॰ असिञ्चतं मधूनाम्।।

卐 युव.न्नरा स्तुवते कृष्णियाय- विष्णाप्व.न्ददथु र्विश्वकाय। घोषायै चित्पितृषदे दुरोणे- पति.ञ्जूर्यन्त्या अश्विनावदत्तम्।।

卐 युवं श्यावाय रुशती.मदत्तं- महः≈क्षोण.स्याश्विना कण्वाय। प्रवाच्य.न्तद्वृषणा कृतँ वाँ- यन्नार्षदाय श्रवो अध्यधत्तम्।।

卐 पुरू वर्पां.स्यश्विना दधाना- नि पेदव ऊहथु राशु.मश्वम्। सहस्रसाँ वाजिन.मप्रतीत-महिहनं श्रवस्य1(अ)न्तरुत्रम्।।

卐 एतानि वां श्रवस्या सुदानू-- ब्रह्मा॒ऽऽङ्गूषं सदनं रोदस्योः। यद्वां पज्रासो अश्विना हवन्ते- यात.मिषा च विदुषे च वाजम्।।

❀01.08.15 卐सूनो र्मानेनाश्विना गृणाना- वाजँ विप्राय भुरणा रदन्ता। अगस्त्ये ब्रह्मणा वावृधाना- सँविश्पला.न्नासत्याऽरिणीतम्।।

卐 कुह यान्ता सुष्टुति.ङ्काव्यस्य- दिवो नपाता वृषणा शयुत्रा। हिरण्यस्येव कलश.न्निखात-मुदूपथु र्दशमे अश्विनाऽहन्न्।।

卐 युव.ञ्च्यवान.मश्विना जरन्तं- पुन र्युवान.ञ्चक्रथु श्शचीभिः। युवो रथ.न्दुहिता सूर्यस्य- सह श्रिया नासत्या वृणीत।।

卐 युव.न्तुग्राय पूर्व्येभि रेवै॰- पुनर्मन्या वभवतँ युवाना। युवं भुज्यु.मर्णसो नि स्समुद्रा-द्विभि रूहथुर् ऋज्रेभि रश्वैः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अजोहवी.दश्विना तौग्र्यो वां- प्रोळ्ह स्समुद्र.मव्यथि र्जगन्वान्। निष्ट.मूहथु स्सुयुजा रथेन-मनोजवसा वृषणा स्वस्ति।।

❀01.08.16 卐अजोहवी.दश्विना वर्तिका वा-मास्नो यत्सी.ममुञ्चतँ वृकस्य। वि जयुषा ययथु.स्सान्वद्रे-र्जातँ विष्वाचो अहतँ विषेण।।

卐 शतं मेषा.न्वृक्ये मामहान-न्तमः प्रणीत.मशिवेन पित्रा। आऽक्षी ऋज्राश्वे अश्विना वधत्त-ञ्ज्योति रन्धाय चक्रथु र्विचक्षे।।

卐 शुन.मन्धाय भर.मह्वय.त्सा- वृकी रश्विना वृषणा नरेति। जारः कनीनइव चक्षदान- ऋज्राश्व- श्शत .मेकञ्च मेषान्।।

卐 मही वा.मूति रश्विना मयोभू- रुत स्राम.न्धिष्ण्या सं रिणीथः। अथा युवा.मिदह्वय.त्पुरन्धि-रागच्छतं सीँ वृषणा ववोभिः।।

卐 अधेनु.न्दस्रा स्तर्य1(अँ) विषक्ता-मपिन्वतं शयवे अश्विना गाम्। युवं शचीभि र्विमदाय जाया-न्न्यूहथुः पुरुमित्रस्य योषाम्।।

❀01.08.17 卐यवँ वृके.णाश्विना वप-न्तेष.न्दुहन्ता मनुषाय दस्रा। अभि दस्युं बकुरेणा.धम-न्तोरु ज्योति श्चक्रथु रार्याय।

卐 आथर्वणा.याश्विना दधीचे-ऽश्व्यं शिरः प्रत्यैरयतम्। स वां मधु प्र वोच.दृतायन्-त्वाष्ट्रं यद्दस्रा वपिकक्ष्यँ वाम्।।

卐 सदा कवी सुमति.माचके वाँ- विश्वा धियो अश्विना प्रावतं मे। अस्मे रयि.न्नासत्या बृहन्त-मपत्यसाचं श्रुत्यं रराथाम्।।

卐 हिरण्यहस्त.मश्विना रराणा- पुत्र.न्नरा वध्रिमत्या अदत्तम्। त्रिधा ह श्यावे.मश्विना विकस्त-मुज्जीवसँ ऐरयतं सुदानू।।

卐 एतानि वा.मश्विना वीर्याणि- प्र पूर्व्या.ण्यायवोऽवोचन्न्। ब्रह्म कृण्वन्तो वृषणा युवभ्यां- सुवीरासो विदथमा वदेम।।

1.118 आ वां रथ इत्येकादशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- अश्विनौ-त्रिष्टुप्।।

❀01.08.18 卐आ वां रथो अश्विना श्येनपत्वा- सुमृळीक.स्स्ववाँ यात्वर्वाङ्। यो मर्त्यस्य मनसो जवीया-न्त्रिवन्धुरो वृषणा वातरंहाः।।

卐 त्रिवन्धुरेण त्रिवृता रथेन- त्रिचक्रेण सुवृता ऽऽयात.मर्वाक्। पिन्वतङ्गा^ जिन्वत.मर्वतो नो- वर्धयत.मश्विना वीर.मस्मे।।

卐 प्रवद्यामना सुवृता रथेन- दस्रा विमं शृणुतं श्लोक.मद्रेः। किमङ्ग वां प्रत्यवर्ति.ङ्गमिष्ठा-हु विप्रासो अश्विना पुराजाः।।

卐 आ वां श्येनासो अश्विना वहन्तु- रथे युक्तास^ आशवः पतङ्गाः। ये अप्तुरो दिव्यासो न गृध्रा^- अभि प्रयो नासत्या वहन्ति।।

卐 आ वां रथँ युवति स्तिष्ठ.दत्र- जुष्ट्वी नरा दुहिता सूर्यस्य। परि वामश्वा^ वपुषः पतङ्गा^- वयो वह.न्त्वरुषा^ अभीके।।

❀01.08.19 卐उद्वन्दन.मैरत.न्दंसनाभि- रुद्रेभ.न्दस्रा वृषणा शचीभिः। निष्टौग्र्यं पारयथ.स्समुद्रा-त्पुन^ श्च्यवान.ञ्चक्रथु युवानम्।।

卐 युव मत्रयेऽवनीताय तप्त-मूर्ज.मोमान.मश्विना वधत्तम्। युव.ङ्कण्वा.यापिरिप्ताय चक्षुः- प्रत्यधत्तं सुष्टुति.ञ्जुजुषाणा।।

卐 युव.न्धेनुं शयवे नाधिता-यापिन्वत.मश्विना पूर्व्याय। अमुञ्चतँ वर्तिका.मंहसो निः- प्रति जङ्घाँ विश्पलाया^ अधत्तम्।।

卐 युवं श्वेतं पेदव इन्द्रजूत-महिहन.मश्विनाऽदत्त.मश्वम्। जोहूत्र.मर्यो अभिभूति.मुग्रं- सहस्रसाँ वृषणँ वीड्वङ्गम्।।

卐 ता वान्नरा स्ववसे सुजाता- हवामहे अश्विना नाधमानाः। आ न^ उप वसुमता रथेन- गिरो जुषाणा सुविताय यातम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 आ श्येनस्य जवसा नूतनेनास्मे यात.न्नासत्या सजोषाः। हवे हि वा.मश्विना रातहव्य^-श्शश्वत्तमाया^ उषसो व्युष्टौ।।

🏺 1.119 आ वां रथमिति दशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- अश्विनौ-जगती।।

❀01.08.20 卐आ वां रथं पुरुमायं मनोजुव-ञ्जीराश्वँ यज्ञिय.ञ्जीवसे हुवे। सहस्रकेतुं वनिनं शतद्वसुं-श्रुष्टीवानं वरिवोधा.मभि प्रयः।।

卐 ऊर्ध्वा धीतिः प्रत्यस्य प्रयाम-न्यधायि शस्म.न्त्समयन्त आ दिशः। स्वदामि घर्मं प्रति यन्त्यूतय^ -आ वा.मूर्जानी रथ.मश्विना.ऽरुहत्।।

卐 सं यन्मिथः पस्पृधानासो अग्मत- शुभे मखा^ अमिता^ जायवो रणे। युवो रह प्रवणे चेकिते रथो-यदश्विना वहथ.स्सूरि मावरम्।।

卐 युवं भुज्युं भुरमाणँ विभि र्गतं- स्वयुक्तिभि र्निवहन्ता पितृभ्य^ आ। यासिष्टँ वर्ति र्वृषणा विजेन्य1(अ)- न्दिवोदासाय महि चेति वामवः।।

卐 युवो रश्विना वपुषे युवायुजं- रथँ वाणी~ येमतु रस्य शर्ध्यम्। आ वां पतित्वं सख्याय जग्मुषी- योषा ऽवृणीत जेन्या युवां पती~।।

❀01.08.21 卐युवं रेभं परिषूते रुरुष्यथो- हिमेन घर्मं परितप्त.मत्रये। युवं शयो रवसं पिप्यथु र्गवि-प्र दीर्घेण वन्दन स्तार्यायुषा।।

卐 युवँ वन्दन.न्निर्ऋत.ञ्जरण्यया- रथ.न्न दस्रा करणा समिन्वथः। क्षेत्रादा विप्र.ञ्जनथो विपन्यया- प्र वामत्र विधते दंसना भुवत्।।

卐 अगच्छत.ङ्कृपमाणं परावति- पितु.स्स्वस्य त्यजसा निबाधितम्। स्वर्वती.रित^ ऊती र्युवो रह- चित्रा ^अभीके अभव.न्नभिष्टयः।।

卐 उत स्या वां मधुम.न्मक्षिका.ऽरप-न्मदे सोम.स्यौशिजो हुवन्यति। युव.न्दधीचो मन^ आ विवासथो-ऽथा शिरः प्रति वामश्व्यँ वदत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 यु॒वं पे॒दवे᳚ पुरु॒वार॑.मश्विना- स्पृ॒धां श्वे॒त.न्त॑रु॒तार॑.न्दुवस्यथः। शर्यै᳚ र॒भिद्युं॒ पृत॑नासु दु॒ष्टर॑-ञ्च॒र्कृत्य॒.मिन्द्र॑मिव चर्षणी॒सह᳚म्।।

☙ 1.120 का राधदिति द्वादशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- अश्विनौ-आद्या गायत्री- द्वितीया ककुप्-तृतीया काविराट्-चतुर्थी नष्टरूपी-पञ्चमी तनुशिरा-षष्ठ्युष्णिक्-सप्तमी विष्टारबृहती-अष्टमी कृतिः-नवमी विराट्-अन्त्यास्तिस्रो गायत्र्यः (अन्त्यादुःस्वप्ननाशिनी)।।

❀01.08.22 卐का रा᳚ध॒.द्धोत्रा᳚ऽश्विना वा॒-ङ्को वा॒ञ्जोषं॑ उ॒भयोः᳚। क॒था वि॑धा॒.त्यप्र॑चेताः।।

卐 वि॒द्वांसा॒ विद॒रः॑ पृच्छे॒-दवि॑द्वा॒.नि॒त्थाऽप॑रो अ॒चेताः। नू॒ चि॒न्नु मर्ते॒ अक्रौ᳚।।

卐 ता वि॒द्वांसा᳚ हवामहे वा॒-न्ता नो᳚ वि॒द्वांसा॒ मन्म॒ वोचेत.म॒द्य। प्रा॒ऽऽर्च॒.द्दय॑मानो यु॒वाकुः॑।।

卐 वि पृ॒च्छामि पा॒क्या3(आ) न दे॒वा-न्वषट्कृत.स्या॒द्भुत॒स्य॑ द॒स्रा। पा॒त.ञ्च॒ सह्य॑सो यु॒व.ञ्च॒ रभ्य॑सो नः।।

卐 प्र या घो॒षे भृग॑वाणे न शोभे॒- य॒या᳚ वा॒चा यज॑ति पज्रि॒यो वा᳚म्। प्रैष॒यु र्न वि॒द्वान्।।

❀01.08.23 卐श्रुत.ङ्गा᳚य॒त्र.न्तक॑वान॒-स्या॒ह.ञ्चि॒द्धि रि॒रे.भा᳚श्विना वा॒म्। आऽक्षी~ शु॑भस्पती~ द॒न्।।

卐 यु॒वं ह्या॒ऽस्तं᳚ म॒हो र॒-न्युवँ॒ वा य॒न्नि.र॒तत॑ंसतम्। ता नो᳚ वसू~ सुगो॒पास्या॒तं- पा॒त न्नो॒ वृका᳚.द॒घा॒योः।।

卐 मा कस्मै᳚ धात.म॒भ्य॑मि॒त्रिणे᳚ नो॒- मा॒ऽकुत्रा᳚ नो गृ॒हेभ्यो᳚ धे॒नवो᳚ गुः। स्त॒ना᳚भु॒जो॒ अशि॑श्वीः।।

卐 दु॒ही॒य.न्मि॒त्रधि॑तये यु॒वाकु॑- रा॒ये च॑ नो मिमी॒तँ॒ वाज॑वत्यै। इ॒षे च॑ नो मिमीत.न्धे॒नुम॑त्यै᳚।।

卐 अ॒श्विनो᳚ रसनं॒ रथ॑-मन॒श्वं॑ वा॒जिनी᳚वतोः। तेना॒हं भूरि॑ चाकन।।

卐 अ॒यं स॑मह मा त॒-नूह्याते॒ जना॒ँ अनु॑। सो॒म॒पेयं॑ सु॒खो रथः॑।।

卐 अध॒ स्वप्न॑स्य॒ निर्वि॑दे-ऽभु॒ञ्जत॑श्च रे॒वतः॑। उ॒भा ता बस्त्रि॑ नश्यतः।।

☙ 1.121 कदित्थेति पञ्चदशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्-इन्द्र-स्त्रिष्टुप् (विश्वेदेवा वा)।।-

❀01.08.24 卐कदि॒त्था नॄँः पात्र॑.न्देवय॒तां- श्रव॒.द्गिरो॒ अङ्गि॑रसा.न्तु॒रण्य॒न्। प्र य॒दान॒.ड्विश॒ आ ह॒र्म्य॑-स्यो॒रु क्रं॑सते अध्व॒रे य॒जत्रः।।

卐 स्तम्भी᳚द्ध॒ द्यां स ध॒रुणं᳚ प्रुषाय॒-दृभु॒ र्वाजा᳚य॒ द्रवि॑ण.न्नरो॒ गोः। अनु॑ स्व॒जां म॑हि॒षश्च॑क्षत॒ व्रां- मेना॒.मश्व॑स्य॒ परि॑ मा॒तर॒.ङ्गोः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 नक्ष.द्धवं.मरुणीꣳ पूर्व्यं रा-ड्डुरो विशा.मङ्गिरसा.मनु द्यून्। तक्ष.द्वज्र.न्नियुत.न्तस्तम्भ द्या-ञ्चतुष्पदे नर्याय द्विपादे।।

卐 अस्य मदे स्वर्यन्दा^ ऋता-यापीवृत.मुस्त्रियाणा.मनीकम्। यद्ध प्रसर्गे त्रिककु.न्निवर्त-दप द्रुहो मानुषस्य दुरो वः~।।

卐 तुभ्यं पयो यत्पितरा वनीतां- राध.स्सुरेत स्तुरणे भुरण्यू~। शुचि यत्ते रेक्ण^ आऽयजन्त-सबर्दुघायाꣳ पय^ उस्त्रियायाः।।

❀01.08.25 卐अध प्र जज्ञे तरणि र्ममत्तु- प्र रोच्यस्या^ उषसो न सूरः। इन्दु र्येभि राष्ट स्वेदुहव्यै-स्स्रुवेण सिञ्च.ञ्जरणाऽभि धाम।।

卐 स्विध्मा यद्वनधिति रपस्या-त्सूरो अध्वरे परि रोधना गोः। यद्ध प्रभासि कृत्व्याꣳ अनु द्यू-नर्विशे पश्विशे तुराय।।

卐 अष्टा महो दिव^ आदो हरी~ इह- द्युम्नासाह मभि योधान^ उत्सम्। हरिं यत्ते मन्दिन.न्दुक्ष.न्वृधे-गोरभस.मद्रिभि र्वाताप्यम्।।

卐 त्वमायसं प्रति वर्तयो गो- र्दिवो अश्मान.मुपनीत.मृभ्वा। कुत्साय यत्र पुरुहूत वन्व-ञ्छुष्ण.मनन्तैꣳ परियासि वधैः।।

卐 पुरा यत्सूर स्तमसो अपीते- स्तमद्रिवꣳ फलिगं हेति.मस्य। शुष्णस्य चित्परिहितं यदोजो-दिव.स्परि सुग्रथित.न्तदादः~।।

❀01.08.26 卐अनु त्वा मही~ पाजसी~ अचक्रे~- द्यावाक्षामा मदता.मिन्द्र कर्मन्न्। त्वं वृत्र.माशयानं सिरासु- महो वज्रेण सिꣳष्वपो वराहुम्।।

卐 त्वमिन्द्र नर्यो याꣳ अवो नृ-न्तिष्ठा वातस्य सुयुजो वहिष्ठान्। यन्ते काव्य^ उशना मन्दिन.न्दा-द्वृत्रहणं पार्य.न्ततक्ष वज्रम्।।

卐 त्वं सूरो हरितो रामयो नृ-न्भर च्चक्र.मेतशो नाय.मिन्द्र। प्रास्य पार.न्नवति न्नाव्याना-मपि कर्त .मवर्तयोऽयज्यून्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

卐 त्वन्नो अस्या॑ इन्द्र दुर्हणाया॑ - पाहि व॑ज्रिवो दुरिता.दभीके। प्र नो वाजा.न्रथ्यो3(ओ) अश्वबुध्या-
निषे यन्धि श्रवसे सूनृतायै।।
卐 मा सा ते अस्म.त्सुमति र्वि द॑स-द्वाजप्रमह.स्समिषो वरन्त। आ नो भज मघव.न्गोष्वर्यो-
मंहिष्ठा.स्ते सधमाद.स्स्याम।।

इति अष्टमाध्याय स्समाप्तः।। इति प्रथमाष्टकं समाप्तम्।।

## ॐ द्वितीयाष्टकम्

### द्वितीयाष्टके प्रथमाध्यायः। वर्गाः(1-26)

1.122 प्र वः पान्तमिति पञ्चदशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्-विश्वे देवा- स्त्रिष्टुप्-पञ्चमी षष्ठयौ विराड्रूपे-(भेदप्रयोगपक्षे तु आद्यानां षण्णां क्रमेण रुद्र मरुत उषासानक्ता विश्वेदेवा अश्विनौ विश्वेदेवा मित्रावरुण सिन्धवो देवताः-ततो द्वयोर्विश्वेदेवाः-ततो द्वयोर्मित्रावरुणौ- अन्त्य पञ्चानां विश्वेदेवाः।।

❀02.01.01 卐प्र वः पान्तं रघुमन्यवोऽन्धो - यज्ञं रुद्राय मीळ्हुषे भरध्वम्। दिवो अस्तो.ष्यसुरस्य
वीरै- रिषुध्येव मरुतो रोदस्योः।।
卐 पत्नीव पूर्वहूतिं वावृधध्या- उषासानक्ता पुरुधा विदाने~। स्तरी र्नात्कं व्युतं वसाना- सूर्यस्य श्रिया
सुदृशी हिरण्यैः।।
卐 ममत्तु नः परिज्मा वसर्हा- ममत्तु वातो अपां वृष.ण्वान्। शिशीत.मिन्द्रापर्वता युव.न्न-स्तन्नो विश्वे
वरिवस्यन्तु देवाः।।
卐 उत त्या मे यशसा श्वेतनायै- व्यन्ता पान्तौ.शिजो हुवध्यै। प्र वो नपात.मपा.ङ्कृणुध्वं- प्र मातरा
रास्पिनस्या.ऽयोः।।
卐 आ वो रुवण्यु.मौशिजो हुवध्यै- घोषेव शंस.मर्जुनस्य नंशे। प्र वः पूष्णे दावन आ॑- अच्छा वोचेय
वसुताति.मग्नेः।।

❀ 02.01.02 卐श्रु॒तं मे᳚ मित्रावरुणा॒ हवे॒-मोत श्रु॒तं सद॑ने वि॒श्वत॑ स्सीम्। श्रोतु॑ न॒ श्श्रोतु॑राति स्सु॒श्रोतु॑-स्सु॒क्षेत्रा॒ सिन्धु॑ र॒द्भिः।।

卐 स्तुषे सा वाँ᳚ वरुण मित्र रा॒ति- र्गवां᳚ श॒ता पृ॒क्षया᳚मेषु प॒ज्रे। श्रु॒तर॑थे प्रि॒यर॑थे॒ दधा᳚ना-स्स॒द्यः पु॒ष्टि. न्नि॒रुन्धा॒नासो᳚ अग्मन्न्।।

卐 अ॒स्य स्तु॑षे॒ महि॑मघस्य॒ राध॒-स्सचा᳚ सनेम॒ नहु॑ष स्सु॒वीराः। जनो॒ यः प॒ज्रेभ्यो᳚ वा॒जिनी᳚वा॒-नश्वा᳚वतो र॒थिनो॒ मह्यं᳚ सू॒रिः।।

卐 जनो॒ यो मि॑त्रावरुणा वभि॒ध्रु-र॒पो न वां᳚ सु॒नोत्य॑क्ष्णया॒ध्रुक्। स्व॒यं स यक्ष्म॒ं हृद॑ये॒ नि ध॑त्त-आप॒ यदीं॒ होत्रा᳚भिर् ऋ॒तावा᳚।।

卐 स व्राध॑तो॒ नहु॑षो॒ दंसु॑जूत॒-श्शर्ध॑स्तरो न॒रा.ङ्गूर्त॑श्रवाः। वि॑सृष्टराति र्याति बाळ्ह॒सृत्वा॒- विश्वा᳚सु पृ॒त्सु सद॒मि च्छूरः।।

❀02.01.03 अध॒ ग्मन्ता᳚ नहु॑षो॒ हवं᳚ सू॒रेः- श्श्रोता᳚ राजानो अ॒मृत॑स्य मन्द्राः। न॒भो॒जुवो॒ यन्नि॑र॒वस्य॒ राध॒ः- प्रश॑स्तये महि॒ना रथ॑वते।।

卐 ए॒तं शर्ध॒.न्धाम॒ यस्य॑ सू॒रेः- रित्य॑वोच॒.न्दश॑तयस्य॒ नंशे᳚। द्यु॒म्नानि॒ येषु॑ व॒सुता᳚ती॒ रा॒र-न्विश्वे᳚ सन्वन्तु प्रभृ॒थेषु॒ वाज᳚म्।।

卐 मन्दा᳚महे॒ दश॑तयस्य धा॒सेः- र्द्वियत्पञ्च बिभ्र॑तो॒ यन्त्यन्ना᳚। किमि॒ष्टाश्व॒ इ॒ष्टर॑श्मि रे॒त- ई॑शा॒नास॒ स्तरु॑ष ऋञ्जते॒ नॄन्।।

卐 हिर॑ण्यकर्णं मणिग्रीव॒ मर्ण॒- स्तन्नो॒ विश्वे᳚ वरिवस्यन्तु दे॒वाः। अ॒र्यो गिर॑ स्स॒द्य आ ज॒ग्मुषी॒- रोस्रा᳚श्चाकन्तू॒भये᳚ष्व॒स्मे।।

卐 च॒त्वारो᳚ मा मश॒र्शार॑स्य॒ शिश्व॒-स्त्रयो॒ राज्ञ आय॑वसस्य जि॒ष्णोः। रथो᳚ वां मित्रावरुणा दी॒र्घाप्सा॒-स्स्यूम॑गभस्ति स्सू॒रो नाद्यौ᳚त्।।

1.123 पृथू रथ इति त्रयोदशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- उषा-स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀02.01.04 卐पृथू रथो दक्षिणाया अयोज्यैन.न्देवासो अमृतासो अस्थुः। कृष्णा.दुदस्था दर्या3(आ)विहाया - श्चिकित्सन्ती मानुषाय क्षयाय।।

卐 पूर्वा विश्वस्मा.द्भुवना दबोधि- जयन्ती वाजं बृहती सनुत्री। उच्चा व्यख्य.द्युवतिः पुनर्भू-रोषा अग.न्प्रथमा पूर्वहूतौ।।

卐 यदद्य भागँ विभजासि नृभ्य- उषो देवि मर्त्यत्रा सुजाते। देवो नो अत्र सविता दमूना- अनागसो वोचति सूर्याय।।

卐 गृहङ्गृह महना यात्यच्छा- दिवेदिवे अधि नामा दधाना। सिषासन्ती द्योतना शश्व.दागा- दग्रमग्र.मिद्भजते वसूनाम्।।

卐 भगस्य स्वसा वरुणस्य जामि- रुष स्सूनृते प्रथमा जरस्व। पश्चा स दघ्या यो अघस्य धाता- जयेम तन्दक्षिणया रथेन।।

❀02.01.05 卐उदीरतां सूनृता उत्पुरन्धी-रुदग्नय श्शुशुचानासो अस्थुः। स्पार्हा वसूनि तमसा.ऽपगूळ्हा-ऽऽविष्कृण्व.न्त्युषसो विभातीः।।

卐 अपान्य देत्यभ्य1(अ)न्य देति- विषुरूपे अहनी सञ्चरेते। परिक्षितो स्तमो अन्या गुहाऽक-रद्यौ दुषा श्शोशुचता रथेन।।

卐 सदृशी रद्य सदृशी रिदु श्वो- दीर्घं सचन्ते वरुणस्य धाम। अनवद्या स्त्रिंशतँ योजना-न्येकैका क्रतुं परि यन्ति सद्यः।।

卐 जानत्यह्नः प्रथमस्य नाम- शुक्रा कृष्णा दजनिष्ट श्वितीची। ऋतस्य योषा न मिनाति धामा-हरह र्निष्कृत माचरन्ती।।

卐 कन्येव तन्वा3(आ) शाशदानाँ- एषि देवि देव मियक्षमाणम्। संस्मयमाना युवतिः पुरस्ता- दाविर्वक्षांसि कृणुषे विभाती।।

❀02.01.06 सुसङ्काशा मातृमृष्टेव योषा-ऽऽवि स्तन्वङ्कृणुषे दृशे कम्। भद्रा त्वमुषो वितरँ व्युच्छ- न तत्ते अन्या उषसो नशन्त।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अश्वावती गोमती विश्ववारा^- यतमाना^ रश्मिभि स्सूर्यस्य। परा च यन्ति पुनरा चे यन्ति- भद्रा नाम वहमाना^ उषासः।।

卐 ऋतस्य रश्मि मनुयच्छमाना- भद्रंभद्र ङ्क्रतु मस्मासु धेहि। उषो नो अद्य सुहवा व्युच्छा-स्मासु रायो मघवत्सु च स्युः~।। 06

1.124 उषा उच्छन्तीति त्रयोदशर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- उषा-स्त्रिष्टुप्।।

❀卐 07 उषा^ उच्छन्ती समिधाने अग्ना- उद्यन्त्सूर्य^ उर्विया ज्योति रश्रेत्। देवो नो अत्र सविता.न्वर्थं- प्रासावीद् द्विपत् प्र चतुष्पदित्यै।।

卐 अमिनती दैव्यानि व्रतानि- प्रमिनती मनुष्या युगानि। ईयुषीणा मुपमा शश्वतीना-मायतीनां प्रथमोषा व्यद्यौत्।।

卐 एषा दिवो दुहिता प्रत्यदर्शि- ज्योतिर्वसाना समना पुरस्तात्। ऋतस्य पन्था मन्वेति साधु- प्रजानतीव न दिशो मिनाति।।

卐 उपो~ अदर्शि शुन्ध्युवो न वक्षो- नोधाईवाऽविरकृत प्रियाणि। अद्मसन्न ससतो बोधयन्ती- शश्वत्तमाऽगात्पुन रेयुषीणाम्।।

卐 पूर्वे अर्धे रजसो अप्त्यस्य- गवा.ञ्जनि.त्र्यकृत प्र केतुम्। व्यु प्रथते वितरँ वरीय- ओभा पृणन्ती पित्रो रुपस्था।।

❀02.01.08 एवे देषा पुरुतमा दृशे क-न्नाजामिन्न परि वृणक्ति जामिम्। अरेपसा तन्वा3(आ) शाशदाना- नार्भा दीषते न महो विभाती।।

卐 अभ्रातेव पुंस एति प्रतीची- गर्तारुगिव सनये धनानाम्। जायेव पत्य उशती सुवासा- उषा हस्रेव नि रिणीते अप्सः।।

卐 स्वसा स्वस्रे ज्यायस्यै योनि मारै-गपैत्यस्याः प्रतिचक्ष्येव। व्युच्छन्ती रश्मिभि स्सूर्यस्या-ञ्ज्यङ्क्ते समनगाईव व्राः।।

卐 आसां पूर्वासा महसु स्वसृणा-मपरा पूर्वा मभ्येति पश्चात्। ताः प्रत्नव.न्नव्यसी नून मस्मे- रेव दुच्छन्तु सुदिना उषासः।।

卐 प्र बोधयोषः पृणतो मघो-न्यबुध्यमानाः पणय स्ससन्तु। रेवदुच्छ मघवद्भ्यो मघोनि- रेव त्स्तोत्रे सूनृते जारयन्ती।।

❀02.01.09 卐अवेयमश्वै द्युवतिः पुरस्ता-द्युङ्क्ते गवा मरुणाना मनीकम्। वि नून मुच्छा.दसति प्र केतु- र्गृहङ्गृह मुप तिष्ठाते अग्निः।।

卐 उत्ते वयश्चि.द्वसते रपप्त-न्नरश्च ये पितुभाजो व्युष्टौ। अमा सते वहसि भुरि वाम-मुषो देवि दाशुषे मर्त्याय।।

卐 अस्तोढ्वं स्तोम्या ब्रह्मणा मे- ऽवीवृधध्व मुशती रुषासः। युष्माक.न्देवी रवसा सनेम सहस्रिण.ञ्च शतिनञ्च वाजम्।।

1.125 प्राता रत्नमिति सप्तर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- स्वनयस्य दानस्तुति-स्त्रिष्टुप्-चतुर्थी पञ्चम्यौ जगत्यौ- (स्वनयनाम्नोराज्ञौ दानस्तुतिरतः स्वनयो देवता)।।

❀ 02.01.10 卐प्राता~ रत्नं प्रातरित्वा दधाति- तञ्चिकित्वा.न्प्रतिगृह्या नि धत्ते। तेन प्रजाँ वर्धयमान^ आयू- रायस्पोषेण सचते सुवीरः।।

卐 सुगु रस.त्सुहिरण्य स्स्वश्वो- बृहदस्मै वय^ इन्द्रो दधाति। यस्त्वाऽऽयन्तँ वसुना प्रातरित्वो- मुक्षीजयेव पदि मुत्सिनाति।।

卐 आय.मद्य सुकृतं प्रात रिच्छ-न्निष्टेः पुत्रँ वसुमता रथेन। अंशो स्सुतं पायय मत्सरस्य- क्षयद्वीरँ वर्धय सूनृताभिः।।

卐 उप क्षरन्ति सिन्धवो मयोभुव^- ईजानञ्च यक्ष्यमाणञ्च धेनवः। पृणन्तञ्च पपुरिञ्च श्रवस्यवो- घृतस्य धारा उप यन्ति विश्वतः।।

卐 नाकस्य पृष्ठे अधि तिष्ठति श्रितो- यः पृणाति स ह देवेषु गच्छति। तस्मा आपो घृत.मर्षन्ति सिन्धव- स्तस्मा इयन्दक्षिणा पिन्वते सदा।।

卐 दक्षिणावता मिदिमानि चित्रा- दक्षिणावता न्दिवि सूर्यासः। दक्षिणावन्तो अमृतं भजन्ते- दक्षिणावन्त꣫ प्र तिरन्त आयुः।।

卐 मा पृणन्तो दुरित मेन आऽर-न्मा जारिषु स्सूरय स्सुव्रतासः। अन्य स्तेषां परिधि रस्तु कश्चि-दपृणन्त मभि सँ यन्तु शोकाः।।

1.126 अमन्दानिति सप्तर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवानृषिः-आगधितेत्यस्य भावयव्य ऋषिः-रोमशा देवता-उपोप म इत्यस्य रोमशा ऋषिका-स्वनयो देवता- त्रिष्टुप्-अन्त्ये द्वे अनुष्टुभौ-(स्वनय एव भावयव्यशब्देनोच्यते रोमशाखनयभार्या अन्त्ये द्वे ऋचौ तयोः परस्परं संवादः आद्याभिः पञ्चभिर्दानतुष्टः कक्षीवान् -भावयव्यमस्तौत् ततश्च स एव देवता।।

❀ 02.01.11 अमन्दा.न्स्तोमान्प्र भरे मनीषा- सिन्धा वधि क्षियतो भाव्यस्य। यो मे सहस्रममिमीत सवा-नतूर्तो राजा श्रव इच्छमानः।।

卐 शतं राज्ञो नाधमानस्य निष्का-ञ्छत मश्वा.न्प्रयता.न्त्सद्य आदम्। शत.ङ्कक्षीवा꣬ असुरस्य गोना-न्दिवि श्रवोऽजर मा ततान।।

卐 उप मा श्यावा स्स्वनयेन दत्ताꣳ- वधूमन्तो दश रथासो अस्थुः। षष्टि.स्सहस्र मनु गव्य माऽगात्-सन.त्कक्षीवा꣬ अभिपित्वे अह्नाम्।।

卐 चत्वारिंश द्दशरथस्य शोणा- स्सहस्रस्याग्रे श्रेणि.न्नयन्ति। मदच्युत꣫ कृशनावतो अत्या-न्कक्षीवन्त उदमृक्षन्त पज्राः।।

卐 पूर्वा.मनु प्रयतिमा ददे वꣳस्त्री न्युक्ता꣬ अष्टा वरिधायसो गाः। सुबन्धवो ये विश्याइव व्राꣳ- अनस्वन्त श्श्रव ऐषन्त पज्राः।।

卐 आगधिता परिगधिता- या कशीकेव जङ्गहे। ददाति मह्यं यादुरी- याशूनां भोज्या शता।।

卐 उपोप मे परा मृश- मा मे दभ्राणि मन्यथाः। सर्वाऽह मस्मि रोमशा- गन्धारीणामिवा.विका।।

1.127 अग्निं होतारमित्येकादशर्चस्य सूक्तस्य, दैवोदासिः परुच्छेपोऽग्नि-रत्यष्टिः- षष्ठ्यतिधृतिः।।

❀02.01.12 卐अग्निं होतारं मन्ये दास्वन्तँ- वसुं सूनुं सहसो जातवेदसँ- विप्रन्न जातवेदसम्। य^ ऊर्ध्वया स्वध्वरो- देवो देवाच्या कृपा। घृतस्य विभ्राष्टि मनु वष्टि शोचिषा- ऽऽजुह्वानस्य सर्पिषः।।

卐 यजिष्ठन्त्वा यजमाना^ हुवेम- ज्येष्ठ.मङ्गिरसाँ विप्र मन्मभि- र्विप्रेभि श्शुक्र मन्मभिः। परिज्मानमिव द्यां- होता.रञ्चर्षणीनाम्। शोचिष्केशँ वृषणँ यमिमा विश४- प्रावन्तु जूतये विशः।।

卐 स हि पुरू चिदोजसा विरुक्मता- दीद्यानो भवति द्रुहन्तर४- परशुर्न द्रुहन्तरः। वीळु चिद्यस्य समृतौ- श्रुव.द्वनेव यत्स्थिरम्। निष्षहमाणो यमते नायते- धन्वासहा नायते।।

卐 दृ८ळ्हा चिदस्मा अनु दुर्यथा विदे- तेजिष्ठाभि ररणिभि र्दाष्ट्यवसे-ऽग्नये दाष्ट्यवसे। प्र य४ पुरूणि गाहते- तक्ष.द्वनेव शोचिषा। स्थिरा चिदन्ना नि रिणा.त्योजसा- नि स्थिराणि चिदोजसा।।

卐 तमस्य पृक्ष मुपरासु धीमहि- नक्तँ.यस्सुदर्शतरो दिवातरा- दप्रायुषे.दिवातरात्। आदस्यायु.ग्रभणव- द्वीळु शर्म न सूनवे। भक्त.मभक्त मवो व्यन्तो अजरा- अग्नयो व्यन्तो अजराः।।

❀02.01.13 卐स हि शर्धो न मारुत.न्तुविष्वणि- रप्नस्वती-षूर्वरा.स्विष्टनि- रार्तना.स्विष्टनिः। आद.द्धव्या.न्याददि- र्यज्ञस्य केतुरर्हणा। अध स्मास्य हर्षतो हृषीवतो- विश्वे जुषन्त पन्था-न्नर.श्शुभे न पन्थाम्।।

卐 द्विता यदी.ङ्कीस्तासो अभिद्यवो- नमस्यन्त उपवोचन्त भृगवो- मथ्नन्तो दाशा भृगवः। अग्नि.रीशे वसूनां- शुचि.र्यो धर्णि रेषाम्। प्रिया२ अपिधी२ र्वनिषीष्ट मेधिर- आ वनिषीष्ट मेधिरः।।

卐 विश्वासा.न्त्वा विशां पतिं हवामहे- सर्वासां समान.न्दम्पतिं भुजे- सत्यगिर्वाहसं भुजे। अतिथिं मानुषाणां- पितुर्न यस्याऽऽसया। अमी च विश्वे अमृतास आ वयो- हव्या देवेष्वा वयः।।

卐 त्वमग्ने सहसा सहन्तम- श्शुष्मिन्तमो जायसे देवतातये- रयिर्न देवतातये। शुष्मिन्तमो हि ते मदो- द्युम्निन्तम उत क्रतुः। अध स्मा ते परि चर-न्त्यजर श्रुष्टीवानो नाजर।।

卐 प्र वो महे सहसा सहस्वत- उषर्बुधे पशुषे नाग्नये- स्तोमो बभूत्वग्नये। प्रति यदीं हविष्मा-न्विश्वासु क्षासु जोगुवे। अग्रे रेभो न जरत ऋषूणा-ञ्जूर्णिर्होत ऋषूणाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स नो नेदिष्ठ.न्दद्दशान^ आ भरा-ग्ने देवेभि स्सचना स्सुचेतुना- महो राय स्सुचेतुना। महि शविष्ठ नस्कृधि- सञ्चक्षे भुजे अस्यै। महि स्तोतृभ्यो मघव.न्त्सुवीर्यं- मथी रुग्रो न शवसा।।

☸ 1.128 अयञ्जायतेत्यष्टर्चस्य सूक्तस्य, दैवोदासिः परुच्छेपोऽग्नि-रत्यष्टिः

❀02.01.14 अय.ञ्जायत मनुषो धरीमणि- होता यजिष्ठ^ उशिजा मनु व्रत- मग्नि.स्स्वमनु व्रतम्। विश्वश्रुष्टि स्सखीयते- रयिरिव श्रवस्यते। अदब्धो होता नि षद.दिळस्पदे- परिवीत इळस्पदे।।

卐 तँ यज्ञसाध मपि वातयाम-स्यृतस्य पथा नमसा हविष्मता- देवताता हविष्मता। स न^ ऊर्जा-मुपाऽभृ-त्यया कृपा न जूर्यति। यं मातरिश्वा मनवे परावतो- देवं भा꣡꣡~ परावतः।।

卐 एवेन सद्यः꣡ पर्येति पार्थिवं- मुहुर्गी रेतो वृषभः꣡ कनिक्रद-द्दधद्रेतः꣡ कनिक्रदत्। शत.ञ्चक्षाणो अक्षभि-र्देवो वनेषु तुर्वणिः। सदो दधान^ उपरेषु सानु-ष्वग्निः꣡ परेषु सानुषु।।

卐 स सुक्रतुः꣡ पुरोहितो दमेदमे-ऽग्नि र्यज्ञस्या.ध्वरस्य चेतति- क्रत्वा यज्ञस्य चेतति। क्रत्वा वेधा^ इषूयते- विश्वा जातानि पस्पशे। यतो घृतश्री रतिथि रजायत- वह्नि.र्वेधा^ अजायत।।

卐 क्रत्वा यदस्य तविषीषु पृञ्चते-ऽग्ने रवेण मरुतान्न भोज्ये-षिराय न भोज्या। स हि ष्मादान.मिन्वति-वसूनाञ्च मज्मना। स नस्त्रासते दुरिता.दभिह्रुत- श्शंसा.दघा दभिह्रुतः।।

❀02.01.15 卐विश्वो विहाया अरति र्वसु.र्दधे- हस्ते दक्षिणे तरणिर्न शिश्रथ-च्छ्रवस्यया न शिश्रथत्। विश्वस्मा इदिषुध्यते- देवत्रा हव्य मोहिषे। विश्वस्मा इत्सुकृते वार.मृण्व-त्यग्नि.द्वारा व्यृण्वति।।

卐 स मानुषे वृजने शन्तमो हितो3(ओ)-ऽग्नि र्यज्ञेषु जेन्यो न विश्पतिः꣡- प्रियो यज्ञेषु विश्पतिः। स हव्या मानुषाणा-मिळा कृतानि पत्यते। स न स्त्रासते वरुणस्य धूर्ते- र्महो देवस्य धूर्तेः।।

卐 अग्निं होतार मीळते वसुधितिं- प्रियञ्चेतिष्ठ मरति.न्न्येरिरे- हव्यवाह न्न्येरिरे। विश्वाऽयुँ विश्ववेदसं होतारँ यजत.ङ्कविम्। देवासो रण्व.मवसे वसूयवो- गीर्भी रण्वँ वसूयवः।।

☸ 1.129

❀02.01.16 卐यन्त्वं रथ मिन्द्र मेधसातये-ऽपाका सन्त मिषिर प्रणयसि -प्रानवद्य नयसि।- सद्यश्चित्त मभिष्टये- करो वशश्च वाजिनम्। साऽस्माकं मनवद्य तूतुजान वेधसा-मिमाँ वाचन्न वेधसाम्।।

卐 स श्रुधि यस्स्मा पृतनासु कासु चि-द्दक्षाय्य इन्द्र भरहूतये नृभि- रसि प्रतूर्तये नृभिः। यश्शूरै स्स्व1(अ) स्सनिता- यो विप्रै र्वाजन्तरुता। तमीशानास इरधन्त वाजिनं पृक्ष मत्यन्न वाजिनम्।।

卐 दस्मो हि ष्मा वृषणं पिन्वसि त्वच-ङ्कञ्चिद्यावी ररुं शूर मर्त्यं- परिवृणक्षि मर्त्यम्। इन्द्रोत तुभ्य न्तद्दिवे- तद्रुद्राय स्वयशसे। मित्राय वोचँ वरुणाय सप्रथ स्सुमृळीकाय सप्रथः।।

卐 अस्माकँ व इन्द्र.मुश्मसी.ष्टये- सखायँ विश्वाऽऽयुं प्रासहँ युजँ- वाजेषु प्रासहँ युजम्। अस्माकं ब्रह्मो.तये-ऽवा पृत्सुषु कासु चित्। नहि त्वा शत्रुस्स्तरते स्तृणोषि यँ- विश्वं शत्रुं स्तृणोषि यम्।।

卐 नि षू नमा.तिमति.ङ्कयस्य चि-त्तेजिष्ठाभि ररणिभि र्नोतिभि-रुग्राभि रुग्रोतिभिः। नेषि णो यथा पुरा-ऽनेना श्शूर मन्यसे। विश्वानि पूरो रप पर्षि वह्नि- रासा वह्नि र्नो अच्छ।।

❀02.01.17 卐प्र1 तद्वो.चेयं भव्या.येन्दवे- हव्यो न य इषवा.न्मन्म रेजति- रक्षोहा मन्म रेजति। स्वयं सो अस्मदा निदो- वधै रजेत दुर्मतिम्। अव स्रवे.दघशंसो.ऽवतर-मव क्षुद्र.मिव स्रवेत्।।

卐 वनेम तद्धोत्रया चितन्त्या- वनेम रयिं रयिव स्सुवीर्यं- रण्वं सन्तं सुवीर्यम्। दुर्मन्मानं सुमन्तुभि- रेमिषा पृचीमहि। आ सत्याभि रिन्द्र.न्द्युम्नहूतिभि- र्यजत्र.न्द्युम्नहूतिभिः।।

卐 प्रप्रा वो अस्मे स्वयशोभि रूती- परिवर्ग इन्द्रो दुर्मतीना-न्दरीम.न्दुर्मतीनाम्। स्वयं सा रिषयध्यै- या न उपेषे अत्रैः। हते.मसन्न वक्षति- क्षिप्ता जूर्णिर्न वक्षति।।

卐 त्वन्न इन्द्र राया परीणसा- याहि पथा९ अनेहसा- पुरो या.ह्यरक्षसा। सचस्व नः पराक आ- सचस्वा.स्तमीक आ। पाहि नो दूरा.दारा.दभिष्टिभि- स्सदा पाह्यभिष्टिभिः।।

卐 त्वन्न इन्द्र राया तरूषसो-ग्रञ्चित्त्वा महिमा सक्ष.दवसे- महे मित्र.न्नावसे। ओजिष्ठ त्रात रविता~- रथ.ङ्कञ्चि.दमर्त्य। अन्य.मस्म.द्रिरिषेः कञ्चि.दद्रिवो- रिरिक्षन्त.ञ्चिदद्रिवः।।

卐 पाहि नं इन्द्र सुष्टुत स्रिधो-ऽवयाता सद.मिद्दुर्मतीना-न्देव.स्सन्दुर्मतीनाम्। हन्ता पापस्य रक्षस-स्त्राता विप्रस्य मावतः। अधा हि त्वा जनिता जीजनद्वसो~- रक्षोहणन्त्वा जीजनद्वसो~।।

1.130 एन्द्र याहीति दशर्चस्य सूक्तस्य, दैवोदासिः परुच्छेप- इन्द्रोऽत्यष्टि-रन्त्या त्रिष्टुप्-(अष्टिरित्येव प्रयोगः साधुः)।।

❀02.01.18 卐एन्द्र याह्युप नः परावतो- नाय मच्छा विदथानीव सत्पति- रस्तं राजेव सत्पतिः। हवामहे त्वा वयं- प्रयस्वन्त स्सुते सचा। पुत्रासो न पितरँ वाजसातये- मंहिष्ठँ वाजसातये।।

卐 पिबा सोम मिन्द्र सुवान मद्रिभिः- कोशेन सिक्त मवतन्न वंसग- स्तातृषाणो न वंसगः। मदाय हर्यताय ते- तुविष्टमाय धायसे। आ त्वा यच्छन्तु हरितो न सूर्य-महा विश्वेव सूर्यम्।।

卐 अविन्द.द्दिवो निहित.ङ्गुहा निधिँ- वेर्न गर्भं परिवीत मश्म-न्यनन्ते अन्त रश्मनि। व्रजँ वज्री गवा.मिव- सिषास.न्नङ्गिरस्तमः। अपावृणो दिष इन्द्रः परीवृता- द्वार इषः परीवृताः।।

卐 दादृहाणो वज्र.मिन्द्रो गभस्त्योः- ≈क्षद्मेव तिग्म मसनाय सं श्यं-दहिहत्याय सं श्यत्। सँविव्यान ओजसा- शवोभि रिन्द्र मज्मना। तष्टेव वृक्षँ वनिनो नि वृश्चसि- परश्वेव नि वृश्चसि।।

卐 त्वँ वृथा नद्य इन्द्र सर्तवे-ऽच्छा समुद्र मसृजो रथा इव- वाजयतो रथा इव। इत ऊती रयुञ्जत-समान मर्थ मक्षितम्। धेनूरिव मनवे विश्वदोहसो- जनाय विश्वदोहसः।।

❀02.01.19 इमान्ते वाचँ वसूयन्त आयवो- रथन्न धीर.स्स्वपा अतक्षिषु- स्सुम्नाय त्वामतक्षिषुः। शुम्भन्तो जेन्यँ यथा- वाजेषु विप्र वाजिनम्। अत्यमिव शवसे सातये धना- विश्वा धनानि सातये।।

卐 भिनत्पुरो नवति मिन्द्र पूरवे- दिवोदासाय महि दाशुषे नृतो~- वज्रेण दाशुषे नृतो~। अतिथिग्वाय शम्बर.ङ्गिरे रुग्रो अवाभरत्। महो धनानि दयमान ओजसा- विश्वा धनान्योजसा।।

卐 इन्द्र स्समत्सु यजमान मार्यं- प्राऽऽवद्विश्वेषु शतमूति राजिषु- स्वर्मीळ्हेष्वाजिषु। मनवे शासदव्रता.न्त्वचङ्कृष्णा मरन्धयत्। दक्षन्न विश्व न्ततृषाण मोषति- न्यर्शसान मोषति।।

卐 सूर.श्चक्रं प्र वृह.ज्जात ओजसा- प्रपित्वे वाच मरुणो मुषाय-तीशान आ मुषायति। उशना यत्परावतो-ऽजग न्नूतये कवे। सुम्नानि विश्वा मनुषेव तुर्वणि- रहा विश्वेव तुर्वणिः।।

Sri Sachchidananda Avadhoota Datta Peetham

卐 स नो नव्येभि वृषकर्मन्नुक्थैः- पुरान्दर्तः~ पायुभिः पाहि शग्मैः। दिवोदासेभि रिन्द्र स्तवानो- वावृधीथा अहोभिरिव द्यौः।।

1.131 इन्द्राय हीति सप्तर्चस्य सूक्तस्य, दैवोदासिः परुच्छेप- इन्द्रोऽत्यष्टिः।।

❀02.01.20 卐इन्द्राय हि द्यौरसुरो अनम्न-तेन्द्राय मही पृथिवी वरीमभि- र्द्युम्नसाता वरीमभिः। इन्द्रँ विश्वे सजोषसो- देवासो दधिरे पुरः। इन्द्राय विश्वा सवनानि मानुषा- रातानि सन्तु मानुषा।।

卐 विश्वेषु हि त्वा सवनेषु तुञ्जते- समान.मेकँ वृषमण्यवः पृथ-क्स्व~ स्स1निष्यवः पृथक्। तन्त्वा नावन्न पर्षणिं- शूषस्य धुरि धीमहि। इन्द्रन्न यज्ञै श्चितयन्त^ आयव- स्स्तोमेभि रिन्द्र1.मायवः।।

卐 वि त्वा ततस्रे मिथुना^ अवस्यवो- व्रजस्य साता गव्यस्य निस्सृज- स्सक्षन्त इन्द्र निस्सृजः। यद्गव्यन्ता द्वा जना- स्व1(अ)र्यन्ता समूहसि। आवि.ष्करिक्र.द्वृषणं सचाभुवँ- वज्र.मिन्द्र सचाभुवम्।।

卐 विदुष्टे अस्य वीर्यस्य पूरवः- पुरो यदिन्द्र शारदी रवातिर- स्सासहानो अवातिरः। शास स्तमिन्द्र मर्त्य-मयज्युं शवसस्पते। मही.ममुष्णाः पृथिवी.मिमा^ अपो- मन्दसान इमा^ अपः।।

卐 आदित्ते अस्य वीर्यस्य चर्किर-न्मदेषु वृष न्नुशिजो यदाविथ- सखीयतो यदाविथ। चकर्थ कारमेभ्यः- पृतनासु प्रवन्तवे। ते अन्यामन्या.न्नद्यं सनिष्णत- श्रवस्यन्त स्सनिष्णत।।

卐 उतो~ नो अस्या^ उषसो जुषेत-ह्य1(अ)र्कस्य बोधि हविषो हवीमभि- स्स्वर्षाता हवीमभिः। यदिन्द्र हन्तवे मृधो- वृषा वज्रि.न्चिकेतसि। आ मे अस्य वेधसो नवीयसो- मन्म श्रुधि नवीयसः।।

卐 त्वन्त.मिन्द्र वावृधानो अस्मयु- रमित्रयन्त.न्तुविजात मर्त्यँ- वज्रेण शूर मर्त्यम्। जहि यो नो अघायति- शृणुष्व सुश्रव.स्तमः। रिष्ट.न्नयाम.न्नप भूतु दुर्मति- र्विश्वाऽप भूतु दुर्मतिः।।

1.132 त्वया वयमिति षळृचस्य सूक्तस्य, दैवोदासिः परुच्छेप- इन्द्रो- युवन्तमिन्द्रेत्यर्धर्चे इन्द्रापर्वतावत्यष्टिः-

❀02.01.21 卐त्वया वयं मघव.न्पूर्व्ये धन- इन्द्रत्वोता स्सासह्याम पृतन्यतो- वनुयाम वनुष्यतः। नेदिष्ठे अस्मि.न्नह-न्यधि वोचा नु सुन्वते। अस्मि.न्यज्ञे वि चयेमा- भरे कृतँ वाजयन्तो भरे कृतम्।।

卐 स्वर्जेषे भरं आप्रस्य वक्म-न्युषर्बुध स्स्वस्मि.न्नञ्जसि- क्राणस्य स्वस्मि.न्नञ्जसि। अह.न्निन्द्रो यथा विदे- शीर्ष्णशी.ष्र्णोपवाच्यः। अस्मत्रा ते सध्य्र.क्सन्तु रातयो- भद्रा भद्रस्य रातयः।।

卐 तत्तु प्रयः प्रत्नथा ते शुशुक्वनँ- यस्मि.न्यज्ञे वार मकृण्वत क्षय-मृतस्य वारसि क्षयम्। वि तद्वोचे रध द्विता-ऽन्तः पश्यन्ति रश्मिभिः। स घा विदे अन्विन्द्रो गवेषणो- बन्धुक्षिद्भ्यो गवेषणः।।

卐 नू इत्था ते पूर्वथा च प्रवाच्यँ- यदङ्गिरोभ्यो.ऽवृणो रप व्रज-मिन्द्र शिक्ष.न्नप व्रजम्। ऐभ्य स्समान्या दिशा-ऽस्मभ्यञ्जेषि योत्सि च। सुन्वद्भ्यो रन्धया कञ्चि.दव्रतं- हृणायन्त.ञ्चिदव्रतम्।।

卐 सँ यज्जना.न्क्रतुभि श्शूर ईक्षय-द्धने हिते तरुषन्त श्रवस्यवः- प्र यक्षन्त श्रवस्यवः। तस्मा आयुः प्रजाव.दि-द्बाधे अर्चन्त्योजसा। इन्द्र ओक्य.न्दिधिषन्त धीतयो- देवा अच्छा न धीतयः।।

卐 युवन्त मिन्द्रापर्वता पुरोयुधा- यो नः पृतन्या दप तन्तमि-द्धतँ- वज्रेण तन्तमिद्धतम्। दूरे चत्ताय च्छन्त्स.द्गहनँ यदिनक्षत्। अस्माकं शत्रू.न्परि शूर विश्वतो- दर्मा दर्षीष्ट विश्वतः।।

1.133 उभे पुनामीति सप्तर्चस्य सूक्तस्य, दैवोदासिः परुच्छेप इन्द्र आद्या त्रिष्टुप्-द्वितीयादि तिस्रोऽनुष्टुभः-पञ्चमी गायत्रीसँ-षष्ठी धृतिः-सप्तम्यष्टिः।।

❀02.01.22 卐उभे पुनामि रोदसी ऋतेन- द्रुहो दहामि सं महीरनिन्द्राः। अभिव्लग्य यत्र हता अमित्रा- वैलस्थानं परि तृळ्हा अशेरन्न्।।

卐 अभिव्लग्या चिदद्रिव- श्शीर्षा यातुमतीनाम्। छिन्धि वटूरिणा पदा- महावटूरिणा पदा।।

卐 अवाऽसां मघव.न्जहि- शर्धो यातुमतीनाम्। वैलस्थानके अर्मके- महावैलस्थे अर्मके।।

卐 यासा.न्तिस्रः पञ्चाशतो-ऽभिव्लङ्गै रपावपः। तत्सु ते मनायति- तकत्सु ते मनायति।।

卐 पिशङ्गभृष्टि.मम्भृणं- पिशाचि.मिन्द्र सं मृण। सर्वं रक्षो नि बर्हय।।

卐 अवर्मह इन्द्र ददृहि श्रुधी न- श्शुशोच हि द्यौः क्षा न भीषा अद्रिवो- घृणान्न भीषा अद्रिवः। शुष्मिन्तमो हि शुष्मिभि- र्वधै रुग्रेभि रीयसे। अपूरुषघ्नो अप्रतीत शूर सत्वभि- स्त्रिसप्तै श्शूर सत्वभिः।।

卐 वनोति हि सुन्व.न्क्षयं परीणस- स्सुन्वानो हि ष्मा यजत्यव द्विषो- देवाना.मव द्विषः। सुन्वान इत्सिषासति- सहस्रा वाज्यवृतः। सुन्वाना.येन्द्रो ददा त्याभुवं- रयि.न्ददा त्याभुवम्।।

1.134 आ त्वा जुव इति षळृचस्य सूक्तस्य, दैवोदासिः परुच्छेपो- वायु-रत्यष्टि-रन्त्याऽष्टिः।।

❀02.01.23 卐आ त्वा जुवो ररहाणा अभि प्रयो- वायो~वह.न्त्विह पूर्वपीतये- सोमस्य पूर्वपीतये। ऊर्ध्वा ते अनु सूनृता- मन स्तिष्ठतु जानती। नियुत्वता रथेना ऽऽयाहि दावने- वायो~ मखस्य दावने।।

卐 मन्दन्तु त्वा मन्दिनो वाय~ विन्दवो-ऽस्मत्क्राणास स्सुकृता अभिद्यवो- गोभिः क्राणा अभिद्यवः। यद्ध क्राणा^ इरध्यै- दक्षं सचन्त ऊतयः। सध्रीचीना^ नियुतो दावने धिय^- उप ब्रुवत ईंन्धियः।।

卐 वायुर्युङ्क्ते रोहिता वायु ररुणा- वायू रथे अजिरा धुरि वोळ्हवे- वहिष्ठा धुरि वोळ्हवे। प्र बोधया पुर.न्धिञ्जार^ आ ससतीमिव। प्र चक्षय रोदसी वास.योषस- श्श्रवसे वासयोषसः।।

卐 तुभ्य मुषास श्शुचयः परावति- भद्रा वस्त्रा तन्वते दंसु रश्मिषु- चित्रा नव्येषु रश्मिषु। तुभ्य.न्धेनु स्सबर्दुघा- विश्वा वसूनि दोहते। अजनयो मरुतो वक्षणाभ्यो- दिव^ आ वक्षणाभ्यः।।

卐 तुभ्यं शुक्रास श्शुचय स्तुरण्यवो- मदे.षूग्रा इषणन्त भुर्व-ण्यपा मिषन्त भुर्वणि। त्वान्त्सारी दसमानो भगमीट्टे तक्ववीये। त्वं विश्वस्मा.द्भुवना त्पासि धर्मणा-ऽसुर्या त्पासि धर्मणा।।

卐 त्वन्नो वाय~ वेषा मपूर्व्य- स्सोमानां प्रथमः पीति मर्हसि- सुतानां पीति मर्हसि। उतो~ विहुत्मतीनाँ- विशाँ ववर्जुषीणाम्। विश्वा^ इत्ते धेनवो दुह्र आशिर-ङ्घृतन्दुह्रत आशिरम्।।

स्तीर्णं बर्हिरिति नवर्चस्य सूक्तस्य, दैवोदासिः परुच्छेपो- वायु-श्चतुर्थ्यादि पंचाना-मिन्द्रो वा- अत्यष्टिः सप्तम्यष्टम्यावष्टी।।

❀ 02.01.24 卐स्तीर्णं बर्हि रुप नो याहि वीतये- सहस्रेण नियुता नियुत्वते- शतिनीभि र्नियुत्वते। तुभ्यं हि पूर्वपीतये- देवा^ देवाय येमिरे। प्र ते सुतासो मधुमन्तो अस्थिर-न्मदाय क्रत्वे अस्थिरन्।।

卐 तुभ्यायं सोमः परिपूतो अद्रिभि- स्स्पार्हा वसानः परि कोश मर्षति- शुक्रा वसानो अर्षति। तवायं भाग आयुषु- सोमो देवेषु हूयते। वह वायो~ नियुतो याह्यस्मयु- र्जुषाणो याह्यस्मयुः।।

卐 आ नो नियुद्भिः शतिनीभि रध्वरं- सहस्रिणीभि रुप याहि वीतये- वायो हव्यानि वीतये। तवायं भाग^ ऋत्वियः- स्सरश्मि स्सूर्ये सचा। अध्वर्युभि र्भरमाणा^ अयंसत- वायो~ शुक्रा^ अयंसत।।

卐 आ वां रथो नियुत्वा.न्वक्ष दवसे-ऽभि प्रयांसि सुधितानि वीतये- वायो~ हव्यानि वीतये। पिबतं मध्वो अन्धसः- पूर्वपेयं हि वां हितम्। वाय~ वा चन्द्रेण राधसा ऽऽगत-मिन्द्रश्च राधसाऽऽगतम्।।

卐 आ वान्धियो ववृत्यु रध्वरा^ उ-पेम मिन्दुं मर्मृजन्त वाजिन-माशु मत्य.न्न वाजिनम्। तेषां पिबत मस्मयू~- आ नो गन्त मिहोत्या। इन्द्रवायू~ सुताना.मद्रिभि र्युवं- मदाय वाजदा युवम्।।

❀02.01.25 卐इमे वां सोमा^ अप्स्वा सुता^ इहा-ध्वर्युभि र्भरमाणा^ अयंसत- वायो~ शुक्रा^ अयंसत। एते वा.मभ्यसृक्षत- तिरः पवित्र माशवः। युवायवोऽति रोमा.ण्यव्यया- सोमासो अत्यव्यया।।

卐 अति वायो~ ससतो याहि शश्वतो- यत्र ग्रावा वदति तत्र गच्छत-ङ्गृह मिन्द्रश्च गच्छतम्। वि सूनृता ददृशे रीयते घृत-मा पूर्णया नियुता याथो अध्वर-मिन्द्रश्च याथो अध्वरम्।।

卐 अत्राह तद्वहेथे~ मध्व आहुतिं- यमश्वत्थ मुप.तिष्ठन्त जायवो-ऽस्मे ते सन्तु जायवः। साक.ङ्गाव स्सुवते पच्यते यवो- न ते वाय~ उप दस्यन्ति धेनवो- नाप दस्यन्ति धेनवः।।

卐 इमे ये ते सु वायो~ बाह्वोजसो-ऽन्तर्नदी~ ते पतय.न्त्युक्षणो- महि व्राधन्त^ उक्षणः। धन्व.ञ्चिद्ये अनाशवो- जीराश्चि.दगि.रौकसः। सूर्यस्येव रश्मयो दुर्नियन्तवो- हस्तयो र्दुर्नियन्तवः।।

☙ 1.136 प्र सु ज्येष्ठमिति सप्तर्चस्य सूक्तस्य, दैवोदासिः परुच्छेपो- मित्रावरुणौ-नमो दिव इत्यस्या- रोदासी- मित्रावरुणेन्द्राग्न्यर्यम भग सोमा देवताः-ऊती देवानामित्यस्या देव मरुदग्नि मित्रावरुण मघवन्तोदेवता- अत्यष्टिः-अन्त्या-त्रिष्टुप्।।

❀ 02.01.26 卐प्र सु ज्येष्ठ.न्निचिराभ्यां बृह.न्नमो- हव्यं मतिं भरता मृळय.द्भ्यां- स्वादिष्ठं मृळय.द्भ्याम्। ता सम्राजा घृताऽऽसुती~- यज्ञेयज्ञ उपस्तुता। अथैनोः ≈ क्षत्र.न्न कुत.श्चनाऽऽधृषे- देवत्व.न्नू चिदाधृषे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अदर्शि गातु रुरवे वरीयसी- पन्था^ ऋतस्य समयंस्त रश्मिभि- श्चक्षु र्भगस्य रश्मिभिः। द्युक्षं मित्रस्य सादन-मर्यम्णो वरुणस्य च। अथा दधाते~ बृहदुक्थ्य1(अँ)वय^- उपस्तुत्यं बृह.द्वयः।।

卐 ज्योतिष्मती.मदिति.न्धारयत्क्षितिं- स्वर्वती.मा सचेते~ दिवेदिवे- जागृवांसा दिवेदिवे। ज्योतिष्म.त्क्षत्र माशाते~- आदित्या दानुनस्पती~। मित्र.स्तयो र्वरुणो यातयज्जनो-ऽर्यमा यातयज्जनः।।

卐 अयं मित्राय वरुणाय शन्तम- स्सोमो भू त्ववपानेष्वाभगो- देवो देवे ष्वाभगः। तन्देवासो जुषेरत- विश्वे अद्य सजोषसः। तथा राजाना करथो यदीमह- ऋतावाना यदीमहे।।

卐 यो मित्राय वरुणाया.विध.ज्जनो-ऽनर्वाणन्तं परि पातो अंहसो- दाश्वांसं मर्त मंहसः। तमर्यमाऽभि रक्ष-त्यृजूयन्त मनु व्रतम्। उक्थैर्य^ एनो॰ परिभूषति व्रतं- स्तोमै राभूषति व्रतम्।।

卐 नमो दिवे बृहते रोदसीभ्यां- मित्राय वोचँ वरुणाय मीळ्हुषे- सुमृळीकाय मीळ्हुषे। इन्द्र.मग्नि मुप स्तुहि- द्युक्ष मर्यमणं भगम्। ज्योग्जीवन्त॰ प्रजया सचेमहि- सोमस्योती सचेमहि।।

卐 ऊती देवानाँ वय मिन्द्रवन्तो- मंसीमहि स्वयशसो मरुद्भिः। अग्नि.र्मित्रो वरुण श्शर्म यंस- न्तदश्याम मघवानो वयञ्च।। इति प्रथमाध्यायः।

## द्वितीयाष्टके द्वितीयाध्यायः। वर्गाः(1-27)

1.137 सुषुमेति तृचस्य सूक्तस्य, दैवोदासिः परुच्छेपो- मित्रावरुणा-वतिशक्करी।।

02.02.01 卐सुषुमा ऽयात.मद्रिभि- र्गोश्रीता मत्सरा इमे- सोमासो मत्सरा इमे। आ राजाना दिविस्पृशा-ऽस्मत्रा गन्त.मुप नः। इमे वां मित्रावरुणा गवाशिर- स्सोमा श्शुक्रा^ गवाशिरः।।

卐 इम आ यात.मिन्दव- स्सोमासो दध्याशिर- स्सुतासो दध्याशिरः। उत वा मुषसो बुधि- साकं सूर्यस्य रश्मिभिः। सुतो मित्राय वरुणाय पीतये- चारुर् ऋताय पीतये।।

卐 ताँ वान्धेनु.न्न वासरी-मंशु.न्दुह.न्त्यद्रिभि- स्सोम.न्दुह.न्त्यद्रिभिः। अस्मत्रा गन्त.मुप नो-ऽर्वाञ्चा सोमपीतये। अयँ वां मित्रावरुणा नृभि.स्सुत- स्सोम आ पीतये सुतः।।

1.138 प्रप्र पूष्ण इति चतुर्ऋचस्य सूक्तस्य, दैवोदासिः परुच्छेपः- पूषाऽत्यष्टिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀02.02.02 卐प्रप्र पूषण स्तुविजातस्य शस्यते- महित्व.मस्य तवसो न तन्दते- स्तोत्र.मस्य न तन्दते। अर्चामि सुम्नय.न्नह-मन्त्यूतिं मयोभुवम्। विश्वस्य यो मन^ आयुयुवे मखो- देव^ आयुयुवे मखः।।

卐 प्र हि त्वा पूष.न्नजिरन्न यामनि- स्तोमेभिः कृण्व ऋणवो यथा मृध-^ उष्ट्रो न पीपरो मृधः। हुवे यत्त्वा मयो.भुव-न्देवं सख्याय मर्त्यः। अस्माक.माङ्गूषा.न्द्युम्निन स्कृधि- वाजेषु द्युम्निनस्कृधि।।

卐 यस्य ते पूष.न्त्सख्ये विपन्यवः- क्रत्वा चित्सन्तो.ऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे। तामनु त्वा नवीयसी-न्नियुतं राय^ ईमहे। अहेळमान^ उरुशंस सरी भव- वाजेवाजे सरी भव।।

卐 अस्याँ^ ऊ षु ण उप सातये भुवो-ऽहेळमानो ररिवा अजाश्व श्रवस्यता.मजाश्व। ओ~षु त्वा ववृतीमहि- स्तोमेभि दस्म साधुभिः। नहि त्वा पूष.न्नतिमन्य आघृणे न ते सख्य.मपह्नुवे।।

1.139 अस्तु श्रौषळित्येकादशर्चस्य सूक्तस्य, दैवोदासिः परुच्छेप- आद्याया विश्वेदेवाः-द्वितीयाया मित्रावरुणौ-तृतीयादि तिसृणामाश्विनौ-षष्ठ्या इन्द्रः-सप्तम्या अग्नि-रष्टम्या मरुतो- नवम्या इन्द्राग्नी-दशम्या बृहस्पतिः-अन्त्याया विश्वेदेवा अत्यष्टिः-पञ्चमी बृह-त्यन्त्या त्रिष्टुप्- (वैश्वदेवमेतत्सूक्तं- अत्र प्रत्येकं देवता विभागस्त्वाकर एव पठितः- अनयैव दिशा सर्वत्रापि वैश्वदेव सूक्ते देवता विभागः कर्तव्य इति हि तदनुज्ञा- यथाह - एवमन्यासामपिसूक्तस्य, प्रयोगे वैश्वदेवत्वं- सूक्तभेदप्रयोगे तु यल्लिङ्गं सा देवतेति)।।

❀02.02.03 卐अस्तु श्रौष.ट्पुरो अग्नि.न्धिया दध -आ नु तच्छर्धो दिव्यँ वृणीमह इन्द्रवायू~ वृणीमहे। यद्ध क्राणा विवस्वति- नाभा सन्दायि नव्यसी। अध प्र सू न^ उप यन्तु धीतयो- देवा अच्छा न धीतयः।।

卐 यद्ध त्यन्मित्रावरुणा वृता द-ध्याददाथे~ अनृतं स्वेन मन्युना- दक्षस्य स्वेन मन्युना। युवो रित्थाऽधि सद्म-स्वपश्याम हिरण्ययम्। धीभि.श्चन मनसा स्वेभि रक्षभि- स्सोमस्य स्वेभि रक्षभिः।।

卐 युवां स्तोमेभि देवयन्तो अश्विना-ऽऽश्रावयन्तइव श्लोक.मायवो- युवां हव्याऽभ्या3(आ)यवः।-युवो.विश्वा^ अधि श्रियः- पृक्षश्च विश्ववेदसा। प्रुषायन्ते वां पवयो हिरण्यये- रथे दस्रा हिरण्यये।।

卐 अचेति दस्रा व्यु1(उ)नाकं.मृण्वथो- युञ्जते वां रथयुजो दिविष्टि-ष्वध्वस्मानो दिविष्टिषु। अधि वां स्थाम वन्धुरे- रथे दस्रा हिरण्यये। पथेव यन्ता.वनुशासता रजो-ऽञ्जसा शासता रजः।।

卐 शचीभि.र्न.श्शचीवसू~- दिवा नक्त.न्दशस्यतम्। मा वां राति रुप दस.त्कदा चना-स्मद्रातिः कदा चन।।

❀02.02.04 卐वृष.न्निन्द्र वृषपाणास^ इन्दव^- इमे सुता^ अद्रिषुतास उद्भिद- स्तुभ्यं सुतास^ उद्भिदः। ते त्वा मन्दन्तु दावने- महे चित्राय राधसे। गीर्भि.र्गिर्वाह स्स्तवमान आ गहि- सुमृळीको न^ आ गहि।।

卐 ओ~षू णो अग्ने श्रृणुहि त्वमीळितो- देवेभ्यो ब्रवसि यज्ञियेभ्यो- राजभ्यो यज्ञियेभ्यः। यद्ध त्या मङ्गिरोभ्यो- धेनु.न्देवा^ अदत्तन। वि तान्दुह्रे अर्यमा कर्तरी सचा- एष ताँ वेद मे सचा।।

卐 मो~ षु वो अस्म.दभि तानि पौंस्या- सना भूव.न्द्युम्नानि मोत जारिषु- रस्म.त्पुरोत जारिषुः। यद्वश्चित्रँ युगेयुगे- नव्य.ङ्घोषा.दमर्त्यम्। अस्मासु तन्मरुतो यच्च दुष्टर-न्दिधृता यच्च दुष्टरम्।।

卐 दध्यङ्ह मे जनुषं पूर्वो अङ्गिराः- प्रियमेधः कण्वो अत्रि.र्मनुर्विदु-स्ते मे पूर्वे मनुर्विदुः। तेषा.न्देवे.ष्वायति- रस्माक.न्तेषु नाभयः। तेषां पदेन मह्या नमे गिरे-न्द्राग्नी आ नमे गिरा।।

卐 होता यक्ष.द्वनिनो वन्त वार्यं- बृहस्पति र्यजति वेन^ उक्षभिः- पुरुवारेभि रुक्षभिः। जगृभ्मा दूरआदिशं- श्लोक.मद्रेरध त्मना। अधारय.दररिन्दानि सुक्रतुः- पुरू सद्मानि सुक्रतुः।।

卐 ये देवासो दिव्येकादश स्थ- पृथिव्या.मध्येकादश स्थ। अप्सुक्षितो महि.नैकादश स्थ- ते देवासो यज्ञ.मिम.ञ्जुषध्वम्।।

1.140 वेदिषद इति त्रयोदशर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-र्जगती-अन्त्ये द्वे त्रिष्टुभौ- दशमी त्रिष्टुब्वा।।

❀02.02.05 卐वेदिषदे प्रियधामाय सुद्युते- धासि.मिव प्र भरा योनि.मग्नये। वस्त्रेणेव वासया मन्मना शुचि-ञ्ज्योतीरथं शुक्रवर्ण.न्तमोहनम्।।

卐 अभि द्विजन्मा त्रिवृ.दन्न.मृज्यते- सँवत्सरे वावृधे जग्ध.मी~पुनः~। अन्यस्या.ऽऽसा जिह्वया जेन्यो वृषा- न्य1(अ)न्येन वनिनो मृष्ट वारणः।।

卐 कृष्णप्रुतौ वेविजे~ अस्य सक्षिता- उभा तरेते~ अभि मातरा शिशुम्। प्राचाजिह्व.न्ध्वसयन्त न्तृषुच्युत-मा साच्य.ङ्कुपयँ वर्धनं पितुः।।

卐 मुमुक्ष्वो3(ओ) मनवे मानवस्यते- रघुद्रुवः कृष्णसीतास ऊ जुवः। असमना अजिरासो रघुष्यदो- वातजूता उप युज्यन्त आशवः।।

卐 आदस्य ते ध्वसयन्तो वृथेरते- कृष्ण.मभ्वं महि वर्पः करिक्रतः। यत्सीं मही.मवनिं प्राभि मर्मृश- दभिश्वस.न्त्स्तनय.न्नेति नानदत्।।

❀02.02.06 卐भूषन्न योऽधि बभ्रूषु नम्नते- वृषेव पत्नी रभ्येति रोरुवत्। ओजायमान स्तन्वश्च शुम्भते- भीमो न शृङ्गा दविधाव दुर्गृभिः।।

卐 स संस्तिरो विष्टिर.स्स.ङ्गृभायति- जान.न्नेव जानती र्नित्य आ शये। पुन र्वर्धन्ते अपि यन्ति देव्य- मन्य.द्वर्पः पित्रोः कृण्वते सचा।।

卐 तमग्रुवः केशिनी स्सं हि रेभिर- ऊर्ध्वा.स्तस्थु र्मम्रुषीः प्रा ऽऽयवे पुनः~। तासा.ञ्जरां प्रमु.ञ्चन्नेति नानद-दसुं पर.ञ्जनय.ञ्जीव.मस्तृतम्।।

卐 अधीवासं परि मातू रिह.न्नह- तुविग्रेभि स्सत्वभि.र्याति वि ज्रयः। वयो दध.त्पद्वते रेरिह त्सदा-ऽनु श्येनी सचते वर्तनी.रह।।

卐 अस्माक.मग्ने मघवत्सु दीदि-ह्यध श्वसीवा.न्वृषभो दमूनाः। अवास्या शिशुमती रदीदे- वर्मेव युत्सु परिजर्भुराणः।।

❀02.02.07 卐इद.मग्ने सुधित.न्दुर्धिता.दधि- प्रियादु चिन्मन्मनः प्रेयो अस्तु ते। यत्ते शुक्र. न्तन्वो3(ओ) रोचते शुचि- तेनास्मभ्यँ वनसे रत्नमा त्वम्।।

卐 रथाय नाव.मुत नो गृहाय- नित्यारित्रां पद्वतीं रास्यग्ने। अस्माकँ वीराँ उत नो मघोनो- जनाँश्च या पारया.च्छर्म या च।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अभी नो अग्न उक्थ.मिज्जुगुर्या-द्यावाक्षामा सिन्धवश्च स्वगूर्ताः। गव्यँ यव्यँ यन्तो दीर्घा.ऽहेषँ वर.
मरुण्यो वरन्त।।
1.141 बळित्थेति त्रयोदशर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा अग्नि-र्जगती- अन्त्ये द्वे त्रिष्टुभौ।।
❀02.02.08 卐बळित्था तद्वपुषे धायि दर्शत-न्देवस्य भर्ग.स्सहसो यतो जनि। यदीमुप ह्वरते साधते
मति-र् ऋतस्य धेना^ अनयन्त सस्रुतः।।
卐 पृक्षो वपुः पितुमा.न्नित्य^ आ शये- द्वितीयमा सप्तशिवासु मातृषु। तृतीय.मस्य वृषभस्य दोहसे-
दशप्रमति.ञ्जनयन्त योषणः।।
卐 निर्यदीं बुध्ना.न्महिषस्य वर्पस-^ ईशानास श्शवसा क्रन्त सूरयः। यदी.मनु प्रदिवो मध्व^ आधवे-
गुहा सन्तं मातरिश्वा मथायति।।
卐 प्र यत्पितुः परमा.न्नीयते प-र्या पृक्षुधो वीरुधो दंसु रोहति। उभा यदस्य जनुषँ यदिन्वत-^
आदि.द्यविष्ठो अभव.द्घृणा शुचिः।।
卐 आदि.न्मातृ राविश.द्यास्वा शुचि-रहिंस्यमान^ उर्विया वि वावृधे। अनु यत्पूर्वा^ अरुह.त्सनाजुवो-
नि नव्यसी.ष्ववरासु धावते।।
❀02.02.09 卐आदि.द्धोतारँ वृणते दिविष्टिषु- भग.मिव पपृचानास^ ऋञ्जते। देवा.न्यत्क्रत्वा मज्मना
पुरुष्टुतो- मर्तं शंसँ विश्वधा वेति धायसे।।
卐 वि यदस्था.द्यजतो वातचोदितो- ह्वारो न वक्वा जरणा^ अनाकृतः। तस्य पत्मन्. दक्षुषः
कृष्णजंहस- श्शुचिजन्मनो रज^ आ व्यध्वनः।।
卐 रथो न यात.श्शिक्वभिः कृतो- द्यामङ्गेभि ररुषेभि रीयते। आदस्य ते कृष्णासो दक्षि सूरय- श्शूरस्येव
त्वेषथा.दीषते वयः।।
卐 त्वया ह्यग्ने वरुणो धृतव्रतो- मित्रश्शाशद्रे अर्यमा सुदानवः। यत्सी.मनु क्रतुना विश्वथा विभु- रराान्न
नेमिः परिभू रजायथाः।।

卐 त्वमग्ने शशमानाय सुन्वते- रत्नँ यविष्ठ देवताति मिन्वसि। तन्त्वा नु नव्यं सहसो युव.न्वयं- भगन्न कारे महिरत्न धीमहि।।

卐 अस्मे रयिन्न स्वर्थ-न्दमूनसं- भग.न्दक्ष.न्न.पपृचासि धर्णसिम्। रश्मीᳲरिव यो यमति जन्मनी~ उभे~- देवानां शंस.मृत आ च सुक्रतुः।।

卐 उत न स्सुद्योत्मा जीराश्वो होता- मन्द्र-श्शृणव च्चन्द्ररथः। स नो नेष.न्नेषतमै रमूरो-ऽग्निर्वामं सुवितँ वस्यो अच्छ।।

卐 अस्ता.व्यग्नि.श्शिमीवद्भि रर्कै- स्साम्राज्याय प्रतर.न्दधानः। अमी च ये मघवानो वयञ्च- मिहन्न सूरो अति निᳲष्टतन्युः।।

1.142 समिद्धो अग्न इति त्रयोदशर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा ऋषिः-इध्मस्तनूनपान्नराशंस इळो बर्हि र्देवीर्द्वार उषासानक्ता दैव्यो होतारौ सरस्वतीळा भारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतय इति क्रमेण देवताः-अन्त्याया इन्द्रोऽनुष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀02.02.10 卐समिद्धो अग्न आ वह- देवाᳲ अद्य यतस्रुचे। तन्तु.न्तनुष्व पूर्व्यं- सुतसोमाय दाशुषे।।

卐 घृतवन्त.मुप मासि- मधुमन्त.न्तनूनपात्। यज्ञँ विप्रस्य मावत- श्शशमानस्य दाशुषः।।

卐 शुचिᳲ पावको अद्भुतो- मध्वा यज्ञं मिमिक्षति। नराशंस स्त्रिरा दिवो- देवो देवेषु यज्ञियः।।

卐 ईळितो अग्न आ वहे-न्द्र.ञ्चित्र.मिह प्रियम्। इयं हि त्वा मतिर्म-माच्छा सुजिह्व वच्यते।।

卐 स्तृणानासो यतस्रुचो- बर्हि.र्यज्ञे स्वध्वरे। वृञ्जे देवव्यचस्तम- मिन्द्राय शर्म सप्रथः।।

卐 वि श्रयन्ता.मृतावृधᳲ- प्रयै देवेभ्यो महीः। पावकासᳲ पुरुस्पृहो- द्वारो देवी रसश्चतः।।

❀02.02.11 卐आ भन्दमाने~ उपाके~- ᳲनक्तोषासा सुपेशसा। यह्वी~ ऋतस्य मातरा- सीदतां बर्हिरा सुमत्।।

卐 मन्द्रजिह्वा जुगुर्वणी~- होतारा दैव्या कवी~। यज्ञन्नो यक्षता.मिमं- सिध्र.मद्य दिविस्पृशम्।।

卐 शुचि र्देवे.ष्वर्पिता- होत्रा मरुत्सु भारती। इळा सरस्वती मही- बर्हि स्सीदन्तु यज्ञियाः।।

卐 तन्न स्तुरीप मद्भुतं- पुरु वाऽरं पुरु त्मना। त्वष्टा पोषाय वि ᳲष्यतु- राये नाभा नो अस्मयुः।।

卐 अवसृज.न्नुप त्मना- देवा.न्यक्षि वनस्पते। अग्निर्हव्या ऽसुषूदति- देवो देवेषु मेधिरः।।

卐 पूषण्वते मरुत्वते- विश्वदेवाय वायवे। स्वाहा गायत्रवेपसे- हव्य.मिन्द्राय कर्तन।।

卐 स्वाहाकृता.न्याग.ह्युप हव्यानि वीतये। इन्द्रा.ऽऽगहि श्रुधी हव-न्त्वां हवन्ते अध्वरे।।

☃ 1.143 प्र तव्यसीमित्यष्टर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-र्जगती-अन्त्या त्रिष्टुप्।।

❀02.02.12 卐प्र तव्यसी.न्नव्यसी.न्धीति.मग्नये- वाचो मतिं सहस स्सूनवे भरे। अपा.न्नपाद्यो वसुभि स्सह प्रियो- होता पृथिव्या.न्न्यसीद.दृत्वियः।।

卐 स जायमानः परमे व्योम-न्यावि रग्निरभव.न्मातरिश्वने। अस्य क्रत्वा समिधानस्य मज्मना- प्र द्यावा शोचिः पृथिवी~ अरोचयत्।।

卐 अस्य त्वेषा^ अजरा^ अस्य भानव- स्सुसन्दृश स्सुप्रतीकस्य सुद्युतः। भात्वक्षसो अत्यक्तुर्न सिन्धवो- ऽग्ने रेजन्ते असंसन्तो अजराः।।

卐 यमेरिरे भृगवो विश्ववेदस-न्नाभा पृथिव्या^ भुवनस्य मज्मना। अग्नि.न्तङ्गीर्भि र्हिनुहि स्व आ दमे- य^ एको वस्वो वरुणो न राजति।।

卐 न यो वराय मरुता.मिव स्वन- स्सेनेव सृष्टा दिव्या यथाऽशनिः। अग्नि.र्जम्भै स्तिगितै रत्ति भर्वति- योधो न शत्रून्त्स वना.न्यृञ्जते।।

卐 कुविन्नो अग्नि रुचथस्य वीरस-द्वसु.ष्कुवि.द्वसुभिः काम.मावरत्। चोदः कुवि.त्तुतुज्या त्सातये धिय- श्शुचिप्रतीक.न्तमया धिया गृणे।।

卐 घृतप्रतीकँ व^ ऋतस्य धूर्षद-मग्निं मित्रन्न समिधान^ ऋञ्जते। इन्धानो अक्रो विदथेषु दीद्य-च्छुक्रवर्णा मुदु नो यंसते धियम्।।

卐 अप्रयुच्छ.न्नप्रयुच्छद्भि रग्ने- शिवेभिर्नः पायुभिः पाहि शग्मैः। अदब्धेभि रदृपितेभि रिष्टे- ऽनिमिषद्भिः परि पाहि नो जाः।।

☃ 1.144 एतीति सप्तर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-र्जगती।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀02.02.13 卐एति प्र होता व्रत.मस्य माय-योर्ध्वा.न्दधान श्शुचिपेशस.न्धियम्। अभि स्रुचः क्रमते दक्षिणाऽऽवृतो- या^ अस्य धाम प्रथमं ह निंसते।।

卐 अभी.मृतस्य दोहना^ अनूषत- योनौ देवस्य सदने परीवृताः। अपा.मुपस्थे विभृतो यदावस-दध स्वधा^ अधय.द्याभि रीयते।।

卐 युयूषत स्सवयसा तदिद्वपु- स्समान.मर्थं वितरित्रता.मिथः। आदीं भगो न हव्य स्समस्म.दा-वोळ्हुर्न रश्मी.न्त्स.मयंस्त सारथिः।।

卐 यमी.न्द्वा सवयसा सपर्यत- स्समाने योना मिथुना समोकसा। दिवा न नक्तं पलितो युवाऽजनि- पुरू चर.न्नजरो मानुषा युगा।।

卐 तमीं हिन्वन्ति धीतयो दश व्रिशो- देवं मर्तासऊतये हवामहे। धनो रधि प्रवत^ आ स ऋण्व-त्यभि.व्रजद्भि र्वयुना नवाऽधित।।

卐 त्वं ह्यग्ने दिव्यस्य राजसि- त्वं पार्थिवस्य पशुपाइव त्मना। एनी~ त एते~ बृहती~ अभिश्रिया हिरण्ययी~ वक्करी~ बर्हि.राशाते~।।

卐 अग्ने जुषस्व प्रति हर्य तद्वचो- मन्द्र स्वधाव^ ऋतजात सुक्रतो~। यो विश्वतः प्रत्य.ङ्ङसि दर्शतो-रण्व.स्सन्दृष्टौ पितुमाँइव क्षयः।।

1.145 तम्पृच्छतेति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा-अग्नि-र्जगती-अन्त्या त्रिष्टुप्।।

❀02.02.14 卐तं पृच्छता स जगामा स वेद- स चिकित्वाँ ईयते सा न्वीयते। तस्मि.न्त्सन्ति प्रशिष स्तस्मि.न्निष्टय- स्स वाजस्य शवस श्शुष्मिण.स्पतिः।।

卐 तमि.त्पृच्छन्ति न सिमो वि पृच्छति- स्वेनेव धीरो मनसा यदग्रभीत्। न मृष्यते प्रथम.न्नापरं वचो-ऽस्य क्रत्वा सचते अप्रदृपितः।।

卐 तमि.द्गच्छन्ति जुह्व1(अ)स्त.मर्वती- र्विश्वा.न्येक.श्शृणव.द्वचांसि मे।पुरुप्रैष स्ततुरि र्यज्ञसाधनो-ऽच्छिद्रोति श्शिशुरा दत्त सं रभः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उपस्थाय.ञ्चरति यत्समारत- सद्यो जात स्तत्सार युज्येभिः। अभि श्वान्तं मृशते नान्द्ये मुदे- यदी.ङ्गच्छ.न्त्युशती रपिष्ठितम्।।

卐 स ईं मृगो अप्यो वनर्गु- रुप त्वच्युपमस्या.न्नि धायि। व्यब्रवी.द्वयुना मर्त्येभ्यो-ऽग्निर्विद्वा॰ ऋतचिद्धि सत्यः।।

☸ 1.146 त्रिमूर्धानमिति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-स्त्रिष्टुप्।।

❀02.02.15 卐त्रिमूर्धानं सप्तरश्मि.ङ्गृणीषे-ऽनून.मग्निं पित्रो रुपस्थे। निषत्त.मस्य चरतो ध्रुवस्य- विश्वा दिवो रोचनाऽऽपप्रिवांसम्।।

卐 उक्षा महा॰ अभि ववक्ष एने~- अजर स्तस्था वितऊतिर् ऋष्वः। उर्व्याः पदो नि दधाति सानौ- रिह.न्त्यूधो अरुषासो अस्य।।

卐 समानँ वत्स.मभि सञ्चरन्ती~- विष्वग्धेनू~ वि चरत स्सुमेके~। अनपवृज्या॰ अध्वनो मिमाने~- विश्वा.न्केता॰ अधि महो दधाने~।।

卐 धीरासः पद.ङ्कवयो नयन्ति- नाना हृदा रक्षमाणा^ अजुर्यम्। सिषासन्तः पर्यपश्यन्त सिन्धु - माविरेभ्यो अभव.त्सूर्यो नॄन्।।

卐 दिदृक्षेण्यः परि काष्ठासु जेन्य- ईळेन्यो महो अर्भाय जीवसे। पुरुत्रा यदभव.त्सूरहैभ्यो- गर्भेभ्यो मघवा विश्वदर्शतः।।

☸ 1.147 कथा त इति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-स्त्रिष्टुप्।।

❀02.02.16 卐कथा ते अग्ने शुचयन्त^ आयो- र्ददाशु र्वाजेभि राशुषाणाः। उभे~ यत्तोके~ तनये दधाना-^ ऋतस्य साम.न्रणयन्त देवाः।।

卐 बोधा मे अस्य वचसो यविष्ठ- मंहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति- वन्दारु स्ते तन्वँ वन्दे अग्ने।।

卐 ये पायवो मामतेयन्ते अग्ने- पश्यन्तो अन्ध.न्दुरिता.दरक्षन्। ररक्ष तान्त्सुकृतो विश्ववेदा- दिप्सन्त इद्रिपवो नाह देभुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 यो नो अग्ने अररिवा॑ अघायु- ररातीवा मर्चयति द्वयेन। मन्त्रो गुरुः पुन रस्तु सो^ अस्मा अनु मृक्षीष्ट तन्व.न्दुरुक्तैः।।

卐 उत वा य स्सहस्य प्रविद्वा-न्मर्तो मर्तं मर्चयति द्वयेन। अतः पाहि स्तवमान स्तुवन्त-मग्ने माकिर्नो दुरिताय धायीः।।

1.148 मथीद्यदीमिति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-स्त्रिष्टुप्।।

02.02.17 卐मथी.द्यदीं विष्टो मातरिश्वा- होतारँ विश्वाप्सुँ विश्वदेव्यम्। नि यन्दधु र्मनुष्यासु विक्षु- स्व1(अ)र्ण चित्रँ वपुषे विभावम्।।

卐 ददान.मिन्न ददभन्त मन्मा-ग्नि र्वरूथं मम तस्य चाकन्न्। जुषन्त विश्वा.न्यस्य क-र्मोपस्तुतिं भरमाणस्य कारोः।।

卐 नित्ये चिन्नु यं सदने जगृभ्रे- प्रशस्तिभि र्दधिरे यज्ञियासः। प्र सू नयन्त गृभयन्त^ इष्टा- वश्वासो न रथ्यो रारहाणाः।।

卐 पुरूणि दस्मो नि रिणाति जम्भै- रा द्रोचते वन आ विभावा। आदस्य वातो अनु वाति शोचि-रस्तु र्न शर्या.मसना.मनु द्यून्।।

卐 न यं रिपवो न रिषण्यवो- गर्भे सन्तं रेषणा रेषयन्ति। अन्धा^ अपश्या न दभ.न्नभिख्या- नित्यास^ ईं प्रेतारो अरक्षन्न्।।

1.149 मह स्स राय इति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-र्विराट्।।

卐 18 मह स्स राय^ एषते पतिर्द-न्निन^ इनस्य वसुनः पद आ। उप ध्रजन्त.मद्रयो विधन्नित्।।

卐 स यो वृषा नरा.न्न रोदस्यो- श्श्रवोभि रस्ति जीवपीतसर्गः। प्र य स्सस्राण श्शिश्रीत योनौ।।

卐 आ यः पुर.न्नार्मिणी.मदीदे-दत्यः कवि र्नभन्यो3(ओ) नार्वा। सूरो न रुरुक्वा.ञ्छताऽत्मा।।

卐 अभि द्विजन्मा त्री रोचनानि- विश्वा रजांसि शुशुचानो अस्थात्। होता यजिष्ठो अपां सधस्थे।।

卐 अयं स होता यो द्विजन्मा- विश्वा दधे वार्याणि श्रवस्या। मर्तो यो अस्मै सुतुको ददाश।।

1.150 पुरु त्वेति तृचस्य सूक्तस्य, औचथ्यो दीर्घतमा- अग्नि-रुष्णिक्।।

❀02.02.19 卐पुरु त्वा दाश्वान्वोचे-ऽरि रग्ने तव स्विदा। तोदस्येव शरण आ महस्य।।

卐 व्यनिनस्य धनिनः- प्रहोषे चिदररुषः। कदा चन प्रजिगतो अदेवयोः।।

卐 स चन्द्रो विप्र मर्त्यो- महो व्राधन्तमो दिवि। प्रप्रे.त्ते अग्ने वनुष.स्स्याम।।

1.151 मित्रन्न यमिति नवर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- मित्रावरुणा-वाद्याया मित्रो- जगती।।

❀02.02.20 卐मित्रन्न यं शिम्या गोषु गव्यव- स्स्वाध्यो विदथे अप्सु जीजनन्न्। अरेजेतां रोदसी पाजसा गिरा- प्रति प्रियँ यजत.ञ्जनुषा.मवः।।

卐 यद्ध.त्यद्वां पुरुमीळ्हस्य सोमिनः- प्र मित्रासो न दधिरे स्वाभुवः। अध क्रतुँ विदत.ङ्गातु.मर्चत- उत श्रुतँ वृषणा पस्त्यावतः।।

卐 आ वां भूष.न्क्षितयो जन्म रोदस्योः- प्रवाच्यँ वृषणा दक्षसे महे। यदी.मृताय भरथो यदर्वते- प्र होत्रया शिम्या वीथो अध्वरम्।।

卐 प्र सा क्षिति रसुर या महि प्रिय- ऋतावाना वृतमा घोषथो बृहत्। युव.न्दिवो बृहतो दक्ष.माभुव-ङ्गान्न धुर्युप युञ्जाथे~ अपः।।

卐 मही~ अत्र महिना वार.मृण्वथो-ऽरेणव स्तुज आ सद्म.न्धेनवः। स्वरन्ति ता^ उपरताति सूर्य-मा निम्रुच^ उषस स्तक्ववीरिव।।

❀02.02.21 卐आ वा.मृताय केशिनी रनूषत- मित्र यत्र वरुण गातु.मर्चथः। अव त्मना सृजतं पिन्वत.न्धियो- युवँ विप्रस्य मन्मना.मिरज्यथः।।

卐 यो वाँ यज्ञै श्शशमानो ह दाशति- कवि होता यजति मन्मसाधनः। उपाह तङ्गच्छथो वीथो अध्वर-मच्छा गिर स्सुमतिङ्ग.न्त मस्मयू।।

卐 युवाँ यज्ञैः प्रथमा गोभि रञ्जत- ऋतावाना मनसो न प्रयुक्तिषु। भरन्ति वां मन्मना सँयता गिरो-ऽदृप्यता मनसा रेव.दाशाथे~।।

卐 रेव.द्वयो दधाथे~ रेव.दाशाथे~- नरा मायाभि रितऊति माहिनम्। न वा.न्द्यावोऽहभि र्नोत सिन्धवो-न देवत्वं पणयो ऽनानशु र्मघम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☸ 1.152 युवँ वस्त्राणीति सप्तर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- मित्रावरुणौ- त्रिष्टुप्।।

❀02.02.22 卐युवँ वस्त्राणि पीवसा वसाथे~- युवो रच्छिद्रा मन्तवो ह सर्गाः। अवातिरत-मनृतानि विश्व ऋतेन मित्रावरुणा सचेथे~।।

卐 एतच्चन त्वो वि चिकेत.देषां- सत्यो मन्त्रः कविशस्त ऋघावान्। त्रिरश्रिं हन्ति चतुरश्रि रुग्रो- देवनिदो ह प्रथमा अजूर्यन्न्।।

卐 अपा.देति प्रथमा पद्वतीना-ङ्कस्तद्वां मित्रावरुणा ऽऽचिकेत। गर्भो भारं भरत्या चिदस्य- ऋतं पिप.र्त्यनृत न्नि तारीत्।।

卐 प्रयन्त.मित्परि जार.ङ्कनीनां- पश्यामसि नोपनिपद्यमानम्। अनवपृग्णा वितता वसानं- प्रियं मित्रस्य वरुणस्य धाम।।

卐 अनश्वो जातो अनभीशु रर्वा- कनिक्रद.त्पतय.दूर्ध्वसानुः। अचित्तं ब्रह्म जुजुषु र्युवानः- प्र मित्रे धाम वरुणे गृणन्तः।।

卐 आ धेनवो मामतेय.मवन्ती- र्ब्रह्मप्रियं पीपय.न्त्सस्मि.न्नूधन्न्। पित्वो भिक्षेत वयुनानि विद्वा-नासा ऽऽविवास.न्नदिति.मुरुष्येत्।।

卐 आ वां मित्रावरुणा हव्यजुष्टि-न्नमसा देवा ववसा ववृत्याम्। अस्माकं ब्रह्म पृतनासु सह्या- अस्माकं वृष्टि र्दिव्या सुपारा।।

☸ 1.153 यजामह इति चतुर्ऋचस्य सूक्तस्य, औचथ्यो दीर्घतमा- मित्रावरुणौ- त्रिष्टुप्।।

❀02.02.23 卐यजामहे वां मह स्सजोषा- हव्येभि र्मित्रावरुणा नमोभिः। घृतै र्घृतस्नू~ अध यद्वा.मस्मे- अध्वर्यवो न धीतिभि र्भरन्ति।।

卐 प्रस्तुति र्वान्धाम न प्रयुक्ति- रयामि मित्रावरुणा सुवृक्तिः। अनक्ति यद्वाँ विदथेषु होता- सुम्नँ वां सूरि र्वृषणा वियक्षन्न्।।

卐 पीपाय धेनु रदितिर् ऋताय- जनाय मित्रावरुणा हविर्दे। हिनोति यद्वाँ विदथे सपर्य-न्त्स रातहव्यो मानुषो न होता।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 उत वाँ विक्षु मद्या स्वन्धो- गाव^ आपश्च पीपयन्त देवीः। उतो~ नो अस्य पूर्व्यः पति र्द-न्वीतं पातं पयस^ उस्रियायाः।।

☸ 1.154 विष्णोर्नुकमिति षड्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- विष्णु-स्त्रिष्टुप्।।

❀02.02.24 卐विष्णो नु कँ वीर्याणि प्र वोचँ- यः पार्थिवानि विममे रजांसि। यो अस्कभाय.दुत्तरं सधस्थँ- विचक्रमाण स्त्रेधोरुगायः।।

卐 प्र तद्विष्णु स्स्तवते वीर्येण- मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणे-ष्वधिक्षियन्ति भुवनानि विश्वा।।

卐 प्र विष्णवे शूष मेतु मन्म- गिरिक्षित उरुगायाय वृष्णे। य^ इद.न्दीर्घं प्रयतं सधस्थ-मेको विममे त्रिभि रित्पदेभिः।।

卐 यस्य त्री पूर्णा मधुना पदा-न्यक्षीयमाणा स्वधया मदन्ति। य^ उ त्रिधातु पृथिवी.मुत द्या-मेको दाधार भुवनानि विश्वा।।

卐 तदस्य प्रिय.मभि पाथो अश्या-न्नरो यत्र देवयवो मदन्ति। उरुक्रमस्य स हि बन्धु रित्था- विष्णोः पदे परमे मध्व^ उत्सः।।

卐 ता वां वास्तू.न्युश्मसि गमध्यै- यत्र गावो भूरिशृङ्गा^ अयासः। अत्राह तदुरुगायस्य वृष्णः- परमं पद मव भाति भूरि।।

☸ 1.155 प्र वः पान्तमिति षड्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- आद्यानां तिसृणा-मिंद्राविष्णू-ततस्तिसृणां- विष्णु।।जगती।।

❀02.02.25 卐प्र वः पान्त.मन्धसो धियायते- महे शूराय विष्णवे चार्चत। या सानुनि पर्वताना.मदाभ्या- मह स्तस्थतु रर्वतेव साधुना।।

卐 त्वेष.मित्था समरणं शिमीवतो- रिन्द्राविष्णू~ सुतपा^ वा.मुरुष्यति। या मर्त्याय प्रतिधीयमान. मि-त्कृशानो रस्तु रसना.मुरुष्यथः।।

卐 ता ई॑ वर्धन्ति म॒ह्य॑स्य॒ पौंस्य॒-न्नि मा॒तरा॑ नयति॒ रेत॑से भुजे। दधा॑ति पु॒त्रोऽव॑रं॒ पर॑ं पि॒तु- र्नाम॑ तृतीय॒.मधि॑ रोच॒ने दि॒वः।।

卐 तत्त॒.दि॒दस्य॒ पौंस्य॑.ङ्गृणीम-सीनस्य॑ त्रा॒तु र॑वृ॒कस्य॑ मी॒ळ्हुष॑ः। य॑ः पार्थि॑वानि त्रि॒भि रिद्वि गा॑मभि- रु॒रु क्रमि॑ष्टो.रुगा॒याय॑ जी॒वसे॑।।

卐 द्वे~ इद॒स्य॒ क्रम॑णे~ स्व॒र्दृशो॑ऽभि॒ख्याय॒ मर्त्यो॑ भुरण्यति। तृ॒तीय॑ मस्य॒ नकि॒रा द॑धर्षति- वय॑ श्च॒न प॒तय॑न्तः प॒तत्रिण॑ः।।

卐 च॒तुर्भि॑ स्सा॒क.न्नव॒तिञ्च॒ नाम॑भि- श्च॒क्रन्न॒ वृत्तं॑ व्यती॑ रवीविपत्। बृ॒हच्छ॑रीरो वि॒मिमा॑न॒ ऋक्व॑भि॒- र्यु॑वाऽकु॑मार॒ः प्रत्ये॑त्याह॒वम्।।

1.156 1-21-17भवा मित्र इति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- विष्णु-र्जगती।।

02.02.26 卐भवा॑ मि॒त्रो न शेव्यो॑ घृ॒ताऽसु॑ति- र्वि॒भूत॑द्युम्न॒ एव॒या उ स॒प्रथा॑ः। अधा॑ ते विष्णो~ वि॒दुषा॑ चि॒दर्ध्य॒- स्स्तोमो॑ य॒ज्ञश्च॒ राध्यो॑ ह॒विष्म॑ता।।

卐 य॑ः पू॒र्व्याय॑ वे॒धसे॒ नवी॑यसे- सु॒मज्जा॑नये॒ विष्ण॑वे॒ ददा॑शति। यो जा॒त.मस्य॒ मह॒तो महि॒ ब्रव॒-त्सेदु॒ श्रवो॑भि॒ र्युज्य॑.ञ्चिद॒.भ्य॑सत्।।

卐 तमु॑ स्तोतार॑ः पू॒र्व्यं यथा॑ वि॒द - ऋ॒तस्य॒ गर्भ॑.ञ्जनु॒षा॑ पिपर्तन। आऽस्य॑ जा॒नन्तो॒ नाम॑ चिद्विवक्तन- म॒ह स्ते॑ विष्णो~ सुम॒तिं भ॑जामहे।।

卐 तम॑स्य॒ राजा॒ वरु॑ण॒ स्तमश्विना॒- क्रतुं॑ सचन्त॒ मारु॑तस्य वे॒धस॑ः। दा॒धार॒ दक्ष॑.मुत्त॒म.म॑ह॒र्विदं॑- व्र॒जञ्च॒ विष्णु॒ स्सखि॑वा॒ँ अपोर्णु॑ते।।

卐 आ यो वि॒वाय॑ स॒चथा॑य॒ दैव्य॒- इन्द्रा॑य॒ विष्णु॒ स्सुकृ॑ते सु॒कृत्त॑रः। वे॒धा अ॑जिन्व. त्त्रिषध॒स्थ आर्य॑- मृ॒तस्य॑ भा॒गे यज॑मान॒.माऽभ॑जत्।।

1.157 अबोध्यग्निरिति षडृचस्य सूक्तस्य, औचथ्यो दीर्घतमा- अश्विनौ- जग-त्यंत्ये द्वे त्रिष्टुभौ।।

02.02.27 卐अबो॑.ध्य॒ग्नि॒र्ज्म॒ उदे॑ति॒ सूर्यो॒- व्यु1(उ॒)षा.श्च॒न्द्रा म॒ह्याव॑ो अ॒र्चिषा॑। आयु॑क्षाता.मश्विना॒ यात॑वे॒ रथं॒- प्रासा॑वी.द्दे॒व स्स॑वि॒ता जग॒.त्पृथ॑क्।।

卐 यद्युञ्जाथे~ वृषण.मश्विना रथ-ङ्घृतेन नो मधुना क्षत्र.मुक्षतम्। अस्माकं ब्रह्म पृतनासु जिन्वतँ-वय.न्धना शूरसाता भजेमहि।।

卐 अर्वा.ङ्क्त्रिचक्रो मधुवाहनो रथो- जीराश्वो अश्विनो यातु ॒सुष्टुतः। त्रिवन्धुरो मघवा विश्वसौभग-श्शन्न^ आ ऽवक्ष.द्विपदे चतुष्पदे।।

卐 आ न^ ऊर्जँ वहत.मश्विना युवं- मधुमत्या नः कशया मिमिक्षतम्। प्रा ऽऽयु स्तारिष्ट.न्नीरपांसि मृक्षतं- सेधत.न्द्वेषो भवतं सचाभुवा।।

卐 युवं ह गर्भ.ञ्जगतीषु धत्थो- युवँ विश्वेषु भुवनेष्वन्तः~। युव.मग्निञ्च वृषणा वपश्च- वनस्पतीᳵ रश्विना वैरयेथाम्।।

卐 युवं ह स्थो भिषजा भेषजेभि- रथो~ ह स्थो रथ्या3(आ) राथ्येभिः। अथो~ ह क्षत्र.मधि धत्थ^ उग्रा-यो वां हविष्मा.न्मनसा ददाश।।इति द्वितीयाध्याय स्समाप्तः।।

## द्वितीयाष्टके तृतीयाध्यायः। वर्गाः(1-26)

1.158 वसू रुद्रेति षडृचस्य सूक्तस्य, औचथ्यो दीर्घतमा- अश्विनौ- त्रिष्टु-बन्त्या ऽनुष्टुप्।।

❀02.03.01 卐वसू~ रुद्रा पुरुमन्तू~ वृधन्ता- दशस्यतन्नो वृषणा वभिष्टौ। दस्रा ह यद्रेक्ण^ औचथ्यो वां- प्र यत्सस्राथे~ अकवाभि रूती।।

卐 को वान्दाश.त्सुमतये चिदस्यै- वसू~ यद्धेथे~ नमसा पदे गोः। जिगृत.मस्मे रेवतीः पुरन्धीः-कामप्रेणेव मनसा चरन्ता।।

卐 युक्तो ह यद्वा.न्तौग्र्याय पेरु- र्वि मध्ये अर्णसो धायि पज्रः। उप वामव श्शरण.ङ्गमेयं- शूरो नाज्म पतयद्भि रेवैः।।

卐 उपस्तुति रौचथ्य.मुरुष्ये-न्मा मा.मिमे~ पतत्रिणी~ वि दुग्धाम्। मा मामेधो दशतय श्चितो धा-क्प्र यद्वां बद्ध स्त्मनि खादति क्षाम्।।

卐 न मा गर.न्नद्यो मातृतमा^- दासा^ यदीं सुसमुब्ध.मवाधुः। शिरो यदस्य त्रैतनो वितक्ष-त्स्वय.न्दास उरो अंसा वपि ग्ध~।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 दीर्घतमा^ मामतेयो- जुजुर्वा.न्दशमे युगे। अपा.मर्थँ यतीनां- ब्रह्मा भवति सारथिः।।

1.159 प्र द्यावा यज्ञैरिति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- द्यावापृथिव्यौ- जगती।।

❀02.03.02 卐प्र द्यावा यज्ञैः पृथिवी~ ऋतावृधा- मही~ स्तुषे विदथेषु प्रचेतसा। देवेभिर्ये~ देवपुत्रे~ सुदंस-सेत्था धिया वार्याणि प्रभूषतः।।

卐 उत मन्ये पितु रद्रुहो मनो- मातु र्महि स्वतव.स्त.द्धवीमभिः। सुरेतसा पितरा भूम चक्रतु- रुरु प्रजाया^ अमृतँ वरीमभिः।।

卐 ते सूनव स्स्वपस स्सुदंससो- मही~- जज्ञु र्मातरा पूर्वचित्तये। स्थातुश्च सत्य.ञ्जगतश्च धर्मणि- पुत्रस्य पाथः पद.मद्वयाविनः।।

卐 ते मायिनो ममिरे सुप्रचेतसो- जामी~ सयोनी~ मिथुना समोकसा। नव्यन्नव्य.न्तन्तुमा तन्वते दिवि- समुद्रे अन्तः~ कवय स्सुदीतयः।।

卐 तद्राधो अद्य सवितु वरेण्यँ- वय.न्देवस्य प्रसवे मनामहे। अस्मभ्य.न्द्यावापृथिवी~ सुचेतुना- रयिन्धत्तँ वसुमन्तं शतग्विनम्।।

1.160 ते हीति पञ्चर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- द्यावापृथिव्यौ- जगती।।

❀02.03.03 ते~ हि द्यावापृथिवी~ विश्वशंभुव- ऋतावरी~ रजसो धारयत्कवी~। सुजन्मनी~ धिषणे~ अन्त रीयते- देवो देवी~ धर्मणा सूर्य श्शुचिः।।

卐 उरुव्यचसा महिनी~ असश्चता- पिता माता च भुवनानि रक्षतः। सुधृष्टमे~ वपुष्ये3(ए)~ न रोदसी पिता यत्सी. मभि रूपै रवासयत्।।

卐 स वह्निः पुत्रः पित्रोः पवित्रवा-न्पुनाति धीरो भुवनानि मायया। धेनुञ्च पृश्निँ वृषभं सुरेतसँ- विश्वाहा शुक्रं पयो अस्य □दुक्षत।।

卐 अय.न्देवाना.मपसा.मपस्तमो- यो जजान रोदसी विश्वशंभुवा। वि यो ममे रजसी~ सुक्रतूयया- ऽजरेभि स्स्कम्भनेभि स्समानृचे।।

卐 ते~ नो गृणाने~ महिनी~ महि श्रवः- ≈ क्षत्र.न्द्यावापृथिवी~ धासथो बृहत्। येनाभिकृष्टी स्ततनाम विश्वहा- पनाय्य.मोजो अस्मे समि.न्वतम्।।

🏺 1.161 किमु श्रेष्ठ इति चतुर्दशर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- ऋभवो- जग-त्यन्त्या त्रिष्टुप्।।

❀02.03.04 卐किमु श्रेष्ठः किं यविष्ठो न^ आजग-न्किमीयते दूत्य1(अ)ङ्क्द्य.दूचिम। न निन्दिम चमसँ यो महाकुलो-ऽग्ने भ्रात द्रुण^ इद्भूति.मूदिम।।

卐 एक.श्चमस.श्चतुरः कृणोतन- तद्वो देवा^ अब्रुव.न्तद्व आऽगमम्। सौधन्वना^ यद्येवा करिष्यथ- साक.न्देवै र्यज्ञियासो भविष्यथ।।

卐 अग्नि.न्दूतं प्रति यदब्रवीत-नाश्वः कर्त्वो रथ^ उतेह कर्त्वः। धेनुः कर्त्वा युवशा कर्त्वा द्वा- तानि भ्रात रनु वः कृ.त्व्येमसि।।

卐 चकृवांस^ ऋभव स्तदपृच्छत- क्वेदभू.द्यस्स्य दूतो न^ आजगन्न्। यदा.ऽवाख्य.च्चमसा.श्चतुरः कृता- नाऽऽदि.त्त्वष्टा ग्नास्वन्त न्यानजे।।

卐 हना.मैना९ इति त्वष्टा यदब्रवी-च्चमसं ये देवपान.मनिन्दिषुः। अन्या.नामानि कृण्वते सुते सचा९- अन्यै.रेना.न्कन्या3(आ) नामभि.स्स्परत्।।

❀02.03.05 इन्द्रो हरी~ युयुजे अश्विना रथं- बृहस्पति र्विश्वरूपा.मुपाऽऽजत। ऋभु र्विभ्वा वाजो देवा९ अगच्छत- स्वपसो यज्ञियं भाग मैतन।।

卐 निश्चर्मणो गार्मरिणीत धीतिभि- र्या जरन्ता युवशा ता कृणोतन। सौधन्वना^ अश्वा.दश्व.मतक्षत- युक्त्वा रथ.मुप देवा९ अयातन।।

卐 इद.मुदकं पिबते त्यब्रवीत-नेदँ वा घा पिबता मुञ्जनेजनम्। सौधन्वना^ यदि तन्नेव हर्यथ- तृतीये घा सवने मादयाध्वै।।

卐 आपो भूयिष्ठा^ इत्येको अब्रवी-दग्नि र्भूयिष्ठ^ इत्यन्यो अब्रवीत्। वधर्यन्तीं बहुभ्यः प्रैको अब्रवी-दृता वदन्त श्चमसा९ अपिंशत।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 श्रोणा.मेक^ उदक.ङ्गा.मवाजति- मांस.मेक॰ पिंशति सूनया ऽऽभृतम्। आ निम्रुच श्शकृदेको अपाभर -त्किं स्वित्पुत्रेभ्य॰ पितरा उपावतुः।।

❀02.03.06 卐उद्वत्स्वस्मा अकृणोतना तृण-न्निव.त्स्वप स्स्वपस्यया नरः। अगोह्यस्य यदसस्तना गृहे- तद.द्येद मृभवो नानु गच्छथ।।

卐 संमील्य यद्भुवना पर्यसर्पत- क्व स्वित्तात्या पितरा व^ आसतुः। अशपत य॰ करस्नँ व^ आददे- य॰ प्राब्रवी.त्प्रो~ तस्मा अब्रवीतन।।

卐¤सुषुप्वांस^ ऋभव स्तदपृच्छ-तागोह्य क^ इद न्नो अबूबुधत्। श्वानं बस्तो बोधयितार.मब्रवी-त्सँवत्सर इद मद्या व्यख्यत।।

卐 दिवा यान्ति मरुतो भूम्याऽग्नि- रयँ वातो अन्तरिक्षेण याति। अद्भि र्याति वरुण स्समुद्रै- र्युष्मा॰ इच्छन्त श्शवसो नपातः।।

1.162 मा नो मित्र इति द्वाविंशत्यृचस्य सूक्तस्य, औचथ्यो दीर्घतमा- अश्व-स्त्रिष्टुप् तृतीया षष्ठ्यौ जगत्यौ- (अश्वस्तुत्याऽश्वो देवता)

❀02.03.07 卐मा नो मित्रो वरुणो अर्यमाऽऽयु- रिन्द्र^ ऋभुक्षा^ मरुत॰ परि ख्यन्न्। यद्वाजिनो देवजातस्य सप्ते॰- प्रवक्ष्यामो विदथे वीर्याणि।।

卐 यन्निर्णिजा रेक्णसा प्रावृतस्य- राति.ङ्गृभीतां मुखतो नयन्ति। सुप्राङजो मेम्य.द्विश्वरूप-^ इन्द्रापूष्णो॰ प्रिय मप्येति पाथः।।

卐 एष च्छाग॰ पुरो अश्वेन वाजिना- पूष्णो भागो नीयते विश्वदेव्यः। अभिप्रियँ यत्पुरोळाश.मर्वता- त्वष्टे देनं सौश्रवसाय जिन्वति।।

卐 यद्धविष्य.मृतुशो देवयान-न्त्रिर्मानुषा॰ पर्यश्व.न्नयन्ति। अत्रा पूष्ण॰ प्रथमो भाग एति- यज्ञ.न्देवेभ्य॰ प्रतिवेदयन्नजः।।

卐 होताऽध्वर्यु रावया^ अग्निमिन्धो- ग्रावग्राभ^ उत शंस्ता सुविप्रः। तेन यज्ञेन स्वरङ्कृतेन- स्विष्टेन वक्षणा^ आ पृणध्वम्।।

❀02.03.08 यूपव्रस्का^ उत ये यूपवाहा- श्चषालँ ये अश्वयूपाय तक्षति। ये चार्वते पचनं संभर-न्त्युतो~ तेषा.मभिगूर्ति र्न^ इन्वतु।।

卐 उप प्रागा.त्सुम.न्मेऽधायि मन्म- देवाना.माशा^ उप वीतपृष्ठः। अन्वेनँ विप्रा^ ऋषयो मदन्ति-देवानां पुष्टे चकृमा सुबन्धुम्।।

卐 यद्वाजिनो दाम सन्दान.मर्वतो- या शीर्षण्या रशना रज्जुरस्य। यद्वा घास्य प्रभृत.मास्ये3(ए) तृणं-सर्वा ता ते अपि देवे.ष्वस्तु।।

卐 यदश्वस्य क्रविषो मक्षिकाऽऽश- यद्वा स्वरौ स्वधितौ रिप्त.मस्ति। यद्धस्तयो श्शमितु र्यन्नखेषु- सर्वा ता ते अपि देवे.ष्वस्तु।।

卐 यदूवध्य.मुदर स्यापवाति- य^ आमस्य क्रविषो गन्धो अस्ति। सुकृता तच्छमितारः कृण्व-न्तूत मेधं श्टतपाकं पचन्तु।।

❀02.03.09 卐यत्ते गात्रा.दग्निना पच्यमाना-दभि शूल.न्निहत.स्यावधावति। मा तद्भूम्या मा श्रिष.न्मा तृणेषु- देवेभ्य स्तदुशद्भ्यो रात.मस्तु।।

卐 ये वाजिनं परिपश्यन्ति पक्वँ- य ईमाहु स्सुरभि र्निर्ह.रेति। ये चार्वतो मांसभिक्षा.मुपाऽऽसत- उतो~ तेषा मभिगूर्तिर्न^ इन्वतु।।

卐 यन्नीक्षणं मांस्पचन्या^ उखाया^- या पात्राणि यूष्ण^ आसेचनानि। ऊष्मण्या ऽपिधाना चरूणा-मङ्का स्सूनाः परि भूष.न्त्यश्वम्।।

卐 निक्रमण न्निषदनँ विवर्तनँ- यच्च पड्बीश.मर्वतः। यच्च पपौ यच्च घासि.ञ्जघास- सर्वा ता ते अपि देवे.ष्वस्तु।।

卐 मा त्वाऽग्नि र्ध्वनयी.द्धूमगन्धि- र्मोखा भ्राज.न्त्यभि विक्त जघ्रिः। इष्टँ वीत.मभिगूर्तँ वषट्कृत-न्तन्देवासः प्रति गृभ्ण.न्त्यश्वम्।।

❀02.03.10 卐यदश्वाय वास^ उपस्तृण-न्त्यधीवासँ या हिरण्या.न्यस्मै। सन्दान.मर्वन्तं पड्बीशं प्रिया देवे.ष्वा यामयन्ति।।

卐 यत्ते सादे महसा शूकृतस्य- पाष्ण्या वा कशया वा तुतोद। स्रुचेव ता हविषो अध्वरेषु- सर्वा ता ते ब्रह्मणा सूदयामि।।

卐 चतुस्त्रिंश.द्वाजिनो देवबन्धो- र्वङ्क्री रश्वस्य स्वधिति स्समेति। अच्छिद्रा गात्रा वयुना कृणोत- परुष्परु रनुघुष्या विशस्त।।

卐 एक स्त्वष्टु रश्वस्या विशस्ता- द्वा यन्तारा भवत स्तथ ऋतुः। या ते गात्राणा.मृतुथा कृणोमि- ताता पिण्डानां प्र जुहो.म्यग्नौ।।

卐 मात्वा तप.त्प्रिय^ आत्मा ऽपियन्तं- मा स्वधिति.स्तन्व1(अ) आ. ष्तिष्ठिप.त्ते। मा ते गृध्नु रविशस्ता.ऽतिहाय- छिद्रा गात्रा.ण्यसिना मिथू कः~।।

卐 न वा उ एत.न्म्रियसे न रिष्यसि- देवा॰ इदेषि पथिभि स्सुगेभिः। हरी~ ते युञ्जा पृषती~ अभूता- मुपास्था.द्वाजी धुरि रासभस्य।।

卐 सुगव्यन्नो वाजी स्वश्व्यं पुंसः- पुत्रा॰ उत विश्वापुषं रयिम्। अनागास्त्व.न्नो अदितिः कृणोतु- क्षत्र.न्नो अश्वो वनतां हविष्मान्।।

1.163 यदक्रन्द इति त्रयोदशर्चस्य सूक्तस्य, औचथ्यो दीर्घतमा- अश्व-स्त्रिष्टुप्।।

❀02.03.11 卐यदक्रन्दः प्रथम.ञ्जायमान-^ उद्य.न्त्समुद्रा.दुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू~- उपस्तुत्यं महि जात.न्ते अर्वन्न्।।

卐 यमेन दत्त.न्त्रित एन.मायुन-गिन्द्र^ एणं प्रथमो अध्यतिष्ठत्। गन्धर्वो अस्य रशना.मगृभ्णा- त्सूरा.दश्वँ वसवो निरतष्ट।।

卐 असि यमो अस्यादित्यो अर्व-न्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्त- आहु स्ते त्रीणि दिवि बन्धनानि।।

卐 त्रीणि त आहु र्दिवि बन्धनानि- त्रीण्यप्सु त्रीण्य.न्त~ स्समुद्रे। उतेव मे वरुण श्छन्त्स्यर्व-न्यत्रा त आहुः परम.ञ्जनित्रम्।।

卐 इमा ते वाजि.न्नवमार्जना-नीमा शफानां सनितु र्निधाना। अत्रा ते भद्रा रशना^ अपश्य-मृतस्य या^ अभिरक्षन्ति गोपाः।।

❀02.03.12 卐आत्मानन्ते मनसाऽऽरा.दजाना-मवो दिवा पतयन्तं पतङ्गम्। शिरो अपश्यं पथिभि स्सुगेभि- ररेणुभि र्जेहमानं पतत्रि।।

卐 अत्रा ते रूप.मुत्तम.मपश्य-ञ्जिगीषमाण मिष^ आ पदे गोः। यदा ते मर्तो अनु भोग.मान-ळादि.द्ग्रसिष्ठ^ ओषधी रजीगः~।।

卐 अनु त्वा रथो अनु मर्यो अर्व-न्ननु गावोऽनु भगः कनीनाम्। अनु व्रातास स्तव सख्य मीयु- रनु देवा^ ममिरे वीर्यन्ते।।

卐 हिरण्यशृङ्गो.ऽयो अस्य पादा^- मनोजवा^ अवर^ इन्द्र^ आसीत्। देवा^ इदस्य हविरद्य.माय-न्यो अर्वन्तं प्रथमो अध्यतिष्ठत्।।

卐 ईर्मान्तास स्सिलिकमध्यमास- स्सं शूरणासो दिव्यासो अत्याः। हंसाइव श्रेणिशो यतन्ते- यदाक्षिषु र्दिव्य.मज्म.मश्वाः।।

❀02.03.13 卐तव शरीरं पतयि.ष्णवर्व-न्तव चित्तं वातइव ध्रजीमान्। तव शृङ्गाणि विष्ठिता पुरु-त्रा रण्येषु जर्भुराणा चरन्ति।।

卐 उप प्रागा.च्छसनँ वाज्यर्वा- देवद्रीचा मनसा दीध्यानः। अजः पुरो नीयते नाभि र-स्यानु पश्चा त्कवयो यन्ति रेभाः।।

卐 उप प्रागा.त्परमँ यत्सधस्थ-मर्वाँ अच्छा पितरं मातरञ्च। अद्या देवा.ञ्जुष्टतमो हि गम्या^ अथाऽऽशास्ते दाशुषे वार्याणि ।।

1.164 अस्य वामस्येति द्विपञ्चाशदृचस्य सूक्तस्य, औचथ्यो दीर्घतमा- आद्यानामेकचत्वारि शदृचां- विश्वेदेवा-स्तस्याः समुद्रा इत्यस्या वाक्समुद्राक्षरापः-शकमयमित्यस्याः शकधूम सोमौ-त्रयः केशिन इत्यस्या अग्नि सूर्य वायवः (केशिन इति गुणः) चत्वारिवागित्यस्या वाक्-इन्द्रं मित्रमिति द्वयोः सूर्यो- द्वादश प्रधय इत्यस्याः कालचक्रम् (अत्र संवत्सर संस्थं कालचक्रवर्णनम्) यस्त इत्यस्याः सरस्वती-

यज्ञेनेत्यस्याः साध्याः-समानमित्यस्या स्सूर्यः- (पर्जन्याग्नी वा) दिव्यं सुपर्ण मित्यस्याः सरस्वान् (सूर्यो वा)- त्रिष्टुप्-द्वादशी- पञ्चदशी- त्रयोविंशी- एकोन त्रिंशी- षड्विं-श्येकचत्वारिंशी च जगत्यः- द्विचत्वारिंशी प्रस्तारपङ्क्तिः-एकपञ्चाश्यनुष्टुप्।।

❀02.03.14 卐अस्य वामस्य पलितस्य होतु- स्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्या-त्रापश्यँ विश्पतिं सप्तपुत्रम्।।

卐 सप्त युञ्जन्ति रथ.मेकचक्र-मेको अश्वो वहति सप्तनामा। त्रिनाभि चक्र.मजर.मनर्वँ- यत्रेमा विश्वा भुवनाऽधि तस्थुः।।

卐 इमं रथ.मधि ये सप्त तस्थु- स्सप्तचक्रं सप्त वह.न्त्यश्वाः। सप्त स्वसारो अभि सन्नवन्ते- यत्र गवा न्निहिता सप्त नाम।।

卐 को ददर्श प्रथम.ञ्जायमान-मस्थन्वन्तँ यदनस्था बिभर्ति। भूम्या^ असु रसृ.गात्मा क्व स्वि-त्को विद्वांस मुप गात्प्रष्टु मेतत्।।

卐 पाकः॰ पृच्छामि मनसाऽविजान-न्देवाना.मेना निहिता पदानि। वत्से बष्कयेऽधि सप्त तन्त-न्वि तत्निरे कवय^ ओतवा उ।।

❀02.03.15 卐अचिकित्वा.न्चिकितुष श्चिदत्र- कवी.न्पृच्छामि विद्मने न विद्वान्। वि य स्तस्तम्भ षळिमा रजां-स्यजस्य रूपे किमपि स्विदेकम्।।

卐 इह ब्रवीतु य^ ईमङ्ग वे-दास्य वामस्य निहितं पदँ वेः~। शीर्ष्णः ≈ क्षीर.न्दुह्रते गावो अस्य- वव्रिँ वसाना^ उदकं पदाऽपुः।।

卐 माता पितर.मृत आ बभाज- धीत्यग्रे मनसा सं हि जग्मे। सा बीभत्सु गर्भरसा निविद्धा- नमस्वन्त^ इदुपवाक.मीयुः।।

卐 युक्ता माता.ऽसी.द्धुरि दक्षिणाया-^ अतिष्ठ.द्गर्भो वृजनी.ष्वन्तः~। अमीमे.द्वत्सो अनु गामपश्य- द्विश्वरूप्य.न्त्रिषु योजनेषु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 तिस्रो मातृ स्त्रीन्पितृ.न्बिभ्र.देक^- ऊर्ध्व स्तस्थौ नेमव ग्लापयन्ति। मन्त्रयन्ते दिवो अमुष्य पृष्ठे-विश्वविदँ वाच.मविश्वमिन्वाम्।।

❀02.03.16 卐द्वादशार.न्नहि तज्जराय- वर्वर्ति चक्रं परि द्या.मृतस्य। आ पुत्रा^ अग्ने मिथुनासो अत्र-सप्त शतानि विंशतिश्च तस्थुः।।

卐 पञ्चपादं पितर.न्द्वादशाकृति-न्दिव^ आहुः परे अर्धे पुरीषिणम्। अथेमे अन्य उपरे विचक्षणं-सप्तचक्रे षळर आहु रर्पितम्।।

卐 पञ्चारे चक्रे परिवर्तमाने- तस्मि.न्नातस्थु भुवनानि विश्वा। तस्य नाक्ष स्तप्यते भूरिभार- स्सना.देव न शीर्यते सनाभिः।।

卐 सनेमि चक्र.मजरँ वि वावृत उत्तानाया.न्दश युक्ता वहन्ति। सूर्यस्य चक्षू रजसैत्यावृत-न्तस्मि.न्नार्पिता भुवनानि विश्वा।।

卐 साकञ्जानां सप्तथ.माहु रेकजं- षळि.द्यमा^ ऋषयो देवजा^ इति। तेषा मिष्टानि विहितानि धामश-स्स्थात्रे रेजन्ते विकृतानि रूपशः।।

❀02.03.17 卐स्त्रियं स्सती स्ताँ उ मे पुंस आहुः- पश्य.दक्षण्वान्न विचेत.दन्धः। कवि र्यः पुत्र स्स^ ईमा चिकेत- यस्ता विजाना त्स पितु ष्पिताऽसत्।।

卐 अवः परेण पर^ एनाऽवरेण- पदा वत्सं बिभ्रती गौरु.दस्थात्। सा कद्रीची कं स्विदर्धं पराऽगा-त्क स्वित्सूते नहि यूथे अन्तः~।।

卐 अवः परेण पितरँ यो अ-स्यानुवेद पर^ एनाऽवरेण। कवीयमानः क^ इह प्र वोच-द्देवं मनः कुतो अधि प्रजातम्।।

卐 ये अर्वाञ्च स्ताँ उ पराच^ आहु- र्ये पराञ्च स्ताँ उ अर्वाच^ आहुः। इन्द्रश्च या चक्रथु स्सोम तानि-धुरा न युक्ता रजसो वहन्ति।।

卐 द्वा सुपर्णा सयुजा सखाया- समानँ वृक्षं परि षस्वजाते~। तयो रन्यः पिप्पलं स्वाद्व-त्त्यनश्न.न्नन्यो अभि चाकशीति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀02.03.18 ꠶यत्रा सुपर्णा^ अमृतस्य भाग-मनिमेषँ विदथाभि स्वरन्ति। इनो विश्वस्य भुवनस्य गोपा- स्स मा धीरः॰ पाक.मत्राऽऽविवेश।।

꠶ यस्मि.न्वृक्षे मध्वद स्सुपर्णा-^ निविशन्ते सुवते चाधि विश्वे। तस्ये दाहु॰ पिप्पलं स्वाद्वग्रे- तन्नो.न्नशद्य॰ पितरन्न वेद।।

꠶ यद्गायत्रे अधि गायत्र.माहित- ¤त्रैष्टुभा.द्वा ¤त्रैष्टुभ.न्निरतक्षत। यद्वा जग.ज्जग.त्याहितं पदँ- य इत्त. द्विदुस्ते अमृतत्व.मानशुः।।

꠶ गायत्रेण प्रति मिमीते अर्क-मर्केण साम ¤त्रैष्टुभेन वाकम्। वाकेन वाक.न्द्विपदा चतुष्पदाऽक्षरेण मिमते सप्त वाणीः।।

꠶ जगता सिन्धु.न्दि.व्यस्तभाय-द्रथन्तरे सूर्यं पर्यपश्यत्। गायत्रस्य समिध स्तिस्र^ आहु- स्ततो मह्ना प्र रिरिचे महित्वा।।

❀02.03.19 ꠶उप ह्वये सुदुघा.न्धेनु.मेतां- सुहस्तो गोधु.गुत दोह.देनाम्। श्रेष्ठं सवं सविता साविष.न्नो-ऽभीद्धो घर्म स्तदुषु प्र वोचम्।।

꠶ हिङ्कृण्वती वसुपत्नी वसूनाँ- वत्स.मिच्छन्ती मनसा भ्याऽऽगात्। दुहा.मश्विभ्यां पयो अघ्न्येयं- सा वर्धतां महते सौभगाय।।

꠶ गौरमीमे.दनु वत्सं मिषन्तं- मूर्धानं हिङ्.कृणो.न्मातवा उ। सृक्वाण.ङ्घर्म.मभि वावशाना- मिमाति मायुं पयते पयोभिः।।

꠶ अयं स शिङ्क्ते येन गौरभीवृता- मिमाति मायु.न्ध्वसना वधि श्रिता। सा चित्तिभि र्नि हि चकार मर्त्यँ- विद्यु.द्भवन्ती प्रति वव्रि.मौहत।।

꠶ अनच्छये तुरगातु जीव-मेज.द्ध्रुवं मध्य आ पस्त्यानाम्। जीवो मृतस्य चरति स्वधाभि- रमर्त्यो मर्त्येना सयोनिः।।

❀02.03.20 ꠶अपश्य.ङ्गोपा.मनिपद्यमान-मा च परा च पथिभि श्चरन्तम्। स सध्रीची स्स विषूची र्वसान^ आ.वरीवर्ति भुवने.ष्वन्तः~।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 य^ ईञ्चकार न सो अस्य वेद- य^ ई.न्ददर्श हिरुगि.न्नु तस्मात्। स मातु र्योना परिवीतो अन्त-र्बहुप्रजा^ निर्ऋति मा विवेश।।

卐 द्यौर्मे पिता जनिता नाभि रत्र- बन्धुर्मे माता पृथिवी महीयम्। उत्तानयो श्चम्वो3(ओ)र्योनि रन्त- रत्रा पिता दुहितु र्गर्भ माऽधात्।।

卐 पृच्छामि त्वा पर.मन्तं पृथिव्याः- पृच्छामि यत्र भुवनस्य नाभिः। पृच्छामि त्वा वृष्णो अश्वस्य रेतः- पृच्छामि वाचः परमँ व्योम।।

卐 इयँ वेदिः परो अन्तः पृथिव्या-^ अयँ यज्ञो भुवनस्य नाभिः। अयं सोमो वृष्णो अश्वस्य रेतो- ब्रह्माऽयं वाचः परमँ व्योम।।

❀02.03.21 卐सप्तार्धगर्भा भुवनस्य रेतो- विष्णो स्तिष्ठन्ति प्रदिशा विधर्मणि। ते धीतिभि र्मनसा ते विपश्चितः- परिभुवः परि भवन्ति विश्वतः।।

卐 न वि जानामि यदिवेद.मस्मि- निण्य स्सन्नद्धो मनसा चरामि। यदा माग.न्प्रथमजा^ ऋतस्या-ऽऽदि द्वाचो अश्नुवे भाग.मस्याः।।

卐 अपा.ङ्प्रा.ङेति स्वधया गृभीतो-ऽमर्त्यो मर्त्येना सयोनिः। ता शश्वन्ता विषूचीना वियन्ता-न्य1(अ)न्य.ञ्चिक्यु र्न निचिक्यु.रन्यम्।।

卐 ऋचो अक्षरे परमे व्योम-न्यस्मि.न्देवा^ अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति- य इत्त.द्विदु स्त इमे समासते।।

卐 सूयवसा.द्भगवती हि भूया-^ अथो~ वयं भगवन्त स्स्याम। अद्धि तृण.मघ्न्ये विश्वदानीं- पिब शुद्ध मुदक.माचरन्ती।।

❀02.03.22 卐गौरी र्मिमाय सलिलानि तक्ष-त्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी- सहस्राक्षरा परमे व्योमन्न्।।

卐 तस्या स्समुद्रा^ अधि वि क्षरन्ति- तेन जीवन्ति प्रदिश श्चतस्रः। ततः ≈ क्षर.त्यक्षर-न्तद्विश्व.मुप जीवति।।

卐 शकमयं.न्धूम.मारा.दपश्यँ- विषूवता पर^ एनाऽवरेण। उक्षाणं पृश्नि.मपचन्त वीरा- स्तानि धर्माणि प्रथमा.न्यासन्न्।।

卐 त्रयः केशिन^ ऋतुथा वि चक्षते- सँवत्सरे वपत एक^ एषाम्। विश्व.मेको अभि चष्टे शचीभि- र्ध्राजि रेकस्य ददृशे न रूपम्।।

卐 चत्वारि वाक्परिमिता पदानि- तानि विदु र्ब्राह्मणा^ ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति- तुरीयँ वाचो मनुष्या^ वदन्ति।।

卐 इन्द्रं मित्रँ वरुण.मग्नि माहु- रथो~ दिव्य स्स सुपर्णो गरुत्मान्। एकं सद्विप्रा^ बहुधा वद-न्त्यग्निँ यमं मातरिश्वान.माहुः।।

❀02.03.23 卐कृष्ण.न्नियानं हरय स्सुपर्णा^- अपो वसाना^ दिव.मुत्पतन्ति। त आऽववृत्र.न्त्सदना .दृतस्या- दि.द्घृतेन पृथिवी व्युद्यते।।

卐 द्वादश प्रधय श्चक्र.मेक-न्त्रीणि नभ्यानि क^ उ तच्चिकेत। तस्मि.न्त्साक.न्त्रिशता न शङ्कवो-ऽर्पिता ष्षष्टि र्न चलाचलासः।।

卐 यस्ते स्तन श्शशयो यो मयोभू- र्येन विश्वा पुष्यसि वार्याणि। यो रत्नधा^ वसुविद्य स्सुदत्र स्सरस्वति तमिह धातवेऽकः~।।

卐 यज्ञेन यज्ञ.मयजन्त देवा- स्तानि धर्माणि प्रथमा.न्यासन्न्। ते ह नाकं महिमान स्सचन्त- यत्र पूर्वे साध्या स्सन्ति देवाः।।

卐 समान.मेत.दुदक-मुच्चै.त्यव चाहभिः। भूमिं पर्जन्या^ जिन्वन्ति- दिव.ञ्जिन्व.न्त्यग्नयः।।

卐 दिव्यं सुपर्णँ वायसं बृहन्त-मपा.ङ्गर्भ.न्दर्शत.मोषधीनाम्। अभीपतो वृष्टिभि स्तर्पयन्तं- सरस्वन्त.मवसे जोहवीमि।।

1.165 कया शुभेति पञ्चदशर्चस्य सूक्तस्य, तृतीयाद्ययुगृचामेकादशी वर्ज्यानां मरुतः-त्रयोदश्यादि तिसृणामगस्त्यः-शिष्टानामिद्र ऋषिः-सर्व सूक्तस्य, मरुत्वानिंद्रो देवता-त्रिष्टुप्छन्दः।।

❀02.03.24 卐कया शुभा सवयस स्सनीळा- स्समान्या मरुत स्संमिमिक्षुः। कया मती कुत^ एतास^ एते-ऽर्चन्ति शुष्मँ वृषणो वसूया।।

卐 कस्य ब्रह्माणि जुजुषु र्युवानः- को अध्वरे मरुत^ आ ववर्त। श्येनाँ इव ध्रजतो अन्तरिक्षे- केन महा मनसा रीरमाम।।

卐 कुत स्त्व.मिन्द्र माहिन स्स-न्नेको यासि सत्पते किन्त इत्था। सं पृच्छसे समराण श्शुभानै- र्वोचे स्तन्नो हरिवो यत्ते अस्मे।।

卐 ब्रह्माणि मे मतय श्शं सुतास- श्शुष्म^ इयर्ति प्रभृतो मे अद्रिः। आ शासते प्रति हर्य.न्त्यु-क्थेमा हरी~ वहतस्ता^ नो अच्छ।।

卐 अतो वय.मन्त.मेभि र्युजाना- स्स्वक्षत्रेभि स्तन्व1(अ)श्शुम्भमानाः। महोभि रेताँ उप युज्महे- न्विन्द्र स्वधा.मनु हि नो बभूथ।।

❀02.03.25 卐क्व1(अ)स्या वो मरुत स्स्वधाऽसी-द्यन्मा.मेकं समधत्ताहिहत्ये। अहं ह्यु1(उ)ग्र स्तविष स्तुविष्मा-न्विश्वस्य शत्रो रनमं वधस्नैः।।

卐 भूरि चकर्थ युज्येभि रस्मे- समानेभि र्वृषभ पौंस्येभिः। भूरीणि हि कृणवामा शवि-ष्ठेन्द्र क्रत्वा मरुतो यद्वशाम।।

卐 वधीँ वृत्रं मरुत^ इन्द्रियेण- स्वेन भामेन तविषो बभूवान्। अह.मेता मनवे विश्वश्चन्द्रा- स्सुगा^ अप श्चकर वज्रबाहुः।।

卐 अनुत्तमा ते मघव.न्नकि र्नु- न त्वावाँ अस्ति देवता विदानः। न जायमानो नशते न जातो- यानि करिष्या कृणुहि प्रवृद्ध।।

卐 एकस्य चिन्मे विभ्व1(अ)स्त्वोजो- या नु दधृष्वा.न्कृणवै मनीषा। अहं ह्यु1(उ)ग्रो मरुतो विदानो- यानि च्यव.मिन्द्र^ इदीश एषाम्।।

❀02.03.26 卐अमन्दन्मा मरुत स्स्तोमो अत्र- यन्मे नर श्श्रुत्यं ब्रह्म चक्र। इन्द्राय वृष्णे सुमखाय मह्यं- सख्ये सखाय स्तन्वे तनूभिः।।

卐 एवे देते प्रति मा रोचमाना-^ अनेद्य श्श्रव^ एषो दधानाः। सञ्चक्ष्या मरुत श्चन्द्रवर्णा-^ अच्छान्त मे छदयाथा च नूनम्।।

卐 को न्वत्र मरुतो मामहे वः- प्र यातन सखीं रच्छा सखायः। मन्मानि चित्रा अपिवातयन्त-^ एषां भूत नवेदा^ म ऋतानाम्।।

卐 आ यद्दुवस्या.द्दुवसे न कारु- रस्मा.न्चक्रे मान्यस्य मेधा। ओ~षु वर्त मरुतो विप्र म-च्छेमा ब्रह्माणि जरिता वो अर्चत्।।

卐 एष^ व स्स्तोमो मरुत^ इय.ङ्गी- र्मान्दार्यस्य मान्यस्य कारोः। एषा यासीष्ट तन्वे वयाँ- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।इति तृतीयाध्याय स्समाप्तः ।।

## द्वितीयाष्टके चतुर्थाध्यायः। वर्गाः(1-29)

1.166 तन्नु वोचामेति पञ्चदशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- मरुतो- जगती-अन्त्ये द्वे त्रिष्टुभौ।।

❀02.04.01 तन्नु वोचाम रभसाय जन्मने- पूर्वं महित्वं वृषभस्य केतवे। ऐधेव याम.न्मरुत स्तुविष्वणो- युधेव शक्रा स्तविषाणि कर्तन।।

卐 नित्य.न्न सूनुं मधु बिभ्रत^ उप- क्रीळन्ति क्रीळा^ विदथेषु घृष्वयः। नक्षन्ति रुद्रा^ अवसा नमस्विन-न्न मर्धन्ति स्वतवसो हविष्कृतम्।।

卐 यस्मा ऊमासो अमृता^ अरासत- राय.स्पोषञ्च हविषा ददाशुषे। उक्ष.न्त्यस्मै मरुतो हिताइव- पुरू रजांसि पयसा मयोभुवः।।

卐 आ ये रजांसि तविषीभि रव्यत- प्र व^ एवास स्स्वयतासो अध्रजन्न्। भयन्ते विश्वा भुवनानि हर्म्या- चित्रो वो यामः प्रयता.स्वृष्टिषु।।

卐 यत्त्वेषयामा^ नदयन्त पर्वता-न्दिवो वा पृष्ठ.न्नर्या^ अचुच्यवुः। विश्वो वो अज्म.न्भयते वनस्पती-रथीयन्तीव प्र जिहीत ओषधिः।।

❀02.04.02 यूयन्न^ उग्रा^ मरुत स्सुचेतुना-ऽरिष्टग्रामा स्सुमतिं पिपर्तन। यत्रा वो दिद्यु.द्रदति क्रिविर्दती- रिणाति पश्व स्सुधितेव बर्हणा।।

卐 प्र स्कम्भदेष्णा^ अनवभ्रराधसो-ऽलातृणासो विदथेषु ¤सुष्टुताः। अर्च.न्त्यर्कं मदिरस्य पीतये- विदु र्वीरस्य प्रथमानि पौंस्या।।

卐 शतभुजिभि स्तमभिह्रुते रघा-त्पूर्भी रक्षता मरुतो यमावत। जनं यमुग्रा स्तवसो विरप्शिनः- पाथना शंसा.त्तनयस्य पुष्टिषु।।

卐 विश्वानि भद्रा मरुतो रथेषु वो- मिथस्पृध्येव तविषा.ण्याहिता। अंसेष्वा वः प्रपथेषु खादयो-ऽक्षो वश्चक्रा समया वि वावृते।।

卐 भूरीणि भद्रा नर्येषु बाहुषु- वक्षस्सु रुक्मा रभसासो अञ्जयः। अंसेष्वेताः पविषु क्षुरा^ अधि- वयो न पक्षा.न्व्यनु श्रियो धिरे।।

❀02.04.03 卐महान्तो मह्ना विभ्वो3(ओ) विभूतयो- दूरेदृशो ये दिव्याइव स्तृभिः। मन्द्रा स्सुजिह्वा स्स्वरितार^ आसभि- स्संमिश्ला^ इन्द्रे मरुतः¤परिष्टुभः।।

卐 तद्व स्सुजाता^ मरुतो महित्वन-न्दीर्घं वो दात्र.मदितेरिव व्रतम्। इन्द्रश्चन त्यजसा वि ह्रुणाति- तज्जनाय यस्मै सुकृते अराध्वम्।।

卐 तद्वो जामित्वं मरुतः परे युगे- पुरू यच्छंस.ममृतास^ आवत। अया धिया मनवे श्रुष्टि.माव्या- साक.न्नरो दंसनैरा चिकित्रिरे।।

卐 येन दीर्घं मरुत श्शूशवाम- युष्माकेन परीणसा तुरासः। आ यत्ततन.न्वृजने जनास- एभि र्यज्ञेभि स्तदभीष्टि.मश्याम्।।

卐 एष व स्स्तोमो मरुत^ इय.ङ्गी- र्मान्दार्यस्य मान्यस्य कारोः। एषा यासीष्ट तन्वे वयां- विद्या.मेषं वृजन.ञ्जीरदानुम्।।

1.167 सहस्र न्त इत्येकादशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- मरुतः-आद्याया इन्द्र- स्त्रिष्टुप्।।

❀02.04.04 卐सहस्रन्त इन्द्रोतयो न- स्सहस्र.मिषो हरिवो गूर्ततमाः। सहस्रं रायो मादयध्यै- सहस्रिण उप नो यन्तु वाजाः।।

卐 आ नोऽवोभि र्मरुतो या.न्त्वच्छा ज्येष्ठेभि र्वा बृहद्दिवै स्सुमायाः। अध यदेषा.न्नियुतः परमा- स्समुद्रस्य चिद्धनयन्त पारे।।

卐 मिम्यक्ष येषु सुधिता घृताची- हिरण्यनिर्णि.गुपरा न ऋष्टिः। गुहा चरन्ती मनुषो न योषा- सभावती विदथ्येव सँ वाक्।।

卐 परा शुभ्रा अयासो यव्या- साधारण्येव मरुतो मिमिक्षुः। न रोदसी अप नुदन्त घोरा- जुषन्त वृधं सख्याय देवाः।।

卐 जोष.द्यदी.मसुर्या सचध्यै- विषितस्तुका रोदसी नृमणाः। आ सूर्येव विधतो रथ.ङ्गा-त्त्वेषप्रतीका नभसो नेत्या।।

❀02.04.05 卐आऽस्थापयन्त युवतिँ युवान- श्शुभे निमिश्लां विदथेषु पज्राम्। अर्को यद्वो मरुतो हविष्मा-न्गाय.द्गाथं सुतसोमो दुवस्यन्न्।।

卐 प्र तँ विविक्मि वक्म्यो य एषां- मरुतां महिमा सत्यो अस्ति। सचा यदीँ वृषमणा अहँयु- स्स्थिरा चिज्जनी र्वहते सुभागाः।।

卐 पान्ति मित्रावरुणा ववद्या-च्चयत ईमर्यमो अप्रशस्तान्। उत च्च्यवन्ते अच्युता ध्रुवाणि- वावृध ईं मरुतो दातिवारः।।

卐 नहीं नु वो मरुतो अन्त्यस्मे- आरात्ता.च्चिच्छवसो अन्त.मापुः। ते धृष्णुना शवसा शूशुवांसो-ऽर्णो न द्वेषो धृषता परि ष्ठुः।।

卐 वय.मद्ये.न्द्रस्य प्रेष्ठा- वयं श्वो वोचेमहि समर्ये। वयं पुरा महि च नो अनु द्यू-न्तन्न ऋभुक्षा नरा मनुष्यात्।।

卐 एष व स्स्तोमो मरुत इय.ङ्गी- र्मान्दार्यस्य मान्यस्य कारोः। एषा यासीष्ट तन्वे वयाँ- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☬ 1.168 यज्ञायज्ञेति दशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- जगती-अन्त्यास्तिस्र-स्त्रिष्टुभः।।

❀02.04.06 卐यज्ञायज्ञा व स्समना तुतुर्वण- र्धियं.न्धियँ वो देवया^ उ दधिध्वे। आवो.ऽर्वाच स्सुविताय रोदस्यो- र्महे ववृत्या.मवसे सुवृक्तिभिः।।

卐 वव्रासो न ये स्वजा स्स्वतवस-^ इषं स्वरभिजायन्त धूतयः। सहस्रियासो अपा न्नोर्मय-^ आसा गावो वन्द्यासो नोक्षणः।।

卐 सोमासो न ये सुता स्तृप्तांशवो- हृत्सु पीतासो दुवसो नाऽऽसते। ऐषा.मंसेषु रम्भिणीव रारभे- हस्तेषु खादिश्च कृतिश्च सन्दधे।।

卐 अव स्वयुक्ता दिव^ आ वृथा ययु- रमर्त्याः कशया चोदत त्मना। अरेणव स्तुविजाता-^ अचुच्यवु- र्दृऴ्हानि चिन्मरुतो भ्राज.दृष्टयः।।

卐 को वोऽन्त र्मरुत^ ऋष्टिविद्युतो- रेजति त्मना हन्वेव जिह्वया। धन्वच्युत^ इषान्न यामनि- पुरुप्रैषा^ अहन्यो3(ओ) नैतशः।।

❀02.04.07 क्व स्विदस्य रजसो मह स्पर-ङ्कावरं मरुतो यस्मि.न्नायय। यच्च्यावयथ विथुरेव संहितँ- व्यद्रिणा पतथ त्वेष.मर्णवम्।।

卐 साति र्न वोऽमवती स्वर्वती- त्वेषा विपाका मरुतः पिपिष्वती। भद्रा वो रातिः पृणतो न दक्षिणा- पृथुज्रयी असुर्येव जञ्जती।।

卐 प्रति ष्टोभन्ति सिन्धवः पविभ्यो- यदभ्रियाँ वाच.मुदीरयन्ति। अव स्मयन्त विद्युतः पृथिव्याँ- यदी घृतं मरुतः प्रुष्णुवन्ति।।

卐 असूत पृश्नि र्महते रणाय- त्वेष.मयासां मरुता.मनीकम्। ते सप्सरासो ऽजनयन्ताभ्व- मादित्स्वधा.मिषिरां पर्यपश्यन्न्।।

卐 एष^ व स्स्तोमो मरुत^ इय.ङ्गी- र्मान्दार्यस्य मान्यस्य कारोः। एषा यासीष्ट तन्वे वयाँ- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

☬ 1.169 महश्चिदित्यष्टर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इंद्र-स्त्रिष्टुप्-द्वितीया विराट्।।

❀02.04.08 मह श्चित्त्व.मिन्द्र यत^ एता-न्मह श्चिदसि त्यजसो वरूता। स नो वेधो मरुतां.श्चिकित्वा-न्त्सुम्ना वनुष्व तव हि प्रेष्ठा।।

卐 अयुञ्जन्त इन्द्र विश्वकृष्टी- र्विदानासो निष्षिधो मर्त्यत्रा। मरुतां पृत्सुति र्हासमाना- स्वर्मीऌहस्य प्रधनस्य सातौ।।

卐 अम्यक्सा त इन्द्र ऋष्टि रस्मे- सने.म्यभ्वं मरुतो जुनन्ति। अग्नि श्चिद्धि ष्मातसे शुशुक्का-नापो न द्वीप.न्दधति प्रयांसि।।

卐 त्वन्तू न^ इन्द्र तं रयिन्दा-^ ओजिष्ठया दक्षिणयेव रातिम्। स्तुतश्च यास्ते चकनन्त- वायो स्स्तनन्न मध्वः पीपयन्त वाजैः।।

卐 त्वे राय^ इन्द्र तोशतमाः- प्रणेतारः कस्य चिदृतायोः। ते षु णो मरुतो मृळयन्तु- ये स्मा पुरा गातूयन्तीव देवाः।।

❀02.04.09 प्रति प्र याहीन्द्र मीऌहुषो नृ-न्महः पार्थिवे सदने यतस्व। अध यदेषां पृथुबुध्नास^ एता-स्तीर्थे नार्यः पौंस्यानि तस्थुः।।

卐 प्रति घोराणा.मेताना.मयासां - मरुतां शृण्व आयता.मुपब्दिः। ये मर्त्यं पृतनायन्त.मूमै-र् ऋणावान.न्न पतयन्त सर्गैः।।

卐 त्वं मानेभ्य^ इन्द्र विश्वजन्या- रदा मरुद्भि श्शुरुधो गोअग्राः। स्तवानेभि स्स्तवसे देव देवै-र्विद्यामेषँ वृजन.ञ्जीरदानुम्।।

🏺 1.170 न नूनमिति पञ्चर्चस्य सूक्तस्य, प्रथम तृतीया चतुर्थीनामृचामिन्द्रोऽगस्त्यः-द्वितीया पञ्चम्यो रगस्त्य ऋषि- रिन्द्रो देवता-आद्या बृहती-तत स्तिस्त्रोऽनुष्टुभोऽन्त्या त्रिष्टुप्।।

❀02.04.10 न नून.मस्ति नो~ श्वः- कस्तद्वेद यदद्भुतम्। अन्यस्य चित्त.मभि सञ्चरेण्य-मुताधीतँ वि नश्यति।।

卐 किन्न^ इन्द्र जिघांससि- भ्रातरो मरुत स्त व। तेभिः कल्पस्व साधुया- मा न स्समरणे वधीः।।

卐 किन्नो भ्रात रगस्त्य- सखा सन्नति मन्यसे। विद्मा हि ते यथा मनो-ऽस्मभ्य.मिन्न दित्ससि।।

卐 अर.ङ्कृण्वन्तु वेदिं- समग्नि.मिन्धतां पुरः। तत्रामृतस्य चेतनं- यज्ञन्ते तनवावहै।।

卐 त्वमीशिषे वसुपते वसूना-न्त्वं मित्राणां मित्रपते धेष्ठः। इन्द्र त्वं मरुद्भि स्सँवद-स्वाध प्राशान ऋतुथा हवींषि।।

1.171 प्रति व इति षडृचस्य सूक्तस्य, अगस्त्यो- मरुतः-अन्त्यानां चतसृणां मरुत्वानिन्द्र-स्त्रिष्टुप्।।

❀02.04.11 卐प्रति व^ एना नमसाऽह मेमि- सूक्तेन भिक्षे सुमति.न्तुराणाम्। रराणता मरुतो वेद्याभि- र्निहेळो धत्त वि मुचध्व.मश्वान्।।

卐 एष^ व स्स्तोमो मरुतो नमस्वा-न्हृदा तष्टो मनसा धायि देवाः। उपेमा यात मनसा जुषाणा- यूयं हि ष्ठा नमस^ इद्वृधासः।।

卐 स्तुतासो नो मरुतो मृळय-न्तूत स्तुतो मघवा शंभविष्ठः। ऊर्ध्वा न स्सन्तु कोम्या वना-न्यहानि विश्वा मरुतो जिगीषा।।

卐 अस्मा.दह.न्तविषा.दीषमाण-^ इन्द्रा.द्भिया मरुतो रेजमानः। युष्मभ्यं हव्या निशिता.न्यास-न्तान्यारे चकृमा मृळता नः।।

卐 येन मानास श्चितयन्त उस्रा-^ व्युष्टिषु शवसा शश्वतीनाम्। स नो मरुद्भि र्वृषभ श्रवो धा^- उग्र^ उग्रेभि स्स्थविर स्सहोदाः।।

卐 त्वं पाहीन्द्र सहीयसो नॄ-न्भवा मरुद्भि रवयातहेळाः। सुप्रकेतेभि स्सासहि र्दधानो- विद्या.मेषं वृजन.ञ्जीरदानुम्।।

1.172 चित्रो व इति तृचस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- मरुतो- गायत्री।।

❀02.04.12 चित्रो वोऽस्तु याम- श्चित्र^ ऊती सुदानवः। मरुतो अहिभानवः।।

卐 आरे सा व स्सुदानवो- मरुत^ ऋञ्जती शरुः। आरे अश्मा यमस्यथ।।

卐 तृणस्कन्दस्य नु विशः- परि वृङ्क्त सुदानवः। ऊर्ध्वान्नः कर्त जीवसे।।

1.173 गायत्सामेत्रि योदशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इन्द्र-स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀02.04.13 गाय.त्साम नभन्य1(अँ) यथा वे-रर्चाम तद्वावृधानं स्ववंत्। गावो धेनवो बर्हि.ष्यदंब्धा-^ आ यत्सद्मान.न्दिव्यँ विवासान्।।

卐 अर्च.द्वृषा वृषभि स्स्वेदुहव्यै- र्मृगो नाश्नो अति यर्ज्जुगुर्यात्। प्र मन्दयु र्मना.ङ्गूर्त होता- भरते मर्यो मिथुना यजत्रः।।

卐 नक्ष.द्धोता परि सद्म मिता य-न्भर.द्गर्भमा शरदः पृथिव्याः। क्रन्द.दश्वो नयमानो रुव.द्गौ-रन्त र्दूतो न रोदसी चरद्वाक्।।

卐 ता कर्माषत-रास्मै -प्र च्यौत्नानि देवयन्तो भरन्ते। जुजोष.दिन्द्रो दस्मवर्चा- नासत्येव सुग्म्यो रथेष्ठाः।।

卐 तमु ष्टुहीन्द्रँ यो ह सत्वा- य श्शूरो मघवा यो रथेष्ठाः। प्रतीच श्चिद्योधीया.न्वृषण्वा-न्ववव्रुष श्चित्तमसो विहन्ता।।

❀02.04.14 卐प्र यदित्था महिना नृभ्यो अ-स्त्यरं रोदसी कक्ष्ये3(ए)~ नाऽस्मै। सँ विव्य इन्द्रो वृजनन्न भूमा -भर्ति स्वधावा ओपशमिव द्याम्।।

卐 समत्सु त्वा शूर सता.मुराणं- प्रपथिन्तमं परितंसयध्यै। सजोषस^ इन्द्रं मदे क्षोणी- स्सूरि.श्चिद्ये अनुमदन्ति वाजैः।।

卐 एवा हि ते शं सवना समुद्र- आपो यत्त आसु मदन्ति देवीः। विश्वा ते अनु जोष्या भूद्गौ- स्सूरीँ श्चिद्यदि धिषा वेषि जनान्।।

卐 असाम यथा सुषखाय एन- स्वभिष्टयो नरा.न्नशंसैः। अस.द्यथा न^ इन्द्रो वन्दनेष्ठा- स्तुरो न कर्म नयमान^ उक्था।।

卐विष्पर्धसो नरान्न शंसै- रस्माकास.दिन्द्रो वज्रहस्तः। मित्रायुवो न पूर्पतिं सुशिष्टौ- मध्यायुव^ उप शिक्षन्ति यज्ञैः।।

❀02.04.15 卐यज्ञो हि ष्मेन्द्र.ङ्कश्चि.दृन्ध-ञ्जुहुराण श्चिन्मनसा परियन्न्। तीर्थे.नाच्छा तातृषाण.मोको- दीर्घो न सिध्रमा कृणो.त्यध्वा।।

卐 मो~ षू र्ण^ इन्द्रात्र पृत्सु देवै- रस्ति हि ष्मा ते शुष्मि.न्नवयाः। महश्चि.द्यस्य मीळ्हुषो यव्या- हविष्मतो मरुतो वन्दते गीः।।

卐 एष स्तोम^ इन्द्र तुभ्य.मस्मे- एतेन गातुं हरिवो विदो नः। आ नो ववृत्या स्सुवितार्य देव- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.174 त्वं राजेति दशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इन्द्र-स्त्रिष्टुप्।।

❀02.04.16 卐त्वं राजेन्द्र ये च देवा- रक्षा नॄन्पा.ह्यसुर त्वमस्मान्। त्वं सत्पति र्मघवा न स्तरुत्र- स्त्वं सत्यो वसवान स्सहोदाः।।

卐 दनो विश^ इन्द्र मृध्रवाच- स्सप्त यत्पुर श्शर्म शारदी र्दर्त्। ऋणो रपो अनवद्यार्णा-^ यूने वृत्रं पुरुकुत्साय रन्धीः।।

卐 अजा वृत^ इन्द्र शूरपत्नी- र्द्यांच्च येभिः पुरुहूत नूनम्। रक्षो~ अग्नि.मशुष.न्तूर्वयाणं- सिंहो न दमे अपांसि वस्तोः।।

卐 शेषन्नु त इन्द्र सस्मि.न्योनौ- प्रशस्तये पवीरवस्य मह्ना। सृज.दर्णांस्यव यद्युधा गा- स्तिष्ठ.द्धरी~ धृषता मृष्ट वाजान्।।

卐 वह कुत्स.मिन्द्र यस्मि.ञ्चाक-न्त्स्यूमन्यू~ ऋज्रा वातस्याश्वा। प्र सूर श्चक्रँ वृहता.दभीके-ऽभि स्पृधो यासिष.द्वज्रबाहुः।।

❀02.04.17 卐जघन्वा इन्द्र मित्रेरू-ञ्चोदप्रवृद्धो हरिवो अदाशून्। प्र ये पश्य.न्नर्यमणं सचाऽयो- स्त्वया शूर्ता^ वहमाना^ अपत्यम्।।

卐 रप.त्कवि रिन्द्रार्कसातौ- क्षान्दासा.योपबर्हणी.ङ्कः~। कर.त्तिस्रो मघवा दानुचित्रा-^ नि दुर्योणे कुयवाचं मृधि श्रेत्।।

卐 सना ता त इन्द्र नव्या^ आगु- स्सहो नभोऽविरणाय पूर्वीः। भिन.त्पुरो न भिदो अदेवी- र्ननमो वध रदेवस्य पीयोः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 त्वन्धुर्नि रिन्द्र धुर्निमती-र् ऋणो रप स्सीरा न स्रवन्तीः। प्र यत्समुद्र.मति शूर पर्षि- पारया तुर्वशँ यदुं स्वस्ति।।

卐 त्वमस्माकं.मिन्द्र विश्वध स्या-^ अवृकतमो नरा.न्नृपाता। स नो विश्वासां स्पृधां सहोदा-^ विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.175 मत्स्य पायीति षडृचस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इन्द्रोऽनुष्टुप्-आद्या स्कंधोग्रीवा-अन्त्या त्रिष्टुप्।।

❀02.04.18 卐मत्स्यपायि ते महः- पात्रस्येव हरिवो मत्सरो मदः। वृषा ते वृष्ण इन्दु- र्वाजी सहस्रसातमः।।

卐 आ नस्ते गन्तु मत्सरो- वृषा मदो वरेण्यः। सहावाँ इन्द्र सानसिः- पृतनाषा.ळमर्त्यः।।

卐 त्वं हि शूर स्सनिता- चोदयो मनुषो रथम्। सहावा.न्दस्यु.मव्रत-मोषः पात्र.न्न शोचिषा।।

卐 मुषाय सूर्य.ङ्कवे- चक्र.मीशान^ ओजसा। वह शुष्णाय वध-ङ्कुत्सँ वात.स्याश्वैः।।

卐 शुष्मिन्तमो हि ते मदो- द्युम्निन्तम^ उत क्रतुः। वृत्रघ्ना वरिवोविदा- मंसीष्ठा^ अश्वसातमः।।

卐 यथा पूर्वेभ्यो जरितृभ्य^ इन्द्र- मयइवाऽऽपो न तृष्यते बभूथ। तामनु त्वा निविद.ञ्जोहवीमि-विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.176 मत्सि न इति षडृचस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इन्द्रोऽनुष्टुप्-अन्त्या त्रिष्टुप्।।

❀02.04.19 卐मत्सि नो वस्यइष्टय- इन्द्र.मिन्दो~ वृषाऽऽ.विश। ऋघायमाण^ इन्वसि- शत्रु.मन्ति न विन्दसि।।

卐 तस्मिन्ना वेशया गिरो- य^ एक श्चर्षणीनाम्। अनु स्वधा यमुप्यते- यवन्न चर्कृष.द्वृषा।।

卐 यस्य विश्वानि हस्तयोः- पञ्च क्षितीनाँ वसु। स्पाशयस्व यो अस्मध्रु-ग्दिव्येवाशनि र्जहि।।

卐 असुन्वन्तं सम.ञ्जहि- दूणाशँ यो न ते मयः। अस्मभ्य.मस्य वेदन-न्दद्धि सूरि श्चिदोहते।।

卐 आवो यस्य द्विबर्हसो-ऽर्केषु सानुष.गसत्। आजा विन्द्र.स्येन्दो~- प्रावो वाजेषु वाजिनम्।।

卐 यथा पूर्वेभ्यो जरितृभ्य^ इन्द्र- मयइवाऽऽपो न तृष्यते बभूथ। तामनु त्वा निविद.ञ्जोहवीमि विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.177 आ चर्षणिप्रा इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इन्द्र-स्त्रिष्टुप्।।

❀02.04.20 卐आ चर्षणिप्रा^ वृषभो जनानां- राजा कृष्टीनां पुरुहूत^ इन्द्रः। स्तुत श्श्रवस्य.न्नव.सोप मद्रि-ग्युक्त्वा हरी~ वृषणाऽऽया.ह्यर्वाङ्।।

卐 ये ते वृषणो वृषभास^ इन्द्र- ब्रह्मयुजो वृषरथासो अत्याः। ता~ आ तिष्ठ तेभिरा याह्यर्वा-ङ्हवामहे त्वा सुत इन्द्र सोमे।।

卐 आ तिष्ठ रथँ वृषणं वृषा ते- सुत स्सोमः॒परिषिक्ता मधूनि। युक्त्वा वृषभ्याँ वृषभ क्षितीनां- हरिभ्याँ याहि प्रव.तोप मद्रिक्।।

卐 अयँ यज्ञो देवया^ अयं मियेध-^ इमा ब्रह्मा.ण्यय.मिन्द्र सोमः। स्तीर्णं बर्हिरा तु शक्र प्र याहि- पिबा॒निषद्य वि मुचा हरी~ इह।।

卐 ओ~ ॒सुष्टुत^ इन्द्र याह्यर्वा-ङुप ब्रह्माणि मान्यस्य कारोः। विद्याम वस्तो रवसा गृणन्तो- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.178 यद्ध स्या त इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इन्द्र-स्त्रिष्टुप्।।

❀02.04.21 卐यद्ध स्या त इन्द्र श्रुष्टि रस्ति- यया बभूथ जरितृभ्य^ ऊती। मा नः कामं महयन्त.मा ध- ग्विश्वा ते अश्यां पर्याप^ आयोः।।

卐 न घा राजेन्द्र^ आ दभन्नो- या नु स्वसारा कृणवन्त योनौ। आप.श्चिदस्मै सुतुका^ अवेष-न्गमन्न^ इन्द्र स्सख्या वयश्च।।

卐 जेता नृभि रिन्द्रः पृत्सु शूर- श्श्रोता हव.न्नाधमानस्य कारोः। प्रभर्ता रथ.न्दाशुष^ उपाक- उद्यन्ता गिरो यदि च त्मना भूत्।।

卐 एवा नृभि रिन्द्र स्सुश्रवस्या- प्रखादः पृक्षो अभि मित्रिणो भूत्। समर्य इष स्स्तवते विवाचि- सत्राकरो यजमानस्य शंसः।।

卐 त्वया वयं मघव.न्निन्द्र शत्रू-नभि ष्याम महतो मन्यमानान्। त्वन्त्राता त्वमु नो वृधे भू- र्विद्या.मेषं वृजन.ञ्जीरदानुम्।।

☫ 1.179 पूर्वीरहमिति षड्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यः-आद्ययोर्द्वयोर्लोपामुद्रा ऋषिका- अन्त्ययोर्द्वयोरगस्त्यांन्तेवासी ब्रह्मचारी ऋषिः-सर्वासां रतिर्देवता- त्रिष्टुप्-पञ्चमी बृहती।।

❀02.04.22☞ पूर्वी रहं शरद श्शश्रमाणा- दोषा वस्तो रुषसो जरयन्तीः। मिनाति श्रिय.ञ्जरिमा तनूना- मप्यू नु पत्नी वृषणो जगम्युः।।

卐 ये चिद्धि पूर्व ऋतसाप आस-न्त्साक.न्देवेभि रवद.न्नृतानि। ते चिदवासु र्नह्यन्त.मापु- स्समू नु पत्नी वृषभि र्जगम्युः।।

卐 न मृषा श्रान्तं यदवन्ति देवा- विश्वा इत्स्पृधो अभ्यश्नवाव। जया.वेदत्र शतनीथ.माजिं- यत्सम्यञ्चा मिथुना वभ्यजाव।।

卐 नदस्य मा रुधतः काम आग-न्नित आजातो अमुतः कुतश्चित्। लोपामुद्रा वृषण न्नी रिणाति- धीर मधीरा धयति श्वसन्तम्।।

卐 इम.न्नु सोम.मन्तितो- हृत्सु पीत.मुप ब्रुवे। यत्सी.माऽग श्चकृमा तत्सु मृळतु- पुलुकामो हि मर्त्यः।।

卐 अगस्त्यः खनमानः खनित्रैः- प्रजा.मपत्यं बल.मिच्छमानः। उभौ वर्णा वृषि रुग्रः पुपोष- सत्या देवे.ष्वाशिषो जगाम।।

☫ 1.180 युवो रजांसीति दशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽश्विनौ- त्रिष्टुप्।।

❀02.04.23☞ युवो रजांसि सुयमासो अश्वा- रथो यद्वां पर्यर्णांसि दीयत्। हिरण्यया वां पवयः प्रुषाय- न्मध्वः पिबन्ता उषस स्सचेथे।।

卐 युव.मत्य.स्याव नक्षथो य-द्विपत्मनो नर्यस्य प्रयज्योः। स्वसा यद्वां विश्वगूर्ती भराति- वाजा.येट्टे मधुपा विषे च।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 युवं पयं उस्रियाया.मधत्तं- पक्व.मामाया.मव पूर्व्यं.ङ्गोः। अन्त र्यद्वनिनो वामृतप्सू~- ह्वारो न शुचि र्यजते हविष्मान्।।

卐 युवं हं घर्मं मधुमन्त.मत्रये-ऽपो न क्षोदोऽवृणीत.मेषे। तद्वा.न्नरा वश्विना पश्वइष्टी- रथ्येव चक्रा प्रति यन्ति मध्वः।।

卐 आ वान्दानाय ववृतीय दस्रा- गोरोहेण तौग्र्यो न जिव्रिः। अपः ≈ क्षोणी~ सचते माहिना वाञ्जूर्णो वामक्षु रंहसो यजत्रा।।

❀02.04.24 卐नि यद्युवेथे~ नियुत स्सुदानू~- उप स्वधाभि स्सृजथः पुरन्धिम्। प्रेष.द्वेष.द्वातो न सूरि- रा महे ददे सुव्रतो न वाजम्।।

卐 वय.श्चिद्धि वाञ्जरितार स्सत्या^- विपन्यामहे वि पणि र्हितावान्। अधा चिद्धि. ष्माश्विना वनिन्द्या- पाथो हि ष्मा वृषणा वन्तिदेवम्।।

卐 युवा.श्चिद्धि ष्माश्विना वनुद्यू-न्विरुद्रस्य प्रस्रवणस्य सातौ। अगस्त्यो नरा.न्नृषु प्रशस्तः- काराधुनीव चितय.त्सहस्रैः।।

卐 प्र यद्वहेथे~ महिना रथस्य- प्र स्पन्द्रा याथो मनुषो न होता। धत्तं सूरिभ्य^ उत वा स्वश्व्य-न्नासत्या रयिषाच स्स्याम।।

卐 तं वां रथँ वय.मद्या हुवेम- स्तोमै रश्विना सुविताय नव्यम्। अरिष्टनेमिं परि द्यामियानँ- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.181 कदु प्रेष्ठाविति नवर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽश्विनौ- त्रिष्टुप्।।

❀02.04.25 卐कदु प्रेष्ठा विषां रयीणा-मध्वर्यन्ता यदुन्निनीथो अपाम्। अयँ वाँ यज्ञो अकृत प्रशस्तिँ- वसुधिती~ अवितारा जनानाम्।।

卐 आ वामश्वास श्शुचयः पयस्पा^- वातरंहसो दिव्यासो अत्याः। मनोजुवो वृषणो वीतपृष्ठा-^ एह स्वराजो अश्विना वहन्तु।।

卐 आ वां रथोऽवनि र्न प्रवत्वा-न्त्सृप्रवन्धुर स्सुवितार्य गम्याः। वृष्ण स्स्थातारा मनसो जवीया-नहंपूर्वो यजतो धिष्ण्या यः।।

卐 इहेह जाता समवावशीता-मरेपसा तन्वा3(आ) नामभि स्स्वैः। जिष्णु र्वामन्य स्सुमखस्य सूरि-र्दिवो अन्य स्सुभगः पुत्र ऊहे।।

卐 प्र वा.न्निचेरुः ककुहो वशाँ अनु- पिशङ्गरूप स्सदनानि गम्याः। हरी अन्यस्य पीपयन्त वाजै-र्मथ्रा रजां.स्यश्विना वि घोषैः।।

❀02.04.26 卐प्र वां शरद्वा.न्वृषभो न निष्षा-ट्पूर्वी रिष श्चरति मध्व इष्णन्न्। एवै रन्यस्य पीपयन्त वाजै- र्वेषन्ती रूर्ध्वा नद्यो न आऽगुः।।

卐 असर्जि वां स्थविरा वेधसा गी- र्बाळ्हे अश्विना त्रेधा क्षरन्ती। उपस्तुता ववत.न्नाधमानँ-याम.न्नयाम.ञ्छृणुतं हवं मे।।

卐 उत स्या वां रुशतो वप्ससो गी- स्त्रिबर्हिषि सदसि पिन्वते नॄन्। वृषा वां मेघो वृषणा पीपाय- गोर्न सेके मनुषो दशस्यन्न्।।

卐 युवां पूषे.वाश्विना पुरन्धि- रग्नि.मुषान्न जरते हविष्मान्। हुवे यद्वाँ वरिवस्या गृणानो- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.182 अभूदिदमित्यष्टर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽश्विनौ- जगती-षष्ठ्यन्त्ये त्रिष्टुभौ।।

❀02.04.27 卐अभू.दिदँ वयुन.मो षु भूषता रथो वृषण्वा.न्मदता मनीषिणः। धिय.ञ्जिन्वा धिष्ण्या विश्पलावसू दिवो.नपाता सुकृते शुचिव्रता।।

卐 इन्द्रतमा हि धिष्ण्या मरुत्तमा- दस्रा दंसिष्ठा रथ्या रथीतमा। पूर्णं रथँ वहेथे मध्व आचित-न्तेन दाश्वांस.मुप याथो अश्विना।।

卐 किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चि.दहवि र्महीयते। अति क्रमिष्ट.ञ्जुरतं पणे रसु-ञ्ज्योति र्विप्राय कृणुतँ वचस्यवे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 जम्भयत.मभितो रायत श्शुनो- हतं मृधो विदथु स्तान्यश्विना। वाचँवाच.ञ्जरितू रत्निनी.ङ्कृत-मुभा शंस न्नासत्याऽवतं मम।।

卐 युव.मेत.ञ्चक्रथु स्सिन्धुषु प्लव-मात्म.न्वन्तं पक्षिण.न्तौग्र्याय कम्। येन देवत्रा मनसा निरूहथु-स्सुपप्तनी पेतथुः ≈ क्षोदसो महः।।

❀02.04.28 अवविद्ध.न्तौग्र्य.मप्स्व1(अ)न्त- रनारम्भणे तमसि प्रविद्धम्। चतस्रो नावो जठलस्य जुष्टा-^ उदश्विभ्या.मिषिताः पारयन्ति।।

卐 कस्स्वि.द्वृक्षो ¤निष्ठितो मध्ये अर्णसो- यन्तौग्र्यो नाधितः पर्यषस्वजत्। पर्णा मृगस्य पतरोरि.वारभ-उदश्विना ऊहथु श्श्रोमताय कम्।।

卐 तद्वा.न्नरा नासत्या वनुष्या-द्यद्वां मानास^ उचथ.मवोचन्न्। अस्मा.दद्य सदस स्सोम्यादा- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.183 तँ युञ्जाथामिति षड्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽश्विनौ- त्रिष्टुप्।।

❀02.04.29☞ 卐तँ युञ्जाथां मनसो यो जवीया-न्त्रिवन्धुरो वृषणा यस्त्रिचक्रः। येनोपयाथ स्सुकृतो दुरोण- न्त्रिधातुना पतथो विर्न पर्णैः।।

卐 सुवृ.द्रथो वर्तते यन्नभि क्षाँ- यत्तिष्ठथः क्रतु मन्तानु पृक्षे। वपु र्वपुष्या सचता.मियङ्गी- र्दिवो दुहि.त्रोषसा सचेथे~।।

卐 आ तिष्ठतं सुवृतँ यो रथो वा-मनु व्रतानि वर्तते हविष्मान्। येन नरा नासत्येषयध्यै- वर्ति र्याथ स्तनयाय त्मने च।।

卐 मा वाँ वृको मा वृकी रा दधर्षी-न्मा परि वर्क्त.मुत माऽतिधक्तम्। अयँ वां भागो निहित^ इयङ्गी-र्दस्रा विमे वा.न्निधयो मधूनाम्।।

卐 युवा.ङ्गोतमः पुरुमीळ्हो अत्रि- र्दस्रा हवतेऽवसे हविष्मान्। दिशन्न दिष्टा.मृजूयेव यन्ता-ऽऽमे हव न्नास.त्योप यातम्।।

卐 अतारिष्म तमस स्पार.मस्य- प्रति वां स्तोमो अश्विना वधायि। एह यातं पथिभि र्देवयानै- र्विद्या.मेषँ वृजन.ञ्जीरदानुम्।।इति चतुर्थाध्याय स्समाप्तः।।

## द्वितीयाष्टके पञ्चमाध्यायः। वर्गाः(1-29)

1.184 ता वामिति षड़ृचस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽश्विनौ- त्रिष्टुप्।।

❀02.05.01 卐ता वा मद्य तावपरं हुवे-मोच्छन्त्या.मुषसि वह्नि रुक्थैः। नासत्या कुह चित्सन्ता वयो- दिवो नपाता सुदास्तराय।।

卐 अस्मे ऊ~षु वृषणा मादयेथा-मुत्पणी९.र्हत मूर्म्या मदन्ता। श्रुतं मे अच्छोक्तिभि र्मतीना-मेष्टा नरा निचेतारा च कर्णैः।।

卐 श्रिये पूष.न्निषुकृतेव देवा- नासत्या वहतुं सूर्यायाः। वच्यन्ते वाङ्ककुहा^ अप्सु जाता- युगा जूर्णेव वरुणस्य भूरेः।।

卐 अस्मे सा वां माध्वी~ रातिरस्तु- स्तोमं हिनोतं मान्यस्य कारोः। अनु यद्वां श्रवस्या सुदानू~- सुवीर्याय चर्षणयो मदन्ति।।

卐 एष^ वां स्तोमो अश्विना वकारि- मानेभि र्मघवाना सुवृक्ति। यातँ वर्ति स्तनयाय त्मने-चागस्त्ये नासत्या मदन्ता।।

卐 अतारिष्म तमस स्पार.मस्य- प्रति वां स्तोमो अश्विना वधायि। एह यातं पथिभि र्देवयानै- र्विद्या.मेषँ वृजन.ञ्जीरदानुम् ।।

1.185 कतरेत्येकादशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- द्यावापृथिवी- त्रिष्टुप्।।

❀02.05.02 卐कतरा पूर्वा कतराऽपरायो॰- कथा जाते~ कवय॰ को वि वेद। विश्व.न्त्मना बिभृतो यद्ध नाम- वि वर्तेते~ अहनी~ चक्रियेव।।

卐 भूरिन्द्वे~ अचरन्ती~ चरन्तं- पद्वन्त.ङ्गर्भ.मपदी~ दधाते~। नित्य.न्न सूनुं पित्रो रुपस्थे- द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अनेहो दात्र.मदिते रनर्वं- हुवे स्वर्व दवधन्नमस्वत्। तद्रोदसी जनयतञ्जरित्रे- द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

卐 अतप्यमाने~ अवसाऽवन्ती~- अनु ष्याम रोदसी देवपुत्रे~। उभे~ देवाना.मुभयेभि.रह्ना-न्द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

卐 सङ्गच्छमाने~ युवती~ समन्ते~- स्वसारा जामी~ पित्रो रुपस्थे। अभिजिघ्रन्ती~ भुवनस्य नाभि-न्द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

❀02.05.03 卐उर्वी~ सद्मनी~ बृहती~ ऋतेन- हुवे देवाना.मवसा जनित्री~। दधाते~ ये~ अमृतं सुप्रतीके~- द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

卐 उर्वी~ पृथ्वी~ बहुले~ दूरेअन्ते~- उप ब्रुवे नमसा यज्ञे अस्मिन्न्। दधाते~ ये~ सुभगे~ सुप्रतूर्ती ~-द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

卐 देवा.न्वा यच्चकृमा कच्चिदाग- स्सखायँ वा सदमि.ज्जास्पतिँ वा। इय.न्धी.भूया^ अवयान.मेषा-न्द्यावा रक्षतं पृथिवी~ नो अभ्वात्।।

卐 उभा शंसा नर्या मामविष्टा-मुभे~ मामूती~ अवसा सचेताम्। भूरि चिदर्य स्सुदास्तरा-येषा मदन्त^ इषयेम देवाः।।

卐 ऋत.न्दिवे तदवोचं पृथिव्या -अभिश्रावाय प्रथमं सुमेधाः। पाता.मवद्या.द्दुरिता.दभीके- पिता माता च रक्षता.मवोभिः।।

卐 इद.न्द्यावापृथिवी~ सत्य.मस्तु- पित मात यदि.होपब्रुवे वाम्। भूत.न्देवाना.मवमे अवोभि-र्विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

1.186 आ न इळाभिरित्येकादशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- विश्वेदेवा स्त्रिष्टुप्-(सूक्तभेदप्रयोगे तु- आद्य चतसृणां विश्वेदेवाः-तत एकस्या अहिर्बुध्न्यः-तत एकस्या स्त्वष्टा-तत एकस्या इन्द्रः-ततो द्वयोर्मरुतः-ततो द्वयोर्विश्वेदेवाः-एवमेकादश)।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

❀02.05.04 卐आ न^ इळाभि र्विदथे सुशस्ति- र्विश्वानर स्सविता देव^ एतु। अपि यथा युवानो मत्सथानो- विश्व.ञ्जग.दभिपित्वे मनीषा।।

卐 आ नो विश्व आस्क्रा^ गमन्तु देवा-^ मित्रो अर्यमा वरुण स्सजोषाः। भुव.न्यथा नो विश्वे वृधासः- कर. न्त्सुषाहा विथुरन्न शवः।।

卐 प्रेष्ठँ वो अतिथि.ङ्गृणीषे-ऽग्निं शस्तिभि स्तुर्वणि स्सजोषाः। असद्यथा नो वरुण स्सुकीर्ति- रिषश्च पर्ष .दरिगूर्त स्सूरिः।।

卐 उप व^ एषे नमसा जिगी-षोषासानक्ता सुदुघेव धेनुः। समाने अह.न्विमिमानो अर्कँ- विषुरूपे पयसि सस्मि.न्नूधन्न्।।

卐 उत नोऽहि र्बुध्न्यो3(ओ) मयस्क-~ श्शिशुन्न पिप्युषीव वेति सिन्धुः। येन नपात.मपा.ञ्जुनाम- मनोजुवो वृषणो यँ वहन्ति।।

❀02.05.05☞उत न^ ई न्त्वष्टा.ऽगन्त्व-च्छास्म.त्सूरिभि रभिपित्वे सजोषाः। आ वृत्र.हेन्द्र श्चर्षणिप्रा- स्तुविष्टमो नरान्न^ इह गम्याः।।

卐 उत न^ ई मत.योऽश्वयोगा- श्शिशुन्न गाव स्तरुणं रिहन्ति। तमी.ङ्गिरो जनयो न पत्नी- स्सुरभिष्टम.न्नरा.न्नसन्त।।

卐 उत न^ ई मरुतो वृद्धसेना-^ऽस्स्म.द्रोदसी समनस स्सदन्तु। पृष.दश्वा.सोऽवनयो न रथा- रिशादसो मित्रयुजो न देवाः।।

卐 प्र नु यदेषां महिना चिकित्रे- प्र युञ्जते प्रयुज.स्ते सुवृक्ति। अध यदेषां सुदिने न शरु- र्विश्व.मेरिणं प्रुषायन्त सेनाः।।

卐 प्रो~ अश्विना ववसे कृणुध्वं- प्र पूषणं स्वतवसो हि सन्ति। अद्वेषो विष्णु र्वात^ ऋभुक्षा-^ अच्छा सुम्नाय ववृतीय देवान्।।

卐 इयं सा वो अस्मे दीधिति र्यजत्रा-^ अपिप्राणी च सदनी च भूयाः। नि या देवेषु यतते वसूयु र्विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☫ 1.187 पितुन्वित्येकादशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽन्नं- गायत्री-आद्यानुष्टुब्गर्भा-तृतीया पञ्चम्याद्याश्चतस्रोऽनुष्टुभोऽन्त्या बृहती वा।।

❀02.05.06 卐पितु.न्नु स्तोषं- महो धर्माण.न्तविषीम्। यस्य त्रितो व्योजसा- वृत्रँ विपर्व.मर्दयत्।।

卐 स्वादो~ पितो~ मधो~ पितो~- वय.न्त्वा ववृमहे। अस्माक.मविता भव।।

卐 उप नः पित~वा चर- शिव श्शिवाभि रूतिभिः। मयोभु रद्विषेण्य- स्सखा सुशेवो अद्वयाः।।

卐 तव त्ये पितो~ रसा- रजां.स्यनु विष्ठिताः। दिवि वाताइव श्रिताः।।

卐 तव त्ये पितो~ ददत- स्तव स्वादिष्ठ ते पितो~। प्र स्वाद्मानो रसाना-न्तुविग्रीवाइ.वेरते।।

❀02.05.07 卐त्वे पितो~ महाना-न्देवानां मनो हितम्। अकारि चारु केतुना- तवाहि.मव.सा वधीत्।।

卐 यददो पितो~ अजग-न्विवस्व पर्वतानाम्। अत्रा चिन्नो मधो~ पितो~-ऽरं भक्षाय गम्याः।।

卐 यदपा.मोषधीनां- परिंश.मारिशामहे। वातापे पीव^ इद्भव।।

卐 यत्ते सोम गवाशिरो- यवाशिरो भजामहे। वातापे पीव^ इद्भव।।

卐 करम्भ^ ओषधे भव- पीवो वृक्क^ उदारथिः। वातापे पीव^ इद्भव।।

卐 तन्त्वा वयं पितो~ वचोभि- र्गावो न हव्या सुषूदिम। देवेभ्य.स्त्वा सधमाद-मस्मभ्य.न्त्वा सधमादम्।।

☫ 1.188 समिद्ध इत्येकादशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्य- इध्म-स्तनूनपा-दिळो- बर्हि-र्देवीर्द्वार- उषासानक्ता- दैव्यौ होतारौ- सरस्व-तीळाभारत्य-स्त्वष्टा- वनस्पति- स्वाहाकृतय इति क्रमेण देवताः- गायत्री छन्दः।।

❀02.05.08 卐 समिद्धो अद्य राजसि- देवो देवै स्सहस्रजित्। दूतो हव्या कवि वह।।

卐 तनूनपा.दृतँ यते- मध्वा यज्ञ स्समज्यते। दध.त्सहस्रिणी रिषः।।

卐 आजुह्वानो न^ ईड्यो- देवा आ वक्षि यज्ञियान्। अग्ने सहस्रसा^ असि।।

卐 प्राचीनं बर्हि रोजसा- सहस्रवीर.मस्तृणन्न्। यत्राऽऽदित्या^ विराजथ।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 विरा.द्वम्रा.द्विभ्वीः प्रभ्वी- र्बह्वीश्च भूयसीश्च याः। दुरो घृता.न्यक्षरन्न्।।

❀02.05.09 卐सुरुक्मे~ हि सुपेशसा-ऽधि श्रिया विराजतः। उषासा वेह सीदताम्।।

卐 प्रथमा हि सुवाचसा- होतारा दैव्या कवी~। यज्ञन्नो यक्षता मिमम्।।

卐 भार.तीळे सरस्वति- या^ व स्सर्वा^ उपब्रुवे। ता^ न श्चोदयत श्रिये।।

卐 त्वष्टा रूपाणि हि प्रभुः- पशू.न्विश्वा.न्त्समानजे। तेषान्न स्स्फाति.मा यज।।

卐 उप त्मन्या वनस्पते- पाथो देवेभ्य स्सृज। अग्नि र्हव्यानि ॅसिष्वदत्।।

卐 पुरोगा^ अग्नि र्देवाना.ङ्गायत्रेण समज्यते। स्वाहाकृतीषु रोचते।।

1.189 अग्ने नयेत्यष्टर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽग्नि- स्त्रिष्टुप्।।

❀02.05.10 अग्ने नय सुपथा राये अस्मा-न्विश्वानि देव वयुनानि विद्वान्। युयोध्य1(अ)स्म ज्जुहुराण .मेनो- भूयिष्ठा.न्ते नमउक्तिं विधेम।।

卐 अग्ने त्वं पारया नव्यो अस्मा-न्त्स्वस्तिभि रति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न^ उर्वी- भवा तोकाय तनयाय शँयोः।।

卐 अग्ने त्वमस्म.द्युयो.ध्यमीवा-^ अनग्नित्रा^ अभ्यमन्त कृष्टीः। पुन रस्मभ्यं सुविताय देव- क्षाँ विश्वेभि रमृतेभि र्यजत्र।।

卐 पाहि नो अग्ने पायुभि रजस्रै- रुत प्रिये सदन आ शुशुक्वान्। मा ते भय.ञ्जरितारँ यविष्ठ- नूनँ विद.न्माऽपरं सहस्वः।।

卐 मा नो अग्नेऽव सृजो अघाया-ऽविष्यवे रिपवे दुच्छुनायै। मा दत्वते दशते माऽदते नो- मा रीषते सहसाव.न्परा दाः।।

❀02.05.11 卐वि घ त्वावाँ ऋतजात यंस-द्गृणानो अग्ने तन्वे3(ए) वरूथम्। विश्वा.द्रिरिक्षो रुत वा निनित्सो- रभिह्रुता.मसि हि देव विष्पट्।।

卐 त्वन्ताँ अग्न उभया न्वि विद्वा-न्वेषि प्रपित्वे मनुषो यजत्र। अभिपित्वे मनवे शास्यो भू- र्मर्मृजेन्य^ उशिग्भि र्नाक्रः।।

卐 अवोचाम निवचना.न्यस्मि-न्मानस्य सूनु स्सहसाने अग्नौ। वयं सहस्र.मृषिभि स्सनेम- विद्या.मेषँ वृजन.ञ्जीरदानुम्।।

☃ 1.190 अनर्वाण मित्यष्टर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्यो- बृहस्पति-स्त्रिष्टुप्।।

❀02.05.12 ☞ अनर्वाणँ वृषभं मन्द्रजिह्वं- बृहस्पतिँ वर्धया नव्य.मर्कैः। गाथान्य स्सुरुचो यस्य देवा^- आश्रृण्वन्ति नवमानस्य मर्ताः।।

卐 तमृत्विया^ उप वाच स्सचन्ते- सर्गो न यो देवयता.मसर्जि। बृहस्पति स्स ह्यञ्जो वरांसि- विभ्वा.ऽभव त्समृते मातरिश्वा।।

卐 उपस्तुति.न्नमस^ उद्यति.ञ्च- श्लोकँ यंस.त्सवितेव प्र बाहू~। अस्य क्रत्वाऽहन्यो3(ओ) यो अस्ति- मृगो न भीमो अरक्षस स्तुविष्मान्।।

卐 अस्य श्लोको दिवीयते पृथिव्या-मत्यो न यंस.द्यक्षभृ.द्विचेताः। मृगाणा.न्न हेतयो यन्ति चेमा^- बृहस्पते रहिमाया॰ अभिद्यून्।

卐 ये त्वा दे.वोस्त्रिकं मन्यमाना॰- पापा^ भद्र.मुपजीवन्ति पज्राः। न दूढ्ये3(ए) अनु ददासि वामं- बृहस्पते चयस इत्पियारुम्।।

❀02.05.13 卐सुप्रैतु स्सूयवसो न पन्था^- दुर्नियन्तु॰ परिप्रीतो न मित्रः। अनर्वाणो अभि ये चक्षते नो-ऽपीवृता^ अपोर्णुवन्तो अस्थुः।।

卐 सँ यं स्तुभो.ऽवनयो न यन्ति- समुद्र.न्न स्रवतो रोधचक्राः। स विद्वा॰ उभय.ञ्चष्टे अन्त- र्बृहस्पति स्तर आपश्च गृध्रः।।

卐 एवा मह स्तुविजात स्तुविष्मा-न्बृहस्पति वृषभो धायि देवः। स न स्स्तुतो वीरव.द्धातु गोम- द्विद्या.मेषँ वृजन.ञ्जीरदानुम्।। 13।

☃ 1.191 कङ्कत इति षोळशर्चस्य सूक्तस्य, मैत्रावरुणिरगस्त्योऽप्तृणसूर्या- अनुष्टुप्-दशम्याद्यास्तिस्रो महापंक्तय-स्त्रयोदशी महाबृहती (विषघ्नसूक्तम्)।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀02.05.14 ☞卐कङ्कतो न कङ्कतो-ऽथो~ सतीनकङ्कतः। द्वा.विति प्लुषी~ इति- न्य1(अ)दृष्टा^ अलिप्सत।।

卐 अदृष्टा.न्ह.न्त्याय-त्यथो~ हन्ति परायती। अथो~ अवघ्नती ह-न्त्यथो~ पिनष्टि पिंशती।।

卐 शरासः कुशरासो- दर्भासः स्सैर्या^ उत। मौञ्जा^ अदृष्टा^ बैरिणा- स्सर्वे साक.न्न्यलिप्सत।।

卐 नि गावो ¤गोष्ठे असद-न्नि मृगासो अविक्षत। नि केतवो जनाना-न्न्य1(अ)दृष्टा^ अलिप्सत।।

卐 एत उ त्ये प्रत्यदृश्र-न्प्रदोष.न्तस्करा इव। अदृष्टा विश्वदृष्टाः- प्रतिबुद्धा^ अभूतन।।

❀02.05.15 ☞卐द्यौर्वः पिता पृथिवी माता- सोमो भ्राता.ऽदितिः स्स्वसा। अदृष्टा विश्वदृष्टा- स्तिष्ठ.तेलयता सु कम्।।

卐 ये अंस्या^ ये अङ्ग्या- स्सूचीका^ ये प्रकङ्कताः। अदृष्टाः किञ्चनेह व- स्सर्वे साक.न्नि जस्यत।।

卐 उत्पुरस्ता.त्सूर्य^ एति- विश्वदृष्टो अदृष्टहा। अदृष्टा.न्त्सर्वा.ञ्जम्भय-न्त्सर्वाश्च यातुधान्यः।।

卐 उदपप्त.दसौ सूर्यः- पुरु विश्वानि जूर्वन्न्। आदित्यः पर्वतेभ्यो- विश्वदृष्टो अदृष्टहा।।

卐 सूर्ये विषमा सजामि- दृतिं सुरावतो गृहे। सो चिन्नु न मराति नो~- वयं मरामा.ऽऽरे अस्य- योजनं ¤हरिष्ठा^ मधु- त्वा मधुला चकार।।

❀02.05.16 ☞卐इयत्तिका शकुन्तिका- सका जघास ते विषम्। सो~ चिन्नु न मराति नो~- वयं मरामा.ऽऽरे अस्य- योजनं ¤हरिष्ठा^ मधु- त्वा मधुला चकार।।

卐 त्रि स्सप्त विष्पुलिङ्गका-^ विषस्य पुष्प.मक्षन्न्। ताश्चिन्नु न मरन्ति नो~- वयं मरामा.ऽऽरे अस्य- योजनं ¤हरिष्ठा^ मधु त्वा मधुला चकार।।

卐 नवाना.न्नवतीनाँ- विषस्य रोपुषीणाम्। सर्वासा.मग्रभ.न्नामा-ऽऽरे अस्य योजनं ¤हरिष्ठा^ मधु- त्वा मधुला चकार।।

卐 त्रि स्सप्त मयूर्य- स्सप्त स्वसारो अग्रुवः। तास्ते विषँ वि जभ्रिर- उदक.ङ्कुम्भिनी.रिव।।

卐 इयत्तकः कुषुम्भक- स्तकं भिन.द्म्यश्मना। ततो विषं प्र वावृते- पराचीः रनुसँवतः।।

卐 कुषुम्भक स्त.दब्रवी-द्गिरेः प्रवर्तमानकः। वृश्चिक.स्यारसँ विष-मरसँ वृश्चिक ते विषम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 ✡अथ परिशिष्टम्।।

卐 मा बिभेर्न मरिष्यसि- परि त्वा पामि सर्वतः। घनेन हन्मि वृश्चिक-महिं न्दण्डे.नागतम्।।

卐 आदित्यरथ.वेगेन- विष्णुबाहु.बलेन च। गरुडपक्ष निपातेन- भूमिं.ङ्गच्छ महायशाः।।

卐 गरुडस्य पात.मात्रेण- त्रयो लोकाः प्रकंपिताः। प्रकंपिता मही सर्वा- सशैल.वन.कानना।।

卐 गगन.न्नष्ट.चन्द्रार्क-ज्ज्योति.षन्न प्रकाशते। देवता भय भीताश्च- मारुतो न प्लवायति- (मारुतो न प्लवायत्योन्नमः)।

卐 भो सर्प भद्र भद्र न्ते- दूरं.ङ्गच्छ महाविष। जनमे.जयस्य यज्ञान्ते- आस्तीक.वचनं स्मर।।

卐 आस्तीक.वचनं श्रुत्वा- य स्सर्पो न निवर्तते। शतधा भिद्यते मूर्ध्नि- शिंशवृक्ष फलँ यथा।।

卐 नर्मदायै नमः प्रात -र्नर्मदायै नमो निशि। नमोऽस्तु नर्मदे तुभ्य-न्त्राहि माँ विषसर्पतः।।

卐 यो जर.त्कारुणा जातो- जर.त्कावाँ महायशाः। तस्य स्मराभि भद्र.न्ते- दूरं.ङ्गच्छ महाविष।।

卐 असिति.ञ्चा.र्थसिद्धि.ञ्च- सुनीति.ञ्चापि य स्स्मरेत्। दिवा वा यदि वा रात्रौ- नास्ति सर्प भयं भवेत्।।

卐 अगस्ति र्माधव.श्चैव- मुचुकुन्दो महामुनिः। कपिलो मुनि.रास्तीकः- पञ्चैते सुखशायिनः।। इति परिशिष्टम्।।

卐 मण्डलान्ते पठनीयाः श्लोकाः (मंडलांतमुन पठिंचवलसिन श्लोकमुलु)

卐 ओं विश्वेश्वर विरूपाक्ष- विश्वरूप सदाशिव। शरणं भवभूतेश- करुणाकर शंकर।।

卐 हर शंभो महादेव- विश्वेशामर वल्लभ। शिवशंकर सर्वात्मन्- नीलकंठ नमोऽस्तु ते।।

卐 मृत्युञ्जयाय रुद्राय- नीलकण्ठाय शंभवे। अमृतेशाय शर्वाय- महादेवाय ते नमः।।

卐 एतानि शिवनामानि- मण्डलान्तेषु यः पठेत्। नास्ति मृत्युभयं तस्य- पापरोगादि किञ्चन।।

卐 यज्ञेशाच्युत गोविन्द- माधवानन्त केशव। कृष्ण विष्णो हृषीकेश- वासुदेव नमोऽस्तुते।।

卐 कृष्णाय गोपीनाथाय- चक्रिणे मुरवैरिणे। अमृतेशाय गोपाय- गोविन्दाय नमो नमः।।

卐 वासना द्वासुदेवस्य- वासितन्ते जगत्त्रयम्। सर्वभूतनिवासोऽसि- वासुदेव नमोस्तुते।।

卐 दश सप्त च नामानि- मण्डलान्तेषु यः पठेत्। स शिवस्य पदं गत्वा- शिवलोके महीयते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स विष्णोश्च पदं गत्वा- विष्णुलोके महीयते।

卐 शिव शंकर विघ्नेश्वर विठ्ठल मुकुन्द वामन वासुदेव।।

卐 साक्षान्मूलप्रमाणाय- विष्णोरमिततेजसे।

卐 आद्याय सर्ववेदानां- ऋग्वेदाय नमो नमः।। इति प्रथमं मण्डलम्।।

## द्वितीयं मण्डलम्

2.01 त्वमग्न इति षोळशर्चस्य सूक्तस्य, शौनको गृत्सदोऽग्नि-र्जगती।।

❀02.05.17 卐त्वमग्ने द्युभि स्त्वमाशुशुक्षणि- स्त्वमद्भ्य स्त्वमश्मन स्परि। त्वँ वनेभ्य स्त्वमोषधीभ्य- स्त्वन्नृणा.न्नृपते जायसे शुचिः।।

卐 तवाग्ने होत्र.न्तव पोत्र.मृत्विय-न्तव नेष्ट्र.न्त्वमग्नि.दृतायतः। तव प्रशास्त्र.न्त्वमध्वरीयसि- ब्रह्मा चासि गृहपतिश्च नो दमे।।

卐 त्वमग्न इन्द्रो वृषभ स्सता.मसि- त्वँ विष्णु रुरुगायो नमस्यः। त्वं ब्रह्मा रयिवि.द्ब्रह्मणस्पते- त्वँ विधर्त स्सचसे पुरन्ध्या।।

卐 त्वमग्ने राजा वरुणो धृतव्रत- स्त्वं मित्रो भवसि दस्म ईड्यः। त्वमर्यमा सत्पति र्यस्य संभुज- न्त्वमंशो विदथे देव भाजयुः।।

卐 त्वमग्ने त्वष्टा विधते सुवीर्य-न्तव ग्नावो मित्रमह स्सजात्यम्। त्वमाशुहेमा ररिषे स्वश्व्य-न्त्वन्नरां शर्धो असि पूरुवसुः।।

❀02.05.18 卐त्वमग्ने रुद्रो असुरो महो दिव- स्त्वं शर्धो मारुतं पृक्ष ईशिषे। त्वँ वातै ररुणै र्यासि शङ्गय-स्त्वं पूषा विधतः पासि नु त्मना।।

卐 त्वमग्ने द्रविणोदा अरङ्कृते- त्वन्देव स्सविता रत्नधा असि। त्वं भगो नृपते वस्व ईशिषे- त्वं पायु र्दमे यस्ते.ऽविधत्।।

卐 त्वामग्ने दम आ विश्पतिँ विश-स्त्वां राजानं सुविदत्र.मृञ्जते। त्वँ विश्वानि स्वनीक पत्यसे- त्वं सहस्राणि शता दश प्रति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 त्वामग्ने पितर.मिष्टिभि र्नर-स्त्वां भ्रात्राय शम्या तनूरुचम्। त्वं पुत्रो भवसि यस्तेऽविध.त्त्वं सखा सुशेवः पास्याधृषः।।

卐 त्वमग्न ऋभु राके नमस्य1(अ)-स्त्वँ वाजस्य क्षुमतो राय^ ईशिषे। त्वँ वि भास्यनु दक्षि दावने- त्वँ विशिक्षु रसि यज्ञ.मातनिः।।

❀02.05.19 卐त्वमग्ने अदिति र्देव दाशुषे- त्वं होत्रा भारती वर्धसे गिरा। त्वमिळा शतहि.मासि दक्षसे- त्वँ वृत्रहा वसुपते सरस्वती।।

卐 त्वमग्ने सुभृत^ उत्तमँ वय- स्तव स्पार्हे वर्ण आ सन्दृशि श्रियः। त्वँ वाजः प्रतरणो बृह.न्नसि- त्वं रयि र्बहुलो विश्वत स्पृथुः।।

卐 त्वामग्न आदित्यास^आस्य1(अ)-न्त्वाञ्जिह्वां शुचय श्चक्रिरे कवे। त्वां रातिषाचो अध्वरेषु सश्चिरे- त्वे देवा हवि.रद.न्त्याहुतम्।।

卐 त्वे अग्ने विश्वे अमृतासो अद्रुह- आसा देवा^ हवि.रद.न्त्याहुतम्। त्वया मर्तास स्स्वदन्त आसुति- न्त्वङ्गर्भो वीरुधा.ञ्जज्ञिषे शुचिः।।

卐 त्वन्ता.न्त्सञ्च प्रति चासि मज्मना-ऽग्ने सुजात प्र च देव रिच्यसे। पृक्षो यदत्र महिना वि ते भुव-दनु द्यावापृथिवी~ रोदसी उभे~।।

卐 ये स्तोतृभ्यो गोअग्रा.मश्वपेशस-मग्ने राति.मुपसृजन्ति सूरयः। अस्माञ्च तांश्च प्र हि नेषि वस्य^ आ- बृह.द्वदेम विदथे सुवीराः।।

2.02 यज्ञेनेति त्रयोदशर्चस्य सूक्तस्य, शौनको गृत्समदोऽग्नि-र्जगती।।

❀02.05.20 卐यज्ञेन वर्धत जातवेदस-मग्निँ यजध्वं हविषा तना गिरा। समिधानं सुप्रयसं स्वर्णर- न्द्युक्षं होतारँ वृजनेषु धूर्षदम्।।

卐 अभि त्वा नक्ती.रुषसो ववाशिरे-ऽग्ने वत्स.न्न स्वसरेषु धेनवः। दिवइ.वे.दरति र्मानुषा युगा- क्षपो भासि पुरुवार सँयतः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 तन्देवा बुध्ने रजस स्सुदंसस-न्दिवस्पृथिव्यो ररति.न्न्येरिरे। रथमिव वेद्यं शुक्रशोचिष-मग्निं मित्र.न्न क्षितिषु प्रशंस्यम्।।

卐 तमुक्षमाणं रजसि स्व आ दमे- चन्द्रमिव सुरुचं ह्वार आ दधुः। पृश्न्याः पतर.श्चितयन्त.मक्षभिः- पाथो न पायु.ञ्जनसी~ उभे~ अनु।।

卐 स होता विश्वं परि भूत्वध्वर-न्तमु हव्यै मनुष^ ऋञ्जते गिरा। हिरिशिप्रो वृधसानासु जर्भुर- द्यौ र्न स्तृभि श्चितय.द्रोदसी अनु।।

❀02.05.21 卐स नो रेव.त्समिधान स्स्वस्तये- सन्ददस्वा.न्रयि.मस्मासु दीदिहि। आ नः कृणुष्व सुविताय रोदसी- अग्ने हव्या मनुषो देव वीतये।।

卐 दा^ नो अग्ने बृहतो दा^ स्सहस्रिणो- दुरो न वाजं श्रुत्या अपा वृधि। प्राची~ द्यावापृथिवी~ ब्रह्मणा कृधि- स्व1(अ)र्ण शुक्र.मुषसो वि दिद्युतुः।।

卐 स ईधान^ उषसो राम्या^ अनु- स्व1(अ)र्ण दीदे.दरुषेण भानुना। होत्राभि रग्नि र्मनुष स्स्वध्वरो- राजा विशा.मतिथि श्चारु रायवे।।

卐 एवा^ नो अग्ने अमृतेषु पूर्व्य- धीष्पीपाय बृहद्दिवेषु मानुषा। दुहाना धेनु र्वृजनेषु कारवे- त्मना शतिनं पुरुरूपं.मिषणि।।

卐 वय.मग्ने अर्वता वा सुवीर्यं- ब्रह्मणा वा चितयेमा^ जना~ अति। अस्माक.न्द्युम्न.मधि पञ्च कृष्टि-षूच्चा स्व1(अ)र्ण शुशुचीत दुष्टरम्।।

卐 स नो बोधि सहस्य प्रशंस्यो- यस्मि.न्त्सुजाता^ इषयन्त सूरयः। यमग्ने यज्ञ.मुपयन्ति वाजिनो- नित्ये तोके दीदिवांसं स्वे दमे।।

卐 उभयासो जातवेद स्स्याम ते- स्तोतारो अग्ने सूरयश्च शर्मणि। वस्वो रायः पुरुश्चन्द्रस्य भूयसः- प्रजावत स्स्वपत्यस्य शग्धि नः।।

卐 ये स्तोतृभ्यो गोअग्रा.मश्वपेशस-मग्ने राति.मुपसृजन्ति सूरयः। अस्मा.न्च तांश्च प्र हि नेषि वस्य^आ- बृह.द्वदेम विदथे सुवीराः।।

2.01 समिद्धो अग्निरित्येकादशर्चस्य सूक्तस्य, शौनको गृत्समद- इध्मो- नराशंस- इळो- बर्हि- र्देवीर्द्वार- उषासानक्ता- दैव्यौ होतारौ- सरस्व-तीळाभारत्य-स्त्वष्टा- वनस्पति- स्वाहाकृतय इति क्रमेण देवता- स्त्रिष्टुप्।।

❀02.05.22 ☞ 卐समिद्धो अग्नि.र्निहित॰ पृथिव्यां- प्रत्य.ङ्विश्वानि भुवना.न्यस्थात्। होता पावक॰ प्रदिव स्सुमेधा^- देवो देवा.न्यज.त्वग्नि रर्हन्न्।।

卐 नराशंस॰ प्रति धामा.न्यञ्ज-न्तिस्रो दिव॰ प्रति मह्ना स्वर्चिः। घृतप्रुषा मनसा हव्य.मुन्द-न्मूर्ध.न्यज्ञस्य समनक्तु देवान्।।

卐 ईळितो अग्ने मनसा नो अर्ह-न्देवा.न्यक्षि मानुषा.त्पूर्वो अद्य। स आ वह मरुतां शर्धो अच्युत-मिन्द्र.न्नरो बर्हिषदँ यजध्वम्।।

卐 देव बर्हि र्वर्धमानं सुवीरं- स्तीर्णं राये सुभरं वेद्य~ स्याम्। घृते.नाक्तँ वसव स्सीद.तेदँ- विश्वे देवा^ आदित्या^ यज्ञियासः।।

卐 वि श्रयन्ता.मुर्विया हूयमाना-^ द्वारो देवी स्सुप्रायणा^ नमोभिः। व्यचस्वती र्विप्रथन्ता.मजुर्या-^ वर्णं पुनाना^ यशसं सुवीरम्।।

❀02.05.23 卐☞साध्वपांसि सनता न^ उक्षिते~- उषासानक्ता वय्येव रण्विते~। तन्तु.न्ततं सँवयन्ती~ समीची~- यज्ञस्य पेश स्सुदुघे~ पयस्वती~।।

卐 दैव्या होतारा प्रथमा ꣳविदुष्टर^- ऋजु यक्षत स्समृचा ꣳवपुष्टरा। देवा.न्यज.न्तावृतुथा समञ्जतो-नाभा पृथिव्या^ अधि सानुषु त्रिषु।।

卐 सरस्वती साधयन्ती धियन्न^- इळा देवी भारती विश्वतूर्तिः। तिस्रो देवी स्स्वधया बर्हि.रेद-मच्छिद्रं पान्तु शरण. न्निषद्य।।

卐 पिशङ्गरूप स्सुभरो वयोधा- श्श्रुष्टी वीरो जायते देवकामः। प्रजा.न्त्वष्टा वि ꣳष्यतु नाभि-मस्मे- अथा देवाना.मप्येतु पाथः।।

卐 व॒नस्पति॑ रवसृ॒ज.न्नुप॑.स्था-द॒ग्नि र्ह॒वि स्सूदयाति॒ प्र धी॒भिः। त्रि॒धा सम॑क्त.न्नयतु प्रजा॒न-न्दे॒वेभ्यो॒ दैव्य॑ श्शमि॒.तोप॑ ह॒व्यम्।।

卐 घृतं मिमिक्षे घृ॒त.म॑स्य॒ योनि॑- र्घृ॒ते श्रि॒तो घृ॒त.म्व॑स्य॒ धाम॑। अ॒नु॒ष्व॒ध.मा व॑ह मा॒दय॑स्व॒- स्वाहा॑कृतँ वृषभ वक्षि ह॒व्यम्।।

🕉 2.04 हुव व इति नवर्चस्य सूक्तस्य, भार्गव स्सोमाहुति-रग्नि-स्त्रिष्टुप्।।

❀02.05.24 卐हु॒वे व॑ स्सु॒द्योत्मा॑नं सुवृ॒क्तिं- वि॒शा.म॒ग्नि.मति॑थिं सु॒प्र॒यस॑म्। मि॒त्रइ॑व॒ यो दि॑धि॒षाय्यो॒ भू-द्दे॒व᳚ आदे॑वे॒ जने॑ जा॒तवे॑दाः।।

卐 इ॒मँ वि॒धन्तो॑ अ॒पां स॒धस्थे॑- द्वि॒ताऽद॑धु॒ र्भृग॑वो वि॒क्ष्वा॒3(आ)योः। ए॒ष᳚ विश्वा॑.न्य॒भ्य॑स्तु॒ भूमा॑- दे॒वाना॑-म॒ग्नि र॑रति र्जी॒राश्वः॑।।

卐 अ॒ग्नि.न्दे॒वासो॒ मानु॑षीषु वि॒क्षु- प्रि॒य न्धुः॑ क्षे॒ष्यन्तो॒ न मि॒त्रम्। स दी॑दय.दुश॒ती रूर्म्या॒᳚ आ-द॒क्षाय्यो॒ यो दास्व॑ते॒ दम॒ आ।।

卐 अ॒स्य र॒ण्वा स्वस्ये॑व पु॒ष्टि- स्सन्दृ॑ष्टि र॒स्य हि॑या॒नस्य॒ दक्षोः॑। वि यो भरि॑भ्र॒.दोष॑धीषु जि॒ह्वा-मत्यो॒ न रथ्यो॑ दोधवीति॒ वारा॑न्।।

卐 आ यन्मे॒ अभ्वँ॑ व॒नद॒ः पन॑-न्तोशि॒ग्भ्यो॒ नामि॑मीत॒ वर्ण॑म्। स चि॒त्रेण॑ चिकिते॒ रंसु॑ भा॒सा- जु॒जु॒र्वाँ यो॒ मुहु॒रा युवा॒ भूत्।।

❀02.05.25 卐आ यो वना॑ ता॒तृषा॒णो- न भाति॒ वा.र्ण प॒था रथ्ये॑व स्वानीत्। कृ॒ष्णाध्वा॒ तपू॑ र॒ण्व श्चि॑केत॒- द्यौरि॑व॒ स्मय॑माने॒ नभो॑भिः।।

卐 स यो व्यस्था॑.द॒भि दक्ष॑.दु॒र्वी- प॒शु र्नैति॑ स्व॒यु रगो॑पाः। अ॒ग्नि श्शो॒चिष्मा॑ँ अत॒सा.न्यु॒ष्ण-न्कृ॒ष्णव्य॑थि रस्वदय॒.न्न भूम॑।।

卐 नू ते॒ पूर्व॒.स्याव॑सो॒ अधी॑तौ- तृ॒तीये॑ वि॒दथे॒ मन्म॑ शंसि। अ॒स्मे अ॑ग्ने सँय॒.द्वीरं॑ बृ॒हन्त॑-ङ्क्षु॒मन्तं॒ वाजं॑ स्व॒प॒त्यं र॒यिन्दाः॑।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 त्वया यथा गृत्समदासो अग्ने- गुहा वन्वन्त^ उपराꣳ अभि ष्युः~। सुवीरासो अभिमातिषाह- स्स्म.त्सूरिभ्यो गृणते तद्वयो धाः।।

2.05 होताऽजनिष्टेत्यष्टर्चस्य सूक्तस्य, भार्गव स्सोमाहुति-रग्नि-स्त्रिष्टुप्।।

02.05.26 卐होताऽजनिष्ट चेतनꣳ- पिता पितृभ्य^ ऊतये। प्रयक्ष.ञ्जेन्यँ वसु- शकेम वाजिनो यमम्।।

卐 आ यस्मि.न्त्सप्त रश्मय- स्तता^ यज्ञस्य नेतरि। मनुष्व.द्दैव्य.मष्टमं- पोता विश्व.न्तदिन्वति।।

卐 दधन्वे वा यदी.मनु- वोच.द्ब्रह्माणि वेरु तत्। परि विश्वानि काव्या- नेमि श्चक्रमि.वाभवत्।।

卐 साकं हि शुचिना शुचिꣳ- प्रशास्ता क्रतुनाऽजनि। विद्वाꣳ अस्य व्रता ध्रुवा- वयाइवानु रोहते।।

卐 ता^ अस्य वर्ण.मायुवो- नेष्टु स्सचन्त धेनवः। कुवि.त्तिसृभ्य^ आ वरं- स्वसारो या^ इदँ ययुः।।

卐 यदी मातु रुप स्वसा- घृतं भर.न्त्यस्थित। तासा.मध्वर्यु रागतौ- यवो वृष्टीव मोदते।।

卐 स्व.स्स्वाय धायसे- कृणुता.मृत्वि.गृत्विजम्। स्तोमँ यज्ञ.ञ्चाऽऽदरँ- वनेमा ररिमा वयम्।।

卐 यथा विद्वाꣳ अर.ङ्कर-द्विश्वेभ्यो यजतेभ्यः। अय मग्ने त्वे अपि- यँ यज्ञ.ञ्चकृमा वयम्।।

2.06 इमां म इत्यष्टर्चस्य सूक्तस्य, भार्गव स्सोमाहुति-रग्नि-र्गायत्री।।

02.05.27 卐इमां मे अग्ने समिध-मिमा मुपसदँ वनेः~। इमा^ उ षु श्रुधी गिरः।।

卐 अया ते अग्ने विधे-मोर्जो नपा.दश्व.मिष्टे। एना सूक्तेन सुजात।।

卐 तन्त्वा गीर्भि र्गिर्वणस-न्द्रविणस्यु.न्द्रविणोदः। सपर्येम सपर्यवः।।

卐 स बोधि सूरि र्मघवा- वसुपते वसुदावन्न्। युयोध्य1(अ)स्म.द्द्वेषांसि।।

卐 सनो वृष्टि.न्दिवस्परि- सनो वाज.मनर्वाणम्। स न स्सहस्रिणी रिषः।।

卐 ईळाना.यावस्यवे- यविष्ठ दूत नो गिरा। यजिष्ठ होतरा गहि।।

卐 अन्त ह्यग्न ईयसे- विद्वा.ञ्जन्मोभया कवे। दूतो जन्येव मित्र्यः।।

卐 स विद्वाꣳ आ च पिप्रयो- यक्षि चिकित्व^ आनुषक्। आ चास्मि.न्त्सत्सि बर्हिषि।।

2.07 श्रेष्ठमिति षड्ऋचस्य सूक्तस्य, भार्गव स्सोमाहुति-रग्नि-र्गायत्री।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀02.05.28 श्रेष्ठँ यविष्ठ भार-ताग्ने द्युमन्त.मा भर। वसो~ पुरुस्पृहं रयिम्।।

卐 मा नो अराति रीशत- देवस्य मर्त्यस्य च। पर्षि तस्या^ उत द्विषः।।

卐 विश्वा^ उत त्वया वय-न्धारा^ उदन्याइव। अति गाहेमहि द्विषः।।

卐 शुचिः पावक व-न्द्योऽग्ने बृह.द्वि रोचसे। त्वङ्घृतेभि राहुतः।।

卐 त्वन्नो असि भार-ताग्ने वशाभि रुक्षभिः। अष्टापदीभि राहुतः।।

卐 द्रुन्न स्सर्पिरासुतिः- प्रत्नो होता वरेण्यः। सहस स्पुत्रो अद्भुतः।।

2.08 वाजयन्निति षड्चस्य सूक्तस्य, शौनको गृत्समदोऽग्नि-र्गायत्री-अन्त्याऽनुष्टुप्।।

❀02.05.29 卐वाजयन्निव नू रथा-न्योगाँ अग्ने रुप स्तुहि। यशस्तमस्य मीळ्हुषः।।

卐 य स्सुनीथो ददाशु-षेऽजुर्यो जरय.न्नरिम्। चारुप्रतीक^ आहुतः।।

卐 य^ उ श्रिया दमे.ष्वा- दोषोषसि प्रशस्यते। यस्य व्रत.न्न मीयते।।

卐 आ य.स्स्व1(अ)र्ण भानुना- चित्रो विभा.त्यर्चिषा। अञ्जानो अजरै रभि।।

卐 अत्रि.मनु स्वराज्य-मग्नि.मुक्थानि वावृधुः। विश्वा^ अधि श्रियो दधे।।

卐 अग्ने रिन्द्रस्य सोमस्य- देवाना.मूतिभि र्वयम्। अरिष्यन्त स्सचेम-ह्यभि ष्याम पृतन्यतः।।इति पञ्चमाध्याय स्समाप्तः।।

## द्वितीयाष्टके षष्ठाध्यायः। वर्गाः(1-32)

2.09 नि होतेति षड्चस्य सूक्तस्य, शौनको गृत्समदोऽग्नि-स्त्रिष्टुप्

❀02.06.01 नि होता होतृषदने विदान- स्त्वेषो दीदिवाँ असद.त्सुदक्षः। अदब्धव्रतप्रमति र्वसिष्ठ- स्सहस्रंभर श्शुचिजिह्वो अग्निः।।

卐 त्वन्दूत स्त्वमु नः परस्पा^- स्त्वँ वस्य^ आ वृषभ प्रणेता। अग्ने तोकस्य नस्तने तनूना-मप्रयुच्छ.न्दीद्य.द्बोधि गोपाः।।

卐 विधेम ते परमे जन्म.न्नग्ने- विधेम स्तोमै रवरे सधस्थे। यस्मा.द्योने रुदारिथा यजे- तं प्र त्वे हवींषि जुहुरे समिद्धे।।

卐 अग्ने यजस्व हविषा यजीया.ञ्छ्रुष्टी देष्ण.मभि गृणीहि राधः। त्वं ह्यसि रयिपती रयीणा-न्त्वं शुक्रस्य वर्चसो मनोता।।

卐 उभयन्ते न क्षीयते वसव्य-न्दिवेदिवे जायमानस्य दस्म। कृधि क्षुम.न्तञ्जरितार.मग्ने- कृधि पतिं स्वपत्यस्य रायः।।

卐 सैनाऽनीकेन सुविदत्रो अस्मे- यष्टा देवाꣳ आयजिष्ठ स्स्वस्ति। अदब्धो गोपा^ उत नꣳ परस्पा-^ अग्ने द्युम.दुत रेव.द्दिदीहि।।

☬ 2.10 जोहूत्र इति षड्डचस्य सूक्तस्य, शौनको गृत्समदोऽग्नि-स्त्रिष्टुप्।।

❀02.06.02 卐जोहूत्रो अग्निꣳ प्रथमꣳ पिते-वेळ स्पदे मनुषा यत्समिद्धः। श्रियं वसानो अमृतो विचेता-^ मर्मृजेन्य श्श्रवस्य1(अ)स्स वाजी।।

卐 श्रूया^ अग्नि श्चित्रभानु र्हवं मे- विश्वाभि र्गीर्भि रमृतो विचेताः। श्यावा रथं वहतो रोहिता -वोता रुषाह चक्रे विभृत्रः।।

卐 उत्तानाया.मजनय.न्त्सुषूतं- भुव.दग्निꣳ पुरुपेशासु गर्भः। शिरिणाया.ञ्चिदक्तुना महोभि- रपरीवृतो वसति प्रचेताः।।

卐 जिघ.र्म्यग्निं हविषा घृतेन- प्रतिक्षियन्तं भुवनानि विश्वा। पृथु.न्तिरश्चा वयसा बृहन्तं- व्यचिष्ठ.मन्नै रभस न्दृशानम्।।

卐 आ विश्वतꣳ प्रत्यञ्च.ञ्जिघ-र्म्यरक्षसा मनसा तज्जुषेत। मर्यश्री स्स्पृहय.द्वर्णो- अग्नि र्नाभिमृशे तन्वा3(आ) जर्भुराणः।।

卐 ज्ञेया भागं सहसानो वरेण- त्वादूतासो मनुव.द्वदेम। अनून.मग्नि.ञ्जुह्वा वचस्या- मधुपृच.न्धनसा जोहवीमि।।

☬ 2.11 श्रुधी हवमित्येकविंशत्यृचस्य सूक्तस्य, शौनको गृत्समद- इन्द्रो- विराड्डाना-अन्त्या त्रिष्टुप्।।

❀02.06.03 卐श्रुधी हव.मिन्द्र मा रिषण्य- स्स्याम ते दावने वसूनाम्। इमा^ हि त्वामूर्जो वर्धयन्ति- वसूयव स्सिन्धवो न क्षरन्तः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 सृजो महीरिन्द्र या^ अपिन्वः- ꣳपरिष्ठिता^ अहिना शूर पूर्वीः। अमर्त्य.श्चिद्दासं मन्यमान-मवाभिन.
दुक्थै र्वावृधानः।।
卐 उक्थे.ष्विन्नु शूर येषु चाक-न्त्स्तोमे.ष्विन्द्र रुद्रियेषु च। तुभ्ये.देता यासु मन्दसानः- प्र वायवे सिस्रते
न शुभ्राः।।
卐 शुभ्र.न्नु ते शुष्मँ वर्धयन्त- श्शुभ्रँ वज्रं बाह्वो र्दधानाः। शुभ्र स्त्वमिन्द्र वावृधानो अस्मे- दासी र्विश
स्सूर्येण सह्याः।।
卐 गुहा हित.ङ्गुह्य.ङ्गूळ्ह.म-प्स्वपीवृतं मायिन.ङ्क्षियन्तम्। उतो~ अपो द्या.न्तस्तभ्वांस-मह.न्नहिं शूर
वीर्येण।।
❀02.06.04 卐स्तवा नु त इन्द्र पूर्व्या महा-न्युत स्तवाम नूतना कृतानि। स्तवा वज्रं बाह्वो रुशन्तं-
स्तवा हरी~ सूर्यस्य केतू~।।
卐 हरी~ नु त इन्द्र वाजयन्ता- घृतश्चुतं स्वार.मस्वार्ष्टाम्। वि समना भूमि रप्रथि-ष्टारंस्त पर्वत.श्चि
त्सरिष्यन्न्।।
卐 नि पर्वत स्साद्यप्रयुच्छ-न्त्सं मातृभि र्वावशानो अक्रान्। दूरे पारे वाणीं वर्धयन्त-^ इन्द्रेषिता.न्धमनिं
पप्रथ.न्नि।।
卐 इन्द्रो महां सिन्धु.माशयानं- मायाविनँ वृत्र.मस्फुर.न्निः। अरेजेतां रोदसी भियाने~- कनिक्रदतो
वृष्णो अस्य वज्रात्।।
卐 अरोरवी.द्वृष्णो अस्य व-ज्रोऽमानुषँ यन्मानुषो निजूर्वात्। नि मायिनो दानवस्य माया-^
अपादय.त्पपिवा.न्त्सुतस्य।।
❀02.06.05 पिबापिबे.दिन्द्र शूर सोमं- मन्दन्तु त्वा मन्दिन स्सुतासः। पृणन्त.स्ते कुक्षी~ वर्धय-
न्त्वित्था सुतः पौर^ इन्द्र.माव।।
卐 त्वे इन्द्रा.प्यभूम विप्रा^ धियँ- वनेम ऋतया सपन्तः। अवस्यवो धीमहि प्रशस्तिं- सद्यस्ते रायो दावने
स्याम।।

卐 स्याम ते त इन्द्र ये त ऊती- अवस्यव^ ऊर्जं वर्धयन्तः। शुष्मिन्तमँ यञ्चाकनाम दे-वास्मे रयिं रासि वीरवन्तम्।।

卐 रासि क्षयं रासि मित्र.मस्मे- रासि शर्ध^ इन्द्र मारुतन्नः। सजोषसो ये च मन्दसानाꣳ- प्र वायवꣳ पा.न्त्यग्रणीतिम्।।

卐 व्यन्त्विन्नु येषु मन्दसान- स्तृप.त्सोमं पाहि द्रह्य.दिन्द्र। अस्मान्त्सु पृत्स्वा तरु-त्रावर्धयो द्यां बृहद्भि रर्कैः।।

❀02.06.06 卐बृहन्त^ इन्नु ये ते तरु-त्रोक्थेभि.र्वा सुम्न.माविवासान्। स्तृणानासो बर्हिꣳ पस्त्याव-त्त्वोता इदिन्द्र वाज.मग्मन्न्।।

卐 उग्रे.ष्विन्नु शूर मन्दसान- स्त्रिकद्रुकेषु पाहि सोम.मिन्द्र। प्रदोधुव.च्छ्मश्रुषु प्रीणानो- याहि हरिभ्यां सुतस्य पीतिम्।।

卐 धिष्वा शव श्शूर येन वृत्र-मवाभिन द्दानु.मौर्णवाभम्। अपावृणो ज्योति रार्याय- नि सव्यत स्सादि दस्यु रिन्द्र।।

卐 सनेम ये त ऊतिभि स्तरन्तो- विश्वा स्स्पृध^ आर्येण दस्यून्। अस्मभ्य.न्त.त्त्वाष्ट्रं विश्वरूप-मरन्धय स्साख्यस्य त्रिताय।।

卐 अस्य सुवानस्य मन्दिन स्त्रितस्य- न्यर्बुदं वावृधानो अस्तः~। अवर्तय त्सूर्यो न चक्रं-भिन.द्वल.मिन्द्रो अङ्गिरस्वान्।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽति धग्भगो नो- बृह.द्वदेम विदथे सुवीराः।।

2.12 यो जात इति पञ्चदशर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्र-स्त्रिष्टुप्।।

❀02.06.07☞ यो जात^ एव प्रथमो मनस्वा-न्देवो देवा.न्क्रतुना पर्यभूषत्। यस्य शुष्मा.द्रोदसी अभ्यसेता-न्नृम्णस्य मह्ना स जनास^ इन्द्रः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 यः पृथिवीं व्यथमाना.मदृंह-द्यः पर्वता.न्प्रकुपिताँ अरम्णात्। यो अन्तरिक्षं विममे वरीयो- यो द्या मस्तभ्ना.त्स जनास^ इन्द्रः।।

卐 यो हत्वाऽहि.मरिणा.त्सप्त सिन्धू-न्यो गा^ उदाज.दपधा वलस्य। यो अश्मनो रन्त रग्नि ञ्जजान- सँवृ.क्समत्सु स जनास^ इन्द्रः।।

卐 येनेमा विश्वा च्यवना कृतानि- यो दासँ वर्ण.मधर.ङ्गुहाऽकः~। श्वघ्नीव यो जिगीवाँ लक्ष.माद-दर्यः पुष्टानि स जनास^ इन्द्रः।।

卐 यं स्मा पृच्छन्ति कुह सेति घोर-मुतेमाहु र्नैषो अस्ती.त्येनम्। सो अर्यः पुष्टी र्विजइवाऽऽमिनाति- श्रदस्मै धत्त स जनास^ इन्द्रः।।

❀02.06.08 ☞यो रध्रस्य चोदिता यः कृशस्य- यो ब्रह्मणो नाधमानस्य कीरेः। युक्तग्राव्णो योऽविता सुशिप्र- स्सुतसोमस्य स जनास^ इन्द्रः।।

卐 यस्याश्वासः प्रदिशि यस्य गावो- यस्य ग्रामा^ यस्य विश्वे रथासः। यस्सूर्यँ य^ उषस.ञ्जजान- यो अपा न्नेता स जनास^ इन्द्रः।।

卐 यङ्क्रन्दसी~ सँयती~ विह्वयेते~- परेऽवर उभया^अमित्राः। समान.ञ्चिद्रथ.मातस्थिवांसा- नाना हवेते~ स जनास^ इन्द्रः।।

卐 यस्मान्न ऋते विजयन्ते जनासो- यँ युध्यमाना^ अवसे हवन्ते। यो विश्वस्य प्रतिमानं बभूव- यो अच्युतच्यु.त्स जनास^ इन्द्रः।।

卐 यश्शश्वतो मह्येनो दधाना-नमन्यमाना.ञ्छर्वा जघान। यश्शर्धते नानुददाति शृध्याँ- यो दस्योर्हन्ता स जनास^ इन्द्रः।।

❀02.06.09 卐☞य श्शम्बरं पर्वतेषु क्षियन्त-ञ्चत्वारिंश्यां शर.द्यन्वविन्दत्। ओजायमानँ यो अहिं.ञ्जघान- दानुं शयानं स जनास^ इन्द्रः।।

卐 य स्सप्तरश्मि र्वृषभ स्तुविष्मा-नवासृज.त्सर्तवे सप्त सिन्धून्। यो रौहिण.मस्फुर.द्वज्रबाहु- र्द्यामारोहन्तं स जनास^ इन्द्रः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

卐 द्यावा चिदस्मै पृथिवी~ नमेते~- शुष्मा.च्चिदस्य पर्वता^ भयन्ते। य स्सोमपा^ निचितो वज्रबाहु- र्यो वज्रहस्त स्स जनास^ इन्द्रः।।

卐 य स्सुन्वन्त.मवति यः पचन्तँ- य श्शंसन्तँ य श्शशमान मूती। यस्य ब्रह्म वर्धनँ यस्य सोमो- यस्येदं राध स्स जनास^ इन्द्रः।।

卐 य स्सुन्वते पचते दुध्र^ आ चि-द्वाज.न्दर्दर्षि स किलासि सत्यः। वयन्त इन्द्र विश्वह प्रियास- स्सुवीरासो विदथ.मा वदेम।।

2.13 ऋतुर्जनित्रीति त्रयोदशर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्रो- जगति -अन्त्या त्रिष्टुप्।।

❀02.06.10 卐ऋतु र्जनित्री तस्या^ अपस्परि- मक्षू जात^ आऽविश.द्यासु वर्धते। तदाहना^ अभव त्पिप्युषी प-योऽंशोः पीयूषं प्रथम.न्तदुक्थ्यम्।।

卐 सध्रीमा यन्ति परि बिभ्रतीः पयो- विश्वप्स्न्याय प्र भरन्त भोजनम्।- समानो अध्वा प्रवता.मनुष्यदे यस्ता.ऽकृणोः प्रथमं सास्युक्थ्यः।।

卐 अन्वेको वदति यद्ददाति त-द्रूपा मिन.न्तदपा^ एक^ ईयते। विश्वा^ एकस्य विनुद स्तितिक्षते- यस्ता.ऽकृणोः प्रथमं सास्युक्थ्यः।।

卐 प्रजाभ्यः पुष्टिँ विभजन्त^ आसते- रयिमिव पृष्ठं प्रभवन्त.मायते। असिन्व.न्दंष्ट्रैः पितु रत्ति भोजनँ- यस्ता.ऽकृणोः प्रथमं सास्युक्थ्यः।।

卐 अधाकृणोः पृथिवीं सन्दृशे दिवे- यो धौतीना.महिह.न्नारिण.क्पथः। तन्त्वा स्तोमेभि रुदभि र्न वाजिन-न्देव.न्देवा^ अजन.न्त्सास्युक्थ्यः।।

❀02.06.11 卐यो भोजन.ञ्च दयसे च वर्धन-मार्द्रादा शुष्कं मधुम.द्दुदोहिथ। स शेवधि.न्नि दधिषे विवस्वति- विश्व.स्यैक^ ईशिषे सास्युक्थ्यः।।

卐 यः पुष्पिणी.श्च प्रस्व.श्च धर्मणा-ऽधि दाने व्य1(अ)वनी रधारयः। यश्चासमा^ अजनो दिद्युतो दिव-^ उरु रूर्वाँ अभित स्सास्युक्थ्यः।।

卐 यो नार्मरं सहवसु.न्निहन्तवे- पृक्षाय च दासवेशाय चावहः। ऊर्जयन्त्या^ अपरिविष्ट.मास्य-मुतै.वाद्य पुरुकृ.त्सास्युक्थ्यः।।

卐 शतँ वा यस्य दश साक.माद्य-^ एकस्य श्रुष्टौ यद्ध चोद.माविथ। अरज्जौ दस्यू.न्त्समुन.ब्दभीतये- सुप्राव्यो अभव स्सास्युक्थ्यः।।

卐 विश्वे.दनु रोधना^ अस्य पौंस्य-न्ददु रस्मै दधिरे कृत्नवे धनम्। षळस्तभ्ना विष्टिरः पञ्च सन्दशः- परि परो अभव स्सास्युक्थ्यः।।

❀02.06.12☞卐सुप्रवाचन.न्तव वीर वीर्य1(अँ)- यदेकेन क्रतुना विन्दसे वसु। ¤जातूष्ठिरस्य प्र वय स्सहस्वतो- या चकर्थ सेन्द्र विश्वाऽस्युक्थ्यः।।

卐 अरमय स्सरपस स्तराय क-न्तुर्वीतये च वय्याय च स्रुतिम्। नीचा सन्त.मुदनयः परावृजं- प्रान्धं श्रोणं श्रवय.न्त्सास्युक्थ्यः।।

卐 अस्मभ्य.न्तद्वसो~ दानाय राध- स्समर्थयस्व बहु ते वसव्यम्। इन्द्र यच्चित्रं श्रवस्या^ अनु द्यू-न्बृह.द्वदेम विदथे सुवीराः।।

☃ 2.14 अध्वर्यव इति द्वादशर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्र-स्त्रिष्टुप्।।

❀02.06.13 ☞卐अध्वर्यवो भर.तेन्द्राय सोम-मामत्रेभि स्सिञ्चता मद्य.मन्धः। कामी हि वीर स्सद.मस्य पीति-ञ्जुहोत वृष्णे तदि.देष^ वष्टि।।

卐 अध्वर्यवो यो अपो वव्रिवांसँ- वृत्र.ञ्जघा.नाशन्येव वृक्षम्। तस्मा एतं भरत तद्वशाय९- एष^ इन्द्रो अर्हति पीति.मस्य।।

卐 अध्वर्यवो यो दृभीक.ञ्जघान- यो गा^ उदाज.दप हि वलँ वः~। तस्मा एत.मन्तरिक्षे न वात-मिन्द्रं सोमै रोर्णुत जूर्न वस्त्रैः।।

卐 अध्वर्यवो य^ उरण.ञ्जघान- नव चख्वांस.न्नवति.ञ्च बाहून्। यो अर्बुद.मव नीचा बबाधे- तमिन्द्रं सोमस्य भृथे हिनोत।।

卐 अध्व॑र्यवो॒ य स्स्वश्न॑.ञ्जघान॒- य श्शुर्ष्ण॑.मशुषँ॒ यो व्य॑ंसम्। य॰ पिप्रु॑.न्नर्मुचिँ॒ यो रु॑धिक्रा॒-न्तस्मा॒ इन्द्रा॒.यान्ध॑सो जुहोत॥

卐 अध्व॑र्यवो॒ य श्श॒तं शम्ब॑रस्य॒- पुरो॑ बि॒भेदाश्म॑नेव पू॒र्वीः। यो व॒र्चिनं॑ श्श॒त.मिन्द्र॑ स्स॒हस्र॒-म॒पाव॑प॒.द्भर॑ता॒ सोम॑.मस्मै॥

❀02.06.14 卐अध्व॑र्यवो॒ य श्श॒तमा स॒हस्र॒- भूम्या॑ उ॒पस्थे॒ऽव॑प.ज्जघ॒न्वान्। कुत्स॑स्या॒ऽयोर॑तिथि॒ग्वस्य॑ वी॒रा॒-न्न्यावृ॑ण॒.ग्भर॑ता॒ सोम॑.मस्मै॥

卐 अध्व॑र्यवो॒ यन्न॑र॰ का॒मया॑ध्वे- श्रु॒ष्टी व॑हन्तो न॒शथा॒ तदिन्द्रे॑। गभ॑स्तिपूतं भरत श्रु॒ता-येन्द्रा॒य सोम॑ँ यज्यवो जुहोत॥

卐 अध्व॑र्यव॰ कर्त॑ना श्रु॒ष्टि.म॑स्मै॒- वने॒ निपू॑तँ॒ वन॒ उन्न॑यध्वम्। जु॒षा॒णो हस्त्य॑.म॒भि वा॑वशे व॒ इन्द्रा॑य॒ सोम॑ं मदि॒र.ञ्जु॑होत॥

卐 अध्व॑र्यव॰ पय॒.सोध॒ र्यथा॒ गो- स्सोमे॑भिरीं पृणता॒ भो॒ज.मिन्द्र॑म्। वेदा॒ह.म॑स्य॒ निभृ॑तं म॒ एत॒-द्दित्स॑न्तं॒ भूयो॑ यज॒त श्चि॑केत॥

卐 अध्व॑र्यवो॒ यो दि॒व्यस्य॒ वस्वो॒- य॰ पार्थि॑वस्य॒ क्षम्य॑स्य॒ राजा॑। तमूर्द॑र॒.न्न पृ॑णता॒ यवे॒-नेन्द्रं॑ सोमे॑भि॒स्तदपो॑ वो अस्तु॥

卐 अ॒स्मभ्य॒.न्तद्व॑सो॒ दा॒नाय॒ राध॒- स्सम॑र्थयस्व ब॒हु ते॑ वस॒व्य॑म्। इन्द्र॒ यच्चि॒त्रं श्र॑व॒स्या॒ अनु॒ द्यू-न्बृ॒ह.द्व॑देम वि॒दथे॑ सु॒वीराः॑॥

2.15 प्र घा न्विति दशर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्र-स्त्रिष्टुप्॥

❀02.06.15 प्र घा॒ न्व॑स्य म॒हतो॑ म॒हानि॑- स॒त्या स॒त्यस्य॒ कर॑णानि वोचम्। त्रिक॑द्रुके.ष्वपिब.त्सुत-स्या॒स्य मदे॒ अहि॒.मिन्द्रो॑ जघान॥

卐 अ॒वं॒शे द्याम॑स्तभाय.द्बृहन्त॒-मा रोद॑सी अपृण.द॒न्तरि॑क्षम्। स धा॑रय.त्पृथि॒वीं प॒प्रथ॑च्च॒- सोम॑स्य॒ ता मद॒ इन्द्र॑.श्चकार॥

卐 सद्मेव प्राचो वि मिमाय मानै- र्वज्रेण खान्यतृण.न्नदीनाम्। वृथाऽसृज.त्पथिभि र्दीर्घयाथै- स्सोमस्य ता मद इन्द्र.श्चकार।।

卐 स प्रवोळ्ह.न्परिगत्या दभीते- र्विश्व.मधा.गायुध.मिद्धे अग्नौ। सङ्गोभि रश्वै रसृज.द्रथेभि- स्सोमस्य ता मद इन्द्र.श्चकार।।

卐 स ई महो.न्धुनि.मेतो ररम्णा-त्सो अस्नातॄ.नपारय.त्स्वस्ति। त उत्स्नाय रयि.मभि प्र तस्थु- स्सोमस्य ता मद इन्द्र.श्चकार।।

❀02.06.16 卐सोदञ्चं सिन्धु.मरिणा.न्महित्वा- वज्रे.णान उषस स्सं पिपेष। अजवसो जविनीभि र्विवृश्च.न्त्सोमस्य ता मद इन्द्र.श्चकार।।

卐 स विद्वा॰ अपगोह.ङ्कनीना-मावि र्भव.न्नुदतिष्ठ.त्परावृक्। प्रति श्रोण स्स्थाद्व्य1(अ)न.गचष्ट- सोमस्य ता मद इन्द्र.श्चकार।।

卐 भिन.द्वल.मङ्गिरोभि र्गृणानो- वि पर्वतस्य दृंहिता.न्यैरत्। रिण.ग्रोधांसि कृत्रिमा.ण्येषां- सोमस्य ता मद इन्द्र.श्चकार।।

卐 स्वप्ने नाभ्युप्या चुमुरि.न्धुनिञ्च- जघन्थ दस्युं प्र दभीति.मावः। रम्भी चिदत्र विविदे हिरण्यं- सोमस्य ता मद इन्द्र.श्चकार।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽति धग्भगो नो- बृह.द्वदेम विदथे सुवीराः।।

2.16 प्र वः सतामिति नवर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्रो- जगति-अन्त्या त्रिष्टुप्।।

❀02.06.17 卐प्र व स्सता.ञ्ज्येष्ठतमाय सुष्टुति-मग्ना विव समिधाने हवि.र्भरे। इन्द्र.मजुर्य.ञ्जरयन्त .मुक्षितं- सना.द्युवान.मवसे हवामहे।।

卐 यस्मा.दिन्द्रा.द्बृहतः किञ्च.नेमृते- विश्वा.न्यस्मि.न्त्संभृताधि वीर्या। जठरे सोम.न्तन्वी3(ई) सहो महो- हस्ते वज्रं भरति शीर्षणि क्रतुम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 न क्षोणीभ्यां परिभ्वे त इन्द्रिय-न्न समुद्रैः पर्वतै रिन्द्र ते रथः। न ते वज्र.मन्वश्नोति कश्चन-यदाशुभिः पतसि योजना पुरु।।

卐 विश्वे ह्यस्मै यजताय धृष्णवे- क्रतुं भरन्ति वृषभाय सश्चते। वृषा यजस्व हविषा विदुष्टरः- पिबेन्द्र सोमँ वृषभेण भानुना।।

卐 वृष्णः कोशः पवते मध्व ऊर्मि- र्वृषभान्नाय वृषभाय पातवे। वृषणाऽध्वर्यू~ वृषभासो अद्रयो- वृषणं सोमँ वृषभाय सुष्वति।।

❀02.06.18 卐 वृषा ते वज्र^ उत ते वृषा रथो- वृषणा हरी~ वृषभा.ण्यायुधा। वृष्णो मदस्य वृषभत्व. मीशिष- इन्द्र सोमस्य वृषभस्य तृण्णुहि।।

卐 प्र ते नाव.न्न समने वचस्युवं- ब्रह्मणा यामि सवनेषु दाधृषिः। कुविन्नो अस्य वचसो निबोधिष-दिन्द्र मुत्स.न्न वसुन स्सिचामहे।।

卐 पुरा संबाधा.दभ्या ववृत्स्व नो- धेनु र्न वत्सँ यवसस्य पिप्युषी। सकृत्सु ते सुमतिभि श्शतक्रतो~- सं पत्नीभि र्न वृषणो नसीमहि।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽति धग्भगो नो- बृहद्वदेम विदथे सुवीराः।।

2.17 तदस्मा इति नवर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्रो-जगति-अन्त्येद्वे त्रिष्टुभौ।।

❀02.06.19 卐तदस्मै नव्य.मङ्गिरस्व दर्चत- शुष्मा^ यदस्य प्रत्नथो.दीरते। विश्वा यद्गोत्रा सहसा परीवृता-मदे सोमस्य दृंहिता.न्यैरयत्।।

卐 स भूतु यो ह प्रथमाय धायस- ओजो मिमानो महिमान.माऽतिरत्। शूरो यो युत्सु तन्वं परिव्यत-शीर्षणि द्यां महिना प्रत्यमुञ्चत।।

卐 अधाकृणोः प्रथमँ वीर्यँ मह-द्यदस्याग्रे ब्रह्मणा शुष्म.मैरयः। रथेष्ठेन हर्यश्वेन विच्च्युताः- प्र जीरय स्सिस्रते सध्र्य1(अ)क्पृथक्।।

卐 अधा यो विश्वा भुवनाऽभि मज्म-नेशानकृ.त्प्रवया^ अभ्यवर्धत। आद्रोदसी ज्योतिषा वह्नि.रातनो-त्सीव्य.न्तमांसि दुधिता समव्ययत्।।

卐 स प्राचीना.न्पर्वता.न्दृंह.दोजं-साऽधराचीन.मकृणो.दपा.मपः। अधारय.त्पृथिवीँ विश्वधायस-मस्तभ्ना.न्मायया द्यामवस्त्रसः।।

❀卐 20 सास्मा अरं बाहुभ्याँ यं पिताऽकृणो-द्विश्वस्मादा जनुषो वेदस स्परि। येना पृथिव्या.न्नि क्रिविं शयध्यै- वज्रेण हत्व्यवृण.क्तुविष्वणिः।।

卐 अमाजूरिव पित्रो स्सचा सती- समानादा सदस स्त्वामिये भगम्। कृधि प्रकेत.मुप मास्या भर- दद्धि भाग.न्तन्वो3(ओ) येन मामहः।।

卐 भोज.न्त्वामिन्द्र वयं हुवेम- ददिष्ट्व.मिन्द्रापांसि वाजान्। अवि.ड्ढीन्द्र चित्रया न^ ऊती- कृधि वृष.न्निन्द्र वस्यसो नः।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽति धग्भगो नो- बृह.द्वदेम विदथे सुवीराः।।

2.18 प्राता रथ इति नवर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्र-स्त्रिष्टुप्।।

❀02.06.21 卐प्राता~ रथो नवो योजि सस्नि- श्चतुर्युग स्त्रिकश स्सप्तरश्मिः। दशारित्रो मनुष्य स्स्वर्षा- स्स इष्टिभि र्मतिभी रंह्यो भूत्।।

卐 सास्मा अरं प्रथमं स द्वितीय-मुतो~ तृतीयं मनुष स्स होता। अन्यस्या^ गर्भ.मन्य ऊ जनन्त- सो अन्येभि स्सचते जेन्यो वृषा।।

卐 हरी~ नु कं रथ इन्द्रस्य योज-मायै सूक्तेन वचसा नवेन। मो~ षु त्वामत्र बहवो हि विप्रा-^ नि रीरम.न्यजमानासो अन्ये।।

卐 आ द्वाभ्यां हरिभ्या.मिन्द्र या-ह्या चतुर्भि रा षड्भि र्हूयमानः। आऽष्टाभि र्दशभि स्सोमपेय-मयं सुत स्सुमख मा मृधस्कः~।।

卐 आ विंशत्या त्रिंशता याह्यर्वा-ङाचत्वारिंशता हरिभि र्युजानः। आ पञ्चाशता सुरथेभि रि-न्द्राऽऽषष्ट्या सप्तत्या सोमपेयम्।।

❀02.06.22 卐आऽशीत्या नवत्या याह्यर्वा-ङाशतेन हरिभि रुह्यमानः। अयं हि ते शुनहोत्रेषु सोम-^ इन्द्र त्वाया परि॒षिक्तो मदाय।।

卐 मम ब्रह्मेन्द्र याह्यच्छा- विश्वा हरी~ धुरि धिष्वा रथस्य। पुरुत्रा हि विहव्यो बभू-थास्मि.ञ्छूर सवने मादयस्व।।

卐 न म इन्द्रेण सख्यँ वि योष-दस्मभ्यं.मस्य दक्षिणा दुहीत। उप ज्येष्ठे वरूथे गभस्तौ- प्रायेप्राये जिगीवांस स्स्याम।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽति धग्भगो नो- बृह.द्वदेम विदथे सुवीराः।।

2.19 अपाय्यस्येति नवर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्र-स्त्रिष्टुप्।।

❀02.06.23 卐अपाय्य.स्यान्धसो मदाय- मनीषिण स्सुवानस्य प्रयसः। यस्मि.न्निन्द्र॰ प्रदिवि वावृधान- ओको दधे ब्रह्मण्यन्तश्च नरः।।

卐 अस्य मन्दानो मध्वो वज्रह-स्तोऽहि.मिन्द्रो अर्णोवृतँ वि वृश्चत्। प्र यद्वयो न स्वसरा.ण्यच्छा- प्रयांसि च नदीना.ञ्चक्रमन्त।।

卐 स माहिन^ इन्द्रो अर्णो अपां- प्रैरय.दहि.हाच्छा समुद्रम्। अजनय.त्सूर्यँ विदद्गा-^ अक्तुनाह्नाँ वयुनानि साधत्।।

卐 सो अप्रतीनि मनवे पुरू-णीन्द्रो दाश.द्दाशुषे हन्ति वृत्रम्। सद्यो यो नृभ्यो अतसाय्यो भू-त्पस्पृधानेभ्य स्सूर्यस्य सातौ।।

卐 स सुन्वत इन्द्र स्सूर्य.मादेवो- रिण.ङ्मर्त्याय स्तवान्। आ यद्र.यि.ङ्गुहदवद्य.मस्मै- भर.दंश.न्नैतशो दशस्यन्।।

❀02.06.24 卐स रन्धय.त्सदिव स्सारथये- शुष्ण.मशुष.ङ्कुयव.ङ्कुत्साय। दिवोदासाय नवतिञ्च न-वेन्द्रः पुरो व्यैर.च्छम्बरस्य।।

卐 एवा त इन्द्रोचथ.महेम- श्रवस्या न त्मना वाजयन्तः। अश्याम तत्साप्त.माशुषाणा- ननमो वध रदेवस्य पीयोः।।

卐 एवा ते गृत्समदा श्शूर म-न्मावस्यवो न वयुनानि तक्षुः। ब्रह्मण्यन्त इन्द्र ते नवीय- इष.मूर्जं सुक्षितिं सुम्न.मश्युः।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽतिधग्भगो नो-बृह.द्वदेम विदथे सुवीराः।।

2.20 वयन्त इति नवर्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्र-स्त्रिष्टुप्-तृतीयाविराड्रूपा।।

❀02.06.25 卐वयन्ते वय इन्द्र विद्धि षु णः- प्र भरामहे वाजयुर्न रथम्। विपन्यवो दीध्यतो मनीषा- सुम्न.मियक्षन्त स्त्वावतो नॄन्।।

卐 त्वन्न इन्द्र त्वाभि.रूती- त्वायतो अभिष्टिपाऽसि जनान्। त्वमिनो दाशुषो वरू-तेत्थाधी रभि यो नक्षति त्वा।।

卐 स नो युवेन्द्रो जोहूत्र स्सखा- शिवो नरा.मस्तु पाता। यश्शंसन्तँ यश्शशमान.मूती- पचन्तञ्च स्तुवन्तञ्च प्रणेषत्।।

卐 तमु स्तुष इन्द्र.न्तङ्गृणीषे- यस्मि.न्पुरा वावृधु श्शाशदुश्च। स वस्वः कामं पीपर दियानो- ब्रह्मण्यतो नूतनस्याऽऽयोः।।

卐 सो अङ्गिरसा.मुचथा जुजुष्वा-न्ब्रह्मा तूतो.दिन्द्रो गातु.मिष्णन्न्। मुष्ण.न्नुषस स्सूर्येण स्तवा-नश्नस्य चिच्छिश्नथ.त्पूर्व्याणि।।

❀02.06.26 卐स ह श्रुत इन्द्रो नाम देव- ऊर्ध्वो भुव.न्मनुषे दस्मतमः। अव प्रियं मर्शसानस्य साह्वा-ञ्छिरो भर.द्दासस्य स्वधावान्।।

卐 स वृत्र.हेन्द्रः॰ कृष्णयोनीः॰- पुरन्दरो दासी रैरयद्वि। अजनय.न्मनवे क्षामप.श्चे- सत्रा शंसँ यजमानस्य तूतोत्।।

卐 तस्मै तवस्य1(अ)मनु दायि स-त्रेन्द्राय देवेभि रर्णसातौ। प्रति यदस्य वज्रं बाह्वोर्धु- र्हत्वी दस्यू.न्पुर^ आयसी र्नितारीत्।।

卐 नूनं सा ते प्रति वर.ञ्जरित्रे- र्दुहीय.दिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माऽतिधग्भगो नो- बृह.द्वदेम विदथे सुवीराः।।

2.21 विश्वजित इति षड्चस्य सूक्तस्य, शौनको गृत्समद- इन्द्रो- जगत्यन्त्या त्रिष्टुप्।।

❀02.06.27 卐विश्वजिते धनजिते स्वर्जिते- सत्राजिते नृजित उर्वराजिते। अश्वजिते गोजिते अब्जिते- भरेन्द्राय सोमँ यजताय हर्यतम्।।

卐 अभिभुवे.ऽभिभङ्गाय वन्व-तेऽषाळ्हाय सहमानाय वेधसे। तुविग्रये वह्नये दुष्टरीतवे- सत्रासाहे नम^ इन्द्राय वोचत।।

卐 सत्रासाहो जनभक्षो जनंसह- श्च्यवनो युध्मो अनु जोष.मुक्षितः। वृतञ्चय स्सहुरि र्विक्ष्वारित-^ इन्द्रस्य वोचं प्र कृतानि वीर्या।।

卐 अनानुदो वृषभो दोधतो वधो- गम्भीर^ ऋष्वो असमष्टकाव्यः। रध्रचोद श्श्नथनो वीळित स्पृथु- रिन्द्र स्सुयज्ञ ^उषस स्स्वर्जनत्।।

卐 यज्ञेन गातु.मप्तुरो विविद्रिरे- धियो हिन्वाना^ उशिजो मनीषिणः। अभिस्वरा निषदा गा^अवस्यव-^ इन्द्रे हिन्वाना द्रविणा.न्याशत।।

卐 इन्द्र श्रेष्ठानि द्रविणानि धेहि- चित्ति.न्दक्षस्य सुभगत्व.मस्मे। पोषं रयीणा.मरिष्टि.न्तनूनां- स्वाद्मानँ वाच स्सुदिनत्व.मह्नाम्।।

2.22 त्रिकद्रुकेष्विति चतुर्ऋचस्य सूक्तस्य, शौनको गृत्समदः-इन्द्रो देवता-आद्याऽष्टिः-ततो द्वे अतिशक्वर्यौ-अन्त्याऽष्टिर्वा।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀02.06.28 ☞卐त्रिकद्रुकेषु महिषो यवाऽऽशिर-न्तुविशुष्म स्तृप.त्सोम.मपिब-द्विष्णुना सुतँ यथाऽवशत्। स ईं ममाद महि कर्म कर्तवे महा मुरुं- सैनं सश्च.द्देवो देवं- सत्य.मिन्द्रं सत्य^ इन्दुः।।

卐 अध त्विषीमा॰ अभ्योजसा क्रिविँ युधाऽभव-दा रोदसी अपृणदस्य मज्मना प्र वा वृधे। अध.त्तान्य.ञ्जठरे प्रेमरिच्यत- सैनं सश्च.द्देवो देवं- सत्य.मिन्द्रं सत्य^इन्दुः।।

卐 साक.ञ्जात॰ क्रतुना साक.मोजसा ववक्षिथ- साकँ वृद्धो वीर्यैः- स्सासहि मृधो विचर्षणिः। दाता राध स्स्तुवते काम्यँ वसु –सैनं सश्च.द्देवो देवं- सत्य.मिन्द्रं सत्य^ इन्दुः।।

卐 तव त्यन्नर्य.न्नृतो~ऽप^ इन्द्र प्रथमं- पूर्व्य.न्दिवि प्रवाच्य.ङ्कृतम्। यद्देवस्य शवसा- प्रारिणा^ असुं रिण.न्नपः। भुव.द्विश्व.मभ्यादेव.मोजसा- विदा.दूर्जं शतक्रतु र्विदा.दिषम्।।

🏺 2.23 गणानामित्येकोनविंशत्यृचस्य सूक्तस्य, शौनको गृत्समदः-आद्या पञ्चमी नवम्येकादशी सप्तदश्यन्त्यानां ब्रह्मणस्पतिः-शिष्टानां बृहस्पतिर्जगती-पञ्चदश्यन्त्ये त्रिष्टुभौ।।

❀02.06.29 卐गणाना.न्त्वा गणपतिं हवामहे- कवि.ङ्कवीना.मुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत -आन.श्शृण्व.न्नूतिभि स्सीद सादनम्।।

卐 देवा.श्चित्ते असुर्य प्रचेतसो- बृहस्पते यज्ञियं भाग.मानशुः। उस्राइव सूर्यो ज्योतिषा महो- विश्वेषा .मिज्जनिता ब्रह्मणा.मसि।।

卐 आ विबाध्या परिराप स्तमांसि च- ज्योतिष्मन्तं रथ.मृतस्य तिष्ठसि। बृहस्पते भीम.ममित्रदम्भनं- रक्षोहण.ङ्गोत्रभिदं स्वर्विदम्।।

卐 सुनीतिभि र्नयसि त्रायसे जनँ- यस्तुभ्य.न्दाशा.न्न तमंहो अश्नवत्। ब्रह्मद्विष स्तपनो मन्युमीरसि- बृहस्पते महि तत्ते महित्वनम्।।

卐 न तमंहो न दुरित.ङ्कुतश्चन- नारातय स्तितिरु र्न द्वयाविनः। विश्वा^ इदस्मा.द्ध्वरसो वि बाधसे- यं सुगोपा रक्षसि ब्रह्मणस्पते।।

❀02.06.30 卐 त्वन्नो गोपा॰ पथिकृ.द्विचक्षण- स्तव व्रताय मतिभि र्जरामहे। बृहस्पते यो नो अभि ह्वरो दधे- स्वा तं मर्मर्तु दुच्छुना हरस्वती।।

Sri Guru Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उत वा यो नो मर्चया.दनाग-सोऽरातीवा मर्त स्सानुको वृकः। बृहस्पते अप तँ वर्तया पथ- स्सुग न्नो अस्यै देववीतये कृधि।।

卐 त्रातार.न्त्वा तनूनां हवाम-हेऽवस्पर्त रधिवक्तार.मस्मयुम्। बृहस्पते देवनिदो नि बर्हय- मा दुरेवा उत्तरं सुम्न.मुन्नशन्न्।।

卐 त्वया वयं सुवृधा ब्रह्मणस्पते- स्पार्हा वसु मनुष्या ददीमहि। या नो दूरे तळितो या अरातयो-ऽभि सन्ति जम्भया ता अनप्नसः।।

卐 त्वया वय.मुत्तम.न्धीमहे वयो- बृहस्पते पप्रिणा सस्निना युजा। मा नो दुश्शंसो अभिदिप्सु रीशत- प्र सुशंसा मतिभि स्तारिषीमहि।।

❀02.06.31 卐अनानुदो वृषभो जग्मि.राहव-न्निष्टप्ता शत्रुं पृतनासु सासहिः। असि सत्य ऋणया ब्रह्मणस्पत -उग्रस्य चिद्दमिता वीळुहर्षिणः।।

卐 अदेवेन मनसा यो रिषण्यति- शासा.मुग्रो मन्यमानो जिघांसति। बृहस्पते मा प्रण.क्तस्य नो वधो- नि कर्म मन्यु.न्दुरेवस्य शर्धतः।।

卐 भरेषु हव्यो नमसोपसद्यो- गन्ता वाजेषु सनिता धनन्धनम्। विश्वा इदर्यो अभिदिप्स्वो3(ओ) मृधो- बृहस्पति र्वि ववर्हा रथा इव।।

卐 तेजिष्ठया तपनी रक्षस स्तप- ये त्वा निदे दधिरे दृष्टवीर्यम्। आवि स्तत्कृष्व यदसत्त उक्थ्य1(अं)- बृहस्पते वि परिरापो अर्दय।।

卐 बृहस्पते अति यदर्यो अर्हा-द्युम.द्विभाति क्रतुम.ज्जनेषु। यद्दीदय.च्छवस ऋतप्रजात- तदस्मासु द्रविण.न्धेहि चित्रम्।।

❀02.06.32 卐मा न स्स्तेनेभ्यो ये अभि द्रुह.स्पदे- निरामिणो रिपवोऽन्नेषु जागृधुः। आ देवाना.मोहते वि व्रयो हृदि- बृहस्पते न पर स्साम्नो विदुः।।

卐 विश्वेभ्यो हि त्वा भुवनेभ्य स्परि- त्वष्टाऽजन.त्साम्नस्साम्नः कविः। स ऋणचि.दृणया ब्रह्मण.स्पति- र्द्रुहो हन्ता मह ऋतस्य धर्तरि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 तव श्रिये व्यजिहीत पर्वतो- गवा.ङ्गोत्र.मुदसृजो यदङ्गिरः। इन्द्रेण युजा तमसा परीवृतं- बृहस्पते निरपा.मौब्जो अर्णवम्।।

卐 ब्रह्मणस्पते त्वमस्य यन्ता- सूक्तस्य बोधि तनय.ञ्च जिन्व। विश्व.न्तद्भद्रं यदवन्ति देवा^- बृह.द्वदेम विदथे सुवीराः।।इति षष्ठाध्याय स्समाप्तः।।

## द्वितीयाष्टके सप्तमाध्यायः। (वर्गाः 1-25)

2.20 सेमामिति षोळशर्चस्य सूक्तस्य, शौनको गृत्समदो ब्रह्मणस्पतिः-प्रथमा दशम्यो बृहस्पतिः-द्वादश्यैन्द्राब्रह्मणस्पती जगती-द्वादश्यन्त्ये त्रिष्टुभौ।।

❀02.07.01 卐सेमा.मविड्ढि प्रभृतिँ य^ ईशि-षेऽया विधेम नवया मह गिरा। यथा नो मीढ्वा.न्त्स्तवते सखा तव- बृहस्पते ऽसीषध स्सोत नो मतिम्।।

卐 यो नन्त्वा.न्यनम.न्न्योज.सो-तादर्द मन्युना शम्बराणि वि। प्राच्यावय.दच्युता ब्रह्मण.स्पति- रा चाविश.द्वसुमन्तँ वि पर्वतम्।।

卐 तद्देवाना.न्देवतमाय कर्त्व-मश्रथ्न.न्दृळ्हाऽव्रदन्त वीळिता। उद्गा^ आज.दभिन.द्ब्रह्मणा वल-मगूहत्तमो. व्यचक्षयत्स्वः~।।

卐 अश्मास्य.मवतं ब्रह्मण.स्पति- र्मधुधार.मभि यमोजसाऽतृणत्। तमेव विश्वे पपिरे स्वर्दृशो- बहु साकं सिसिचु रुत्समुद्रिणम्।।

卐 सना ता का चिद्भुवना भवीत्वा- माद्भि श्शरद्भि र्दुरो वरन्त वः। अयतन्ता चरतो अन्यदन्यदि-द्या चकार वयुना ब्रह्मण.स्पतिः।।

❀02.07.02 卐अभिनक्षन्तो अभि ये तमानशु- र्निधिं पणीनां परम.ङ्गुहा हितम्। ते विद्वांसः प्रतिच.क्ष्यानृता पुन- र्यत^ उ आय.न्तदु.दीयु राविशम्।।

卐 ऋतावानः प्रतिच.क्ष्यानृता पुन- राऽत^ आ तस्थुः कवयो मह स्पथः। ते बाहुभ्या.न्धमित.मग्नि .मश्मनि- नकि. ऽष्षो अस्त्यरणो जहु.र्हि तम्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 ऋतज्येन क्षिप्रेण ब्रह्मण.स्पति- र्यत्र वष्टि प्र तदश्नोति धन्वना। तस्य साध्वी रिषवो याभि रस्यति-नृचक्षसो दृशये कर्णयोनयः।।

卐 स सन्नय स्स विनयः पुरोहित- स्स सुष्टुत स्स युधि ब्रह्मण.स्पतिः। चाक्ष्मो यद्वाजं भरते मती ध-नाऽदि.त्सूर्य स्तपति तप्यतु वृथा।।

卐 विभु प्रभु प्रथमं मेहनावतो- बृहस्पते स्सुविदत्राणि राध्या। इमा सातानि वेन्यस्य वाजिनो- येन जना^ उभये भुञ्जते विशः।।

❀02.07.03☞卐योऽवरे वृजने विश्वथा विभु- र्महामु रण्व श्शवसा ववक्षिथ। स देवो देवा.न्प्रति पप्रथे पृथु- विश्वेदु ता परिभू र्ब्रह्मणस्पतिः।।

卐 विश्वं सत्यं मघवाना युवोरि-दापश्चन प्र मिनन्ति व्रतं वाम्। अच्छेन्द्राब्रह्मणस्पती~ हवि-र्नोऽन्नं युजेव वाजिना जिगातम्।।

卐 उताऽशिष्ठा^ अनु श्रृण्वन्ति वह्नय- स्सभेयो विप्रो भरते मती धना। वीळुद्वेषा^ अनु वश ऋण.माददि- स्स ह वाजी समिथे ब्रह्मण.स्पतिः।।

卐 ब्रह्मण.स्पते रभव.द्यथावशं- सत्यो मन्यु र्महि कर्मा करिष्यतः। योगा^ उदाज.त्स दिवे वि चाभज-न्महीव रीति श्शवसा ऽसर.त्पृथक्।।

卐 ब्रह्मण.स्पते सुयमस्य विश्वहा- राय स्स्याम रथ्यो3(ओ) वयस्वतः। वीरेषु वीरा^ उप पृङ्धि नस्त्वं-यदीशानो ब्रह्मणा वेषि मे हवम्।।

卐 ब्रह्मण.स्पते त्वमस्य यन्ता- सूक्तस्य बोधि तनय.ञ्च जिन्व। विश्वन्त.द्भद्रं यदवन्ति देवा^- बृह.द्वदेम विदथे सुवीराः।।

2.25 इन्धान इति पञ्चर्चस्य सूक्तस्य, शौनको गृत्समदो- ब्रह्मणस्पति- र्जगती।।

❀02.07.04☞卐इन्धानो अग्निं वनव.द्वनुष्यतः- कृतब्रह्मा शूशुव.द्रातहव्य^ इत्। जातेन जात.मति स प्र सर्सृते- यँयँ युज.ङ्कृणुते ब्रह्मण.स्पतिः।।

卐 वीरेभि वींरा.न्वंनव.द्वनुष्यतो- गोभी रयिं पंप्रथ.द्वोधंति त्मना। तोक.ञ्च तस्य तनय.ञ्च वर्धते- यँयँ युज.ङ्कृणुते ब्रह्मण.स्पतिः।।

卐 सिन्धु र्न क्षोद शिशमीवा ऋघायतो- वृषेव वध्री रभि वष्ट्योजसा। अग्ने.रिव प्रसिति र्नाह वर्तवे- यँयँ युज.ङ्कृणुते ब्रह्मण.स्पतिः।।

卐 तस्मा अर्षन्ति दिव्या असश्चत- स्स सत्वभिः प्रथमो गोषु गच्छति। अनिभृष्टतविषि र्हन्त्योजसा- यँयँ युज.ङ्कृणुते ब्रह्मण.स्पतिः।।

卐 तस्मा इद्विश्वे धुनयन्त सिन्ध-वोऽच्छिद्रा शर्म दधिरे पुरूणि। देवानां सुम्ने सुभग स्स एधते- यँयँ युज.ङ्कृणुते ब्रह्मण.स्पतिः।।

2.25 ऋजुरिदिति (ऋजुरिच्छंस इति) चतुर्ऋचस्य सूक्तस्य, शौनको गृत्समदो- ब्रह्मणस्पति-र्जगती।।

05 ऋजु.रिच्छंसो वनव.द्वनुष्यतो- देवय.न्निददेवयन्त.मभ्यसत्। सुप्रावीरि.द्वनव.त्पृत्सु दुष्टरँ-यज्वे.दयज्यो र्वि भंजाति भोजनम्।।

卐 यजस्व वीर प्र विहि मनायतो- भद्रं मनः कृणुष्व वृत्रतूर्ये। हवि.ष्कृणुष्व सुभगो यथाऽससि- ब्रह्मण.स्पते रव आ वृणीमहे।।

卐 स इज्जनेन स विशा स जन्मना- स पुत्रै र्वाजं भरते धना नृभिः। देवानाँ यः पितर.माविवासति- श्रद्धामना हविषा ब्रह्मणस्प.तिम्।।

卐 यो अस्मै हव्यै र्घृतवद्भि रविध-त्प्र तं प्राचा नयति ब्रह्मण.स्पतिः। उरुष्यती.मंहसो रक्षती रिषो-3(ओऽ)हो श्चिदस्मा उरुचक्रि रद्भुतः।।5।।

2.27 इमा गिर इति सप्तदशर्चस्य सूक्तस्य, गार्त्समदः कूर्म- आदित्या-स्त्रिष्टुप्।।

05.07.06 卐इमा गिर आदित्येभ्यो घृतस्नू- स्सना.द्राजभ्यो जुह्वा जुहोमि। शृणोतु मित्रो अर्यमा भगो न- स्तुविजातो वरुणो दक्षो अंशः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इमं स्तोमं सक्रतवो मे अद्य- मित्रो अर्यमा वरुणो जुषन्त। आदित्यास श्शुचयो धारपूता^- अवृजिना^ अनवद्या^ अरिष्टाः।।

卐 त आदित्यास^ उरवो गभीरा^- अदब्धासो दिप्सन्तो भूर्यक्षाः। अन्तः~ पश्यन्ति वृजिनोत साधु- सर्वं राजभ्यः परमा चिदन्ति।।

卐 धारयन्त^ आदित्यासो जगत्स्था^- देवा^ विश्वस्य भुवनस्य गोपाः। दीर्घाधियो रक्षमाणा^ असुर्य- मृतावान श्चयमाना^ ऋणानि।।

卐 विद्या.मादित्या^ अवसो वो अस्य- यदर्यम.न्भय आ चिन्मयोभु। युष्माकं मित्रावरुणा प्रणीतौ- परि श्वभ्रेव दुरितानि वृज्याम्।।

❀02.07.07 卐सुगो हि वो अर्यम.न्मित्र पन्था-^ अनृक्षरो वरुण साधु रस्ति। तेनाऽदित्या^ अधि वोचता नो- यच्छता नो दुष्परिहन्तु शर्म।।

卐 पिपर्तु नो अदिती राजपु-त्राऽति द्वेषां.स्यर्यमा सुगेभिः। बृह.न्मित्रस्य वरुणस्य श-र्मोप स्याम पुरुवीरा^अरिष्टाः।।.

卐 तिस्रो भूमी र्धारय.न्त्रीँ रुत द्यू-त्रीणि व्रता विदथे अन्त.रेषाम्। ऋतेनाऽदित्या महि वो महित्व- न्तदर्यम.न्वरुण मित्र चारु।।

卐 त्री रोचना दिव्या धारयन्त- हिरण्यया श्शुचयो धारपूताः। अस्वप्नजो अनिमिषा^ अदब्धा^- उरुशंसा^ ऋजवे मर्त्याय।।

卐 त्वँ विश्वेषाँ वरुणासि राजा- ये च देवा^ असुर ये च मर्ताः। शतन्नो रास्व शरदो विच- क्षेऽश्या.मायूंषि सुधितानि पूर्वा।।

❀02.07.08 卐न दक्षिणा वि चिकिते न सव्या- न प्राचीन.मादित्या^ नोत पश्चा। पाक्या चिद्वसवो धीर्या चि-द्युष्मानीतो अभय.ञ्ज्योति रश्याम्।।

卐 यो राजभ्य^ ऋतनिभ्यो ददाश- यँ वर्धयन्ति पुष्टयश्च नित्याः। स रेवा.न्याति प्रथमो रथेन- वसुदावा विदथेषु प्रशस्तः।।

卐 शुचिरप स्सूयवसा^ अदब्ध^- उप क्षेति वृद्धवया स्सुवीरः। नकि.ष्टङ्घ्न.न्त्यन्तितो न दूरा-द्य^ आदित्यानां भवति प्रणीतौ।।

卐 अदिते मित्र वरुणोत मृळ- यद्वो वय.ञ्चकृमा कच्चिदागः। उर्वश्या.मभय.ञ्ज्योति.रिन्द्र- मा नो दीर्घा^ अभि नश.न्तमिस्राः।।

卐 उभे~ अस्मै पीपयत स्समीची~- दिवो वृष्टिं सुभगो नाम पुष्यन्न्। उभा क्षयावाजय.न्याति पृ-त्सूभा वर्धौ भवत स्साधू~ अस्मै।।

卐 या^ वो माया^ अभिद्रुहे यजत्राः- पाशा^ आदित्या^ रिपवे विचृत्ताः। अश्वीव ताऽ अति येषं रथे- नारिष्टा^ उरावा शर्म.न्त्स्याम।।

卐 माऽहं मघोनो वरुण प्रियस्य- भूरिदाव्न^ आ विदं शून.मापेः। मा रायो राज.न्त्सुयमा.दव स्थां- बृह.द्वदेम विदथे सुवीराः।।

2.28 इदङ्कवेरित्येकादशर्चस्य सूक्तस्य, गार्त्समदः कूर्मो- वरुण-स्त्रिष्टुप्-(दशमी दुस्स्वप्ननाशिनी त्रिष्वपि सूक्तेषु पाक्षिको गृत्समदोऽस्त्येव)।।

❀02.07.09 卐इद.ङ्कवे रादित्यस्य स्वराजो- विश्वानि सान्त्य.भ्यस्तु मह्ना। अति यो मन्द्रो यजथाय देव-स्सुकीर्तिं भिक्षे वरुणस्य भूरेः।।

卐 तव व्रते सुभगास स्स्याम- स्वाध्यो वरुण तुष्टुवांसः। उपायन उषसा.ङ्गोमतीना-मग्नयो न जरमाणा- अनु द्यून्।।

卐 तव स्याम पुरुवीरस्य शर्म-न्नुरुशंसस्य वरुण प्रणेतः~। यूयन्नः पुत्रा^ अदिते रदब्धा^ अभि क्षमध्वँ युज्याय देवाः।।

卐 प्र सी.मादित्यो असृज.द्विधर्ताऽ- ऋतं सिन्धवो वरुणस्य यन्ति। न श्राम्यन्ति न वि मुच.न्त्येते- वयो न पप्तू~ रघुया परिज्मन्न्।।

卐 वि मच्छ्रथाय रशना.मिवाग- ^ ऋध्याम ते वरुण खामृतस्य। मा तन्तु श्छेदि वयतो धियं मे- मा मात्रा शार्यपसः पुर ऋतोः।।

❀02.07.10 卐अपो~ सु म्यक्ष वरुण भियसं म-त्सम्रा.ळृतावोऽनु मा गृभाय। दामेव वत्सा.द्वि मुमु.ग्ध्यंहो- नहि त्वदारे निमिष श्चनेशे।।

卐 मा नो वधै र्वरुण ये त इष्टा- वेनः कृण्वन्त.मसुर भ्रीणन्ति। मा ज्योतिषः प्रवसथानि गन्म- वि षू मृध श्शिश्रथो जीवसे नः।।

卐 नमः पुरा ते वरुणोत नून-मुतापर.न्तुविजात ब्रवाम। त्वे हि कं पर्वते न श्रिता-न्यप्रच्युतानि दूळभ व्रतानि।।

卐 परं ऋणा सावी.रध मत्कृतानि- माऽहं राज.न्नन्यकृतेन भोजम्। अव्युष्टा इन्नु भूयसी रुषास-^ आ नो जीवा.न्वरुण तासु शाधि।।

卐 यो मे राज.न्युज्यो वा सखा वा- स्वप्ने भयं भीरवे मह्य.माह। स्तेनो वा यो दिप्सति नो वृको वा- त्वन्तस्मा.द्वरुण पाह्यस्मान्।।

卐 माऽहं मघोनो वरुण प्रियस्य- भूरिदाव्न^ आ विदं शून.मापेः। मा रायो राज.न्त्सुयमा.दव स्थां- बृह.द्वदेम विदथे सुवीराः।।

2.29 धृतव्रता इति सप्तर्चस्य सूक्तस्य, गार्त्समदः कूर्मो- विश्वेदेवा- स्त्रिष्टुप्- (भेदप्रयोगे-आद्यानां षण्णां विश्वेदेवाः- अन्त्याया वरुणः)

❀02.07.11 卐धृतव्रता^ आदित्या^ इषिरा-^ आरे मत्कर्त रहसूरिवाऽऽगः। शृण्वतो वो वरुण मित्र देवा- भद्रस्य विद्वाँ अवसे हुवे वः।।

卐 यूय.न्देवाः प्रमति र्यूय.मोजो- यूय.न्द्वेषांसि सनुत र्युयोत। अभिक्षत्तारो अभि च क्षमध्व-मद्या च नो मृळय-तापरञ्च।।

卐 किमू नु वः कृणवा.मापरेण- किं सनेन वसव^ आप्येन। यूयन्नो मित्रावरु.णादिते च- स्वस्ति-मिन्द्रामरुतो दधात।।

卐 हये देवा^ यूय.मि.दापय स्स्थ- ते मृळत नाधमानाय मह्यम्। मा वो रथो मध्यमवा.ळृते भू-न्मा युष्मावत्स्वापिषु श्रमिष्म।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 प्र व^ एको मिमय भूर्यागो- यन्मा पितेव कितवं शशास। आरे पाशा^ आरे अघानि देवा^- मा माऽधि पुत्रे विमिव ग्रभीष्ट।।

卐 अर्वाञ्चो अद्या भवता यजत्रा^- आ वो हार्दि भयमानो व्ययेयम्। त्राध्वन्नो देवा निजुरो वृकस्य- त्राध्व.ङ्कर्ता.दवपदो यजत्राः।।

卐 माऽहं मघोनो वरुण प्रियस्य- भूरिदाव्न^ आ विदं शून.मापेः। मा रायो राज.न्त्सुयमा.दव स्थां- बृह.द्वदेम विदथे सुवीराः।।

2.30 ऋत न्देवायेत्येकादशर्चस्य सूक्तस्य, शौनको गृत्समद इन्द्रः-षष्ठ्या इन्द्रासोमौ-अष्टम्याः सरस्वती-नवम्या बृहस्पति-रेकादश्या मरुत-स्त्रिष्टुबन्त्या जगती।।

❀02.07.12 卐ऋत.न्देवाय कृण्वते सवित्र- इन्द्रा.याहिघ्ने न रमन्त आपः। अहरह र्यात्यक्तु रपा- ङ्कियात्या प्रथम स्सर्ग^ आसाम्।।

卐 यो वृत्राय सिन.मत्राभरिष्य-त्प्र तञ्जनित्री विदुष उवाच। पथो रदन्ती रनु जोष.मस्मै- दिवेदिवे धुनयो यन्त्यर्थम्।।

卐 ऊर्ध्वो ह्यस्था.दध्यन्तरि-क्षेऽधा वृत्राय प्र वध.ञ्जभार। मिहं वसान^ उप हीमदुद्रो-त्तिग्माऽऽयुधो अजयच्छत्रु.मिन्द्रः।।

卐 बृहस्पते तपुषाऽश्नेव विध्य- वृकद्वरसो असुरस्य वीरान्। यथा जघन्थ धृषता पुरा चि-देवा जहि शत्रु.मस्माक.मिन्द्र।।

卐 अव क्षिप दिवो अश्मान.मुच्चा- येन शत्रुं मन्दसानो निजूर्वाः। तोकस्य सातौ तनयस्य भूरे- रस्मा॑ अर्ध.ङ्कृणुता.दिन्द्र गोनाम्।।

❀02.07.13 卐प्र हि क्रतुं वृहथो यं वनुथो- रध्रस्य स्थो यजमानस्य चोदौ। इन्द्रासोमा युव.मस्मा॑ अविष्ट-मस्मि.न्भयस्थे कृणुतमु लोकम्।।

卐 न मा तमन्न श्रम.न्नोत तन्द्र-न्न वोचाम मा सुनो.तेति सोमम्। यो मे पृणाद्यो ददद्यो निबोधा-द्यो मा सुन्वन्त.मुप गोभि रायत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सर॑स्वति॒ त्वम॒स्माँ॑ अविड्ढि॒ मरुत्व॑ती धृष॒ती जे॑षि॒ शत्रू॑न्। त्यञ्चि॒च्छर्ध॑न्तन्तविषी॒यमा॑ण॒मिन्द्रो॑ हन्ति वृष॒भं शण्डि॑कानाम्।।

卐 यो न॒ स्सनु॑त्य उ॒त वा॑ जिघ॒त्नु॒ र॑भिख्या॒य॒ त॒न्तिगि॒तेन॑ विध्य। बृह॑स्प॒त आयु॑धै॒ जेषि॒ शत्रू॑न्द्रु॒हे रीष॑न्तं॒ परि॑ धेहि राजन्।।

卐 अ॒स्माके॑भि॒ स्सत्व॑भि श्शूर॒ शूरै॑ वी॒र्या॑ कृधि॒ यानि॑ ते॒ कर्त्वा॑नि। ज्योग॑भूव॒न्ननु॑धूपितासो ह॒त्वी तेषा॒मा भ॑रा॒ नो॒ वसू॑नि।।

卐 तँ॒व श्शर्धं॒ मारु॑तं सुम्न॒यु र्गि॒रोप॑ ब्रुवे॒ नम॑सा॒ दैव्य॒ञ्जनम्। यथा॑ र॒यिं सर्व॑वीर॒न्नशा॑महा अपत्य॒साचं॒ श्रुत्य॑न्दि॒वेदि॑वे।।

2.31 अस्माकमिति सप्तर्चस्य सूक्तस्य, शौनको गृत्समदो विश्वेदेवा जगत्यन्त्या त्रिष्टुप् (भेदपक्षे – आद्याया मित्रावरुणौ द्वितीया चतुर्थी पञ्चमीनां विश्वेदेवाः-तृतीयाया उषासानक्ता षष्ठ्या द्यावापृथिवी सप्तम्या इन्द्रः)

❀02.07.14 卐अ॒स्माक॑ मित्रावरु॒णाऽवतं॒ रथ॑मादि॒त्यै रु॒द्रै र्वसु॑भि स्सचा॒भुवा॑। प्र यद्वयो॒ न पप्त॒न्वस्म॑न॒स्परि॑ श्रव॒स्यवो॒ हृषी॑वन्तो वन॒र्षदः॑।।

卐 अध॑ स्मा॑ न॒ उद॑वता स॒जोषसो॒ रथ॑न्दे॒वासो॒ अभि॒ वि॒क्षु वा॑ज॒युम्। यदा॒शवः॒ पद्या॑भि॒ स्तित्र॑तो॒ रजः॑ पृथि॒व्या स्सानौ॒ जङ्घ॑नन्त पा॒णिभिः॑।।

卐 उ॒त स्य न॒ इन्द्रो॑ वि॒श्वच॑र्षणि दि॒वश्शर्धे॑न॒ मारु॑तेन सु॒क्रतुः॑। अनु॒ नु स्थ॑ात्यवृ॒काभि॑ रू॒तिभी॒ रथं॑ म॒हे स॒नये॒ वाज॑सातये।।

卐 उ॒त स्य॒ दे॒वो भुव॑नस्य स॒क्षणि॒ स्त्वष्टा॒ ग्नाभि॑ स्स॒जोषा॑ जूजुव॒द्रथ॑म्। इळा॒ भगो॑ बृहद्दि॒वोत रोद॑सी पूषा पुर॑न्धि र॒श्विना॒ वधा॒ पती॑।।

卐 उ॒त त्ये दे॒वी सु॒भगे॒ मिथू॒दृशोषा॑सानक्ता॒ जग॑तामपी॒जुवा॑। स्तु॒षे यद्वां॑ पृथिवि॒ नव्य॑सा॒ वचः॑ स्स्था॒तुश्च॒ वय॒ स्त्रिव॑या उप॒स्तिरे॑।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 उत व श्शंसं.मुशिजामिव श्म-स्यहिं र्बुध्न्यो3(ओ)ऽज^ एकपा.दुत। त्रित^ ऋभुक्षा स्सविता चनो द-धेऽपान्नपा.दाशुहेमा धिया शमि।।

卐 एता वो वश्म्युद्यता यजत्रा^- अतक्ष.न्नायवो नव्यसे सम्। श्रवस्यवो वाज.ञ्चकाना- स्सप्तिर्न रथ्यो अह धीति.मश्याः।।

2.32 अस्य म इत्यष्टर्चस्य सूक्तस्य, शौनको गृत्समदः-आद्याया द्यावापृथिवी-द्वितीया तृतीययोरिन्द्रः (त्वष्टावा)- चतुर्थी पञ्चम्यो राका-षष्ठी सप्तम्योः सिनीवाली-अन्त्याया गुङ्गू सिनीवाली राका सरस्वतीन्द्राणी वरुणान्यो- जगती-अन्त्यास्तिस्रोऽनुष्टुभः।।

❀02.07.15 卐अस्य मे द्यावापृथिवी~ ऋतायतो- भूत.मवित्री~ वचस स्सिषासतः। ययो रायु प्रतरन्ते इदं पुर^- उपस्तुते~ वसूयु वां महो दधे।।

卐 मा नो गुह्या रिप^ आयो रह.न्दभ-न्मा न^ आभ्यो रीरधो दुच्छुनाभ्यः। मा नो वि यौ स्सख्या विद्धि तस्य न- स्सुम्नायता मनसा तत्त्वेमहे।।

卐 अहेळता मनसा श्रुष्टिमा वह- दुहाना.न्धेनुं पिप्युषी.मसश्चतम्। पद्याभि राशुं वचसा च वाजिन-न्त्वां हिनोमि पुरुहूत विश्वहा।।

卐 राका.महं सुहवां स्सुष्टुती हुवे- श्रृणोतु न स्सुभगा बोधतु त्मना। सीव्यत्वप स्सूच्या ऽच्छिद्यमान-या ददातु वीरं शतदाय.मुक्थ्यम्।।

卐 यास्ते राके सुमतय स्सुपेशसो- याभि र्ददासि दाशुषे वसूनि। ताभि र्नो अद्य सुमना^ उपाऽऽगहि- सहस्रपोषं सुभगे रराणा।।

卐 सिनीवालि पृथुष्टुके- या देवाना.मसि स्वसा। जुषस्व हव्य.माहुतं- प्रजा.न्देवि दिदिड्ढि नः।।

卐 या सुबाहु स्स्वङ्गुरि- स्सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै हवि- स्सिनीवाल्यै जुहोतन।।

卐 या गुङ्गू.र्या सिनीवाली- या राका या सरस्वती। इन्द्राणी.मह्व ऊतये वरुणानीं स्वस्तये।।

卐 ✡अथ परिशिष्टम्।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 कुहू महं सुवृतँ विद्मनापसमस्मि.न्यज्ञे सुहवा.ञ्जोहवीमि। सा नो ददातु श्रवणं पितृणा-न्तस्यै ते देवि हविषा विधेम।।

卐 कुहू देवाना.ममृतस्य पत्नी- हव्या नो अस्य हविषं श्शृणोतु। सन्दाशुषे किरतु भूरि वामं- रायस्पोषँ यजमाने दधातु।।

卐 अनु नोऽद्यानुमति- र्यज्ञ न्देवेषु मन्यताम्। अग्निश्च हव्यवाहनो- भवत न्दाशुषे मयः।।

卐 अन्वि दनुमते त्वं -मन्यासै शञ्च नस्कृधि। क्रत्वे दक्षाय नो हिनु- प्र ण आयूंषि तारिषत्।।

卐 धाता ददातु नो रयि-मीशानो जगतस्पतिः। स नः पूर्णेन वावनत्।।

卐 धाता ददातु दाशुषे वसूनि- प्रजाकामाय मीळ्हुषे दुरोणे। तस्मै देवा अमृता स्सँ व्ययन्ताँ- विश्वे देवासो अदिति स्सजोषाः।।

卐 धाता ददातु दाशुषे- प्राची ञ्जीवातु मक्षिताम्। वय न्देवस्य धीमहि- सुमतिँ वाजिनीवतः।।

卐 धाता प्रजाना मुत राय ईशे- धातेदं विश्वं भुवन ञ्जजान। धाता कृष्टी रनिमिषाऽभिचष्टे- धात्र इद्धव्य ङ्घृतव ज्जुहोत।।

卐 इति परिशिष्टम्।।

2.33 आ ते पितरिति पञ्चदशर्चस्य सूक्तस्य, शौनको गृत्समदो- रुद्रो- जगती।।

❀02.07.16 卐आ ते पित र्मरुतां सुम्न.मेतु- मान स्सूर्यस्य सन्दृशो युयोथाः। अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः।।

卐 त्वादत्तेभी रुद्र शन्तमेभि- श्शतं हिमा अशीय भेषजेभिः। व्य1(अ)स्म.द्द्वेषो वितरँ व्यंहो- व्यमीवा श्चातयस्वा विषूचीः।।

卐 श्रेष्ठो जातस्य रुद्र श्रियाऽसि- तवस्तम स्तवसां वज्रबाहो~। पर्षि णः पार.मंहस स्स्वस्ति- विश्वा अभीती रपसो युयोधि।।

卐 मा त्वा रुद्र चुक्रुधामा नमोभि- र्मा दुष्टुती वृषभ मा सहूती। उन्नो वीराः अर्पय भेषजेभि- र्भिषक्तम न्त्वा भिषजां शृणोमि।।

卐 ह॒वीम॑भि॒ र्हव॑ते॒ यो ह॒विर्भि॒- रव॒ स्तोमे॑भी॒ रु॒द्र.न्दि॑षीय। ऋ॒दूद॒रः स्सु॒हवो॒ मा नो॑ अ॒स्यै- ब॒भ्रु स्सु॒शिप्रो॑ रीरध.न्म॒नायै॑।।

❀02.07.17 卐उन्मा॑ ममन्द वृ॒ष॒भो म॒रुत्वा॒-न्त्वक्षी॑यसा॒ वय॑सा॒ नाध॑मानम्। घृणी॑व च्छा॒या.म॒र॒पा^ अ॒शीया-ऽविवासेयं रु॒द्रस्य॑ सु॒म्नम्।।

卐 क्व॑1(अ)स्य॒^ ते॑ रुद्र मृळ॒याकु॒- र्हस्तो॒ यो अस्ति॒ भे॒षजो॒ जला॑षः। अ॒प॒भ॒र्ता र॒पसो॒ दैव्य॒-स्या॒भी॑ नु मा॑ वृषभ चक्षमीथाः।।

卐 प्र ब॒भ्रवे॑ वृ॒ष॒भाय॑ श्वि॒ती॒चे- म॒हो म॒हीं ॥सु॒ष्टु॒ति.मी॑रयामि। न॒म॒स्या॑ क॑ल्मलीकि॒न.न्नमो॑भि- र्गृ॒णी॒मसि॑ त्वे॒षं रु॒द्रस्य॒ नाम॑।।

卐 स्थि॒रेभि॒ रङ्गैः॑ पुरु॒रूप॒^ उ॒ग्रो- ब॒भ्रु श्शु॒क्रेभिः॑ पिपि॒शे हि॒रण्यैः। ईशा॑ना.द॒स्य भुव॑नस्य॒ भूरे॒- र्न वा॑ उ योष.द्रु॒द्रा.द॑सु॒र्य॑म्।।

卐 अर्ह॑.न्बिभर्षि॒ साय॑कानि॒ ध-न्वार्ह॑.न्नि॒ष्कँ य॒ज॒तँ वि॒श्वरू॑पम्। अर्ह॑.न्नि॒द.न्द॑यसे॒ विश्व॒.मभ्व॒-न्न वा ओजी॑यो रुद्र॒ त्वद॑स्ति।।

❀02.07.18 卐स्तु॒हि श्रु॒त.ङ्ग॑र्त॒सदं॒ यु॒वा॑नं- मृ॒ग.न्न भी॒म.मु॑पह॒त्नु.मु॒ग्रम्। मृ॒ळा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो॒-ऽन्य न्ते॑ अ॒स्म.न्नि व॑पन्तु॒ सेनाः॑।।

卐 कु॒मा॒र.श्चि॒.त्पि॒तरँ॒ वन्द॑मानं॒- प्रति॑ ना॑नाम रुद्रोप॒यन्त॑म्। भूरे॑ र्दा॒तारं॒ सत्प॑तिङ्गृणीषे- स्तु॒त.स्त्वं भे॑ष॒जा रा॑स्य॒स्मे।।

卐 या वो॑ भेष॒जा म॑रुत॒ श्शु॒ची॑नि॒ या शन्त॑मा वृषणो॒ या म॑यो॒भु। यानि॒ मनु र्वृ॑णीता पि॒ता न॒-स्ता शञ्च॒ योश्च॑ रु॒द्रस्य॑ वश्मि।।

卐 परि॑ णो हे॒ती रु॒द्रस्य॑ वृज्याः- परि॑ त्वे॒षस्य॑ दुर्म॒ति र्म॒ही गा॑त्। अव॑ स्थि॒रा म॒घव॑द्भ्य.स्तनुष्व॒- मीढ्व स्तो॒काय॒ तन॑याय मृळ।।

卐 ए॒वा ब॑भ्रो~ वृषभ चेकितान- यथा॑ देव॒ न ह॑णी॒षे न हंसि॑। ह॒व॒न॒श्रु॒न्नो॑ रुद्रेह बो॑धि- बृ॒ह.द्व॑देम वि॒दथे॑ सु॒वीराः॑।।

2.34 धारावरा इति पञ्चदशर्चस्य सूक्तस्य, शौनको गृत्समदो- मरुतो- जगत्यन्त्या त्रिष्टुप्।।

❀02.07.19 卐धारावरा^ मरुतो धृष्ण्वोजसो- मृगा^ न भीमा.स्तविषीभि रर्चिनः। अग्नयो न शुशुचाना^ ऋजीषिणो- भृमि.न्धमन्तो अप गा^ अवृण्वत।।

卐 द्यावो न स्तृभि श्चितयन्त खादिनो- व्य1(अ)भ्रिया^ न द्युतयन्त वृष्टयः। रुद्रो यद्वो मरुतो रुक्मवक्षसो- वृषाऽजनि पृश्न्या श्शुक्र ऊधनि।।

卐 उक्षन्ते अश्वा॰ अत्या॰ इवाजिषु- नदस्य कर्णै स्तुरयन्त आशुभिः। हिरण्यशिप्रा^ मरुतो दविध्वत॰- पृक्षँ याथ पृषतीभि.स्समन्यवः।।

卐 पृक्षे ता विश्वा भुवना ववक्षिरे- मित्राय वा सद.माजीरदानवः। पृषदश्वासो अनवभ्रराधस- ऋजिप्यासो न वयुनेषु धूर्षदः।।

卐 इन्धन्वभि र्धेनुभी रप्शदूधभि- रध्वस्मभि॰ पथिभि र्भ्राज.दृष्टयः। आ हंसासो न स्वसराणि गन्तन- मधो र्मदाय मरुत स्समन्यवः।।

❀02.07.20 卐आ नो ब्रह्माणि मरुत.स्समन्यवो- नराम्न शंस.स्सवनानि गन्तन। अश्वा.मिव पिप्यत धेनु.मूधनि- कर्ता धिय.ञ्जरित्रे वाजपेशसम्।।

卐 तन्नो दात मरुतो वाजिनं रथ -आपानं ब्रह्म चितय.द्दिवेदिवे। इषं स्तोतृभ्यो वृजनेषु कारवे- सनिं मेधा. मरिष्ट.न्दुष्टरं सहः।।

卐 यद्युञ्जते मरुतो रुक्मवक्षसो-ऽश्वा.न्रथेषु भग आ सुदानवः। धेनु र्न शिश्वे स्वसरेषु पिन्वते- जनाय रातहविषे मही.मिषम्।।

卐 यो नो मरुतो वृकताति मर्त्यो- रिपु र्दधे वसवो रक्षता रिषः। वर्तयत तपुषा चक्रियाऽभि त-मव रुद्रा^ अशसो हन्तना वधः।।

卐 चित्र.न्तद्वो मरुतो याम चेकिते- पृश्न्या^ यदूध रप्यापयो दुहुः। यद्वा निदे नवमानस्य रुद्रिया^- स्त्रित.ञ्जराय जुरता.मदाभ्याः।।

❀02.07.21 卐तान्वो महो मरुतॆ एवयाव्नो- विष्णो रेषस्य प्रभृथे हवामहे। हिरण्यवर्णा.न्ककुहा .न्यतस्रुचो- ब्रह्मण्यन्त श्शंस्यं राधॆ ईमहे।।

卐 ते दशग्वाः प्रथमा यज्ञ.मूहिरे- ते नो हिन्व.न्तूषसो व्युष्टिषु। उषा न रामी ररुणै रपोर्णुते- महो ज्योतिषा शुचता गोअर्णसा।।

卐 ते क्षोणीभि ररुणेभि र्नाञ्जिभी- रुद्रा ऋतस्य सदनेषु वावृधुः। निमेघमाना अत्येन पाजसा- सुश्चन्द्रँ वर्ण.न्दधिरे सुपेशसम्।।

卐 ता ईयानो महि वरूथ.मूतय- उप घेदेना नमसा गृणीमसि। त्रितो न यान्पञ्च होतृ.नभिष्टय- आववर्त.दवरा.ञ्चक्रियाऽवसे।।

卐 यया रध्रं पारय.थात्यंहो- यया निदो मुञ्चथ वन्दितारम्। अर्वाची सा मरुतो या व ऊति- रो~ षु वाश्रेव सुमति र्जिगातु।।

2.35 उपेमिति पञ्चदशर्चस्य सूक्तस्य, शौनको गृत्समदोऽपान्नपा-त्त्रिष्टुप्।।

❀02.07.22 卐उपे.मसृक्षि वाजयु र्वचस्या-ञ्चनो दधीत नाद्यो गिरो मे। अपा.न्नपा.दाशुहेमा कुवि.त्स-सुपेशस.स्करति जोषिषद्धि।।

卐 इमं स्वस्मै हृद आ सुतष्टं- मन्त्रँ वोचेम कुवि.दस्य वेदत्। अपा.न्नपा.दसुर्यस्य मह्ना- विश्वा.न्यर्यो भुवना जजान।।

卐 समन्या यन्त्युप यन्त्यन्या-स्समान.मूर्व.न्नद्यः पृणन्ति। तमू शुचिं शुचयो दीदिवांस-मपा.न्नपातं परि तस्थु रापः।।

卐 तमस्मेरा युवतयो युवानं- मर्मृज्यमानाः परि यन्त्यापः। स शुक्रेभि श्शिक्वभी रेव.दस्मे-दीदा.यानिध्मो घृतनिर्णि.गप्सु।।

卐 अस्मै तिस्रो अव्यथ्याय नारी- र्देवाय देवी र्दिधिष.न्त्यन्नम्। कृताइवोप हि प्रसर्स्रे अप्सु- स पीयूष .न्धयति पूर्वसूनाम्।।

❀02.07.23 卐अश्वस्यात्र जनिमाऽस्य च स्व- र्द्रुहो रिष स्संपृचः पाहि सूरीन्। आमासु पूर्षु परो अप्रमृष्य.न्नारातयो वि नेश.न्नानृतानि।।

卐 स्व आ दमे सुदुघा यस्य धेनु-स्स्वधां पीपाय सुभ्वन्न.मत्ति। सो अपा.न्नपा.दूर्जय.न्नप्स्व1(अ)न्त-र्वसुदेयाय विधते वि भाति।।

卐 यो अप्स्वा शुचिना दैव्येन- ऋतावाऽजस्र उर्विया विभाति। वया इदन्या भुवना.न्यस्य- प्र जायन्ते वीरुधश्च प्रजाभिः।।

卐 अपा.न्नपादा ह्यस्था.दुपस्थ-ञ्जिह्माना.मूर्ध्वो विद्युतं वसानः। तस्य ज्येष्ठं महिमानं वहन्ती-र्हिरण्यवर्णाः परि यन्ति यह्वीः।।

卐 हिरण्यरूप स्स हिरण्यसन्दृ-गपा.न्नपा.त्सेदु हिरण्यवर्णः। हिरण्यया.त्परि योने र्निषद्या-हिरण्यदा .ददत्यन्न.मस्मै।।

❀02.07.24 卐तद.स्यानीक.मुत चारु ना-मापीच्यं वर्धते नप्तु रपाम्। यमिन्धते युवतय स्समित्था-हिरण्यवर्ण.ङ्घृत.मन्न.मस्य।।

卐 अस्मै बहूना.मवमाय सख्ये- यज्ञै र्विधेम नमसा हविर्भिः। सँसानु मार्ज्मि दिधिषामि बिल्मै- र्दधा. म्यन्नैः परि वन्द ऋग्भिः।।

卐 स ईं वृषाऽजनय.त्तासु गर्भं- स ईं शिशु र्धयति तं रिहन्ति। सो अपा.न्नपा.दनभिम्लातवर्णो-ऽन्यस्ये वेह तन्वा विवेष।।

卐 अस्मि.न्पदे परमे तस्थिवांस-मध्वस्मभि र्विश्वहा दीदिवांसम्। आपो नप्त्रे घृत.मन्नं वहन्ती- स्स्वय. मत्कैः परि दीयन्ति यह्वीः।।

卐 अयांस.मग्ने सुक्षिति.ञ्जना-यायांसमु मघवद्भ्य स्सुवृक्तिम्। विश्व.न्तद्भद्रं यदवन्ति देवा- बृह.द्वदेम विदथे सुवीराः।।

2.36 तुभ्यमिति षडृचस्य सूक्तस्य, शौनको गृत्समदः-इन्द्रो- मरुत-स्त्वष्टाऽग्निरिन्द्रो मित्रावरुणाविति क्रमेण देवता जगती- (एता ऋतुदेवताः)।।-

❀02.07.25 ☞卐तुभ्यं हिन्वानो वसिष्ट गा^ अपो-ऽधुक्ष.न्त्सी.मविभि रद्रिभि नरः। पिबेन्द्र स्वाहा प्रहुतं वष.ट्कृतं- होत्रादा सोमं प्रथमो य^ ईशिषे।।

卐 यज्ञै स्संमिश्ला॰ पृषतीभिर् ऋष्टिभि- र्याम.ञ्छुभ्रासो अञ्जिषु प्रिया^ उत। आसद्या बर्हि भरतस्य सूनव॰- पोत्रादा सोमं पिबता दिवो नरः।।

卐 अमेव न स्सुहवा^ आ हि गन्तन- नि बर्हिषि सदतना रणिष्टन। अथा मन्दस्व जुजुषाणो अन्धस-स्त्वष्ट देवेभि र्जनिभि स्सुमद्गणः।।

卐 आ वक्षि देवा॰ इह विप्र यक्षि-चोश.न्होत र्नि षदा योनिषु त्रिषु। प्रति वीहि प्रस्थितं सोम्यं मधु-पिबाऽऽग्नीध्रा.त्तव भागस्य तृण्णुहि।।

卐 एष स्य ते तन्वो नृम्णवर्धन-स्सह ओज॰ प्रदिवि बाह्वो र्हितः। तुभ्यं सुतो मघव.न्तुभ्य.माभृत-स्त्वमस्य ब्राह्मणादा तृप.त्पिब।।

卐 जुषेथाँ यज्ञं बोधतं हवस्य मे- सत्तो होता निविद॰ पूर्व्या^ अनु। अच्छा राजाना नम^ एत्यावृतं-प्रशास्त्रा.दा पिबतं सोम्यं मधु।।इति सप्तमोऽध्याय स्समाप्तः।।

## द्वितीयाष्टके अष्टमाध्यायः। वर्गाः(1-27)

2.37 मन्दस्वेति षड्चस्य सूक्तस्य, शौनको गृत्समदः-आद्यानां चतसृणां द्रविणोदाः-पञ्चम्या आश्विनौ-षष्ठ्या अग्नि-र्जगती।।

❀02.08.01 ☞卐मन्दस्व होत्रा.दनु जोष.मन्धसो-ऽध्वर्यव.स्स पूर्णां वष्ट्यासिचम्। तस्मा एतं भरत तद्वशो ददि-र्हौत्रा.त्सोम.न्द्रविणोद॰ पिब ऋतुभिः।।

卐 यमु पूर्व.मह्रुवे तमिदं हुवे- सेदु हव्यो ददि र्यो नाम पत्यते। अध्वर्युभि॰ प्रस्थितं सोम्यं मधु- पोत्रा .त्सोम.न्द्रविणोद॰ पिब ऋतुभिः।।

卐 मेद्यन्तु ते वह्नयो येभि रीयसे-ऽरिषण्य.न्वीळयस्वा वनस्पते। आयूया धृष्णो~ अभिगूर्या त्व-न्नेष्ट्रा. त्सोम.न्द्रविणोद॰ पिब ऋतुभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अपा.द्धोत्रा.दुत पोत्रा.दम-त्तोत नेष्ट्रा.दजुषत प्रयो हितम्। तुरीयं पात्र.ममृक्त.ममर्त्य-न्द्रविणोदाः पिबतु द्राविणोदसः।।

卐 अर्वाञ्च.मद्य यय्य.न्नृवाहणं- रथँ युञ्जाथा.मिह वाँ विमोचनम्। पृङ्क्तं हवींषि मधुना हिक.ङ्गत-मथा सोमं पिबतं वाजिनीवसू~।।

卐 जोष्यग्ने समिध.ञ्जोष्याहुति-ञ्जोषि ब्रह्म जन्य.ञ्जोषि सुष्टुतिम्। विश्वेभि र्विश्वा९ ऋतुना वसो~ मह- उश.न्देवा९ उशतः पायया हविः।।

2.38 उदु ष्य इत्येकादशर्चस्य सूक्तस्य, शौनको गृत्समद- स्सविता- त्रिष्टुप्।।

❀02.08.02 卐उदुष्य^ देव.स्सविता सवाय- शश्वत्तम.न्तदपा^ वह्नि रस्थात्। नून.न्देवेभ्यो वि हि धाति रत्न-मथाभज.द्वीतिहोत्रं स्वस्तौ।।

卐 विश्वस्य हि श्रुष्टये देव^ ऊर्ध्वः- प्र बाहवा पृथुपाणि.स्सिसर्ति। आप.श्चि.दस्य व्रत आ निमृग्रा ^- अय.ञ्चिद्वातो रमते परिज्मन्न्।।

卐 आशुभि श्चिद्या.न्विमुचाति नून-मरीरम.दतमान.ञ्चिदेतोः। अह्यर्षूणा.ञ्चिन्न्ययां९ अविष्या-मनु व्रतं सवितु र्मोक्याऽगात्।।

卐 पुन~ स्समव्य.द्वितँ वयन्ती- मध्या कर्तो न्यधा.च्छक्म धीरः। उत्संहायास्था.द्व्यृ1(ऋ)तू९ रदर्ध - ररमति स्सविता देव^ आऽगात्।।

卐 नानौकांसि दुर्यो विश्व.मायु- र्वि तिष्ठते प्रभव श्शोको अग्नेः। ज्येष्ठं माता सूनवे भाग.माऽधा-दन्वस्य केत.मिषितं सवित्रा।।

❀02.08.03 卐समाववर्ति विष्ठितो जिगीषु- र्विश्वेषा.ङ्काम.श्चरता.ममाभूत्। शश्वा९ अपो विकृतं हित्व्यागा-दनु व्रतं सवितु र्दैव्यस्य।।

卐 त्वया हित.मप्य.मप्सु भाग-न्धन्वान्वा मृगयसो वि तस्थुः। वनानि विभ्यो नकिरस्य तानि- व्रता देवस्य सवितु र्मिनन्ति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 याद्राध्य्1(अँ) वरुणो योनि.मप्य-मनिशित.न्निमिषि जर्भुराणः। विश्वो मार्ताण्डो व्रजमा पशु र्गा-स्थशो जन्मानि सविता व्याकः~।।

卐 न यस्येन्द्रो वरुणो न मित्रो- व्रत.मर्यमा न मिनन्ति रुद्रः। नारातय.स्तमिदं स्वस्ति- हुवे देवं सवितार.न्नमोभिः।।

卐 भग.न्धियँ वाजयन्तः पुरन्धि-न्नराशंसो ग्नास्पति र्नो अव्याः। आये वामस्य सङ्गथे रयीणां- प्रिया देवस्य सवितु.स्स्याम।।

卐 अस्मभ्य.न्तद्दिवो अद्भ्यः पृथिव्या-स्त्वया दत्त.ङ्काम्यं राध^ आ ऽगात्। शँय.त्स्तोतृभ्य^ आपये भवा-त्युरुशंसाय सवित र्जरित्रे।।

2.39 ग्रावाणेवेत्यष्टर्चस्य सूक्तस्य, शौनको गृत्समदोऽश्विनौ- त्रिष्टुप्।।

❀02.08.04 卐ग्रावाणेव तदि.दर्थ.ञ्जरेथे~- गृध्रेव वृक्ष.न्निधिमन्त.मच्छ। ब्रह्माणेव विदथ उक्थशासा-दूतेव हव्या जन्या पुरुत्रा।।

卐 प्रातर्यावाणा रथ्येव वीरा-ऽजेव यमा वर.मासचेथे~। मेनेइव~ तन्वा3(आ) शुम्भमाने~-दम्पतीव~ क्रतुविदा जनेषु।।

卐 शृङ्गेव नः प्रथमा गन्त.मर्वा-क्छफाविव जर्भुराणा तरोभिः। चक्रवाकेव प्रति वस्तो रुस्रा-ऽर्वाञ्चा यातं रथ्येव शक्रा।।

卐 नावेव नः पारयतँ युगेव- नभ्येव न^ उपधीव~ प्रधीव~। श्वानेव नो अरिषण्या तनूना-ङ्खृगलेव विस्रसः पात.मस्मान्।।

卐 वातेव.वाजुर्या नद्येव रीति-रक्षीइव~ चक्षुषाऽऽयात.मर्वाक्। हस्ताविव तन्वे3(ए) शंभविष्ठा- पादेव नो नयतं वस्यो अच्छ।।

❀02.08.05 卐ओष्ठाविव मध्वास्ने वदन्ता- स्तनाविव पिप्यत.ञ्जीवसे नः। नासेव न.स्तन्वो रक्षितारा-कर्णाविव सुश्रुता भूत.मस्मे।।

卐 हस्तेव शक्ति.मभि सन्ददी~ नः-≈क्षामेव न.स्समजतं रजांसि। इमा^ गिरो अश्विना युष्मयन्तीः-≈ क्षणोत्रेणेव स्वधितिं सं शिशीतम्।।

卐 एतानि वा.मश्विना वर्धनानि- ब्रह्म स्तोम.ङ्गृत्समदासो अक्रन्न्। तानि नरा जुजुषा.णोप यातं-बृह.द्वदेम विदथे सुवीराः।।

2.40 सोमापूषणेति षड़ृचस्य सूक्तस्य, शौनको गृत्समद- स्सोमापूषणौ-अन्त्यायाः सोमपूषाऽदित्या-स्त्रिष्टुप्।।

❀02.08.06 卐सोमापूषणा जनना रयीणा-ञ्जनना दिवो जनना पृथिव्याः। जातौ विश्वस्य भुवनस्य गोपौ- देवा^ अकृण्व.न्नमृतस्य नाभिम्।।

卐 इमौ देवौ जायमानौ जुष-न्तेमौ तमांसि गूहता.मजुष्टा। आभ्या.मिन्द्रः पक्व.मामा-स्वन्त~ स्सोमापूषभ्या.ञ्जन.दुस्त्रियासु।।

卐 सोमापूषणा रजसो विमानं- सप्तचक्रं रथ.मविश्वमिन्वम्। विषूवृतं मनसा युज्यमान-न्तञ्जिन्वथो वृषणा पञ्चरश्मिम्।।

卐 दिव्य1(अ)न्य.स्सदन.ञ्चक्र उच्चा- पृथिव्या.मन्यो अध्यन्तरिक्षे। तावस्मभ्यं पुरुवारं पुरुक्षुं-राय.स्पोषँ वि ष्यता.न्नाभि.मस्मे।।

卐 विश्वा.न्यन्यो भुवना जजान- विश्व.मन्यो अभिचक्षाण ^एति। सोमापूषणा ववत.न्धियं मे- युवाभ्याँ विश्वाः पृतना^ जयेम।।

卐 धियं पूषा जिन्वतु विश्व.मिन्वो- रयिं सोमो रयिपति र्दधातु। अवतु देव्यदिति रनर्वा- बृह.द्वदेम विदथे सुवीराः।।

2.41 वायो इत्येकविंशत्यृचस्य सूक्तस्य, शौनको गृत्समदः-आद्ययोर्द्वयो र्वायुः-तृतीयाया इन्द्रवायू-चतुर्थ्यादि तिसृणां मित्रावरुणौ-सप्तम्यादि तिसृणामश्विनौ-दशम्यादि तिसृणामिन्द्रः-त्रयोदश्यादि तिसृणां विश्वेदेवाः-षोडश्यादि तिसृणां सरस्वती-अन्त्यानां तिसृणां द्यावापृथिवी-(हविर्धाना वा) गायत्री छन्दः-अम्बितम इति द्वे अनुष्टुभौ-इमा ब्रह्मेति बृहती।।

❀02.08.07 वायो~ ये ते सहस्रिणो- रथास.स्तेभि रागहि। नियुत्वा.न्त्सोमपीतये।।

卐 नियुत्वा.न्वाय~ वा ग-ह्ययं शुक्रो अयामि ते। गन्ताऽसि सुन्वतो गृहम्।।

卐 शुक्र.स्याद्य गवाशिर^- इन्द्रवायू~ नियुत्वतः। आ यातं पिबत.न्नरा।।

卐 अयँ वां मित्रावरुणा- सुत.स्सोम^ ऋतावृधा। ममे.दिह श्रुतं हवम्।।

卐 राजाना वनभिद्रुहा- ध्रुवे सद.स्युत्तमे। सहस्रस्थूण आसाते~।।

❀02.08.08 卐ता सम्राजा घृतासुती- आदित्या दानुन.स्पती~। सचेते~ अनवह्वरम्।।

卐 गोमदू षु नासत्या-ऽश्वाव.द्यात.मश्विना। वर्ती रुद्रा नृपाय्यम्।।

卐 न यत्परो नान्तर^- आदधर्ष.द्वृषण्वसू~। दुश्शंसो मर्त्यो रिपुः।।

卐 ता न^ आ वोऌह.मश्विना- रयिं पिशङ्गसन्दृशम्। धिष्ण्या वरिवोविदम्।।

卐 इन्द्रो अङ्ग महद्भय-मभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः।।

❀02.08.09 इन्द्र श्च मृळयाति नो- न नः पश्चा.दघ.न्नशत्। भद्रं भवाति नः पुरः।।

卐 इन्द्र^ आशाभ्य.स्परि- सर्वाभ्यो अभय.ङ्करत्। जेता शत्रू.न्विचर्षणिः।।

卐 विश्वे देवास^ आ गत- शृणुता म इमं हवम्। एदं बर्हि र्नि षीदत।।

卐 तीव्रो वो मधुमा९ अयं- शुनहोत्रेषु मत्सरः। एतं पिबत काम्यम्।।

卐 इन्द्रज्येष्ठा मरुद्गणा^- देवासः पूषरातयः। विश्वे मम श्रुता हवम्।।

❀02.08.10 卐अम्बितमे नदीतमे- देवितमे सरस्वति। अप्रशस्ताइव स्मसि- प्रशस्ति.मम्ब न.स्कृधि।।

卐 त्वे विश्वा सरस्वति- श्रिताऽऽयूंषि देव्याम्। शुनहोत्रेषु मत्स्व- प्रजा.न्देवि दिदिड्ढि नः।।

卐 इमा ब्रह्म सरस्वति- जुषस्व वाजिनीवति। या ते मन्म गृत्समदा^ ऋतावरि- प्रिया देवेषु जुह्वति।।

卐 प्रेताँ यज्ञस्य शम्भुवा- युवा.मिदा वृणीमहे। अग्नि.ञ्च हव्यवाहनम्।।

卐 द्यावा नः पृथिवी~ इमं- सिध्र.मद्य दिविस्पृशम्। यज्ञ.न्देवेषु यच्छताम्।।

卐 आ वा.मुपस्थ.मद्रुहा- देवा.स्सीदन्तु यज्ञियाः। इहाद्य सोमपीतये।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

☫ 2.42 कनिक्रददिति तृचस्य सूक्तस्य, शौनको गृत्समद-श्शकुन्त-स्त्रिष्टुप्।।

❀02.08.11 卐कनिक्रद.ज्जनुषं प्रब्रुवाण^- इयर्ति वाचं.मरितेव नावम्। सुमङ्गल.श्च शकुने भवासि- मा त्वा काचि.दभिभा विश्व्या विदत्।।

卐 मा त्वा श्येन^ उद्वधी.न्मा सुपर्णो- मा त्वा विद.दिषुमा.न्वीरो अस्ता। पित्र्या.मनु प्रदिश.ङ्कनिक्रद-त्सुमङ्गलो भद्रवादी वदेह।।

卐 अव क्रन्द दक्षिणतो गृहाणां- सुमङ्गलो भद्रवादी शकुन्ते। मा न.स्स्तेन^ ईशत माऽघशंसो-बृह.द्वदेम विदथे सुवीराः।।

☫ 2.43 प्रदक्षिणिदिति तृचस्यसूक्तस्य, शौनको गृत्समद- श्शकुन्तो- जगती-द्वितीयाऽतिशक्करी-अष्टिर्वा।।

❀02.08.12 卐प्रदक्षिणि.दभि गृणन्ति कारवो- वयो वदन्त^ ऋतुथा शकुन्तयः। उभे~ वाचौ वदति सामगाइव- गायत्र.ञ्च त्रैष्टुभ.ञ्चानु राजति।।

卐 उद्गातेव शकुने साम गायसि- ब्रह्मपुत्रइव सवनेषु शंससि। वृषेव वाजी शिशुमती रपीत्या- सर्वतो न श्शकुने भद्रमा वद- विश्वतो न श्शकुने पुण्यमा वद।।

卐 आवद.स्त्वं शकुने भद्रमा वद- तूष्णी.मासीन.स्सुमति.ञ्चिकिद्धि नः। यदुत्पत.न्वदसि कर्करि यथा-बृह. द्वदेम विदथे सुवीराः।।

卐 ✡ अथ परिशिष्टम्।।

卐 भद्रँ वद दक्षिणतो- भद्र मुत्तरतो वद। भद्रं पुरस्तान्नो वद -भद्रं पश्चा.त्कपिञ्जल।।

卐 भद्रँ वद पुत्रै- र्भद्रँ वद गृहेषु च। भद्र.मस्माक न्नो वद- भद्र न्नो अभय.ङ्कृधि(वद?)।।

卐 भद्र मधस्ता न्नो वद- भद्र.मुपरिष्टा.न्नो वद। भद्रंभद्र.न्न^ आ वद- भद्रन्न स्सर्वतो वद।।

卐 असपत्नꣳ पुरस्ता.न्न -श्शिव.न्दक्षिणत.स्कृधि। अभयं सततं पश्चा-द्भद्र.मुत्तरतो गृहे।।

卐 यौवनानि महयसि- जिग्युषा.मिव दुन्दुभिः। शकुन्तक प्रदक्षिणं- शतपत्राऽभि नो वद।।

Sri Sachchidananda Avadhoota Datta Peetham

卐 आवद स्त्वं शकुने भद्रमा वद- तूष्णी.मासीन.स्सुमति.श्चिकिद्धि नः। यदुत्पत.न्वदसि कर्करि यथा-
बृह. द्वदेम विदथे सुवीराः।। 卐 इति परिशिष्टम्।। इति द्वितीयं मण्डलम्।। विश्वेश्वराय नमः ....

ʊ तृतीयं मण्डलम्।।

3.01 सोमस्य मेति त्रयोविंशत्यृचस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-स्त्रिष्टुप्।।

❀02.08.13 卐सोमस्य मा तवसँ वक्ष्यग्ने- वह्नि.श्चकर्थ विदथे यजध्यै। देवा॰ अच्छा दीद्य.द्युञ्जे अद्रिं-
शमाये अग्ने तन्व.ञ्जुषस्व।।

卐 प्राञ्चँ यज्ञ.ञ्चकृम वर्धता.ङ्गी-स्समिद्भि रग्नि.न्नमसा दुवस्यन्न्। दिव.श्शशासु र्विदथा कवीना-ङ्गृत्साय
चित्तवसे गातुमीषुः।

卐 मयो दधे मेधिर॰ पूतदक्षो- दिव.स्सुबन्धु र्जनुषा पृथिव्याः। अविन्दन्नु दर्शत.मप्स्व1(अ)न्त- र्देवासो
अग्नि.मपसि स्वसॄणाम्।।

卐 अवर्धय.न्त्सुभगं सप्त यह्वी- श्श्वेत.ञ्जज्ञान.मरुषं महित्वा। शिशु.न्न जात.मभ्यारु रश्वा- देवासो
अग्नि.ञ्जनिम.न्वपुष्यन्न्।।

卐 शुक्रेभि रङ्गै रज आततन्वा-न्क्रतुं पुनान॰ कविभि॰ पवित्रैः। शोचि र्वसान॰ पर्यायु रपां- श्रियो
मिमीते बृहती रनूनाः।।

❀02.08.14 卐वव्राजा सीमनदती रदब्धा- दिवो यह्वी रवसाना अनग्नाः। सना अत्र
युवतय.स्सयोनी- रेक.ङ्गर्भ.न्दधिरे सप्त वाणीः।।

卐 स्तीर्णा अस्य संहतो विश्वरूपा- घृतस्य योनौ स्रवथे मधूनाम्। अस्थु रत्र धेनव॰ पिन्वमाना- मही
दस्मस्य मातरा समीची~।।

卐 बभ्राण. स्सूनो~ सहसो व्यद्यौ-द्दधान श्शुक्रा रभसा वपूंषि। श्चोतन्ति धारा मधुनो घृतस्य- वृषा यत्र
वावृधे काव्येन।।

卐 पितु श्चिदूध र्जनुषा विवेद- व्यस्य धारा असृज द्वि धेनाः। गुहा चरन्तं सखिभि श्शिवेभि- र्दिवो
यह्वीभि र्न गुहा बभूव।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 पितुश्च गर्भं.ञ्जनितुश्च बभ्रे- पूर्वी रेको अधय त्पीप्यानाः। वृष्णे सपत्नी~ शुचये सबन्धू~- उभे~ अस्मै मनुष्ये3(ए)~ नि पाहि।।

❀02.08.15 卐उरौ महा॰ अनिबाधे ववर्धा-ऽपो अग्निँ यशस स्सं हि पूर्वीः। ऋतस्य योना वशय दमूना^- जामीना.मग्नि रपसि स्वसृणाम्।।

卐 अक्रो न बभ्रि स्समिथे महीना-न्दिदृक्षेय स्सूनवे भाऋजीकः। उदुस्त्रिया जनिता यो जजा-नापा.ङ्गर्भो नृतमो यह्वो अग्निः।।

卐 अपा.ङ्गर्भ.न्दर्शत.मोषधीनाँ- वना जजान सुभगा विरूपम्। देवास श्चिन्मनसा सं हि जग्मुः- पनिष्ठ.ञ्जात.न्तवस.न्दुवस्यन्न्।।

卐 बृहन्त^ इद्भानवो भाऋजीक-मग्निं सचन्त विद्युतो न शुक्राः। गुहेव वृद्धं सदसि स्वे अन्त- रपार ऊर्वे अमृत.न्दुहानाः।।

卐 ईळे च त्वा यजमानो हविर्भि रीळे सखित्वं सुमति.न्निकामः। देवै रवो मिमीहि सञ्जरित्रे- रक्षा च नो दम्येभि रनीकैः।।

❀02.08.16 卐उपक्षेतार.स्तव सुप्रणीते-ऽग्ने विश्वानि धन्या दधानाः। सुरेतसा श्रवसा तुञ्जमाना^- अभि ष्याम पृतनायू॰ रदेवान्।।

卐 आ देवाना.मभवः केतु रग्ने- मन्द्रो विश्वानि काव्यानि विद्वान्। प्रति मर्ता॰ अवासयो दमूना^- अनु देवा.न्रथिरो यासि साधन्न्।।

卐 नि दुरोणे अमृतो मर्त्यानां- राजा ससाद विदथानि साधन्न्। घृतप्रतीक^ उर्विया व्यद्यौ-दग्नि र्विश्वानि काव्यानि विद्वान्।।

卐 आ नो गहि सख्येभि श्शिवेभि- र्महा.न्महीभि रूतिभि स्सरण्यन्न्। अस्मे रयिं बहुलं सन्तरुत्रं- सुवाचं भागँ यशस.ङ्कृधी नः।।

卐 एता ते अग्ने जनिमा सनानि- प्र पूर्व्याय नूतनानि वोचम्। महान्ति वृष्णे सवना कृतेमा- जन्मञ्जन्म न्निहितो जातवेदाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 जन्मञ्जन्म.न्निहितो जातवेदा^ विश्वामित्रेभि रिध्यते अजस्रः। तस्य वयं सुमतौ यज्ञिय-स्यापि भद्रे सौमनसे स्याम।।

卐 इमँ यज्ञं सहसाव.न्त्वन्नो- देवत्रा धेहि सुक्रतो~ रराणः। प्र यंसि होत बृहती रिषो नो-ऽग्ने महि द्रविण. मा यजस्व।।

卐 इळा.मग्ने पुरुदंसं सनिङ्गो-श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति भूत्वस्मे।।

3.02 वैश्वानरायेति पञ्चदशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रो- वैश्वानरोऽग्नि-र्जगती।।

❀02.08.17 卐वैश्वानराय धिषणा.मृतावृधे- घृत.न्न पूत.मग्नये जनामसि। द्विता होतारं मनुषश्च वाघतो- धिया रथ.न्न कुलिश.स्समृण्वति।।

卐 स रोचय.ज्जनुषा रोदसी उभे~- स मात्रो रभव.त्पुत्र^ ईड्यः। हव्यवाळग्नि रजर श्चनोहितो- दूळभो विशा.मतिथि र्विभावसुः।।

卐 क्रत्वा दक्षस्य तरुषो विधर्मणि- देवासो अग्नि.ञ्जनयन्त चित्तिभिः। रुरुचानं भानुना ज्योतिषा महा-मत्य.न्न वाजं सनिष्य.न्नुप ब्रुवे।।

卐 आ मन्द्रस्य सनिष्यन्तो वरेण्यँ- वृणीमहे अह्रयँ वाज.मृग्मियम्। रातिं भृगूणा.मुशिज.ङ्कविक्रतु-मग्निं राजन्त.न्दिव्येन शोचिषा।।

卐 अग्निं सुम्नाय दधिरे पुरो जना^- वाजश्रवस.मिह वृक्तबर्हिषः। यतस्रुच स्सुरुचँ विश्वदेव्यं- रुद्रँ यज्ञानां साध.दिष्टि.मपसाम्।।

❀02.08.18 卐पावकशोचे तव हि क्षयं परि- होत र्यज्ञेषु वृक्तबर्हिषो नरः। अग्ने दुव इच्छमानास^ आप्य .मुपाऽऽसते द्रविण.न्धेहि तेभ्यः।।

卐 आ रोदसी अपृणदा स्वर्महः- ज्जातँ यदेन मपसो अधारयन्न्। सो अध्वराय परि णीयते कवि- रत्यो न वाजसातये चनोहितः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 नमस्यत हव्यदातिं स्वध्वर-न्दुवस्यत दम्य.ञ्जातवेदसम्। रथीर् ऋतस्य बृहतो विचर्षणि- रग्नि र्देवाना .मभव.त्पुरोहितः।।

卐 तिस्रो यह्वस्य समिधः परिज्मनो-ऽग्ने रपुन.न्नुशिजो अमृत्यवः। तासा.मेका.मदधु र्मर्त्ये भुज-मु लोक.मु द्वे~ उप जामि.मीयतुः।।

卐 विशा.ङ्कविं विश्पतिं मानुषी रिष-स्सं सीमकृण्व.न्त्स्वधितिं.न्न तेजसे। स उद्वतो निवतो याति वेविष-त्स गर्भ.मेषु भुवनेषु दीधरत्।।

❀02.08.19 卐स जिन्वते जठरेषु प्रजज्ञिवा-न्वृषा चित्रेषु नानद.न्न सिंहः। वैश्वानरः पृथुपाजा^ अमर्त्यो वसु रत्ना दयमानो वि दाशुषे।।

卐 वैश्वानरः प्रत्नथा नाक.माऽरुह-द्दिव.स्पृष्ठं भन्दमान.स्सुमन्मभिः। स पूर्वव.ज्जनय.ञ्जन्तवे धनं-समान .मज्मं पर्येति जागृविः।।

卐 ऋतावानँ यज्ञियँ विप्र मुक्थ्य1(अ)-मा यन्दधे मातरिश्वा दिवि क्षयम्। तञ्चित्रयामं हरिकेश.मीमहे-सुदीति.मग्निं सुविताय नव्यसे।।

卐 शुचि.न्न याम.न्निषिरं स्वर्दृश-ङ्केतु.न्दिवो रोचनस्था.मुषर्बुधम्। अग्निं मूर्धान.न्दिवो अप्रति¤ष्कुत-न्तमीमहे नमसा वाजिनं बृहत्।।

卐 मन्द्रं होतारं शुचि.मद्वयाविन-न्दमूनस.मुक्थ्यं विश्वचर्षणिम्। रथ.न्न चित्रँ वपुषाय दर्शतं- मनुर्हितं सदमि.द्राय ^ईमहे।।

3.03 वैश्वानरायेत्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रो- वैश्वानरोऽग्नि-र्जगती।।

❀02.08.20☞卐वैश्वानराय पृथुपाजसे विपो- रत्ना विधन्त धरुणेषु गातवे। अग्नि र्हि देवा९ अमृतो दुवस्य-त्यथा धर्माणि सनता न दूदुषत्।।

卐 अन्त र्दूतो रोदसी दस्म^ ईयते- होता निषत्तो मनुषः पुरोहितः। क्षयं बृहन्तं परि भूषति द्युभि- र्देवेभि रग्नि रिषितो धियावसुः।।

卐 केतुं यज्ञानाँ विदथस्य साधनं- विप्रासो अग्निं महयन्त चित्तिभिः। अपांसि यस्मि.न्नधि सन्दधु गिर-स्तस्मि.न्त्सुम्नानि यजमान^आचके।।

卐 पिता यज्ञाना.मसुरो विपश्चिताँ- विमान.मग्नि र्वयुन.ञ्च वाघताम्। आ विवेश रोदसी भूरिवर्पसा-पुरुप्रियो भन्दते धामभि꠰ कविः।।

卐 चन्द्र.मग्नि.श्चन्द्ररथं हरिव्रतँ- वैश्वानर.मप्सुषदं स्वर्विदम्। विगाह.न्तूर्णि.न्तविषीभि रावृतं- भूर्णि.न्देवास^ इह सुश्रिय.न्दधुः।।

❀02.08.21 卐अग्नि र्देवेभि र्मनुषश्च जन्तुभि- स्तन्वानो यज्ञं पुरुपेशस.न्धिया। रथी रन्त रीयते साधदिष्टिभि- र्जीरो दमूना ^अभिशस्तिचातनः।।

卐 अग्ने जरस्व स्वपत्य आयु-न्यूर्जा पिन्वस्व समिषो दिदीहि नः। वयांसि जिन्व बृहतश्च जागृव -उशि.ग्देवाना.मसि सुक्रतु र्विपाम्।।

卐 विश्पतिँ यह्व.मतिथि.न्नर.स्सदा- यन्तार.न्धीना.मुशिज.ञ्च वाघताम्। अध्वराणा.ञ्चेतन.ञ्जातवेदसं- प्र शंसन्ति नमसा जूतिभि र्वृधे।।

卐 विभावा देव स्सुरण꠰ परि क्षिती -रग्नि र्बभूव शवसा सुमद्रथः। तस्य व्रतानि भूरिपोषिणो वय-मुप भूषेम दम आ सुवृक्तिभिः।।

卐 वैश्वानर तव धामा.न्याचके- येभि स्स्वर्वि.दभवो विचक्षण। जात^ आऽपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना।।

卐 वैश्वानरस्य दंसनाभ्यो बृह-दरिणा.देक स्स्वपस्यया कविः। उभा पितरा महय.न्नजाय-ताग्नि र्द्यावापृथिवी~ भूरिरेतसा।।

🏺 3.04 समित्समिदित्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इध्म-स्तनूनपा-दिळो- बर्हि-र्दोवीर्द्वार- उषासानक्ता- दौव्यौ होतारौ- सरस्व-तीळाभारत्य- स्त्वष्टा-वनस्पति- स्वाहाकृतय इति क्रमेण देवता- स्त्रिष्टुप्।।

❀02.08.22 卐समित्सँमि.त्सुमना बोध्यस्मे- शुचाशुँचा सुमतिं रासि वस्वः। आ देव देवा.न्यजथाय वक्षि- सखा सखी.न्त्सुमना यक्ष्यग्ने।।

卐 यन्देवास स्त्रिरह.न्नायजन्ते- दिवेदिँवे वरुँणो मित्रो अग्निः। सैमँ यज्ञं मधुमन्त.ङ्कृधी न- स्तनूनपा. द्घृतयोनिँ विधन्तम्।।

卐 प्र दीधिँति विँश्ववारा जिगाति- होतार.मिळः प्रथमँ यजध्यै। अच्छा नमोभि वृँषभँ वन्दध्यै- स देवा न्यक्ष.दिषितो यजीयान्।।

卐 ऊर्ध्वो वा.ङ्गातु रध्वरे अँका- यूँर्ध्वा शोचींषि प्रस्थिँता रजांसि। दिवो वा नाभा.न्यँसादि होता- स्तृणीमहिँ देवव्यँचा वि बर्हिँः।।

卐 सप्त होत्राणि मनँसा वृणाना^- इन्वन्तो विश्वं प्रतिँ यन्नृतेन। नृपेशँसो विदथेषु प्र जाता ^-अभी3(ई)मँ यज्ञँ वि चँरन्त पूर्वीः।।

❀02.08.23 卐आ भन्दँमाने~ उषसा उपाके~- उत स्मँयेते~ तन्वा3(आ) विरूपे~। यथा नो मित्रो वरुँणो जुजोष-दिन्द्रो मरुत्वाँ उत वा महोभिः।।

卐 दैव्या होतारा प्रथमा न्यृञ्जे- सप्त पृक्षास स्स्वधया मदन्ति। ऋतं शंसन्त ^ऋत.मित्त आहु- रनु व्रतँ व्रँतपा^ दीध्यानाः।।

卐 आ भारँती भारँतीभि स्सजोषा^- इळा देवै मँनुष्येँभि रग्निः। सरँस्वती सारस्वतेभिँ रर्वा-क्तिस्रो देवी बँर्हिरेदं सँदन्तु।।

卐 तन्न स्तुरीप.मध पोषयित्नु- देव त्वष्ट विँ रँराण स्स्यस्व~। यतो वीरः कर्मँण्य स्सुदक्षो- युक्तग्रावा जायँते देवकामः।।

卐 वनँस्पतेऽवँ सृजोपँ देवा-नग्नि हँवि श्शँमिता सूँदयाति। सेँदु होता सत्यँतरो यजाति- यथा देवाना.ञ्जनिँमानि वेद।।

卐 आ याह्यग्ने समिधानो अर्वा-ङिन्द्रेण देवै स्सरथ.न्तुरेभिः। बर्हि र्न आस्ता.मदिँति स्सुपुत्रा- स्स्वाहा देवा^ अमृता मादयन्ताम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☬ 3.05 प्रत्यग्निरित्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि- स्त्रिष्टुप्-(प्रत्यग्निः-प्र कारवः सूक्तयोऽन्यासां द्यावापृथिव्यादीनां निपाता दृश्यन्ते- अत स्तयोर्लिङ्गोक्ता देवताः पाक्षिकाः)

❀02.08.24 卐प्रत्यग्नि रुषस श्चेकितानो-ऽबोधि विप्रः पदवीः कवीनाम्। पृथुपाजा देवयद्भि स्समिद्धो-ऽप द्वारा तमसो वह्निरावः~।।

卐 प्रेद्वग्नि वावृधे स्तोमेभि -र्गीर्भि स्स्तोतृणा.न्नमस्य^ उक्थैः। पूर्वीर् ऋतस्य सन्दृश श्चकान –स्स.न्दूतो अद्यौ.दुषसो विरोके।।

卐 अधा.य्यग्नि र्मानुषीषु विक्ष्व-1(अ)पाङ्गर्भो मित्र^ ऋतेन साधन्न्। आ हर्यतो यजत स्सान्वस्था-दभूदु विप्रो हव्यो मतीनाम्।।

卐 मित्रो अग्नि र्भवति यत्समिद्धो- मित्रो होता वरुणो जातवेदाः। मित्रो अध्वर्यु रिषिरो दमूना^- मित्र स्सिन्धूना.मुत पर्वतानाम्।।

卐 पाति प्रियं रिपो अग्रं पदं वेः- पाति यह्व श्चरणं सूर्यस्य। पाति नाभा सप्तशीर्षाण.मग्निः- पाति देवाना .मुपमाद.मृष्वः।।

❀02.08.25 卐ऋभु श्चक्र ईड्य.ञ्चारु नाम- विश्वानि देवो वयुनानि विद्वान्। ससस्य चर्म घृतव.त्पदँ वे-स्तदि.दग्नी रक्ष.त्यप्रयुच्छन्न्।।

卐 आ योनि.मग्नि र्घृतवन्त.मस्था-त्पृथुप्रगाण.मुशन्त.मुशानः। दीद्यान श्शुचिर् ऋष्वः पावकः- पुनःपुन र्मातरा नव्यसी कः~।।

卐 सद्यो जात^ ओषधीभि र्ववक्षे- यदी वर्धन्ति प्रस्वो घृतेन। आपइव प्रवता शुम्भमाना^- उरुष्य.दग्निः पित्रो रुपस्थे।।

卐 उदुष्टुत स्समिधा यह्वो अद्यौ-द्वर्ष्म.न्दिवो अधि नाभा पृथिव्याः। मित्रो अग्नि रीड्यो मातरिश्वा-ऽऽदूतो वक्ष.द्यजथाय देवान्।।

卐 उदस्तम्भी.त्समिधा नाक.मृष्वो3-(ओ)ऽग्नि र्भव.न्नुत्तमो रोचनानाम्। यदी भृगुभ्यः परि मातरिश्वा- गुहा सन्तं हव्यवाहं समीधे।।

卐 इळा.मग्ने पुरुदंसं सनिङ्गो- श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति र्भूत्वस्मे।।

3.06 प्र कारव इत्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि- स्त्रिष्टुप्।।-

❀02.08.26 卐प्र कारवो मनना वच्यमाना^- देवद्रीची.न्नयत देवयन्तः। दक्षिणावा.ड्वाजिनी प्राच्येति- हवि र्भर.न्त्यग्नये घृताची।।

卐 आ रोदसी अपृणा^ जायमान^- उत प्र रिक्था^ अध नु प्रयज्यो~। दिव श्चिदग्ने महिना पृथिव्या^- वच्यन्ता.न्ते वह्नय स्सप्तजिह्वाः।।

卐 द्यौश्च त्वा पृथिवी यज्ञियासो- नि होतारं सादयन्ते दमाय। यदी विशो मानुषी र्देवयन्ती४- प्रयस्वती रीळते शुक्र.मर्चिः।।

卐 महा.न्त्सधस्थे ध्रुव ^आ निषत्तो-ऽन्त र्द्यावा माहिने~ हर्यमाणः। आस्क्रे~ सपत्नी~ अजरे~ अमृक्ते~- सबर्दुघे~ उरुगायस्य धेनू~।।

卐 व्रता ते अग्ने महतो महानि- तव क्रत्वा रोदसी आ ततन्थ। त्व.न्दूतो अभवो जायमान- स्त्व.न्नेता वृषभ चर्षणीनाम्।।

❀02.08.27 卐ऋतस्य वा केशिना योग्याभि- र्घृतस्नुवा रोहिता धुरि धिष्व। अथाऽऽवह देवा.न्देव विश्वा- न्त्स्वध्वरा कृणुहि जातवेदः।।

卐 दिवश्चिदा ते रुचयन्त रोका^- उषो विभाती रनु भासि पूर्वीः। अपो यदग्न उशध.ग्वनेषु- होतु र्मन्द्रस्य पनयन्त देवाः।।

卐 उरौ वा ये अन्तरिक्षे मदन्ति- दिवो वा ये रोचने सन्ति देवाः। ऊमा^ वा ये सुहवासो यजत्रा^- आयेमिरे रथ्यो अग्ने अश्वाः।।

卐 ऐभि रग्ने सरथँ याह्यर्वा-ङ्नानारथँ वा विभवो ह्यश्वाः। पत्नीवत स्त्रिंशत न्त्रीँश्च देवा-ननुष्वध मा वह मादयस्व।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स होता यस्य रोदसी चिदुर्वी~- यज्ञँयज्ञ.मभि वृधे गृणीतः। प्राची~ अध्वरेव तस्थतु स्सुमेके~- ऋतावरी ऋतजातस्य सत्ये~।।

卐 इळा.मग्ने पुरुदंसं सनिङ्गो- श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति र्भूत्वस्मे।। इत्यष्टमाध्याय स्समाप्तः।। इति द्वितीयाष्टकं समाप्तम् ।।

## ℧ तृतीयाष्टकम्

### तृतीयाष्टके प्रथमाध्यायः। (वर्गाः 1-34)

3.07 प्र य आरुरित्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-स्त्रिष्टुप्

❀03.01.01 卐प्र य आरु श्शितिपृष्ठस्य धासे- रा मातरा विविशु स्सप्त वाणीः। परिक्षिता पितरा सञ्चरेते~ प्र सर्स्राते~ दीर्घमायुः प्रयक्षे।।

卐 दिवक्षसो धेनवो वृष्णो अश्वा^- देवी रातस्थौ मधुम.द्वहन्तीः। ऋतस्य त्वा सदसि क्षेमयन्तं- पर्येका चरति वर्तनिङ्गौः।।

卐 आ सी.मरोह त्सुयमा भवन्तीः- पति श्चिकित्वा.न्रयिवि.द्रयीणाम्। प्र नीलपृष्ठो अतसस्य धासे-स्ता^ अवासय.त्पुरुधप्रतीकः।।

卐 महि त्वाष्ट्र.मूर्जयन्ती रजुर्य- स्तभूयमानँ वहतो वहन्ति। व्यङ्गेभि र्दिद्युतान स्सधस्थ -एकामिव रोदसी आ विवेश।।

卐 जानन्ति वृष्णो अरुषस्य शेव-मुत ब्रध्नस्य शासने रणन्ति। दिवोरुच स्सुरुचो रोचमाना^- इळा येषा.ङ्गण्या माहिना गीः।।

❀03.01.02 卐उतो~ पितृभ्यां प्रविदाऽनु घोषं- महो महद्भ्या मनयन्त शूषम्। उक्षा ह यत्र परि धान.मक्तो- रनु स्वन्धाम जरितु र्ववक्ष।।

卐 अध्वर्युभिः पञ्चभि स्सप्त विप्राः- प्रियं रक्षन्ते निहितं पदं वेः। प्राञ्चो मद.न्त्युक्षणो अजुर्या- ^देवा^ देवाना.मनु हि व्रता गुः~।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 दैव्या होतारा प्रथमा.न्यृञ्जे- सप्त पृक्षास स्स्वधया मदन्ति। ऋतं शंसन्त ऋतमित्त आहु- रनु व्रतं व्रतपा दीध्यानाः।।

卐 वृषायन्ते महे अत्याय पूर्वी- वृष्णे चित्राय रश्मय स्सुयामाः। देव होत मन्द्रतर श्चिकित्वा-न्महो देवा .न्रोदसी एह वक्षि।।

卐 पृक्षप्रयजो द्रविण स्सुवाच- स्सुकेतव उषसो रेव.दूषुः। उतो चिदग्ने महिना पृथिव्याः- कृत.श्चिदेन स्सं महे दशस्य।।

卐 इळा.मग्ने पुरुदंसं सनिङ्गो- श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति र्भूत्वस्मे।।

3.08 अञ्जन्तीत्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रो- यूप- ष्षष्ठ्यादि पञ्चानां यूपाः- (अष्टम्या विश्वेदेवा वा) अन्त्याया व्रश्चन-स्त्रिष्टुप्- तृतीया सप्तम्या वनुष्टुभौ।।

❀03.01.03 卐अञ्जन्ति त्वा.मध्वरे देवयन्तो वनस्पते मधुना दैव्येन। यदूर्ध्व.स्तिष्ठा.द्रविणेह धत्ता- द्यद्वा क्षयो मातु रस्या उपस्थे।।

卐 समिद्धस्य श्रयमाणः पुरस्ता-द्ब्रह्म वन्वानो अजरं सुवीरम्। आरे अस्म.दमतिं बाधमान-उच्छ्रयस्व महते सौभगाय।।

卐 उच्छ्रयस्व वनस्पते- वर्ष्म.न्पृथिव्या अधि। सुमिती मीयमानो- वर्चो धा यज्ञवाहसे।।

卐 युवा सुवासाः परिवीत आऽगा-त्स उ श्रेया.न्भवति जायमानः। तन्धीरासः कवय उन्नयन्ति- स्वाध्यो3(ओ) मनसा देवयन्तः।।

卐 जातो जायते सुदिनत्वे अह्नां- समर्य आ विदथे वर्धमानः। पुनन्ति धीरा अपसो मनीषा- देवया विप्र उदियर्ति वाचम्।।

❀03.01.04 卐यान्वो नरो देवयन्तो निमिम्यु- र्वनस्पते स्वधिति र्वा ततक्ष। ते देवास.स्स्वरव स्तस्थिवांसः- प्रजाव.दस्मे दिधिषन्तु रत्नम्।।

卐 ये वृक्णासो अधि क्षमि- निमितासो यतस्रुचः। ते नो व्यन्तु वार्य-न्देवत्रा क्षेत्रसाधसः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 आदित्या रुद्रा वसव स्सुनीथा- द्यावाक्षामा पृथिवी अन्तरिक्षम्। सजोषसो यज्ञ.मवन्तु देवा-
ऊर्ध्वं.कृण्व.न्त्वध्वरस्य केतुम्।।

卐 हंसाइव श्रेणिशो यताना-श्शुक्रा वसाना.स्स्वरवो न आऽगुः। उन्नीयमाना॰ कविभि॰ पुरस्ता-द्देवा
देवाना.मपि यन्ति पाथः।।

卐 शृङ्गाणी.वे.च्छृङ्गिणां सन्ददृश्रे- चषालवन्त स्स्वरव॰ पृथिव्याम्। वाघद्भि र्वा विहवे श्रोषमाणा-
अस्मा॰ अवन्तु पृतनाज्येषु।।

卐 वनस्पते शतवल्शो वि रोह- सहस्रवल्शा वि वयं रुहेम। यन्त्वा.मयं स्वधिति स्तेजमान॰- प्रणिनाय
महते सौभगाय।।

3.09 सखाय इति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-र्बृहत्यन्त्या त्रिष्टुप्।।

❀03.01.09 卐सखाय.स्त्वा ववृमहे- देवं मर्तास ऊतये। अपा.न्नपातं सुभगं सुदीदितिं- सुप्रतूर्ति.
मनेहसम्।।

卐 कायमानो वना त्वँ- यन्मातृ रजग.न्नपः। न तत्ते अग्ने प्रमृषे निवर्तनँ- यद्दूरे सन्नि.हाभवः।।

卐 अतिं तृष्टँ ववक्षि-थाथैव सुमना असि। प्रप्रान्ये यन्ति पर्यन्य आसते- येषां सख्ये असि श्रितः।।

卐 ईयिवांस.मति स्रिध-श्शश्वती रति सश्चतः। अन्वी.मविन्द.न्निचिरासो अद्रुहो-ऽप्सु सिंहमिव
श्रितम्।।

卐 ससृवांसमिव त्मना-ऽग्नि.मित्था तिरोहितम्। ऐन.न्नय.न्मातरिश्वा परावतो- देवेभ्यो मथितं परि।।

❀03.01.06 卐तन्त्वा मर्ता अगृभ्णत- देवेभ्यो हव्यवाहन। विश्वा.न्यद्यज्ञा॰ अभिपासि मानुष- तव
क्रत्वा यविष्ठ्य।।

卐 तद्भद्र.न्तव दंसना- पाकाय चिच्छदयति। त्वाँ यदग्ने पशव स्समासते- समिद्ध.मपिशर्वरे।।

卐 आ जुहोता स्वध्वरं- शीरं पावकशोचिषम्। आशु.न्दूत.मजिरं प्रत्न.मीड्यं- श्रुष्टी देवं सपर्यत।।

卐 त्रीणि शता त्री सहस्रा.ण्यग्नि-स्त्रिंश.च्च देवा नव चासपर्यन्। औक्ष.न्घृतै रस्तृण.न्बर्हि रस्मा-
आदि.द्धोतार.न्न्यसादयन्त।।

3.10 त्वामग्न इति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-रुष्णिक्।।

❀03.01.07 卐त्वामग्ने मनीषिणं- स्सम्राज.ञ्चर्षणीनाम्। देवं मर्तास^ इन्धते समध्वरे।।

卐 त्वाँ यज्ञे.ष्वृत्विज-मग्ने होतार.मीळते। गोपा ऋतस्य दीदिहि स्वे दमे।।

卐 सघा य.स्ते ददाशति- समिधा जातवेदसे। सो अग्ने धत्ते सुवीर्यं स पुष्यति।।

卐 स केतु रध्वराणा-मग्नि र्देवेभि राऽगमत्। अञ्जान.स्सप्त होतृभि र्हविष्मते।।

卐 प्र होत्रे पूर्व्यँ वचो-ऽग्नये भरता बृहत्। विपा.ञ्ज्योतींषि बिभ्रते न वेधसे।।

❀03.01.08 卐अग्निँ वर्धन्तु नो गिरो- यतो जायत उक्थ्यः। महे वाजाय द्रविणाय दर्शतः।।

卐 अग्ने यजिष्ठो अध्वरे- देवा.न्देवयते यज। होता मन्द्रो वि राज.स्यति स्रिधः।।

卐 स नः पावक दीदिहि- द्युम.दस्मे सुवीर्यम्। भवा स्तोतृभ्यो अन्तम.स्स्वस्तये।।

卐 तन्त्वा विप्रा^विपन्यवो- जागृवांस स्समिन्धते। हव्यवाह.ममर्त्यं सहोवृधम्।।

3.11 अग्निर्होतेति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-र्गायत्री।।

❀03.01.09 卐अग्नि र्होता पुरोहितो-ऽध्वरस्य विचर्षणिः। स वेद यज्ञ.मानुषक्।।

卐 स हव्यवा.ळमर्त्य^- उशि.ग्दूत श्चनोहितः। अग्नि र्धिया समृण्वति।।

卐 अग्नि र्धिया स चेतति- केतु र्यज्ञस्य पूर्व्यः। अर्थं ह्यस्य तरणि।।

卐 अग्निं सूनुं सनश्रुतं- सहसो जातवेदसम्। वह्नि.न्देवा^ अकृण्वत।।

卐 अदाभ्यः पुरएता- विशा.मग्नि र्मानुषीणाम्। तूर्णी रथ.स्सदा नवः।।

❀03.01.10 卐साह्वा.न्विश्वा^ अभियुजः- क्रतु र्देवाना.ममृक्तः। अग्नि.स्तुविश्रवस्तमः।।

卐 अभि प्रयांसि वाहसा- दाश्वा अश्नोति मर्त्यः। क्षयं पावकशोचिषः।।

卐 परि विश्वानि सुधिता-ऽग्ने रश्याम मन्मभिः। विप्रासो जातवेदसः।।

卐 अग्ने विश्वानि वार्या- वाजेषु सनिषामहे। त्वे देवास^ एरिरे।।

3.12 इन्द्राग्नी इति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्राग्नी- गायत्री।।

❀03.01.11 卐इन्द्राग्नी~ आ गतं सुत-ङ्गीर्भि र्नभो वरेण्यम्। अस्य पात.न्धि.येषिता।।

卐 इन्द्राग्नी~ जरितु स्सचा- यज्ञो जिगाति चेतनः। अया पात.मिमं सुतम्।।

卐 इन्द्र.मग्नि.ङ्कविच्छदा- यज्ञस्य जूत्या वृणे। ता सोम.स्येह तृम्पताम्।।

卐 तोशा वृत्रहणा हुवे- सजित्वा.नापराजिता। इन्द्राग्नी~ वाजसातमा।।

卐 प्र वामर्च.न्त्युक्थिनो- नीथाविदो जरितारः। इन्द्राग्नी~ इष^ आ वृणे।।

❀03.01.12 卐इन्द्राग्नी~ नवतिं पुरो- दासपत्नी रधूनुतम्। साक.मेकेन कर्मणा।।

卐 इन्द्राग्नी~ अपसस्प-र्युप प्र यन्ति धीतयः। ऋतस्य पथ्या3(आ)^ अनु।।

卐 इन्द्राग्नी~ तविषाणि वां- सधस्थानि प्रयांसि च। युवो रप्तूर्यं हितम्।।

卐 इन्द्राग्नी~ रोचना दिवꣳ- परि वाजेषु भूषथः। तद्वा.ञ्चेति प्र वीर्यम्।।

3.13 प्र वो देवायेति सप्तर्चस्य सूक्तस्य, मित्र ऋषभोऽग्नि-रनुष्टुप्।।

❀03.01.13 卐प्र वो देवा.याग्नये- बर्हिष्ठ.मर्चास्मै। गम.द्देवेभिरा स नो- यजिष्ठो बर्हिराऽसदत्।।

卐 ऋतावा यस्य रोदसी- दक्षं सचन्त ऊतयः। हविष्मन्त.स्तमीळते- तं सनिष्यन्तोऽवसे।।

卐 स यन्ता विप्र^ एषां -स यज्ञाना.मथा हि षः। अग्नि.न्तँ वो दुवस्यत- दाता यो वनिता मघम्।।

卐 स न श्शर्माणि वीतये-ऽग्नि र्यच्छतु शन्तमा। यतो नꣳ प्रुष्णव.द्वसु- दिवि क्षितिभ्यो अप्स्वा।।

卐 दीदिवांस.मपूर्व्यँ -वस्वीभि रस्य धीतिभिः। ऋक्वाणो अग्नि.मिन्धते- होतारँ विश्पतिँ विशाम्।।

卐 उत नो ब्रह्म.न्नविष ^-उक्थेषु देवहूतमः। शन्नश्शोचा मरुद्वृधो-ऽग्ने सहस्रसातमः।।

卐 नू नो रास्व सहस्रव-त्तोकव.त्पुष्टिम.द्वसु। द्युम.दग्ने सुवीर्यँ- वर्षिष्ठ.मनुपक्षितम्।।

3.14 आ होतेति सप्तर्चस्य सूक्तस्य, वैश्वामित्र ऋषभोऽग्नि-स्त्रिष्टुप्।।

❀03.01.14 卐आ होता मन्द्रो विदथा.न्यस्था-त्सत्यो यज्वा कवितम.स्स वेधाः। विद्यु.द्रथ .स्सहस.स्पुत्रो अग्नि-श्शोचिष्केशꣳ पृथिव्यां पाजो अश्रेत्।।

卐 अयामि ते नमउक्ति.ञ्जुषस्व- ऋतावा.स्तुभ्य.ञ्चेतते सहस्वः। विद्वाँ आ वक्षि विदुषो नि षत्सि- मध्य आ बर्हि रूतये यजत्र।।

卐 द्रवता.न्त उषसा वाजयन्ती~- अग्ने वातस्य पथ्याभि रच्छ। यत्सी.मञ्जन्ति पूर्व्यं हविर्भि- रा वन्धुरेव तस्थतु र्दुरोणे।।

卐 मित्र.श्च तुभ्यँ वरुण स्सहस्वो-ऽग्ने विश्वे मरुत.स्सुम्न.मर्चन्न्। यच्छोचिषा सहस.स्पुत्र तिष्ठा^- अभि क्षितीः प्रथय.न्त्सूर्यो नृन्।।

卐 वय.न्ते अद्य ररिमा हि काम.मुत्तानहस्ता नम.सोपसद्य। यजिष्ठेन मनसा यक्षि देवा-नस्रेधता मन्मना विप्रो अग्ने।।

卐 त्वद्धि पुत्र सहसो वि पूर्वी- र्देवस्य यन्त्यूतयो वि वाजाः। त्वन्देहि सहस्रिणं रयि.न्नो-ऽद्रोघेण वचसा सत्य.मग्ने।।

卐 तुभ्य.न्दक्ष कविक्रतो~ यानीमा- देव मर्तासो अध्वरे अकर्म। त्वँ विश्वस्य सुरथस्य बोधि- सर्व.न्तदग्ने अमृत स्वदेह।।

3.15 वि पाजसेति सप्तर्चस्य सूक्तस्य, कात्य उत्कीलोऽग्नि-स्त्रिष्टुप्।।

❀03.01.15 卐वि पाजसा पृथुना शोशुचानो- बाधस्व द्विषो रक्षसो अमीवाः। सुशर्मणो बृहत.श्शर्मणि स्या-मग्ने रहं सुहवस्य प्रणीतौ।।

卐 त्व.न्नो अस्या^ उषसो व्युष्टौ- त्वं सूर उदिते बोधि गोपाः। जन्मेव नित्य.न्तनय.ञ्जुषस्व- स्तोमं मे अग्ने तन्वा सुजात।।

卐 त्व.न्नृचक्षा^ वृषभानु पूर्वीः- कृष्णा.स्वग्ने अरुषो वि भाहि। वसो~ नेषि च पर्षि चात्यंहः- कृधी नो राय उशिजो यविष्ठ।।

卐 अषाळ्हो अग्ने वृषभो दिदीहि- पुरो विश्वा.स्सौभगा सञ्जिगीवान्। यज्ञस्य नेता प्रथमस्य पायो- र्जातवेदो बृहत.स्सुप्रणीते।।

卐 अच्छिद्रा शर्म जरितः पुरूणि- देवाँ अच्छा दीद्यान.स्सुमेधाः। रथो न सस्नि रभि वक्षि वाज-मग्ने त्वं रोदसी न स्सुमेके~।।

卐 प्र पीपय वृषभ जिन्व वाजा-नग्ने त्वं रोदसी न स्सुदोघे~। देवेभि र्देव सुरुचा रुचानो- मा नो मर्तस्य दुर्मतिः परिष्ठात्।।

卐 इळा.मग्ने पुरुदंसं सनिङ्गो- श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति र्भूत्वस्मे।।

3.16 अयमग्निरिति षडृचस्य सूक्तस्य, कात्य उत्कीलोऽग्निः-आद्या तृतीया पञ्चम्यो बृहत्यः-द्वितीया चतुर्थी षष्ठ्य स्सतोबृहत्यः।।

❀03.01.16 卐अय.मग्नि स्सुवीर्य-स्येशे मह.स्सौभगस्य। राय ईशे स्वपत्यस्य गोमत- ईशे वृत्रहथानाम्।।

卐 इम.न्नरो मरुत.स्सश्चता वृधँ- यस्मि.न्राय.श्शेवृधासः। अभि ये सन्ति पृतनासु दूढ्यो- विश्वाहा शत्रु.मादभुः।।

卐 सत्व न्नो राय.श्शिशीहि- मीढ्वो अग्ने सुवीर्यस्य। तुविद्युम्न वर्षिष्ठस्य प्रजावतो-ऽनमीवस्य शुष्मिणः।।

卐 चक्रिर्यो विश्वा भुवनाऽभि सासँहि- श्चक्रि र्देवे.ष्वा दुवः। आ देवेषु यतत आ सुवीर्य-आ शंस उत नृणाम्।।

卐 मा नो अग्नेऽमतये- माऽवीरतायै रीरधः। माऽगोतायै सहस.स्पुत्र.मा निदे-ऽप द्वेषां.स्या कृधि।।

卐 शग्धि वाजस्य सुभग प्रजावतो-ऽग्ने बृहतो अध्वरे। सं राया भूयसा सृज मयोभुना- तुविद्युम्न यशस्वता।।

3.17 समिध्यमान इति पञ्चर्चस्य सूक्तस्य, वैश्वामित्रः कतोऽग्नि-स्त्रिष्टुप्।।

❀03.01.17 卐समिध्यमानः प्रथमाऽनु धर्मा- समक्तुभि रज्यते विश्ववारः। शोचिष्केशो घृतनिर्णि.क्पावक- स्सुयज्ञो अग्नि र्यजथाय देवान्।।

卐 यथाऽयजो होत्र.मग्ने पृथिव्या- यथा दिवो जातवेद श्चिकित्वान्। एवानेन हविषा यक्षि देवा-न्मनुष्व.द्यज्ञं प्र तिरेम.मद्य।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 त्रीण्यायूंषि तव जातवेद- स्तिस्र^ आजानी रुषस स्ते अग्ने। ताभि र्देवाना.मवो यक्षि विद्वा-नथाभव यजमानाय शँ योः।।

卐 अग्निं सुदीतिं सुदृश.ङ्गृणन्तो- नमस्याम.स्त्वेड्य.ञ्जातवेदः। त्वा.न्दूत.मरतिं हव्यवाह-न्देवा ^अकृण्व.न्नमृतस्य नाभिम्।।

卐 यस्त्व.द्धोता पूर्वो अग्ने यजीया-न्द्विता च सत्ता स्वधया च शंभुः। तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा^ अध्वर.न्देववीतौ।।

☃ 3.18 भवा न इति पञ्चर्चस्य सूक्तस्य, वैश्वामित्रः कतोऽग्नि-स्त्रिष्टुप्।।

❀03.01.18 卐भवा नो अग्ने सुमना^ उपेतौ- सखेव सख्ये पितरेव साधुः। पुरुद्रुहो हि क्षितयो जनानां-प्रति प्रतीची र्दहता.दरातीः।।

卐 तपो~ष्वग्ने अन्तरा॰ अमित्रा-न्तपा शंस.मररुषः॰ परस्य। तपो~ वसो~ चिकितानो अचित्ता-न्वि ते तिष्ठन्ता.मजरा^ अयासः।।

卐 इध्मेनाग्न इच्छमानो घृतेन- जुहोमि हव्य.न्तरसे बलाय। याव.दीशे ब्रह्मणा वन्दमान^ इमा.न्धियं शतसेयाय देवीम्।।

卐 उच्छोचिषा सहस.स्पुत्र स्तुतो- बृह.द्वय.श्शशमानेषु धेहि। रेव.दग्ने विश्वामित्रेषु शँ यो- र्मर्मृज्मा ते तन्व1(अं) भूरि कृत्वः।।

卐 कृधि रत्नं सुसनित र्धनानां- स घेदग्ने भवसि यत्समिद्धः। स्तोतु र्दुरोणे सुभगस्य रेव-त्सृप्रा करस्ना दधिषे वपूंषि।।

☃ 3.19 अग्निं होतारमिति पञ्चर्चस्य सूक्तस्य, कौशिको गाथ्यग्नि-स्त्रिष्टुप्।।

❀03.01.19 卐अग्निं होतारं प्र वृणे मियेधे- गृत्स.ङ्कविं विश्वविद.ममूरम्। स नो यक्ष.द्देवताता यजीया-न्राये वाजाय वनते मघानि।।

卐 प्र ते अग्ने हविष्मती.मिय-र्म्यच्छा सुद्युम्नां रातिनी.ङ्घृताचीम्। प्रदक्षिणि.द्देवताति.मुराण-स्सं रातिभि र्वसुभि र्यज्ञ.मश्रेत्।।

卐 स तेजीयसा मनसा त्वोत^- उत शिक्ष स्वपत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ- भूयाम ते सुꣳष्टुतय श्च वस्वः।।

卐 भूरीणि हि त्वे दधिरे अनीका-ऽग्ने देवस्य यज्यवो जनासः। स आ वह देवतातिँ यविष्ठ- शर्धो यदद्य दिव्यँ यजासि।।

卐 यत्त्वा होतार.मनज.न्मियेधे- निषादयन्तो यजथाय देवाः। स त्व.न्नो अग्नेऽवितेह बो-ध्यधि श्रवांसि धेहि न.स्तनूषु।।

☸ 3.20 अग्निमुषसमिति पञ्चर्चस्य सूक्तस्य, कौशिको गाथ्यग्निः- आद्यान्त्ययो र्विश्वेदेवा- स्त्रिष्टुप्।।

❀03.01.20 卐अग्नि.मुषस.मश्विना दधिक्राँ- व्युष्टिषु हवते वह्नि रुक्थैः। सुज्योतिषो न.श्शृण्वन्तु देवा-स्सजोषसो अध्वरँ वावशानाः।।

卐 अग्ने त्री ते वाजिना त्री षधस्था- तिस्र.स्ते जिह्वा ऋतजात पूर्वीः। तिस्र^ उ ते तन्वो देववाता-स्ताभिर्नः पाहि गिरो अप्रयुच्छन्न्।।

卐 अग्ने भूरीणि तव जातवेदो- देव स्वधावोऽमृतस्य नाम। या.श्च माया^ मायिनाँ विश्वमिन्व- त्वे पूर्वी स्सन्दधुः पृष्टबन्धो~।।

卐 अग्नि र्नेता भगइव क्षितीना-न्दैवीना.न्देव^ ऋतुपा ऋतावा। स वृत्रहा सनयो विश्ववेदाः- पर्ष .द्विश्वाऽति दुरिता गृणन्तम्।।

卐 दधिक्रा.मग्नि.मुषस.ञ्च देवीं- बृहस्पतिं सवितार ञ्च देवम्। अश्विना मित्रावरुणा भग.ञ्च- वसू.न्रुद्राꣳ आदित्याꣳ इह हुवे।।

☸ 3.21 इम न्न इति पञ्चर्चस्य सूक्तस्य, कौशिको गाथ्यग्निः-आद्या त्रिष्टुप्- द्वितीया तृतीयेऽनुष्टुभौ-चतुर्थी विराड्रूपान्त्या सतोबृहती।।

❀03.01.21 卐इम.न्नो यज्ञ.ममृतेषु धे-हीमा हव्या जातवेदो जुषस्व। स्तोकाना.मग्ने मेदसो घृतस्य-होतः~ प्राशान प्रथमो निषद्य।।

卐 घृतवन्तः पावक ते- स्तोका श्श्चोतन्ति मेदसः। स्वधर्म.न्देववीतये- श्रेष्ठ.न्नो धेहि वार्यम्।।

卐 तुभ्यं स्तोका^ घृतश्चुतो-ऽग्ने विप्राय सन्त्य। ऋषि श्श्रेष्ठ.स्समिध्यसे- यज्ञस्य प्राविता भव।।

卐 तुभ्यं श्चोत.न्त्यध्रिगो~ शचीव-स्स्तोकासो अग्ने मेदसो घृतस्य। कविशस्तो बृहता भानुनाऽऽगा-हव्या जुषस्व मेधिर।।

卐 ओजिष्ठ.न्ते मध्यतो मेद^ उद्भृतं- प्र ते वय.न्ददामहे। श्चोतन्ति ते वसो~ स्तोका^ अधि त्वचि- प्रति ता.न्देवशो विहि।।

☸ 3.22 अयं स इति पञ्चर्चस्य सूक्तस्य, कौशिको गाथ्यग्नि-रुपान्त्यायाः पुरीष्याग्नय-स्त्रिष्टुप्-चतुर्थ्यनुष्टुप्।।

❀03.01.22 卐अयं सो अग्नि र्यस्मि.न्त्सोम.मिन्द्र- स्सुत.न्दधे जठरे वावशानः। सहस्रिणं वाज.मत्य.न्न सप्तिं- ससवा.न्त्स.न्त्स्तूयसे जातवेदः।।

卐 अग्ने यत्ते दिवि वर्चः पृथिव्याँ- यदोषधी.ष्वप्स्वा यजत्र। येनान्तरिक्ष.मुर्वाततन्थ- त्वेष.स्स भानु र्णवो नृचक्षाः।।

卐 अग्ने दिवो अर्ण.मच्छा जिगा-स्यच्छा देवाँ ऊचिषे धिष्ण्या^ ये। या रोचने परस्ता.त्सूर्यस्य या श्चावस्ता.दुपतिष्ठन्त आपः।।

卐 पुरीष्यासो अग्नयः प्रावणेभि- स्सजोषसः। जुषन्ताँ यज्ञ.मद्रुहो-ऽनमीवा^ इषो महीः।।

卐 इळा.मग्ने पुरुदंसं सनि.ङ्गो-श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति र्भूत्वस्मे।।

☸ 3.23 निर्मथित इति पञ्चर्चस्य सूक्तस्य, भारतौ देवश्रवो देववाता- वग्नि-स्त्रिष्टुप्-तृतीया सतोबृहती।।

❀03.01.23 卐निर्मथित.स्सुधित^ आ सधस्थे- युवा कवि रध्वरस्य प्रणेता। जूर्य.त्स्वग्नि रजरो वने-ष्वत्रा दधे अमृत.ञ्जातवेदाः।।

卐 अमन्थिष्टां भारता रेव.दग्नि-न्देवश्रवा^ देववात.स्सुदक्षम्। अग्ने वि पश्य बृहताऽभि रा-येषा.न्नो नेता भवता.दनु द्यून्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 दश क्षिपः पूर्व्यं सी.मजीजन-न्त्सुजातं मातृषु प्रियम्। अग्निं स्तुहि दैववात.न्देवश्रवो- यो जनाना मस.द्वशी।।

卐 नि त्वा दधे वर आ पृथिव्या^- इळाया .स्पदे सुदिनत्वे अह्नाम्। दृषद्वत्यां मानुष आपयायां- सरस्वत्यां रेव.दग्ने दिदीहि।।

卐 इळा.मग्ने पुरुदंसं सनि.ङ्गो- श्शश्वत्तमं हवमानाय साध। स्यान्न स्सूनु स्तनयो विजावा-ऽग्ने सा ते सुमति र्भूत्वस्मे।।

3.24 अग्ने सहस्वेति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि- र्गायत्री-आद्याऽनुष्टुप्।।

03.01.24 卐अग्ने सहस्व पृतना^- अभिमाती रपास्य। दुष्टर.स्तर.न्नराती -र्वर्चो धा^ यज्ञवाहसे।।

卐 अग्न इळा समिध्यसे- वीतिहोत्रो अमर्त्यः। जुषस्व सू नो अध्वरम्।।

卐 अग्ने द्युम्नेन जागृवे- सहस स्सून~ वाहुत। एदं बर्हि स्सदो मम।।

卐 अग्ने विश्वेभि रग्निभि- र्देवेभि र्महया गिरः। यज्ञेषु य उ चायवः।।

卐 अग्ने दा^ दाशुषे रयिँ- वीरवन्तं परीणसम्। शिशीहि न.स्सूनुमतः।।

3.25 अग्ने दिव इति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-श्चतुर्थ्या इन्द्राग्नी विराट्।।

03.01.25 卐अग्ने दिव.स्सूनु रसि प्रचेता-स्तना पृथिव्या^ उत विश्ववेदाः। ऋध.ग्देवा इह यजा चिकित्वः।।

卐 अग्नि स्सनोति वीर्याणि विद्वा.न्त्सनोति वाज.ममृताय भूषन्न्। सनो देवा एह वहा पुरुक्षो~।।

卐 अग्नि र्द्यावापृथिवी~ विश्वजन्ये~- आ भाति देवी~ अमृते~ अमूरः। क्षय.न्वाजैः पुरुश्चन्द्रो नमोभिः।।

卐 अग्न इन्द्र श्च दाशुषो दुरोणे- सुतावतो यज्ञ.मिहोप यातम्। अमर्धन्ता सोमपेयाय देवा।।

卐 अग्ने अपां समिध्यसे दुरोणे- नित्य स्सूनो~ सहसो जातवेदः। सधस्थानि महयमान^ ऊती।।

3.26 वैश्वानरमिति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्रः-आद्यानां तिसृणां वैश्वानरोऽग्नि-श्चतुर्थ्यादि तिसृणां मरुतः-सप्तम्यष्टम्योरात्मा-अन्त्याया उपाध्यायः-आद्या ष्षट्जगत्योऽन्त्यास्तिस्रस्त्रिष्टुभः।।

❀03.01.26 卐वैश्वानरं मनसाऽग्नि.न्निचाय्या-हविष्मन्तो अनुषत्यं स्व विदम्। सुदानु.न्देवं रथिरँ वसूयवो- गीर्भी रण्व.ङ्कुशिकासो हवामहे।।

卐 तं शुभ्र.मग्नि.मवसे हवामहे- वैश्वानरं मातरिश्वान.मुक्थ्यम्। बृहस्पतिं मनुषो देवतातये- विप्रं श्रोतार.मतिथिं रघुष्यदम्।।

卐 अश्वो न क्रन्द.ञ्जनिभि स्समिध्यते- वैश्वानरः कुशिकेभि र्युगेयुगे। स नो अग्नि.स्सुवीर्यं स्वश्व्य-न्दधातु रत्न.ममृतेषु जागृविः।।

卐 प्र यन्तु वाजा.स्तविषीभि रग्नय-श्शुभे संमिश्लाः पृषती रयुक्षत। बृह.दुक्षो मरुतो विश्ववेदसः- प्र वेपयन्ति पर्वताऽ अदाभ्याः।।

卐 अग्निश्रियो मरुतो विश्वकृष्टय- आ त्वेष.मुग्र.मव ईमहे वयम्। ते स्वानिनो रुद्रिया वर्षनिर्णिज-स्सिंहा न हेषक्रतव.स्सुदानवः।।

❀03.01.27 卐व्रातँव्रात.ङ्गणङ्गणं सुशस्तिभि- रग्ने र्भामं मरुता.मोज ईमहे। पृषदश्वासो अनवभ्रराधसो. गन्तारो यज्ञँ विदथेषु धीराः।।

卐 अग्नि.रस्मि जन्मना जातवेदा घृतं मे चक्षु रमृतं म आसन्न्। अर्क.स्त्रिधातू रजसो विमानो-ऽजस्रो घर्मो हवि.रस्मि नाम।।

卐 त्रिभिः पवित्रै रपुपोद्ध्य1(अ)र्कं- हृदा मति.ञ्ज्योति रनु प्रजानन्न्। वर्षिष्ठं रत्न.मकृत स्वधाभि- रादि.द्द्यावापृथिवी~ पर्यपश्यत्।।

卐 शतधार.मुत्स.मक्षीयमाणँ- विपश्चितं पितरँ वक्त्वानाम्। मेळिं मदन्तं पित्रो रुपस्थे- तं रोदसी पिपृतं सत्यवाचम्।।

☫ 3.27 प्र वो वाजा इति पञ्चदशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्निः- आद्याया ऋतवो वा गायत्री।।

❀03.01.28 卐प्र वो वाजा^ अभिद्यवो- हविष्मन्तो घृताच्या। देवा.न्जिगाति सुम्नयुः।।

卐 ईळे अग्निँ विपश्चित-ङ्गिरा यज्ञस्य साधनम्। श्रुष्टीवान न्धितावानम्।।

卐 अग्ने शकेम ते वयँ- यम.न्देवस्य वाजिनः। अति द्वेषांसि तरेम।।

卐 समिध्यमानो अध्वरे3-(ए)ऽग्निः पावक^ ईड्यः। शोचिष्केश स्तमीमहे।।

卐 पृथुपाजा^ अमर्त्यो -घृतनिर्णि.क्स्वाहुतः। अग्नि र्यज्ञस्य हव्यवाट्।।

❀03.01.29 卐तं सबाधो यतस्रुच^- इत्था धिया यज्ञवन्तः। आ चक्रु रग्नि.मूतये।।

卐 होता देवो अमर्त्यः- पुरस्ता.देति मायया। विदथानि प्रचोदयन्न्।।

卐 वाजी वाजेषु धीयते-ऽध्वरेषु प्र णीयते। विप्रो यज्ञस्य साधनः।।

卐 धिया चक्रे वरेण्यो- भूताना.ङ्गर्भ.मा दधे। दक्षस्य पितर.न्तना।।

卐 नि त्वा दधे वरेण्य-न्दक्ष.स्येळा सहस्कृत। अग्ने सुदीति.मुशिजम्।।

❀03.01.30 卐अग्निँ यन्तुर.मप्तुर-मृतस्य योगे वनुषः। विप्रा वाजै स्समिन्धते।।

卐 ऊर्जो नपात.मध्वरे- दीदिवांस.मुप द्यवि। अग्नि.मीळे कविक्रतुम्।।

卐 ईळेन्यो नमस्य स्तिर-स्तमांसि दर्शतः। समग्नि रिध्यते वृषा।।

卐 वृषो~ अग्नि.स्समिध्यते-ऽश्वो न देववाहनः। तं हविष्मन्त^ ईळते।।

卐 वृषण.न्त्वा वयँ वृष-न्वृषण.स्समिधीमहि। अग्ने दीद्यतं बृहत्।।

☫ 3.28 अग्ने जुषस्वेति षड्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि- गायत्री- तृतीयोष्णिक्- चतुर्थी त्रिष्टुप् -पञ्चमी जगती।।

❀03.01.31 卐अग्ने जुषस्व नो हविः- पुरोळाश.ञ्जातवेदः। प्रातस्सावे धियावसो~।।

卐 पुरोळा^ अग्ने पचत -स्तुभ्यँ वा घा परिष्कृतः। तञ्जुषस्व यविष्ठ्य।।

卐 अग्ने वीहि पुरोळाश-माहुत.न्तिरोअह्न्यम्। सहस.स्सूनु रस्यध्वरे हितः।।

卐 माध्यन्दिने सवने जातवेदः- पुरोळाश.मिह कवे जुषस्व। अग्ने यह्वस्य तव भागधेय-न्न प्र मिनन्ति विदथेषु धीराः।।

卐 अग्ने तृतीये सवने हि कानिषः- पुरोळाशं सहस.स्सून~वाहुतम्। अथा देवे.ष्वध्वरँ विपन्यया- धा^ रत्नवन्त.ममृतेषु जागृविम्।।

卐 अग्ने वृधान^ आहुतिं- पुरोळाश.ञ्जातवेदः। जुषस्व तिरोअह्न्यम्।।

3.29 अस्तीदमिति षोळशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽग्नि-स्त्रिष्टुप् (पञ्चम्या ऋत्विजो वा)- आद्य चतुर्थी दशमी द्वादश्योऽनुष्टुभ-ष्षष्ठ्येकादशी पञ्चदश्यो जगत्यः।।

❀03.01.32 卐अस्तीद.मधिमन्थन-मस्ति प्रजनन.ङ्कृतम्। एताँ विश्पत्नी.मा भ-राग्निं मन्थाम पूर्वथा।।

卐 अरण्यो र्निहितो जातवेदा^- गर्भइव सुधितो गर्भिणीषु। दिवेदिव ईड्यो जागृवद्भि -र्हविष्मद्भि र्मनुष्येभि रग्निः।।

卐 उत्तानाया.मव भरा चिकित्वा-न्त्सद्यः प्रवीता वृषण.ञ्जजान। अरुषस्तूपो रुशदस्य पाज^- इळाया.स्पुत्रो वयुनेऽजनिष्ट।।

卐 इळाया.स्त्वा पदे- वय.न्नाभा^ पृथिव्या ^अधि। जातवेदो नि धीम-ह्यग्ने हव्याय वोऴ्हवे।।

卐 मन्थता नरः कवि.मद्वयन्तं- प्रचेतस.ममृतं सुप्रतीकम्। यज्ञस्य केतुं प्रथमं पुरस्ता-दग्नि.न्नरो जनयता सुशेवम्।।

❀03.01.33 卐यदी मन्थन्ति बाहुभि र्वि रोचते-ऽश्वो न वाज्यरुषो वनेष्वा। चित्रो न याम.न्नश्विनो रनिवृतः- परि वृण.क्त्यश्मन.स्तृणा दहन्न्।।

卐 जातो अग्नी रोचते चेकितानो- वाजी विप्रः कविशस्त.स्सुदानुः। य.न्देवास^ईड्यँ विश्वविदं- हव्यवाह. मदधु रध्वरेषु।।

卐 सीद होत~ स्स्व उ लोके चिकित्वा-न्त्सादया यज्ञं सुकृतस्य योनौ। देवावी देवा.न्हविषा यजा-स्यग्ने बृह.द्यजमाने वयो धाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 कृणोत धूमँ वृषणं सखायो-ऽस्रेधन्त इतन वाज.मच्छ। अय.मग्नि॰ पृतनाषा.ट्त्सुवीरो- येन देवासो असहन्त दस्यून्।।

卐 अय.न्ते योनिर् ऋत्वियो- यतो जातो अरोचथाः। तञ्जान.न्नग्न आ सी-दाथा नो वर्धया गिरः।।

❀03.01.34 卐तनूनपा.दुच्यते गर्भ आसुरो- नराशंसो भवति यद्विजायते। मातरिश्वा यदमिमीत मातरि- वातस्य सर्गो अभव.त्सरीमणि।।

卐 सुनिर्मथा निर्मथित-स्सुनिधा निहित॰ कविः। अग्ने स्वध्वरा कृणु- देवा.न्देवयते यज।।

卐 अजीजन.न्नमृतं मर्त्यासो-ऽस्रेमाण.न्तरणिँ वीळुजम्भम्। दश स्वसारो अग्रुव.स्समीची॰- पुमांस.ञ्जात .मभि सं रभन्ते।।

卐 प्र सप्तहोता सनका.दरोचत- मातु रुपस्थे यदशोच.दूधनि। न नि मिषति सुरणो दिवेदिवे- यदसुरस्य जठरा.दजायत।।

卐 अमित्रायुधो मरुतामिव प्रया॰- प्रथमजा ब्रह्मणो विश्वमि.द्विदुः। द्युम्नव.द्ब्रह्म कुशिकास एरिर- एकएको दमे अग्निं समीधिरे।।

卐 यदद्य त्वा प्रयति यज्ञे अस्मि-न्होत- श्चिकित्वोऽवृणीमहीह। ध्रुवमया ध्रुव.मुताशमिष्ठा॰- प्रजान. न्विद्वा॰ उप याहि सोमम्।। ।। इति प्रथमाध्याय स्समाप्तः ।।

## तृतीयाष्टके द्वितीयाध्यायः। (वर्गाः 1-26)

3.30 इच्छन्ति त्वेति द्वाविंशत्यृचस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.02.01 卐इच्छन्ति त्वा सोम्यास.स्सखाय-स्सुन्वन्ति सोम.न्दधति प्रयांसि। तितिक्षन्ते अभिशस्ति.ञ्जनाना-मिन्द्र त्वदा क.श्चन हि प्रकेतः।।

卐 न ते दूरे परमा चिद्रजां-स्या तु प्र याहि हरिवो हरिभ्याम्। स्थिराय वृष्णे सवना कृतेमा- युक्ता ग्रावाण .स्समिधाने अग्नौ।।

卐 इन्द्र.स्सुशिप्रो मघवा तरुत्रो- महाव्रात.स्तुविकूर्मिर् ऋघावान्। यदुग्रो धा बाधितो मर्त्येषु- क्व1(अ)त्या ते वृषभ वीर्याणि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 त्वं हि ष्मा च्यावय.न्नच्युता-न्येको वृत्रा चरसि जिघ्नमानः। तव द्यावापृथिवी~ पर्वतासो-ऽनु व्रताय निर्मितेव तस्थुः।।

卐 उताभये पुरुहूत श्रवोभि- रेको दृळ्ह.मवदो वृत्रहा सन्न्। इमे~ चिदिन्द्र रोदसी अपारे~- यत्सङ्गृभ्णा^ मघव.न्काशिरि.त्ते।।

❀03.02.02 卐प्र सू त इन्द्र प्रवता हरिभ्यां- प्र ते वज्रः प्रमृण.न्नेतु शत्रून्। जहि प्रतीचो अनूचः पराचो-विश्वं सत्य.ङ्कृणुहि विष्ट.मस्तु।।

卐 यस्मै धायु रदधा^ मर्त्या-याभक्त.श्चिद्भजते गेह्य1(अं)सः। भद्रा त इन्द्र सुमति र्घृताची- सहस्रदाना पुरुहूत रातिः।।

卐 सहदानुं पुरुहूत क्षियन्त-मह.स्तमिन्द्र संपिण.क्कुणारुम्। अभि वृत्रँ वर्धमानं पियारु-मपाद.मिन्द्र तवसा जघन्थ।।

卐 नि सामना.मिषिरा.मिन्द्र भूमिं- मही.मपारां सदने ससत्थ। अस्तभ्ना.द्याँ वृषभो अन्तरिक्ष-मर्ष.न्त्वाप स्त्वयेह प्रसूताः।।

卐 अलातृणो वल^ इन्द्र व्रजो गोः- पुरा हन्तो र्भयमानो व्यार। सुगा.न्पथो अकृणो.न्निरजे गाः- प्राव.न्वाणीः पुरुहूत.न्धमन्तीः।।

❀03.02.03 卐एको द्वे~ वसुमती~ समीची~- इन्द्र^ आ पप्रौ पृथिवी.मुत द्याम्। उतान्तरिक्षा.दभि नं स्समीक -इषो रथी.स्सयुज.श्शूर वाजान्।।

卐 दिश.स्सूर्यो न मिनाति प्रदिष्टा^- दिवेदिवे हर्यश्वप्रसूताः। सँ यदान.ळध्वन^ आदिदश्वै- र्विमोचन.ङ्कृणुते तत्त्वस्य।।

卐 दिदृक्षन्त उषसो याम.न्नक्तो- र्विवस्वत्या^ महि चित्र मनीकम्। विश्वे जानन्ति महिना यदाऽगा- दिन्द्रस्य कर्म सुकृता पुरूणि।।

卐 महि ज्योति र्निहितँ वक्षणा-स्वामा पक्व.ञ्चरति बिभ्रती गौः। विश्वं स्वाद्म संभृत.मुस्रियायाँ- यत्सी.मिन्द्रो अदधा.द्भोजनाय।।

卐 इन्द्र दृह्य यामकोशा^ अभूव-न्यज्ञाय शिक्ष गृणते सखिभ्यः। दुर्मायवो दुरेवा^ मर्त्यासो- निषङ्गिणो रिपवो हन्त्वासः।।

❀03.02.04 卐सङ्घोष.श्शृण्वेऽवमै रमित्रै- र्जही.न्येष्वशनि.न्तपिष्ठाम्। वृश्चे मधस्ता.द्वि रुजा सहस्व- जहि रक्षो मघव.न्रन्धयस्व।।

卐 उद्वृह रक्ष.स्सहमूल.मिन्द्र- वृश्चा मध्यं प्रत्यग्रं श्शृणीहि। आ कीवत.स्सललूक.ञ्चकर्थ- ब्रह्मद्विषे तपुषिं हेति.मस्य।।

卐 स्वस्तये वाजिभि श्च प्रणेत~-स्सँ यन्महीं रिष^आसत्सि पूर्वीः। रायो वन्तारो बृहत.स्स्या-मास्मे अस्तु भर्ग^ इन्द्र प्रजावान्।।

卐 आ नो भर भर्ग.मिन्द्र द्युमन्त-न्नि ते देष्णस्य धीमहि प्ररेके। ऊर्वईव पप्रथे कामो अस्मे- तमा पृण वसुपते वसूनाम्।।

卐 इम.ङ्कामं मन्दया गोभि रश्वै- श्चन्द्रवता राधसा पप्रथ श्च। स्वर्यवो मतिभि स्तुभ्यँ विप्रा- इन्द्राय वाहः४ कुशिकासो अक्रन्न्।।

卐 आ नो गोत्रा दर्द्दहि गोपते गा-स्स मस्मभ्यं सनयो यन्तु वाजाः। दिवक्षा^ असि वृषभ सत्यशुष्मो- ऽस्मभ्यं सु मघव.न्बोधि गोदाः।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। श्शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.31 शासद्वह्निरिति द्वाविंशत्यृचस्य सूक्तस्य, ऐषीरथिः कुशिक- इन्द्र-स्त्रिष्टुप्।।

❀03.02.05 卐शास.द्वह्नि र्दुहितु र्नप्त्य.ङ्गा-द्विद्वा९ ऋतस्य दीधितिं सपर्यन्न्। पिता यत्र दुहितु.स्सेक.मृञ्ज-न्त्सं शग्म्येन मनसा दधन्वे।।

卐 न जामये तान्वो रिक्थ.मारै-क्चकार गर्भं सनितु र्निधानम्। यदीं मातरो जनयन्त वह्नि-मन्यः४ कर्ता सुकृतो रन्य^ ऋन्धन्न्।।

卐 अग्नि जज्ञे जुह्वा3(आ) रेजमानो- मह.स्पुत्रा॰ अरुषस्य प्रयक्षे। महा.न्गर्भो मह्या जात.मेषां- मही प्रवृ .द्धर्यश्वस्य यज्ञैः।।

卐 अभि जैत्री रसचन्त स्पृधानं- महि ज्योति.स्तमसो नि रजानन्न्। तज्ञानती॰ प्रत्युदाय.न्नुषास॰- पति र्गवा.मभव.देक^ इन्द्रः।।

卐 वीळौ सती रभि धीरा^ अतृन्द-न्प्राचाऽहिन्व.न्मनसा सप्त विप्राः। विश्वा.मविन्द.न्पथ्या.मृतस्य- प्रजान .न्नित्ता नमसाऽऽविवेश।।

❀03.02.06 卐विद.द्यदी सरमा रुग्ण.मद्रे- र्महि पाथ॰ पूर्व्यं सध्र्य्र.क्कः~। अग्र.न्नय.त्सुप.द्यक्षराणा-मच्छा रवं प्रथमा जानती गात्।।

卐 अगच्छदु विप्रतम.स्सखीय-न्नसूदय.त्सुकृते गर्भ.मद्रिः। ससान मर्यो युवभि र्मखस्य-न्नथाभव.दङ्गिरा .स्सद्यो अर्चन्न्।।

卐 सतस्सत॰ प्रतिमानं पुरोभू- र्विश्वा वेद जनिमा हन्ति शुष्णम्। प्र णो दिव॰ पदवी र्गव्यु रर्च-न्त्सखा सखी॰ रमुञ्च.न्नि रवद्यात्।।

卐 नि गव्यता मनसा सेदु रर्कैः॰- कृण्वानासो अमृतत्वाय गातुम्। इद.ञ्चिन्नु सदनं भूर्येषां- येन मासा॰ असिषास.न्नृतेन।।

卐 संपश्यमाना^ अमद.न्नभि स्वं- पय॰ प्रत्नस्य रेतसो दुघानाः। वि रोदसी अतप.द्धोष^ एषा-ञ्जाते निष्ठा.मदधु र्गोषु वीरान्।।

❀03.02.07 卐स जातेभि र्वृत्रहा सेदु हव्यै- रुदुस्रिया^ असृज.दिन्द्रो अर्कैः। उरू.च्यस्मै घृतव.द्भरन्ती- मधु स्वाद्म दुदुहे जेन्या गौः।।

卐 पित्रे चिच्चक्रु.स्सदनं समस्मै- महि त्विषीम.त्सुकृतो वि हि ख्यन्न्। वि॰ष्कभ्नन्त.स्स्कम्भनेना जनित्री~- आसीना^ ऊर्ध्वं रभसँ वि मिन्वन्न्।।

卐 मही यदि धिषणा शिश्नथे धा-त्सद्योवृधँ विभ्वं1(अं) रोदस्योः। गिरो यस्मि.न्ननवद्या.स्समीची- र्विश्वा^ इन्द्राय तविषी रनुत्ताः।।

卐 मह्या ते सख्यँ वश्मि शक्ती- रा वृत्रघ्ने नियुतो यन्ति पूर्वीः। महि स्तोत्र.मव^ आगन्म सूरे- रस्माकं सु मघव.न्बोधि गोपाः।।

卐 महि क्षेत्रं पुरु श्चन्द्रँ विविद्वा-नादि.त्सखिभ्य श्चरथं समैरत्। इन्द्रो नृभि रजन.द्दीद्यान-स्साकं सूर्य .मुषस.ङ्गातु.मग्निम्।।

❀03.02.08 卐अप.श्चिदेष विभ्वो3(ओ) दमूनाः- प्र सध्रीची रसृज.द्विश्वश्चन्द्राः। मध्वः पुनानाः कविभिः पवित्रै- र्द्युभि र्हिन्व.न्त्यक्तुभि र्धनुत्रीः।।

卐 अनु कृष्णे~ वसुधिती~ जिहाते~- उभे~ सूर्यस्य मंहना यजत्रे~। परि यत्ते महिमानँ वृजध्यै- सखाय^ इन्द्र काम्या^ ऋजिप्याः।।

卐 पति.र्भव वृत्रह.न्त्सूनृताना-ङ्गिराँ विश्वाऽयु र्वृषभो वयोधाः। आ नो गहि सख्येभि श्शिवेभि- र्महा .न्महीभि रूतिभि.स्सरण्यन्न्।।

卐 तमङ्गिरस्व.न्नमसा सपर्य-न्नव्य.ङ्कृणोमि सन्यसे पुराजाम्। द्रुहो वि याहि बहुला^ अदेवी-स्स्वश्च नो मघव.न्त्सातये धाः।।

卐 मिहः पावकाः प्रतता.अभूव-न्त्स्वस्ति नः पिपृहि पार.मासाम्। इन्द्र त्वं रथिरः पाहि नो रिषो- मक्षूमक्षू कृणुहि गोजितो नः।।

卐 अदेदिष्ट वृत्रहा गोपति.र्गा ^-अन्तः कृष्णाँ अरुषै र्धामभि र्गात्। प्र सूनृता दिशमान^ ऋतेन- दुर.श्च विश्वा^ अवृणो दप स्वाः।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.32 इन्द्र सोममिति सप्तदशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.02.09 卐इन्द्र सोमं सोमपते पिबेमं- माध्य.न्दिनं सवन.ञ्चारु यत्ते। प्रप्रुथ्या शिप्रे~ मघव.न्नृजीषि-न्विमुच्या हरी~ इह मादयस्व।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 गवाशिरं मन्थिनं.मिन्द्र शुक्रं- पिबा सोमं ररिमा ते मदाय। ब्रह्मकृता मारुतेना गणेनं- सजोषा रुद्रै स्तृपदा वृषस्व।।

卐 ये ते शुष्मँ ये तविषी.मवर्ध-न्नर्चन्त^ इन्द्र मरुत.स्त ओजः। माध्यन्दिने सवने वज्रहस्त- पिबा रुद्रेभि स्सगण स्सुशिप्र।।

卐 त इन्न्वस्य मधुम.द्विविप्र -इन्द्रस्य शर्धो मरुतो य आसन्न्। येभि वृत्र.स्येषितो विवे-दा ऽमर्मणो मन्यमानस्य मर्म।।

卐 मनुष्व.दिन्द्र सवन.ञ्जुषाणः- पिबा सोमं शश्वते वीर्याय। स आ ववृत्स्व हर्यश्व यज्ञै- स्सरण्युभि रपो अर्णा सिसर्षि।।

❀023.02.10 卐त्वमपो यद्ध वृत्र.ञ्जघन्वा॰- अत्या॰इव प्रासृज.स्सर्तवाऽजौ। शयान.मिन्द्र चरता वधेन- वव्रिवांसं परि देवी रदेवम्।।

卐 यजाम इन्नमसा वृद्ध.मिन्द्रं- बृहन्त.मृष्व.मजरँ युवानम्। यस्य प्रिये~ ममतु र्यज्ञियस्य- न रोदसी महिमानं ममाते~।।

卐 इन्द्रस्य कर्म सुकृता पुरूणि- व्रतानि देवा^ न मिनन्ति विश्वे। दाधार यः पृथिवी.न्द्या.मुतेमा-ञ्जजान सूर्य.मुषसं सुदंसाः।।

卐 अद्रोघ सत्य.न्तव तन्महित्वं- सद्यो यज्जातो अपिबो ह सोमम्। न द्याव^ इन्द्र तवस.स्त ओजो- नाहा न मासा.श्शरदो वरन्त।।

卐 त्वं सद्यो अपिबो जात^ इन्द्र- मदाय सोमं परमे व्योमन्न्। यद्ध द्यावापृथिवी~ आऽविवेशी- रथाभवः पूर्व्यः कारुधायाः।।

❀03.02.11 卐अह.न्नहिं परिशयान.मर्ण^- ओजायमान.न्तुविजात तव्यान्। न ते महित्व.मनु भूदध द्यौ-र्यदन्यया स्फिग्या3(आ) क्षा.मवस्थाः।।

卐 यज्ञो हि त इन्द्र वर्धनो भू-दुत प्रिय.स्सुतसोमो मियेधः। यज्ञेन यज्ञ.मव यज्ञिय.स्स-न्यज्ञ.स्ते वज्र- महिहत्य आवत्।।

卐 यज्ञे.नेन्द्र.मवसाऽचक्रे अर्वा-गैनं सुम्नाय नव्यसे ववृत्याम्। य.स्स्तोमेभि र्वावृधे पूर्व्येभि- र्यो मध्यमेभि रुत नूतनेभिः।।

卐 विवेष यन्मा धिषणा जजान- स्तवै पुरा पार्या.दिन्द्र.मह्नः। अंहसो यत्र पीपर.द्यथा नो- नावेव यान्त .मुभये हवन्ते।।

卐 आपूर्णो अस्य कलश.स्स्वाहा- सेक्तेव कोशं सिसिचे पिबध्यै। समु प्रिया^ आऽववृत्र.न्मदाय- प्रदक्षिणि.दभि सोमास^ इन्द्रम्।।

卐 न त्वा गभीरः पुरुहूत सिन्धु- र्नाद्रयः परि षन्तो वरन्त। इत्था सखिभ्य इषितो यदि.न्द्रा-ऽऽदृळ्ह. श्चि.दरुजो गव्य.मूर्वम्।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.33 प्र पर्वतानामिति त्रयोदशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र-श्चतुर्थी षष्ठ्यष्टमी दशमीनां नदी ऋषिका-नद्यो देवताः-एना वय-मेतद्वृच- आ ते कारोरिति तिसृणां विश्वामित्रो देवता-इन्द्रो अस्मानिति द्वयोरिन्द्र-स्त्रिष्टु-बन्त्याऽनुष्टुप्।।

03.02.12 卐प्र पर्वताना.मुशती~ उपस्था-दश्वेइव~ विषिते~ हासमाने~। गावेव शुभ्रे~ मातरा रिहाणे~- विपा.ट्छुतुद्री पयसा जवेते~।।

卐 इन्द्रेषिते~ प्रसवं भिक्षमाणे~- अच्छा समुद्रं रथ्येव याथः। समाराणे~ ऊर्मिभिः पिन्वमाने~- अन्या वामन्या.मप्येति शुभ्रे~।।

卐 अच्छा सिन्धुं मातृतमा.मयासँ- विपाश.मुर्वीं सुभगा.मगन्म। वत्समिव मातरा संरिहाणे~- समानँ योनि.मनु सञ्चरन्ती~।।

卐 एना वयं पयसा पिन्वमाना^- अनु योनि.न्देवकृत.ञ्चरन्तीः। न वर्तवे प्रसव.स्सर्गतक्तः- किंयु विप्रो नद्यो जोहवीति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 रमध्वं मे वर्चसे सोम्याय- ऋतावरी रुप मुहूर्त.मेवैः। प्र सिन्धु.मच्छा बृहती मनीषा-ऽवस्यु रह्वे कुशिकस्य सूनुः।।

❀03.02.13 卐इन्द्रो अस्मा२ अरद्.द्वज्रबाहु- रपाह.न्वृत्रं परिधि.न्नदीनाम्। देवोऽनय.त्सविता सुपाणि-स्तस्य वयं प्रसवे याम^ उर्वीः।।

卐 प्रवाच्यं शश्वधा वीर्य1(अ)न्त-दिन्द्रस्य कर्म यदहिं विवृश्चत्। वि वज्रेण परिषदो जघाना-ऽऽयन्ना.पोऽयन.मिच्छमानाः।।

卐 एत.द्वचो जरित मांऽपि मृष्ठा^- आ यत्ते घोषा.नुत्तरा युगानि। उक्थेषु कारो~ प्रति नो जुषस्व- मा नो नि कः~ पुरुषत्रा नम.स्ते।।

卐 ओ~ षु स्वसारः कारवे शृणोत- ययौ वो दूरा.दनसा रथेन। नि षू नमध्वं भवता सुपारा^- अधोअक्षा.स्सिन्धव.स्स्रोत्याभिः।।

卐 आ ते कारो~ शृणवामा वचांसि- ययाथ दूरा.दनसा रथेन। नि ते नंसैपीप्यानेव योषा- मर्यायेव कन्या शश्वचैते~।।

❀03.02.14 卐यदङ्ग त्वा भरता.स्सन्तरेयु- र्गव्य.न्ग्राम^ इषित^ इन्द्रजूतः। अर्षा.दह प्रसव.स्सर्गतक्त^- आ वो वृणे सुमतिँ यज्ञियानाम्।।

卐 अतारिषु र्भरता^ गव्यव.स्स-मभक्त विप्र.स्सुमति.न्नदीनाम्। प्र पिन्वध्व.मिषयन्ती.स्सुराधा^- आ वक्षणाः पृणध्वँ यात शीभम्।।

卐 उद्व^ ऊर्मि.श्शम्या^ ह-न्त्वापो योक्त्राणि मुञ्चत। माऽदुष्कृतौ व्येनसा-ऽघ्न्यौशून.मारताम्।।

3.34 इन्द्रः पूर्भिरित्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.02.15 卐इन्द्रः पूर्भि.दातिर.द्दासमर्कै- र्विद.द्वसु दयमानो वि शत्रून्। ब्रह्मजूत.स्तन्वा वावृधानो- भूरिदात्र^ आऽपृण.द्रोदसी उभे~।।

卐 मखस्य ते तविषस्य प्र जूति-मियर्मि वाच.ममृताय भूषन्न्। इन्द्र क्षितीना.मसि मानुषीणाँ- विशा .न्दैवीना.मुत पूर्वयावा।।

卐 इन्द्रो वृत्र.मवृणो.च्छर्धनीतिः- प्र मायिना.ममिना.द्वर्पणीतिः। अह.न्व्यंस.मुशध.ग्वने-ष्वावि र्धेना^अकृण. द्राम्याणाम्।।

卐 इन्द्र.स्स्वर्षा^ जनय.न्नहानि- जिगा.योशिग्भिः पृतना^ अभिष्टिः। प्रारोचय.न्मनवे केतु.मह्ना-मविन्द .ज्ज्योति र्बृहते रणाय।।

卐 इन्द्र.स्तुजो बर्हणा^ आ विवेश- नृव.द्दधानो नर्या पुरूणि। अचेतय.द्धिय^ इमा^ जरित्रे- प्रेमँ वर्ण.मतिर. च्छुक्र.मासाम्।।

❀03.02.16 卐महो महानि पनय.न्त्य-स्येन्द्रस्य कर्म सुकृता पुरूणि। वृजनेन वृजिना.न्त्सं पिपेष- मायाभि र्दस्यूः रभिभूत्योजाः।।

卐 युधेन्द्रो मह्ना वरिव श्चकार- देवेभ्य स्सत्पति श्चर्षणिप्राः। विवस्वत.स्सदने अस्य तानि- विप्रा^ उक्थेभिः कवयो गृणन्ति।।

卐 सत्रासाहँ वरेण्यं सहोदां- ससवांसं स्वरप.श्च देवीः। ससान यः पृथिवी.न्द्या.मु.तेमा-मिन्द्रं मद.न्त्यनु धीरणासः।।

卐 ससानात्याः उत सूर्यं ससा-नेन्द्र.स्ससान पुरुभोजस.ङ्गाम्। हिरण्यय.मुत भोगं ससान- हत्वी दस्यू .न्प्रार्यँ वर्ण.मावत्।।

卐 इन्द्र^ ओषधी रसनो दहानि- वनस्पतीः रसनो.दन्तरिक्षम्। बिभेद वल.न्नुनुदे विवाचो-ऽथाभव .द्दमिताऽभिक्रतूनाम्।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

☬ 3.35 तिष्ठा हरी इत्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.02.17 卐तिष्ठा हरी~ रथ आ युज्यमाना- याहि वायु र्न नियुतो नो अच्छ। पिबा.स्यन्धो अभिसृष्टो अस्मे- इन्द्र स्वाहा ररिमा ते मदाय।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उपाजिरा पुरुहूताय सप्ती~- हरी~ रथस्य धूर्ष्वा युनज्मि। द्रव.द्यथा संभृतँ विश्वत श्चि-दुपेमँ यज्ञमा वहात^ इन्द्रम्।।

卐 उपो~ नयस्व वृषणा तपु -ष्पोतेमव त्वँ वृषभ स्वधावः। ग्रसेता.मश्वा वि मुचेह शोणा- दिवेदिवे सदृशी रद्धि धानाः।।

卐 ब्रह्मणा ते ब्रह्मयुजा युनज्मि- हरी~ सखाया सधमाद आशू~। स्थिरं रथं सुख .मिन्द्राधितिष्ठ-न्प्रजान.न्विद्वाॅ उप याहि सोमम्।।

卐 मा ते हरी~ वृषणा वीतपृष्ठा- नि रीरम.न्यजमानासो अन्ये। अत्यायाहि शश्वतो वय.न्ते-ऽरं सुतेभिः कृणवाम सोमैः।।

❀03.02.18 卐तवायं सोम.स्त्व.मे.ह्यर्वा-ङ्शश्वत्तमं सुमना^ अस्य पाहि। अस्मि.न्यज्ञे बर्हि.ष्या निषद्या-दधि.ष्वेम.ञ्जठर इन्दु.मिन्द्र।।

卐 स्तीर्णन्ते बर्हि.स्सुत^ इन्द्र सोमः- कृता धाना अत्तवे ते हरिभ्याम्। तदोकसे पुरुशाकाय वृष्णे-मरुत्वते तुभ्यं राता हवींषि।।

卐 इम.न्नरः पर्वता .स्तुभ्य.माप-स्समिन्द्र गोभि र्मधुमन्त.मक्रन्न्। तस्यागत्या सुमना^ ऋष्व पाहि-प्रजान .न्विद्वा.न्पथ्या3(आ)^ अनु स्वाः।।

卐 याॅ आभजो मरुत^ इन्द्र सोमे- ये त्वा.मवर्ध.न्नभव.न्गण.स्ते। तेभि रेतं सजोषा^ वावशानो3-(ओ)ऽग्नेः पिब जिह्वया सोम.मिन्द्र।।

卐 इन्द्र पिब स्वधया चित्सुत-स्याग्ने र्वा पाहि जिह्वया यजत्र। अध्वर्यो र्वा प्रयतं शक्र हस्ता-द्धोतु र्वा यज्ञं हविषो जुषस्व।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

☸ 3.36 इमामूष्वित्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- दशम्या आङ्गिरसो घोर- इन्द्र-स्त्रिष्टुप्।।

❀03.02.19 卐इमा.मू षु प्रभृतिं सातये धा-श्शश्वच्छश्व.दूतिभि र्यादमानः। सुतेसुते वावृधे वर्धनेभि - र्यः कर्मभि र्महद्भि स्सुश्रुतो भूत्।।

卐 इन्द्राय सोमाः प्रदिवो विदाना^- ऋभु र्येभि र्वृषपर्वा विहायाः। प्रयम्यमाना.न्प्रतिषू गृभा-येन्द्र पिब वृषधूतस्य वृष्णः।।

卐 पिबा वर्धस्व तव घा सुतास^-इन्द्र सोमासः प्रथमा^ उतेमे। यथाऽपिबः पूर्व्या॰ इन्द्र सोमा॰- एवा पाहि पन्यो अद्या नवीयान्।।

卐 महा॰ अमत्रो वृजने विर-प्श्यु1(उ)ग्रं शवः पत्यते धृ.ष्ण्वोजः। नाह विव्याच पृथिवी चनैनँ-यत्सोमासो हर्यश्व.ममन्दन्न्।।

卐 महा॰ उग्रो वावृधे वीर्याय- समाचक्रे वृषभः काव्येन। इन्द्रो भगो वाजदा^ अस्य गावः- प्र जायन्ते दक्षिणा^ अस्य पूर्वीः।।

❀03.02.20 卐प्र यत्सिन्धवः प्रसवँ यथाऽऽय-न्नाप.स्समुद्रं रथ्येव जग्मुः। अत श्चिदिन्द्र.स्सदसो वरीया-न्यदीं सोमः पृणति दुग्धो अंशुः।।

卐 समुद्रेण सिन्धवो यादमाना^- इन्द्राय सोमं सुषुतं भरन्तः। अंशु.न्दुहन्ति हस्तिनो भरित्रै- र्मध्वः पुनन्ति धारया पवित्रैः।।

卐 ह्रदाइव कुक्षय स्सोमधाना-स्समी~ विव्याच सवना पुरूणि। अन्ना यदिन्द्रः प्रथमा व्याश-वृत्र.ञ्जघन्वा॰ अवृणीत सोमम्।।

卐 आ तू भर माकि रेत.त्परिष्ठा-द्विद्मा हि त्वा वसुपतिं वसूनाम्। इन्द्र यत्ते माहिन.न्दत्र.म-स्त्यस्मभ्य.न्तद्धर्यश्व प्र यन्धि ।।

卐 अस्मे प्र यन्धि मघव.न्नृजीषि-न्निन्द्र रायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा^- अस्मे वीरा.ञ्छश्वत^ इन्द्र शिप्रिन्न्।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☸ 3.37 वार्त्रहत्यायेत्येकादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- गायत्री-अन्त्याऽनुष्टुप्।।

❀03.02.21 卐वार्त्रहत्याय शवसे- पृतनाषाह्याय च। इन्द्र त्वा ऽऽवर्तयामसि।।

卐 अर्वाचीनं सु ते मन^-उत चक्षु श्शतक्रतो~। इन्द्र कृण्वन्तु वाघतः।।

卐 नामानि ते शतक्रतो~ विश्वाभि र्गीर्भि रीमहे। इन्द्राभिमातिषाह्ये।।

卐 पुरुष्टुतस्य धामभि-श्शतेन महयामसि। इन्द्रस्य चर्षणीधृतः।।

卐 इन्द्रँ वृत्राय हन्तवे- पुरुहूत.मुप ब्रुवे। भरेषु वाजसातये।।

❀03.02.22 卐वाजेषु सासहि र्भव- त्वामीमहे शतक्रतो~। इन्द्र वृत्राय हन्तवे।।

卐 द्युम्नेषु पृतनाज्ये- पृत्सुतूर्षु श्रवस्सु च। इन्द्र साक्ष्वाभिमातिषु।।

卐 शुष्मिन्तम.न्न^ ऊतये- द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो~।।

卐 इन्द्रियाणि शतक्रतो~- या ते जनेषु पञ्चसु। इन्द्र तानि त आ वृणे।।

卐 अग.न्निन्द्र श्रवो बृह-द्युम्न.न्दधिष्व दुष्टरम्। उत्ते शुष्म.न्तिरामसि।।

卐 अर्वावतो न^ आ ग-ह्यथो~ शक्र परावतः। उ लोको यस्ते अद्रिव^- इन्द्रेह तत^ आ गहि।।

☸ 3.38 अभि तष्टेवेति दशर्चस्य सूक्तस्य, वैश्वामित्रः प्रजापति-रिन्द्र-स्त्रिष्टुप्-(वाच्यः प्रजापति र्वा विश्वामित्रो वा)।।

❀03.02.23 卐अभि तष्टेव दीधया मनीषा-मत्यो न वाजी सुधुरो जिहानः। अभि प्रियाणि मर्मृश.त्पराणि- कवीं रिच्छामि सन्दृशे सुमेधाः।।

卐 इनोत पृच्छ जनिमा कवीनां- मनोधृत.स्सुकृत.स्तक्षत द्याम्। इमा^ उ ते प्रण्यो3(ओ) वर्धमाना^- मनोवाता^ अध नु धर्मणि ग्मन्न्।।

卐 निषीमिदत्र गुह्या दधाना^- उत क्षत्राय रोदसी समञ्जन्न्। सं मात्राभि र्ममिरे येमु रुर्वी~- अन्त र्मही~ समृते~ धायसे धुः~।।

卐 आतिष्ठन्तं परि विश्वे अभूष-ञ्छ्रियो वसान श्चरति स्वरोचिः। मह.त्तद्वृष्णो असुरस्य नामा- ऽऽविश्वरूपो अमृतानि तस्थौ।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 असूत पूर्वो वृषभो ज्याया-निमा^ अस्य शुरुध.स्सन्ति पूर्वीः। दिवो नपाता विदथस्य धीभिः≈- क्षत्रँ राजाना प्रदिवो दधाथे~।।

❀03.02.24 卐त्रीर्णि राजाना विदथे पुरूणि- परि विश्वानि भूषथ.स्सदांसि। अपश्य.मत्र मनसा जगन्वा-न्व्रते गन्धर्वां॰ अपि वायुकेशान्।।

卐 तदि.न्न्वस्य वृषभस्य धेनो- रा नामभि ममिरे सक्म्य.ङ्गोः। अन्यदन्य.दसुर्य1(अँ) वसाना^- नि मायिनो ममिरे रूप.मस्मिन्न्।।

卐 तदि.न्न्वस्य सवितु र्नकिर्मे- हिरण्ययी.ममतिँ या.मशिश्रेत्। आ सु॒ष्टुती रोदसी विश्वमिन्वे~- अपीव योषा जनिमानि वव्रे।।

卐 युवं प्रत्नस्य साधथो महो य-द्दैवी स्वस्तिः॰ परिण.स्स्यातम्। गोपाजिह्वस्य तस्थुषो विरूपा- विश्वे पश्यन्ति मायिनः॰ कृतानि।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.39 इन्द्रं मतिरिति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.02.25 卐इन्द्रं मति र्हृद^ आ वच्यमाना-ऽच्छा पतिं स्तोमतष्टा जिगाति। या जागृवि र्विदथे शस्यमा-नेन्द्र यत्ते जायते विद्धि तस्य।।

卐 दिव.श्चिदा पूर्व्या जायमाना- वि जागृवि र्विदथे शस्यमाना। भद्रा वस्त्रा.ण्यर्जुना वसाना- सेय.मस्मे सनजा पित्र्या धीः।।

卐 यमा चिदत्र यमसू.रसूत- जिह्वाया^ अग्रं पतदा ह्यस्थात्। वपूंषि जाता मिथुना सचेते~- तमोहना तपुषो बुध्न एता।।

卐 नकिरेषा.न्निन्दिता मर्त्येषु- ये अस्माकं पितरो गोषु योधाः। इन्द्र^ एषा.न्दृंहिता माहिनावा-नुद्गोत्राणि ससृजे दंसनावान्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 सखा ह यत्र सखिभि र्नवग्वै- रभिज्ञ्वा सत्वभिर्गा अनुग्मन्न्। सत्य.न्तदिन्द्रो दशभि र्दशग्वै-स्सूर्यं विवेद् तमसि क्षियन्तम्।।

❀03.02.26 卐इन्द्रो मधु संभृत.मुस्त्रियायां- पद्व.द्विवेद शफव.न्नमे गोः। गुहा हित.ङ्गुह्य.ङ्गूळ्ह.मप्सु- हस्ते दधे दक्षिणे दक्षिणावान्।।

卐 ज्योति र्वृणीत तमसो विजान-न्नारे स्याम दुरिता.दभीके। इमा^ गिर.स्सोमपा.स्सोमवृद्ध- जुष.स्वेन्द्र पुरुतमस्य कारोः।।

卐 ज्योति र्यज्ञाय रोदसीअनु ष्या-दारे स्याम दुरितस्य भूरेः। भूरि चिद्धि तुजतो मर्त्यस्य- सुपारासो वसवो बर्हणावत्।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमं वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तं वृत्राणि सञ्जित.न्धनानाम्।। ।। इति द्वितीयाध्याय स्समाप्तः ।।

तृतीयाष्टके तृतीयाध्यायः। (वर्गाः 1-31)

3.40 इन्द्र त्वेति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- गायत्री।।

❀03.03.01 卐इन्द्रं त्वा वृषभं वयं- सुते सोमे हवामहे। स पाहि मध्वो अन्धसः।।

卐 इन्द्र क्रतुविदं सुतं- सोमं हर्य पुरुष्टुत। पिबाऽवृषस्व तातृपिम्।।

卐 इन्द्र प्र णो धितावानं- यज्ञं विश्वेभि र्देवेभिः। तिर स्तवान विश्पते।।

卐 इन्द्र सोमा.स्सुता^ इमे- तव प्रयन्ति सत्पते। क्षय.ञ्चन्द्रास^ इन्दवः।।

卐 दधिष्वा जठरे सुतं- सोम.मिन्द्र वरेण्यम्। तव द्युक्षास^ इन्दवः।।

❀03.03.02 卐गिर्वणः पाहि न.स्सुतं- मधो र्धाराभि रज्यसे। इन्द्र त्वादात.मिद्यशः।।

卐 अभि द्युम्नानि वनिन^ -इन्द्रं सचन्ते अक्षिता। पीत्वी सोमस्य वावृधे।।

卐 अर्वावतो न^ आ गहि- परावत.श्च वृत्रहन्न्। इमा^ जुषस्व नो गिरः।।

卐 यदन्तरा परावत-मर्वावत.ञ्च हूयसे। इन्द्रेह तत^आ गहि।।

3.41 आ तू न इन्द्रेति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- गायत्री।।

❀03.03.03 卐आ तू न^ इन्द्र मद्र्य-ग्घुवान.स्सोमपीतये। हरिभ्याँ याह्यद्रिवः।।

卐 सत्तो होता न^ ऋत्वियं- स्तिस्तिरे बर्हि.रानुषक्। अयुज्र.न्प्रात रद्रयः।।

卐 इमा ब्रह्म ब्रह्मवाहः- क्रियन्त आ बर्हि.स्सीद। वीहि शूर पुरोळाशम्।।

卐 रारन्धि सवनेषुण^-एषु स्तोमेषु वृत्रहन्न्। उक्थे.ष्विन्द्र गिर्वणः।।

卐 मतय.स्सोमपा.मुरुं- रिहन्ति शवस.स्पतिम्। इन्द्रँ वत्स.न्न मातरः।।

❀03.03.04 卐स मन्दस्वा ह्यन्धसो- राधसे तन्वा महे। न स्तोतार.न्निदे करः।।

卐 वय.मिन्द्र त्वायवो- हविष्मन्तो जरामहे। उत त्व.मस्मयु र्वसो~।।

卐 माऽऽरे अस्म.द्वि मुमुचो- हरिप्रियाऽर्वाङ्याहि। इन्द्र स्वधावो मत्स्वेह।।

卐 अर्वाञ्चन्त्वा सुखे रथे- वहता.मिन्द्र केशिना। घृतस्नू~ बर्हि रासदे।।

3.42 उप न इति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- गायत्री।।

❀03.03.05 卐उप न.स्सुत.मागहि- सोम.मिन्द्र गवाशिरम्। हरिभ्याँ य.स्ते अस्मयुः।।

卐 तमिन्द्र मदमा गहि- बर्हिष्ठा-ङ्ग्रावभि स्सुतम्। कुवि.न्न्वस्य तृष्णवः।।

卐 इन्द्र.मित्था गिरो म-माच्छागु रिषिता^ इतः। आवृते सोमपीतये।।

卐 इन्द्रं सोमस्य पीतये- स्तोमै रिह हवामहे। उक्थेभिः कुवि.दागमत्।।

卐 इन्द्र सोमा.स्सुता ^इमे- ता न्दधिष्व शतक्रतो~। जठरे वाजिनीवसो~।।

❀03.03.06 卐विद्मा हि त्वा धनञ्जयँ- वाजेषु दधृ.षङ्कवे। अधा ते सुम्न.मीमहे।।

卐 इम.मिन्द्र गवाशिरँ- यवाशिर.ञ्च नः पिब। आगत्या वृषभि स्सुतम्।।

卐 तुभ्ये.दिन्द्र स्व ओक्ये-3(ए) सोम.ञ्चोदामि पीतये। एष रारन्तु ते हृदि।।

卐 त्वां सुतस्य पीतये- प्रत्न.मिन्द्र हवामहे। कुशिकासो अवस्यवः।।

3.43 आ याह्यर्वाङित्यष्टर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.03.07 卐आ याह्यर्वा.ङुप वन्धुरेष्ठा-स्तवेदनु प्रदिव.स्सोमपेयम्। प्रिया सखाया वि मुचोप बर्हि-स्त्वा.मिमे हव्यवाहो हवन्ते।।

卐 आ याहि पूर्वी रति चर्षणीरा॰- अर्य^ आशिष^ उप नो हरिभ्याम्। इमा^ हि त्वा मतय.स्स्तोमतष्टा- इन्द्र हवन्ते सख्य.ञ्जुषाणाः।।

卐 आ नो यज्ञ.न्नमोवृधं सजोषा^- इन्द्र देव हरिभि र्याहि तूयम्। अहं हि त्वा मतिभि र्जोहवीमि- घृतप्रया. स्सधमादे मधूनाम्।।

卐 आ च त्वामेता वृषणा वहातो- हरी~ सखाया सुधुरा स्वङ्गा। धानाव.दिन्द्र.स्सवन.ञ्जुषाण-स्सखा सख्यु श्शृणव.द्वन्दनानि।।

卐 कुविन्मा गोपा.ङ्करसे जनस्य- कुवि.द्राजानं मघव.न्नृजीषिन्न्। कुविन्म ऋषिं पपिवांसं सुतस्य- कुविन्मे वस्वो अमृतस्य शिक्षाः।।

卐 आ त्वा बृहन्तो हरयो युजाना^- अर्वा.गिन्द्र सधमादो वहन्तु। प्र ये द्विता दिव^ ऋञ्ज.न्त्याता- स्सुसंमृष्टासो वृषभस्य मूराः।।

卐 इन्द्र पिब वृषधूतस्य वृष्ण^- आ य.न्ते श्येन^ उशते जभार। यस्य मदे च्यावयसि प्र कृष्टी- र्यस्य मदे अप गोत्रा ववर्थ।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। श्रृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम् ।।

3.44 अयन्त इति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- बृहती।।

❀03.03.08 卐अय न्ते अस्तु हर्यत-स्सोम^ आ हरिभि स्सुतः। जुषाण^ इन्द्र हरिभि.र्न^ आ ग-ह्या तिष्ठ हरितं रथम्।।

卐 हर्य.न्नुषस.मर्चय-स्सूर्यं हर्य.न्नरोचयः। विद्वा॰ श्चिकित्वा.न्हर्यश्व वर्धस- इन्द्र विश्वा^अभि श्रियः।।

卐 द्यामिन्द्रो हरिधायसं- पृथिवीं हरिवर्पसम्। अधारय.द्धरितो र्भूरि भोजनँ -ययो रन्त हरि.श्चरत्।।

卐 जज्ञानो हरितो वृषा- विश्वमा भाति रोचनम्। हर्यश्वो हरित.न्धत्त आयुध-मावज्रं बाह्वो र्हरिम्।।

卐 इन्द्रो हर्यन्त.मर्जुनँ- वज्रं शुक्रै रभीवृतम्। अपावृणो.द्धरिभि रद्रिभि.स्सुत-मुद्गा ^हरिभि राजत।।

3.45 आ मन्द्रैरिति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्रो- बृहती।।

❀03.03.09 卐आ मन्द्रै रिन्द्र हरिभि-र्याहि मयूररोमभिः। मा त्वा के चिन्नि यंमन्विन्न पाशिनो-ऽति धन्वेव ताँ ईहि।।

卐 वृत्रखादो वलंरुजः- पुरा.न्दर्मो अपा.मजः। स्थाता रथस्य हर्यो रभिस्वर-इन्द्रो दृळ्हा चिदारुजः।।

卐 गम्भीराँ उदधीँरिव- क्रतुं पुष्यसि गा^इव। प्र सुगोपा^ यवस.न्धेनवो यथा-ह्रद.ङ्कुल्याइवाऽऽशत।।

卐 आ नस्तुजं रयिं भ-रांशं न प्रतिजानते। वृक्षं पक्वं फल.मङ्कीव धूनु-हीन्द्र संपारणँ वसु।।

卐 स्वयु रिन्द्र स्वराळसि- स्मद्दिष्टि स्स्वयशः.स्तरः। सवावृधान ^ओजसा पुरुष्टुत- भवा न स्सुश्रवस्तमः।।

☫ 3.46 युध्मस्य त इति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.03.10 卐युध्मस्य ते वृषभस्य स्वराज^- उग्रस्य यून.स्स्थविरस्य घृष्वेः। अजूर्यतो वज्रिणो वीर्या3(आ)-णीन्द्र श्रुतस्य महतो महानि।।

卐 महाँ असि महिष वृष्ण्येभि- र्धनस्पृ.दुग्र सहमानो अन्यान्। एको विश्वस्य भुवनस्य राजा- स ^योधया च क्षयया च जनान्।।

卐 प्र मात्राभी रिरिचे रोचमानः- प्र देवेभि र्विश्वतो अप्रतीतः। प्र मज्मना दिव ^इन्द्रः पृथिव्याः- प्रोरो र्महो अन्तरिक्षा.दृजीषी।।

卐 उरु.ङ्गभीर.ञ्जनुषाऽभ्यु1(उ)ग्रं- विश्वव्यचस.मवतं मतीनाम्। इन्द्रं सोमासः प्रदिवि सुतास-स्समुद्र.न्न स्रवत^आ विशन्ति।।

卐 यं सोम.मिन्द्र पृथिवीद्यावा- गर्भ.न्न माता बिभृत.स्त्वाया। त न्ते हिन्वन्ति तमु ते मृज-न्त्यध्वर्यवो वृषभ पातवा उ।।

☫ 3.47 मरुत्वाँ इन्द्रेति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.03.11 卐मरुत्वाँ इन्द्र वृषभो रणाय- पिबा सोम.मनुष्वधं मदाय। आ सिञ्चस्व जठरे मध्व^ ऊर्मि-न्त्वं राजाऽसि प्रदिव.स्सुतानाम्।।

卐 सजोषा^ इन्द्र सगणो मरुद्भि-स्सोमं पिब वृत्रहा शूर विद्वान्। जहि शत्रूँ रप मृधो नुद-स्वाथाभयं.कृणुहि विश्वतो नः।।

卐 उत ऋतुभिर् ऋतुपाः पाहि सोम-मिन्द्र देवेभि.स्सखिभि स्सुत.न्नः। याँ आऽभजो मरुतो ये त्वाऽ-न्वह.न्वृत्र.मदधु स्तुभ्य.मोजः।।

卐 ये त्वाऽहिहत्ये मघव.न्नवर्ध-न्ये शाम्बरे हरिवो ये गविष्टौ। ये त्वा नून.मनुमदन्ति विप्राः- पिबेन्द्र सोमं सगणो मरुद्भिः।।

卐 मरुत्वन्तँ वृषभँ वावृधान-मकवारि.न्दिव्यं शास.मिन्द्रम्। विश्वासाह मवसे नूतना-योग्रं सहोदा.मिह तं हुवेम।।

3.48 सद्यो ह जात इति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.03.12 卐सद्यो ह जातो वृषभः कनीनः- प्रभर्तु.माव.दन्धस.स्सुतस्य। साधोः पिब प्रतिकामँ यथा ते- रसाशिरः प्रथमं सोम्यस्य।।

卐 यज्जायथा.स्तदहरस्य कामें-ऽशोः पीयूष.मपिबो गिरिष्ठाम्। तन्ते माता परि योषा जनित्री- महः पितु र्दम आऽसिञ्च.दग्रे।।

卐 उपस्थाय मातर.मन्न.मैट्ट- तिग्म.मपश्य.दभि सोम.मूधः। प्रयावय.न्नचर.द्गृत्सो अन्या-न्महानि चक्रे पुरुधप्रतीकः।।

卐 उग्र.स्तुराषा.ळभिभूत्योजा^- यथावश.न्तन्व.ञ्चक्र एषः। त्वष्टार.मिन्द्रो जनुषाऽभिभूया-ऽमुष्या सोम .मपिब.च्चमूषु।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.49 शंसा महामिति पञ्चर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.03.13 卐शंसा महा.मिन्द्रँ यस्मि.न्विश्वा^-आ कृष्टय.स्सोमपाः काम.मव्यन्न्। यं सुक्रतु.न्धिषणे~ विभ्वतष्ट-ङ्घनँ वृत्राणा.ञ्जनयन्त देवाः।।

卐 य.न्नु नकि॰ पृतनासु स्वराज-न्द्विता तरति नृतमं हरिष्ठाम्। इनतम.स्सत्वभि.र्यो ह शूषै॰- पृथुज्रया^ अमिना.दायु र्दस्योः।।

卐 सहावा पृत्सु तरणि र्नार्वा- व्यानशी रोदसी मेहनावान्। भगो न कारे हव्यो मतीनां- पितेव चारु .स्सुहवो वयोधाः।।

卐 धर्ता दिवो रजस.स्पृष्ट^ ऊर्ध्वो- रथो न वायु र्वसुभि र्नियुत्वान्। क्षपाँ वस्ता जनिता सूर्यस्य- विभक्ता भाग.न्धिषणेव वाजम्।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.50 इन्द्रस्स्वाहेति पंचर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्।।

❀03.03.14 卐इन्द्र.स्स्वाहा पिबतु यस्य सोम^- आगत्या तुम्रो वृषभो मरुत्वान्। ओरुव्यचा॰ पृणता .मेभि रन्नै -राऽस्य हवि.स्तन्व1(अ॰) काम.मृध्याः।।

卐 आ ते सपर्यू~ जवसे युनज्मि- ययो रनु प्रदिव श्श्रुष्टि.मावः। इह त्वा धेयु र्हरय.स्सुशिप्र- पिबा त्व1(अ)स्य सुषुतस्य चारोः।।

卐 गोभि र्मिमिक्षु.न्दधिरे सुपार-मिन्द्र.ञ्ज्यैष्ठ्याय धायसे गृणानाः। मन्दान स्सोमं पपिवा॰ ऋजीषि-न्त्समस्मभ्यं पुरुधा गा^ इषण्य।।

卐 इम.ङ्कामं मन्दया गोभि रश्वै- श्चन्द्रवता राधसा पप्रथ.श्च। स्वर्यवो मतिभि स्तुभ्यँ विप्रा^- इन्द्राय वाह॰ कुशिकासो अक्रन्न्।।

卐 शुनं हुवेम मघवान.मिन्द्र-मस्मि.न्भरे नृतमँ वाजसातौ। शृण्वन्त.मुग्र.मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।

3.51 चर्षणीधृतमिति द्वादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्-आद्यास्तिस्रो जगत्यः- अन्त्यास्तिस्रो गायत्र्यः।।

❀03.03.15 卐चर्षणीधृतं मघवान.मुक्थ्य-1(अ)मिन्द्र.ङ्गिरो बृहती रभ्यनूषत। वावृधानं पुरुहूतं सुवृक्तिभि- रमर्त्य.ञ्जरमाण.न्दिवेदिवे।।

卐 शतक्रतु.मर्णवं शाकिन.न्नर-ङ्गिरो म इन्द्र.मुप यन्ति विश्वतः। वाजसनिं पूर्भिद.न्तूर्णि.मप्तुर-न्धामसाच. मभिषाचं स्वर्विदम्।।

卐 आकरे वसो जरिता पनस्यते-ऽनेहस.स्स्तुभ^ इन्द्रो दुवस्यति। विवस्वत.स्सदन आ हि पिप्रिये-सत्रासाह मभिमातिहनं स्तुहि।।

卐 नृणामु त्वा नृतम.ङ्गीर्भि रुक्थै- रभि प्र वीर.मर्चता सबाधः। सं सहसे पुरुमायो जिहीते- नमो अस्य प्रदिव^ एक^ ईशे।।

卐 पूर्वी रस्य निष्षिधो मर्त्येषु- पुरू वसूनि पृथिवी बिभर्ति। इन्द्राय द्याव^ ओषधी रुताऽऽपो- रयिं रक्षन्ति जीरयो वनानि।।

❀03.03.16 卐तुभ्यं ब्रह्माणि गिर^इन्द्र तुभ्यं- सत्रा दधिरे हरिवो जुषस्व। बोध्या3(आ)पि रवसो नूतनस्य- सखे वसो~ जरितृभ्यो वयो धाः।।

卐 इन्द्र मरुत्व^ इह पाहि सोमँ- यथा शार्याते अपिब.स्सुतस्य। तव प्रणीती तव शूर शर्म-न्ना विवासन्ति कवय स्सुयज्ञाः।।

卐 स वावशान^ इह पाहि सोमं- मरुद्भि रिन्द्र सखिभि स्सुत.न्नः। जातँ यत्त्वा परि देवा^ अभूष-न्महे भराय पुरुहूत विश्वे।।

卐 अप्तूर्ये मरुत^ आपिरेषो-ऽमन्द न्निन्द्र.मनु दातिवाराः। तेभि.स्साकं पिबतु वृत्रखाद- स्सुतं सोम .न्दाशुष.स्स्वे सधस्थे।।

卐 इदं ह्यन्वोजसा- सुतं राधानां पते। पिबा त्व1(अ)स्य गिर्वणः।।

卐 यस्ते अनु स्वधा.मस-त्सुते नि यच्छ तन्वम्। स त्वा ममत्तु सोम्यम्।।

卐 प्र ते अश्नोतु कुक्ष्योः- प्रेन्द्र ब्रह्मणा शिरः। प्र बाहू~ शूर राधसे।।

☃ 3.52 धानावन्तमित्यष्टर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- इन्द्र-स्त्रिष्टुप्-आद्याश्चतस्रो गायत्र्यः-षष्ठी जगती।।

❀03.03.17 卐धानावन्त.ङ्करम्भिणं-मपूपवन्त.मुक्थिनम्। इन्द्र प्रात जुषस्व नः।।

卐 पुरोळाशं पचत्य-ञ्जुषस्वेन्द्रा ऽगुरस्व च। तुभ्यं हव्यानि सिस्रते।।

卐 पुरोळाश.ञ्च नो घसो- जोषयासे गिर.श्च नः। वधूयुरिव योषणाम्।।

卐 पुरोळाशं सनश्रुत- प्रातस्सावे जुषस्व नः। इन्द्र क्रतुर्हि ते बृहन्न्।।

卐 माध्यन्दिनस्य सवनस्य धाना॰- पुरोळाश.मिन्द्र कृष्वेह चारुम्। प्र यत्स्तोता जरिता तूर्ण्यर्थो- वृषायमाण^ उप गीर्भि रीट्टे।।

❀03.03.18 卐तृतीये धाना.स्सवने पुरुष्टुत- पुरोळाश.माहुतं मामहस्व नः। ऋभुमन्तँ वाजवन्त.न्त्वा कवे- प्रयस्वन्त^ उप शिक्षेम धीतिभिः।।

卐 पूषण्वते ते चकृमा करम्भं- हरिवते हर्यश्वाय धानाः। अपूप.मद्धि सगणो मरुद्भि- स्सोमं पिब वृत्रहा शूर विद्वान्।।

卐 प्रति धाना^ भरत तूय.मस्मै- पुरोळाशं वीरतमाय नृणाम्। दिवेदिवे सदृशी रिन्द्र तुभ्यँ- वर्धन्तु त्वा सोमपेयाय धृष्णो~।।

☃ 3.53 इन्द्रापर्वतेति चतुर्विंशत्यृचस्य सूक्तस्य, गाथिनो विश्वामित्र-इन्द्रो देवता-आद्याया इन्द्रापर्वतौ-पञ्चदश्यादि द्वयोः ससर्परी वाक्-ततश्चतसृणां रथाङ्गानि त्रिष्टुप्-दशमी षोळश्यौ जगत्यौ- द्वादशी द्वाविंश्योऽनुष्टुभः-त्रयोदशी गायत्री-अष्टादशी बृहती।।

❀03.03.19 卐इन्द्रापर्वता बृहता रथेन- वामी रिष^ आ वहतं सुवीराः। वीतं हव्या.न्यध्वरेषु देवा- वर्धेथा.ङ्गीर्भि रिळया मदन्ता।।

卐 तिष्ठा सु कं मघव.न्मा परा गा-स्सोमस्य नु त्वा सुषुतस्य यक्षि। पितु र्न पुत्र.स्सिचमा रभे त -इन्द्र स्वादिष्ठया गिरा शचीवः।।

卐 शंसावाध्वर्यो~ प्रति मे गृणी-हीन्द्राय वाहः कृणवाव जुष्टम्। एदं बर्हि र्यजमानस्य सीदा-ऽथा च भूदुक्थ मिन्द्राय शस्तम्।।

卐 जाये.दस्तं मघव.न्त्सेदु योनि-स्तदि.त्त्वा युक्ता^ हरयो वहन्तु। यदा कदा च सुनवाम सोम-मग्नि.ष्ट्वा दूतो धन्वा.त्यच्छ।।

卐 परा याहि मघव.न्ना च या-हीन्द्र भ्रात रुभयत्रा ते अर्थम्। यत्रा रथस्य बृहतो निधानँ- विमोचनँ वाजिनो रासभस्य।।

❀03.03.20 卐अपा.स्सोम.मस्त.मिन्द्र प्र याहि- कल्याणी जाया सुरण.ङ्गृहे ते। यत्रा रथस्य बृहतो निधानँ- विमोचनँ वाजिनो दक्षिणावत्।।

卐 इमे भोजा^ अङ्गिरसो विरूपा^-दिव स्पुत्रासो असुरस्य वीराः। विश्वामित्राय ददतो मघानि - सहस्रसावे प्र तिरन्त आयुः।।

卐 रूपंरूपं मघवा बोभवीति- मायाः कृण्वान.स्तन्व1(अं)परि स्वाम्। त्रिर्य.द्दिवः परि मुहूर्त.माऽगा- त्स्वै.र्मन्त्रै रनृतुपा^ ऋतावा।।

卐 महाँ ऋषि र्देवजा^ देवजूतो-ऽस्तभ्ना.त्सिन्धु.मर्णव.न्नृचक्षाः। विश्वामित्रो यदवह.त्सुदास-मप्रियायत कुशिकेभि रिन्द्रः।।

卐 हंसाइव कृणुथ श्लोक.मद्रिभि- र्मदन्तो गीर्भि रध्वरे सुते सचा। देवेभि र्विप्रा^ ऋषयो नृचक्षसो- वि पिबध्व.ङ्कुशिका.स्सोम्यं मधु।।

❀03.03.21 卐उप प्रेत कुशिका श्चेतयध्व-मश्वं राये प्र मुञ्चता सुदासः। राजा वृत्र.ञ्जङ्घन.त्प्रागपा.गुद-गथा यजाते वर आ पृथिव्याः।।

卐 य ^ इमे~ रोदसी उभे~-अह.मिन्द्र.मतुष्टवम्। विश्वामित्रस्य रक्षति- ब्रह्मेदं भारत.ञ्जनम्।।

卐 विश्वामित्रा^ अरासत- ब्रह्मेन्द्राय वज्रिणे। कर.दि.न्न स्सुराधसः।।

卐 किन्ते कृण्वन्ति कीकटेषु गावो- नाऽऽशिर.न्दुह्रे न तपन्ति घर्मम्। आ नो भर प्रमगन्दस्य वेदो - नैचाशाखं मघव.न्रन्धया नः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ससर्परी रमतिं बाधमाना- बृह.न्मिमाय जमदग्निदत्ता। आ सूर्यस्य दुहिता ततान- श्रवो देवे.ष्वमृतं .मजुर्यम्।।

❀0303.22 卐ससर्परी रभर.त्तूय.मेभ्यो-ऽधि श्रवः पाञ्चजन्यासु कृष्टिषु। सा पक्ष्या3(आ) नव्य.मायु र्दधाना- यां मे पलस्तिजमदग्नयो ददुः।।

卐 स्थिरौ गावौ भवतां वीळु रक्षो- मेषा वि वर्हि मा युगं वि शारि। इन्द्रः पातल्ये ददतां शरीतो- ररिष्टनेमे अभि न.स्सचस्व।।

卐 बल.न्धेहि तनूषु नो- बल.मिन्द्रानळुत्सु नः। बल.न्तोकाय तनयाय जीवसे- त्वं हि बलदा^ असि।।

卐 अभि व्ययस्व खदिरस्य सार-मोजो धेहि स्पन्दने शिंशपायाम्। अक्ष वीळो~ वीळित वीळयस्व- मा यामा.दस्मा.दव जीहिपो नः।।

卐 अय.मस्मा.न्वनस्पति -र्मा च हा मा च रीरिषत्। स्वस्त्या गृहेभ्य आऽवसा -आ विमोचनात्।।

❀03.03.23 卐इन्द्रोतिभि र्बहुलाभि र्नो अद्य- याच्छ्रेष्ठाभि र्मघव.ञ्छूर जिन्व। यो नो द्वे.ष्ट्यधर.स्सस्पदीष्ट- यमु द्विष्म.स्तमु प्राणो जहातु।।

卐 परशु.ञ्चिद्वि तपति- शिम्बल.ञ्चिद्वि वृश्चति। उखा चिदिन्द्र येषन्ती- प्रयस्ता फेन.मस्यति।।

卐 न सायकस्य चिकिते जनासो- लोध.न्नयन्ति पशु मन्यमानाः। नावाजिनं वाजिना हासयन्ति- न गर्दभं पुरो अश्वा.न्नयन्ति।।

卐 इम इन्द्र भरतस्य पुत्रा^-अपपित्व.न्चिकितु र्न प्रपित्वम्। हिन्व.न्त्यश्व-मरण.न्न नित्य-ञ्ज्यावाजं परिणय.न्त्याजौ।।

☫ 3.54 इमं मह इति द्वाविंशत्यृचस्य सूक्तस्य, वैश्वामित्रः प्रजापति-र्विश्वेदेवा-स्त्रिष्टुप्-(सूक्तभेदप्रयोगपक्षे देवताः क्रमेण-अग्निः 1-विश्वेदेवाः 2-द्यावापृथिवी 1-विश्वे1-सूर्यद्यावापृथिव्यः 1-द्यावापृथिवी 2-द्यौः 1-विश्वेदेवाः 1-सविता 1-विश्वे 2-विष्णुः 1-इन्द्रः 1-अश्विनौ 1-विश्वेदेवाः 5-अग्निः1-एवं 22।। उत्तर सूक्ते अखिला अपि विश्वेदेवाः)।।

❀0303.24 卐इमं महे विदथ्याय शूषं- शश्व.त्कृत्व^ ईड्याय प्र जभ्रुः। श्रृणोतु नो दम्येभि रनीकै- श्श्रृणो .त्वग्नि र्दिव्यै रजस्रः।।

卐 मर्हि महे दिवे अर्चा पृथिव्यै- कामो म इच्छ.ञ्चरति प्रजानन्न्। ययोर्ह स्तोमे विदथेषु देवा- स्संपर्यवो मादयन्ते सचाऽऽयोः।।

卐 युवोर् ऋतं रोदसी सत्य.मस्तु- महे षु णं स्सुविताय प्र भूतम्। इद.न्दिवे नमो अग्ने पृथिव्यै- संपर्यामि प्रयसा यामि रत्नम्।।

卐 उतो~ हि वां पूर्व्या आविविद्र -ऋतावरी~ रोदसी सत्यवाचः। नरश्चिद्वां समिथे शूरसातौ- ववन्दिरे पृथिवि वेविदानाः।।

卐 को अद्धा वेद क^ इह प्र वोच-द्देवा९ अच्छा पथ्या3(आ)का समेति। ददृश्र एषा.मवमा सदांसि- परेषु या गुह्येषु व्रतेषु।।

❀03.03.25 卐कवि नृंचक्षा^ अभि षीमचष्ट- ऋतस्य योना विघृते~ मदन्ती~। नाना चक्राते~ सदनँ यथा वे- स्समानेन क्रतुना सँविदाने~।।

卐 समान्या वियुते~ दूरेअन्ते~- ध्रुवे पदे तस्थतु र्जागरूके~। उत स्वसारा युवती~ भवन्ती~- आदु ब्रुवाते~ मिथुनानि नाम।।

卐 विश्वेदेते~ जनिमा सँ विविक्तो- महो देवा.न्बिभ्रती~ न व्यथेते~। एज.द्ध्रुवं पत्यते विश्व.मेक-ञ्चर त्पतत्रि विषुणँ वि जातम्।।

卐 सना पुराण.मध्येम्यारा-न्महः पितु र्जनितु र्जामि तन्नः। देवासो यत्र पनितार^ एवै- रुरौ पथि व्युते तस्थु.रन्तः।।

卐 इमं स्तोमं रोदसी प्र ब्रवी-म्यृदूदरा श्श्रृणव.न्नग्निजिह्वाः। मित्र स्सम्राजो वरुणो युवान^- आदित्यासः कवयः पप्रथानाः।।

❀03.03.26 卐हिरण्यपाणि स्सविता सुजिह्व- स्त्रिरा दिवो विदथे पत्यमानः। देवेषु च सवित श्श्लोक.मश्रे- रादस्मभ्य.मा सुव सर्वतातिम्।।

卐 सुकृ.त्सुपाणि.स्स्ववा॰ ऋतावा- देव.स्त्वष्टाऽवसे तानि नो धात्। पूषण्वन्त^ ऋभवो मादयध्व-मूर्ध्वग्रावाणो अध्वर.मतष्ट।।

卐 विद्यु.द्रथा^ मरुत^ ऋष्टिमन्तो- दिवो मर्या^ ऋतजाता^ अयासः। सरस्वती श्रृणव.न्यज्ञियासो- धाता रयिं सहवीर.न्तुरासः।।

卐 विष्णुं स्तोमास॰ पुरुदस्म.मर्का- भगस्येव कारिणो यामनि ग्मन्न्। उरुक्रम॰ ककुहो यस्य पूर्वी- र्न मर्धन्ति युवतयो जनित्रीः।।

卐 इन्द्रो विश्वैर्वीर्यै3(ऐ॰) पत्यमान^- उभे~ आ पप्रौ रोदसी महित्वा। पुरन्दरो वृत्रहा धृष्णुषेण-स्सङ्गृभ्या न^ आ भरा भूरि पश्वः।।

❀03.03.27 卐नासत्या मे पितरा बन्धुपृच्छा- सजात्य.मश्विनो श्चारु नाम। युवं हि स्थो रयिदौ नो रयीणा-न्दात्रं रक्षेथे~ अकवै रदब्धा।।

卐 मह.त्तद्व॰ कवय.श्चारु नाम- यद्ध देवा^ भवथ विश्व इन्द्रे। सख ऋभुभि॰ पुरुहूत प्रियेभि- रिमा.न्धियं सातये तक्षता नः।।

卐 अर्यमा णो अदिति र्यज्ञियासो-ऽदब्धानि वरुणस्य व्रतानि। युयोत नो अनपत्यानि गन्तो॰-प्रजावा.न्न॰ पशुमा॰ अस्तु गातुः।।

卐 देवाना.न्दूत॰ पुरुध प्रसूतो-ऽनागा.न्नो वोचतु सर्वताता। श्रृणोतु न॰ पृथिवी द्यौ रुताऽऽप-स्सूर्यो नक्षत्रै रुर्व1(अ)न्तरिक्षम्।।

卐 श्रृण्वन्तु नो वृषण॰ पर्वतासो- ध्रुवक्षेमास^ इळया मदन्तः। आदित्यै र्नो अदिति श्श्रृणोतु- यच्छन्तु नो मरुत श्शर्म भद्रम्।।

卐 सदा सुग॰ पितुमा॰ अस्तु पन्था-मध्वा देवा^ओषधी.स्सं पिपृक्त। भगो मे अग्ने सख्ये न मृध्या^-उद्रायो अश्यां सदनं पुरुक्षोः।।

卐 स्वदस्व हव्या समिषो दिदी-ह्यस्मद्र्य1(अ)क्सं मिमीहि श्रवांसि। विश्वा॰ अग्ने पृत्सु तान्जेषि शत्रू-नहा विश्वा सुमना^ दीदिही नः।।

3.55 उषस इति द्वाविंशत्यृचस्य सूक्तस्य, वैश्वामित्रः प्रजापति- र्विश्वेदेवा-स्त्रिष्टुप्।।

❀03.03.28 卐उषसः पूर्वा^ अध यद्व्यूषु- र्महद्वि जज्ञे अक्षरं पदे गोः। व्रता देवाना.मुप नु प्रभूष-न्महद्देवाना.मसुरत्व.मेकम्।।

卐 मो~षू णो अत्र जुहुरन्त देवा^- मा पूर्वे अग्ने पितरः पदज्ञाः। पुराण्यो.स्सद्मनोः केतु रन्त- र्महद्देवाना.मसुरत्व.मेकम्।।

卐 वि मे पुरुत्रा पतयन्ति कामा-श्शम्यच्छा दीद्ये पूर्व्याणि। समिद्धे अग्ना वृत.मिद्वदेम- महद्देवाना.मसुरत्व.मेकम्।।

卐 समानो राजा विभृतः पुरुत्रा- शये शयासु प्रयुतो वनाऽनु। अन्या वत्सं भरति क्षेति माता- महद्देवाना.मसुरत्व.मेकम्।।

卐 आक्षि.त्पूर्वा.स्वपरा^ अनूरु-त्सद्यो जातासु तरुणी.ष्वन्तः। अन्तर्वती.स्सुवते अप्रवीता- महद्देवाना.मसुरत्व.मेकम्।।

❀03.03.29 卐शयुः परस्ता.दध नु द्विमाता-ऽबन्धन.श्चरति वत्स^ एकः। मित्रस्य ता वरुणस्य व्रतानि- महद्देवाना.मसुरत्व.मेकम्।।

卐 द्विमाता होता विदथेषु सम्रा-ळन्वग्र.ञ्चरति क्षेति बुध्नः। प्र रण्यानि रण्यवाचो भरन्ते- महद्देवाना.मसुरत्व.मेकम्।।

卐 शूरस्येव युध्यतो अन्तमस्य- प्रतीचीन.न्ददृशे विश्व.मायत्। अन्त.र्मति श्चरति निष्षिध.ङ्गो- र्महद्देवाना.मसुरत्व.मेकम्।।

卐 नि वेवेति पलितो दूत^ आ-स्वन्त र्महाँ श्चरति रोचनेन। वपूंषि बिभ्र.दभि नो वि चष्टे- महद्देवाना.मसुरत्व.मेकम्।।

卐 विष्णु र्गोपाः परमं पाति पाथः- प्रिया धामा.न्यमृता दधानः। अग्नि.ष्टा विश्वा भुवनानि वेद- महद्देवाना.मसुरत्व.मेकम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀03.03.30 ☞卐नाना चक्राते~ यम्या3(आ) वपूंषि- तयो रन्य.द्रोचते कृष्ण.मन्यत्। श्यावी च यदरुषी च स्वसारौ- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 माता च यत्र दुहिता च धेनू~- सबर्दुघे~ धापयेते~ समीची~। ऋतस्य ते~ सदसीळे अन्त- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 अन्यस्या^ वत्सं रिहती मिमाय- कया भुवा नि दधे धेनु रूधः। ऋतस्य सा पयसाऽपिन्वतेळा- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 पद्या वस्ते पुरुरूपा वपूं-ष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा। ऋतस्य सद्म वि चरामि विद्वा-न्मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 पदेइव~ निहिते~ दस्मे अन्त~- स्तयो रन्य.द्गुह्य.मावि रन्यत्। सध्रीचीना पथ्या3(आ)सा विषूची- मह.द्वेवाना.मसुरत्व.मेकम्।।

❀03.03.31 ☞卐आ धेनवो धुनयन्ता.मशिश्वी-स्सबर्दुघा.श्शशया^ अप्रदुग्धाः। नव्यानव्या^ युवतयो भवन्ती- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 यदन्यासु वृषभो रोरवीति- सो अन्यस्मि.न्यूथे नि दधाति रेतः। स हि क्षपावा.न्त्स भग.स्स राजा- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 वीरस्य नु स्वश्व्य.ञ्जनासः- प्र नु वोचाम विदु रस्य देवाः। षोळ्हा युक्ताः पञ्चपञ्चा ऽऽवहन्ति- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 देव.स्त्वष्टा सविता विश्वरूपः- पुपोष प्रजाः पुरुधा जजान। इमा च विश्वा भुवना.न्यस्य- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 मही~ समैर.च्चम्वा समीची~- उभे~ ते~ अस्य वसुना न्यृष्टे। शृण्वे वीरो विन्दमानो वसूनि- मह.द्वेवाना.मसुरत्व.मेकम्।।

卐 इमा.ञ्च नः पृथिवीं विश्वधाया^- उप क्षेति हितमित्रो न राजा। पुरस्सद श्शर्मसदो न वीरा- मह.द्वेवाना.मसुरत्व.मेकम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 निषिध्वरी.स्त ओषधी रुताऽपो- रयि.न्त इन्द्र पृथिवी बिभर्ति। सखाय स्ते वामभाज.स्स्याम- मह.
द्वेवाना.मसुरत्व.मेकम्।। ।। इति तृतीयाध्याय स्समाप्तः ।।

## तृतीयाष्टके चतुर्थाध्यायः। (वर्गाः 1-25)

3.56 न ता मिनन्तीत्यष्टर्चस्य सूक्तस्य, गाथिनो विश्वामित्रो- विश्वेदेवा- स्त्रिष्टुप्- (भेदपक्षे विभागः- क्रमेण – विश्वेदेवाः-1 संवत्सरादित्याः सिन्धवः-1 सविता-1 विश्वेदेवाः-2 एवमष्टौ)।।

03.04.01 卐न ता मिनन्ति मायिनो न धीरा^- व्रता देवानां प्रथमा ध्रुवाणि। न रोदसी अद्रुहा वेद्याभि- र्न पर्वता^ निनमे तस्थिवांसः।।

卐 षड्भारा॰ एको अचर.न्बिभ-र्त्यृतं वर्षिष्ठ.मुप गाव^ आऽगुः। तिस्रो महीरुपरा स्तस्थु रत्या^- गुहा द्वे~ निहिते ~दर्श्येका।।

卐 त्रिपाजस्यो वृषभो विश्वरूप^- उत त्र्युधा पुरुध प्रजावान्। त्र्यनीकः पत्यते माहिनावा-न्त्स रेतोधा ^वृषभ श्शश्वतीनाम्।।

卐 अभीक आसां पदवी रबो-ध्यादित्याना.मह्वे चारु नाम। आप श्चिदस्मा अरमन्त देवीः- पृथग्व्रजन्तीः परिषी.मवृञ्जन्।।

卐 त्री षधस्था सिन्धव स्त्रिः कवीना-मुत त्रिमाता विदथेषु सम्राट्। ऋतावरी र्योषणा.स्तिस्रो अप्या- स्त्रिरा दिवो विदथे पत्यमानाः।।

卐 त्रिरा दिव.स्सवित र्वार्याणि- दिवेदिव आ सुव त्रि.र्नो अह्नः। त्रिधातु राय ^आ सुवा वसूनि- भग त्रात र्धिषणे सातये धाः।।

卐 त्रिरा दिव.स्सविता सोषवीति- राजाना मित्रावरुणा सुपाणी~। आप.श्चिदस्य रोदसी चिदुर्वी~ -रत्नं भिक्षन्त सवितु स्सवाय।।

卐 त्रिरुत्तमा दूणशा रोचनानि- त्रयो राज.न्त्यसुरस्य वीराः। ऋतावान ^इषिरा दूळभास-स्त्रिरा दिवो विदथे सन्तु देवाः।।

☸ 3.57 प्र मे विविक्वानिति षडृचस्य सूक्तस्य, गाथिनो विश्वामित्रो- विश्वेदेवा- स्त्रिष्टुप्-(भेदपक्षे विश्वेदेवाः-4 अग्निः-2 एवं षट्)।।

❀03.04.02 卐प्र मे विविक्वाँ अविद.न्मनीषा-न्धेनु.ञ्चरन्तीं प्रयुता.मगोपाम्। सद्य.श्चिद्या दुदुहे भूरि धासे-रिन्द्र.स्तदग्निः पनितारो अस्याः।।

卐 इन्द्र.स्सु पूषा वृषणा सुहस्ता- दिवो न प्रीता श्शशय.न्दुदुह्रे। विश्वे यदस्यां रणयन्त देवाः- प्र वोऽत्र वसव.स्सुम्न.मश्याम्।।

卐 या जामयो वृष्ण इच्छन्ति शक्ति-न्नमस्यन्ती र्जानते गर्भ.मस्मिन्न्। अच्छा पुत्र.न्धेनवो वावशाना^- मह श्चरन्ति बिभ्रतँ वपूंषि।।

卐 अच्छा विवक्मि रोदसी सुमेके~- ग्राव्णो युजानो अध्वरे मनीषा। इमा^ उ ते मनवे भूरिवारा ^-ऊर्ध्वा ^भवन्ति दर्शता यजत्राः।।

卐 या ते जिह्वा मधुमती सुमेधा^- अग्ने देवे.षूच्यत उरूची। तयेह विश्वाँ अवसे यजत्रा-नासादय पायया चा मधूनि।।

卐 या ते अग्ने पर्वतस्येव धारा-ऽसश्चन्ती पीपय.द्देव चित्रा। तामस्मभ्यं प्रमति.ञ्जातवेदो- वसो~ रास्व सुमतिँ विश्वजन्याम्।।

☸ 3.58 धेनुः प्रत्नस्येति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्रोऽश्विनौ- त्रिष्टुप्।।

❀03.04.03 卐धेनुः प्रत्नस्य काम्य.न्दुहाना-ऽन्तः पुत्र श्चरति दक्षिणायाः। आ द्योतनिँ वहति शुभ्रया-मोषस.स्स्तोमो अश्विना वजीगः~।।

卐 सुयु.ग्वहन्ति प्रति वामृते-नोर्ध्वा भवन्ति पितरेव मेधाः। जरेथा.मस्म.द्वि पणे मनीषाँ- युवो रव श्चकृमा यात.मर्वाक्।।

卐 सुयुग्भि रश्वै.स्सुवृता रथेन- दस्रा विमं श्रृणुतं श्लोक.मद्रेः। किम.ङ्ग वां प्रत्यवर्ति.ङ्गमिष्ठा-ऽहु र्विप्रासो अश्विना पुराजाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 आ मन्येथा.मागत.ङ्कच्चि.देवै- र्विश्वे जनासो अश्विना हवन्ते। इमा हि वा.ङ्गोर्ऋजीका मधूनि- प्र मित्रासो न ददु रुस्रो अग्रे।।

卐 तिरः पुरू चिदश्विना रजां-स्याङ्गूषो वां मघवाना जनेषु। एह यातं पथिभि र्देवयानै- र्दस्रा विमे वा न्निधयो मधूनाम्।।

❀03.04.04 卐पुराण.मोक.स्सख्यं शिवँ वाँ- युवो र्नरा द्रविण.ञ्जह्नाव्याम्। पुनः कृण्वाना.स्सख्या शिवानि -मध्वा मदेम सह नूँ समानाः।।

卐 अश्विना वायुना युवं सुदक्षा- नियुद्भिश्च सजोषसा युवाना। नासत्या तिरोअह्न्य.ञ्जुषाणा- सोमं पिबत .मस्रिधा सुदानूँ।।

卐 अश्विना परि वामिषः पुरूची- रीयु र्गीर्भि र्यतमाना॒ अमृध्राः। रथो ह वामृतजा॒ अद्रिजूतः- परि द्यावापृथिवी॒ याति सद्यः।।

卐 अश्विना मधुषुत्तमो युवाकु-स्सोम.स्तं पात .मागत.न्दुरोणे। रथो ह वां भूरि वर्पः करिक्र-त्सुतावतो निष्कृत.मागमिष्ठः।।

3.59मित्रो जनानिति नवर्चस्य सूक्तस्य, गाथिनो विश्वामित्रो- मित्र-स्त्रिष्टुप्-अन्त्याश्चतस्रो गायत्र्यः।।

❀03.04.05 卐मित्रो जना.न्यातयति ब्रुवाणो- मित्रो दाधार पृथिवी.मुत द्याम्। मित्रः कृष्टी रनिमिषाऽभि चष्टे- मित्राय हव्य.ङ्घृतव.ज्जुहोत।।

卐 प्र स मित्र मर्तो अस्तु प्रयस्वा-न्यस्त आदित्य शिक्षति व्रतेन। न हन्यते न जीयते त्वोतो- नैन.मंहो अश्नो.त्यन्तितो न दूरात्।।

卐 अनमीवास॒ इळया मदन्तो- मितज्ञवो वरिम.न्नापृथिव्याः। आदित्यस्य व्रत.मुपक्षियन्तो- वयं मित्रस्य सुमतौ स्याम।।

卐 अयं मित्रो नमस्य.स्सुशेवो- राजा सुक्षत्रो अजनिष्ट वेधाः। तस्य वयं सुमतौ यज्ञिय-स्यापि भद्रे सौमनसे स्याम।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 महा९ आदित्यो नम.सोपसद्यो- यातयज्जनो गृणते सुशेवः। तस्मा एत.त्पन्यतमाय जुष्ट-मग्नौ मित्राय हविरा जुहोत।।

❀03.04.06 卐मित्रस्य चर्षणीधृतो-ऽवो देवस्य सानसि। द्युम्न.श्चित्रश्रवस्तमम्।।

卐 अभि यो महिना दिवं- मित्रो बभूव सप्रथाः। अभि श्रवोभिः पृथिवीम्।।

卐 मित्राय पञ्च येमिरे- जना अभिष्टिशवसे। स देवा.न्विश्वा.न्बिभर्ति।।

卐 मित्रो देवे.ष्वायुषु- जनाय वृक्तबर्हिषे। इष इष्टव्रता अकः~।।

3.60 इहेह व इति सप्तर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- ऋभवः-अन्त्यानां तिसृणामिन्द्र- ऋभवो-जगती।।

❀03.04.07 卐इहेह वो मनसा बन्धुता नर- उशिजो जग्मु रभि तानि वेदसा। याभि मायाभिः प्रतिजूतिवर्पस-स्सौधन्वना यज्ञियं भाग.मानश।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 याभि.श्शचीभि श्चमसा९ अपिंशत- यया धिया गामरिणीत चर्मणः। येन हरी~ मनसा निरतक्षत-तेन देवत्व.मृभव.स्समानश।।

卐 इन्द्रस्य सख्य.मृभव.स्समानशु- र्मनो र्नपातो अपसो दधन्विरे। सौधन्वनासो अमृतत्व.मेरिरे- विष्ट्वी शमीभि.स्सुकृत स्सुकृत्यया।।

卐 इन्द्रेण याथ सरथं सुते सचा९- अथो~ वशानां भवथा सह श्रिया। न वः प्रतिमै सुकृतानि वाघत-स्सौधन्वना ऋभवो वीर्याणि च।।

卐 इन्द्र ऋभुभि र्वाजवद्भि.स्समुक्षितं- सुतं सोम.मावृषस्वा गभस्त्योः। धियेषितो मघव.न्दाशुषो गृहे-सौधन्वनेभि.स्सह मत्स्वा नृभिः।।

卐 इन्द्र ऋभुमा.न्वाजवा.न्मत्स्वेह नो-ऽस्मि.न्त्सवने शच्या पुरुष्टुत। इमानि तुभ्यं स्वसराणि येमिरे - व्रता देवानां मनुष.श्च धर्मभिः।।

卐 इन्द्र ऋभुभि र्वाजिभि र्वाजय.न्निह- स्तोम.ञ्जरितु रुप याहि यज्ञियम्। शत.ङ्केतेभि रिषिरेभि रायवे-सहस्रणीथो अध्वरस्य होमनि।।

☬ 3.61 उषो वाजेनेति सप्तर्चस्य सूक्तस्य, गाथिनो विश्वामित्र- उषा-स्त्रिष्टुप्।।

❀03.04.08 卐उषो वाजेन वाजिनि प्रचेता-स्स्तोम.ञ्जुषस्व गृणतो मघोनि। पुराणी देवि युवतिः पुरन्धि- रनु व्रत.ञ्चरसि विश्ववारे।।

卐 उषो देव्यमर्त्या वि भाहि- चन्द्ररथा सूनृता^ ईरयन्ती। आ त्वा वहन्तु सुयमासो अश्वा^- हिरण्यवर्णां पृथुपाजसो ये।।

卐 उषः प्रतीची भुवनानि वि-श्वोर्ध्वा तिष्ठ.स्यमृतस्य केतुः। समान.मर्थ.ञ्चरणीयमाना- चक्रमिव नव्य.स्या ववृत्स्व।।

卐 अव स्यूमेव चिन्वती मघो-न्युषा^ याति स्वसरस्य पत्नी। स्व1(अ)र्जनन्ती सुभगा सुदंसा^- आऽन्ता द्दिवः पप्रथ आ पृथिव्याः।।

卐 अच्छा वो देवी.मुषसँ विभातीं- प्र वो भरध्व.न्नमसा सुवृक्तिम्। ऊर्ध्वं.मधुधा दिवि पाजो अश्रे-त्प्र रोचना रुरुचे रण्वसन्दृक्।।

卐 ऋतावरी दिवो अर्कै रबो-ध्या रेवती रोदसी चित्र.मस्थात्। आयती.मग्न उषसँ विभातीँ- वाम.मेषि द्रविणं भिक्षमाणः।।

卐 ऋतस्य बुध्न उषसा.मिषण्य-न्वृषा मही~ रोदसी आ विवेश। मही मित्रस्य वरुणस्य माया- चन्द्रेव भानुँ वि दधे पुरुत्रा।।

☬ 3.62 इमा उ वामित्यष्टादशर्चस्य सूक्तस्य, गाथिनो विश्वामित्रः-(अन्त्यतृचस्य जमदग्निर्वा) आद्यतिसृणामिन्द्रावरुणौ-चतुर्थ्यादि तिसृणां बृहस्पतिः-इयन्त इत्यादि तिसृणां पूषा-तत्सवितुरित्यादि तिसृणां सविता-सोम इत्यादि तिसृणां सोम-आ न इत्यादि तिसृणां मित्रावरुणौ देवताः-आद्या स्तिस्त्रस्त्रिष्टुभः-शिष्टाः पञ्चदश गायत्र्यः।।

❀03.04.09 卐इमा^ उ वां भृमयो मन्यमाना^- युवावते न तुज्या^ अभूवन्न्। क्व1(अ)त्यदिन्द्रावरुणा यशो वाँ- येन स्मा सिनं भरथ.स्सखिभ्यः।।

卐 अयमु वां पुरुतमो रयीय-ञ्छश्वत्तम.मवसे जोहवीति। सजोषा विन्द्रावरुणा मरुद्भि- र्दिवा पृथिव्या श्रृणुतं हवं मे।।

卐 अस्मे तदिन्द्रावरुणा वसुष्या-दस्मे रयि र्मरुत स्सर्ववीरः। अस्मा.न्वरूत्री श्शरणै रव-न्त्वस्मा .न्होत्रा भारती दक्षिणाभिः।।

卐 बृहस्पते जुषस्व नो- हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे।।

卐 शुचि.मर्कै र्बृहस्पति-मध्वरेषु नमस्यत। अना.म्योज^ आ चके।।

❀03.04.10 卐वृषभ.ञ्चर्षणीनाँ- विश्वरूप.मदाभ्यम्। बृहस्पतिँ वरेण्यम्।।

卐 इय.न्ते पूष.न्नाघृणे- सुष्टुति र्देव नव्यसी। अस्माभि स्तुभ्यं शस्यते।।

卐 ता.ञ्जुषस्व गिरं मम- वाजयन्ती.मवा धियम्। वधूयुरिव योषणाम्।।

卐 यो विश्वाऽभि विपश्यति- भुवना स.ञ्च पश्यति। स नः पूषाऽविता भुवत्।।

卐 तत्सवितु र्वरेण्यं- भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

❀03.04.11 卐देवस्य सवितु र्वयँ- वाजयन्तः पुरन्ध्या। भगस्य राति.मीमहे।।

卐 देव.न्नर.स्सवितारँ- विप्रा^ यज्ञै.स्सुवृक्तिभिः। नमस्यन्ति धियेषिताः।।

卐 सोमो जिगाति गातुवि-द्देवाना.मेति निष्कृतम्। ऋतस्य योनि.मासदम्।।

卐 सोमो अस्मभ्य.न्द्विपदे- चतुष्पदे च पशवे। अनमीवा^ इष.स्करत्।।

卐 अस्माक.मायु र्वर्धय-न्नभिमाती.स्सहमानः। सोम स्सधस्थ.माऽसदत्।।

卐 आ नो मित्रावरुणा- घृतै र्गव्यूति.मुक्षतम्। मध्वा रजांसि सुक्रतू~।।

卐 उरुशंसा नमोवृधा- मह्ना दक्षस्य राजथः। द्राघिष्ठाभि श्शुचिव्रता।।

卐 गृणाना जमदग्निना- योना वृतस्य सीदतम्। पातं सोम.मृतावृधा।। 卐 इति तृतीयं मण्डलम्।।

विश्वेश्वराय नमः .....

## ॐ चतुर्थं मण्डलम्।

4.01 त्वां ह्यग्न इति विंशत्यृचस्य सूक्तस्य, गौतमो वामदेवोऽग्नि-र्द्वितीयादि चतसृणामग्निवरुणौ-त्रिष्टुप्-आद्यास्तिस्रः क्रमेणाष्ट्यतिजगतीधृतयः।।

03.04.12 त्वां ह्यग्ने सदमि.त्समन्यवो- देवासो देव.मरति.न्न्येरिर -इति क्रत्वा.न्येरिरे। अमर्त्यँ यजत मर्त्ये.ष्वा- देव.मादेव.ञ्जनत प्रचेतसँ- विश्व.मादेव.ञ्जनत प्रचेतसम्।।

स भ्रातरँ वरुण.मग्न आ ववृत्स्व- देवाँ अच्छा सुमती यज्ञवनस.ञ्ज्येष्ठँ यज्ञवनसम्। ऋतावान.मादित्य.ञ्चर्षणीधृतं- राजान.ञ्चर्षणीधृतम्।।

सखे सखाय.मभ्या ववृ-त्स्वाशु.न्न चक्रं रथ्येव रंह्या-ऽस्मभ्य.न्दस्म रंह्या। अग्ने मृळीकँ वरुणे सचा विदो- मरुत्सु विश्वभानुषु। तोकाय तुजे शुशुचान शङ्कृ-ध्यस्मभ्य.न्दस्म शङ्कृधि।।

त्वन्नो अग्ने वरुणस्य विद्वा-न्देवस्य हेळोऽव यासिसीष्ठाः। यजिष्ठो वह्नितम.श्शोशुचानो- विश्वा द्वेषांसि प्र मुमु.ग्ध्यस्मत्।।

स त्व.न्नो अग्नेऽवमो भवोती- नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणं रराणो- वीहि मृळीकं सुहवो न एधि।।

03.04.13 अस्य श्रेष्ठा सुभगस्य सन्दृ-ग्देवस्य चित्रतमा मर्त्येषु। शुचि घृत.न्न तप्त.मघ्न्याया-स्स्पार्हा देवस्य मंहनेव धेनोः।।

त्रिरस्य ता परमा सन्ति सत्या- स्पार्हा देवस्य जनिमा.न्यग्नेः। अनन्ते अन्तः परिवीत आऽगा-च्छुचि .श्शुक्रो अर्यो रोरुचानः।।

स दूतो विश्वे.दभि वष्टि सद्मा-होता हिरण्यरथो रंसुजिह्वः। रोहिदश्वो वपुष्यो विभावा- सदा रण्वः पितुमतीव संसत्।।

स चेतय.न्मनुषो यज्ञबन्धुः- प्र तं मह्या रशनया नयन्ति। स क्षेत्यस्य दुर्यासु साध-न्देवो मर्तस्य सधनित्व.माप।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स तू नो अग्नि र्नयतु प्रजान-न्नच्छा रत्न.न्देवभक्तँ यदस्य। धिया यद्विश्वे अमृता अकृण्व-न्द्यौष्पिता जनिता सत्य.मुक्षन्न्।।

❀03.04.14 卐स जायत प्रथमः पस्त्यासु- महो बुध्ने रजसो अस्य योनौ। अपा.दशीर्षा गुहमानो अन्ता-ऽयोर्युवानो वृषभस्य नीळे।।

卐 प्र शर्ध आर्त प्रथमँ विपन्याऽ- ऋतस्य योना वृषभस्य नीळे। स्पार्हो युवा वपुष्यो विभावा- सप्त प्रियासोऽजनयन्त वृष्णे।।

卐 अस्माक.मत्र पितरो मनुष्या अभि प्र सेदुर् ऋत.माशुषाणाः। अश्मव्रजा.स्सुदुघा वव्रे अन्त-रुदुस्रा आज.न्नुषसो हुवानाः।।

卐 ते मर्मृजत ददृवांसो अद्रि-न्तदेषामन्ये अभितो वि वोचन्न्। पश्वयन्त्रासो अभि कार.मर्च-न्विदन्त ज्योति श्चकृपन्त धीभिः।।

卐 ते गव्यता मनसा दृध्र.मुब्ध-ङ्गा येमानं परिषन्तमद्रिम्। दृळ्ह.न्नरो वचसा दैव्येन- व्रज.ङ्गोमन्त .मुशिजो वि वव्रुः~।।

❀03.04.15 卐ते मन्वत प्रथम.न्नाम धेनो- स्त्रि.स्सप्त मातुः परमाणि विन्दन्न्। तज्जानती रभ्यनूषत व्रा- आवि र्भुव.दरुणी यशसा गोः।।

卐 नेश.त्तमो दुधितं रोचत द्यौ-रुद्देव्या उषसो भानु रर्त। आ सूर्यो बृहत.स्तिष्ठ.दज्राऽ- ऋजु मर्तेषु वृजिना च पश्यन्न्।।

卐 आदि.त्पश्चा बुबुधाना व्यख्य-न्नादि.द्रत्न.न्धारयन्त द्युभक्तम्। विश्वे विश्वासु दुर्यासु देवा-मित्र धिये वरुण सत्य.मस्तु।।

卐 अच्छा वोचेय शुशुचान.मग्निं- होतारँ विश्वभरसँ यजिष्ठम्। शुच्यूधो अतृणन्न गवा-मन्धो न पूतं परिषिक्त.मंशोः।।

卐 विश्वेषा.मदिति र्यज्ञियानाँ- विश्वेषा.मतिथि र्मानुषाणाम्। अग्नि र्देवाना.मव आवृणान- स्सुमृळीको भवतु जातवेदाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

4.02 यो मर्त्येष्विति विंशत्यृचस्य सूक्तस्य, गौतमो वामदेवोऽग्नि- स्त्रिष्टुप्।।

❀03.04.16 卐यो मर्त्ये.ष्वमृत^ ऋतावा देवो देवे-ष्वरति र्निधायि। होता यजिष्ठो मह्ना शुचध्यै- हव्यै रग्नि र्मनुष^ ईरयध्यै।।

卐 इह त्वं सूनो~ सहसो नो अद्य- जातो जाता॰ उभया॰ अन्त रग्ने। दूत^ ईयसे युयुजान^ ऋष्व ^- ऋजुमुष्का.न्वृषण.श्शुक्राँ.श्च।।

卐 अत्या वृधस्नू~ रोहिता घृतस्नू~- ऋतस्य मन्ये मनसा जविष्ठा। अन्त रीयसे अरुषा युजानो- युष्माँश्च देवा.न्विश^ आ च मर्तान्।।

卐 अर्यमणँ वरुणं मित्र.मेषा-मिन्द्राविष्णू~ मरुतो अश्वि.नोत। स्वश्वो अग्ने सुरथ स्सुराधा- एदु वह सुहविषे जनाय।।

卐 गोमा॰ अग्नेऽविमा॰ अश्वी यज्ञो- नृव.त्सखा सदमि.दप्रमृष्यः। इळावा॰ एषो असुर प्रजावा.न्दीर्घो रयिः पृथुबुध्न.स्सभावान्।।

❀03.04.17 卐यस्त इध्म.ञ्जभर. त्सिष्विदानो- मूर्धानँ वा ततपते त्वाया। भुव.स्तस्य स्वतवा॰ः पायु रग्ने- विश्वस्मा.त्सी.मघायत^ उरुष्य।।

卐 यस्ते भरा.दन्नियते चिदन्न-न्निशिष.न्मन्द्र.मतिथि.मुदीरत्। आ देवयु रिनधते दुरोणे- तस्मि.न्रयि र्ध्रुवो अस्तु दास्वान्।।

卐 यस्त्वा दोषा य^ उषसि प्रशंसा-त्प्रियँ वा त्वा कृणवते हविष्मान्। अश्वो न स्वे दम आ हेम्यावा-न्तमंहसः पीपरो दाश्वांसम्।।

卐 यस्तुभ्य.मग्ने अमृताय दाश-दुव.स्त्वे कृणवते यतस्रुक्। न स राया शशमानो वि योष-न्नैन.मंहः परि वर.दघायोः।।

卐 यस्य त्वमग्ने अध्वर.ञ्जुजोषो- देवो मर्तस्य सुधितं रराणः। प्रीते.दस.द्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः।।

❀03.04.18 卐चित्ति.मचित्ति.श्चिनव.द्वि विद्वा-न्पृष्ठेव वीता वृजिना च मर्तान्। राये च न स्स्वपत्याय देव- दितिश्च रास्वादिति मुरुष्य।।

卐 कविं शशासुः कवयोऽदब्धा- निधारयन्तो दुर्यास्वायोः। अतस्त्व.न्दृश्या॰ अग्न एता-न्पड्भिः पश्ये रद्भुता॰ अर्य एवैः।।

卐 त्वमग्ने वाघते सुप्रणीति-स्सुतसोमाय विधते यविष्ठ। रत्नं भर शशमानाय घृष्वे- पृथु श्चन्द्र.मवसे चर्षणिप्राः।।

卐 अधा ह यद्वय.मग्ने त्वाया- पड्भि र्हस्तेभि श्चकृमा तनूभिः। रथ.न्न क्रन्तो अपसा भुरिजो-र् ऋतं येमु स्सुध्य आशुषाणाः।।

卐 अधा मातु रुषस.स्सप्त विप्रा- जायेमहि प्रथमा वेधसो नॄन्। दिव.स्पुत्रा अङ्गिरसो भवे-माद्रिं रुजेम धनिनं शुचन्तः।।

❀03.04.19 卐अधा यथा नः पितरः परासः- प्रत्नासो अग्न ऋत.माशुषाणाः। शुचीदय.न्दीधिति मुक्थशासः॰- क्षामा भिन्दन्तो अरुणी रप व्रन्न्।।

卐 सुकर्माण.स्सुरुचो देवयन्तो-ऽयो न देवा जनिमा धमन्तः। शुचन्तो अग्निं ववृधन्त इन्द्र-मूर्व.ङ्गव्यं परिषदन्तो अग्मन्न्।।

卐 आ यूथेव क्षुमति पश्वो अख्य-द्देवानाँ यज्जनिमा.न्त्युग्र। मर्ताना.श्चिदुर्वशी रकृप्र-न्वृधे चिदर्य उपरस्याऽऽयोः।।

卐 अकर्म ते स्वपसो अभूम- ऋत.मवस्त्र.न्नुषसो विभातीः। अनून.मग्निं पुरुधा सुश्चन्द्र-न्देवस्य मर्मृजत श्चारु चक्षुः।।

卐 एता ते अग्न उचथानि वेधो-ऽवोचाम कवये ता जुषस्व। उच्छोचस्व कृणुहि वस्यसो नो- महो रायः पुरुवार प्र यन्धि।।

4.03आ वो राजानमिति षोडशर्चस्य सूक्तस्य, गौतमो वामदेव- आद्याया रुद्रो- द्वितीयाऽऽदीनामग्नि- स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀03.04.20 卐☞आ वो राजान.मध्वरस्य रुद्रं- होतारं सत्ययजं रोदस्योः। अग्निं पुरा तनयित्नो रचित्ता- द्धिरण्यरूप.मवसे कृणुध्वम्।।

卐 अयँ योनि.श्चकृमा यँ वय.न्ते- जायेव पत्य उशती सुवासाः। अर्वाचीनः परिवीतो नि षी-देमा^ उ ते स्वपाक प्रतीचीः।।

卐 आश्रृण्वते अदृपिताय मन्म- नृचक्षसे सुमृळीकाय वेधः। देवाय शस्ति.ममृताय शंस- ग्रावेव सोता मधुषु.द्यमीळे।।

卐 त्व.श्चिन्न.श्शम्या^ अग्ने अस्या^-ऋतस्य बोध्यृतचि.त्स्वाधीः। कदा त उक्था सधमाद्यानि- कदा भवन्ति सख्या गृहे ते।।

卐 कथा ह तद्वरुणाय त्वमग्ने- कथा दिवे गर्हसे कन्न^ आगः। कथा मित्राय मीळ्हुषे पृथिव्यै- ब्रवः कदर्यम्णे कद्भगाय।।

❀03.04.21 卐☞कद्धिष्ण्यासु वृधसानो अग्ने- कद्वाताय प्रतवसे शुभँये। परिज्मने नासत्याय क्षे- ब्रवः कदग्ने रुद्राय नृघ्ने।।

卐 कथा महे पुष्टिंभराय पूष्णे- कद्रुद्राय सुमखाय हविर्दे। कद्विष्णव उरुगायाय रेतो- ब्रवः कदग्ने शरवे बृहत्यै।।

卐 कथा शर्धाय मरुता.मृताय- कथा सूरे बृहते पृच्छ्यमानः। प्रति ब्रवोऽदितये तुराय -साधा दिवो जातवेद श्चिकित्वान्।।

卐 ऋतेन ऋत.न्नियत.मीळ आ गो -रामा सचा मधुम.त्पक्व.मग्ने। कृष्णा सती रुशता धासि.नैषा- जामर्येण पयसा पीपाय।।

卐 ऋतेन हि ष्मा वृषभ श्चिदक्तः- पुमाँ अग्निः पयसा पृष्ठ्येन। अस्पन्दमानो अचर.द्वयोधा^- वृषा शुक्र .न्दुदुहे पृश्नि रूधः।।

❀03.04.22 卐ऋतेनाद्रिँ व्यस.न्भिदन्त-स्समङ्गिरसो नवन्त गोभिः। शुन.न्नरः परिषद.न्नुषास-माविस्स्व रभव.ज्जाते अग्नौ।।

卐 ऋतेन देवी रमृता^अमृक्ता^-अर्णोभि रापो मधुमद्भि रग्ने। वाजी न सर्गेषु प्रस्तुभानः- प्र सदमि .त्स्रवितवे दधन्युः।।

卐 मा कस्य यक्षं सद.मिद्धुरो गा^- मा वेशस्य प्रमिनतो माऽपेः। मा भ्रातु रग्ने अनृजोर् ऋणँ वे- र्मा सख्यु र्दक्षं रिपो र्भुजेम।।

卐 रक्षा णो अग्ने तव रक्षणेभी -रारक्षाण.स्सुमख प्रीणानः। प्रति स्फुर वि रुज वीड्वंहो- जहि रक्षो महि चिद्वावृधानम्।।

卐 एभि र्भव सुमना^ अग्ने अर्कै- रिमा.न्त्स्पृश मन्मभि श्शूर वाजान्। उत ब्रह्मा.ण्यङ्गिरो जुषस्व- स.न्ते शस्ति र्देववाता जरेत।।

卐 एता विश्वा विदुषे तुभ्यँ वेधो- नीथा.न्यग्ने निण्या वचांसि। निवचना कवये काव्या-न्यशंसिषं मतिभि र्विप्र^ उक्थैः।।

4.04 कृणुष्वेति पञ्चदशर्चस्य सूक्तस्य, गौतमो वामदेवो- रक्षोहाऽग्नि-स्त्रिष्टुप्।।

❀03.04.23 卐कृणुष्व पाजः प्रसितिं.न्न पृथ्वीँ- याहि राजेवामवा इभेन। तृष्वी.मनु प्रसितिं .न्द्रूणानो-ऽस्ताऽसि विध्य रक्षस.स्तपिष्ठैः।।

卐 तव भ्रमास^ आशुया पत-न्त्यनु स्पृश धृषता शोशुचानः। तपूं.ष्यग्ने जुह्वा पतङ्गा-नसन्दितो वि सृज विष्वगुल्काः।।

卐 प्रति स्पशो वि सृज तूर्णितमो- भवा पायु र्विशो अस्या ^अदब्धः। यो नो दूरे अघशंसो यो अ-न्त्यग्ने माकिष्टे व्यथिरा दधर्षीत्।।

卐 उदग्ने तिष्ठ प्रत्या तनुष्व- न्य1(अ)मित्रा ओषता.त्तिग्महेते। यो नो अरातिं समिधान चक्रे -नीचा त .न्धक्ष्यतस.न्न शुष्कम्।।

卐 ऊर्ध्वो भव प्रति विध्या.ध्यस्म-दावि.ष्कृणुष्व दैव्या.न्यग्ने। अव स्थिरा तनुहि यातुजूना-ञ्जामि.मजामिं प्र मृणीहि शत्रून्।।

❀03.04.24 卐स ते जानाति सुमतिँ यविष्ठ- य^ ईवते ब्रह्मणे गातु.मैरत्। विश्वा.न्यस्मै सुदिनानि रायो- द्युम्ना.न्यर्यो वि दुरो अभि द्यौत्।।

卐 सेदग्ने अस्तु सुभग.स्सुदानु- यस्त्वा नित्येन हविषा य^ उक्थैः। पिप्रीषति स्व आयुषि दुरोणे- विश्वे.दस्मै सुदिना साऽसदिष्टिः।।

卐 अर्चामि ते सुमति.ङ्घोष्यर्वा-क्सन्ते वावाता जरता.मियङ्गीः। स्वश्वास्त्वा सुरथा मर्जये-मास्मे क्षत्राणि धारये रनु द्यून्।।

卐 इह त्वा भूर्या चरेदुपत्म-न्दोषावस्त र्दीदिवांस.मनु द्यून्। क्रीळन्त.स्त्वा सुमनस.स्सपे-माभि.द्युम्ना तस्थिवांसो जनानाम्।।

卐 यस्त्वा स्वश्व.स्सुहिरण्यो अग्न- उपयाति वसुमता रथेन। तस्य त्राता भवसि तस्य सखा- यस्त आतिथ्य.मानुष.ग्जुजोषत्।।

❀03.04.25 卐महो रुजामि बन्धुता वचोभि- स्तन्मा पितु र्गोतमा.दन्वियाय। त्व.न्नो अस्य वचस .श्चिकिद्धि- होत र्यविष्ठ सुक्रतो~ दमूनाः।।

卐 अस्वप्नज.स्तरणय.स्सुशेवा^- अतन्द्रासोऽवृका ^अश्रमिष्ठाः। ते पायव.स्सध्र्यञ्चो निष-द्याग्ने तव नः पान्त्वमूर।।

卐 ये पायवो मामतेयन्ते अग्ने- पश्यन्तो अन्ध.न्दुरिता.दरक्षन्। ररक्ष तान्त्सुकृतो विश्ववेदा- दिप्सन्त^ इद्रिपवो नाह देभुः।।

卐 त्वया वयं सधन्य1(अ)स्त्वोता-स्तव प्रणी.त्यश्याम वाजान्। उभा शंसा सूदय सत्यताते-ऽनुष्ठुया कृणु.ह्यह्रयाण।।

卐 अया ते अग्ने समिधा विधेम- प्रति स्तोमं शस्यमान.ङ्गृभाय। दहाशसो रक्षसः पाह्य1(अ)स्मा-न्द्रुहो निदो मित्रमहो अवद्यात्।। ।। इति चतुर्थोध्याय स्समाप्तः ।।

ॐतृतीयाष्टके पञ्चमाध्यायः। (वर्गाः 1-26)।।

4.05 वैश्वानरायेति पञ्चदशर्चस्य सूक्तस्य, गौतमो वामदेवो- वैश्वानरोऽग्नि-स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀03.05.01 卐वैश्वानराय मी॒ळ्हुषे सजोषाः- कथा दाशे.माग्नये बृहद्भाः। अनूनेन बृहता वक्षथे-नोप स्तभाय.दुपमि.न्न रोधः।।

卐 मा निन्दत य^ इमां मह्यं राति-न्देवो ददौ मर्त्याय स्वधावान्। पाकाय गृत्सो अमृतो विचेता ^- वैश्वानरो नृतमो यह्वो अग्निः।।

卐 साम द्विबर्हा महि तिग्मभृष्टि- स्सहस्ररेता^ वृषभ.स्तुविष्मान्। पद.न्न गोरपगू॒ळ्हँ विविद्वा-नग्नि मह्यं प्रेदु वोच.न्मनीषाम्।।

卐 प्र ता॰ अग्नि र्बभस.त्तिग्मजम्भ-स्तपिष्ठेन शोचिषा य.स्सुराधाः। प्र ये मिनन्ति वरुणस्य धाम- प्रिया मित्रस्य चेततो ध्रुवाणि।।

卐 अभ्रातरो न योषणो व्यन्तः- पतिरिपो न जनयो दुरेवाः। पापास.स्सन्तो अनृता^ असत्या^-इदं पद .मजनता गभीरम्।।

❀03.05.02 卐इदं मे अग्ने कियते पाव-कामिनते गुरुं भार.न्न मन्म। बृह.द्दधाथ धृषता गभीरँ- यह्वं पृष्ठं प्रयसा सप्तधातु।।

卐 तमिन्न्वे3(ए)व समना समान-मभि क्रत्वा पुनती धीति रश्याः। ससस्य चर्म.न्नधि चारु पृश्ने- रग्रे रुप आरुपित.ञ्जबारु।।

卐 प्रवाच्यँ वचसः किं मे अस्य- गुहा हित.मुप निणि.ग्वदन्ति। यदुस्रियाणा.मप वारिव व्र-न्पाति प्रियं रुपो अग्रं पदँ वेः~।।

卐 इदमु त्यन्महि महा.मनीकँ- यदुस्रिया सचत पूर्व्य.ङ्गौः। ऋतस्य पदे अधि दीद्यान-ङ्गुहारघुष्य.द्रघुय .द्विवेद।।

卐 अध द्युतानः पित्रो स्स चासा-ऽमनुत गुह्य.ञ्चारु पृश्नेः। मातु.ष्पदे परमे अन्ति षद्गो-र्वृष्ण.श्शोचिषः प्रयतस्य जिह्वा।।

❀03.05.03 卐ऋतं वोचे नमसा पृच्छ्यमान-स्तवाशसा जातवेदो यदीदम्। त्वमस्य क्षयसि यद्ध विश्व- न्दिवि यदु द्रविणँ यत्पृथिव्याम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 कि.न्नो अस्य द्रविण.ङ्कद्ध रत्नँ- वि नो वोचो जातवेद श्चिकित्वान्। गुहाऽध्वनः परमँ यन्नो अस्य- रेकु पद.न्न निदाना^ अगन्म।।

卐 का मर्यादा वयुना कद्ध वाम-मच्छा गमेम रघवो न वाजम्। कदा नो देवी रमृतस्य पत्नी- स्सूरो वर्णेन ततन.न्नुषासः।।

卐 अनिरेण वचसा फल्ग्वेन- प्रतीत्येन कृधुना तृपासः। अधा ते अग्ने किमिहा वद-न्त्यनायुधास आसता सचन्ताम्।।

卐 अस्य श्रिये समिधानस्य वृष्णो- वसो रनीक.न्दम आ रुरोच। रुश.द्वसान.स्सुदृशीकरूपः -≈ क्षिति र्न राया पुरुवारो अद्यौत्।।

4.06 ऊर्ध्व ऊ षु ण इत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्नि-स्त्रिष्टुप्।।

❀03.05.04 卐ऊर्ध्व ऊषु णो अध्वरस्य होत- रग्ने तिष्ठ देवताता यजीयान्। त्वं हि विश्व.मभ्यसि मन्म- प्र वेधस.श्चि त्तिरसि मनीषाम्।।

卐 अमूरो होता न्यसादि विक्ष्व-1(अ)ग्नि र्मन्द्रो विदथेषु प्रचेताः। ऊर्ध्वं भानुं सवितेवाश्रे-न्मेतेव धूमं स्तभाय.दुप द्याम्।।

卐 यता सुजूर्णी रातिनी घृताची- प्रदक्षिणि.द्देवताति.मुराणः। उदु स्वरु र्नवजा^ नाक्रः- पश्वो अनक्ति सुधित.स्सुमेकः।।

卐 स्तीर्णे बर्हिषि समिधाने अग्ना -ऊर्ध्वो अध्वर्यु र्जुजुषाणो अस्थात्। पर्यग्निः पशुपा^ न होता- त्रिवि.ष्ट्येति प्रदिव^ उराणः।।

卐 परि त्मना मितद्रु रेति होता-ऽग्नि र्मन्द्रो मधुवचा^ ऋतावा। द्रव.न्त्यस्य वाजिनो न शोका^- भयन्ते विश्वा भुवना यदभ्राट्।।

❀03.05.05 卐भद्रा ते अग्ने स्वनीक सन्द-ग्घोरस्य सतो विषुणस्य चारुः। न यत्ते शोचि स्तमसा वरन्त- न ध्वस्मान.स्तन्वी3(ई) रेप^ आ धुः~।।

卐 न यस्य सातु जनितो रवारि- न मातरापितरा नू चिदिष्टौ। अधा मित्रो न सुधितः पावको-3(ओ)ऽग्नि दीदाय मानुषीषु विक्षु।।

卐 द्विर्यं पञ्च जीजन.न्त्सँवसाना-स्स्वसारो अग्निं मानुषीषु विक्षु। उषर्बुध.मथर्यो3(ओ)न दन्तं- शुक्रं स्वासं परशु.न्न तिग्मम्।।

卐 तव त्ये अग्ने हरितो घृतस्ना- रोहितास ऋज्वञ्च.स्स्वञ्चः। अरुषासो वृषण ऋजुमुष्का-आ देवताति .मह्वन्त दस्माः।।

卐 ये ह त्ये ते सहमाना अयास -स्त्वेषासो अग्ने अर्चय श्चरन्ति। श्येनासो न दुवसनासो अर्थ-न्तुविष्वणसो मारुत.न्न शर्धः।।

卐 अकारि ब्रह्म समिधान तुभ्यं- शंसा.त्युक्थँ यजते व्यू धाः। होतार.मग्निं मनुषो नि षेदु- र्नमस्यन्त उशिज.श्शंस.मायोः।।

4.07 अयमिहेत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्नि-स्त्रिष्टुप्-आद्या जगती-द्वितीयाद्याः पञ्चानुष्टुभः।।

❀03.05.06 卐अय.मिह प्रथमो धायि धातृभि- र्होता यजिष्ठो अध्वरे.ष्वीड्यः। यमप्नवानो भृगवो विरुरुचु- र्वनेषु चित्रँ विभ्वँ विशेविशे।।

卐 अग्ने कदा त आनुष-ग्भुव.द्देवस्य चेतनम्। अधा हि त्वा जगृभ्रिरे- मर्तासो विक्ष्वीड्यम्।।

卐 ऋतावानँ विचेतसं- पश्यन्तो द्यामिव स्तृभिः। विश्वेषा.मध्वराणां -हस्कर्तार.न्दमेदमे।।

卐 आशु.न्दूतँ विवस्वतो- विश्वा यश्चर्षणी रभि। आ जभ्रुः केतु.मायवो- भृगवाणँ विशेविशे।।

卐 तमीं होतार.मानुष-क्चिकित्वांस.न्नि षेदिरे। रण्वं पावकशोचिषँ -यजिष्ठं सप्त धामभिः।।

❀03.05.07 卐तं शश्वतीषु मातृषु- वन आ वीत.मश्रितम्। चित्रं सन्त.ङ्गुहा हितं-सुवेद.ङ्कूचिदर्थिनम्।।

卐 ससस्य यद्वियुता सस्मि.न्नूध-न्नृतस्य धाम.न्रणयन्त देवाः। महा२ अग्नि र्नमसा रातहव्यो- वेरध्वराय सदमि.दृतावा।।

卐 वेरध्वरस्य दूत्यानि विद्वा-नुभे~ अन्ता~ रोदसी सञ्चिकित्वान्। दूत^ ईयसे प्रदिव^ उराणो- विदुष्टरो दिव^ आरोधनानि।।

卐 कृष्ण.न्तं एम रुशतः पुरो भा- श्चरिष्ण्व1(अ)र्चि र्वपुषा.मिदेकम्। यदप्रवीता दधते ह गर्भं- सद्यश्चि.ज्जातो भवसी.दु दूतः।।

卐 सद्यो जातस्य ददृशान.मोजो- यदस्य वातो अनुवाति शोचिः। वृणक्ति तिग्मा.मतसेषु जिह्वां- स्थिरा चिदन्ना दयते वि जम्भैः।।

卐 तृषु यदन्ना तृषुणा ववक्ष- तृषु.न्दूत.ङ्कृणुते यह्वो अग्निः। वातस्य मेळिं सचते निजूर्व-न्नाशु.न्न वाजयते हिन्वे अर्वा।।

4.08 दूतँ व इत्यष्टर्चस्य सूक्तस्य, गौतमो वामदेवो- वैश्वानरोऽग्नि-र्गायत्री।।

❀03.05.08 卐दूतँ वो विश्ववेदसं- हव्यवाह.ममर्त्यम्। यजिष्ठ.मृञ्जसे गिरा।।

卐 स हि वेदा वसुधितिं- महा९ आरोधन.न्दिवः। स देवा९ एह वक्षति।।

卐 स वेद देव^ आनम-न्देवा९ ऋतायते दमे। दाति प्रियाणि चिद्वसु।।

卐 स होता सेदु दूत्य-ञ्चिकित्वा९ अन्त रीयते। विद्वा९ आरोधन.न्दिवः।।

卐 ते स्याम ये अग्नये -ददाशु र्हव्यदातिभिः। य ईं पुष्यन्त^ इन्धते।।

卐 ते राया ते सुवीर्यै -स्ससवांसो वि शृण्विरे। ये अग्ना दधिरे दुवः।।

卐 अस्मे रायो दिवेदिवे- सञ्चरन्तु पुरुस्पृहः। अस्मे वाजास ईरताम्।।

卐 स विप्र श्चर्षणीनां- शवसा मानुषाणाम्। अति क्षिप्रेव विध्यति।।

4.09 अग्ने मृळेत्यष्टर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्नि-र्गायत्री।।

❀03.05.09 卐अग्ने मृळ महा९ असि- य^ ईमा देवयु.ञ्जनम्। इयेथ बर्हि रासदम्।।

卐 स मानुषीषु दूळभो- विक्षु प्रावी रमर्त्यः। दूतो विश्वेषां भुवत्।।

卐 स सद्म परिणीयते- होता मन्द्रो दिविष्टिषु। उत पोता नि षीदति।।

卐 उत ग्ना^ अग्नि रध्वर- उतो~ गृहपति र्दमे। उत ब्रह्मा नि षीदति।।

卐 वेषि ह्यध्वरीयता-मुपवक्ता जनानाम्। हव्या च मानुषाणाम्।।

卐 वेषी.द्वस्य दूत्य1(अँ)- यस्य जुजोषो अध्वरम्। हव्यं मर्तस्य वोऌहवे।।

卐 अस्माक.ञ्जोष्यध्वर-मस्माकँ यज्ञ.मङ्गिरः। अस्माकं शृणुधी हवम्।।

卐 परि ते दूळभो रथो-ऽस्माँ अश्नोतु विश्वतः। येन रक्षसि दाशुषः।।

4.10 अग्ने तमद्येत्यष्टर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्निः- पदपङ्क्तिः-पञ्चमी महापदपङ्क्तिः-अन्त्ये द्वे उष्णिहौ।।

❀03.05.10 卐अग्ने तमद्याश्व.न्न स्तोमैः- क्रतु.न्न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः।।

卐 अधा ह्यग्ने क्रतो र्भद्रस्य- दक्षस्य साधोः। रथीर् ऋतस्य बृहतो बभूथ।।

卐 एभिर्नो अर्कै र्भवा नो अर्वाङ्- स्व1(अ)र्ण ज्योतिः। अग्ने विश्वेभि स्सुमना अनीकैः।।

卐 आभिष्टे अद्य गीर्भि र्गृणन्तो-ऽग्ने दाशेम। प्र ते दिवो न स्तनयन्ति शुष्माः।।

卐 तव स्वादिष्ठाऽग्ने सन्दृष्टि- रिदा चिदह्न इदा चिदक्तोः। श्रिये रुक्मो न रोचत उपाके।।

卐 घृत.न्न पूत.न्तनू ररेपा-श्शुचि हिरण्यम्। तत्ते रुक्मो न रोचत स्वधावः।।

卐 कृत.ञ्चिद्धि ष्मा सनेमि द्वेषो-ऽग्न इनोषि मर्तात्। इत्था यजमाना.दृतावः।।

卐 शिवा न स्सख्या सन्तु भ्रात्रा-ऽग्ने देवेषु युष्मे। सा नो नाभि स्सदने सस्मि.न्नूधन्न्।।

4.11 भद्रन्त इति षडृचस्य सूक्तस्य, गौतमो वामदेवोऽग्नि- स्त्रिष्टुप्।।

❀03.05.11 卐भद्र.न्ते अग्ने सहसि.न्ननीक-मुपाक आ रोचते सूर्यस्य। रुश.द्दृशे ददृशे नक्तया चि-दरूक्षित.न्दृश आ रूपे अन्नम्।।

卐 वि षाह्यग्ने गृणते मनीषा-ङ्खं वेपसा तुविजात स्तवानः। विश्वेभिर्य द्वावन श्शुक्र देवै-स्तन्नो रास्व सुमहो भूरि मन्म।।

卐 त्वदग्ने काव्या त्वन्मनीषा-स्त्वदुक्था जायन्ते राध्यानि। त्वदेति द्रविणँ वीरपेशा इत्थाधिये दाशुषे मर्त्याय।।

卐 त्वद्वाजी वाजंभरो विहाया^- अभिष्टिकृ.ज्जायते सत्यशुष्मः। त्वद्रयि र्देवजूतो मयोभु-स्त्वदाशु र्जूजुवा॰ अग्ने अर्वा।।

卐 त्वामग्ने प्रथम.न्देवयन्तो- देवं मर्ता^ अमृत मन्द्रजिह्वम्। द्वेषोयुत.मा विवासन्ति धीभि-र्दमूनस.ङ्गृहपति .ममूरम्।।

卐 आरे अस्म.दमतिमारे अंह^- आरे विश्वा.न्दुर्मतिँ यन्निपासि। दोषा शिव स्सहस स्सूनो अग्ने-य.न्देव ^आ चित्सचसे स्वस्ति।।

4.12 यस्त्वामग्न इति षड़ृचस्य सूक्तस्य, गौतमो वामदेवोऽग्नि- स्त्रिष्टुप्।।

❀03.05.12 卐यस्त्वामग्न इनधते यतस्रु-क्त्रि.स्ते अन्न.ङ्कृणव.त्तस्मि.न्नहन्न्। स सु द्युम्नै रभ्यस्तु प्रसक्ष- त्तव क्रत्वा जातवेद श्चिकित्वान्।।

卐 इध्मँ यस्ते जभर.च्छश्रमाणो- महो अग्ने अनीक.मा सपर्यन्न्। स इधान॰ प्रति दोषा.मुषासं-पुष्य.न्रयिं सचते घ्न.न्नमित्रान्।।

卐 अग्नि रीशे बृहतः≈क्षत्रिय-स्याग्नि र्वाजस्य परमस्य रायः। दधाति रत्नँ विधते यविष्ठो-व्यानुष.ङ्मर्त्याय स्वधावान्।।

卐 यच्चिद्धि ते पुरुषत्रा यविष्ठा-ऽचित्तिभि श्चकृमा कच्चिदागः। कृधी ष्व1(अ)स्मा॰ अदिते रनागा-न्व्येनांसि शिश्रथो विष्व.गग्ने।।

卐 मह श्चिदग्न एनसो अभीक -ऊर्वा.द्देवाना.मुत मर्त्यानाम्। मा ते सखाय.स्सदमि.द्रिषाम- यच्छा तोकाय तनयाय शँ योः।।

卐 यथा ह त्यद्वसवो गौर्य.ञ्चि-त्पदि षिता.ममुञ्चता यजत्राः। एवो~ ष्व1(अ)स्म.न्मुञ्चता व्यंह॰- प्र तार्यग्ने प्रतर.न्न^ आयुः।।

4.13 प्रत्यग्निरिति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्नि- स्त्रिष्टुप्।।

❀03.05.13 卐प्रत्यग्नि रुषसा.मग्र.मख्य-द्विभातीनां सुमना^ रत्नधेयम्। यात.मश्विना सुकृतो दुरोण-मुत्सूर्यो ज्योतिषा देव एति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 ऊर्ध्वं भानुं सविता देवो अश्रे-द्द्रप्स.न्दविध्व.द्गविषो न सत्वा। अनु व्रतँ वरुणो यन्ति मित्रो-यत्सूर्यं.न्दिव्यारोहयन्ति।।

卐 यं सीमकृण्व-न्तमसे विपृचे- ध्रुवक्षेमा^ अनवस्यन्तो अर्थम्। तं सूर्यं हरित.स्सप्त यह्वी-स्स्पशँ विश्वस्य जगतो वहन्ति।।

卐 वहिष्ठेभि र्विहरन्यासि तन्तु-मवव्यय.न्नसित.न्देव वस्म। दविध्वतो रश्मय.स्सूर्यस्य- चर्मेवावाधु स्तमो अप्स्व1(अ)न्तः~।।

卐 अनायतो अनिबद्धः कथाऽय-न्न्यङ्ङुत्तानोऽव पद्यते न। कया याति स्वधया को ददर्श- दिव.स्स्कम्भ .स्समृतः पाति नाकम्।।

4.14 प्रत्यग्निरुषस इति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्नि-स्त्रिष्टुप्-(अनयोः सूक्तयोः केचिदाचार्या लिङ्गोक्त देवता आहुः-ताश्चआद्य सूक्ते आद्यानां तिसृणामग्निः-चतुर्थ्याः सवितृ वरुण मित्राः- पञ्चम्याः सूर्यः- अपर सूक्ते क्रमेण-अग्न्यश्विनः सूर्य उषा अश्व्युषसः सूर्य इत्येवं ज्ञेयाः-)

❀03.05.14 卐प्रत्यग्नि रुषसो जातवेदा^- अख्य.द्देवो रोचमाना^ महोभिः। आ नास.त्योरुगाया रथे-नेमँ यज्ञ.मुप नो यात.मच्छ।।

卐 ऊर्ध्व.ङ्केतुं सविता देवो अश्रे-ज्ज्योति र्विश्वस्मै भुवनाय कृण्वन्न्। आऽप्रा^ द्यावापृथिवी~ अन्तरिक्षँ - वि सूर्यो रश्मिभि श्चेकितानः।।

卐 आवह.न्त्यरुणी र्ज्योतिषाऽऽगा-न्मही चित्रा रश्मिभि श्चेकिताना। प्रबोधयन्ती सुवितार्य दे-व्यु1(उ)षा^ ईयते सुयुजा रथेन।।

卐 आ वाँ वहिष्ठा^ इह ते वहन्तु- रथा^अश्वास उषसो व्युष्टौ। इमे हि वां मधुपेयाय सोमा^- अस्मि.न्यज्ञे वृषणा मादयेथाम्।।

卐 अनायतो अनिबद्धः कथाऽय-न्न्यङ्ङुत्तानोऽव पद्यते न। कया याति स्वधया को ददर्श- दिव.स्स्कम्भ .स्समृतः पाति नाकम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

☸ 4.15 अग्निर्होतेति दशर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्निः-सप्तम्यष्टम्योः सोमः-अन्त्ययोरश्विनौ गायत्री।।

❀03.05.15 卐अग्नि र्होता नो अध्वरे- वाजी सन्परि णीयते। देवो देवेषु यज्ञियः।।

卐 परि त्रिवि.ष्ट्यध्वरँ- यात्यग्नी रथीरिव। आ देवेषु प्रयो दधत्।।

卐 परि वाजपतिः कवि- रग्नि र्हव्या.न्यक्रमीत्। दध.द्रत्नानि दाशुषे।।

卐 अयँ य.स्सृञ्जये पुरो- दैववाते समिध्यते। द्युमा अमित्रदम्भनः।।

卐 अस्य घा वीर ईवतो-ऽग्ने रीशीत मर्त्यः। तिग्मजम्भस्य मीळ्हुषः।।

❀03.05.16 卐तमर्वन्त.न्न सानसि-मरुष.न्न दिव.श्शिशुम्। मर्मृज्यन्ते दिवेदिवे।

卐 बोधय.न्मा हरिभ्या-ङ्कुमार.स्साहदेव्यः। अच्छा न हूत उदरम्।।

卐 उत त्या यजता हरी-- कुमारा.त्साहदेव्यात्। प्रयता सद्य आ ददे।।

卐 एष वा.न्देवा वश्विना- कुमार.स्साहदेव्यः। दीर्घाऽऽयु रस्तु सोमकः।।

卐 तँ युव.न्देवा वश्विना- कुमारं साहदेव्यम्। दीर्घाऽऽयुष.ङ्कृणोतन।।

☸ 4.16 आ सत्यो यात्वित्येकविंशत्यृचस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

❀03.05.17 卐आ सत्यो यातु मघवा ऋजीषी- द्रवन्त्वस्य हरय उप नः। तस्मा इदन्ध.स्सुषुमा सुदक्ष-मिहाभिपित्व.ङ्करते गृणानः।।

卐 अव स्य शूराध्वनो नान्ते-ऽस्मि.न्नो अद्य सवने मन्दध्यै। शंसा.त्युक्थ.मुशनेव वेधा- श्चिकितुषे असुर्याय मन्म।।

卐 कवि र्न निण्यँ विदथानि साध-न्वृषा यत्सेकँ विपिपानो अर्चात्। दिव इत्था जीजन.त्सप्त कारू-नह्ना चिच्चक्रु र्वयुना गृणन्तः।।

卐 स्व1(अ)र्य द्वेर्दि सुदृशीक.मर्कै- र्महि ज्योती रुरुचु र्यद्ध वस्तोः। अन्धा तमांसि दुधिता विचक्षे- नृभ्य श्चकार नृतमो अभिष्टौ।।

卐 ववक्षे इन्द्रो अमितं.मृजी-ष्यु1(उ)भे~ आ पप्रौ रोदसी महित्वा। अतं.श्चिदस्य महिमा वि रे-च्यभि यो विश्वा भुवना बभूव।।

❀03.05.18 卐विश्वानि शक्रो नर्याणि विद्वा-नपो रिरेच सखिभि निकामैः। अश्मान.ञ्चिद्ये बिभिदु र्वचोभि- र्व्रज.ङ्गोमन्त.मुशिजो वि वव्रुः~।।

卐 अपो वृत्रँ वव्रिवांसं पराऽह-न्प्राव.त्ते वज्रं पृथिवी सचेताः। प्रार्णांसि समुद्रिया.ण्यैनोः- पतिर्भव.ञ्छवसा शूर धृष्णो~।।

卐 अपो यदद्रिं पुरुहूत दर्द- राविर्भुव.त्सरमा पूर्व्यं.न्ते। स नो नेता वाज.मार्दर्षि भूरि-ङ्गोत्रा रुज.न्नङ्गिरोभि र्गृणानः।।

卐 अच्छा ~कवि.न्नृमणो गा^ अभिष्टौ- स्वर्षाता मघव.न्नाधमानम्। ऊतिभि.स्तमिषणो द्युम्नहूतौ- नि मायावा.नब्रह्मा दस्यु रर्त।।

卐 आ दस्युघ्ना मनसा याह्यस्तं- भुवत्ते कुत्स.स्सख्ये निकामः। स्वे योनौ नि ष्षदतं सरूपा- वि वा.ञ्चिकित्स.दृतचिद्ध नारी।।

❀03.05.19 卐यासि कुत्सेन सरथं.मवस्यु- स्तोदो वातस्य हर्यो रीशानः। ऋज्रा वाज.न्न गध्यँ युयूष- न्कवि.र्यदह.न्पार्याय भूषात्।।

卐 कुत्साय शुष्णं.मशुष.न्नि बर्हीः- प्रपित्वे अह्नः कुयवं सहस्रा। सद्यो दस्यू.न्प्र मृण कुत्स्येन- प्र सूर.श्चक्रँ वृहता.दभीके।।

卐 त्वं पिप्रुं मृगयं शूशुवांसं-मृजिश्वने वैदथिनाय रन्धीः। पञ्चाश.त्कृष्णा नि वप.स्सह-स्रात्क.न्न पुरो जरिमा वि दर्दः~।।

卐 सूर^ उपाके तन्व1(अ) न्दधानो- वि यत्ते चे.त्यमृतस्य वर्पः। मृगो न हस्ती तविषी.मुषाण-स्सिंहो न भीम^ आयुधानि बिभ्रत्।।

卐 इन्द्र.ङ्कामा^ वसूयन्तो अग्म-न्त्स्वर्मीळ्हे न सवने चकानाः। श्रवस्यव श्शशमानास^ उक्थै- रोको न रण्वा सुदृशीव पुष्टिः।।

❀03.05.20 卐तमिद्व^ इन्द्रं सुहवं हुवेम- यस्ता चकार नर्या पुरूणि। यो मावते जरित्रे गध्यञ्चि-न्मक्षू वाजं भरति स्पार्हराधाः।।

卐 तिग्मा यदन्त रशनिः पताति- कस्मि.श्चिच्छूर मुहुके जनानाम्। घोरा यदर्य समृति र्भवा-त्यध स्मा न.स्तन्वो बोधि गोपाः।।

卐 भुवोऽविता वामदेवस्य धीनां- भुव.स्सखाऽवृको वाजसातौ। त्वामनु प्रमति माजग-न्मोरुशंसो जरित्रे विश्वध स्याः।।

卐 एभि र्नृभिरिन्द्र त्वाऽऽयुभिष्ट्वा-मघव.द्भि र्मघव.न्विश्व आजौ। द्यावो न द्युम्नै रभि सन्तो अर्यः ≈-क्षपो मदेम शरद.श्च पूर्वीः।।

卐 एवे.दिन्द्राय वृषभाय वृष्णे- ब्रह्माकर्म भृगवो न रथम्। नू चिद्यथा न स्सख्या वियोष-दस.न्न^ उग्रोऽविता तनूपाः।।

卐 नूष्टुत^ इन्द्र नू गृणान^- इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः~। अकारि ते हरिवो ब्रह्म नव्य-न्धिया स्याम रथ्य.स्सदासाः।।

☸ 4.17 त्वं महानित्येकविंशत्यृचस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्-असिक्न्या मित्येकपदाविराट्।।

❀03.05.21 卐त्वं महा९ इन्द्र तुभ्यं ह क्षा ^-अनु क्षत्रं मंहना मन्यत द्यौः। त्वँ वृत्रं शवसा जघन्वा-न्त्सृज.स्सिन्धू९ रहिना जग्रसानान्।।

卐 तव त्विषो जनिम न्रेजत द्यौ- रेज.द्भूमि र्भियसा स्वस्य मन्योः। ऋघायन्त सुभ्व1(अः) पर्वतास^-आर्द.न्धन्वानि सरयन्त आपः।।

卐 भिन.द्गिरिं शवसा वज्र.मिष्ण-न्नाविष्कृण्वान.स्सहसान^ ओजः। वधी.द्वृत्रँ वज्रेण मन्दसान-स्सर.न्नापो जवसा हतवृष्णीः।।

卐 सुवीर.स्ते जनिता मन्यत द्यौ- रिन्द्रस्य कर्ता स्वपस्तमो भूत्। य^ ईञ्जजान स्वर्यं सुवज्र-मनपच्युतं सदसो न भूम।।

卐 य^ एक^इच्च्यावयति प्र भूमा^राजा कृष्टीनां पुरुहूत^ इन्द्रः। सत्य.मेन मनु विश्वे मदन्ति- राति .न्देवस्य गृणतो मघोनः।।

❀03.05.22 卐सत्रा सोमा^ अभव.न्नस्य विश्वे- सत्रा मदासो बृहतो मदिष्ठाः। सत्राऽभवो वसुपति र्वसूना- न्दत्रे विश्वा^ अधिथा^ इन्द्र कृष्टीः।।

卐 त्वमध प्रथम.ञ्जायमानो-ऽमे विश्वा^ अधिथा^ इन्द्र कृष्टीः। त्वं प्रति प्रवत^ आशयान-महिं वज्रेण मघव .न्वि वृश्चः।।

卐 सत्राहण न्दाधृषि.न्तुम्र.मिन्द्रं- महा.मपारं वृषभं सुवज्रम्। हन्ता यो वृत्रं सनितोत वाज-न्दाता मघानि मघवा सुराधाः।।

卐 अयं वृत श्चातयते समीची-र्य^ आजिषु मघवा शृण्व एकः। अयं वाजं भरति यं सनो-त्यस्य प्रियास स्सख्ये स्याम।।

卐 अयं शृण्वे अध जयन्नुत घ्न-न्नय.मुत प्र कृणुते युधा गाः। यदा सत्य.ङ्कृणुते मन्यु-मिन्द्रो- विश्व.न्दृळ्हं भयत एजदस्मात्।।

❀03.05.23 卐समिन्द्रो गा^ अजय.त्सं हिरण्या- समश्विया मघवा यो ह पूर्वीः। एभि र्नृभि र्नृतमो अस्य शाकै- रायो विभक्ता संभर.श्च वस्वः।।

卐 किय.त्स्विदिन्द्रो अध्येति मातुः- किय.त्पितु र्जनितु.र्यो जजान। यो अस्य शुष्मं मुहुकै रियर्ति- वातो न जूत.स्स्तनय.द्भि रभ्रैः।।

卐 क्षियन्त.न्त्व.मक्षियन्त.ङ्कृणो-तीयर्ति रेणुं मघवा समोहम्। विभञ्जनु रशनिमा^ इव द्यौ-रुत स्तोतारं मघवा वसौ धात्।।

卐 अय.ञ्चक्र.मिषण.त्सूर्यस्य- न्येतशं रीरम.त्ससृमाणम्। आ कृष्ण^ ईं.ञ्जुहुराणो जिघर्ति- त्वचो बुध्ने रजसो अस्य योनौ।।

卐 असिक्न्यां यजमानो न होता।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀03.05.24 卐गव्यन्त^ इन्द्रं सख्याय विप्रा^-अश्वायन्तो वृषणँ वाजयन्तः। जनीयन्तो जनिदा मक्षितोति मा च्यावयामोऽवते न कोशम्।।

卐 त्राता नो बोधि ददृशान^ आपि- रभिख्याता मर्डिता सोम्यानाम्। सखा पिता पितृतमः पितृणा-ङ्कर्तेमु ~लोक मुशते वयोधाः।।

卐 सखीयता.मविता बोधि सखा- गृणान^ इन्द्र स्तुवते वयो धाः। वयं ह्या ते चकृमा सबाध^- आभि श्शमीभि र्महयन्त^ इन्द्र।।-

卐 स्तुत^ इन्द्रो मघवा यद्ध वृत्रा- भूरी.ण्येको अप्रतीनि हन्ति। अस्य प्रियो जरिता यस्य शर्म-न्नकि र्देवा वारयन्ते न मर्ताः।।

卐 एवा^न^ इन्द्रो मघवा विरप्शी- कर.त्सत्या चर्षणीधृ.दनर्वा। त्वं राजा जनुषा.न्धेह्यस्मे- अधि श्रवो माहिनँ यज्जरित्रे।।

卐 नूष्टुत^ इन्द्र नू गृणान^- इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः~। अकारि ते हरिवो ब्रह्म नव्य-न्धिया स्याम रथ्य.स्सदासाः।।

☸ 4.18 अयं पन्था इति त्रयोदशर्चस्य सूक्तस्य, गौतमो वामदेव-आद्याया इन्द्र-नही न्वस्येत्यादि सार्धतिसृणामदिति र्ऋषिका-आद्याया वामदेवो देवता-नाहमत इत्यादि पञ्चार्धर्चानामन्त्यानां षण्णामृचां चेन्द्रो देवता-नहीन्वस्येति सार्धतिसृणां वामदेवो देवता- त्रिष्टुप्।।

❀03.05.25 卐अयं पन्था^ अनुवित्तः पुराणो- यतो देवा^ उदजायन्त विश्वे। अत.श्चि.दाजनिषीष्ट प्रवृद्धो- मा मातर.ममुया पत्तवे कः~।।

卐 नाह.मतो निरया दुर्गहैत-त्तिरश्चता पार्श्वा.न्निर्गमाणि। बहूनि मे अकृता कर्त्वानि- युध्यै त्वेन स.न्त्वेन पृच्छै।।

卐 परायतीं मातर.मन्वचष्ट- न नानु गा.न्यनु नू गमानि। त्वष्टु र्गृहे अपिब.त्सोम.मिन्द्र- श्शतधन्य.ञ्चम्वो स्सुतस्य।।

卐 किं स ऋध.क्कृणव.द्यं सहस्रं- मासो जभार शरद.श्च पूर्वीः। नही.न्वस्य प्रतिमान.म-स्त्यन्त र्जाते.षूत ये जनित्वाः।।

卐 अवद्य.मिव मन्यमाना गुहाऽक- रिन्द्रं माता वीर्येणा न्यृष्टम्। अथो.दस्था.त्स्वय.मत्कँ वसान- आ रोदसी अपृणा.ज्जायमानः।।

❀03.05.26 卐एता अर्ष.न्त्यललाभवन्ती-र् ऋतावरी.रिव सङ्क्रोशमानाः। एता वि पृच्छ किमिदं भनन्ति- कमापो अद्रिं परिधिं रुजन्ति।।

卐 किमुष्विदस्मै निविदो भन-न्तेन्द्रस्यावद्य.न्दिधिषन्त आपः। ममैता.न्पुत्रो महता वधेन- वृत्र.ञ्जघन्वा असृज.द्वि सिन्धून्।।

卐 मम.च्चन त्वा युवतिः परास- मम.च्चन त्वा कुषवा जगार। मम.च्चिदाप.श्शिशवे ममृड्यु- र्मम.च्चि.दिन्द्र .स्सह.सोदतिष्ठत्।।

卐 मम.च्चन ते मघव.न्व्यंसो- निविविध्वा अप हनू जघान। अधा निविद्ध उत्तरो बभूवा-ञ्छिरो दासस्य संपिण.ग्वधेन।।

卐 गृष्टि.स्ससूव स्थविर.न्तवागा-मनाधृष्यँ वृषभ.न्तुम्र.मिन्द्रम्। अरीळ्हँ वत्स.ञ्चरथाय माता- स्वय.ङ्गातु .न्तन्व इच्छमानम्।।

卐 उत माता महिष.मन्ववेन-दमी त्वा जहति पुत्र देवाः। अथाब्रवी.द्वृत्र.मिन्द्रो हनिष्य-न्त्सखे विष्णो वितरँ वि क्रमस्व।।

卐 क.स्ते मातरँ विधवा.मचक्र-च्छयु.ङ्कस्त्वा.मजिघांस.च्चरन्तम्। क.स्ते देवो अधि मार्डीक आसी-द्यत्प्राऽक्षिणाः पितरं पादगृह्य।।

卐 अवर्त्या शुन आन्त्राणि पेचे- न देवेषु विविदे मर्डितारम्। अपश्य.ञ्जाया.मर्महीयमाना-मधा मे श्येनो मध्वा जभार।। ।। इति पञ्चमाध्याय स्समाप्तः ।।

## तृतीयाष्टके षष्ठाध्यायः। (वर्गाः 1-30)।।

4.19 एवा त्वामित्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀03.06.01 卐एवा त्वामिन्द्र वज्रि.न्नत्र- विश्वे देवास.स्सुहवास^ ऊमाः। महा.मुभे~ रोदसी वृद्ध .मृष्व-न्निरेक.मिद्वृणते वृत्रहत्ये।।

卐 अवासृजन्त जिव्रयो न देवा^- भुव.स्सम्रा.ळिन्द्र सत्ययोनिः। अह.न्नहिं परिशयान.मर्णः- प्र वर्तनी रेरदो विश्वधेनाः।।

卐 अतृप्णुवन्तँ वियत.मबुध्य-मबुध्यमानं सुषुपाण.मिन्द्र। सप्त प्रति प्रवत^ आशयान-महिँ वज्रेण वि रिणा^ अपर्वन्न्।।

卐 अक्षोदय.च्छवसा क्षाम बुध्नँ- वा.र्ण वात.स्तविषीभि रिन्द्रः। दृऴ्हा.न्यौभ्ना.दुशमान ओजो-ऽवाभिन .त्ककुभः पर्वतानाम्।।

卐 अभि प्र दद्रु र्जनयो न गर्भं- रथा.इव प्र ययु स्साक.मद्रयः। अतर्पयो विसृत^ उब्ज^ ऊर्मी-न्त्वँ वृताँ अरिणा^ इन्द्र सिन्धून्।।

❀03.06.02 卐त्वं मही.मवनिँ विश्वधेना-न्तुर्वीतये वय्याय क्षरन्तीम्। अरमयो नम.सैज.दर्ण-स्सुतरणाँ अकृणो रिन्द्र सिन्धून्।।

卐 प्राग्रुवो नभन्वो3(ओ)न वक्वा^- ध्वस्रा^ अपिन्व.द्युवती.र् ऋतज्ञाः। धन्वा.न्यज्राँ अपृण.क्तृषाणाँ- अधो.गिन्द्र.स्स्तर्यो3(ओ) दंसुपत्नीः।।

卐 पूर्वी रुषस.श्शरद.श्च गूर्ता- वृत्र.ञ्जघन्वाँ असृज.द्वि सिन्धून्। परिष्ठिता ^अतृण.द्बद्बधाना-स्सीरा^ इन्द्र स्स्रवितवे पृथिव्या।।

卐 वम्रीभिः पुत्र.मग्रुवो अदान-न्निवेशना.द्धरिव^आ जभर्थ। व्य1(अ)न्धो अख्य.दहि.माददानो- निर्भू .दुखच्छि.त्स.मरन्त पर्व।।

卐 प्र ते पूर्वाणि करणानि विप्रा-ऽऽविद्वाँ आह विदुषे करांसि। यथायथा वृष्ण्यानि स्वगूर्ता-ऽपांसि राज.न्नर्याविवेषीः।।

卐 नूँष्टुत^ इन्द्र नूँ गृणान^- इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः~। अकारि ते हरिवो ब्रह्म नव्य-न्धिया स्याम रथ्य.स्सदासाः।।

4.20 आ न इन्द्र इत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

❀03.06.03 卐आ न^ इन्द्रो दूरादा न^ आसा-दभिष्टिकृ.दवसे यासदुग्रः। ओजिष्ठेभि र्नृपति र्वज्रबाहु-स्सङ्गे समत्सु तुर्वणिꣳ पृतन्यून्।।

卐 आ न^ इन्द्रो हरिभि र्यात्वच्छा-र्वाचीनोऽवसे राधसे च। तिष्ठाति वज्री मघवा विर-प्शीमँ यज्ञ.मनु नो वाजसातौ।।

卐 इमँ यज्ञ.न्त्वमस्माक.मिन्द्र- पुरो दध.त्सनिष्यसि क्रतु.न्नः। श्वघ्नीव वज्रि.न्त्सनये धनाना-न्त्वया वय .मर्य^ आजि.ञ्जयेम।।

卐 उशन्नु ष्वु ण.स्सुमना^ उपाके- सोमस्य नु सुषुतस्य स्वधावः। पा^ इन्द्र प्रतिभृतस्य मध्व-स्समन्धसा ममदꣳ पृष्ठ्येन।।

卐 वि यो ररप्श ऋषिभि र्नवेभि- र्वृक्षो न पक्व.स्सृण्यो न जेता। मर्यो न योषा.मभि मन्यमानो-ऽच्छा विवक्मि पुरुहूत.मिन्द्रम्।।

❀03.06.04 卐गिरि र्न य.स्स्वतवाꣳ ऋष्व ^इन्द्र- स्सना.देव सहसे जात^ उग्रः। आदर्ता वज्रं स्थविर.न्न भीम^- उद्नेव कोशँ वसुना न्यृष्टम्।।

卐 न यस्य वर्ता जनुषा न्वस्ति- न राधस ^आमरीता मघस्य। उद्वावृषाण.स्तविषीव^ उग्रा-ऽस्मभ्य.न्दद्धि पुरुहूत रायः।।

卐 ईक्षे रायः ≈ क्षयस्य चर्षणीना-मुत व्रज.मपवर्ताऽसि गोनाम्। शिक्षानर.स्समिथेषु प्रहावा-न्वस्वो राशि .मभिनेताऽसि भूरिम्।।

卐 कया तच्छृण्वे शच्या शचिष्ठो- यया कृणोति मुहु का चिदृष्वः। पुरु दाशुषे विचयिष्ठो अंहो-ऽथा दधाति द्रविण.ञ्जरित्रे।।

卐 मा नो मर्धीरा भरा दद्धि तन्नꣳ- प्र दाशुषे दातवे भूरि यत्ते। नव्ये देष्णे शस्ते अस्मिन्त^ उक्थे- प्र ब्रवाम वय.मिन्द्र स्तुवन्तः।।

卐 नूष्टुत^ इन्द्र नू गृणान^- इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः~। अकारि ते हरिवो ब्रह्म नव्य-न्धिया स्याम रथ्य.स्सदासाः।।

4.21 आ यात्विन्द्र इत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

❀03.06.05 卐आ यात्विन्द्रोऽवस^ उप न^- इह स्तुत.स्सधमा.दस्तु शूरः। वावृधान.स्तविषी र्यस्य पूर्वी- द्यौर्न क्षत्र.मभिभूति पुष्यात्।।

卐 तस्येदिह स्तवथ वृष्ण्यानि- तुविद्युम्नस्य तुविराधसो नॄन्। यस्य क्रतु र्विदथ्यो3(ओ) न सम्रा-ट्त्साह्वा न्तरुत्रो अभ्यस्ति कृष्टीः।।

卐 आ यात्विन्द्रो दिव^ आ पृथिव्या^- मक्षू समुद्रा.दुत वा पुरीषात्। स्वर्णरा.दवसे नो मरुत्वा-न्परावतो वा सदना.दृतस्य।।

卐 स्थूरस्य रायो बृहतो य^ ईशे- तमुष्टवाम विदथे.ष्विन्द्रम्। यो वायुना जयति गोमतीषु- प्र धृष्णुया नयति वस्यो अच्छ।।

卐 उप यो नमो नमसि स्तभाय-न्नियर्ति वाच.ञ्जनय.न्यजध्यै। ऋञ्जसानः पुरुवार^ उक्थै- रेन्द्र.ङ्कृण्वीत सदनेषु होता।।

❀03.06.06 卐धिषा यदि धिषण्यन्त.स्सरण्या-न्त्सदन्तो अद्रि.मौशिजस्य गोहे। आ दुरोषाः पास्त्यस्य होता- यो नो महा.न्त्सँवरणेषु वह्निः।।

卐 सत्रा यदीं भार्वरस्य वृष्ण-स्सिषक्ति शुष्म.स्स्तुवते भराय। गुहा यदी.मौशिजस्य गोहे- प्र यद्धिये प्रायसे मदाय।।

卐 वि यद्वरांसि पर्वतस्य वृण्वे- पयोभि र्जिन्वे अपा.ञ्जवांसि। विद.द्गौरस्य गवयस्य गोहे- यदी वाजाय सुध्यो3(ओ) वहन्ति।।

卐 भद्रा ते हस्ता सुकृतोत पाणी~- प्रयन्तारा स्तुवते राध^ इन्द्र। का ते निषत्तिः किमु नो~ ममत्सि कि.न्नोदुदु हर्षसे दातवा उ।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 एवा वस्व^ इन्द्र.स्सत्य स्सम्रा.ड्ढन्ता वृत्रँ वरिव४ पूरवे कः~। पुरुष्टुत क्रत्वा न श्शग्धि रायो- भक्षीय तेऽवसो दैव्यस्य।।

卐 नूष्टुत^ इन्द्र नू गृणान^- इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः~। अकारि ते हरिवो ब्रह्म नव्य-न्धिया स्याम रथ्य.स्सदासाः।।

4.22 यन्न इन्द्र इत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

❀03.06.07 卐यन्न^ इन्द्रो जुजुषे यच्च वष्टि- तन्नो महा.न्करति शुष्म्या चित्। ब्रह्म स्तोमं मघवा सोम .मुक्था- यो अश्मानं शवसा बिभ्र.देति।।

卐 वृषा वृषन्धि.ञ्चतुरश्रि.मस्य-न्नुग्रो बाहुभ्या.न्नृतम.श्शचीवान्। श्रिये परुष्णी.मुषमाण^ ऊर्णां- यस्या४ पर्वाणि सख्याय विव्ये।।

卐 यो देवो देवतमो जायमानो- महो वाजेभि र्महद्भिश्च शुष्मैः। दधानो वज्रं बाह्वो रुशन्त-न्द्यामर्मेन रेजय .त्प्र भूम।।

卐 विश्वा रोधांसि प्रवत.श्च पूर्वी- द्यौर् ऋष्वा.ज्जनिम.न्रेजत क्षाः। आ मातरा भरति शुष्म्या गो-र्नृव .त्परिज्म.न्नोनुवन्त वाताः।।

卐 ता तू त^ इन्द्र महतो महानि- विश्वेष्वि.त्सवनेषु प्रवाच्या। यच्छूर धृष्णो~ धृषता दधृष्वा-नहिं वज्रेण शवसाऽविवेषीः।।

❀03.06.08 卐ता तू ते सत्या तुविनृम्ण विश्वा- प्र धेनव स्सिस्रते वृष्ण^ ऊध्नः। अधा ह त्व.द्वृषमणो भियाना४- प्र सिन्धवो जवसा चक्रमन्त।।

卐 अत्राह ते हरिव.स्ता^ उ देवी-रवोभि रिन्द्र स्तवन्त स्वसारः। यत्सी.मनु प्र मुचो बद्बधाना^- दीर्घा.मनु प्रसितिं स्यन्दयध्यै।।

卐 पिपीळे अंशु र्मद्यो न सिन्धु- रा त्वा शमी शशमानस्य शक्तिः। अस्मद्र्य.क्शुशुचानस्य यम्या^- आशु.र्न रश्मि.न्तुव्योजस.ङ्गोः।।

卐 अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा- नृम्णानि सत्रा संहुरे सहांसि। अस्मभ्यँ वृत्रा सुहनानि रन्धि- जहि वध र्वनुषो मर्त्यस्य।।

卐 अस्माक.मित्सु शृणुहि त्वमिन्द्रा-स्मभ्य.ञ्चित्राꣳ उप माहि वाजान्। अस्मभ्यँ विश्वा^ इषणः पुरन्धी- रस्माकं सु मघव.न्बोधि गोदाः।।

卐 नूष्टुत^ इन्द्र नू गृणान^- इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः। अकारि ते हरिवो ब्रह्म नव्य- न्धिया स्याम रथ्य.स्सदासाः।।

4.23 कथा महामित्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्-(अन्त्यानां तिसृणामृतन्देवता वा)।।

❀03.06.09 卐कथा महा.मवृध.त्कस्य होतु- र्यज्ञ.ञ्जुषाणो अभि सोम.मूधः। पिब.न्नुशानो जुषमाणो अन्धो- ववक्ष ऋष्व.श्शुचते धनाय।।

卐 को अस्य वीर.स्सधमाद.माप- समानंश सुमतिभिः को अस्य। कदस्य चित्र.ञ्चिकिते कदूती- वृधे भुव .च्छशमानस्य यज्योः।।

卐 कथा शृणोति हूयमान.मिन्द्रः- कथा शृण्व.न्नवसा.मस्य वेद। का अस्य पूर्वी रुपमातयो ह- कथैन .माहुः पपुरि.ञ्जरित्रे।।

卐 कथा सबाध.श्शशमानो अस्य- नश.दभि द्रविण.न्दीध्यानः। देवो भुव.न्नवेदा म ऋताना-न्नमो जगृभ्वाꣳ अभि यज्जुजोषत्।।

卐 कथा कदस्या^ उषसो व्युष्टौ- देवो मर्तस्य सख्य.ञ्जुजोष। कथा कदस्य सख्यं सखिभ्यो- ये अस्मि .न्कामं सुयुज.न्ततस्रे।।

❀03.06.10 卐किमा.दमत्रं सख्यं सखिभ्यः- कदा नु ते भ्रात्रं प्र ब्रवाम। श्रिये सुदृशो वपुरस्य सर्गा- स्स्व1(अ)र्ण चित्रतम.मिष आ गोः।।

卐 द्रुह.ञ्जिघांस.न्ध्वरस.मनिन्द्रा-न्तेतिक्ते तिग्मा तुजसे अनीका। ऋणा चिद्यत्र ऋणया^ न^ उग्रो- दूरे अज्ञाता^ उषसो बबाधे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ऋतस्य हि शुरुध स्सन्ति पूर्वी-र् ऋतस्य धीति वृजिनानि हन्ति। ऋतस्य श्लोको बधिरा ततर्द- कर्णा बुधान श्शुचमान^ आयोः।।

卐 ऋतस्य दृळ्हा धरुणानि सन्ति- पुरूणि चन्द्रा वपुषे वपूंषि। ऋतेन दीर्घ.मिषणन्त पृक्ष^- ऋतेन गाव^ ऋत.माविवेशुः।।

卐 ऋतँ येमान^ ऋतमि.द्वनो-त्यृतस्य शुष्म.स्तुरया^ उ गव्युः। ऋताय पृथ्वी~ बहुले~ गभीरे~- ऋताय धेनू~ परमे~ दुहाते~।।

卐 नूष्टुत^ इन्द्र नू गृणान-इष.ञ्जरित्रे नद्यो3(ओ) न पीपेः~। अकारि ते हरिवो ब्रह्म नव्य-न्धिया स्याम रथ्य.स्सदासाः।।

4.24 का सुष्टुतिरित्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र- स्त्रिष्टुप्।।

❀03.06.11 卐का सुष्टुति.श्शवस.स्सूनु.मिन्द्र-मर्वाचीनं राधस आ ववर्तत्। ददिर्हि वीरो गृणते वसूनि- स गोपति र्निष्षिधा.न्नो जनासः।।

卐 स वृत्रहत्ये हव्य स्स ईड्य-स्स सुष्टुत^ इन्द्र.स्सत्यराधाः। स याम.न्ना मघवा मर्त्याय- ब्रह्मण्यते सुष्वये वरिवो धात्।।

卐 तमि.न्नरो वि ह्वयन्ते समीके- रिरिक्वांस.स्तन्वः कृण्वत त्राम्। मिथो यत्त्याग.मुभयासो अग्म-न्नर .स्तोकस्य तनयस्य सातौ।।

卐 क्रतूयन्ति क्षितयो योग उग्रा-ऽऽशुषाणासो मिथो अर्णसातौ। सँ यद्विशोऽववृत्रन्त युध्मा^- आदि.न्नेम^इन्द्रयन्ते अभीके।।

卐 आदिद्ध नेम इन्द्रियँ यजन्त -आदि.त्पक्तिः पुरोळाशं रिरिच्यात्। आदि.त्सोमो वि पपृच्या.दसुष्वी- नादि.ज्जुजोष वृषभँ यजध्यै।।

❀03.06.12 卐कृणो.त्यस्मै वरिवो य^ इ-त्थेन्द्राय सोम.मुशते सुनोति। स्रध्रीचीनेन मनसाऽविवेन- न्तमि.त्सखाय.ङ्कृणुते समत्सु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 य॒ इन्द्राय सुनव॒.त्सोम॒.मद्य- पचा॒.त्पक्ती रु॒तभृज्जाऽति धा॒नाः। प्रति मना॒यो रु॒चथा॒नि हर्य॒-न्तस्मि

.न्दध॒.द्वृषणं॒ शुष्म॒.मिन्द्रः।।

卐 य॒दा समर्यँ व्यचे॒.दृघावा- दीर्घँ यदा॒जि.म॒भ्यरव्य॒.दर्यः। अचिक्रद॒.द्वृषणं॒ पत्न्यच्छा -दुरो॒ण आ निशितं

सोम॒सुद्भिः।।

卐 भूर्यसा व॒स्न.मचर॒.त्कनी॒यो-ऽविक्रीतो अकानिषं॒ पुन॒र्यन्न्। स भूर्यसा॒ कनी॒यो नारिरेची-द्दीना॒ दक्षा॒ वि

दुहन्ति॒ प्र वा॒णम्।।

卐 क॒ इम॒.न्दशभि॒ र्म-मेन्द्र.ङ्क्रीणाति धे॒नुभिः। य॒दा वृत्राणि॒ जङ्घन॒-दथैनं॒ मे॒ पुनर्ददत्।।

卐 नूष्टुत॒ इन्द्र॒ नू गृ॒णान॒- इष.ञ्जरित्रे न॒द्यो3(ओ) न पीपेः~। अकारि ते हरिवो॒ ब्रह्म॒ नव्य-न्धि॒या स्याम

र॒थ्य॒.स्सदा॒साः।।

4.25 को अद्येत्यष्टर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

❀03.06.13 को अ॒द्य नर्यो दे॒वकाम॒- उश.न्निन्द्रस्य सख्य॒.ञ्जुजोष। को वा म॒हेऽवसे॒ पार्या॒य- समिद्धे

अ॒ग्नौ सु॒तसोम॒ ईट्टे।।

卐 को नानाम॒ वचसा सो॒म्यार्य- मना॒युर्वा भवति॒ वस्त उ॒स्राः। क॒ इन्द्रस्य॒ युज्य॒.ङ्क॒.स्सखित्व-ङ्को भ्रा॒त्रँ

वष्टि क॒वये॒ क॒ ऊती।।

卐 को दे॒वाना॒.मवो अ॒द्या वृणीते॒- क॒ आदित्या॒ँ अदिति॒.ञ्ज्योति रीट्टे। कस्याश्विना॒ विन्द्रो अ॒ग्नि स्सुत-

स्या॒ंशोः पिबन्ति मन॒साऽविवेनम्।।

卐 तस्मा अ॒ग्नि भीरत॒.श्शर्म यंस-ज्ज्योक्पश्य॒.त्सूर्य मु॒च्चरन्तम्। य॒ इन्द्राय सु॒नवा॒-मेत्याह॒- नरे॒ नर्या॒य

नृतमाय नृ॒णाम्।।

卐 न तञ्जिनन्ति ब॒हवो न द॒भ्रा॒- उ॒र्वस्मा अदिति॒ श्शर्म यंसत्। प्रि॒य स्सु॒कृ.त्प्रि॒य॒ इन्द्रे मना॒युः- प्रि॒य

स्सुप्रा॒वीः प्रि॒यो अस्य सो॒मी।।

❀03.06.14 सु॒प्रा॒व्यः प्राशुषाळेष वीर-स्सुष्वेः प॒क्ति.ङ्कृणु॒ते केव॒लेन्द्रः। नासुष्वे रा॒पिर्न सखा॒ न

जा॒मि- दु॒ष्प्रा॒व्योऽवह॒न्तेदवाचः।।

卐 न रेवता पणिना सख्य.मिन्द्रो-ऽसुन्वता सुतपा.स्सङ्गृणीते। आऽस्य वेदः खिदति हन्ति नग्नं- वि सुष्वये पक्तये केवलो भूत्।।

卐 इन्द्रं परेऽवरे मध्यमास^इन्द्रं- यान्तोऽवसितास^ इन्द्रम्। इन्द्र.ङ्क्षियन्त^ उत युध्यमाना^- इन्द्र.न्नरो वाजयन्तो हवन्ते।।

4.26 अहं मनुरिति सप्तर्चस्य सूक्तस्य, गौतमो वामदेवः-आद्यानां तिसृणामात्मा देवता-अन्त्यानां चतसृणां श्येनस्त्रिष्टुप् (आद्यतृचे वामदेवेंद्रयोर्ऋषित्वविकल्पमाहुः केचित्)।।

卐 15 अहं मनु रभवं सूर्यश्चा-हङ्कक्षीवाः ऋषि रस्मि विप्रः। अह.ङ्कुत्स.मार्जुनेय.न्न्यृञ्जे-ऽह.ङ्कवि रुशना पश्यता मा।।

卐 अहं भूमि.मददा.मार्या-याहं वृष्टि.न्दाशुषे मर्त्याय। अह.मपो अनयँ वावशाना^- मम देवासो अनु केत.मायन्न्।।

卐 अहं पुरो मन्दसानो व्यैर-न्नव साक.न्नवती.श्शम्बरस्य। शततमँ वेश्यं सर्वताता- दिवोदास.मतिथिग्वँ यदावम्।।

卐 प्र सु ष^ विभ्यो मरुतो विरस्तु- प्र श्येन.श्श्येनेभ्य^ आशुपत्वा। अचक्रया यत्स्वधया सुपर्णो- हव्यं भर .न्मनवे देवजुष्टम्।।

卐 भरद्यदि विरतो वेविजानः- पथोरुणा मनोजवा^ असर्जि। तूयँ ययौ मधुना सोम्ये-नोत श्रवो विविदे श्येनो अत्र।।

卐 ऋजीपी श्येनो ददमानो अंशुं- परावत.श्शकुनो मन्द्रं मदम्। सोमं भर.द्दादृहाणो देवावा-न्दिवो अमुष्मा .दुत्तरा.दादाय।।

卐 आदाय श्येनो अभर.त्सोमं- सहस्रं सवाः अयुत.ञ्च साकम्। अत्रा पुरन्धि रजहा.दराती- र्मदे सोमस्य मूरा^ अमूरः।।

☃ 4.27 (उपांशु) गर्भे न्विति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेव- श्श्येन-स्त्रिष्टुबन्त्या शक्वरी (परा नवाष्टौ वेत्यनुक्रमण्यामुक्तेरधश्वेतमित्यस्यां पाक्षिकीन्द्रदेवता यदि श्येनदेवताया अष्टर्चत्वं स्वीकृतं चेत्)।।

❀03.06.16 卐गर्भे नु सन्न.न्वेषा.मवेद-मह.न्देवाना.ञ्जनिमानि विश्वा। शतं मा पुर^ आयसी ररक्ष.न्नध श्येनो जवसा निरदीयम्।।

卐 न घा स मामप जोष.ञ्जभारा-ऽभीमास त्वक्षसा वीर्येण। ईर्मा पुरन्धि रजहा.दराती- रुत वाता अतर. च्छूशुवानः।।

卐 अव यच्छ्येनो अस्वनी.दध द्यो- र्वि यद्यदि वात^ ऊहुः पुरन्धिम्। सृज.द्यदस्मा अव ह क्षिपज्ज्या- ङ्कृशानु रस्ता मनसा भुरण्यन्।।

卐 ऋजिप्य^ ईमिन्द्रावतो न भुज्युं- श्येनो जभार बृहतो अधिष्णोः। अन्तः~ पत.त्पतत्र्यस्य पर्ण-मध यामनि प्रसितस्य तद्वेः~।।

卐 अध श्वेत.ङ्कलश.ङ्गोभि रक्त-मापिप्यानं मघवा शुक्र.मन्धः। अध्वर्युभिः प्रयतं मध्वो अग्र-मिन्द्रो मदाय प्रति धत्पिबध्यै- शूरो मदाय प्रति धत्पिबध्यै।।

☃ 4.28 त्वा युजेति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप् (इन्द्रासोमौ वा देवते)

❀03.06.17 卐त्वा युजा तव तत्सोम सख्य -इन्द्रो अपो मनवे सस्रुतस्कः~। अह.न्नहि.मरिणा.त्सप्त सिन्धू-नपावृणो.दपिहितेव खानि।।

卐 त्वा युजा नि खिद.त्सूर्य-स्येन्द्र श्चक्रं सहसा सद्य^ इन्दो~। अधिष्णुना बृहता वर्तमानं- महो द्रुहो अप विश्वायु धायि।।

卐 अह.न्निन्द्रो अदह.दग्नि रिन्दो~- पुरा दस्यू.न्मध्यन्दिना.दभीके। दुर्गे दुरोणे क्रत्वा न यातां- पुरू सहस्रा शर्वा नि बर्हीत्।।

卐 विश्वस्मा.त्सीमधमा इन्द्र दस्यू-न्विशो दासी रकृणो रप्रशस्ताः। अबाधेथा.ममृणत.न्नि शत्रू-नविन्देथा.मपचितिं वधत्रैः।।

卐 एवा सत्यं मघवाना युव.न्त-दिन्द्रश्च सोमोर्व.मश्व्य.ङ्गोः। आऽदर्दृत.मपिहिता.न्यश्ना- रिरिचथुः ≈ क्षाश्चित्ततृदाना।।

4.29 आ नः स्तुत इति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्र-स्त्रिष्टुप्।।

❀03.06.18 卐आ न^ स्स्तुत^ उप वाजेभि रूती- इन्द्र याहि हरिभि मन्दसानः। तिर.श्चिदर्य.स्सवना पुरू-ण्याङ्गूषेभि गृणान.स्सत्यराधाः।।

卐 आ हि ष्मा याति नर्य श्चिकित्वा-न्हूयमान.स्सोतृभि रुप यज्ञम्। स्वश्वो यो अभीरु र्मन्यमान-स्सुष्वाणेभि र्मदति सं ह वीरैः।।

卐 श्रावयेदस्य कर्णा वाजयध्यै- जुष्टा.मनु प्र दिशं मन्दयध्यै। उद्वावृषाणो राधसे तुविष्मा-न्कर.न्न^- इन्द्र .स्सुतीर्थाऽभयञ्च।।

卐 अच्छा यो गन्ता नाधमान.मूती- इत्था विप्रं हवमान.ङ्गृणन्तम्। उप त्मनि दधानो धुर्या3(आ)शू-न्त्सहस्राणि शतानि वज्रबाहुः।।

卐 त्वोतासो मघव.न्निन्द्र विप्रा^- वयन्ते स्याम सूरयो गृणन्तः। भेजानासो बृहद्दिवस्य राय^- आकाय्यस्य दावने पुरुक्षोः।।

4.30 नकिरिन्द्रेति चतुर्विंशत्यृचस्य सूक्तस्य, गौतमो वामदेव इन्द्रः-चतुर्दश्यादि तिसृणामिन्द्रोषसौ गायत्री-अष्टम्यन्त्ये अनुष्टुभौ।।

❀03.06.19 नकि.रिन्द्र त्वदुत्तरो- न ज्याया॰ अस्ति वृत्रहन्न्। नकिरेवा यथा त्वम्।।

卐 सत्रा ते अनु कृष्टयो- विश्वा चक्रेव वावृतुः। सत्रा महा॰ असि श्रुतः।।

卐 विश्वे चनेदना त्वा- देवास^ इन्द्र युयुधुः। यदहा नक्त.माऽतिरः।।

卐 यत्रोत बाधितेभ्य- श्चक्र.ङ्कुत्साय युध्यते। मुषाय^ इन्द्र सूर्यम्।।

卐 यत्र देवा॰ ऋघायतो -विश्वा॰ अयुध्य^ एक^ इत्। त्वमिन्द्र वनू॰ रहन्न्।।

❀03.06.20 卐यत्रोत मर्त्याय क-मरिणा^ इन्द्र सूर्यम्। प्राऽव श्शचीभि रेतशम्।।

卐 किमादुतासि वृत्रह-न्मघव.न्मन्युमत्तमः। अत्राह दानु.माऽतिरः।।

卐 एत.द्धेदुत वीर्य1(अ)-मिन्द्र चकर्थ पौंस्यम्। स्त्रियँ यद्दुर्हणायुवँ- वधी र्दुहितर.न्दिवः।।

卐 दिवश्चिद्धा दुहितरं- महा.न्महीयमानाम्। उषासं.मिन्द्र संपिणक्।।

卐 अपोषा^ अनस.स्सर-त्संपिष्टा.दह बिभ्युषी। नि यत्सीं शिश्नथ.द्वृषा।।

❀03.06.21 卐एतदस्या^ अन शशये- सुसंपिष्टं विपाश्या। ससार सीं परावतः।।

卐 उत सिन्धुँ विबाल्यँ- वितस्थाना.मधि क्षमि। परि ष्ठा^ इन्द्र मायया।।

卐 उत शुष्णस्य धृष्णुया- प्र मृक्षो अभि वेदनम्। पुरो यदस्य संपिणक्।।

卐 उत दास.ङ्कौलितरं- बृहतः पर्वता.दधि। अवाह.न्निन्द्र शम्बरम्।।

卐 उत दासस्य वर्चिन-स्सहस्राणि शतावधीः। अधि पञ्च प्रधीऽ रिव।।

❀03.06.22 卐उत त्यं पुत्र.मग्रुवः- परावृक्तं शतक्रतुः। उक्थे.ष्विन्द्र^आऽभजत्।।

卐 उत त्या तुर्वशायदू~- अस्नातारा शचीपतिः। इन्द्रो विद्वाऽ अपारयत्।।

卐 उत त्या सद्य^ आर्या- सरयो रिन्द्र पारतः। अर्णाचित्ररथा ऽवधीः।।

卐 अनु द्वा जहिता नयो-ऽन्धं श्रोण.ञ्च वृत्रहन्न्। न तत्ते सुम्न.मष्टवे।।

卐 शत.मश्मन्मयीनां- पुरा.मिन्द्रो व्यास्यत्। दिवोदासाय दाशुषे।।

❀03.06.23 卐अस्वापय.द्दभीतये- सहस्रा त्रिंशतं हथैः। दासाना.मिन्द्रो मायया।।

卐 स घे.दुतासि वृत्रह-न्त्समान^ इन्द्र गोपतिः। यस्ता विश्वानि चिच्युषे।।

卐 उत नूनँ यदिन्द्रिय.ङ्करिष्या^ इन्द्र पौंस्यम्। अद्या नकिष्ट.दामिनत्।।

卐 वामँवाम.न्त आदुरे- देवो ददा.त्वर्यमा। वामं पूषा वामं भगो- वाम.न्देवः करूळती।।

4.31 कया न इति पञ्चदशर्चस्य सूक्तस्य, गौतमो वामदेव इन्द्रो गायत्री-तृतीया पादनिचृत्।।

❀03.06.24 卐कया नश्चित्र^ आ भुव-दूती सदावृध.स्सखा। कया शचिष्ठया वृता।।

卐 कस्त्वा सत्यो मदानां- मंहिष्ठो मत्स.दन्धसः। दृळ्हा चिदारुजे वसु।।

卐 अभीषु ण सखीना-मविता जरितृणाम्। शतं भवा.स्यूतिभिः।।

卐 अभी न^ आ ववृत्स्व- चक्र.न्न वृत्त.मर्वतः। नियुद्भि श्चर्षणीनाम्।।

卐 प्रवता हि क्रतूना-मा हा पदेव गच्छसि। अभक्षि सूर्ये सचा।।

❀03.06.25 卐सँ यत्त इन्द्र मन्यव-स्स.ञ्चक्राणि दधन्विरे। अध त्वे अध सूर्ये।।

卐 उत स्मा हि त्वामाहुरि-न्मघवानं शचीपते। दातार.मविदीधयुम्।।

卐 उत स्मा सद्य^ इत्परि- शशमानाय सुन्वते। पुरू चिन्मंहसे वसु।।

卐 नहि ष्मा ते शत.ञ्चन- राधो वरन्त^ आमुरः। न च्यौत्नानि करिष्यतः।।

卐 अस्मा॰ अवन्तु ते शत-मस्मा.न्त्सहस्र मूतयः। अस्मा.न्विश्वा^अभिष्टयः।।

❀03.06.26 अस्मा॰ इहाऽवृणीष्व- सख्याय स्वस्तये। महो राये दिवित्मते।।

卐 अस्मा॰ अविड्ढि विश्व-हेन्द्र राया परीणसा। अस्मा.न्विश्वाभि रूतिभिः।।

卐 अस्मभ्य.न्ता॰ अपा वृधि- व्रजा॰ अस्तेव गोमतः। नवाभि रिन्द्रोतिभिः।।

卐 अस्माक.न्धृष्णुया रथो- द्युमा॰ इन्द्रानपच्युतः। गव्यु रश्वयु रीयते।।

卐 अस्माक.मुत्तम.ङ्कृधि- श्रवो देवेषु सूर्य। वर्षिष्ठ.न्द्यामिवोपरि।

4.32 आ तू न इति चतुर्विंशत्यृचस्य सूक्तस्य, गौतमो वामदेव- इन्द्रोन्त्ययो रिन्द्राश्वौ गायत्री।।

❀03.06.27 卐आ तू न^ इन्द्र वृत्रह-न्नस्माक.मर्धमा गहि। महा.न्महीभि रूतिभिः।।

卐 भृमि.श्चि.द्घासि तूतुजि- रा चित्र चित्रिणीष्वा। चित्र.ङ्कृणो.ष्यूतये।।

卐 दभ्रेभि श्चिच्छशीयांसं- हंसि व्राधन्त.मोजसा। सखिभि र्ये त्वे सचा।।

卐 वय.मिन्द्र त्वे सचा- वय.न्त्वाऽभि नोनुमः। अस्मा॰अस्मा॰ इदुदव।।

卐 स नश्चित्राभि रद्रिवो-ऽनवद्याभि रूतिभिः। अनाधृष्टाभि रा गहि।।

❀03.06.28 卐भूयामो~ षु त्वावत-स्सखाय^ इन्द्र गोमतः। युजो वाजाय घृष्वये।।

卐 त्वं ह्येक^ ईशिष- इन्द्र वाजस्य गोमतः। स नो यन्धि मही.मिषम्।।

卐 न त्वा वरन्ते अन्यथा- यद्दित्ससि स्तुतो मघम्। स्तोतृभ्य^ इन्द्र गिर्वणः।।

卐 अभि त्वा गोतमा गिरा-ऽनूषत प्र दावने। इन्द्र वाजाय घृष्वये।।

卐 प्र ते वोचाम वीर्या3(आ)- या^ मन्दसान^ आ ऽरुजः। पुरो दासी रभीत्य।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀03.06.29 卐ता ते गृणन्ति वेधसो- यानि चकर्थ पौंस्या। सुते.ष्विन्द्र गिर्वणः।।

卐 अवीवृधन्त गोतमा^- इन्द्र त्वे स्तोमवाहसः। ऐषु धा^ वीरव.द्यशः।।

卐 यच्चिद्धि शश्वता.म-सीन्द्र साधारण.स्त्वम्। तन्त्वा वयं हवामहे।।

卐 अर्वाचीनो वसो~ भ-वास्मे सु मत्स्वान्धसः। सोमाना.मिन्द्र सोमपाः।।

卐 अस्माक.न्त्वा मतीना-मा स्तोम^ इन्द्र यच्छतु। अर्वागा वर्तया हरी~।।

卐 पुरोळाश.ञ्च नो घसो -जोषयासे गिर.श्च नः। वधूयुरिव योषणाम्।।

❀03.06.30 卐सहस्रँ व्यतीनाँ- युक्ताना.मिन्द्र.मीमहे। शतं सोमस्य खार्यः।।

卐 सहस्रा ते शता वय-ङ्गवा.मा च्यावयामसि। अस्मत्रा राध^ एतु ते।।

卐 दश ते कलशानां -हिरण्याना.मधीमहि। भूरिदा^ असि वृत्रहन्न्।।

卐 भूरिदा^ भूरि देहि नो- मा दभ्रं भूर्या भर। भूरि घेदिन्द्र दित्ससि।।

卐 भूरिदा^ ह्यसि श्रुतः- पुरुत्रा शूर वृत्रहन्न्। आ नो भजस्व राधसि।।

卐 प्र ते बभ्रू~ विचक्षण- शंसामि गोषणो नपात्। माभ्या.ङ्गा^ अनु शिश्रथः।।

卐 कनीनकेव विद्रधे- नवे द्रुपदे अर्भके। बभ्रू~ यामेषु शोभेते~।।

卐 अरं म उस्रयाम्णे-ऽर.मनुस्रयाम्णे। बभ्रू~ यामेष्वस्रिधा।। ।। इति षष्ठाध्याय स्समाप्तः ।।

## ≈0≈तृतीयाष्टके सप्तमाध्यायः। (वर्गाः 1-27)

4.33 प्र ऋभुभ्य इत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- ऋभव-स्त्रिष्टुप्।।

❀03.07.01 卐प्र ऋभुभ्यो दूत.मिव वाचमिष्य -उपस्तिरे श्वैतरी.न्धेनु.मीळे। ये वातजूता.स्तरणिभि रेवैः- परि द्यां सद्यो अपसो बभूवुः।।

卐 यदाऽर.मक्र.न्नृभवः पितृभ्यां- परिविष्टी वेषणा दंसनाभिः। आदि.द्देवाना.मुप सख्य.माय-न्धीरासः पुष्टि.मवह.न्मनायै।।

卐 पुन.र्ये चक्रुः पितरा युवाना- सना यूपेव जरणा शयाना। ते वाजो विभ्वाँ ऋभु रिन्द्रवन्तो- मधुप्सरसो नोऽवन्तु यज्ञम्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 यत्सँवत्सं.मृभवो गामरक्ष-न्यत्सँवत्सं.मृभवो मा^ अपिंशन्न्। यत्सँवत्स.मभंर.न्भासो अस्या-स्ताभि श्शमीभि रमृतत्व.माशुः।।

卐 ज्येष्ठ^ आह चमसा द्वा करेति- कनीया.न्त्री.न्कृणवा.मेत्याह। कनिष्ठ^ आह चतुर स्करेति- त्वष्ट ऋभव स्तत्पनय.द्वचो वः।।

❀03.07.02 卐सत्य.मूचु नंर^ एवा हि चक्रु- रनु स्वधा.मृभवो जग्मु रेताम्। विभ्राजमानाँ श्चमसा॰ अहे-वावेन त्त्वष्टा चतुरो दद्दश्वान्।।

卐 द्वादश द्यून्यदगोह्यस्या-ऽऽतिथ्ये रण न्नृभवं स्ससन्तः। सुक्षेत्राऽकृण्व.न्ननयन्त सिन्धू-न्धन्वातिष्ठ .न्नोषधी र्निम्न.मापः।।

卐 रथँ ये चक्रु.स्सुवृत.न्नरेष्ठाँ- ये धेनुँ विश्वजुवँ विश्वरूपाम्। त आ तक्ष.न्त्वृभवो रयि.न्न- स्स्ववस स्स्वपस स्सुहस्ताः।।

卐 अपो ह्येषा.मजुषन्त देवा^- अभि क्रत्वा मनसा दीध्यानाः। वाजो देवाना.मभव.त्सुक-र्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा।।

卐 ये हरी~ मेध.योक्था मदन्त^- इन्द्राय चक्रु.स्सुयुजा ये अश्वा। ते राय.स्पोष.न्द्रविणा.न्यस्मे- धत्त र्ऋभवः ≈ क्षेमयन्तो न मित्रम्।।

卐 इदाऽह्नः पीति.मुत वो मद.न्धु-र्न ऋते श्रान्तस्य सख्याय देवाः। ते नून.मस्मे र्ऋभवो वसूनि- तृतीये अस्मि.न्त्सवने दधात।।

4.34 ऋभुर्विभ्वेत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- ऋभव-स्त्रिष्टुप्।।

❀03.07.03 卐ऋभु र्विभ्वा वाज^ इन्द्रो नो अ-च्छेमँ यज्ञं रत्नधे.योप यात। इदा हि वो धिषणा देव्यह्ना- मधा.त्पीतिं सं मदा^ अग्मता वः।।

卐 विदानासो जन्मनो वाजरत्ना^- उत ऋतुभिर् ऋभवो मादयध्वम्। सँ वो मदा^ अग्मत सं पुरन्धि- स्सुवीरा.मस्मे रयि.मेरयध्वम्।।

卐 अयं वो यज्ञ ऋभवोऽकारि- यमा मनुष्व.त्प्रदिवो दधिध्वे। प्र वोऽच्छा जुजुषाणासो अस्थु- रभूत विश्वे अग्रि.योत वाजाः।।

卐 अभूदु वो विधते रत्नधेय-मिदा नरो दाशुषे मर्त्याय। पिबत वाजा ऋभवो ददे वो- महि तृतीयं सवनं मदाय।।

卐 आ वाजा यातोप न ऋभुक्षा- महो नरो द्रविणसो गृणानाः। आ वः पीतयोऽभिपित्वे अह्ना-मिमा अस्त.न्नवस्व.इव ग्मन्न्।।

❀03.07.04 卐आ नपात.श्शवसो यातनो-पेमं यज्ञ.न्नमसा हूयमानाः। सजोषस.स्सूरयो यस्य च स्थ- मध्वः पात रत्नधा इन्द्रवन्तः।।

卐 सजोषा इन्द्र वरुणेन सोमं- सजोषाः पाहि गिर्वणो मरुद्भिः। अग्रेपाभिर् ऋतुपाभि.स्सजोषा- ग्नास्पत्नीभी रत्नधाभि स्सजोषाः।।

卐 सजोषस आदित्यै मादयध्वं- सजोषस ऋभवः पर्वतेभिः। सजोषसो दैव्येना सवित्रा- सजोषस स्सिन्धुभी रत्नधेभिः।।

卐 ये अश्विना ये पितरा य ऊती- धेनु.न्ततक्षुर् ऋभवो ये अश्वा। ये अंसत्रा य ऋध.ग्रोदसी ये- विभ्वो नर.स्स्वपत्यानि चक्रुः।।

卐 ये गोमन्तं वाजवन्तं सुवीरं- रयि.न्धत्थ वसुमन्तं पुरुक्षुम्। ते अग्रेपा ऋभवो मन्दसाना- अस्मे धत्त ये च राति.ङ्गृणन्ति।।

卐 नापाभूत न वोऽतीतृषा-मानिश्शस्ता ऋभवो यज्ञे अस्मिन्न्। समिन्द्रेण मदथ सं मरुद्भि- स्सं राजभी रत्नधेयाय देवाः।।

4.35 इहोपेति नवर्चस्य सूक्तस्य, गौतमो वामदेव ऋभवस्त्रिष्टुप्।।

❀03.07.05 इहोप यात शवसो नपात-स्सौधन्वना ऋभवो माऽप भूत। अस्मि.न्हि व. स्सवने रत्नधेय-ङ्गमन्त्विन्द्र मनु वो मदासः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 आऽग.न्नृभूणा.मिह रत्नधेय-मभू.त्सोमस्य सुषुतस्य पीतिः। सुकृत्यया यत्स्वपस्यया चँ- एकँ विचक्र चमस.ञ्चतुर्धा।।

卐 व्यकृणोत चमस.ञ्चतुर्धा- सखे वि शिक्षे.त्यब्रवीत। अथैत वाजा^ अमृतस्य पन्था-ङ्गण.न्देवाना.मृभव स्सुहस्ताः।।

卐 किंमय.स्स्वि.च्चमस एष आस- यङ्काव्येन चतुरो विचक्र। अथा सुनुध्वं सवनं मदाय- पात ऋभवो मधुन.स्सोम्यस्य।।

卐 शच्याऽकर्त पितरा युवाना- शच्याऽकर्त चमस.न्देवपानम्। शच्या हरी~ धनुतरा वत-ष्टेन्द्रवाहा वृभवो वाजरत्नाः।।

❀03.07.06 卐यो व.स्सुनो त्यभिपित्वे अह्ना-न्तीव्रँ वाजास.स्सवनं मदाय। तस्मै रयि.मृभव.स्सर्ववीर- मा तक्षत वृषणो मन्दसानाः।।

卐 प्रात.स्सुत.मपिबो हर्यश्व- माध्य.न्दिनं सवन.ङ्केवलन्ते। समृभुभिः पिबस्व रत्नधेभि- स्सखीऱ्यां इन्द्र चकृषे सुकृत्या।।

卐 ये देवासो अभवता सुकृत्या- श्येना^ इवेदधि दिवि निषेद। ते रत्नन्धात शवसो नपात-स्सौधन्वना^ अभवता.मृतासः।।

卐 यत्तृतीयं सवनं रत्नधेय-मकृणुध्वं स्वपस्या सुहस्ताः। तदृभवः परिषिक्तँ व^ एत-त्सं मदेभि रिन्द्रियेभिः पिबध्वम्।।

4.36 अनश्वो जात इति नवर्चस्य सूक्तस्य, गौतमो वामदेव ऋभवो जगत्यन्त्या त्रिष्टुप्।।

❀03.07.07 卐अनश्वो जातो अनभीशु.रुक्थ्यो-3(ओ) रथ स्त्रिचक्रः परि वर्तते रजः। मह.त्तद्वो देव्यस्य प्रवाचन-न्द्या.मृभवः पृथिवीँ यच्च पुष्यथ।।

卐 रथँ ये चक्रु.स्सुवृतं सुचेतसो-ऽविह्वरन्तं मनस.स्परि ध्यया। ताऱ ऊ न्व1(अ)स्य सवनस्य पीतय- आ वो वाजा^ ऋभवो वेदयामसि।।

卐 तद्वो वाजा ऋभव.स्सुप्रवाचन-न्देवेषु विभ्वो अभव.न्महित्वनम्। जिव्री~ यत्सन्ता पितरा सनाजुरा- पुन युवाना चरथाय तक्षथ।।

卐 एकँ वि चक्र चमस.श्चतुर्वय-न्निश्चर्मणो गामरिणीत धीतिभिः। अथा देवे.ष्वमृतत्व.मानश- श्रुष्टी वाजा ऋभव.स्तद्व उक्थ्यम्।।

卐 ऋभुतो रयिः प्रथमश्रवस्तमो- वाजश्रुतासो यमजीजन.न्नरः। विभ्वतष्टो विदथेषु प्रवाच्यो- य .न्देवासोऽवथा स विचर्षणिः।।

❀03.07.08 卐स वाज्यर्वा स ऋषि र्वचस्यया- स शूरो अस्ता पृतनासु दुष्टरः। स रायस्पोषं स सुवीर्य.न्दधे- यँ वाजो विभ्वाँ ऋभवो यमाविषुः।।

卐 श्रेष्ठँ वः पेशो अधि धायि दर्शतं- स्तोमो वाजा ऋभव.स्त.ञ्जुजुष्टन। धीरासो हि ष्ठा कवयो विपश्चित- स्तान्व एना ब्रह्मणाऽऽवेदयामसि।।

卐 यूय.मस्मभ्य.न्धिषणाभ्य स्परि- विद्वांसो विश्वा नर्याणि भोजना। द्युमन्तँ वाजँ वृषशुष्म.मुत्तम-मा नो रयि.मृभव.स्तक्षताऽऽवयः।।

卐 इह प्रजा.मिह रयिं रराणा- इह श्रवो वीरव.त्तक्षता नः। येन वय.श्चितये.मात्यन्या-न्तँ वाज.श्चित्र .मृभवो ददा नः।।

4.37 उप न इत्यष्टर्चस्य सूक्तस्य, गौतमो वामदेव ऋभवस्त्रिष्टुप्-अन्त्याश्चतस्रोऽनुष्टुभः।।

❀03.07.09 卐उप नो वाजा अध्वर.मृभुक्षा- देवा यात पथिभि र्देवयानैः। यथा यज्ञं मनुषो विक्ष्वा3-(आ)सु दधिध्वे रण्वा स्सुदिने.ष्वह्नाम्।।

卐 ते वो हृदे मनसे सन्तु यज्ञा- जुष्टासो अद्य घृतनिर्णिजो गुः। प्र वः स्सुतासो हरयन्त पूर्णाः- क्रत्वे दक्षाय हर्षयन्त पीताः।।

卐 त्र्युदाय.न्देवहितँ यथा व-स्स्तोमो वाजाऋभुक्षणो ददे वः। जुह्वे मनुष्व.दुपरासु विक्षु- युष्मे सचा बृह.द्दिवेषु सोमम्।।

卐 पीवोअश्वा.श्शुचद्रथा^ हि भूता-यश्शिप्रा^ वाजिन.स्सुनिष्काः। इन्द्रस्य सूनो~ शवसो नपातो-ऽनु वश्चे.त्यग्रियं मदाय।।

卐 ऋभु.मृभुक्षणो रयिँ- वाजे वाजिन्तमँ युजम्। इन्द्रस्वन्तं हवामहे- सदासातम.मश्विनम्।।

❀03.07.10 卐सेदृभवो यमवथ- यूय.मिन्द्र.श्च मर्त्यम्। स धीभि रस्तु सनिता- मेधसाता सो अर्वता।।

卐 वि नो वाजा^ ऋभुक्षणः- पथ.श्चितन यष्टवे। अस्मभ्यं सूरय.स्स्तुता^- विश्वा^ आशा.स्तरीषणि।।

卐 तन्नो वाजा^ ऋभुक्षण^-इन्द्र नासत्या रयिम्। समश्व.ञ्चर्षणिभ्य^ आ- पुरु शस्त.मघत्तये।।

4.38 उतो हीति दशर्चस्य सूक्तस्य, गौतमो वामदेवो दधिक्रावा-आद्याया द्यावापृथिवी त्रिष्टुप्।।

❀03.07.11 卐उतो~ हि वा.न्दात्रा सन्ति पूर्वा- या पूरुभ्य.स्त्रसदस्यु र्नितोशे। क्षेत्रासा.न्ददथु रुर्वरासा-ङ्घन .न्दस्युभ्यो अभिभूति.मुग्रम्।।

卐 उत वाजिनं पुरुनिष्षिध्वान-न्दधिक्रामु ददथु र्विश्वकृष्टिम्। ऋजिप्यं श्येनं प्रुषितप्सु.माशु-ञ्चर्कृत्य .मर्यो नृपति.न्न शूरम्।।

卐 यं सीमनु प्रवतेव द्रवन्तँ- विश्वः पूरु.र्मदति हर्षमाणः। पड्भि र्गृध्यन्तं मेधयु.न्न शूरं- रथतुरँ वात.मिव ध्रजन्तम्।।

卐 य.स्स्माऽऽरुन्धानो गध्या समत्सु- सनुतर श्चरति गोषु गच्छन्न्। आविर्ऋजीको विदथा निचिक्य- त्तिरो अरतिं पर्याप^ आयोः।।

卐 उत स्मैनँ वस्त्र.मथिन्न तायु-मनु क्रोशन्ति क्षितयो भरेषु। नीचायमान.ञ्जसुरि.न्न श्येनं- श्रवश्चाच्छा पशुम.च्च यूथम्।।

❀03.07.12 卐उत स्माऽऽसु प्रथम.स्सरिष्य-न्नि वेवेति श्रेणिभी रथानाम्। स्रज.ङ्कृण्वानो जन्यो न शुभ्वा- रेणुं रेरिह.त्किरण.न्ददश्वान्।।

卐 उत स्य वाजी सहुरिर् ऋतावा- शुश्रूषमाण.स्तन्वा समर्ये। तुरँ यतीषु तुरय.न्नृजिप्यो-ऽधि भ्रुवोः किरते रेणु.मृञ्जन्न्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उत स्मास्य तन्यतोरिव द्यो-र् ऋघायतो अभियुजो भयन्ते। यदा सहस्र मभि षीमयोधी- दुर्वर्तु स्स्मा भवति भीम^ ऋञ्जन्।।

卐 उत स्मास्य पनयन्ति जना^- जूति.ङ्कृष्टिप्रो अभिभूति.माशोः। उतैनमाहु.स्समिथे वियन्तः- परा दधिक्रा^ असर.त्सहस्रैः।।

卐 आ दधिक्रा.श्शवसा पञ्च कृष्टी-स्सूर्यइव ज्योतिषाऽप स्ततान। सहस्रसा.श्शतसा^ वाज्यर्वा -पृणक्तु मध्वा समिमा वचांसि।।

4.39 आशुमिति षड्चस्य सूक्तस्य, गौतमो वामदेवो- दधिक्रावा त्रिष्टुबन्त्याऽनुष्टुप्।।

❀03.07.13 卐आशु.न्दधिक्रा.न्तमु नु ष्टवाम- दिव.स्पृथिव्या उत चर्किराम। उच्छन्तीर्मा मुषस स्सूदय-न्त्वति विश्वानि दुरितानि पर्षन्।।

卐 मह श्चर्क.र्म्यर्वतः क्रतुप्रा^- दधिक्राव्णः पुरुवारस्य वृष्णः। यं पूरुभ्यो दीदिवांस.न्नाग्नि.न्ददथु र्मित्रावरुणा ततुरिम्।।

卐 यो अश्वस्य दधिक्राव्णो अकारी-त्समिद्धे अग्ना उषसो व्युष्टौ। अनागस.न्तमदितिः कृणोतु- स मित्रेण वरुणेना सजोषाः।।

卐 दधिक्राव्ण^ इष^ ऊर्जो महो य-दमन्महि मरुता.न्नाम भद्रम्। स्वस्तये वरुणं मित्र.मग्निं- हवामह इन्द्रं वज्रबाहुम्।।

卐 इन्द्र.मिवे.दुभये वि ह्वयन्त -उदीराणा^ यज्ञ.मुपप्रयन्तः। दधिक्रामु सूदनं मर्त्याय- ददथु र्मित्रावरुणा नो अश्वम्।।

卐 दधिक्राव्णो अकारिष-ञ्जिष्णो रश्वस्य वाजिनः। सुरभि नो मुखा कर-त्प्र ण^ आयूंषि तारिषत्।।

4.40 दधिक्राव्ण इति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेवो- दधिक्रावा अन्त्याया स्सूर्य-स्त्रिष्टुप्-अन्त्याश्चतस्रो- जगत्यः।।

❀03.07.14 卐दधिक्राव्ण^ इदु नु चर्किराम- विश्वा^ इन्मा मुषस.स्सूदयन्तु। अपा.मग्ने रुषस.स्सूर्यस्य- बृहस्पते राङ्गिरसस्य जिष्णोः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 सत्वा भरिषो गविषो दुवन्यस-च्छ्रवस्या.दिष उषस^ स्तुरण्यसत्। सत्यो द्रवो द्रवर॰ पतङ्गरो-दधिक्रावेष.मूर्जं स्वर्जनत्।।

卐 उत स्मास्य द्रवत.स्तुरण्यत॰- पर्ण.न्न वेरनु वाति प्रगर्धिनः। श्येनस्येव ध्रजतो अङ्कसं परि-दधिक्राव्णं .स्सहोर्जा तरित्रतः।।

卐 उत स्य वाजी क्षिपणि.न्तुरण्यति- ग्रीवायां बद्धो अपिकक्ष आसनि। क्रतु.न्दधिक्रा^ अनु सन्तवीत्व-त्पथा.मङ्कां.स्यन्वापनीफणत्।।

卐 हंस.श्शुचिष.द्वसु रन्तरिक्षस-द्धोता वेदिष.दतिथि दुरोणसत्। नृष.द्वरस.दृतस.द्व्योमस-दब्जा^ गोजा^ ऋतजा^ अद्रिजा ^ऋतम्।।

4.41 इन्द्रा को वा मित्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्रावरुणौ- त्रिष्टुप्।।

❀03.07.15 卐इन्द्रा को वां वरुणा सुम्नमाप- स्तोमो हविष्मा॰ अमृतो न होता। यो वां हृदि क्रतुमा॰ अस्मदुक्त॰- पस्पर्श.दिन्द्रावरुणा नमस्वान्।।

卐 इन्द्रा ह यो वरुणा चक्र आपी~- देवौ मर्त.स्सख्याय प्रयस्वान्। स हन्ति वृत्रा समिथेषु शत्रू-नवोभिर्वा महद्भि.स्स प्र शृण्वे।।

卐 इन्द्रा ह रत्नं वरुणा धे-ष्ठेत्था नृभ्य.श्शशमानेभ्य.स्ता। यदी सखाया सख्याय सोमैः-स्सुतेभि.स्सुप्रयसा मादयैते~।।

卐 इन्द्रा युवं वरुणा दिद्यु.मस्मि-न्नोजिष्ठ.मुग्रा नि वधिष्टं वज्रम्। यो नो दुरेवो वृकति दभीति- स्तस्मि.न्मिमाथा.मभिभू.त्योजः।।

卐 इन्द्रा युवं वरुणा भूत.मस्या^- धिय॰ प्रेतारा वृषभेव धेनोः। सा नो दुहीय.द्यवसेव गत्वी- सहस्रधारा पयसा मही गौः।।

❀03.07.16 卐तोके हिते तनय उर्वरासु- सूरो दृशीके वृषण.श्च पौंस्ये। इन्द्रा नो अत्र वरुणा स्याता-मवोभि दस्मा परितक्म्यायाम्।।

卐 युवामि.द्ध्वसे पूर्व्याय- परि प्रभूती~ गविष स्स्वापी~। वृणीमहे सख्याय प्रियाय- शूरा मंहिष्ठा पितरेव शंभू~।।

卐 ता^ वा.न्धियोऽवसे वाजयन्ती- राजि.न्न जग्मु र्युवयू स्सुदानू~। श्रिये न गाव^ उप सोम.मस्थु-रिन्द्र.ङ्गिरो वरुणं मे मनीषाः।।

卐 इमा^ इन्द्रँ वरुणं मे मनीषा^-अग्म.न्नुप द्रविण.मिच्छमानाः। उपे.मस्थु जोष्टारइव वस्वो- रघ्वीरिव श्रवसो भिक्षमाणाः।।

卐 अश्व्यस्य त्मना रथ्यस्य पुष्टे- र्नित्यस्य रायः पतय.स्स्याम। ता चक्राणा ऊतिभि र्नव्यसीभि- रस्मत्रा रायो नियुत.स्सचन्ताम्।।

卐 आ नो बृहन्ता बृहतीभि रूती- इन्द्र यातँ वरुण वाजसातौ। यद्दिद्यवः पृतनासु प्रक्रीळा-न्तस्य वां स्याम सनितार^ आजेः।।

4.42 मम द्वितेति दशर्चस्य सूक्तस्य, पौरुकुत्स्य स्त्रसदस्युः-आद्यानां षण्णां त्रसदस्युर्देवता-अन्त्यानां चतसृणामिन्द्रावरुणौ- त्रिष्टुप्।।

❀03.07.17 卐मम द्विता राष्ट्र.ङ्क्षत्रियस्य- विश्वाऽयो विश्वे अमृता^ यथा नः। क्रतुं सचन्ते वरुणस्य देवा^- राजामि कृष्टे रुपमस्य वव्रेः।।

卐 अहं राजा वरुणो मह्य.न्ता-न्यसुर्याणि प्रथमा धारयन्त। क्रतुं सचन्ते वरुणस्य देवा^- राजामि कृष्टे रुपमस्य वव्रेः।।

卐 अह.मिन्द्रो वरुण.स्ते~ महि-त्वोर्वी~ गभीरे~ रजसी~ सुमेके~। त्वष्टेव विश्वा भुवनानि विद्वा-न्त्समैरयं रोदसी धारय.ञ्च।।

卐 अह.मपो अपिन्व.मुक्षमाणा^- धारय.न्दिवं सदन ऋतस्य। ऋतेन पुत्रो अदितेर् ऋता-वोत त्रिधातु प्रथय.द्वि भूम।।

卐 मान्नर.स्स्वश्वा वाजयन्तो- माँ वृता.स्समरणे हवन्ते। कृणो.म्याजिं मघवाऽह.मिन्द्र^- इयर्मि रेणु .मभिभूत्योजाः।।

❀03.07.18 卐अह.न्ता विश्वा चकर.न्नकिर्मा- दैव्यं सहो वरते अप्रतीतम्। यन्मा सोमासो मम.दन्य .दुक्थो-भे~ भयेते~ रजसी ~अपारे~।।

卐 विदुष्टे विश्वा भुवनानि तस्य- ता प्र ब्रवीषि वरुणाय वेधः। त्वँ वृत्राणि श्रृण्विषे जघन्वा-न्त्वँ वृता॰ अरिणा^ इन्द्र सिन्धून्।।

卐 अस्माक.मत्र पितर.स्त आस-न्त्सप्त ऋषयो दौर्गहे बध्यमाने। त आऽयजन्त त्रसदस्यु.मस्या^- इन्द्र.न्न वृत्रतुर.मर्धदेवम्।।

卐 पुरुकुत्सानी हि वामदाश-द्धव्येभि रिन्द्रावरुणा नमोभिः। अथा राजान.न्त्रसदस्यु.मस्या^- वृत्रहण .न्ददथु रर्धदेवम्।।

卐 राया वयं ससवांसो मदेम- हव्येन देवा^ यवसेन गावः। तान्धेनु.मिन्द्रावरुणा युव.न्नो- विश्वाहा धत्त .मनपस्फुरन्तीम्।।

4.43 क उ श्रवदिति सप्तर्चस्य सूक्तस्य, सौहोत्रौ पुरुमीळ्हाजमीळ्हावश्विनौ- त्रिष्टुप्।।

❀03.07.19 卐क^ उ श्रव.त्कतमो यज्ञियानाँ- वन्दारु देवः कतमो जुषाते। कस्येमा.न्देवी.ममृतेषु प्रेष्ठां- हृदि श्रेषाम सुष्टुतिं सुहव्याम्।।

卐 को मृळाति कतम^ आगमिष्ठो- देवानामु कतम.श्शंभविष्ठः। रथ.ङ्कमाहु द्रव.दश्व.माशुँ- यं सूर्यस्य दुहिताऽ वृणीत।।

卐 मक्षू हि ष्मा गच्छथ^ ईवतो द्यू-निन्द्रो न शक्तिं परितक्म्यायाम्। दिव^ आजाता दिव्या सुपर्णा- कया शचीनां भवथ.श्शचिष्ठा।।

卐 का वां भू.दुपमातिः कया न^- आऽश्विना गमथो हूयमाना। को वां महश्चि.त्त्यजसो अभीके- उरुष्यतं माध्वी~ दस्रा न^ ऊती।।

卐 उरु वां रथः परि नक्षति द्या-मा यत्समुद्रा.दभि वर्तते वाम्। मध्वा माध्वी~ मधु वां प्रुषाय-न्यत्सीँ वां पृक्षो भुरजन्त पक्वाः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 सिन्धु.र्ह वां रसया सिञ्चदश्वा-न्घृणा वयोऽरुषास॰ परि ग्मन्न्। तदू ष्षु वामजिर.ञ्चेति यानँ -येन पती~ भवथ.स्सूर्यायाः।।

卐 इहेह यद्वां समना पपृक्षे- सेय मस्मे सुमति वाजरत्ना। उरुष्यत.ञ्जरितारँ युवं ह- श्रित॰ कामो नासत्या युवद्रिक्।।

4.44 तँ वामिति सप्तर्चस्य सूक्तस्य, सौहोत्रौ पुरुमीळ्हाजमीळ्हावश्विनौ- त्रिष्टुप्।।

❀03.07.20 卐तँ वां रथं वय.मद्या हुवेम- पृथुज्रय.मश्विना सङ्गति.ङ्गोः। यस्सूर्याँ वहति वन्धुरायु -र्गिर्वाहसं पुरुतमँ वसूयुम्।।

卐 युवं श्रिय.मश्विना देवता ता-न्दिवो नपाता वनथ.श्शचीभिः। युवो र्वपु रभि पृक्ष.स्सचन्ते- वहन्ति यत्क.कुहासो रथे वाम्।।

卐 को वा.मद्या करते रातहव्य^- ऊतये वा सुतपेयाय वाऽर्कैः। ऋतस्य वा वनुषे पूर्व्याय- नमो येमानो अश्विना ऽऽववर्तत्।।

卐 हिरण्ययेन पुरुभू~ रथे-नेमँ यज्ञ.न्नासत्योप यातम्। पिबाथ^ इन्मधुन स्सोम्यस्य- दधथो रत्नँ विधते जनाय।।

卐 आ नो यात.न्दिवो अच्छा पृथिव्या^- हिरण्ययेन सुवृता रथेन। मा वामन्ये नि यम.न्देवयन्त-स्सँ यद्ददे नाभि॰ पूर्व्या वाम्।।

卐 नू नो रयिं पुरुवीरं बृहन्त-न्दस्रा मिमाथा.मुभये.ष्वस्मे। नरो यद्वा.मश्विना स्तोम.माव-न्त्सधस्तुति माजमीळ्हासो अग्मन्न्।।

卐 इहेह यद्वां समना पपृक्षे- सेय मस्मे सुमति वाजरत्ना। उरुष्यत.ञ्जरितारँ युवं ह- श्रित॰ कामो नासत्या युवद्रिक्।।

4.45 एष स्य इति सप्तर्चस्य सूक्तस्य, गौतमो वामदेवोऽश्विनौ- जगत्यन्त्या त्रिष्टुप्।।

❀03.07.21 卐एष स्य भानु रुदियर्ति युज्यते- रथ॰ परिज्मा दिवो अस्य सानवि। पृक्षासो अस्मि .न्मिथुना^ अधि त्रयो- दृति स्तुरीयो मधुनो विरप्शते।।

卐 उद्वां पृक्षासो मधुमन्त^ ईरते- रथा^ अश्वास^ उषसो व्युष्टिषु। अपोर्णुवन्त स्तम^ आ परीवृतं- स्व1(अ)र्ण शुक्र.न्तन्वन्त^ आ रजः।।

卐 मध्वः पिबतं मधुपेभि रासभि -रुत प्रियं मधुने युञ्जाथां रथम्। आ वर्तनिं मधुना जिन्वथ स्पथो- दृतिं वहेथे~ मधुमन्त.मश्विना।।

卐 हंसासो ये वां मधुमन्तो अस्रिधो- हिरण्यपर्णा^ उहुव^ उषर्बुधः। उदप्रुतो मन्दिनो मन्दिनिस्पृशो- मध्वो न मक्ष स्सवनानि गच्छथः।।

卐 स्वध्वरासो मधुमन्तो अग्नय^- उस्रा जरन्ते प्रति वस्तो रश्विना। यन्निक्तहस्त स्तरणि र्विचक्षण- स्सोमं सुषाव मधुमन्त.मद्रिभिः।।

卐 आकेनिपासो अहभि र्दविध्वत-स्स्व1(अ)र्ण शुक्र.न्तन्वन्त^ आ रजः। सूर श्चिदश्वा.न्युयुजान^ ईयते- विश्वा॰ अनु स्वधया चेतथ स्पथः।।

卐 प्र वा.मवोच.मश्विना धियन्धा- रथ स्वश्वो अजरो यो अस्ति। येन सद्यः परि रजांसि याथो- हविष्मन्त .न्तरणिं भोज.मच्छ।।

☫ 4.46 अग्रं पिबेति सप्तर्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्रवायू- आद्याया वायु-र्गायत्री।।

❀03.07.22 卐अग्रं पिबा मधूनां- सुतं वायो~ दिविष्टिषु। त्वं हि पूर्वपा^ असि।।

卐 शतेना नो अभिष्टिभि -र्नियुत्वा॰ इन्द्रसारथिः। वायो~ सुतस्य तृम्पतम्।।

卐 आ वां सहस्रं हरय^-इन्द्रवायू~ अभि प्रयः। वहन्तु सोमपीतये।।

卐 रथं हिरण्यवन्धुर-मिन्द्रवायू~ स्वध्वरम्। आ हि स्थाथो दिविस्पृशम्।।

卐 रथेन पृथुपाजसा- दाश्वांस.मुप गच्छतम्। इन्द्रवायू~ इहा ऽगतम्।।

卐 इन्द्रवायू~ अयं सुत-स्त.न्देवेभि.स्सजोषसा। पिबत.न्दाशुषो गृहे।।

卐 इह प्रयाण.मस्तु वा-मिन्द्रवायू~ विमोचनम्। इह वां सोमपीतये।।

☫ 4.47 वायो शुक्र इति चतुर्ऋचस्य सूक्तस्य, गौतमो वामदेव- इन्द्रवायू- आद्याया वायु-रनुष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀03.07.23 卐वायो᳚~ शु॒क्रो अ॑यामि ते॒- मध्वो॒ अग्र॒.न्दिवि॑ष्टिषु। आ या᳚हि॒ सोम॑पीतये- स्पा॒र्हो दे᳚व नि॒युत्व॑ता।।

卐 इन्द्र॑.श्च वाय॒~वेषां॒- सोमा᳚नां पी॒ति.म॑र्हथः। यु॒वां हि यन्तीन्द॑वो- नि॒म्न.मापो॒ न स॒ध्र्य॑क्।।

卐 वाय॒~ विन्द्र॑श्च शु॒ष्मिणा᳚- स॒रथं᳚ शवस.स्पती~। नि॒युत्व᳚न्ता न^ ऊ॒तय॑- आ या᳚तं॒ सोम॑पीतये।।

卐 या वां॒ सन्ति॑ पुरु॒स्पृहो᳚- नि॒युतो᳚ दा॒शुषे᳚ नरा। अ॒स्मे ता^ य॑ज्ञवाह॒-सेन्द्र॑वायू॒~ नि य॑च्छतम्।।

☸ 4.48 वि हि होत्रा इति पञ्चर्चस्य सूक्तस्य, गौतमो वामदेवो- वायु-रनुष्टुप्।।

❀03.07.24 卐वि॒हि होत्रा॒^ अवी᳚ता॒- विपो॒ न रायो᳚ अ॒र्यः। वाय॒~वा च॒न्द्रेण॒ रथे᳚न- या॒हि सु॒तस्य॑ पी॒तये᳚।।

卐 निर्यु॒वा॒णो अश॑स्ती -र्नि॒युत्वा॒ँ इन्द्र॑सारथिः। वाय॒~वा च॒न्द्रेण॒ रथे᳚न- या॒हि सु॒तस्य॑ पी॒तये᳚।।

卐 अनु॑ कृ॒ष्णे~ वसु॑धिती~- ये॒माते᳚ वि॒श्वपे᳚शसा। वाय॒~वा च॒न्द्रेण॒ रथे᳚न- या॒हि सु॒तस्य॑ पी॒तये᳚।।

卐 वह᳚न्तु त्वा मनो॒युजो᳚- यु॒क्तासो᳚ नव॒तिर्नव॑। वाय॒~वा च॒न्द्रेण॒ रथे᳚न- या॒हि सु॒तस्य॑ पी॒तये᳚।।

卐 वायो᳚~ श॒तं हरी᳚णाँ -यु॒वस्व॒ पोष्या᳚णाम्। उ॒त वा॒ ते स॒ह॒स्रिणो॒- रथ॒^ आ या᳚तु॒ पाज॑सा।।

☸ 4.49 इदँ वामिति षड्चस्य सूक्तस्य, गौतमो वामदेव- इन्द्राबृहस्पती- गायत्री।।

❀03.07.25 卐इ॒दँ वा᳚मा॒स्ये᳚ ह॒विः- प्रि॒य मिन्द्रा᳚बृहस्पती~। उ॒क्थं मद॑.श्च शस्यते।।

卐 अ॒यँ वां॒ परि॑ षिच्यते॒- सोम॑^ इन्द्राबृहस्पती~। चारु॒ र्मदा᳚य पी॒तये᳚।।

卐 आ न॑^ इन्द्राबृहस्पती~- गृ॒ह.मिन्द्र॑.श्च गच्छतम्। सो॒म॒पा सोम॑पीतये।।

卐 अ॒स्मे᳚ इन्द्राबृहस्पती ~-र॒यि न्ध॑त्तं शत॒ग्विनम्। अश्वा᳚वन्तं सह॒स्रिण᳚म्।।

卐 इन्द्रा॒बृह॒स्पती᳚~ व॒यं- सु॒ते गी॒र्भि र्ह॑वामहे। अ॒स्य सोम॑स्य पी॒तये᳚।।

卐 सोम॑.मिन्द्राबृहस्पती॒~- पिब॑त.न्दा॒शुषो᳚ गृ॒हे। मा॒दये᳚था॒.न्तदो॑कसा।।

☸ 4.50 यस्तस्तम्भेत्येकादशर्चस्य सूक्तस्य, गौतमो वामदेवो- बृहस्पति-रन्त्ययोर्द्वयो रिन्द्राबृहस्पती- त्रिष्टुप्-दशमी जगती-(जननाम्न ऋषेः पुत्रो जान इति सर्वा भाष्यम्-जार इति सायणः)

❀03.07.26 卐यस्तस्तम्भ सहसा वि ज्मो अन्ता-न्बृहस्पति.स्त्रिषधस्थो रवेण। तं प्रत्नास^ ऋषयो दीध्यानाः- पुरो विप्रा दधिरे मन्द्रजिह्वम्।।

卐 धुनेतय.स्सुप्रकेतं मदन्तो- बृहस्पते अभि ये न.स्ततस्रे। पृषन्तं सृप्र.मदब्ध.मूर्वं- बृहस्पते रक्षता.दस्य योनिम्।।

卐 बृहस्पते या परमा पराव-दत^ आ त ऋतस्पृशो नि षेदुः। तुभ्य.ङ्खाता^ अवता^ अद्रिदुग्धा^- मध्व श्श्चोत.न्त्यभितो विरप्शम्।।

卐 बृहस्पतिः प्रथम.ञ्जायमानो- महो ज्योतिषः परमे व्योमन्न्। सप्ताऽस्य स्तुविजातो रवेण- वि सप्तरश्मि रधम.त्तमांसि।।

卐 स सुष्टुभा स ऋक्वता गणेन- वलं रुरोज फलिगं रवेण। बृहस्पति रुस्रिया^ हव्यसूदः- कनिक्रद. द्वावशती रुदाजत्।।

❀03.07.27 卐एवा पित्रे विश्वदेवाय वृष्णे- यज्ञै विधेम नमसा हविर्भिः। बृहस्पते सुप्रजा वीरवन्तो- वयं स्याम पतयो रयीणाम्।।

卐 स इद्राजा प्रतिजन्यानि विश्वा- शुष्मेण तस्था वभि वीर्येण। बृहस्पतिँ य.स्सुभृतं बिभर्ति- वल्गूयति वन्दते पूर्वभाजम्।।

卐 स इत्क्षेति सुधित^ ओकसि स्वे- तस्मा इळा पिन्वते विश्वदानीम्। तस्मै विश.स्स्वय.मेवा नमन्ते- यस्मि.न्ब्रह्मा राजनि पूर्व^ एति।।

卐 अप्रतीतो जयति सन्धनानि- प्रतिजन्या.न्युत या सजन्या। अवस्यवे यो वरिवः कृणोति- ब्रह्मणे राजा तमवन्ति देवाः।।

卐 इन्द्र.श्च सोमं पिबतं बृहस्पते-ऽस्मि.न्यज्ञे मन्दसाना वृषण्वसू~। आ वां विश.न्त्विन्दव.स्स्वाभुवो-ऽस्मे रयिं सर्ववीर.न्नि यच्छतम्।।

卐 बृहस्पत इन्द्र वर्धत.न्न-स्सचा सा वां सुमति भूत्वस्मे। अविष्ट.न्धियो जिगृतं पुरन्धी- र्जजस्त.मर्यो वनुषा.मरातीः।। ।।इति सप्तमाध्याय स्समाप्तः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## तृतीयाष्टके अष्टमाध्यायः। (वर्गाः 1-26)

4.51 इदमु त्यदित्येकादशर्चस्य सूक्तस्य, गौतमो वामदेव- उषा-स्त्रिष्टुप्।।

❀03.08.01 卐इदमु त्य.त्पुरुतमं पुरस्ता-ज्ज्योति स्तमसो वयुनाव.दस्थात्। नून.न्दिवो दुहितरो विभाती- र्गातु.ङ्कृणव.न्नुषसो जनाय।।

卐 अस्थुरु चित्रा^ उषसः पुरस्ता-न्मिताइव स्वरवोऽध्वरेषु। व्यू व्रजस्य तमसो द्वा-रोच्छन्ती रव्र.ञ्छुचयः पावकाः।।

卐 उच्छन्ती रद्य चितयन्त भोजा-न्राधोदेया.योषसो मघोनीः। अचित्रे अन्तः पणय- स्ससन्त्वबुध्यमाना .स्तमसो वि मध्ये।।

卐 कुवित्स देवी.स्सनयो नवो वा- यामो बभूया.दुषसो वो अद्य। येना नवग्वे अङ्गिरे दशग्वे- सप्तास्ये रेवती रेव.दूष।।

卐 यूयं हि देवीर् ऋतयुग्भि रश्वैः- परिप्रयाथ भुवनानि सद्यः। प्रबोधयन्ती रुषस.स्ससन्त-न्द्विपा.च्चतुष्पा .च्चरथाय जीवम्।।

❀03.08.02 卐क्व स्विदासा.ङ्कतमा पुराणी- यया विधाना विदधुर् ऋभूणाम्। शुभं यच्छुभ्रा^ उषस.श्चरन्ति- न वि ज्ञायन्ते सदृशी रजुर्याः।।

卐 ता^ घा ता^ भद्रा^ उषसः पुरासु- रभिष्टिद्युम्ना^ ऋतजातसत्याः। यास्वीजान.श्शशमान^ उक्थै-स्स्तुव.ञ्छंस.न्द्रविणं सद्य^ आप।।

卐 ता^ आ चरन्ति समना पुरस्ता-त्समानत.स्समना पप्रथानाः। ऋतस्य देवी.स्सदसो बुधाना- गवा.न्न सर्गा^ उषसो जरन्ते।।

卐 ता^ इ.न्न्वे3(ए)व समना समानी- रमीतवर्णा^ उषस.श्चरन्ति। गूहन्ती रभ्व.मसितं रुशद्भि- श्शुक्रा .स्तनूभि.श्शुचयो रुचानाः।।

卐 रयि.न्दिवो दुहितरो विभातीः- प्रजावन्तँ यच्छ.तास्मासु देवीः। स्योनादा वः प्रतिबुध्यमाना-स्सुवीर्यस्य पतय.स्स्याम।।

卐 तद्वो दिवो दुहितरो विभाती-रुप ब्रुव^ उषसो यज्ञकेतुः। वयं स्याम यशसो जनेषु- तद्यौ.श्र्च धत्तां पृथिवी च देवी।।

4.52 प्रति ष्येति सप्तर्चस्य सूक्तस्य, गौतमो वामदेव- उषा- गायत्री।।

❀03.08.03 卐प्रति ष्या सूनरी जनी- व्युच्छन्ती परि स्वसुः। दिवो अदर्शि दुहिता।।

卐 अश्वेव चित्राऽरुषी- माता गवा.मृतावरी। सखाऽभू.दश्विनो रुषाः।।

卐 उत सखाऽस्यश्विनो -रुत माता गवामसि। उतोषो वस्व^ ईशिषे।।

卐 यावय.द्वेषसन्त्वा -चिकित्वि.त्सूनृतावरि। प्रति स्तोमै रभुत्स्महि।।

卐 प्रति भद्रा^ अदृक्षत- गवां सर्गा^ न रश्मयः। ओषा^ अप्रा^ उरु ज्रयः।।

卐 आपप्रुषी विभावरि- व्याव^ ज्योतिषा तमः। उषो अनु स्वधा.मव।।

卐 आ द्या न्तनोषि रश्मिभि- राऽन्तरिक्ष.मुरु प्रियम्। उष.श्शुक्रेण शोचिषा।।

4.53 तद्देवस्येति सप्तर्चस्य सूक्तस्य, गौतमो वामदेव-स्सविता- जगती।।

❀03.08.04 卐तद्देवस्य सवितु वार्यं मह-द्वृणीमहे असुरस्य प्रचेतसः। छर्दिर्येन दाशुषे यच्छति त्मना- तन्नो महा^ उदया.न्देवो अक्तुभिः।।

卐 दिवो धर्ता भुवनस्य प्रजापतिः- पिशङ्ग.न्द्रापिं प्रति मुञ्चते कविः। विचक्षणः प्रथय.न्नापृण.न्नु- र्वजीजन.त्सविता सुम्न.मुक्थ्यम्।।

卐 आऽप्रा रजांसि दिव्यानि पार्थिवा- श्लोक.न्देवः कृणुते स्वाय धर्मणे। प्र बाहू~ अस्रा.क्सविता सवीमनि- निवेशय.न्प्रसुव.न्नक्तुभि र्जगत्।।

卐 अदाभ्यो भुवनानि प्रचाकश-द्व्रतानि देव.स्सविताऽभि रक्षते। प्रास्रा.ग्बाहू~ भुवनस्य प्रजाभ्यो- धृतव्रतो महो अज्मस्य राजति।।

卐 त्रिरन्तरिक्षं सविता महित्वना- त्री रजांसि परिभू स्त्रीणि रोचना। तिस्रो दिवः पृथिवी स्तिस्र^ इन्वति- त्रिभि र्व्रतै रभि नो रक्षति त्मना।।

卐 बृह.त्सुम्नः॥ प्रसवीता निवेशनो- जगत.स्स्थातु रुभयस्य यो वशी। स नो देव.स्सविता शर्म यच्छ-त्वस्मे क्षयाय त्रिवरूथ.मंहसः।

卐 आऽग.न्देव ऋतुभि र्वर्धतु क्षय-न्दधातु न.स्सविता सुप्रजा.मिषम्। स नः≈ क्षपाभि रहभि.श्च जिन्वतु -प्रजावन्तं रयि.मस्मे समिन्वतु।।

4.54 अभूद्देव इति षड्‌चस्य सूक्तस्य, गौतमो वामदेव-स्सविता- जगत्यन्त्या त्रिष्टुप्।।

03.08.05 卐अभू.द्देव.स्सविता वन्द्यो नु न^- इदानी.मह्न^ उपवाच्यो नृभिः। वि यो रत्ना भजति मानवेभ्य-श्श्रेष्ठ.न्नो अत्र द्रविणँ यथा दधत्।।

卐 देवेभ्यो हि प्रथमँ यज्ञियेभ्यो-ऽमृतत्वं सुवसि भाग.मुत्तमम्। आदि.द्दामानं सवित^ व्यूर्णुषे-ऽनूचीना जीविता मानुषेभ्यः।।

卐 अचित्ती यच्चकृमा दैव्ये जने- दीनै र्दक्षैः॥ प्रभूती पूरुषत्वता। देवेषु च सवित^ र्मानुषेषु च- त्व.न्नो अत्र सुवता.दनागसः।।

卐 न प्रमिये सवितु र्दैव्यस्य त-द्यथा विश्वं भुवन.न्धारयिष्यति। यत्पृथिव्या^ वरिम.न्ना स्वङ्गुरि-र्वर्ष्म.न्दिव. स्सुवति सत्य.मस्य तत्।।

卐 इन्द्रज्येष्ठा.न्बृहद्भ्यः॥ पर्वतेभ्यः- ≈ क्षयाँ॰ एभ्य.स्सुवसि पस्त्यावतः। यथायथा पतयन्तो वियेमिर -एवैव तस्थु .स्सवित.स्सवाय ते।।

卐 ये ते त्रिरह.न्त्सवित.स्सवासो- दिवेदिवे सौभग.मासुवन्ति। इन्द्रो द्यावापृथिवी~ सिन्धु रद्भि-रादित्यै र्नो अदिति श्शर्म यंसत्।।

4.55 को वस्त्रातेति दशर्चस्य सूक्तस्य, गौतमो वामदेवो- विश्वेदेवा-स्त्रिष्टुप्- अन्त्यास्तिस्रो गायत्र्यः- (भेदपक्षे - विश्वेदेवाः 7 अग्निः-1 उषाः-1 विश्वेदेवाः-1 एवं दश)

03.08.06 卐को वस्त्राता वसवः॥ को वरूता- द्यावाभूमी अदिते त्रासीथा.न्नः। सहीयसो वरुण मित्र मर्ता-त्को वोऽध्वरे वरिवो धाति देवाः।।

卐 प्र ये धामा᳚नि पू॒र्व्याण्यर्चा॒न्वि यदु॒च्छा॒न्वि॑यो॒तारो॒ अमू᳚राः। वि॒धा॒तारो॒ वि ते द॑धु॒ रज॑स्रा॒- ऋ॒तधी᳚तयो रुरुचन्त द॒स्माः।।

卐 प्र प॒स्त्या॑3(आ)मदि॑तिं॒ सिन्धु॑.म॒र्कैः॒-स्व॒स्ति॒.मी॒ळे स॒ख्याय॑ दे॒वीम्। उ॒भे~ यथा᳚ नो॒ अह॑नी~ नि॒पात॑- उ॒षा᳚सानक्ता᳚ करता॒.मद॑ब्धे~।।

卐 व्य᳚र्य॒मा वरु॑ण श्चेति॒ पन्था᳚-मि॒षस्पति॑.स्सुवि॒त.ङ्गा॒तु.म॒ग्निः। इन्द्रा᳚विष्णू~ नृ॒वदु॑षु स्तवा᳚ना॒- शर्म॑ नो यन्त॒.मम॑व॒.द्वरू᳚थम्।।

卐 आ पर्व॑तस्य म॒रुता॒.मवा᳚ंसि- दे॒वस्य॑ त्रा॒तु र॒व्रि भग॑स्य। पात्पति॒ जन्या॒ दंह॑सो नो- मि॒त्रो मि॒त्रिया᳚.दु॒त न॑^ उरुष्येत्।।

❀03.08.07 卐नू᳚ रो᳚दसी॒ अहि॑ना बु॒ध्न्ये᳚न- स्तुवीत दे᳚वी~ अप्ये᳚भि रि॒ष्टैः। स॒मु॒द्र.न्न स॒ञ्चर॑णे स॒नि॒ष्यवो᳚- घ॒र्मस्व॑रसो न॒द्यो॒॑3(ओ) अप᳚ व्रन्न्।।

卐 दे॒वै.र्नो᳚ दे॒.व्यदि॑ति॒ र्निपा᳚तु- दे॒व.स्त्रा॒ता त्राय᳚ता॒.मप्र॑युच्छन्न्। न॒हि मि॒त्रस्य॒ वरु॑णस्य धा॒सि-मर्हा᳚मसि प्र॒मियं॒ सान्व॒ग्नेः।।

卐 अ॒ग्नि री᳚शे वस॒व्य॑-स्या॒ग्नि म॒ह.स्सौभ॑गस्य। तान्य॒स्मभ्य॑ं रासते।।

卐 उषो᳚ मघो॒.न्या व॑ह॒- सूनृ॑ते॒ वार्या᳚ पु॒रु। अ॒स्मभ्यँ᳚ वाजिनीवति।।

卐 तत्सु न॑.स्सवि॒ता भग॑ो- वरु॑णो मि॒त्रो अर्य᳚मा। इन्द्रो᳚ नो॒ राध॑सा ऽऽग॑मत्।।

4.56 मही इति सप्तर्चस्य सूक्तस्य, गौतमो वामदेवो- द्यावापृथिवी- त्रिष्टुप्-अन्त्यास्तिस्रो गायत्र्यः।।

❀03.08.08 卐मही~ द्यावा᳚पृथिवी~ इ॒ह ज्येष्ठे᳚~- रु॒चा भ॑वतां शु॒चय॑द्भि र॒र्कैः। यत्सीँ᳚ वरि॑ष्ठे~ बृ॒ह॒ती~ वि॒मि॒न्व-न्नु॒व.द्द्धो॒क्षा प॑प्रथा॒ने॒भि॒ रेवैः᳚।।

卐 दे॒वी~ दे॒वेभि᳚ र्यज॒ते~ यज॑त्रै॒- रमि॑नती~ तस्थतु रु॒क्षमा᳚णे~। ऋ॒ता᳚वरी~ अ॒द्रुहा᳚ दे॒वपु॑त्रे~- य॒ज्ञस्य॑ ने॒त्री~ शु॒चय॑द्भि र॒र्कैः।।

卐 स इ॒.त्स्वपा॒^ भुव॑ने॒.ष्वास- य॒^ इ॒मे~ द्यावा᳚पृथिवी~ ज॒जान॑। उ॒र्वी~ ग॒भीरे॒~ रज॑सी~ सु॒मेके᳚~- अ॒वं॒शे धीर॒ श्शच्या॒ सम॑ैरत्।।

卐 नू रोदसी बृहद्भि.र्नो वरूथैः- पत्नीवद्भि रिषयन्ती~ सजोषाः। उरूची~ विश्वे~ यजते~ नि पात-न्धिया स्याम रथ्य.स्सदासाः।।

卐 प्र वां महि द्यवी~ अ-भ्युपस्तुतिं भरामहे। शुची~ उप प्रशस्तये।।

卐 पुनाने~ तन्वा मिथ-स्स्वेन दक्षेण राजथः। ऊह्याथे~ सना.दृतम्।।

卐 मही~ मित्रस्य साधथ-स्तरन्ती~ पिप्रती~ ऋतम्। परि यज्ञ.न्नि षेदथुः।।

4.57 क्षेत्रस्येत्यष्टर्चस्य सूक्तस्य, गौतमो वामदेव- आद्यानां तिसृणां क्षेत्रपतिर्देवता-चतुर्थ्या श्शुनः-पञ्चम्यष्टम्यो श्शुनासीरौ-षष्ठी सप्तम्यो स्सीता-आद्या चतुर्थी षष्ठी सप्तम्योऽनुष्टुभः-पञ्चमी पुरउष्णिक्-शेषास्त्रिष्टुभः (अत्र चतुर्थ्या श्शुनोऽदन्तः-तथा शुनासीरावित्यत्र केचिद्वाय्वादित्यावित्युच्चारयन्ति तन्न चतुरस्रँ यतो वायु श्शुन स्सूर्य एवात्र सीर श्शुनासीरौ वायुसूर्यौ वदन्ति-शुनासीरँ यास्क इन्द्रन्तु मेने सूर्येन्द्रौ तौ मन्यते शाकपूणिरिति शुनासीर स्वरूपे शौनकेनाचार्यमत दर्शनव्याजेन वैविध्यं प्रतिपादितं तस्मात्प्रकृतिभूतशुनासीर शब्देनोच्चारणँ युक्तम्)।।

❀03.08.09 ☞卐क्षेत्रस्य पतिना वयं- हितेनेव जयामसि। गामश्वं पोषयित्वा- स नो मृळातीदृशे।।

卐 क्षेत्रस्य पते मधुमन्त.मूर्मि-न्धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुत.ङ्घृतमिव सुपूत-मृतस्य नः पतयो मृळयन्तु।।

卐 मधुमती रोषधी र्द्याव^ आपो- मधुम.न्नो भवत्व.न्तरिक्षम्। क्षेत्रस्य पति र्मधुमा.न्नो अ-स्त्वरिष्यन्तो अन्वेन.ञ्चरेम।।

卐 शुनँ वाहा.श्शुन.न्नर-श्शुन.ङ्कृषतु लाङ्गलम्। शुनँ वरत्रा बध्यन्तां- शुन.मष्ट्रा.मुदिङ्गय।।

卐 शुनासीराविमाँ वाच.ञ्जुषेथाँ -यद्दिवि चक्रथुः पयः। तेनेमा.मुप सिञ्चतम्।।

卐 अर्वाची सुभगे भव- सीते वन्दामहे त्वा। यथा न स्सुभगाऽससि- यथा न स्सुफलाऽससि।।

卐 इन्द्र.स्सीता.न्नि गृह्णातु- तां पूषाऽनु यच्छतु। सा नः पयस्वती दुहा-मुत्तरामुत्तरां समाम्।।

卐 शुन.न्नः फाला^ वि कृषन्तु भूमिं- शुन.ङ्कीनाशा^ अभि यन्तु वाहैः। शुनं पर्जन्यो मधुना पयोभि-श्शुनासीरा शुन मस्मासु धत्तम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☸ 4.58 समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य, गौतमो वामदेवोऽग्नि-स्त्रिष्टुबन्त्या जगती-(सूर्यो वा गावो वा घृतस्तुतिर्वा देवता)-आत्रेये पञ्चमे मण्डले षडनुवाकाः।।

❀03.08.10 卐समुद्रा.दूर्मि र्मधुमा॰ उदार-दुपांशुना सममृतत्व.मानट्। घृतस्य नाम गुह्यँ यदस्ति-जिह्वा देवाना.ममृतस्य नाभिः।।

卐 वयं नाम प्र ब्रवामा घृत-स्यास्मि.न्यज्ञे धारयामा नमोभिः। उप ब्रह्मा श्रृणव.च्छस्यमान-ञ्चतुश्श्रृङ्गोऽवमी.द्गौर ^एतत्।।

卐 चत्वारि श्रृङ्गा त्रयो अस्य पादा- द्वे~ शीर्षे~ सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति- महो देवो मर्त्या॰ आ विवेश।।

卐 त्रिधा हितं पणिभि र्गुह्यमान-ङ्गवि देवासो घृत.मन्वविन्दन्न्। इन्द्र^ एकं सूर्य^ एक.ञ्जजान- वेना.देकं स्वधया नि ष्टतक्षुः।।

卐 एता^ अर्षन्ति हृद्या.त्समुद्रा-च्छतव्रजा रिपुणा नावचक्षे। घृतस्य धारा^ अभि चाकशीमि- हिरण्ययो वेतसो मध्य^ आसाम्।।

❀03.08.11 卐सम्य.क्स्रवन्ति सरितो न धेना^ अन्त हृदा मनसा पूयमानाः। एते अर्ष.न्त्यूर्मयो घृतस्य- मृगाइव क्षिपणो रीषमाणाः।।

卐 सिन्धोरिव प्राध्वने शूघनासो- वातप्रमियः पतयन्ति यह्वाः। घृतस्य धारा^ अरुषो न वाजी- काष्ठा^ भिन्द.न्नूर्मिभिः पिन्वमानः।।

卐 अभि प्रवन्त समनेव योषाः- कल्याण्य1(अ) स्स्मयमानासो अग्निम्। घृतस्य धारा.स्समिधो नसन्त- ता जुषाणो हर्यति जातवेदाः।।

卐 कन्याइव वहतु.मेतवा उ- अञ्ज्यञ्जाना^ अभि चाकशीमि। यत्र सोम.स्सूयते यत्र यज्ञो- घृतस्य धारा^ अभि तत्पवन्ते।।

卐 अभ्यर्षत सुष्टुति.ङ्गव्य.माजि-मस्मासु भद्रा द्रविणानि धत्त। इमँ यज्ञ.न्नयत देवता नो- घृतस्य धारा^ मधुम.त्पवन्ते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 धामन्ते विश्वं भुवन.मधि श्रित-मन्त.स्समुद्रे हृद्य1(अ)न्त रायुषि। अपा.मनीके समिथे य ^आभृत-स्तमश्याम मधुमन्त.न्त ऊर्मिम्।। इति चतुर्थं मण्डलम्।। विश्वेश्वराय नमः .....

## ॐ पञ्चमं मण्डलम्

5.01 अबोधीति द्वादशर्चस्य सूक्तस्य, आत्रेयौ बुधगविष्ठिरावग्नि-स्त्रिष्टुप्।।

❀03.08.12 卐अबो.ध्यग्नि.स्समिधा जनानां- प्रति धेनुमिवा.ऽयती.मुषासम्। यह्वाइव प्र वया .मुज्जिहाना४- प्र भानव.स्सिस्रते नाक.मच्छ।।

卐 अबोधि होता यजथाय देवा-नूर्ध्वो अग्नि.स्सुमना४ प्रात रस्थात्। समिद्धस्य रुश.ददर्शि पाजो- महा .न्देव.स्तमसो निरमोचि।।

卐 यदी.ङ्गणस्य रशना.मजीग~- श्शुचि रङ्क्ते शुचिभि र्गोभि रग्निः। आद्दक्षिणा युज्यते वाजय-न्त्युत्ताना .मूर्ध्वो अधय.ज्जुहूभिः।।

卐 अग्नि.मच्छा देवयतां मनांसि- चक्षूंषीव सूर्ये स.ञ्चरन्ति। यदी सुवाते~ उषसा विरूपे~- श्वेतो वाजी जायते अग्रे अह्नाम्।।

卐 जनिष्ट हि जेन्यो अग्रे अह्नां- हितो हिते.ष्वरुषो वनेषु। दमेदमे सप्त रत्ना दधानो-ऽग्नि र्होता नि षसादा यजीयान्।।

卐 अग्नि र्होता.न्यसीद.द्यजीया-नुपस्थे मातु.स्सुरभा उ लोके। युवा कवि४ पुरुनिष्ठ^ ऋतावा- धर्ता कृष्टीना.मुत मध्य इद्धः।।

❀03.08.13 卐प्र णु त्यं विप्र.मध्वरेषु साधु-मग्निं होतार.मीळते नमोभिः। आ य.स्ततान रोदसी ऋतेन- नित्यं मृजन्ति वाजिन.ङ्घृतेन।।

卐 मार्जाल्यो मृज्यते स्वे दमूना४- कविप्रशस्तो अतिथि.श्शिवो नः। सहस्रशृङ्गो वृषभ.स्तदोजा-विश्वा९ अग्ने सहसा प्रास्यन्यान्।।

卐 प्र सद्यो अग्ने अत्ये.ष्यन्या-नावि र्यस्मै चारुतमो बभूथ। ईळेन्यो वपुष्यो विभावा- प्रियो विशा.मतिथि र्मानुषीणाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 तुभ्यं भरन्ति क्षितयो यविष्ठ- बलि.मग्ने अन्तित^ ओत दूरात्। आ भन्दिष्ठस्य सुमतिं.श्चिकिद्धि- बृहत्ते अग्ने महि शर्म भद्रम्।।

卐 आऽद्य रथं भानुमो भानुमन्त-मग्ने तिष्ठ यजतेभि स्समन्तम्। विद्वा.न्पथीना.मुर्व1(अ)न्तरिक्ष-मेह देवा.न्हविरद्याय वक्षि।।

卐 अवोचाम कवये मेध्याय- वचो वन्दारु वृषभाय वृष्णे। गविष्ठिरो नमसा स्तोम.मग्नौ- दिवीव रुक्म .मुरुव्यञ्च.मश्रेत्।।

☙ 5.02 कुमारमिति द्वादशर्चस्य सूक्तस्य, आत्रेयः कुमारः-कमेतँ-विज्योतिषेत्यनयोर्जानो वृशोऽग्नि-स्त्रिष्टुप्-अन्त्या शक्करी (पाक्षिको जारो वृश स्सर्वसूक्तेऽपि-अत्र सर्वानुक्रमभाष्ये जननाम्न ऋषेः पुत्रो जान इत्येव निर्णीतम्-जर नाम्न ऋषेः पुत्रो जारो वृश इति तु सायणभाष्यम्।।

❀03.08.14 卐कुमारं माता युवतिः.स्समुब्ध-ङ्गुहा बिभर्ति न ददाति पित्रे। अनीक.मस्य न मिन.ज्जनासः- पुरः पश्यन्ति निहित.मरतौ।।

卐 कमेत.न्त्वँ युवते कुमारं- पेषी बिभर्षि महिषी जजान। पूर्वी.र्हि गर्भ.श्शरदो ववर्धापश्य.ञ्जातँ यदसूत माता।।

卐 हिरण्यदन्तं शुचिवर्ण.मारा-त्क्षेत्रा.दपश्य.मायुधा मिमानम्। ददानो अस्मा अमृतँ विपृक्व-त्किं मा.मनिन्द्राः कृणव.न्ननुक्थाः।।

卐 क्षेत्रा.दपश्यं सनुत~ श्चरन्तं- सुम.द्यूथ.न्न पुरु शोभमानम्। न ता^ अगृभ्र.न्नजनिष्ट^ हि षः- पलिक्नी रि.द्युवतयो भवन्ति।।

卐 के मे मर्यकँ वि यवन्त गोभि- र्न येषा.ङ्गोपा^ अरण.श्चिदास। य^ ई.ञ्जगृभु रव ते सृज-न्त्वाजाति पश्व ^उप न.श्चिकित्वान्।।

卐 वसां राजानं वसति.ञ्जनाना-मरातयो नि दधु मर्त्येषु। ब्रह्मा.ण्यत्रे रव तं सृजन्तु- निन्दितारो निन्द्यासो भवन्तु।।

❀03.08.15 卐शुनश्चिच्छेप.न्निदितं सहस्रा-द्यूपा.दमुञ्चो अशमिष्ट हि षः। एवास्म.दग्ने वि मुमुग्धि पाशा-न्होत श्चिकित्व^ इह तू निषद्य।।

卐 हृणीयमानो अप हि मदैये॒- प्र मे देवानाँ व्रतपा^ उवाच। इन्द्रो विद्वा॒ अनु हि त्वा चचक्ष-तेनाह.मग्ने अनुशिष्ट^ आऽगाम्।।

卐 वि ज्योतिषा बृहता भा.त्यग्नि- रावि विश्वानि कृणुते महित्वा। प्रादेवी माया.स्सहते दुरेवा-श्शिशीते शृङ्गे~ रक्षसे विनिक्षे।।

卐 उत स्वानासो दिविष.न्त्वग्ने- स्तिग्माऽऽयुधा रक्षसे हन्तवा उ। मदे चिदस्य प्र रुजन्ति भामा^- न वरन्ते परिबाधो अदेवीः।।

卐 एतन्ते स्तोम.न्तुविजात विप्रो- रथ.न्न धीर.स्स्वपा^ अतक्षम्। यदी.दग्ने प्रति त्वन्देव हर्या-स्स्वर्वती रप^ एना जयेम।।

卐 तुविग्रीवो वृषभो वावृधानो-ऽशत्र्व1(अ)र्य.स्समजाति वेदः। इतीम.मग्नि.ममृता^ अवोच-न्बर्हिष्मते मनवे शर्म यंस-द्धविष्मते मनवे शर्म यंसत्।।

5.03 त्वमग्न इति द्वादशर्चस्य सूक्तस्य, आत्रेयो वसुश्रुतोऽग्नि-स्तृतीयाया मरुद्रुद्रविष्णव-स्त्रिष्टुबाद्या विराट्।।

❀03.08.16 卐त्वमग्ने वरुणो जायसे य-त्त्वं मित्रो भवसि य.त्समिद्धः। त्वे विश्वे सहस.स्पुत्र देवा-स्त्वमिन्द्रो दाशुषे मर्त्याय।।

卐 त्वमर्यमा भवसि यत्कनीना-न्नाम स्वधाव.न्गुह्यं बिभर्षि। अञ्जन्ति मित्रं सुधित.न्न गोभि-र्य.द्दम्पती~ समनसा कृणोषि।।

卐 तव श्रिये मरुतो मर्जयन्त- रुद्र यत्ते जनिम चारु चित्रम्। पदँ यद्विष्णो रुपम.न्निधायि- तेन पासि गुह्य. न्नाम गोनाम्।।

卐 तव श्रिया सुदृशो देव देवा॒- पुरू दधाना^ अमृतं सपन्त। होतार.मग्निं मनुषो नि षेदु- र्दशस्यन्त^ उशिज.श्शंस.मायोः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 न त्वद्धोता पूर्वो अग्ने यजीया-न्न काव्यैः परो अस्ति स्वधावः। विश.श्च यस्या^ अतिथि र्भवासि- स ^यज्ञेन वनव.द्देव मर्तान्।।

卐 वय.मग्ने वनुयाम त्वोता^- वसूयवो हविषा बुध्यमानाः। वयं समर्ये विदथे.ष्वह्नाँ- वयं राया सहस.स्पुत्र मर्तान्।।

❀03.08.17 卐यो न^आगो अभ्येनो भरा-त्यधी.दघ.मघशंसे दधात। जही चिकित्वो अभिशस्ति.मेता- मग्ने यो नो मर्चयति द्वयेन।।

卐 त्वामस्या^ व्युषि देव पूर्वे- दूत.ङ्कृण्वाना^ अयजन्त हव्यैः। संस्थे यदग्न ईयसे रयीणा-न्देवो मर्तै र्वसुभि रिध्यमानः।।

卐 अव स्पृधि पितरँ योधि विद्वा-न्पुत्रो य.स्ते सहस.स्सून ~ऊहे। कदा चिकित्वो अभि चक्षसे नो-ऽग्ने कदा॰ ऋतचि.द्यातयासे।।

卐 भूरि नाम वन्दमानो दधाति- पिता वसो~ यदि तज्जोषयासे। कुवि.द्देवस्य सहसा चकान-स्सुम्न.मग्नि र्वनते वावृधानः।।

卐 त्वमङ्ग जरितारँ यविष्ठ- विश्वा.न्यग्ने दुरिताऽति पर्षि। स्तेना^ अदृश्र.न्रिपवो जनासो-ऽज्ञातकेता^ वृजिना^ अभूवन्न्।।

卐 इमे यामास.स्त्वद्रि.गभूव-न्वसवे वा तदि.दागो अवाचि। नाहाय.मग्नि रभिशस्तये नो- न रीषते वावृधानः परा दात्।।

5.04 त्वामग्न इत्येकादशर्चस्य सूक्तस्य, आत्रेयो वसुश्रुतोऽग्नि-स्त्रिष्टुप्।।

❀03.08.18 卐त्वामग्ने वसुपतिँ वसूना-मभि प्र मन्दे अध्वरेषु राजन्न्। त्वया वाजँ वाजयन्तो जये-माभि ष्याम पृत्सुती र्मर्त्यानाम्।।

卐 हव्यवा.ळग्नि रजरः पिता नो- विभु र्विभावा सुदृशीको अस्मे। सुगार्हपत्या.स्स.मिषो दिदी-ह्यस्मद्र्य1(अ)क्सं मिमीहि श्रवांसि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 विशा.ङ्कविं विश्पतिं मानुषीणां- शुचिं पावक.ङ्घृतपृष्ठ.मग्निम्। नि होतारँ विश्वविद.न्दधिध्वे- स देवेषु वनते वार्याणि।।

卐 जुषस्वाग्न इळया सजोषा^- यतमानो रश्मिभि.स्सूर्यस्य। जुषस्व न.स्समिध.ञ्जातवेद^-आ च देवा .न्हविरद्याय वक्षि।।

卐 जुष्टो दमूना^ अतिथि र्दुरोण-इम.न्नो यज्ञ.मुप याहि विद्वान्। विश्वा^ अग्ने अभियुजो विहत्या-शत्रूयता .मा भरा भोजनानि।।

❀03.08.19 卐वधेन दस्युं प्र हि चातयस्व- वयः कृण्वान.स्तन्वे3(ए) स्वायै। पिपर्षि यत्सहस.स्पुत्र देवा-न्त्सो अग्ने पाहि नृतम वाजे अस्मान्।।

卐 वय.न्ते अग्न उक्थै र्विधेम- वयं हव्यैः पावक भद्रशोचे। अस्मे रयिँ विश्ववारं समि-न्वास्मे विश्वानि द्रविणानि धेहि।।

卐 अस्माक.मग्ने अध्वर.ञ्जुषस्व- सहस.स्सूनो~ त्रिषधस्थ हव्यम्। वय.न्देवेषु सुकृत.स्स्याम- शर्मणा न .स्त्रिवरूथेन पाहि।।

卐 विश्वानि नो दुर्गहा जातवेद- स्सिन्धु.न्न नावा दुरिताऽति पर्षि। अग्ने अत्रिव.न्नमसा गृणानो3-(ओ)ऽस्माकं बो.ध्यविता तनूनाम्।।

卐 यस्त्वा हृदा कीरिणा मन्यमानो-ऽमर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि- प्रजाभि रग्ने अमृतत्व.मश्याम्।।

卐 यस्मै त्वं सुकृते जातवेद^- उ लोक.मग्ने कृणव.स्स्योनम्। अश्विनं स पुत्रिणँ वीरवन्त-ङ्गोमन्तं रयि.न्नशते स्वस्ति।।

🏺 5.05 सुसमिद्धायेत्येकादशर्चस्य सूक्तस्य, आत्रेयो वसुश्रुतः-इध्मो- नराशंस- इळो- बर्हि-र्देवीर्द्वार-उषासानक्ता- दैव्यौ होतारौ- सरस्वतीळा भारत्य-स्त्वष्टा- वनस्पति- स्वाहाकृतयो- गायत्री।।

❀03.08.20 卐सुसमिद्धाय शोचिषे- घृत.न्तीव्र.ञ्जुहोतन। अग्नये जातवेदसे।।

卐 नराशंस. ॒स्सुषूद-तीमँ यज्ञ.मदाभ्यः। कवि.र्हि मधुहस्त्यः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ईळितो अग्न आ व-हेन्द्र.श्चित्र.मिह प्रियम्। सुखै रथेभि रूतये।।

卐 ऊर्णम्रदा^ वि प्रथ-स्वाभ्य1(अ)र्का^ अनूषत। भवा न.श्शुभ्र सातये।।

卐 देवी द्वारो वि श्रयध्वं- सुप्रायणा^ न^ ऊतये। प्रप्र यज्ञं पृणीतन।।

❀03.08.21 卐सुप्रतीके वयोवृधा- यह्वी~ ऋतस्य मातरा। दोषा.मुषास.मीमहे।।

卐 वातस्य पत्म.न्नीळिता- दैव्या होतारा मनुषः। इम.न्नो यज्ञ.मा गतम्।।

卐 इळा सरस्वती मही- तिस्रो देवी मयोभुवः। बर्हि.स्सीद.न्त्वस्रिधः।।

卐 शिव.स्त्वष्ट रिहाऽगहि- विभुः पोष उत त्मना। यज्ञेयज्ञे न^ उदव।।

卐 यत्र वेत्थ वनस्पते- देवाना.ङ्गुह्या नामानि। तत्र हव्यानि गामय।।

卐 स्वाहाऽग्नये वरुणाय- स्वाहेन्द्राय मरुद्भ्यः। स्वाहा देवेभ्यो हविः।।

5.06 अग्निन्तमिति दशर्चस्य सूक्तस्य, आत्रेयो वसुश्रुतोऽग्निः- पङ्क्तिः।।

❀03.08.22 卐अग्नि.न्तं मन्ये यो वसु- रस्तँ यँ यन्ति धेनवः। अस्त.मर्वन्त^ आशवो-ऽस्त.न्नित्यासो वाजिन^- इषं स्तोतृभ्य^ आ भर।।

卐 सो अग्नि र्यो वसुर्गृणे- सँ यमायन्ति धेनवः। समर्वन्तो रघुद्रुव-स्सं सुजातास.स्सूरय^- इषं स्तोतृभ्य^ आ भर।।

卐 अग्नि र्हि वाजिनँ विशे- ददाति विश्वचर्षणिः। अग्नी राये स्वाभुवं- स प्रीतो याति वार्य-मिषं स्तोतृभ्य^ आ भर।।

卐 आ ते अग्न इधीमहि- द्युमन्त.न्देवाजरम्। यद्ध स्या ते पनीयसी- समि.द्दीदयति द्य-वीषं स्तोतृभ्य^ आ भर।।

卐 आ ते अग्न ऋचा हवि-श्शुक्रस्य शोचिष.स्पते। सुश्चन्द्र दस्म विश्पते- हव्यवा.ट्तुभ्यं हूयत- इषं स्तोतृभ्य^ आ भर।।

❀03.08.23 卐प्रो~ त्ये अग्नयोऽग्निषु- विश्वं पुष्यन्ति वार्यम्। ते हिन्विरे त इन्विरे- त इषण्य.न्त्यानुष- गिषं स्तोतृभ्य^ आ भर।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 तव त्ये अग्ने अर्चयो- महि व्राधन्त वाजिनः। ये पत्वभि.श्शफानाँ -व्रजा भुरन्त गोना-मिषं स्तोतृभ्य^ आ भर।।

卐 नवा^ नो अग्न आ भर- स्तोतृभ्य.स्सुक्षिती रिषः। ते स्याम य आनृचु -स्त्वादूतासो दमेदम -इषं स्तोतृभ्य^ आ भर।।

卐 उभे~ सुश्चन्द्र सर्पिषो- दर्वी ~श्रीणीष आसनि। उतो~ न^ उत्पुपूर्या ^-उक्थेषु शवस.स्पत -इषं स्तोतृभ्य^ आ भर।।

卐 एवाँ अग्नि.मजुर्यमु- र्गीर्भि र्यज्ञेभि रानुषक्। दध.दस्मे सुवीर्य-मुत त्यदाश्वश्व्य-मिषं स्तोतृभ्य^ आ भर।।

5.07 सखाय स्समिति दशर्चस्य सूक्तस्य, आत्रेयो इषोऽग्नि-रनुष्टुबन्त्यापङ्क्तिः।।

❀03.08.24 卐सखाय.स्सँ व.स्सम्यञ्च-मिषं स्तोम.ञ्चाग्नये। वर्षिष्ठाय क्षितीना-मूर्जो नप्त्रे सहस्वते।।

卐 कुत्रा चिद्यस्य समृतौ- रण्वा नरो नृषदने। अर्हन्त.श्चि.द्यमिन्धते- स.ञ्जनयन्ति जन्तवः।।

卐 सँ यदिषो वनामहे- सं हव्या मानुषाणाम्। उत द्युम्नस्य शवस^-ऋतस्य रश्मि.मा ददे।।

卐 सस्मा कृणोति केतुमा- नक्त.ञ्चि.द्दूर आ सते। पावको यद्वनस्पती-न्प्र स्मा मिना.त्यजरः।।

卐 अव स्म यस्य वेषणे -स्वेदं पथिषु जुह्वति। अभी.मह स्वजेन्यं- भूमा पृष्ठेव रुरुहुः।।

❀03.08.25 卐यं मर्त्यः पुरुस्पृहँ- विद.द्विश्वस्य धायसे। प्र स्वादनं पितूना-मस्तताति.ञ्चिदायवे।।

卐 स हि ष्मा धन्वाऽक्षित-न्दाता न दात्या पशुः। हिरिश्मश्रु.श्शुचिद-न्नृभु रनिभृष्टतविषिः।।

卐 शुचिष्ष्म यस्मा^अत्रिव-त्प्र स्वधितीव रीयते। सुषू रसूत माता- क्राणा यदानशे भगम्।।

卐 आ य.स्ते सर्पिरासुते-ऽग्ने शमस्ति धायसे। ऐषु द्युम्न.मुत श्रव^- आ चित्तं मर्त्येषु धाः।।

卐 इति चिन्मन्यु.मध्रिज-स्त्वादात.मा पशु.न्ददे। आदग्ने अपृणतो-ऽत्रि.स्सासह्या.द्दस्यू-निष.स्सासह्या.न्नृन्।।

5.08 त्वामग्न ऋतायव इति सप्तर्चस्य सूक्तस्य, आत्रेयो इषोऽग्नि-र्जगती।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀03.08.26 卐त्वाम॑ग्न ऋ॒ता॒यव॒.स्समी॑धिरे- प्र॒त्नं प्र॒त्नास॒ ऊ॒तये॑ सहस्कृत। पु॒रु॒श्च॒न्द्रँ य॑ज॒तं वि॒श्वधा॑यस॒-न्दमू॑नस॒.ङ्गृ॒हप॑तिँ॒ वरे॑ण्यम्।।

卐 त्वाम॑ग्ने॒ अति॑थिं पू॒र्व्यँ विशः॑-श्शो॒चि.ष्के॑श.ङ्गृ॒हप॑ति.न्नि॒ षे॑दिरे। बृ॒हत्के॑तुं पुरु॒रू॑प.न्धन॒स्पृतं॑- सु॒शर्मा॑णं॒ स्वव॑स.ञ्जर॒.द्विष॑म्।।

卐 त्वाम॑ग्ने॒ मानु॑षी रीळते॒ विशो॑ -होत्रा॒विदँ॒ विवि॑चिं रत्न॒धात॑मम्। गुहा॒ सन्तं॑ सुभग वि॒श्वद॑र्शत-न्तुविष्व॒णसं॑ सु॒यज॑.ङ्घृता॒श्रिय॑म्।।

卐 त्वाम॑ग्ने ध॒र्णसिँ॑ वि॒श्वधा॑ व॒य-ङ्गी॒र्भि गृ॒णन्तो॒ नम॒.सोप॑ सेदिम। स नो॑ जुषस्व समिधा॒नो अ॑ङ्गिरो- दे॒वो मर्त॑स्य य॒शसा॑ सु॒दी॒तिभिः॑।।

卐 त्वम॑ग्ने पुरु॒रूपो॑ वि॒शेवि॑शे- वयो॑ दधासि प्र॒त्नथा॑ पुरुष्टुत। पु॒रू.ण्यन्ना॒ सह॑सा॒ वि रा॑जसि॒- त्विषि॒.स्सा ते॑ तित्विषा॒णस्य॒ नाऽधृषे॑।।

卐 त्वाम॑ग्ने समिधा॒नँ य॑विष्ठ्य- दे॒वा॒ दूत.ञ्चक्रिरे हव्य॒वाह॑नम्। उ॒रु॒ज्रय॑स.ङ्घृ॒तयो॑नि॒.माहु॑त-न्त्वे॒ष.ञ्चक्षु॒र्द॑धिरे चोद॒य.न्म॑ति।।

卐 त्वाम॑ग्ने प्र॒दिव॒ आहु॑त.ङ्घृ॒तै-स्सु॑म्ना॒यव॒.स्सुषमिधा॒ समी॑धिरे। सवा॑वृधा॒न ओष॑धीभि रु॒क्षि॒तो॒-3(ओ॒)ऽभि ज्रयां॑सि॒ पार्थि॑वा॒ वि ति॑ष्ठसे।। ।।इति अष्टमोध्यायः समाप्तः।। इति तृतीयाष्टकं समाप्तम्।।

## ʊ चतुर्थाष्टकम्

### चतुर्थाष्टके प्रथमाध्यायः। वर्गाः(1-33)

5.09 त्वामग्न इति सप्तर्चस्य सूक्तस्य, आत्रेयो गयोऽग्नि-रनुष्टुप्-पञ्चमी सप्तम्यौ पङ्क्ती।।

❀04.01.01 卐त्वाम॑ग्ने ह॒विष्म॑न्तो- दे॒वं मर्ता॑स॒ ईळते। मन्ये॑ त्वा जा॒तवे॑दसं॒- स ह॒व्या व॑क्ष्यानु॒षक्।।

卐 अ॒ग्नि होता॑ दा॒स्वतः॑ -≈ क्षय॑स्य वृ॒क्तब॑र्हिषः। सँ य॒ज्ञास॒.श्चर॑न्ति यं- सँ वाजा॑स.श्श्रव॒स्यव॑ः।।

卐 उ॒त स्म॒ यं शिशुँ॑ यथा॒- नव॒.ञ्जनि॑ष्टा॒रणी॑। ध॒र्तारं॒ मानु॑षीणाँ- वि॒शा.म॒ग्निं स्व॑ध्व॒रम्।।

卐 उ॒त स्म॑ दुर्गृभीयसे- पु॒त्रो न ह्वा॒र्याणा॑म्। पुरू॒ यो दग्धाऽसि॒ वना-ऽग्ने॑ प॒शु॒.र्न यव॑से।।

卐 अध स्म यस्यार्चय-स्सम्य.क्सँयन्ति धूमिनः। यदी.मह त्रितो दि-व्युप ध्मातेव धमति- शिशीते ध्मातरी यथा।।

卐 तवाह.मग्न ऊतिभि -र्मित्रस्य च प्रशस्तिभिः। द्वेषोयुतो न दुरिता- तुर्याम मर्त्यानाम्।।

卐 तन्नो अग्ने अभी नरो- रयिं सहस्व^ आ भर। स क्षेपय.त्स पोषय-द्भुव.द्वाजस्य सातय -उतैधि पृत्सु नो वृधे।।

5.10 अग्न ओजिष्ठमिति सप्तर्चस्य सूक्तस्य, आत्रेयो गयोऽग्नि-रनुष्टुप्-चतुर्थी सप्तम्यौ पङ्क्ती।।

❀04.01.02 卐अग्न ओजिष्ठ.मा भर- द्युम्न.मस्मभ्य.मध्रिगो~। प्र नो राया परीणसा- रत्सि वाजाय पन्थाम्।।

卐 त्व.न्नो अग्ने अद्भुत- क्रत्वा दक्षस्य मंहना। त्वे असुर्य1(अ) माऽरुह-त्क्राणा मित्रो न यज्ञियः।।

卐 त्व.न्नो अग्न एषा-ङ्गयं पुष्टि.ञ्च वर्धय। ये स्तोमेभि४ प्र सूरयो- नरो मघा.न्यानशुः।।

卐 ये अग्ने चन्द्र ते गिर-श्शुम्भ.न्त्यश्वराधसः। शुष्मेभि.श्शुष्मिणो नरो- दिव.श्चिद्येषां बृह-त्सुकीर्ति र्बोधति त्मना।।

卐 तव त्ये अग्ने अर्चयो -भ्राजन्तो यन्ति धृष्णुया। परिज्मानो न विद्युत-स्स्वानो रथो न वाजयुः।।

卐 नू नो अग्न ऊतये- सबाधस.श्च रातये। अस्माकास.श्च सूरयो- विश्वा^ आशा.स्तरीषणि।।

卐 त्वन्नो अग्ने अङ्गिर-स्स्तुत.स्स्तवान^ आ भर। होत र्विभ्वासहं रयिं- स्तोतृभ्य.स्स्तवसे च न^- उतैधि पृत्सु नो वृधे।।

5.11 जनस्येति षड्‍चस्य सूक्तस्य, आत्रेय स्सुतम्भरोऽग्नि-र्जगती।।

❀04.01.03 卐जनस्य गोपा^ अजनिष्ट जागृवि- रग्नि.स्सुदक्ष.स्सुविताय नव्यसे। घृतप्रतीको बृहता दिविस्पृशा- द्युम.द्विभाति भरतेभ्य.श्शुचिः।।

卐 यज्ञस्य केतुं प्रथमं पुरोहित-मग्नि.न्नर.स्त्रिषधस्थे समीधिरे। इन्द्रेण देवै.स्सरथं स बर्हिषि- सीद.न्नि होता यजथाय सुक्रतुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 असंमृष्टो जायसे मात्रो श्शुचि- र्मन्द्रः कवि रुदतिष्ठो विवस्वतः। घृतेन त्वाऽवर्धय.न्नग्न आहुत - धूम.स्ते केतु रभव.द्दिवि श्रितः।।

卐 अग्नि.र्नो यज्ञ.मुप वेतु साधुया-ऽग्नि.न्नरो वि भरन्ते गृहेगृहे। अग्नि र्दूतो अभव.द्धव्यवाहनो-ऽग्निँ वृणाना वृणते कविक्रतुम्।।

卐 तुभ्येद.मग्ने मधुमत्तमँ वच-स्तुभ्यं मनीषा इय.मस्तु शं हृदे। त्वाङ्गिर.स्सिन्धुमि.वावनी र्मही- रा पृणन्ति शवसा वर्धयन्ति च।।

卐 त्वामग्ने अङ्गिरसो गुहा हित-मन्वविन्द.ञ्छिश्रियाणँ वनेवने। स जायसे मथ्यमान.स्सहो मह-त्त्वा.माहु स्सहस.स्पुत्र.मङ्गिरः।।

5.12

❀04.01.04 卐प्राग्नये बृहते यज्ञियाय- ऋतस्य वृष्णे असुराय मन्म। घृत.न्न यज्ञ आस्ये3(ए) सुपूत-ङ्गिरं भरे वृषभाय प्रतीचीम्।।

卐 ऋत.ञ्चिकित्व ऋत मिच्चिकि-द्ध्यृतस्य धारा अनु तृन्धि पूर्वीः। नाहँ यातुं सहसा न द्वयेन- ऋतं सपा.म्यरुषस्य वृष्णः।।

卐 कया नो अग्न ऋतय.न्नृतेन- भुवो नवेदा उचथस्य नव्यः। वेदा मे देव ऋतुपा ऋतूना-न्नाहं पतिं सनितु रस्य रायः।।

卐 के ते अग्ने रिपवे बन्धनासः- के पायव.स्सनिषन्त द्युमन्तः। के धासि.मग्ने अनृतस्य पान्ति- क आसतो वचस.स्सन्ति गोपाः।।

卐 सखाय.स्ते विषुणा अग्न एते- शिवास.स्सन्तो अशिवा अभूवन्न्। अधूर्षत स्वय.मेते वचोभि-र् ऋजूयते वृजिनानि ब्रुवन्तः।।

卐 य.स्ते अग्ने नमसा यज्ञ.मीट्ट -ऋतं स पात्यरुषस्य वृष्णः। तस्य क्षयः पृथुरा साधु रेतु- प्रसर्स्राणस्य नहुषस्य शेषः।।

5.13 अर्चन्त इति षड्चस्य सूक्तस्य, आत्रेय स्सुतम्भरोऽग्नि-र्गायत्री।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.01.05 卐 अर्चन्त.स्त्वा हवामहे-ऽर्चन्त.स्स.मिधीमहि। अग्ने अर्चन्त^ ऊतये।।

卐 अग्ने.स्स्तोमं मनामहे- सिध्र.मद्य दिविस्पृशः। देवस्य द्रविणस्यवः।।

卐 अग्नि र्जुषत नो गिरो- होता यो मानुषे.ष्वा। स यक्ष.द्दैव्य.ञ्जनम्।।

卐 त्वमग्ने सप्रथा^ असि- जुष्टो होता वरेण्यः। त्वया यज्ञँ वि तन्वते।।

卐 त्वामग्ने वाजसातमँ- विप्रा^ वर्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम्।।

卐 अग्ने नेमि रराँ इव- देवाँ स्त्वं परिभूरसि। आ राध.श्चित्र.मृञ्जसे।।

☙ 5.14 अग्निं स्तोमेनेति षडृचस्य सूक्तस्य, आत्रेय स्सुतम्भरोऽग्नि-र्गायत्री।।

❀04.01.06 卐 अग्निं स्तोमेन बोधय- समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्।।

卐 तमध्वरे.ष्वीळते- देवं मर्ता^ अमर्त्यम्। यजिष्ठं मानुषे जने।।

卐 तं हि शश्वन्त^ ईळते- स्रुचा देव.ङ्घृतश्चुता। अग्निं हव्याय वोळ्हवे।।

卐 अग्नि र्जातो अरोचत- घ्नन्दस्यू.ञ्ज्योतिषा तमः। अविन्दद्गा^ अपस्स्वः~।।

卐 अग्नि.मीळेन्य.ङ्कवि-ङ्घृतपृष्ठं सपर्यत। वेतु मे शृणव.द्धवम्।।

卐 अग्नि.ङ्घृतेन वावृधु-स्स्तोमेभि र्विश्वचर्षणिम्। स्वाधीभि र्वचस्युभिः।।

☙ 5.15 प्र वेधस इति पञ्चर्चस्य सूक्तस्य, आङ्गिरसो धरुणोऽग्नि-स्त्रिष्टुप्।।

❀04.01.07 卐 प्र वेधसे कवये वेद्याय- गिरं भरे यशसे पूर्व्याय। घृतप्रसत्तो असुर स्सुशेवो- रायो धर्ता धरुणो वस्वो अग्निः।।

卐 ऋतेन ऋत.न्धरुण.न्धारयन्त- यज्ञस्य शाके परमे व्योमन्न्। दिवो धर्म.न्धरुणे सेदुषो नृ-ञ्जातै रजाताँ अभि ये ननक्षुः।।

卐 अंहोयुव.स्तन्व.स्तन्वते वि वयो- मह.द्दुष्टरं पूर्व्याय। स सँवतो नवजात.स्तुतुर्या-त्सिंह.न्न क्रुद्ध.मभितः परि ष्ठुः।।

卐 मातेव यद्भरसे पप्रथानो- जनञ्जन.न्धायसे चक्षसे च। वयोवयो जरसे यद्दधानः- परि त्मना विषुरूपो जिगासि।।

卐 वाजो नु ते शवस.स्पात्वन्त-मुरु.न्दोघ.न्धरुण.न्देव रायः। पद.न्न तायु गुहा दधानो- महो राये चितय.न्नत्रि.मस्पः~।।

☸ 5.16 बृहद्वय इति पञ्चर्चस्य सूक्तस्य, आत्रेयःपूरु-रग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः।।

❀04.01.08 卐बृह.द्वयो हि भानवे-ऽर्चा देवा.याग्नये। यं मित्र.न्न प्रशस्तिभि -र्मर्तासो दधिरे पुरः।।

卐 स हि द्युभि र्जनानां- होता दक्षस्य बाह्वोः। वि हव्य.मग्नि रानुष-ग्भगो न वार.मृण्वति।।

卐 अस्य स्तोमे मघोन-स्सख्ये वृद्धशोचिषः। विश्वा यस्मि.न्तुविष्वणि- समर्ये शुष्म.मादधुः।।

卐 अधा ह्यग्न एषां- सुवीर्यस्य मंहना। तमिद्यह्व.न्न रोदसी परि श्रवो बभूवतुः।।

卐 नू न^ एहि वार्य.मग्ने गृणान^ आ भर। ये वयँ ये च सूरय-स्स्वस्ति धामहे स-चोतैधि पृत्सु नो वृधे।।

☸ 5.17 आ यज्ञैरिति पञ्चर्चस्य सूक्तस्य, आत्रेयः पूरु-रग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः

❀04.01.09 卐आ यज्ञै र्देव मर्त्य^-इत्था तव्यांस.मूतये। अग्नि.ङ्कृते स्वध्वरे- पूरु रीळी.तावसे।।

卐 अस्य हि स्वयशस्तर^- आसा विधर्म.न्मन्यसे। त.न्नाक.ञ्चित्रशोचिषं- मन्द्रं परो मनीषया।।

卐 अस्य वासा उ अर्चिषा- य^ आयुक्त तुजा गिरा। दिवो न यस्य रेतसा- बृह.च्छोच.न्त्यर्चयः।।

卐 अस्य क्रत्वा विचेतसो- दस्मस्य वसु रथ आ। अधा विश्वासु हव्यो-ऽग्नि र्विक्षु प्र शस्यते।।

卐 नू न^ इद्धि वार्य-मासा सचन्त सूरयः। ऊर्जो नपा.दभिष्टये- पाहि शग्धि स्वस्तय -उतैधि पृत्सु नो वृधे।।

☸ 5.18 प्रातरग्निरिति पञ्चर्चस्य सूक्तस्य, आत्रेयो मृक्तवाहा द्वितोऽग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः।।

❀04.01.10 卐प्रात रग्निः पुरुप्रियो- विश.स्स्तवे.तातिथिः। विश्वानि यो अमर्त्यो- हव्या मर्तेषु रण्यति।।

卐 द्विताय मृक्तवाहसे- स्वस्य दक्षस्य मंहना। इन्दुं स धत्त आनुष-क्स्तोता चित्ते अमर्त्य।।

卐 तँ वो दीर्घायुशोचिष-ङ्गिरा हुवे मघोनाम्। अरिष्टो येषां रथो- व्यश्वदाव.न्नीयते।।

卐 चित्रा वा येषु दीधिति- रास.न्नुक्था पान्ति ये। स्तीर्णं बर्हि.स्स्वर्णरे- श्रवांसि दधिरे परि।।

卐 ये मे पञ्चाशत.न्ददु- रश्वानां सधस्तुति। द्युम.दग्ने महि श्रवो- बृह.त्कृधि मघोना-न्नृव.दमृत नृणाम्।।

☸ 5.19 अभ्यवस्था इति पञ्चर्चस्य सूक्तस्य, आत्रेयो वव्रि-रग्निः-आद्ये द्वे गायत्र्यौ-तृतीया चतुर्थ्यावनुष्टुभौ- पञ्चमी विराड्रूपा।।

❀04.01.11 卐अभ्यवस्थाः प्र जायन्ते- प्र वव्रे र्वव्रि श्चिकेत। उपस्थे मातु र्वि चष्टे।।

卐 जुहुरे वि चितयन्तो-ऽनिमिष.न्नृम्णं पान्ति। आ दृळ्हां पुरं विविशुः।।

卐 आ श्वैत्रेयस्य जन्तवो- द्युम.द्वर्धन्त कृष्टयः। निष्कग्रीवो बृहदुक्थ^- एना मध्वा न वाजयुः।।

卐 प्रिय.न्दुग्ध.न्न काम्य-मजामि जाम्यो.स्सचा। घर्मो न वाजजठरो-ऽदब्ध.श्शश्वतो दभः।।

卐 क्रीळ.न्नो रश्म आ भुव-स्सं भस्मना वायुना वेविदानः। ता^ अस्य सन्धृषजो न तिग्मा-स्सुसंशिता ^वक्ष्यो वक्षणेस्थाः।।

☸ 5.20 यमग्न इति चतुर्ऋचस्य सूक्तस्य, आत्रेयः प्रयस्वन्तोऽग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः।।

❀04.01.12 卐यमग्ने वाजसातम- त्व.ञ्चिन्मन्यसे रयिम्। त.न्नो गीर्भि श्श्रवाय्य-न्देवत्रा पनया युजम्।।

卐 ये अग्ने नेरयन्ति ते- वृद्धा^ उग्रस्य शवसः। अप द्वेषो अप ह्वरो-ऽन्यव्रतस्य सश्चिरे।।

卐 होतार.न्त्वा वृणीमहे-ऽग्ने दक्षस्य साधनम्। यज्ञेषु पूर्व्य.ङ्गिरा- प्रयस्वन्तो हवामहे।।

卐 इत्था यथा त ऊतये- सहसाव न्दिवेदिवे। राय ऋताय सुक्रतो~- गोभि. ष्ष्याम सधमादो- वीरै स्स्याम सधमादः।।

☸ 5.21 मनुष्वदिति चतुर्ऋचस्य सूक्तस्य, आत्रेय स्ससोऽग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः।।

❀04.01.13 卐मनुष्व.त्त्वा नि धीमहि- मनुष्व.त्समिधीमहि। अग्ने मनुष्व.दङ्गिरो- देवा.न्देवयते यज।।

卐 त्वं हि मानुषे जने-ऽग्ने सुप्रीत^ इध्यसे। स्रुचस्त्वा यन्त्यानुष-क्सुजात सर्पिरासुते।।

卐 त्वाँ विश्वे सजोषसो- देवासो दूत.मक्रत। सपर्यन्त.स्त्वा कवे- यज्ञेषु देव.मीळते।।

卐 देवँ वो देवयज्यया-ऽग्नि.मीळीत मर्त्यः। समिद्ध.श्शुक्र दीदि-ह्यृतस्य योनि.माऽसद-स्ससस्य योनि माऽसदः।।

☸ 5.22 प्र विश्वसामन्निति चतुर्ऋचस्य सूक्तस्य, आत्रेयो विश्वसामाग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः।।

❀04.01.14 卐प्र विश्वसाव.न्नत्रिव-दर्चा पावकशोचिषे। यो अध्वरे.ष्वीड्यो- होता मन्द्रतमो विशि।।

卐 न्य1(अ)ग्नि.ञ्जातवेदस-न्दधाता देव.मृत्विजम्। प्र यज्ञ^ ए.त्वानुष-गद्या देवव्यचस्तमः।।

卐 चिकित्विन्मनसन्त्वा -देवं मर्तास ऊतये। वरेण्यस्य तेऽवस- इयानासो अमन्महि।।

卐 अग्ने चिकिद्ध्य1(अ)स्य न^- इदं वच.स्सहस्य। तन्त्वा सुशिप्र दम्पते- स्तोमै वर्ध.न्त्यत्रयो- गीर्भि श्शुम्भ.न्त्यत्रयः।।

☸ 5.23 अग्ने सहन्तमिति चतुर्ऋचस्य सूक्तस्य, आत्रेयो द्युम्नो विश्वचर्षणि-रग्नि-रनुष्टुप्-अन्त्या पङ्क्तिः।।

❀04.01.15 卐अग्ने सहन्त.मा भर- द्युम्नस्य प्रासहा रयिम्। विश्वा य.श्चर्षणी रभ्या3-(आ)सा वाजेषु सासहत्।।

卐 तमग्ने पृतनाषहं- रयिं सहस्व^ आ भर। त्वं हि सत्यो अद्भुतो- दाता वाजस्य गोमतः।।

卐 विश्वे हि त्वा सजोषसो- जनासो वृक्तबर्हिषः। होतारं सद्मसु प्रियं- व्यन्ति वार्या पुरु।।

卐 स हि ष्मा विश्वचर्षणि- रभिमाति सहो दधे। अग्न एषु क्षये.ष्वा- रेव.न्न.श्शुक्र दीदिहि- द्युम.त्पावक दीदिहि।।

☸ 5.24 अग्ने त्व न्न इति चतुर्ऋचस्य सूक्तस्य, गौपायना लौपायना वा बन्धु स्सुबन्धु श्श्रुतबन्धुर्विप्रबंधुश्च क्रमेणर्षयोऽग्नि-र्द्विपदाविराट्।।

❀04.01.16 卐अग्ने त्व.न्नो अन्तम^ उत त्राता- शिवो भवा वरूथ्यः।।

卐 वसु रग्नि र्वसुश्रवा^-अच्छा नक्षि द्युमत्तमं रयि.न्दाः।।

卐 स नो बोधि श्रुधी हव-मुरुष्या णो अघायत.स्समस्मात्।।

卐 तन्त्वा शोचिष्ठ दीदिव-स्सुम्नाय नून.मीमहे सखिभ्यः।।

☸ 5.25 अच्छा व इति नवर्चस्य सूक्तस्य, आत्रेयो वसूयवोऽग्नि-रनुष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀04.01.17 卐अच्छा वो अग्नि.मवसे- देव.ङ्गासि स नो वसुः। रास.त्पुत्र^ ऋषूणा-मृतावा पर्षति द्विषः।।

卐 स हि सत्यो यं पूर्वे चि-द्देवास.श्चिद्य.मीधिरे। होतारं मन्द्रजिह्व.मि-त्सुदीतिभि र्विभावसुम्।।

卐 स नो धीती वरिष्ठया- श्रेष्ठया च सुमत्या। अग्ने रायो दिदीहि न-स्सुवृक्तिभि र्वरेण्य।।

卐 अग्नि र्देवेषु राज-त्यग्नि र्मर्ते.ष्वाविशन्न्। अग्नि र्नो हव्यवाहनो-ऽग्नि.न्धीभि.स्सपर्यत।।

卐 अग्नि.स्तुविश्रवस्तम-न्तुविब्रह्माण.मुत्तमम्। अतूर्तं श्रावयत्पतिं -पुत्र.न्ददाति दाशुषे।।

❀04.01.18 卐अग्नि र्ददाति सत्पतिं- सासाह यो युधा नृभिः। अग्नि रत्यं रघुष्यद-ञ्जेतार. मपराजितम्।।

卐 यद्वाहिष्ठ.न्तदग्नये- बृह.दर्च विभावसो~। महिषीव त्वद्रयि-स्त्व.द्वाजा^ उदीरते।।

卐 तव द्युमन्तो अर्चयो- ग्रावेवोच्यते बृहत्। उतो~ ते तन्यतु र्यथा- स्वानो अर्त त्मना दिवः।।

卐 एवाꣳ अग्निँ वसूयव-स्सहसानँ र्ववन्दिम। स नो विश्वा^ अति द्विषꣳ- पर्ष.न्नावेव सुक्रतुः।।

5.26 अग्ने पावकेति नवर्चस्य सूक्तस्य, आत्रेयो वसूयवोऽग्नि-रन्त्याया विश्वेदेवा- गायत्री।।

❀04.01.19 卐अग्ने पावक रोचिषा- मन्द्रया देव जिह्वया। आ देवा.न्वक्षि यक्षि च।।

卐 तन्त्वा घृतस्न~ वीमहे- चित्रभानो~ स्वर्दृशम्। देवाꣳ आ वीतये वह।।

卐 वीतिहोत्र.न्त्वा कवे- द्युमन्तं समिधीमहि। अग्ने बृहन्त.मध्वरे।।

卐 अग्ने विश्वेभि रा गहि- देवेभि र्हव्यदातये। होतार.न्त्वा वृणीमहे।।

卐 यजमानाय सुन्वत -आऽग्ने सुवीर्यँ वह। देवै रा सत्सि बर्हिषि।।

❀04.01.20 卐समिधान.स्सहस्रजि-दग्ने धर्माणि पुष्यसि। देवाना.न्दूत^ उक्थ्यः।।

卐 न्य1(अ)ग्नि.ञ्जातवेदसं- होत्रवाहँ यविष्ठ्यम्। दधाता देव.मृत्विजम्।।

卐 प्र यज्ञ^ एत्वानुष-गद्या देवव्यचस्तमः। स्तृणीत बर्हिरासदे।।

卐 एदं मरुतो अश्विना- मित्र.स्सीदन्तु वरुणः। देवास.स्सर्वया विशा।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

☸ 5.27 अनस्वन्तेति षड्चस्य सूक्तस्य, त्रैवृष्णस्त्र्यरुणः पौरुकुत्स्यस्त्रसदस्यु र्भारतोऽश्वमेधश्चैते ऋषयोऽग्नि-रन्त्याया इन्द्राग्नी- त्रिष्टुप्-अन्त्या स्तिस्रोऽनुष्टुभः- (अस्मिन्सूक्ते भौमोऽत्रिरेव देवतेति केचित्-अन्यथा यो मे शता च विंशतिं च गोनामित्यादि दातृक्रियाया अनुपपत्तेः- नैतदन्ये मन्यन्ते आत्माध्यास पक्षस्वीकारेण तथाऽप्युपपत्तेः)

❀04.01.21 卐अनस्वन्ता सत्पति र्मामहे मे- गावा चेतिष्ठो असुरो मघोनः। त्रैवृष्णो अग्ने दशभि स्सहस्रै- र्वैश्वानर त्र्यरुण.श्चिकेत।।

卐 यो मे शता च विंशति.ञ्च गोनां- हरी~ च युक्ता सुधुरा ददाति। वैश्वानर सुष्टुतो वावृधानो-ऽग्ने यच्छ त्र्यरुणाय शर्म।।

卐 एवा ते अग्ने सुमति.ञ्चकानो- नविष्ठाय नवम.न्त्रसदस्युः। यो मे गिर.स्तुविजातस्य पूर्वी- र्युक्ते.नाभि त्र्यरुणो गृणाति।।

卐 यो म इति प्रवोच-त्यश्वमेधाय सूरये। दद.दृचा सनिँ यते- दद.न्मेधा.मृतायते।।

卐 यस्य मा परुषा.श्शत-मुद्धर्षय.न्त्युक्षणः। अश्वमेधस्य दाना-स्सोमाइव त्र्याशिरः।।

卐 इन्द्राग्नी~ शतदा-व्यश्वमेधे सुवीर्यम्। क्षत्र.न्धारयतं बृह-द्दिवि सूर्य.मिवाजरम्।।

☸ 5.28 समिद्ध इति षड्चस्य सूक्तस्य, आत्रेयी विश्ववारा ऋषिकाऽग्निः-आद्याः क्रमेण त्रिष्टुप्-जगती- त्रिष्टु-बनुष्टुभः-अन्त्ये द्वे गायत्र्यौ।।

❀04.01.22 卐समिद्धो अग्नि र्दिवि शोचि रश्रे-त्प्रत्य.ङ्ङुषस.मुर्विया वि भाति। एति प्राची विश्ववारा नमोभि-र्देवा॥ ईळाना हविषा घृताची।।

卐 समिध्यमानो अमृतस्य राजसि- हविष्कृण्वन्तं सचसे स्वस्तये। विश्वं स धत्ते द्रविणँ य.मिन्व-स्यातिथ्य.मग्ने नि च धत्त इत्पुरः।।

卐 अग्ने शर्ध महते सौभगाय- तव द्युम्ना.न्युत्तमानि सन्तु। स.ञ्जास्पत्यं सुयम.मा कृणुष्व-शत्रूयता.मभि तिष्ठा महांसि।।

卐 समिद्धस्य प्रमहसो-ऽग्ने वन्दे तव श्रियम्। वृषभो द्युम्नवा॥ असि- समध्वरे.ष्विध्यसे।।

卐 समिद्धो अग्न आहुत- देवा.न्यक्षि स्वध्वर। त्वं हि हव्यवा.ळसि।।

卐 आ जुहोता दुवस्य-ताग्निं प्रय.त्यध्वरे। वृणीध्वं हव्यवाहनम्।।

5.29 त्र्यर्यमेति पञ्चदशर्चस्य सूक्तस्य, शाक्त्यो गौरिवीति-रिन्द्रः (उशना यदिति पादस्योशना वा) त्रिष्टुप्।।

❀04.01.23 卐त्र्यर्यमा मनुषो देवताता- त्री रोचना दिव्या धारयन्त। अर्चन्ति त्वा मरुतः॰ पूतदक्षा-स्त्वमेषा.मृषि रिन्द्रासि धीरः।।

卐 अनु यदीं मरुतो मन्दसान-मार्च.न्निन्द्रं पपिवांसं सुतस्य। आऽदत्त वज्र.मभि यदहिं ह-न्नपो यह्वी रसृज .त्सर्तवा उ।।

卐 उत ब्रह्माणो मरुतो मे अ-स्येन्द्र.स्सोमस्य सु॰षुतस्य पेयाः। तद्धि हव्यं मनुषे गा^ अविन्द-दह.न्नहिँ पपिवा॰ इन्द्रो अस्य।।

卐 आद्रोदसी वितरँ वि ॰ष्कभाय-त्सँविव्यान.श्चिद्भियसे मृगङ्कः~। जिगर्ति.मिन्द्रो अप जर्गुराण॰- प्रति श्वसन्त.मव दानवं हन्न्~।।

卐 अध क्रत्वा मघव.न्तुभ्य.न्देवा^- अनु विश्वे अदद.स्सोमपेयम्। यत्सूर्यस्य हरित॰ पतन्ती॰-पुर.स्सती रुपरा^ एतशे कः~।।

❀04.01.24 卐नव यदस्य नवति.श्च भोगा-न्त्साकँ वज्रेण मघवा विवृश्चत्। अर्च.न्तीन्द्रं मरुत.स्सधस्थे -॰त्रैष्टुभेन वचसा बाधत द्याम्।।

卐 सखा सख्ये अपच.त्तूय.मग्नि- रस्य क्रत्वा महिषा त्री शतानि। त्री साक.मिन्द्रो मनुष.स्सरांसि- सुतं पिब.द्वृत्रहत्याय सोमम्।।

卐 त्री यच्छता महिषाणा.मघो मा-स्त्री सरांसि मघवा सोम्यापाः। कार.न्न विश्वे अह्वन्त देवा^- भर .मिन्द्राय यदहि.ञ्जघान।।

卐 उशना य.त्सहस्यै3(ऐ)रयात-ङ्गृह.मिन्द्र जूजुवानेभि रश्वैः। वन्वानो अत्र सरथँ ययाथ- कुत्सेन देवै रवनो ह शुष्णम्।।

卐 प्रान्य.च्चक्र.मवृह.स्सूर्यस्य- कुत्सा यान्य.द्वरिवो यातवेऽकः~। अनासो दस्यूं॰ रमृणो वधेन- नि दुर्योण आवृण.ङ्मृध्रवाचः।।

❀04.01.25 卐स्तोमास.स्त्वा गौरिवीते रवर्ध-न्नरन्धयो वैदथिनाय पिप्रुम्। आ त्वा मृजिश्वा सख्याय चक्रे- पच.न्पक्ती रपिब.स्सोम.मस्य।।

卐 नवग्वास.स्सुतसोमास^ इन्द्र-न्दशग्वासो अभ्यर्च.न्त्यर्कैः। गव्य.श्चिदूर्व.मपिधानवन्त-न्त.श्चिन्नर श्शशमाना^ अप व्रन्न्।।

卐 कथो~ नु ते परि चराणि विद्वा-न्वीर्या मघव.न्या चकर्थ। या चो~ नु नव्या कृणव.श्शविष्ठ- प्रेदु ता ते विदथेषु ब्रवाम।।

卐 एता विश्वा चकृवा॰ इन्द्र भू-र्यपरीतो जनुषा वीर्येण। या चि.न्नु वज्रि.न्कृणवो दधृष्वा-न्न ते वर्ता तविष्या^ अस्ति तस्याः।।

卐 इन्द्र ब्रह्म क्रियमाणा जुषस्व- या ते शविष्ठ नव्या^ अकर्म। वस्त्रेव भद्रा सुकृता वसूयू -रथ.न्न धीर .स्स्वपा^ अतक्षम्।।

5.30 क स्येति पञ्चदशर्चस्य सूक्तस्य, आत्रेयो बभ्रुरिन्द्रोऽन्त्यानां चतसृणामृणञ्चयेंद्रौ देवते- त्रिष्टुप्।।

❀04.01.26 卐क1(अ)स्य वीरः को अपश्य.दिन्द्रं- सुखरथ.मीयमानं हरिभ्याम्। यो राया वज्री सुतसोम.मिच्छ-न्तदोको गन्ता पुरुहूत^ ऊती।।

卐 अवाचचक्षं पद.मस्य सस्व- रुग्र.न्निधातु रन्वाय.मिच्छन्न्। अपृच्छ.मन्या॰ उत ते म आहु- रिन्द्र.न्नरो बुबुधाना^ अशेम।।

卐 प्र नु वयं सुते या ते कृता-नीन्द्र ब्रवाम यानि नो जुजोषः। वेद.दविद्वा.ञ्छृणव.च्च विद्वा-न्वहतेऽयं मघवा सर्वसेनः।।

卐 स्थिरं मन.श्चकृषे जात^ इन्द्र- वेषी.देको युधये भूयस.श्चित्। अश्मान.श्चिच्छवसा दिद्युतो वि- विदो गवा.मूर्व.मुस्रियाणाम्।।

卐 परो यत्त्वं परम आजनिष्ठाः- परावति श्रुत्य.न्नाम बिभ्रत्। अत.श्चिदिन्द्रा.दभयन्त देवा -^विश्वा^ अपो अजय.द्दासपत्नीः।।

❀04.01.27 卐तुभ्ये.देते मरुत.स्सुशेवा^- अर्च.न्त्यर्कं सुन्व.न्त्यन्धः। अहि.मोहान.मप^ आशयानं- प्र मायाभि र्मायिनं सक्ष.दिन्द्रः।।

卐 वि षू मृधो जनुषा दान.मिन्व-न्नह.न्गवा मघव.न्त्सञ्चकानः। अत्रा दासस्य नमुचे.श्शिरो य-दवर्तयो मनवे गातु.मिच्छन्न्।।

卐 युजं हि मा.मकृथा^ आदि.दिन्द्र- शिरो दासस्य नमुचे र्मथायन्न्। अश्मान.श्चित्स्वर्य1(अँ)वर्तमानं- प्र चक्रियेव रोदसी मरुद्भ्यः।।

卐 स्त्रियो हि दास^ आयुधानि चक्रे- किं मा कर.न्नबला^ अस्य सेनाः। अन्त र्ह्यख्य्.दुभे~ अस्य धेने~ अथोप प्रैद्युधये दस्यु.मिन्द्रः।।

卐 समत्र गावोऽभितो ऽनव-न्तेहेह वत्सै र्वियुता^ यदासन्न्। सन्ता इन्द्रो असृज.दस्य शाकै- र्यदीं सोमास .स्सुषुता^ अमन्दन्न्।।

❀04.01.28 卐यदीं सोमा^ बभ्रुधूता^ अमन्द-न्नरोरवी.द्वृषभ स्सादनेषु। पुरन्दरः पपिवाꣳ इन्द्रो अस्य- पुन र्गवा.मददा.दुस्त्रियाणाम्।।

卐 भद्र.मिदं रुशमा^ अग्ने अक्र-न्गवा.श्चत्वारि ददत.स्सहस्रा। ऋणञ्चयस्य प्रयता मघानि- प्रत्यग्रभीष्म नृतमस्य नृणाम्।।

卐 सुपेशसं माऽव सृज.न्त्यस्त-ङ्गवां सहस्रै रुशमासो अग्ने। तीव्रा^ इन्द्र.ममन्दु.स्सुतासो-ऽक्तो र्व्युष्टौ परितक्म्यायाः।।

卐 औच्छत्सा रात्री परितक्म्या याꣳ- ऋणञ्चये राजनि रुशमानाम्। अत्यो न वाजी रघु रज्यमानो- बभ्रु श्चत्वा.र्यसन.त्सहस्रा।।

卐 चतुस्सहस्र.ङ्गव्यस्य पश्वः- प्रत्यग्रभीष्म रुशमे.ष्वग्ने। घर्म.श्चित्तप्तः प्रवृजे य^ आसी-दयस्मय स्त.म्वादाम विप्राः।।

5.31 इन्द्रो रथायेति त्रयोदशर्चस्य सूक्तस्य, आत्रेयोऽवस्युरिन्द्रः (उग्रमयात मित्यादि पादौ कुत्सदैवत्यौ-उशनो दैवत्यौ वा) नवम्या इन्द्राकुत्सौ- त्रिष्टुप्।।

❀04.01.29 卐इन्द्रो रथाय प्रवत.ङ्कृणोति- यमध्यस्था.न्मघवा वाजयन्तम्। यूथेव पश्वो व्युनोति गोपा ^-अरिष्टो याति प्रथम.स्सिषासन्न्।।

卐 आ प्र द्रव हरिवो मा वि वेनः- पिशङ्गराते अभि न.स्सचस्व। नहि त्वदिन्द्र वस्यो अन्य.द-स्त्यमेनाँ.श्चि ज्जनिवत.श्चकर्थ।।

卐 उद्य.त्सह.स्सहस^ आऽजनिष्ट- देदिष्ट इन्द्र^इन्द्रियाणि विश्वा। प्राचोदय.त्सुदुघा^ वव्रे अन्त-र्विज्योतिषा संववृत्व.त्तमोऽवः।।

卐 अनव.स्ते रथ.मश्वाय तक्ष-न्त्वष्टा वज्रं पुरुहूत द्युमन्तम्। ब्रह्माण^ इन्द्रं महयन्तो अर्कै- रवर्धय.न्नहये हन्तवा उ।।

卐 वृष्णे यत्ते वृषणो अर्क.मर्चा-निन्द्र ग्रावाणो अदिति.स्सजोषाः। अनश्वासो ये पवयोऽरथा ^-इन्द्रेषिता ^अभ्यवर्तन्त दस्यून्।।

❀04.01.30 卐प्र ते पूर्वाणि करणानि वोचं- प्र नूतना मघव.न्या चकर्थ। शक्तीवो य.द्विभरा^ रोदसी उभे~- जय.न्नपो मनवे दानुचित्राः।।

卐 तदि.न्नु ते करण.न्दस्म वि-प्राहिँ यद्ध.न्नोजो अत्रामिमीथाः। शुष्णस्य चित्परि माया^ अगृभ्णाः-प्रपित्वँ यन्नप दस्यूँ रसेधः।।

卐 त्वमपो यदवे तुर्वशा-यारमय.स्सुदुघाः पार^ इन्द्र। उग्र.मयात.मवहो ह कुत्सं- सं ह यद्वा .मुशनाऽरन्त देवाः।।

卐 इन्द्राकुत्सा वहमाना रथेना-ऽऽवा.मत्या^ अपि कर्णे वहन्तु। नि ष्षीमद्भ्यो धमथो नि ष्षधस्था-न्मघोनो हृदो वरथ.स्तमांसि।।

卐 वातस्य युक्ता.न्त्सुयुज श्चिदश्वा-न्कवि श्चिदेषो अजग.न्नवस्युः। विश्वे ते अत्र मरुत.स्सखाय^-इन्द्र ब्रह्माणि तविषी.मवर्धन्न्।।

❀04.01.31 卐सूरश्चि.द्रथं परितक्म्यायां- पूर्व.ङ्कर.दुपर.ञ्जूजुवांसम्। भर.च्चक्र.मेतश.स्सं रिणाति- पुरो दध.त्सनिष्यति क्रतु.न्नः।।

卐 आ यञ्जना^ अभिचक्षे जगा-मेन्द्र.स्सखायं सुतसोम.मिच्छन्न्। वद.न्ग्रावाऽव वेदिं भ्रियाते- यस्य जीर. मध्वर्यव.श्चरन्ति।।

卐 ये चाकनन्त चाकनन्त नू ते- मर्ता^ अमृत मो~ ते अंह^ आऽरन्न्। वावन्धि यज्यू॰ रुत तेषु धे-ह्योजो जनेषु येषु ते स्याम।।

☸ 5.32 अदर्दरुत्समिति द्वादशर्चस्य सूक्तस्य, आत्रेयो गातु-रिन्द्र-स्त्रिष्टुप्।।

❀04.01.32 卐अदर्द रुत्स.मसृजो वि खानि- त्व.मर्णवा.न्बद्बधाना॰ अरम्णाः। महान्त.मिन्द्र पर्वतँ वि यद्व-स्सृजो वि धारा^ अव दानवं हन्न्~।।

卐 त्व.मुत्सा॰ ऋतुभि र्बद्बधाना॰- अरंह^ ऊधः पर्वतस्य वज्रिन्न्। अहि.ञ्चिदुग्र प्रयुतं शयान-ञ्जघन्वा॰ इन्द्र तविषी.मधत्थाः।।

卐 त्यस्य चि न्महतो नि र्मृगस्य- वध र्जघान तविषीभि रिन्द्रः। य^ एक^ इदप्रति र्मन्यमान^- आदस्मा .दन्यो अजनिष्ट तव्यान्।।

卐 त्यञ्चिदेषां स्वधया मदन्तं- मिहो नपातं सुवृध.न्तमोगाम्। वृषप्रभर्मा दानवस्य भामँ- वज्रेण वज्री नि जघान शुष्णम्।।

卐 त्यञ्चिदस्य क्रतुभि र्निषत्त-ममर्मणो विद.दिदस्य मर्म। यदीं सुक्षत्र प्रभृता मदस्य- युयुत्सन्त.न्तमसि हर्म्येधाः।।

卐 त्य.ञ्चिदित्था कत्पयं शयान-मसूर्ये तमसि वावृधानम्। तञ्चिन्मन्दानो वृषभ.स्सुत-स्योच्चै रिन्द्रो अपगूर्या जघान।।

❀04.01.33 卐उद्य.दिन्द्रो महते दानवाय- वध र्यमिष्ट सहो अप्रतीतम्। यदीं वज्रस्य प्रभृतौ ददाभ-विश्वस्य जन्तो रधम.ञ्चकार।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 त्य.श्चिदर्णं मधुपं शयान-मसिन्वं वव्रं मह्यादं.दुग्रः। अपादं.मत्रं महता वधेन- नि दुर्योणं आवृण.ङ्मृध्रवाचम्।।

卐 को अस्य शुष्म.न्तविषीँ वरात-एको धना भरते अप्रतीतः। इमे~ चिदस्य ज्रयसो नु देवी~- इन्द्र .स्यौजसो भियसा जिहाते~।।

卐 न्यस्मै देवी स्वधितिं जिहीते- इन्द्राय गातु रुशतीव येमे। सँ यदोजो युवते विश्वे.माभि- रनु स्वधान्ने क्षितयो नमन्त।।

卐 एक.न्नु त्वा सत्पतिं पाञ्चजन्य-ञ्जातं शृणोमि यशस.ञ्जनेषु। तं मे जगृभ्र आशसो नविष्ठ-न्दोषा वस्तो र्हवमानास^ इन्द्रम्।।

卐 एवा हि त्वा.मृतुथा यातयन्तं- मघा विप्रेभ्यो ददतं शृणोमि। किन्ते ब्रह्माणो गृहते सखायो- ये त्वाया निदधुः कामे.मिन्द्र।।।। इति प्रथमाध्याय स्समाप्तः।।

## चतुर्थाष्टके द्वितीयाध्यायः। वर्गाः(1-28)

5.33 महि मह इति दशर्चस्य सूक्तस्य, प्राजापत्यस्सँवरण- इन्द्र-स्त्रिष्टुप्।।

❀04.02.01 卐महि महे तवसे दीध्ये नृ-निन्द्रा.येत्था तवसे अतव्यान्। यो अस्मै सुमतिँ वाजसातौ- स्तुतो जने समर्य.श्चिकेत।।

卐 स त्व.न्न^ इन्द्र धियसानो अर्कै- र्हरीणां वृष.न्योक्त्र.मश्रेः। या^ इत्था मघव.न्ननु जोषँ वक्षो- अभि प्रार्य.स्सक्षि जनान्।।

卐 न ते त इन्द्राभ्य1(अ)स्म दृ-ष्वायुक्तासो अब्रह्मता यदसन्न्। तिष्ठा रथ.मधि तं वज्रहस्ता- ऽऽरश्मि.न्देव यमसे स्वश्वः।।

卐 पुरू यत्त इन्द्र स.न्त्युक्था- गवे चक.र्थोर्वरासु युध्यन्न्। ततक्षे सूर्याय चिदोकसि स्वे- वृषा समत्सु दासस्य नाम चित्।।

卐 वय.न्ते त इन्द्र ये च नर-श्शर्धो जज्ञाना^ याता.श्च रथाः। आऽस्मा.न्जगम्या.दहिशुष्म सत्वा- भगो न हव्यः प्रभृथेषु चारुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀04.02.02 卐पपृक्षेण्य.मिन्द्र त्वे ह्योजो- नृम्णानि च नृतमानो अमर्तः। स न^ एनीं वसवानो रयि .न्दाः- प्रार्य.स्स्तुषे तुविमघस्य दानम्।।

卐 एवा न^ इन्द्रोतिभि रव- पाहि गृणत.श्शूर कारून्। उत त्वच.न्ददतो वाजसातौ- पिप्रीहि मध्व .स्सुषुतस्य चारोः।।

卐 उत त्ये मा पौरुकुत्स्यस्य सूरे-स्त्रसदस्यो र्हिरणिनो रराणाः। वहन्तु मा दश श्येतासो अस्य- गैरिक्षितस्य क्रतुभि र्नु सश्चे।।

卐 उत त्ये मा मारुताश्वस्य शोणाः- क्रत्वामघासो विदथस्य रातौ। सहस्रा मे च्यवतानो ददान^- आनूक.मर्यो वपुषे नाऽर्चत्।।

卐 उत त्ये मा ध्वन्यस्य जुष्टा^- लक्ष्मण्यस्य सुरुचो यतानाः। मह्ना राय.स्सँवरणस्य ऋषे- र्व्रजं.न्न गावः प्रयता^ अपि ग्मन्न्।।

5.34 अजातशत्रुमिति नवर्चस्य सूक्तस्य, प्राजापत्यस्सँवरण- इन्द्रो- जगत्यन्त्या त्रिष्टुप्।।

❀04.02.03 卐अजातशत्रु.मजरा^ स्वर्व-त्यनु स्वधाऽमिता दस्म.मीयते। सुनोतन पचत ब्रह्मवाहसे –पुरुष्टुताय प्रतर.न्दधातन।।

卐 आ य.स्सोमेन जठर.मपिप्र-तामन्दत मघवा मध्वो अन्धसः। यदीं मृगाय हन्तवे महावध- स्सहस्रभृष्टि .मुशना वधँ यमत्।।

卐 यो अस्मै घ्रंस उत वा य^ ऊधनि- सोमं सुनोति भवति द्युमाँ अह। अपाप शक्र.स्ततनुष्टि.मूहति- तनूशुभ्रं मघवा यः कवासखः।।

卐 यस्यावधी.त्पितरँ यस्य मातरँ- यस्य शक्रो भ्रातर.न्नात^ ईषते। वेतीद्वस्य प्रयता यतङ्करो- न किल्बिषा .दीषते वस्व^ आकरः।।

卐 न पञ्चभि र्दशभि र्वष्ट्यारभ-न्नासुन्वता सचते पुष्यता चन। जिनाति वेदमुया हन्ति वा धुनि-रा देवयुं भजति गोमति व्रजे।।

❀04.02.04 卐वित्वक्षण.स्समृतौ चक्रमासजो-ऽसुन्वतो विषुण.स्सुन्वतो वृधः। इन्द्रो विश्वस्य दमिता विभीषणो- यथावश.न्नयति दास.मार्यः।।

卐 समीं पणे रजति भोजनं मुषे- वि दाशुषे भजति सूनरँ वसु। दुर्गे चन ध्रियते विश्व^ आ पुरु- जनो यो अस्य तविषी.मचुक्रुधत्।।

卐 सँ यज्ञनौ सुधनौ विश्वशर्धसा- ववे.दिन्द्रो मघवा गोषु शुभ्रिषु। युजं ह्य1(अ)न्य.मकृत प्रवेप-न्युदी.ङ्गव्यं सृजते सत्वभि र्धुनिः।।

卐 सहस्रसा.माग्निवेशि.ङ्गृणीषे- शत्रि.मग्न उपमा.ङ्केतु.मर्यः। तस्मा आप.स्सँयतः पीपयन्त-तस्मि.न्क्षत्र. मम्व.त्त्वेष.मस्तु।।

☫ 5.35 यस्ते साधिष्ठ इत्यष्टर्चस्य सूक्तस्य, आङ्गिरसः प्रभूवसु-रिन्द्रोऽनुष्टुबन्त्या पङ्क्तिः।।

❀04.02.05 卐य.स्ते साधिष्ठोऽवस -इन्द्र क्रतुष्ट.मा भर। अस्मभ्य.ञ्चर्षणीसहं- सस्निँ वाजेषु दुष्टरम्।।

卐 यदिन्द्र ते चतस्रो- यच्छूर सन्ति तिस्रः। यद्वा पञ्च क्षितीना-मव.स्त.त्सु न^ आ भर।।

卐 आ तेऽवो वरेण्यँ- वृषन्तमस्य हूमहे। वृषजूति.र्हि जज्ञिष -आभूभि रिन्द्र तुर्वणिः।।

卐 वृषा.ह्यसि राधसे -जज्ञिषे वृष्णि ते शवः। स्वक्षत्र.न्ते धृष.न्मन-स्सत्राह.मिन्द्र पौंस्यम्।।

卐 त्व.न्त.मिन्द्र.मर्त्य-ममित्रयन्त.मद्रिवः। सर्वरथा शतक्रतो~ नि याहि शवस.स्पते।।

❀04.02.06 卐त्वामि.द्वृत्रहन्तम- जनासो वृक्तबर्हिषः। उग्रं पूर्वीषु पूर्व्यं- हवन्ते वाजसातये।।

卐 अस्माक.मिन्द्र दुष्टरं- पुरोयावान.माजिषु। सयावान.न्धनेधने- वाजयन्त.मवा रथम्।।

卐 अस्माक.मिन्द्रेहि नो- रथमवा पुरन्ध्या। वयं शविष्ठ वार्य-न्दिवि श्रवो दधीमहि- दिवि स्तोमं मनामहे।।

☫ 5.36 स आ गमदिति षड़ृचस्यसूक्तस्य, आङ्गिरसः प्रभूवसु-रिन्द्र-स्त्रिष्टुप्-तृतीया जगती।।

❀04.02.07 卐स आ गम.दिन्द्रो यो वसूना-श्चिकेत.द्दातु.न्दामनो रयीणाम्। धन्वचरो न वंसग.स्तृषाण- श्चकमानः पिबतु दुग्ध.मंशुम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 आ ते हनू~ हरिव.श्शूर शिप्रे~- रुह.त्सोमो न पर्वतस्य पृष्ठे। अनु त्वा राज.न्नर्वतो न हिन्व-न्गीर्भि र्मदेम पुरुहूत विश्वे।।

卐 चक्र.न्न वृत्तं पुरुहूत वेपते- मनो भिया मे अमते रिदद्रिवः। रथा.दधि त्वा जरिता सदावृध- कुवि.न्नु स्तोष.न्मघव.न्पुरूवसुः।।

卐 एष ग्रावेव जरिता त इ-न्द्रेयर्ति वाचं बृह.दाशुषाणः। प्र सव्येन मघव.न्यंसि राय४- प्र दक्षिणि.द्धरिवो मा वि वेनः।।

卐 वृषा त्वा वृषणँ वर्धतु द्यौ-र्वृषा वृषभ्याँ वहसे हरिभ्याम्। स नो वृषा वृषरथ.स्सुशिप्र -वृषक्रतो~ वृषा वज्रि.न्भरे धाः।।

卐 यो रोहितौ वाजिनौ वाजिनीवा-न्त्रिभि.श्शतै.स्सचमाना वदिष्ट। यूने समस्मै क्षितयो नमन्तां-श्रुतरथाय मरुतो दुवोया।।

5.37 सं भानुनेति पञ्चर्चस्य सूक्तस्य, भौमोऽत्रि-रिन्द्र-स्त्रिष्टुप्।।

❀04.02.08 卐सं भानुना यतते सूर्यस्या-ऽऽजुह्वानो घृतपृष्ठ.स्स्वञ्चाः। तस्मा अमृध्रा^ उषसो व्युच्छा-न्य ^इन्द्राय सुनवा.मेत्याह।।

卐 समि.द्धाग्नि र्वनव.त्स्तीर्णबर्हि- र्युक्तग्रावा सुतसोमो जराते। ग्रावाणो यस्येषिरँ वद-न्त्ययं.दध्वर्यु र्हविषाऽव सिन्धुम्।।

卐 वधू रियं पति.मिच्छ.न्त्येति- य^ ईं वहाते महिषी.मिषिराम्। आऽस्य श्रवस्या.द्रथ^ आ च घोषा-त्पुरू सहस्रा परि वर्तयाते।।

卐 न स राजा व्यथते यस्मि.न्निन्द्र-स्तीव्रं सोमं पिबति गोसखायम्। आ सत्वनै रजति हन्ति वृत्र-ङ्क्षेति क्षिती.स्सुभगो नाम पुष्यन्न्।।

卐 पुष्या.त्क्षेमे अभि योगे भवा-त्युभे~ सँयती~ सञ्जयाति। प्रिय.स्सूर्ये प्रियो अग्ना भवाति- य^ इन्द्राय सुतसोमो ददाशत्।।

5.38 उरोष्ट इति पञ्चर्चस्य सूक्तस्य, भौमोऽत्रि-रिन्द्र-स्त्रिष्टुप्।।

❀04.01.09 卐उरो ष्ट इन्द्र राधसो- विभ्वी राति.श्शतक्रतो~। अधा नो विश्वचर्षणे- द्युम्ना सुक्षत्र मंहय।।

卐 यदी.मिन्द्र श्रवाय्य-मिषं शविष्ठ दधिषे। पप्रथे दीर्घश्रुत्तमं- हिरण्यवर्ण दुष्टरम्।।

卐 शुष्मासो ये ते अद्रिवो- मेहना केतसापः। उभा देवा वभिष्टये- दिव.श्च ग्म.श्च राजथः।।

卐 उतो~ नो अस्य कस्य चि-द्दक्षस्य तव वृत्रहन्न्। अस्मभ्य.न्नृम्ण.मा भ-रास्मभ्य.न्नृमणस्यसे।।

卐 नू त आभि रभिष्टिभि-स्तव शर्म.ञ्छतक्रतो~। इन्द्र स्याम सुगोपा-श्शूर स्याम सुगोपाः।।

☸ 5.39 यदिन्द्रेति पञ्चर्चस्य सूक्तस्य, भौमोत्रि-रिन्द्रोऽनुष्टु-बन्त्या पङ्क्तिः।।

❀04.02.10 卐यदिन्द्र चित्र मेहना-ऽस्ति त्वादात.मद्रिवः। राध.स्त.न्नो विदद्वस~ उभयाह.स्त्या भर।।

卐 यन्मन्यसे वरेण्य-मिन्द्र द्युक्ष.न्तदा भर। विद्याम तस्य ते वय-मकूपारस्य दावने।।

卐 यत्ते दित्सु प्रराध्यं- मनो अस्ति श्रुतं बृहत्। तेन दृळ्हा चिदद्रिव^-आ वाज.न्दर्षि सातये।।

卐 मंहिष्ठँ वो मघोनां- राजान.ञ्चर्षणीनाम्। इन्द्र.मुप प्रशस्तये- पूर्वीभि र्जुजुषे गिरः।।

卐 अस्मा इत्काव्यँ वच^- उक्थ.मिन्द्राय शंस्यम्। तस्मा उ ब्रह्मवाहसे- गिरो वर्ध.न्त्यत्रयो गिर श्शुम्भ.न्त्यत्रयः।।

☸ 5.40 आ याहीति नवर्चस्य सूक्तस्य, भौमोऽत्रिः आद्यानां चतसृणामिन्द्रः-पञ्चम्या स्सूर्यः-षष्ठ्यादि चतसृणामत्रिर्देवता-आद्यास्तिस्र उष्णिहः- पञ्चम्यन्त्येऽनुष्टुभौ- शिष्टास्त्रिष्टुभः।।

❀04.02.11 卐आ या.ह्यद्रिभि स्सुतं- सोमं सोमपते पिब। वृष.न्निन्द्र वृषभि र्वृत्रहन्तम।।

卐 वृषा ग्रावा वृषा मदो- वृषा सोमो अयं सुतः। वृष.न्निन्द्र वृषभि र्वृत्रहन्तम।।

卐 वृषा त्वा वृषणं हुवे- वज्रि.न्चित्राभि.रूतिभिः। वृष.न्निन्द्र वृषभि र्वृत्रहन्तम।।

卐 ऋजीषी वज्री वृषभ.स्तुराषा-ड्छुष्मी राजा वृत्रहा सोमपावा। युक्त्वा हरिभ्या.मुप यास.दर्वा-ङ्माध्यन्दिने सवने मत्स.दिन्द्रः।।

卐 यत्त्वा सूर्य.स्वर्भानु-स्तमसा ऽविध्य.दासुरः। अक्षेत्रवि.द्यथा मुग्धो- भुवना.न्यदीधयुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀04.02.12 卐स्वर्भानो रध यदिन्द्र माया^- अवो दिवो वर्तमाना^ अवाहन्न्। गूळ्हं सूर्य. न्तमसाऽपव्रतेन- तुरीयेण ब्रह्मणाऽविन्द.दत्रिः।।

卐 मा मा.मिम.न्तव सन्त.मत्र -इरस्या द्रुग्धो भियसा नि गारीत्। त्वं मित्रो असि सत्यराधा-स्तौ मेहावतँ वरुण.श्च राजा।।

卐 ग्राव्णो ब्रह्मा युयुजान.स्सपर्य-न्कीरिणा देवा.न्नम.सोपशिक्षन्न्। अत्रि.स्सूर्यस्य दिवि चक्षु राऽधा-त्स्वर्भानो रप माया^ अधुक्षत्।।

卐 यँ वै सूर्यं स्वर्भानु- स्तमसाऽविध्य.दासुरः। अत्रय.स्तमन्वविन्द-न्नह्य1(अ)न्ये अशक्नुवन्न्।।

5.41 को नु वामिति विंशत्यृचस्य सूक्तस्य, भौमोऽत्रि-र्विश्वेदेवा- स्त्रिष्टुप्-षोडशी सप्तदश्यावतिजगत्यावन्त्यैकपदा- (भेदपक्षे – मित्रावरुणौ1-विश्वेदेवाः1-अश्विनौ1-विश्वेदेवाः1-मरुतः1-विश्वेदेवाः1-उषासानक्ते1-विश्वेदेवाः2-अग्निः1-विश्वेदेवाः2-मरुतः1-विश्वेदेवाः1-भूमिः1-विश्वेदेवाः3-भूमिः1-विश्वेदेवाः1-एवं 20)

❀04.02.13 卐को नु वां मित्रावरुणा वृताय-न्दिवो वा महः पार्थिवस्य वा दे। ऋतस्य वा सदसि त्रासीथा.न्नो- यज्ञायते वा पशुषो न वाजान्।।

卐 ते नो मित्रो वरुणो अर्यमाऽऽयु- रिन्द्र ऋभुक्षा मरुतो जुषन्त। नमोभि र्वा ये दधते सुवृक्तिं- स्तोमं रुद्राय मीळ्हुषे सजोषाः।।

卐 आ वाँ येष्ठाऽश्विना हुवध्यै- वातस्य पत्म.न्रथ्यस्य पुष्टौ। उत वा दिवो असुराय मन्म- प्रान्धांसीव यज्यवे भरध्वम्।।

卐 प्र सक्षणो दिव्यः कण्वहोता- त्रितो दिव.स्सजोषा वातो अग्निः। पूषा भगः प्रभृथे विश्वभोजा ^- आजि.न्न जग्मु राश्वश्वतमाः।।

卐 प्र वो रयिँ युक्ताश्वं भरध्वं- राय^ एषेऽवसे दधीत धीः। सुशेव^ एवै रौशिजस्य होता- ये व^ एवा^ मरुत.स्तुराणाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.02.14 卐प्र वो वायुं रथयुज.ङ्कृणुध्वं- प्र देवं विप्रँ पनितार.मर्कैः। इषुध्यव^ ऋतसापः पुरन्धी -र्वस्वीर्नो अत्र पत्नीरा धिये धुः~।।

卐 उप व^ एषे वन्द्येभि.श्शूषैः- प्र यह्वी~ दिव.श्चितयद्भि रर्कैः। उषासानक्ता विदुषीव~ विश्व-मा हा वहतो मर्त्याय यज्ञम्।।

卐 अभि वो अर्चे पोष्यावतो नृ-न्वास्तो.ष्पति न्त्वष्टारं रराणः। धन्या सजोषा^ धिषणा नमोभि-र्वनस्पतीं॰ रोषधी राय^ एषे।।

卐 तुजे न.स्तने पर्वता.स्सन्तु- स्वैतवो ये वसवो न वीराः। पनित^ आप्त्यो यजत.स्सदा नो- वर्धा.न्न श्शंस.न्नर्यो अभिष्टौ।।

卐 वृष्णो अस्तोषि भूम्यस्य गर्भ-न्त्रितो नपात.मपां सुवृक्ति। गृणीते अग्नि रेतरी न शूषै-श्शोचिष्केशो नि रिणाति वना।।

❀04.02.15 卐कथा महे रुद्रियाय ब्रवाम- कद्राये चिकितुषे भगाय। आप^ ओषधी रुत नोऽवन्तु-द्यौर्वना गिरयो वृक्षकेशाः।।

卐 श्रृणोतु न^ ऊर्जां पति गिर-स्स^ नभ.स्तरीयां॰ इषिरः परिज्मा। श्रृण्व.न्त्वापः पुरो न शुभ्राः- परि स्रुचो बबृहाण.स्याद्रेः।।

卐 विदा चि.न्नु महान्तो ये व^ एवा- ब्रवाम दस्मा^ वार्य.न्दधानाः। वय.श्चन सुभ्व1(अ) आऽव यन्ति-क्षुभा मर्त.मनुयतँ वधस्नैः।।

卐 आ दैव्यानि पार्थिवानि ज-न्माप.श्चाच्छा सुमखाय वोचम्। वर्धन्ता.न्द्यावो गिर.श्चन्द्राग्रा^-उदावर्धन्ता .मभिषाता^ अर्णाः।।

卐 पदेपदे मे जरिमा नि धायि- वरूत्री वा शक्रा या पायुभि.श्च। सिषक्तु माता मही रसा न-स्स्म.त्सूरिभिर् ऋजुहस्त ऋजुवनिः।।

❀04.02.16 卐कथा दाशेम नमसा सुदानू-नेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ। मा नोऽहिर्बुध्न्यो रिषे धा-दस्माकं भू.दुपमातिवनिः।।

卐 इति चि.न्नु प्रजायै पशुमत्यै- देवासो वनते मर्त्यो व^- आदेवासो वनते मर्त्यो वः। अत्रा शिवा.न्तन्वो धासि.मस्या^-जरा.ञ्चिन्मे निर्ऋति र्जग्रसीत।।

卐 ताँ वो देवा.स्सुमति.मूर्जयन्ती-मिषं.मश्याम वसव.श्शसा गोः। सा न.स्सुदानु र्मृळयन्ती देवी- प्रति द्रवन्ती सुविताय गम्याः।।

卐 अभि न^ इळा यूथस्य माता- स्म.न्नदीभि रुर्वशी वा गृणातु। उर्वशी वा बृहद्दिवा गृणाना-ऽभ्यूर्ण्वाना प्रभृथस्याऽऽयोः।।

卐 सिषक्तु न ^ ऊर्जव्यस्य पुष्टेः।।

5.42 प्र शन्तमेत्यष्टादशर्चस्य सूक्तस्य, भौमोऽत्रि-र्विश्वेदेवाः-एकादश्या रुद्र-स्त्रिष्टुप् सप्तदश्येकपदा-(भेदपक्षे – विश्वेदेवाः 2 सविता-1 इन्द्रः-1 विश्वेदेवाः-1 इन्द्रः-1 बृहस्पतिः-3 मरुतः-1 रुद्रः-1 विश्वेदेवाः-1 पर्जन्यः-2 मरुतः-1 विश्वेदेवाः-2 अश्विनौ-1 एवं 18)।।

❀04.02.17 卐प्र शन्तमा वरुण.न्दीधिती गी- र्मित्रं भग.मदिति.न्नून.मश्याः। पृषद्योनिः पञ्चहोता शृणो -त्वतूर्तपन्था^ असुरो मयोभुः।।

卐 प्रति मे स्तोम.मदिति र्जगृभ्या-त्सूनु.न्न माता हृद्यं सुशेवम्। ब्रह्म प्रिय.न्देवहितं यद-स्त्यहं मित्रे वरुणे यन्मयोभु।।

卐 उदीरय कवितम.ङ्कवीना-मुनत्तैन.मभि मध्वा घृतेन। स नो वसूनि प्रयता हितानि -चन्द्राणि देव .स्सविता सुवाति।।

卐 समिन्द्र णो मनसा नेषि गोभि- सं सूरिभि र्हरिव.स्सं स्वस्ति। सं ब्रह्मणा देवहितं यदस्ति- स.न्देवानां सुमत्या यज्ञियानाम्।।

卐 देवो भग.स्सविता रायो अंश^ इन्द्रो वृत्रस्य सञ्जितो धनानाम्। ऋभुक्षा^ वाज^ उत वा पुरन्धि-रवन्तु नो अमृतास.स्तुरासः।।

❀04.02.18 卐मरुत्वतो अप्रतीतस्य जिष्णो- रजूर्यतः प्र ब्रवामा कृतानि। न ते पूर्वे मघव.न्नापरासो-न वीर्य1(अ) न्नूतनः क.श्चनाऽऽप।।

卐 उप स्तुहि प्रथमं रत्नधेयं- बृहस्पतिं सनितार.न्धनानाम्। य.श्शंसते स्तुवते शंभविष्ठः- पुरूवसु रागम .ज्जोहुवानम्।।

卐 तवोतिभि.स्सचमाना^ अरिष्टा^- बृहस्पते मघवान.स्सुवीराः। ये अश्वदा^ उत वा सन्ति गोदा^- ये वस्त्रदा.स्सुभगा.स्तेषु रायः।।

卐 विसर्माण.ङ्कृणुहि वित्त.मेषाँ- ये भुञ्जते अपृणन्तो न^ उक्थैः। अपव्रता.न्प्रसवे वावृधाना-न्ब्रह्मद्विष .स्सूर्या.द्यावयस्व।।

卐 य^ ओहते रक्षसो देववीता-वचक्रेभि.स्तं मरुतो नि यात। यो व.श्शमीं शशमानस्य निन्दा-त्तुच्छ्या .न्कामा.न्करते सिष्विदानः।।

❀04.02.19 卐तमु ष्टुहि य.स्स्विषु.स्सुधन्वा- यो विश्वस्य क्षयति भेषजस्य। यक्ष्वा महे सौमनसाय रुद्र-न्नमोभि र्देव.मसुर.न्दुवस्य।।

卐 दमूनसो अपसो ये सुहस्ता- वृष्णः पत्नी र्नद्यो विभ्वतष्टाः। सरस्वती बृह.द्दिवोत राका- दशस्यन्ती र्वरिवस्यन्तु शुभ्राः।।

卐 प्र सू महे सुशरणाय मेधा-ङ्गिरं भरे नव्यसी.ञ्जायमानाम्। य^ आहना दुहितु र्वक्षणासु- रूपा.मिनानो अकृणो.दिद.न्नः।।

卐 प्र सुष्टुति.स्स्तनयन्तं रुवन्त-मिळ.स्पतिं.ञ्जरित नून.मश्याः। यो अब्दिमा^ उदनिमा^ इयर्ति- प्र विद्युता रोदसी उक्षमाणः।।

卐 एष.स्तोमो मारुतं शर्धो अच्छा-रुद्रस्य सूनू^ र्युवन्यू^ रुदश्याः। कामो राये हवते मा स्व-स्त्युप स्तुहि पृषदश्वा^ अयासः।।

卐 प्रैष.स्तोमः पृथिवी.मन्तरिक्षँ- वनस्पती^ रोषधी राये अश्याः। देवोदेव.स्सुहवो भूतु मह्यं- मा नो माता पृथिवी दुर्मतौ धात्।।

卐 उरौ देवा^ अनिबाधे स्याम।।

卐 समश्विनो रवसा नूतनेन- मयोभुवा सुप्रणीती गमेम। आ नो रयिं वहत.मोत वीरा-ना विश्वा.न्यमृता सौभगानि।।

5.43 आ धेनव इति सप्तदशर्चस्य सूक्तस्य, भौमोऽत्रि-र्विश्वेदेवा- स्त्रिष्टुप्-षोडश्येकपदाविराट्-(भेदपक्षे - नदी 1-द्यावापृथिवी 1-वायुः 1-सोमः 1-इन्द्रः 1-अग्निः 1-घर्मः 1-अश्विनौ 1-विश्वेदेवाः 2-सरस्वती 1-बृहस्पतिः 1-अग्निः 3-विश्वेदेवाः 1-अश्विनौ 1-एवं 17)।।

❀04.02.20 卐आ धेनवः पयसा तूर्ण्यर्था^- अमर्धन्ती रुप नो यन्तु मध्वा। महो राये बृहती.स्सप्त विप्रो- मयोभुवो जरिता जोहवीति।।

卐 आ सुष्टुती नमसा वर्तयध्यै- द्यावा वाजाय पृथिवी~ अमृध्रे~। पिता माता मधुवचा.स्सुहस्ता-भरेभरे नो यशसा ववविष्टाम्।।

卐 अध्वर्यव.श्चकृवांसो मधूनि- प्र वायवे भरत चारु शुक्रम्। होतेव नः प्रथमः पाह्यस्य- देव मध्वो ररिमा ते मदाय।।

卐 दश क्षिपो युञ्जते बाहू~ अद्रिं- सोमस्य या शमितारा सुहस्ता। मध्वो रसं सुगभस्ति र्गिरिष्ठा-ञ्चनिश्चद द्दुहे शुक्र.मंशुः।।

卐 असावि ते जुजुषाणाय सोमः- क्रत्वे दक्षाय बृहते मदाय। हरी~ रथे सुधुरा योगे अर्वा-गिन्द्र प्रिया कृणुहि हूयमानः।।

❀04.02.21 卐आ नो मही.मरमतिं सजोषा^- ग्ना.न्देवी.न्नमसा रातहव्याम्। मधो र्मदाय बृहती.मृतज्ञा- माऽग्ने वह पथिभि र्देवयानैः।।

卐 अञ्जन्ति यं प्रथयन्तो न विप्रा^- वपावन्त.न्नाग्निना तपन्तः। पितु.र्न पुत्र^ उपसि प्रेष्ठ^- आ घर्मो अग्नि .मृतय.न्नसादि।।

卐 अच्छा मही बृहती शन्तमा गी- र्दूतो न ग.न्त्वश्विना हुवध्यै। मयोभुवा सरथा ऽऽयात.मर्वा-ग्गन्त.न्निधि .न्धुरमाणि र्न नाभिम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 प्र तव्यसो नमउक्ति.न्तुर-स्याहं पूष्ण^ उत वायो रदिक्षि। या राधसा चोदितारा मतीनाँ- या वाजस्य द्रविणोदा उत त्मन्न्।।

卐 आ नामभि मरुतो वक्षि विश्वा-ना रूपेभि जातवेदो हुवानः। यज्ञ.ङ्गिरो जरितु.स्सुष्टुति.ञ्च- विश्वे गन्त मरुतो विश्व ऊती।।

❀04.01.22 卐आ नो दिवो बृहतः पर्वतादा- सरस्वती यजता गन्तु यज्ञम्। हव.न्देवी जुजुषाणा घृताची- शग्मा.न्नो वाच.मुशती शृणोतु।।

卐 आ वेधस.न्नीलपृष्ठं बृहन्तं- बृहस्पतिं सदने सादयध्वम्। साद.द्योनि.न्दम आ दीदिवांसं- हिरण्यवर्ण .मरुषं सपेम।।

卐 आ धर्णसि बृहद्दिवो रराणो- विश्वेभि र्ग.न्त्वोमभि हुवानः। ग्ना^ वसान^ ओषधी रमृध्र-स्त्रिधातुशृङ्गो वृषभो वयोधाः।।

卐 मातु ष्पदे परमे शुक्र आयो- विपन्यवो रास्पिरासो अग्मन्न्। सुशेव्य.न्नमसा रातहव्या-श्शिशुं.मृज .न्त्यायवो न वासे।।

卐 बृह.द्वयो बृहते तुभ्य.मग्ने- धियाजुरो मिथुनास.स्सचन्त। देवोदेव.स्सुहवो भूतु मह्यं- मा नो माता पृथिवी दुर्मतौ धात्।।

卐 उरौ देवा ^अनिबाधे स्याम।।

卐 समश्विनो रवसा नूतनेन- मयोभुवा सुप्रणीती गमेम। आ नो रयिँ वहत.मोत वीरा-ना विश्वा.न्यमृता सौभगानि।।

☸ 5.44 तं प्रत्नथेति पञ्चदशर्चस्य सूक्तस्य, काश्यपोऽवत्सारो- विश्वेदेवा- जगत्यन्त्ये द्वे त्रिष्टुभौ- (भेदपक्षे - इन्द्रः 2-अग्निः 1-सूर्यः 1-अग्निः 1-विश्वेदेवाः 1-सूर्यः 1-अग्निः 1-सूर्यः 2-विश्वेदेवाः 2-सुतंभरः 1-अग्निः 2-एवं 15)।।

❀04.01.23 卐तं प्रत्नथा पूर्वथा विश्वथेमथा- ज्येष्ठतातिं बर्हिषदं स्वर्विदम्। प्रतीचीनँ वृजन.न्दोहसे गिरा-ऽऽशु.ञ्जयन्त.मनु यासु वर्धसे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 श्रिये सुदृशी रुपरस्य या.स्स्व-र्विरोचमानः ककुभा.मचोदते। सुगोपा^ असि न दभाय सुक्रतो~-परो मायाभि.र् ऋत आस नाम ते।।

卐 अत्यं हवि.स्सचते सच्च धातु-चारिष्टगातु.स्स होता सहोभरिः। प्रसस्राणो अनु बर्हि र्वृषा शिशु- र्मध्ये युवाऽजरो विस्रुहा हितः।।

卐 प्र वं^ एते सुयुजो याम.न्निष्टये- नीची रमुष्मै यम्य^ ऋतावृधः। सुयन्तुभि.स्सर्वशासै रभीशुभिः-क्रिवि .र्नामानि प्रवणे मुषायति।।

卐 सञ्जर्भुराण.स्तरुभि.स्सुतेगृभँ- वयाकिन.श्चित्तगर्भासु सुस्वरुः। धारवाके.ष्वृजुगाथ शोभसे- वर्धस्व पत्नी रभि जीवो अध्वरे।।

❀04.02.24 卐याद्दृ.गेव ददृशे ताद्दृ.गुच्यते- स.ञ्छायया दधिरे सिध्रयाऽप्स्वा। मही.मस्मभ्यं.मुरुषा.मुरु ज्रयो- बृह.त्सुवीर.मनपच्युतं सहः।।

卐 वेत्यग्रु र्जनिवा.न्वा अति स्पृध-स्समर्यता मनसा सूर्यः कविः। घ्रंसं रक्षन्तं परि विश्वतो गय-मस्माकं शर्म वनव.त्स्वावसुः।।

卐 ज्यायांस.मस्य यतुनस्य केतुन -ऋषिस्वर.ञ्चरति यासु नाम ते। याद्दृश्मि.न्धायि तमपस्यया विद-द्य उ^ स्वयँ वहते सो अर.ङ्करत्।।

卐 समुद्र.मासा.मव तस्थे अग्रिमा^ न रिष्यति सवनँ यस्मि.न्नायता। अत्रा न हार्दि क्रवणस्य रेजते-यत्रा मति र्विद्यते पूतबन्धनी।।

卐 स हि क्षत्रस्य मनसस्य चित्तिभि- रेवावदस्य यजतस्य सध्रेः। अवत्सारस्य स्पृणवाम रण्वभि-श्शविष्ठँ वाजं विदुषा चिदर्ध्यम्।।

❀04.02.25 卐श्येन^ आसा.मदितिः कक्ष्यो3(ओ) मदो विश्ववारस्य यजतस्य मायिनः। समन्यमन्य .मर्थय.न्त्येतवे- विदु र्विषाणं परिपान.मन्ति ते।।

卐 सदापृणो यजतो वि द्विषो वधी-द्बाहुवृक्त.श्श्रुतवि.त्तर्यो व.स्सचा। उभा स वरा प्रत्येति भाति च-यदी.ङ्गणं भजते सुप्रयावभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सुतंभरो यजमानस्य सत्पति- र्विश्वासा.मूध.स्स धिया.मुदञ्चनः। भर.द्धेनू रसव.च्छिश्रिये पयो-
ऽनुब्रुवाणो अध्येति न स्वपन्न्।।

卐 यो जागार तमृचः कामयन्ते- यो जागार तमु सामानि यन्ति। यो जागार तमयं सोम^ आह- तवाह
.मस्मि सख्ये न्योकाः।।

卐 अग्नि र्जागार तमृचः कामयन्ते-ऽग्नि र्जागार तमु सामानि यन्ति। अग्नि र्जागार तमयं सोम^ आह-
तवाह.मस्मि सख्ये न्योकाः।।

卐 ✡ ।। अथ परिशिष्टम्।।

卐 जागर्षि त्वं भुवने जातवेदो- जागर्षि यत्र यजते हविष्मान्। इदं हवि श्श्रद्दधानो जुहोमि- तेन पासि
गुह्य .न्नाम गोनाम्।।

卐 इति परिशिष्टम्।।

5.45 विदा दिव इत्येकादशर्चस्य सूक्तस्याऽऽत्रेय स्सदापृणो- विश्वेदेवा- स्त्रिष्टुप्- (भेदपक्षे -
इन्द्रसूर्यौ1-विश्वेदेवाः2-इन्द्राग्नी1-विश्वेदेवाः6-आपः1-एवं11- अत्र सूक्ते सदापृणर्षेर्यजत इत्यादि
लिङ्गोक्त ऋषिभि स्समुच्चय इति केचित्)।।

❀04.02.26 卐विदा^ दिवो विष्यन्नद्रि.मुक्थै- रायत्या^ उषसो अर्चिनो गुः। अपावृत व्रजिनी रुत्स्वर्गा
-द्वि दुरो मानुषी र्देव^ आवः~।।

卐 वि सूर्यो अमति.न्न श्रियं सादो-र्वाद्गवां माता जानती गात्। धन्वर्णसो नद्य1(अ)ः खादोअर्णा-
स्स्थूणेव सुमिता दृंहत द्यौः।।

卐 अस्मा उक्थाय पर्वतस्य गर्भो- महीना.ञ्जनुषे पूर्व्याय। वि पर्वतो जिहीत साधत द्यौ- राविवासन्तो
दसयन्त भूम।।

卐 सूक्तेभि.र्वो वचोभि र्देवजुष्टै- रिन्द्रा.न्व1(अ)ग्नी~ अवसे हुवध्यै। उक्थेभि र्हि ष्मा कवय.स्सुयज्ञा ^-
आविवासन्तो मरुतो यजन्ति।।

卐 एतो~ न्व1(अ)द्य सुध्यो3(ओ) भवाम- प्र दुच्छुना^ मिनवामा वरीयः। आरे द्वेषांसि सनुत र्देधा-मायाम प्राञ्चो यजमान.मच्छ।।

❀04.02.27 卐एतां धिय.ङ्कृणवामा सखायो-ऽप या माता॰ ऋणुत व्रज.ङ्गोः। यया.मनु र्विशिशिप्र.ञ्जिगाय -यया वणि.ग्वङ्कु रापा पुरीषम्।।

卐 अनूनो.दत्र हस्तयतो अद्रि- रार्च.न्येन दश मासो नवग्वाः। ऋतँ यती सरमा गा^ अविन्द-द्विश्वानि सत्या.ङ्गिरा.श्चकार।।

卐 विश्वे अस्या^ व्युषि माहिनाया-स्सँ यद्गोभि रङ्गिरसो नवन्त। उत्स^ आसां परमे सधस्थ -ऋतस्य पथा सरमा विद.द्गाः।।

卐 आ सूर्यो यातु सप्ताश्वः≈- क्षेत्रँ यद.स्योर्विया दीर्घयाथे। रघु.श्श्येनः पतय.दन्धो अच्छा- युवा कवि र्दीदय.द्गोषु गच्छन्न्।।

卐 आ सूर्यो अरुह.च्छुक्र.मर्णो-ऽयुक्त य.द्धरितो वीतपृष्ठाः। उद्ना न नाव.मनयन्त धीरा^- आश्रृण्वती रापो अर्वा.गतिष्ठन्न्।।

卐 धियँ वो अप्सु दधिषे स्वर्षाँ- ययाऽतर.न्दश मासो नवग्वाः। अया धिया स्याम देवगोपा^- अया धिया तुतुर्या-मात्यंहः।।

5.46 हयो नेत्यष्टर्चस्य सूक्तस्य, आत्रेयः प्रतिक्षत्रो- विश्वेदेवा- जगती-सप्तम्यष्टम्यो र्देवपत्न्यः-द्वितीयाऽन्त्ये त्रिष्टुभौ- (भेदपक्षे – विश्वेदेवाः 6-देवपत्न्यः 2-एवं 8)।।

❀04.02.28 卐हयो न विद्वा॰ अयुजि स्वय.न्धुरि- ताँ वहामि प्रतरणी.मवस्युवम्। नास्या^वश्मि विमुच .न्नाऽऽवृतं पुन- र्विद्वा.न्पथः पुरएत ऋजु.नेषति।।

卐 अग्न इन्द्र वरुण मित्र देवा-श्शर्धः प्र यन्त मारु.तोत विष्णो~। उभा नासत्या रुद्रो अध ग्नाः- पूषा भग.स्सरस्वती जुषन्त।।

卐 इन्द्राग्नी~ मित्रावरुणाऽदितिं स्वः~- पृथिवी.न्द्यां मरुतः पर्वताँ अपः। हुवे विष्णुं पूषणं ब्रह्मण.स्पतिं- भग.न्नु शंसं सवितार.मूतये।।

卐 उत नो विष्णु रुत वातो अस्रिधो- द्रविणोदा^ उत सोमो मय.स्करत्। उत ऋभव^ उत राये नो अश्वि-नोत त्वष्टोत विभ्वाऽनु मंसते।।

卐 उत त्य.न्नो मारुतं शर्ध^ आ गम-द्दिविक्षयँ यजतं बर्हि रासदे। बृहस्पति.श्शर्म पूषोत नो यम-द्वरूथ्य1(अँ)वरुणो मित्रो अर्यमा।।

卐 उत त्ये नः पर्वतास.स्सुशस्तय-स्सुदीतयो नद्य1(अ)स्त्रामणे भुवन्न्। भगो विभक्ता शवसाऽवसाऽऽगम- दुरुव्यचा^ अदिति.श्श्रोतु मे हवम्।।

卐 देवानां पत्नी रुशती रवन्तु नः- प्रावन्तु न.स्तुजये वाजसातये। याः पार्थिवासो या^ अपा.मपि व्रते-ता नो देवी.स्सुहवा.श्शर्म यच्छत।।

卐 उत ग्ना^ व्यन्तु देवपत्नी -रिन्द्राण्य1(अ)ग्ना.य्यश्विनी राट्। आ रोदसी वरुणानी शृणोतु- व्यन्तु देवी .र्य^ ऋतु जनीनाम्।।।। इति द्वितीयाध्याय स्समाप्तः।।

## चतुर्थाष्टके तृतीयाध्यायः। वर्गाः(1-31)

5.47 प्रयुञ्जतीति सप्तर्चस्य सूक्तस्य, आत्रेयः प्रतिरथो- विश्वेदेवा-स्त्रिष्टुप्- (भेदपक्षे - उषाः1-सूर्यरश्मयः1-सूर्यः3-विश्वेदेवाः1-मित्रावरुणाऽग्नयः1-एवं 7)।।

❀04.03.01 卐प्रयुञ्जती दिव^ एति ब्रुवाणा- मही माता दुहितु र्बोधयन्ती। आविवासन्ती युवति र्मनीषा- पितृभ्य^ आ सदने जोहुवाना।।

卐 अजिरास.स्तदप^ ईयमाना^- आतस्थिवांसो अमृतस्य नाभिम्। अनन्तास^ उरवो विश्वत.स्सीं- परि द्यावापृथिवी~ यन्ति पन्थाः।।

卐 उक्षा समुद्रो अरुष.स्सुपर्णः- पूर्वस्य योनिं पितुरा विवेश। मध्ये दिवो निहितः पृश्नि रश्मा- वि चक्रमे रजस.स्पात्यन्तौ।।

卐 चत्वार^ ईं बिभ्रति क्षेमयन्तो- दश गर्भ.ञ्चरसे धापयन्ते। त्रिधातवः परमा^ अस्य गावो-दिव.श्चरन्ति परि सद्यो अन्तान्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 इदं वपु र्निवचनं.ञ्जनास-श्चरन्ति य.न्नद्य.स्तस्थु रापः। द्वे~ यदीं बिभृतो मातु रन्ये- इहेह जाते~ यम्या3(आ) सबन्धू~।।

卐 वि तन्वते धियो अस्मा अपांसि- वस्त्रा पुत्राय मातरो वयन्ति। उपप्रक्षे वृषणो मोदमाना^- दिव.स्पथा वध्वो यन्त्यच्छ।।

卐 तदस्तु मित्रावरुणा तदग्ने- शं यो रस्मभ्य.मिद.मस्तु शस्तम्। अशीमहि गाध.मुत प्रतिष्ठा-न्नमो दिवे बृहते सादनाय।।

5.48 कदु प्रियायेति पञ्चर्चस्य सूक्तस्य, आत्रेयः प्रतिभानु-र्विश्वेदेवा- जगती (भेदपक्षे- विद्युतोऽग्निः1-उषाः1-इन्द्रसूर्यौ1-अग्निः2-एवं 5)।।

❀04.03.02 卐कदु~ प्रियाय धाम्ने मनामहे- स्वक्षत्राय स्वयशसे महे वयम्। आमेन्यस्य रजसो यदभ्र आ९- अपो वृणाना वितनोति मायिनी।।

卐 ता^ अत्नत वयुनं वीरवक्षणं- समान्या वृतया विश्वमा रजः। अपो अपाची रपरा^ अपेजते- प्र पूर्वाभि स्तिरते देवयु र्जनः।।

卐 आ ग्रावभि रहन्येभि रक्तुभि- वरिष्ठं वज्र.मा जिघर्ति मायिनि। शतं वा यस्य प्रचर.न्त्स्वे दमे- संवर्तयन्तो वि च वर्तय.न्नहा।।

卐 तामस्य रीतिं परशोरिव प्र-त्यनीक.मख्यं भुजे अस्य वर्पसः। सचा यदि पितुमन्तमिव क्षयं- रत्न .न्दधाति भरहूतये विशे।।

卐 स जिह्वया चतुरनीक^ ऋञ्जते- चारु वसानो वरुणो यत.न्नरिम्। न तस्य विद्म पुरुषत्वता वयं- यतो भग.स्सविता दाति वार्यम्।।

5.49 देवं व इति पञ्चर्चस्य सूक्तस्य, आत्रेयः प्रतिप्रभु-र्विश्वेदेवा- स्त्रिष्टुप्-अंत्यातृणपाणिः (भेदपक्षे – विश्वेदेवाः 1 सूर्यः 1 विश्वेदेवाः 3 एवं 5)।।

❀04.03.03 卐देवं वो अद्य सवितार.मेषे- भग.ञ्च रत्नं विभजन्त.मायोः। आ वा.न्नरा पुरुभुजा ववृत्या-न्दिवेदिवे चिदश्विना सखीयन्न्।।

卐 प्रति प्रयाण.मसुरस्य विद्वा-न्त्सूक्तै र्देवं सवितार.न्दुवस्य। उप ब्रुवीत नमसा विजान-ञ्ज्येष्ठ.ञ्च रत्नं विभजन्त.मायोः।।

卐 अदत्रया दयते वार्याणि- पूषा भगो अदिति र्वस्त उस्रः। इन्द्रो विष्णु र्वरुणो मित्रो अग्नि- रहानि भद्रा जनयन्त दस्माः।।

卐 त.न्नो अनर्वा सविता वरूथ-न्तत्सिन्धव^ इषयन्तो अनु ग्मन्न्। उप यद्वोचे अध्वरस्य होता- राय .स्स्याम पतयो वाजरत्नाः।।

卐 प्र ये वसुभ्य^ ईव.दा नमो दु- र्ये मित्रे वरुणे सूक्तवाचः। अवैत्वभ्व.ङ्कृणुता वरीयो- दिवस्पृथिव्यो रवसा मदेम।।

卐 ✡ ।। अथ परिशिष्टम्।।

卐 सूक्तान्ते तृणान्यग्ना- वरण्ये वोदकेऽपि वा। यत्स्तृणै रध्ययनं- तदधीतिं.स्तृणानि भवते भव।। वापीकूपतडागानां- समुद्रङ्गच्छ स्वाहा।।

卐 इति परिशिष्टम्।।

5.50 विश्वो देवस्येति पञ्चर्चस्य सूक्तस्य, आत्रेयो-विश्वेदेवा- अनुष्टुप्-अंत्यापङ्क्तिः-(भेदपक्षे - सविता 2 विश्वेदेवाः 1 सविता 2 एवं 5)।।

❀04.03.04 卐विश्वो देवस्य नेतु- र्मर्तो वुरीत सख्यम्। विश्वो राय^ इषुध्यति- द्युम्नं वृणीत पुष्यसे।।

卐 ते ते देव नेत -र्ये चेमा॰ अनुशसे। ते राया ते ह्या3(आ)पृचे- सचेमहि सचथ्यैः।।

卐 अतो न^ आ नृ.नतिथी-नतः पत्नी र्दशस्यत। आरे विश्वं पथेष्ठा-न्द्विषो युयोतु यूयुविः।।

卐 यत्र वह्नि रभिहितो- दुद्रव.द्द्रोण्यः पशुः। नृमणा^ वीरपस्त्यो-ऽर्णा धीरेव सनिता।।

卐 एष ते देव नेता~- रथस्पति.श्शं रयिः। शं राये शं स्वस्तय- इषस्स्तुतो मनामहे- देवस्तुतो मनामहे।।

5.51 अग्ने सुतस्येति पञ्चदशर्चस्य सूक्तस्य, स्वस्त्यात्रेयो-विश्वेदेवा- श्चतुर्थी-षष्ठी सप्तमीनामिन्द्रवायू-पञ्चम्या वायुः- आद्याश्चतस्रो गायत्र्यः-पञ्चम्यादि षळुष्णिहः-एकादश्यादि तिस्रो



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

जगत्यः (त्रिष्टुभो वा) अंन्त्येद्वे अनुष्टुभौ- (भेदपक्षे - अग्निः 2-विश्वेदेवाः 1-इन्द्रवायू 1-वायुः 1-इन्द्रवायू 2-अग्निः 3-विश्वेदेवाः 5-एवं 15)।।

❀04.03.05 卐अग्ने सुतस्य पीतये- विश्वै रूमेभि रा गहि। देवेभि र्हव्यदातये।।

卐 ऋतधीतय^ आ गत- सत्यधर्माणो अध्वरम्। अग्नेः पिबत जिह्वया।।

卐 विप्रेभि र्विप्र सन्त्य- प्रातर्यावभि रा गहि। देवेभि.स्सोमपीतये।।

卐 अयं सोम श्चमू~ सुतो-ऽमत्रे परि षिच्यते। प्रिय^ इन्द्राय वायवे।।

卐 वाय ~वायाहि वीतये- जुषाणो हव्यदातये। पिबा सुत.स्यान्धसो अभि प्रयः।।

❀04.03.06 卐इन्द्र.श्च वाय~ वेषां- सुतानां पीति.मर्हथः। ता.ञ्जुषेथा.मरेपसा वभि प्रयः।।

卐 सुता^ इन्द्राय वायवे- सोमासो दध्याशिरः। निम्न.न्न यन्ति सिन्धवोऽभि प्रयः।।

卐 सजू र्विश्वेभि र्देवेभि- रश्विभ्या.मुषसा सजूः। आ याह्यग्ने अत्रिव.त्सुते रण।।

卐 सजू र्मित्रावरुणाभ्यां- सजू.स्सोमेन विष्णुना। आ याह्यग्ने अत्रिव.त्सुते रण।।

卐 सजू रादित्यै र्वसुभि-स्सजू रिन्द्रेण वायुना। आ याह्यग्ने अत्रिव.त्सुते रण।।

❀04.03.07 स्वस्ति नो मिमीता.मश्विना भग-स्स्वस्ति देव्यदिति रनर्वणः। स्वस्ति पूषा असुरो दधातु न-स्स्वस्ति द्यावापृथिवी~ सुचेतुना।।

卐 स्वस्तये वायु.मुप ब्रवामहै- सोमं स्वस्ति भुवनस्य य.स्पतिः। बृहस्पतिं सर्वगणं स्वस्तये- स्वस्तय आदित्यासो भवन्तु नः।।

卐 विश्वे देवा^ नो अद्या स्वस्तये- वैश्वानरो वसु रग्नि.स्स्वस्तये। देवा^ अव.न्त्वृभव.स्स्वस्तये- स्वस्ति नो रुद्रः पात्वंहसः।।

卐 स्वस्ति मित्रावरुणा- स्वस्ति पथ्ये रेवति। स्वस्ति न^ इन्द्र.श्चाग्नि.श्च- स्वस्ति नो अदिते कृधि।।

卐 स्वस्ति पन्था.मनु चरेम- सूर्याचन्द्रमसाविव। पुन र्ददताऽघ्नता- जानता सङ्गमेमहि।।

卐 ✡।। अथ परिशिष्टम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 स्वस्त्ययन.न्तार्क्ष्य.मरिष्टनेमिं- मह.द्भूतं वायस.न्देवतानाम्। असुरघ्न.मिन्द्रसखं समत्सु- बृहद्यशो नावमिवाऽऽरुहेम।।

卐 अंहोमुचमाङ्गिरसङ्गयञ्च- स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्। प्रयतपाणि श्शरणं प्रपद्ये- स्वस्ति संबाधे.ष्वभयन्नो अस्तु।

卐 इति परिशिष्टम्।।

5.52 प्र श्यावाश्वेति सप्तदशर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुतोऽनुष्टुप्-षष्ठी-षोडशी-सप्तदश्यः पङ्क्तयः।।

❀04.03.08 卐प्र श्यावाश्व धृष्णुया-ऽर्चा मरुद्भिर् ऋक्वभिः। ये अद्रोघ.मनुष्वधं- श्रवो मदन्ति यज्ञियाः।।

卐 ते हि स्थिरस्य शवस-स्सखाय.स्सन्ति धृष्णुया। ते याम.न्ना धृषद्विन-स्त्मना पान्ति शश्वतः।।

卐 ते स्पन्द्रासो नोक्षणो-ऽति ष्कन्दन्ति शर्वरीः। मरुता.मधा महो- दिवि क्षमा च मन्महे।।

卐 मरुत्सु वो दधीमहि- स्तोमँ यज्ञ.ञ्च धृष्णुया। विश्वे ये मानुषा युगा- पान्ति मर्त्यं रिषः।।

卐 अर्हन्तो ये सुदानवो- नरो असामिशवसः। प्र यज्ञँ यज्ञियेभ्यो- दिवो अर्चा मरुद्भ्यः।।

❀04.03.09 卐आ रुक्मै रा युधा नर^- ऋष्वा^ ऋष्टी रसृक्षत। अन्वेनाँ अह विद्युतो- मरुतो जज्झतीरिव- भानु रर्त त्मना दिवः।।

卐 ये वावृधन्त पार्थिवा^- य उरा वन्तरिक्ष आ। वृजने वा नदीनां -सधस्थे वा महो दिवः।।

卐 शर्धो मारुत.मुच्छंस- सत्यशवस.मृभ्वसम्। उत स्म ते शुभे नरः- प्र स्पन्द्रा^ युजत त्मना।।

卐 उत स्म ते परुष्ण्या-मूर्णा वसत शुन्ध्यवः। उत पव्या रथाना-मद्रिं भिन्द.न्त्योजसा।।

卐 आपथयो विपथयो-ऽन्तस्पथा^ अनुपथाः। एतेभि र्मह्य.न्नामभि -र्यज्ञँ विष्टार^ ओहते।।

❀04.03.10 卐अधा नरो न्योहते-ऽधा नियुत^ ओहते। अधा पारावता^ इति -चित्रा रूपाणि दर्श्या।।

卐 छन्दस्स्तुभः कुभन्यव^- उत्स.मा कीरिणो नृतुः। ते मे के चिन्न तायव^- ऊमा^ आस.न्दृशि त्विषे।।

卐 य ऋष्वा ऋष्टिविद्युतः- कवय.स्सन्ति वेधसः। तमृषे मारुत.ङ्गण-न्नमस्या रमया गिरा।।

卐 अच्छ ऋषे मारुतङ्गण-न्दाना मित्र.न्न योषणा। दिवो वा धृष्णव ओजसा- स्तुता धीभि रिषण्यत।।

卐 नू मन्वान एषा.न्देवा अच्छा न वक्षणा। दाना सचेत सूरिभि- र्यामश्रुतेभि रञ्जिभिः।।

卐 प्र ये मे बन्ध्वेषे- गाँ वोचन्त सूरयः- पृश्निँ वोचन्त मातरम्। अधा पितर.मिष्मिणं -रुद्रँ वोचन्त शिक्कसः।।

卐 सप्त मे सप्त शाकिन-एक.मेका शता ददुः। यमुनाया.मधि श्रुत-मुद्राधो गव्यं मृजे- नि राधो अश्व्यं मृजे।।

5.53 को वेदेति षोळशर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुतः-क्रमेण ककुब्-बृह-त्यनुष्टुप्-पुरउष्णिक्- ककुप्- सतोबृहती- सतोबृहती- गायत्री- सतो बृहती-ककुप्- ककुब्- गायत्री- सतोबृहती-सतोबृहती- ककुप्- सतोबृहत्यः।।

❀04.03.11 卐को वेद जान.मेषा-ङ्को वा पुरा सुम्ने.ष्वास मरुताम्। यद्युयुज्रे किलास्यः।।

卐 ऐता.न्रथेषु तस्थुषः- क.श्शुश्राव कथा ययुः। कस्मै सस्रु स्सुदासे अन्वापय- इळाभि र्वृष्टय.स्सह।।

卐 ते मे आहु य आययु -रुप द्युभि र्विभि र्मदे। नरो मर्या अरेपस- इमा.न्पश्य.न्निति ष्टुहि।।

卐 ये अञ्जिषु ये वाशीषु स्वभानव-स्स्रक्षु रुक्मेषु खादिषु। श्राया रथेषु धन्वसु।।

卐 युष्माकं स्मा रथा अनु- मुदे दधे मरुतो जीरदानवः। वृष्टी द्यावो यतीरिव।।

❀04.03.12 卐आ य.न्नर.स्सुदानवो ददाशुषे- दिवः कोश.मचुच्यवुः। वि पर्जन्यं सृजन्ति रोदसी अनु- धन्वना यन्ति वृष्टयः।।

卐 ततृदाना.स्सिन्धवः ≈ क्षोदसा रजः- प्र सस्रु र्धेनवो यथा। स्यन्ना अश्वाइवाध्वनो विमोचने- वि यद्वर्तन्त एन्यः।।

卐 आ यात मरुतो दिव- आऽन्तरिक्षा.दमा.दुत। माऽव स्थात परावतः।।

卐 मा वो रसानितभा कुभा क्रुमु- र्मा व.स्सिन्धु र्नि रीरमत्। मा वः परि ष्ठात्सरयुः पुरीषि-ण्यस्मे इत्सु.म्न.मस्तु वः।।

卐 तँ व.श्शर्धं रथाना-न्त्वेष.ङ्गणं मारुत.न्नव्यसीनाम्। अनु प्र यन्ति वृष्टयः।।

❀04.03.13 卐शर्धंशर्धँ व^ एषाँ- व्रातँव्रात.ङ्गणङ्गणं सुशस्तिभिः। अनु क्रामेम धीतिभिः।।

卐 कस्मा अद्य सुजाताय रातहव्याय प्र ययुः। एना यामेन मरुतः।।

卐 येन तोकाय तनयाय धान्य-1(अं) बीजँ वहध्वे अक्षितम्। अस्मभ्य.न्तद्धत्तन यद्व^ ईमहे- राधो विश्वाऽयु सौभगम्।।

卐 अतीयाम निद.स्तिर-स्स्वस्तिभि र्हित्वाऽवद्य.मरातीः। वृष्ट्वी शँ यो राप^ उस्रि भेषजं- स्याम मरुत.स्सह।।

卐 सुदेव.स्समहासति -सुवीरो नरो मरुत.स्स मर्त्यः। य.न्त्रायध्वे स्याम ते।।

卐 स्तुहि भोजा.न्त्स्तुवतो अस्य यामनि- रण.न्गावो न यवसे। यतः पूर्वाꣳइव सखीꣳ रनु ह्वय- गिरा गृणीहि कामिनः।।

5.54 प्र शर्धायेति पञ्चदशर्चस्य सूक्तस्य, आत्रेय श्शयावाश्वो- मरुतो- जगती- चतुर्दशी त्रिष्टुप्।।

❀04.03.14 卐प्र शर्धाय मारुताय स्वभानव -इमाँ वाच.मनजा पर्वतच्युते। घर्मस्तुभे दिव^ आ पृष्ठयज्वने- द्युम्नश्रवसे महि नृम्ण.मर्चत।।

卐 प्र वो मरुत.स्तविषा^ उदन्यवो- वयोवृधो अश्वयुजः परिज्रयः। सँ विद्युता दधति वाशति त्रित-स्स्वर .न्त्यापोऽवना परिज्रयः।।

卐 विद्युन्महसो नरो अश्मदिद्यवो- वातत्विषो मरुतः पर्वतच्युतः। अब्दया चिन्मुहुरा ह्रादुनीवृत-स्स्तनयदमा रभसा^ उदोजसः।।

卐 व्य1(अ)क्तू.न्रुद्रा^ व्यहानि शिक्वसो- व्य1(अ)न्तरिक्षँ वि रजाँसि धूतयः। वि यदज्राꣳ अजथ नाव^ ई यथा- वि दुर्गाणि मरुतो नाह रिष्यथ।।

卐 तद्वीर्यँ वो मरुतो महित्वन-न्दीर्घ.न्ततान सूर्यो न योजनम्। एता^ न यामे अगृभीतशोचिषो-ऽनश्वदाँ यन्न्ययातना गिरिम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.03.15 卐अभ्राजि शर्धो मरुतो यदर्णसं- मोषथा वृक्ष.ङ्कपनेव वेधसः। अध स्मा नो अरमतिं सजोषस-श्चक्षुरिव यन्त.मनु नेषथा सुगम्।।

卐 न स जीयते मरुतो न हन्यते- न स्रेधति न व्यथते न रिष्यति। नास्य राय उप दस्यन्ति नोतय- ऋषिँ वा यं राजानँ वा सुषूदथ।।

卐 नियुत्वन्तो ग्रामजितो यथा नरो-ऽर्यमणो न मरुतः कवन्धिनः। पिन्व.न्त्युत्सँ यदिनासो अस्वर- न्व्युन्दन्ति पृथिवीं मध्वो अन्धसा।।

卐 प्रवत्व.तीयं पृथिवी मरुद्भ्यः- प्रवत्वती द्यौ र्भवति प्रयद्भ्यः। प्रवत्वतीः पथ्या अन्तरिक्ष्याः- प्रवत्वन्तः पर्वता जीरदानवः।।

卐 यन्मरुत.स्सभरस.स्स्वर्णर-स्सूर्य उदिते मदथा दिवो नरः। न वोऽश्वा.श्श्रथयन्ताह सिस्रत-स्सद्यो अस्याध्वनः पार.मश्नुथ।।

❀04.03.16 卐अंसेषु व ऋष्टयः पत्सु खादयो- वक्षस्सु रुक्मा मरुतो रथे शुभः। अग्निभ्राजसो विद्युतो गभस्त्यो-श्शिप्रा.श्शीर्षसु वितता हिरण्ययीः।।

卐 तन्नाक.मर्यो अगृभीतशोचिषं- रुश.त्पिप्पलं मरुतो वि धूनुथ। समच्यन्त वृजनाऽतित्विषन्त- यत्स्वरन्ति घोषँ वितत.मृतायवः।।

卐 युष्मादत्तस्य मरुतो विचेतसो- राय.स्स्याम रथ्यो3(ओ) वयस्वतः। न यो युच्छति तिष्यो3(ओ) यथा दिवो3-(ओ)ऽस्मे रारन्त मरुत.स्सहस्रिणम्।।

卐 यूयं रयिं मरुत.स्पार्हवीरँ- यूय.मृषि.मवथ सामविप्रम्। यूय.मर्वन्तं भरताय वाजँ- यूय.न्धत्थ राजानं श्रुष्टिमन्तम्।।

卐 तद्वो यामि द्रविणं सद्यऊतयो- येना स्व1(अ)र्ण ततनाम नॄ रभि। इदं सु मे मरुतो हर्यता वचो- यस्य तरेम तरसा शतं हिमाः।।

5.55 प्रयज्यव इति दशर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुतो- जग-त्यन्त्या त्रिष्टुप्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

❀04.03.17 ☞प्रयज्यवो मरुतो भ्राजदृष्टयो- बृहद्वयो दधिरे रुक्मवक्षसः। ईयन्ते अश्वै स्सुयमेभि राशुभि- श्शुभँ याता.मनु रथा^ अवृत्सत।।

卐 स्वय.न्दधिध्वे तविषीँ यथा विद- बृहन्महान्त^ उर्विया वि राजथ। उतान्तरिक्षं ममिरे व्योजसा- शुभँ याता.मनु रथा^ अवृत्सत।।

卐 साक.ञ्जाता.स्सुभ्व.स्साक.मुक्षिता-श्श्रिये चिदा प्रतरँ वावृधु नरः। विरोकिण.स्सूर्यस्येव रश्मय- श्शुभँ याता.मनु रथा^ अवृत्सत।।

卐 आभूषेण्यँ वो मरुतो महित्वन-न्दिदृक्षेण्यं सूर्यस्येव चक्षणम्। उतो~ अस्मा॰ अमृतत्वे दधातन- शुभँ याता.मनु रथा^ अवृत्सत ।।

卐 उदीरयथा.मरुत.स्समुद्रतो- यूयँ वृष्टिँ वर्षयथा पुरीषिणः। न वो दस्रा^ उप दस्यन्ति धेनव-श्शुभँ याता.मनु रथा^ अवृत्सत।।

❀04.03.18 ☞यदश्वा.न्धूर्षु पृषती रयुग्ध्वं- हिरण्यया.न्प्रत्यत्का॰ अमुग्ध्वम्। विश्वा^ इत्स्पृधो मरुतो व्यस्यथ- शुभँ याता.मनु रथा^ अवृत्सत।।

卐 न पर्वता^ न नद्यो वरन्त वो- यत्राचिध्वं मरुतो गच्छ.थेदु तत्। उत द्यावापृथिवी~ याथना परि- शुभँ याता.मनु रथा^ अवृत्सत।।

卐 यत्पूर्व्यं मरुतो यच्च नूतनँ- यदुद्यते वसवो यच्च शस्यते। विश्वस्य तस्य भवथा नवेदस-श्शुभँ याता.मनु रथा^ अवृत्सत।।

卐 मृळत नो मरुतो मा वधिष्ट-नास्मभ्यं शर्म बहुलँ वि यन्तन। अधि स्तोत्रस्य सख्यस्य गातन- शुभँ याता.मनु रथा^ अवृत्सत।।

卐 यूय.मस्मा.न्नयत वस्यो अच्छा- निरंहतिभ्यो मरुतो गृणानाः। जुषध्व.न्नो हव्यदातिँ यजत्रा^- वयं स्याम पतयो रयीणाम्।।

5.56 अग्ने शर्धन्तमिति नवर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुतो- बृहती- तृतीया सप्तम्यौ सतोबृहत्यौ।।

❀04.03.19 卐अग्ने शर्धन्तमा गणं- पिष्टं रुक्मेभि रञ्जिभिः। विशो अद्य मरुता.मव ह्वये- दिव.श्चि.द्रोचना.दधि।।

卐 यथा चिन्मन्यसे हृदा- तदिन्मे जग्मु राशसः। ये ते नेदिष्ठं हवना.न्यागम-न्तान्वर्ध भीमसन्दृशः।।

卐 मीळ्हुष्मतीव पृथिवी पराहता- मद.न्त्ये.त्यस्मदा। ऋक्षो न वो मरुत.श्शिमीवा॰- अमो दुध्रो गौरिव भीमयुः।।

卐 नि ये रिण.न्त्योजसा- वृथा गावो न दुर्धुरः। अश्मान.ञ्चित्स्वर्य1(अं) पर्वत.ङ्गिरि- प्र च्यावयन्ति यामभिः।।

卐 उत्तिष्ठ नून.मेषां स्तोमै-स्स.मुक्षितानाम्। मरुतां पुरुतम.मपूर्व्य-ङ्गवां सर्ग.मिव ह्वये।।

❀04.03.20 卐युङ्ग्ध्वं ह्यरुषी रथे- युङ्ग्ध्वं रथेषु रोहितः। युङ्ग्ध्वं हरी~ अजिरा धुरि वोळ्हवे- वहिष्ठा धुरि वोळ्हवे।।

卐 उत स्य^ वा.ज्यरुष.स्तुविष्वणि- रिह स्म धायि दर्शतः। मा वो यामेषु मरुत श्चिर.ङ्कर-त्प्र तं रथेषु चोदत।।

卐 रथ.न्नु मारुतँ वयं- श्रवस्यु.मा हुवामहे। आ यस्मि.न्तस्थौ सुरणानि बिभ्रती- सचा मरुत्सु रोदसी।।

卐 तँ व.श्शर्धं रथेशुभ-न्त्वेषं पनस्यु.मा हुवे। यस्मि.न्त्सुजाता सुभगा महीयते- सचा मरुत्सु मीळ्हुषी।।

5.57 आ रुद्रास इत्यष्टर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुतो- जग-त्यन्त्ये द्वे त्रिष्टुभौ।।

❀04.03.21 卐आ रुद्रास^ इन्द्रवन्त.स्सजोषसो- हिरण्यरथा.स्सुविताय गन्तन। इयँ वो अस्म.त्प्रति हर्यते मति-स्तृष्णजे न दिव^ उत्सा^ उदन्यवे।।

卐 वाशीमन्त^ ऋष्टिमन्तो मनीषिण-स्सुधन्वान^ इषुमन्तो निषङ्गिणः। स्वश्वा.स्स्थ सुरथा॰ पृश्निमातर-स्स्वायुधा^ मरुतो याथना शुभम्।।

卐 धूनुथ द्यां पर्वता.न्दाशुषे वसु- नि वो वना जिहते यामनो भिया। कोपयथ पृथिवीं पृश्निमातर-श्शुभे यदुग्रा॰ पृषती रयुग्ध्वम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysuru

卐 वातत्विषो मरुतो वर्षनिर्णिजो- यमाइव सुसदृश.स्सुपेशसः। पिशङ्गाश्वा^ अरुणाश्वा^ अरेपस॰-प्रत्वक्षसो महिना द्यौरिवोरवः।।

卐 पुरुद्रप्सा^ अञ्जिमन्त.स्सुदानव-स्त्वेषसन्दृशो अनवभ्रराधसः। सुजातासो जनुषा रुक्मवक्षसो- दिवो अर्का^ अमृत.न्नाम भेजिरे।।

❀04.03.22 ऋष्टयो वो मरुतो अंसयो रधि- सह ओजो बाह्वो.र्वो बलं हितम्। नृम्णा शीर्ष.स्वायुधा रथेषु वो- विश्वा^ व.श्श्रीरधि तनूषु पिपिशे।।

卐 गोम.दश्वाव.द्रथव.त्सुवीर-ञ्चन्द्रव.द्राधो मरुतो ददा नः। प्रशस्ति.न्न॰ कुणुत रुद्रियासो- भक्षीय वोऽवसो दैव्यस्य।।

卐 हये नरो मरुतो मृळता न-स्तुवीमघासो अमृता^ ऋतज्ञाः। सत्यश्रुत॰ कवयो युवानो- बृह.द्गिरयो बृह.दुक्षमाणाः।।

5.58 तमु नूनमित्यष्टर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुत-स्त्रिष्टुप्।।

❀04.03.23 卐तमु नून.न्तविषीमन्त.मेषां- स्तुषे गणं मारुत.न्नव्यसीनाम्। य आश्वश्वा^ अमव.द्वहन्त 卐

-उतेशिरे अमृतस्य स्वराजः।।

卐 त्वेष.ङ्गण.न्तवस.ङ्खादिहस्त-न्धुनिव्रतं मायिन.न्दातिवारम्। मयोभुवो ये अमिता महित्वा- वन्दस्व विप्र तुविराधसो नृन्।।

卐 आ वो यन्तूदवाहासो अद्य- वृष्टिं ये विश्वे मरुतो जुनन्ति। अयँ यो अग्निर्मरुत.स्समिद्ध^-एत.ञ्जुषध्व.ङ्कवयो युवानः।।

卐 यूयं राजान.मिर्य.ञ्जनाय- विभ्वतष्ट.ञ्जनयथा यजत्राः। युष्म.देति मुष्टिहा बाहुजूतो- युष्म.त्सदश्वो मरुत .स्सुवीरः।।

卐 अराइवे दचरमा^ अहेव- प्रप्र जायन्ते अकवा^ महोभिः। पृश्नेः॰ पुत्रा^ उपमासो रभिष्ठा-स्स्वया मत्या^ मरुत.स्सं मिमिक्षुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यत्प्रायासिष्ट पृषतीभि रश्वै- र्वीळुपविभि र्मरुतो रथेभिः। क्षोदन्त^ आपो रिणते वना-न्यवोस्त्रियो वृषभः क्रन्दतु द्यौः।।

卐 प्रथिष्ट याम.न्पृथिवी चिंदेषां- भर्तेव गर्भं स्व.मिच्छवो धुः। वाता.न्ह्यश्वा.न्धुर्यायुयुज्रे- वर्षं स्वेद.ञ्चक्रिरे रुद्रियासः।।

卐 हये नरो मरुतो मृळता न-स्तुवीमघासो अमृता^ ऋतज्ञाः। सत्यश्रुतः कवयो युवानो- बृहद्गिरयो बृह.दुक्षमाणाः।।

5.59 प्र व स्स्पळित्यष्टर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुतो- जग-त्यन्त्या त्रिष्टुप्।।

❀04.03.24 卐प्र व.स्स्पळक्र.न्त्सुविताय दावने-ऽर्चा दिवे प्र पृथिव्या ^ऋतं भरे। उक्षन्ते अश्वा .न्तरुषन्त आ रजो-ऽनु स्वं भानुं श्रथयन्ते अर्णवैः।।

卐 अमा.देषां भियसा भूमि रेजति- नौर्न पूर्णा क्षरति व्यथि र्यती। दूरेदृशो ये चितयन्त एमभि- रन्त र्महे विदथे येतिरे नरः।।

卐 गवा.मिव श्रियसे श्रृङ्ग.मुत्तमं- सूर्यो न चक्षू रजसो विसर्जने। अत्या^इव सुभ्व1(अ)श्चारव.स्स्थन- मर्याइव श्रियसे चेतथा नरः।।

卐 को वो महान्ति महता.मुदश्नव-त्क.स्काव्या मरुतः को ह पौंस्या। यूयं ह भूमि.ङ्किरण.न्न रेजथ- प्र यद्भरध्वे सुविताय दावने।।

卐 अश्वाइवे दरुषास.स्सबन्धव-श्शूरा^इव प्रयुधः प्रोत युयुधुः। मर्याइव सुवृधो वावृधु र्नर-स्सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः।।

卐 ते अज्येष्ठा ^अकनिष्ठास उद्भिदो-ऽमध्यमासो महसा वि वावृधुः। सुजातासो जनुषा पृश्निमातरो- दिवो मर्या^ आ नो अच्छा जिगातन।।

卐 वयो न ये श्रेणीः पप्तु रोजसा-ऽन्ता.न्दिवो बृहत.स्सानुन.स्परि। अश्वास^ एषा.मुभये यथा विदुः- प्र पर्वतस्य नभनूं रचुच्यवुः।।

卐 मिमातु द्यौ रदिति वीतये न-स्स.न्दानुचित्रा^ उषसो यतन्ताम्। आऽचुच्यवु दिव्य.ङ्कोश.मेत ऋषे-रुद्रस्य मरुतो गृणानाः।।

5.60 ईळे अग्निमित्यष्टर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्वो- मरुत-स्त्रिष्टु-बन्त्ये द्वे जगत्यौ- (आग्नेयं च वेत्यनुक्रमण्युक्तेरग्नामरुतो वा)

❀04.03.25 卐ईळे अग्निं स्ववस.न्नमोभि- रिह प्रसत्तो वि चय.त्कृत.न्नः। रथैरिव प्र भरे वाजयद्भि- प्रदक्षिणि.न्मरुतां स्तोम.मृध्याम्।।

卐 आ ये तस्थुः पृषतीषु श्रुतासु- सुखेषु रुद्रा^ मरुतो रथेषु। वना चिदुग्रा^ जिहते नि वो भिया- पृथिवी चि.द्रेजते पर्वत.श्चित्।।

卐 पर्वत.श्चि.न्महि वृद्धो बिभाय- दिव.श्चि.त्सानु रेजत स्वने वः। यत्क्रीळथ मरुत^ ऋष्टिमन्त^- आपइव सध्र्यञ्चो धवध्वे।।

卐 वराइवे द्रैवतासो हिरण्यै- रभि स्वधाभि स्तन्वः पिपिश्रे। श्रिये श्रेयांस.स्तवसो रथेषु- सत्रा महांसि चक्रिरे तनूषु।।

卐 अज्येष्ठासो अकनिष्ठास^ एते- सं भ्रातरो वावृधु स्सौभगाय। युवा पिता स्वपा रुद्र^ एषां- सुदुघा पृश्नि स्सुदिना मरुद्भ्यः।।

卐 यदु.त्तमे मरुतो मध्यमे वा- यद्वाऽवमे सुभगासो दिवि ष्ठ। अतो नो रुद्रा^ उत वा न्व1(अ)-स्याग्ने वित्ता.द्धविषो यद्यजाम।।

卐 अग्नि.श्च यन्मरुतो विश्ववेदसो- दिवो वहध्व उत्तरा.दधि ष्णुभिः। ते मन्दसाना धुनयो रिशादसो- वाम. न्धत्त यजमानाय सुन्वते।।

卐 अग्ने मरुद्भि.श्शुभयद्भिर् ऋक्वभि-स्सोमं पिब मन्दसानो गणश्रिभिः। पावकेभि विश्वमिन्वेभि रायुभि-वैश्वानर प्रदिवा केतुना सजूः।।

5.61 के ष्ठा नर इत्येकोनविंशत्यृचस्य सूक्तस्य, श्यावाश्वः-आद्यानां चतसृणां य ईं वहन्त इत्यादि षण्णाञ्च मरुतः- पञ्चम्यादि चतसृणां तरन्त महिषी शशीयसी उत मे रपदित्यस्याः पुरुमीळ्हो- यो मे

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

धेनूनामित्यस्यास्तरन्तः- एतं मे स्तोममित्यादि तिसृणां रथवीति-गायत्री- पञ्चम्यनुष्टुप् -नवमी सतोबृहती- (अत्र त्यौ पुरुमीह्ळ तरंतौ वैददश्वी रथवीति दार्भ्यः)।।

❀04.03.26 卐के ष्ठा नर श्श्रेष्ठतमा- य एकएक^ आयय। परमस्याः परावतः।।

卐 क्व1(अ)वोऽश्वाः क्वा3(आ)भीशवः- कथं शेक कथा यय। पृष्ठे सदो नसो र्यमः।।

卐 जघने चोद^ एषाँ- वि सक्थानि नरो यमुः। पुत्रकृथे न जनयः।।

卐 परा वीरास^ एतन -मर्यासो भद्रजानयः। अग्नितपो यथाऽसथ।।

卐 सन.त्साश्व्यं पशु-मुत गव्यं शतावयम्। श्यावाश्वस्तुताय या –दो.वीरा.योपबर्बृहत्।।

❀04.03.27 卐उत त्वा स्त्री शशीयसी- पुंसो भवति वस्यसी। अदेवत्रा.दराधसः।।

卐 वि या जानाति जसुरिं- वि तृष्यन्तँ वि कामिनम्। देवत्रा कृणुते मनः।।

卐 उत घा नेमो अस्तुतः- पुमा॰ इति ब्रुवे पणिः। स वैरदेय^ इत्समः।।

卐 उत मेऽरप.द्युवति ममन्दुषी- प्रति श्यावाय वर्तनिम्। वि रोहिता पुरुमीळ्हाय येमतु- विप्राय दीर्घयशसे।।

卐 यो मे धेनूनां शतँ- वैददश्वि र्यथा ददत्। तरन्तइव मंहना।।

❀04.03.28 卐य ईं वहन्त आशुभिः- पिबन्तो मदिरं मधु। अत्र श्रवांसि दधिरे।।

卐 येषां श्रियाऽधि रोदसी- विभ्राजन्ते रथे.ष्वा। दिवि रुक्मइवोपरि।।

卐 युवा स मारुतो गण-स्त्वेषरथो अनेद्यः। शुभँयावाऽप्रतिष्कुतः।।

卐 को वेद नून.मेषाँ- यत्रा मदन्ति धूतयः। ऋतजाता^ अरेपसः।।

卐 यूयं मर्तँ विपन्यवः- प्रणेतार^ इत्था धिया। श्रोतारो यामहूतिषु।।

❀04.03.29 卐ते नो वसूनि काम्या- पुरुश्चन्द्रा रिशादसः। आ यज्ञियासो ववृत्तन।।

卐 एतं मे स्तोम.मूर्म्ये- दार्भ्याय परा वह। गिरो देवि रथीरिव।।

卐 उत मे वोचता.दिति- सुतसोमे रथवीतौ। न कामो अप वेति मे।।

卐 एष^ क्षेति रथवीति- र्मघवा गोमती रनु। पर्वते.ष्वपश्रितः।।

☃ 5.62 ऋतेन ऋतमिति नवर्चस्य सूक्तस्य, आत्रेय श्श्रुतवि-न्मित्रवारुणौ- त्रिष्टुप्।।

❀04.03.30 卐ऋतेन ऋत.मपिहित.न्ध्रुवँ वां- सूर्यस्य यत्र विमुच.न्त्यश्वान्। दश शता सह तस्थु.स्तदेक-न्देवानां श्रेष्ठँ वपुषा.मपश्यम्।।

卐 तत्सु वां मित्रावरुणा महित्व-मीर्मा तस्थुषी रहभि र्दुदुह्रे। विश्वाः पिन्वथ.स्स्वसरस्य धेना^-अनु वामेकः पविरा ववर्त।।

卐 अधारयतं पृथिवी.मुत द्यां- मित्रराजाना वरुणा महोभिः। वर्धयत.मोषधीः पिन्वत.ङ्गा^- अव वृष्टिं सृजत.ञ्जीरदानू~।।

卐 आ वा.मश्वास.स्सुयुजो वहन्तु- यतरश्मय^ उप यन्त्वर्वाक्। घृतस्य निर्णि.गनु वर्तते वा-मुप सिन्धवः प्रदिवि क्षरन्ति।।

卐 अनु श्रुता.ममतिँ वर्ध.दुर्वीं- बर्हिरिव यजुषा रक्षमाणा। नमस्वन्ता धृतदक्षाऽधि गर्ते- मित्रासाथे~ वरुणेळा.स्वन्तः~।।

❀04.03.31 卐अर्वाविहस्ता सुकृते परस्पा- यन्त्रासाथे~ वरुणेळा स्वन्तः~। राजाना क्षत्र महृणीयमाना- सहस्रस्थूणं बिभृथ.स्सह द्वौ।।

卐 हिरण्यनिर्णि.गयो अस्य स्थूणा- वि भ्राजते दिव्य1(अ)श्वाजनीव। भद्रे क्षेत्रे निर्मिता तिल्विले वा- सनेम मध्वो अधिगर्त्यस्य।।

卐 हिरण्यरूप.मुषसो व्युष्टा-वयस्स्थूण.मुदिता सूर्यस्य। आ रोहथो वरुण मित्र गर्त-मत.श्चक्षाथे~ अदिति.न्दिति.ञ्च।।

卐 यद्बंहिष्ठ.न्नातिविधे सुदानू~- अच्छिद्रं शर्म भुवनस्य गोपा। तेन नो मित्रावरुणा.वविष्टं- सिषासन्तो जिगीवांस.स्स्याम।। इति तृतीयाध्यायः।

**चतुर्थाष्टके चतुर्थाध्यायः। वर्गाः(1-36)**

☃ 5.63 ऋतस्य गोपाविति सप्तर्चस्य सूक्तस्य, आत्रेयोऽर्चनाना- मित्रावरुणौ- जगती।।

❀04.04.01 卐ऋतस्य गोपा.वधि तिष्ठथो रथं- सत्यधर्माणा परमे व्योमनि। यमत्र मित्रावरुणाऽवथो युव-न्तस्मै वृष्टि.र्मधुम.त्पिन्वते दिवः।।

卐 सम्राजा.वस्य भुवनस्य राजथो- मित्रावरुणा विदथे स्वर्दृशा। वृष्टिं वां राधो अमृतत्व.मीमहे- द्यावापृथिवी~ वि चरन्ति तन्यवः।।

卐 सम्राजा उग्रा वृषभा दिव.स्पती~- पृथिव्या मित्रावरुणा विचर्षणी~। चित्रेभि.रभ्रै रुप तिष्ठथो रव-न्द्यॉं वर्षयथो असुरस्य मायया।।

卐 माया वाँ मित्रावरुणा दिवि श्रिता- सूर्यो ज्योति श्चरति चित्र.मायुधम्। तमभ्रेण वृष्ट्या गूहथो दिवि- पर्जन्य द्रप्सा^ मधुमन्त^ ईरते।।

卐 रथँ युञ्जते मरुत.श्शुभे सुखं- शूरो न मित्रावरुणा गविष्टिषु। रजांसि चित्रा वि चरन्ति तन्यवो- दिव .स्सम्राजा पयसा न^ उक्षतम्।।

卐 वाचं सु मित्रावरुणा.विरावतीं- पर्जन्य.श्चित्राँ वदति त्विषीमतीम्। अभ्रा वसत मरुत.स्सु मायया- द्यॉं वर्षयत मरुणा.मरेपसम्।।

卐 धर्मणा मित्रावरुणा.विपश्चिता- व्रता रक्षेथे~ असुरस्य मायया। ऋतेन विश्वं भुवनँ वि राजथ-स्सूर्यमा धत्थो दिवि चित्र्यं रथम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham
Mysore

🏺 5.64 वरुणँ व इति सप्तर्चस्य सूक्तस्य, अर्चनाना- मित्रावरुणा- वनुष्टुबन्त्या पङ्क्तिः।।

❀04.04.02 卐वरुणँ वो रिशादस-मृचा मित्रं हवामहे। परि व्रजेव बाह्वो- र्जगन्वांसा स्वर्णरम्।।

卐 ता बाहवा सुचेतुना- प्र यन्त.मस्मा अर्चते। शेवं हि जार्यँ वाँ- विश्वासु क्षासु जोगुवे।।

卐 यन्नून.मश्या.ङ्गतिं- मित्रस्य यायां पथा। अस्य प्रियस्य शर्म-ण्यहिंसानस्य सश्चिरे।।

卐 युवाभ्यां मित्रावरु-णोपम.न्धेया.मृचा। यद्ध क्षये मघोनां -स्तोतॄणा.ञ्च स्पूर्धसे।।

卐 आ नो मित्र सुदीतिभि- र्वरुण.श्च सधस्थ आ। स्वे क्षये मघोनां- सखीना.ञ्च वृधसे।।

卐 युव.न्नो येषु वरुण- क्षत्रं बृह.च्च बिभृथः। उरु णो वाजसातये- कृतं राये स्वस्तये।।

卐 उच्छन्त्यां मे यजता- देवक्षत्रे रुशद्गवि। सुतं सोम.न्न हस्तिभि- रा पड्भि धावत.न्नरा बिभ्रता .वर्चनानसम्।।

5.65 यश्चिकेतेति षडृचस्य सूक्तस्य, आत्रेयो रातहव्यो- मित्रावरुणा-वनुष्टुबन्त्या पङ्क्तिः।।

❀04.04.03 卐यश्चिकेत स सुक्रतु- र्देवत्रा स ^ब्रवीतु नः। वरुणो यस्य दर्शतो- मित्रो वा वनते गिरः।।

卐 ता हि श्रेष्ठवर्चसा- राजाना दीर्घश्रुत्तमा। ता सत्पती~ ऋतावृध- ऋतावाना जनेजने।।

卐 ता वा.मियानोऽवसे- पूर्वा उप ब्रुवे सचा। स्वश्वास.स्सु चेतुना- वाजा~ अभि प्र दावने।।

卐 मित्रो अंहो श्चिदा.दुरु- क्षयाय गातुं वनते। मित्रस्य हि प्रतूर्वत-स्सुमति रस्ति विधतः।।

卐 वयं मित्रस्यावसि- स्याम सप्रथ.स्तमे। अनेहस.स्त्वोतय-स्सत्रा वरुणशेषसः।।

卐 युवं मित्रेम.ञ्जनं- यतथ.स्स.ञ्च नयथः। मा मघोनः परि ख्यतं- मो~ अस्माक.मृषीणा.ङ्गोपीथे न^ उरुष्यतम्।।

5.66 आ चिकितानेति षडृचस्य सूक्तस्य, आत्रेयो रातहव्यो-मित्रावरुणा-वनुष्टुप्।।

❀04.04.04 卐आ चिकितान सुक्रतू ~-देवौ मर्त रिशादसा। वरुणाय ऋतपेशसे- दधीत प्रयसे महे।।

卐 ता हि क्षत्र.मविह्रुतं- सम्य.गसुर्य1(अ)माशाते~। अध व्रतेव मानुषं- स्व1(अ)र्ण धायि दर्शतम्।।

卐 ता वा.मेषे रथाना-मुर्वी.ङ्गव्यूति.मेषाम्। रातहव्यस्य सुष्टुति-न्दधृ.क्स्तोमै र्मनामहे।।

卐 अधा हि काव्या युव-न्दक्षस्य पूर्भि रद्भुता। नि केतुना जनाना.ञ्चिकेथे पूतदक्षसा।।

卐 तदृतं पृथिवि बृह-च्छ्रवएष ऋषीणाम्। ज्रयसाना वरं पृ-थ्वति क्षरन्ति यामभिः।।

卐 आ यद्वा.मीयचक्षसा- मित्र वय.ञ्च सूरयः। व्यचिष्ठे बहुपाय्ये- यतेमहि स्वराज्ये।।

5.67 बळित्था देवेति पञ्चर्चस्य सूक्तस्य, आत्रेयो यजतो- मित्रावरुणा- वनुष्टुप्।।

❀04.04.05 卐बळित्था देव निष्कृत-मादित्या यजतं बृहत्। वरुण मित्रार्यम-न्वर्षिष्ठ.ङ्क्षत्र.माशाथे~।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 आ यद्योनिं हिरण्ययं- वरुण मित्र सदथः। धर्तारा चर्षणीनाँ- यन्तं सुम्नं रिशादसा।।

卐 विश्वे हि विश्ववेदसो- वरुणो मित्रो अर्यमा। व्रता पदेव सश्चिरे- पान्ति मर्त्यं रिषः।।

卐 ते हि सत्या^ ऋतस्पृश- ऋतावानो जनेजने। सुनीथास.स्सुदानवो-ऽंहो.श्चि.दुरुचक्रयः।।

卐 को नु वां मित्रास्तुतो- वरुणो वा तनूनाम्। तत्सु वा.मेषते मति- रत्रिभ्य^ एषते मतिः।।

☫ 5.68 प्र वो मित्रायेति पञ्चर्चस्य सूक्तस्य, आत्रेयो यजतो- मित्रावरुणौ- गायत्री ।।

❀04.04.06 卐प्र वो मित्राय गायत- वरुणाय विपा गिरा। महिक्षत्रा.वृतं बृहत्।।

卐 सम्राजा या घृतयोनी~- मित्र.श्चोभा वरुण.श्च। देवा देवेषु प्रशस्ता।।

卐 ता न.श्शक्तं पार्थिवस्य -महो रायो दिव्यस्य। महि वा.ङ्क्षत्र.न्देवेषु।।

卐 ऋत.मृतेन सप-न्तेषिर.न्दक्ष.माशाते~। अद्रुहा देवौ वर्धेते~।।

卐 वृष्टिद्यावा रीत्या-पेष.स्पती~ दानुमत्याः। बृहन्त.ङ्गर्त.माशाते~।।

☫ 5.69 त्री रोचनेति चतुर्ऋचस्य सूक्तस्य, आत्रेय उरुचक्रि-र्मित्रावरुणौ-त्रिष्टुप्।।

❀04.04.07 卐त्री रोचना वरुण त्रीँरुत.द्यू-न्त्रीणि मित्र धारयथो रजांसि। वावृधाना .वमति.ङ्क्षत्रिय-स्यानु व्रतं रक्षमाणा.वजुर्यम्।।

卐 इरावती वरुण धेनवो वां- मधुम.द्वां सिन्धवो मित्र दुह्रे। त्रय.स्तस्थु वृषभास.स्तिसृणा-न्धिषणानां रेतोधा^ वि द्युमन्तः।।

卐 प्रात र्देवी.मदिति.ञ्जोहवीमि- मध्यन्दिन उदिता सूर्यस्य। राये मित्रावरुणा सर्वता-तेळे तोकाय तनयाय शं योः।।

卐 या धर्तारा रजसो रोचन-स्योताऽऽदित्या दिव्या पार्थिवस्य। न वा.न्देवा^ अमृता^ आ मिनन्ति-व्रतानि मित्रावरुणा ध्रुवाणि।।

☫ 5.70 पुरूरुणेति चतुर्ऋचस्य सूक्तस्य, आत्रेय उरुचक्रि-र्मित्रावरुणौ- गायत्री।।

❀04.04.08 卐पुरूरुणा चि.द्ध्य-स्त्यवो नूनं वाँ वरुण। मित्र वंसि वां सुमतिम्।।

卐 ता वां सम्य.गद्रुह्वा-णेष.मश्याम धायसे। वय.न्ते रुद्रा स्याम।।

卐 पात न्नो रुद्रा पायुभि- रुत त्रायेथां सुत्रात्रा। तुर्याम दस्यू.न्तनूभिः।।

卐 मा कस्याद्भुतक्रतू~ यक्षं भुजेमा तनूभिः। मा शेषसा मा तनसा।।

5.71 आ नो गन्तमिति तृचस्य सूक्तस्य, आत्रेयो बाहुवृक्तो- मित्रावरुणौ- गायत्री।।

04.04.09 卐आ नो गन्तं रिशादसा- वरुण मित्र बर्हणा। उपेम.ञ्चारु.मध्वरम्।।

卐 विश्वस्य हि प्रचेतसा- वरुण मित्र राजथः। ईशाना पिप्यत.न्धियः।।

卐 उप न.स्सुत.मगतँ- वरुण मित्र दाशुषः। अस्य सोमस्य पीतये।।

5.72 आ मित्र इति तृचस्य सूक्तस्य, आत्रेयो बाहुवृक्तो-मित्रावरुणा-वुष्णिक्।।

04.04.10 卐आ मित्रे वरुणे वय-ङ्गीर्भि र्जुहुमो अत्रिवत्। नि बर्हिषि सदतं सोमपीतये।।

卐 व्रतेन स्थो ध्रुवक्षेमा- धर्मणा यातयज्जना। नि बर्हिषि सदतं सोमपीतये।।

卐 मित्र.श्च नो वरुण.श्च- जुषेताँ यज्ञ.मिष्टये। नि बर्हिषि सदतां सोमपीतये।।

5.73 यदद्य स्थ इति दशर्चस्य सूक्तस्य, आत्रेयःपौरोऽश्विना-वनुष्टुप्।।

04.04.11 卐यदद्य स्थꣳ परावति- यदर्वाव.त्यश्विना। यद्वा पुरू पुरुभुजा- यदन्तरिक्ष आ गतम्।।

卐 इह त्या पुरुभूतमा- पुरू दंसांसि बिभ्रता। वरस्या या.म्यध्रिगू~- हुवे तुविष्टमा भुजे।।

卐 ईर्माऽन्य.द्वपुषे वपु-श्चक्रं रथस्य येमथुः। पर्यन्या नाहुषा युगा- मह्ना रजांसि दीयथः।।

卐 तदू ०षु वामेना कृतँ- विश्वा यद्वा मनु०ष्टवे। नाना जाता.वरेपसा- समस्मे बन्धुमेयथुः।।

卐 आ यद्वां सूर्या रथ-न्तिष्ठ.द्रघु०ष्यदं सदा। परि वा.मरुषा वयो- घृणा वरन्त आतपः।।

04.04.12 卐युवो रत्रि श्चिकेतति- नरा सुम्नेन चेतसा। घर्मँ यद्वा.मरेपस-न्नासत्याऽस्ना भुरण्यति।।

卐 उग्रो वा.ङ्ककुहो ययि- श्शृण्वे यामेषु सन्तनिः। यद्वा.न्दंसोभि रश्विना-ऽत्रि र्नरा ववर्तति।।

卐 मध्व^ ऊ०षु मधूयुवा- रुद्रा सिषक्ति पिप्युषी। यत्समुद्राऽति पर्षथꣳ- पक्वाꣳ पृक्षो भरन्त वाम्।।

卐 सत्य.मिद्वा उ अश्विना- युवा.माहु र्मयोभुवा। ता याम.न्यामहूतमा- याम.न्नामृळयत्तमा।।

卐 इमा ब्रह्माणि वर्धना-ऽश्विभ्यां सन्तु शन्तमा। या तक्षाम रथा९इवा-ऽवोचाम बृह.न्नमः।।

5.74 कूष्ठो देवाविति दशर्चस्य सूक्तस्य, आत्रेयः पौरोऽश्विना-वनुष्टुप्।।

❀04.04.13 卐कूष्ठो देवा.वश्विना-ऽद्या दिवो मनावसू~। तच्छ्रवथो वृषण्वसू~- अत्रि र्वा.मार्विवासति।।

卐 कुह त्या कुह नु श्रुता- दिवि देवा नासत्या। कस्मि.न्ना यतथो जने- को वा.न्नदीनां सचा।।

卐 कं याथ꣫ कं ह गच्छथ꣫- कमच्छा युञ्जाथे~ रथम्। कस्य ब्रह्माणि रण्यथो- वयं वा.मुश्म.सीष्टये।।

卐 पौर.ञ्चि.द्ध्युदप्रुतं- पौर पौराय जिन्वथः। यदी.ङ्गृभीततातये- सिंह.मिव द्रुह.स्पदे।।

卐 प्र च्यवाना.ज्जुजुरुषो- वव्रि.मत्क.न्न मुञ्चथः। युवा यदी कृथः- पुनरा काम.मृण्वे वध्वः।।

❀04.04.14 卐अस्ति हि वा.मिह स्तोता- स्मसि वां सन्दृशि श्रिये। नू श्रुतं म आ गत-मवोभि र्वाजिनीवसू~।।

卐 को वा.मद्य पुरूणा-मा वव्ने मर्त्यानाम्। को विप्रो विप्रवाहसा- को यज्ञै र्वाजिनीवसू~।।

卐 आ वां रथो रथानाँ- येष्ठो यात्वश्विना। पुरू चिदस्मयु.स्तिर^- आङ्गूषो मर्त्ये.ष्वा।।

卐 शमू षु वां मधूयुवा-ऽस्माक.मस्तु चर्कृतिः। अर्वाचीना विचेतसा- विभि.श्श्येनेव दीयतम्।।

卐 अश्विना यद्ध कर्हि चि-च्छुश्रूयात.मिमं हवम्। वस्वी.रू षु वां भुज꣫- पृञ्चन्ति सु वां पृचः।।

5.75 प्रति प्रियतममिति नवर्चस्य सूक्तस्य, आत्रेयो वस्यु-रश्विनौ- पङ्क्तिः।।

❀04.04.15 卐प्रति प्रियतमं रथँ- वृषणँ वसुवाहनम्। स्तोता वा.मश्विना.वृषि-स्स्तोमेन प्रति भूषति- माध्वी~ मम श्रुतं हवम्।।

卐 अत्यायात.मश्विना- तिरो विश्वा^ अहं सना। दस्रा हिरण्यवर्तनी~- सुषुम्ना सिन्धुवाहसा- माध्वी~ मम श्रुतं हवम्।।

卐 आ नो रत्नानि बिभ्रता-वश्विना गच्छतँ युवम्। रुद्रा हिरण्यवर्तनी~- जुषाणा वाजिनीवसू~- माध्वी~ मम श्रुतं हवम्।।

卐 सुष्टुभो वाँ वृषण्वसू~- रथे वाणी.च्याहिता। उत वा.ङ्ककुहो मृग꣫- पृक्ष꣫ कृणोति वापुषो- माध्वी~ मम श्रुतं हवम्।।

卐 बोधिन्मनसा र-थ्येषिरा हवनश्रुता। विभि.श्च्यवान.मश्विना- नि याथो अद्वयाविनं- माध्वी~ मम श्रुतं हवम्।।

❀04.04.16 卐आ वा.न्नरा मनोयुजो-ऽश्वासः॒ प्रुषितप्सवः। वयो वहन्तु पीतये- सह सुम्नेभि रश्विना- माध्वी~ मम श्रुतं हवम्।।

卐 अश्विना.वेह गच्छत-न्नासत्या मा वि वेनतम्। तिर.श्चिदर्यया परि- वर्ति यात.मदाभ्या- माध्वी~ मम श्रुतं हवम्।।

卐 अस्मि.न्यज्ञे अदाभ्या- जरितारं शुभ.स्पती~। अवस्यु.मश्विना युव-ङ्गृणन्त.मुप भूषथो- माध्वी~ मम श्रुतं हवम्।।

卐 अभू.दुषा रुशत्पशु- राऽग्नि रधा.य्यृत्वियः। अयोजि वाँ वृषण्वसू~- रथो दस्रा.वमर्त्यो- माध्वी~ मम श्रुतं हवम्।।

5.76 आ भात्यग्निरिति पञ्चर्चस्य सूक्तस्य, भौमोऽत्रि-रश्विनौ- त्रिष्टुप्- भारद्वाजे षष्ठे मण्डले षडनुवाकाः

❀04.04.17 卐आ भात्यग्नि रुषसा.मनीक-मुद्विप्राणा.न्देवया वाचो अस्थुः। अर्वाञ्चा नूनं रथ्येह यातं- पीपिवांस.मश्विना घर्म.मच्छ।।

卐 न संस्कृतं प्र मिमीतो गमिष्ठा-ऽन्ति नून.मश्वि.नोपस्तु.तेह। दिवाऽभिपित्वेऽवसा गमिष्ठा- प्रत्यवर्ति .न्दाशुषे शंभविष्ठा।।

卐 उता ऽऽयातं सङ्गवे प्रात.रह्नो- मध्यन्दिन उदिता सूर्यस्य। दिवा नक्त.मवसा शन्तमेन- नेदानीं पीति रश्विना ऽऽततान।।

卐 इदं हि वां प्रदिवि स्थान.मोक~- इमे गृहा^ अश्विनेद.न्दुरोणम्। आ नो दिवो बृहतः॒ पर्वतादा-ऽद्भ्यो यात.मिष.मूर्जँ वहन्ता।।

卐 समश्विनो.रवसा नूतनेन- मयोभुवा सुप्रणीती गमेम। आ नो रयिँ वहत.मोत वीरा-ना विश्वा.न्यमृता सौभगानि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

☸ 5.77 प्रातर्यावाणेति पञ्चर्चस्य सूक्तस्य, भौमोऽत्रि- रश्विनौ- त्रिष्टुप्।।

❀04.04.18 卐प्रातर्यावाणा प्रथमा यजध्वं- पुरा गृध्रा.दररुषः पिबातः। प्रात.र्हि यज्ञ.मश्विना दधाते- प्र शंसन्ति कवयः पूर्वभाजः।।

卐 प्रात र्यजध्व.मश्विना हिनोत- न साय.मस्ति देवया^ अजुष्टम्। उतान्यो अस्म.द्यजते वि चाऽऽवः- पूर्वः पूर्वो यजमानो वनीयान्।।

卐 हिरण्यत्व.ङ्मधुवर्णो घृतस्नुः- पृक्षो वह.न्नारथो वर्तते वाम्। मनोजवा^ अश्विना वातरंहा^- येनातियाथो दुरितानि विश्वा।।

卐 यो भूयिष्ठ.न्नासत्याभ्याँ विवेष- चनिष्ठं पित्वो ररते विभागे। स तोक.मस्य पीपर.च्छमीभि-रनूर्ध्वभास .स्सद.मि.त्तुतुर्यात्।।

卐 सम.श्विनो रवसा नूतनेन- मयोभुवा सुप्रणीती गमेम। आ नो रयिँ वहत.मोत वीरा-नाविश्वा.न्यमृता सौभगानि।।

☸ 5.78 (उपांशु) अश्विनाविति नवर्चस्य सूक्तस्य, आत्रेय स्सप्तवध्रि- रश्विना- वनुष्टुप्-आद्यास्तिस्र उष्णिह- श्चतुर्थी त्रिष्टुप्-(पञ्चम्यादि पञ्च गर्भस्राविण्य उपनिषदः)

❀04.04.19 卐☞अश्विना.वेह गच्छत-न्नासत्या मा वि वेनतम्। हंसाविव पतत.मा सुताः उप।।

卐 अश्विना हरिणाविव- गौराविवानु यवसम्। हंसाविव पतत.मा सुताः उप।।

卐 अश्विना वाजिनीवसू~- जुषेथाँ यज्ञ.मिष्टये। हंसाविव पतत.मासुता ःउप ।।

卐 अत्रि र्यद्वा.मवरोह.न्नृबीस-मजोहवी.न्नाधमानेव योषा। श्येनस्य चिज्जवसा नूतनेना- ऽऽगच्छत.मश्विना शन्तमेन।।

❀04.04.20 卐वि जिहीष्व वनस्पते- योनि.स्सूष्यन्त्याइव। श्रुतं मे अश्विना हवं- सप्तवध्रि.ञ्च मुञ्चतम्।।

卐 भीताय नाधमानाय- ऋषये सप्तवध्रये। मायाभि रश्विना युवं- वृक्षं स.ञ्च वि चाचथः।।

卐 यथा वातः पुष्करिणीं- समिङ्गयति सर्वतः। एवा ते गर्भ^ एजतु- निरैतु दशमास्यः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 यथा वातो यथा वनँ- यथा समुद्र^ एजति। एवा त्व.न्दशमास्य- सहावेहि जरायुणा।।

卐 दश मासा.ञ्छशयानः- कुमारो अधि मातरि। निरैतु जीवो अक्षतो- जीवो जीवन्त्या^ आधि।।

卐 ✡।। अथ परिशिष्टम्।।

卐 आ ते गर्भो योनि मैतु- पुमा न्बाण इवेषुधिम्। आ वीरो जायतां- पुत्रस्ते दशमास्यः।।

卐 करोमि ते प्राजापत्य-मा गर्भो योनि मैतु ते। अनूनः पूर्णो जायता- मश्लोणोऽपिशाचधीतः।।

卐 पुमाँस्ते पुत्रो नारि -तं पुमा ननुजायताम्। तानि भद्राणि बीजा-न्यृषभा जनयन्ति नौ।।

卐 यानि भद्राणि बीजा-न्यृषभा जनयन्ति नः। तैस्त्वं पुत्रा न्विन्दस्व- सा प्रसू र्धेनुका भव।।

卐 काम स्समृध्यतां म-ह्य मपराजित मेव मे। यङ्कामङ्कामये देव- तं मे वायो समर्धय।।

卐 इति परिशिष्टम्।।

5.79 महे न इति दशर्चस्य सूक्तस्य, आत्रेयस्सत्यश्रवा- उषाः- पङ्क्तिः।।

❀4.04.21 ☞卐महे नो अद्य बोध-योषो राये दिवित्मती। यथा चिन्नो अबोधय-स्सत्यश्रवसि वाय्ये- सुजाते अश्वसूनृते।।

卐 या सुनीथे शौचद्रथे- व्यौच्छो दुहित र्दिवः। सा व्युच्छ सहीयसि- सत्यश्रवसि वाय्ये- सुजाते अश्वसूनृते।।

卐 सा नो अद्याऽभर.द्वसु- र्व्युच्छा दुहित र्दिवः। यो व्यौच्छ.स्सहीयसि- सत्यश्रवसि वाय्ये- सुजाते अश्वसूनृते।।

卐 अभि ये त्वा विभावरि- स्तोमै र्गृणन्ति वह्नयः। मघै र्मघोनि सुश्रियो- दामन्वन्त.स्सुरातय- स्सुजाते अश्वसूनृते।।

卐 यच्चिद्धि ते गणा^ इमे- छदयन्ति मघत्तये। परि चिद्वष्टयो दधु- र्ददतो राधो अह्रयं- सुजाते अश्वसूनृते।।

❀04.04.22 ☞卐ऐषु धा वीरव द्यश^- उषो मघोनि सूरिषु। ये नो राधां.स्यह्रया- मघवानो अरासत- सुजाते अश्वसूनृते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 तेभ्यो द्युम्नं बृह.द्यश॑- उषो मघो.न्या वह। ये नो राधां.स्यश्व्या- गव्या भजन्त सूरय-स्सुजाते अश्वसूनृते।।

卐 उत नो गोमती रिष॑- आ वहा दुहित र्दिवः। साकं सूर्यस्य रश्मिभि-श्शुक्रै.श्शोचद्भि रर्चिभि-स्सुजाते अश्वसूनृते।।

卐 व्युच्छा दुहित र्दिवो- मा चिर.न्तनुथा॑ अपः। नेत्त्वा स्तेनँ यथा रिपु-न्तपाति सूरो अर्चिषा- सुजाते अश्वसूनृते।।

卐 एताव.द्वेदुष.स्त्वं- भूयो वा दातु.मर्हसि। या स्तोतृभ्यो विभाव-र्युच्छन्ती न प्रमीयसे- सुजाते अश्वसूनृते।।

5.80 द्युतद्यामानमिति षड्टचस्य सूक्तस्य, आत्रेय स्सत्यश्रवा- उषा-स्त्रिष्टुप्।।

❀04.04.23 卐द्युत.द्यामानं बृहती.मृतेन- ऋतावरी.मरुणप्सुँ विभातीम्। देवी.मुषसं स्वरावहन्तीं-प्रति विप्रासो मतिभि र्जरन्ते।।

卐 एषा जन.न्दर्शता बोधयन्ती- सुगा.न्पथः कृण्वती यात्यग्रे। बृहद्रथा बृहती विश्वमि-न्वोषा॑ ज्योति.र्यच्छ.त्यग्रे अह्नाम्।।

卐 एषा गोभि ररुणेभि र्युजाना-ऽस्रेधन्ती रयि.मप्रायु चक्रे। पथो रदन्ती सुवितार्य देवी- पुरुष्टुता विश्ववारा वि भाति।।

卐 एषा व्येनी भवति द्विबर्हा॑- आविष्कृण्वाना तन्वं पुरस्तात्। ऋतस्य पन्था.मन्वेति साधु- प्रजानतीव न दिशो मिनाति।।

卐 एषा शुभ्रा न तन्वो विदा-नोर्ध्वेव स्नाती दृशये नो अस्थात्। अप द्वेषो बाधमाना तमां-स्युषा दिवो दुहिता ज्योतिषाऽऽगात्।।

卐 एषा प्रतीची दुहिता दिवो नॄ-न्योषेव भद्रा नि रिणीते अप्सः। व्यूर्ण्वती दाशुषे वार्याणि- पुन र्ज्योति र्युवतिः पूर्वथाऽकः~।।

5.81 युञ्जते मन इति पञ्चर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्व- स्सविता- जगती।।

❀04.04.24 卐युञ्जते मन^ उत युञ्जते धियो- विप्रा विप्रस्य बृहतो विप.श्चितः। वि होत्रा दधे वयुनावि.देक^ इ-न्मही देवस्य सवितुः परिष्टुतिः।।

卐 विश्वा रूपाणि प्रति मुञ्चते कविः- प्रासावी.द्भद्र.न्द्विपदे चतुष्पदे। वि नाक.मख्य.त्सविता वरेण्यो-ऽनु प्रयाण.मुषसो वि राजति।।

卐 यस्य प्रयाण.मन्वन्य^ इद्ययु- र्देवा देवस्य महिमान.मोजसा। यः पार्थिवानि विममे स एतशो-रजांसि देव.स्सविता महित्वना।।

卐 उत यासि सवित.स्त्रीणि रोच-नोत सूर्यस्य रश्मिभि.स्समुच्यसि। उत रात्री.मुभयतः परीयस -उत मित्रो भवसि देव धर्मभिः।।

卐 उतेशिषे प्रसवस्य त्वमेक इ-दुत पूषा भवसि देव यामभिः। उतेदं विश्वं भुवनं वि राजसि-श्यावाश्व.स्ते सवित.स्स्तोम.मानशे।।

5.82तत्सवितुरिति नवर्चस्य सूक्तस्य, आत्रेय श्श्यावाश्व- स्सविता- गायत्री-आद्याऽनुष्टुप्।।

❀04.04.25 卐तत्सवितु र्वृणीमहे- वय.न्देवस्य भोजनम्। श्रेष्ठं सर्वधातम-न्तुरं भगस्य धीमहि।।

卐 अस्य हि स्वयशस्तरं- सवितुः कच्चन प्रियम्। न मिनन्ति स्वराज्यम्।।

卐 स हि रत्नानि दाशुषे- सुवाति सविता भगः। तं भाग.श्चित्र.मीमहे।।

卐 अद्या नो देव सवितः~- प्रजाव.त्सावी.स्सौभगम्। परा दुष्ष्वप्न्यं सुव।।

卐 विश्वानि देव सवित- र्दुरितानि परा सुव। यद्भद्र.न्तन्न^ आ सुव।।

❀04.04.26 卐अनागसो अदितये- देवस्य सवितु.स्सवे। विश्वा वामानि धीमहि।।

卐 आ विश्वदेवं सत्पतिं- सूक्तै रद्या वृणीमहे। सत्यसवं सवितारम्।।

卐 य^ इमे~ उभे~ अहनी~- पुर^ एत्यप्रयुच्छन्न्। स्वाधी र्देव.स्सविता।।

卐 य^ इमा विश्वा जाता-न्याश्रावयति श्लोकेन। प्र च सुवाति सविता।।

5.83 अच्छा वदेति दशर्चस्य सूक्तस्य, भौमोऽत्रिः- पर्जन्य- स्त्रिष्टुप्-द्वितीयादि तिस्रो जगत्यो-नवम्यनुष्टुप्।।

❀04.04.27 卐अच्छा वद तवसं॒ गीर्भि रा॒भि-स्स्तु॒हि प॒र्जन्यं॒ नम॑सा॒ऽऽविवास। कनि॑क्रदद्वृष॒भो जी॒रदा॑नू- रेतो॑ दधा॒त्योष॑धीषु॒ गर्भ॑म्।।

卐 वि वृ॒क्षा॒न्ह॒न्त्युत ह॑न्ति र॒क्षसो॑- विश्वं॑ बिभाय॒ भुव॑नं म॒हाव॑धात्। उ॒तानाा॑गा ईषते॒ वृष्ण्या॑वतो॒- यत्प॒र्जन्य॑ स्त॒नय॒न्हन्ति॑ दु॒ष्कृत॑ः।।

卐 र॒थीव॒ कश॒याऽश्वाँ॑ अभि॒क्षिप॑-न्ना॒विर्दू॒ता॒न्कृ॑णुते व॒र्ष्या॑3(आँ) अह॑। दू॒रा॒त्सिं॒हस्य॑ स्त॒नथा॒ उदी॑रते॒- यत्प॒र्जन्यः॑ कृणु॒ते व॒र्ष्य॑1(अ)न्नभः॑।।

卐 प्र वाता॒ वान्ति॒ प॒तय॑न्ति वि॒द्युत॒- उदोष॑धी॒ र्जिह॑ते॒ पिन्व॑ते॒ स्वः॑। इरा॒ विश्व॑स्मै॒ भुव॑नाय जायते॒- यत्प॒र्जन्यः॑ पृथि॒वीं रेत॒साऽव॑ति।।

卐 यस्य॑ व्र॒ते पृ॑थि॒वी नन्न॑मीति॒- यस्य॑ व्र॒ते श॒फव॒ज्जर्भु॑रीति। यस्य॑ व्र॒त ओष॑धी॒ र्विश्व॑रूपा॒-स्स न॑ः पर्जन्य॒ महि॒ शर्म॑ यच्छ।।

❀04.04.28 卐दि॒वो नो॑ वृ॒ष्टिं म॑रुतो ररीध्वं॒- प्र पि॑न्वत॒ वृष्णो॒ अश्व॑स्य॒ धारा॑ः। अ॒र्वाङ्ङे॒तेन॑ स्तनयि॒त्नुना॒-ह्य॒पो नि॑षि॒ञ्च॒न्नसु॑रः पि॒ता न॑ः।।

卐 अ॒भि क्र॑न्द स्त॒नय॒ गर्भ॒मा धा॒- उ॒द॒न्वता॒ परि॑ दीया॒ रथे॑न। दृतिं॑ सु क॑र्ष॒ विषि॑त॒न्न्यञ्चं॒- स॒मा भ॑वन्तू॒द्वतो॑ निपा॒दा॑ः।।

卐 म॒हान्त॒ङ्कोश॒मुद॑चा॒ नि षि॑ञ्च- स्यन्द॑न्ता॒ङ्कु॒ल्या विषि॑ताः पु॒रस्ता॑त्। घृ॒तेन॒ द्यावा॑पृथि॒वी॒ व्युन्धि- सु॒प्र॒पा॒णं भ॑व॒त्वघ्न्याभ्य॑ः।।

卐 यत्प॑र्जन्य॒ कनि॑क्रद॒-त्स्तन॒य॒न्हंसि॑ दु॒ष्कृत॑ः। प्रती॒दं विश्वं॑ मोद॒ते- यत्कि॒ञ्च पृ॑थि॒व्या॒मधि॑।।

卐 अव॑र्षी॒ र्वर्ष॒मुदु॑षू॒ गृ॑भा॒-याक॒ र्धन्वा॒न्यत्ये॑तवा उ। अजी॑जन॒ ओष॑धी॒ र्भोज॑नाय॒- कमु॒त प्र॒जाभ्यो॑ऽविदो मनी॒षाम्।।

🪔 5.84 बळित्थेति तृचस्य सूक्तस्य, भौमोऽत्रिः- पृथि-व्यनुष्टुप्।।

❀04.04.29 卐बळि॒त्था पर्व॑ताना॒ङ्खिद्रं॑ बिभर्षि पृथिवि। प्र या भूमिं॑ प्रवत्वति- म॒ह्ना जि॒नोषि॑ महिनि।।

卐 स्तोमा॑स॒स्त्वा विचारिणि॒- प्रति॑ष्टोभ॒न्त्य॒क्तुभि॑ः। प्र या वाज॒न्न हेष॑न्तं- पे॒रु॒मस्य॒स्यर्जुनि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 दृळ्हा चिद्या वनस्पती-न्क्ष्मया दर्ध.ष्योजसा। यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः।।

卐 ✡ ।। अथ परिशिष्टम्।।

卐 वर्षन्तु ते विभावरि- दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजा-न्यव ब्रह्मद्विषो जहि।।

इति परिशिष्टम्।।

5.85 प्र सम्राज इत्यष्टर्चस्य सूक्तस्य, भौमोऽत्रि-र्वरुण- स्त्रिष्टुप्।।

❀04.04.30 卐प्र सम्राजे बृह.दर्चा गभीरं- ब्रह्म प्रियँ वरुणाय श्रुताय। वि यो जघान शमितेव च-र्मोपस्तिरे पृथिवीं सूर्याय।।

卐 वनेषु व्य1(अ)न्तरिक्ष.न्ततान- वाज.मर्वत्सु पय^ उस्त्रियासु। हृत्सु क्रतुँ वरुणो अप्स्व1(अ)ग्नि-न्दिवि सूर्य.मदधा.त्सोम.मद्रौ।।

卐 नीचीनबारँ वरुणꣳ कवन्धं- प्र ससर्ज रोदसी अन्तरिक्षम्। तेन विश्वस्य भुवनस्य राजा- यव.न्न वृष्टि.व्युनत्ति भूम।।

卐 उनत्ति भूमिं पृथिवी.मुत द्याँ- यदा दुग्धँ वरुणो वष्ट्यादित्। समभ्रेण वसत पर्वतास-स्तविषीयन्त. श्श्रथयन्त वीराः।।

卐 इमामू ष्वासुरस्य श्रुतस्य- महीं मायाँ वरुणस्य प्र वोचम्। मानेनेव तस्थिवाꣳ अन्तरिक्षे- वि यो ममे पृथिवीं सूर्येण।।

❀04.04.31 卐इमा.मू नु कवितमस्य मायां- मही.न्देवस्य नकि रादधर्ष। एकँ यदुद्ना न पृण.न्त्येनी-रासिञ्चन्ती रवनय.स्समुद्रम्।।

卐 अर्यम्यँ वरुण मित्र्यँ वा- सखायँ वा सदमि.द्भ्रातरँ वा। वेशँ वा नित्यँ वरुणारणँ वा-यत्सी.माग.श्चकृमा शिश्रथ.स्तत्।।

卐 कितवासो यद्रिरिपु र्न दीवि- यद्वा घा सत्य.मुत यन्न विद्म। सर्वा ता वि ष्य शिथिरेव दे-वाधा ते स्याम वरुण प्रियासः।।

5.86 इन्द्राग्नी इति षडृचस्य सूक्तस्य, भौमोऽत्रि- रिन्द्राग्न्यनुष्टुप्-अन्त्या विराडदूर्वा पङ्क्त्युत्तरा वा।।

❀04.04.32 卐इन्द्राग्नी~ यमवथ- उभा वाजेषु मर्त्यम्। दृळ्हा चित्स प्र भेदति- द्युम्ना वाणीरिव त्रितः।।

卐 या पृतनासु दुष्टरा- या वाजेषु श्रवाय्या। या पञ्च चर्षणी र-भीन्द्राग्नी~ ता हवामहे।।

卐 तयो रि.दमवच्छव-स्तिग्मा दिद्यु.न्मघोनोः। प्रति द्रुणा गभस्त्यो- र्गवाँ वृत्र.घ्न एषते।।

卐 ता वा.मेषे रथाना-मिन्द्राग्नी~ हवामहे। पती~ तुरस्य राधसो- विद्वांसा गिर्वणस्तमा।।

卐 ता वृधन्ता वनु द्यू-न्मर्ताय देवा.वदभा। अर्हन्ता चित्पुरो दधे-ऽंशेव देवा वर्वते।।

卐 एवेन्द्राग्निभ्या.महावि हव्यं- शूष्य.ङ्घृत.न्न पूत.मद्रिभिः। ता सूरिषु श्रवो बृह-द्रयि.ङ्गृणत्सु दिधृत-मिष.ङ्गृणत्सु दिधृतम्।।

5.87 प्र वो मह इति नवर्चस्य सूक्तस्य, आत्रेय-एवयामरुन्मरुतोऽतिजगती।।

❀04.04.33 卐प्र वो महे मतयो यन्तु विष्णवे- मरुत्वते गिरिजा^ एवयामरुत्। प्र शर्धाय प्रयज्यवे सुखादये- तवसे भन्ददिष्टये- धुनिव्रताय शवसे।।

卐 प्र ये जाता महिना ये च नु स्वयं- प्र विद्मना ब्रुवत^ एवयामरुत्। क्रत्वा तद्वो मरुतो नाऽऽधृषे शवो-दाना मह्ना तदेषा.मधृष्टासो नाद्रयः।।

卐 प्र ये दिवो बृहत.श्शृण्विरे गिरा- सुशुक्वान.स्सुभ्व^ एवयामरुत्। न येषा.मिरी सधस्थ ईष्ट आ९-अग्नयो न स्वविद्युत४- प्र स्पन्द्रासो धुनीनाम्।।

卐 स चक्रमे महतो निरुरुक्रम-स्समानस्मा.त्सदस एवयामरुत्। यदाऽयुक्त त्मना स्वादधि ष्णुभि-र्विष्पर्धसो विमहसो- जिगाति शेवृधो नृभिः।।

卐 स्वनो न वोऽमवा.न्रेजय.द्वृषा- त्वेषो ययि.स्तविष^ एवयामरुत्। येना सहन्त^ ऋञ्जत स्वरोचिष-स्स्थारश्मानो हिरण्ययाः- स्वायुधास^ इष्मिणः।।

❀04.04.34 卐अपारो वो महिमा वृद्धशवस-स्त्वेषं शवोऽव.त्वेवयामरुत्। स्थातारो हि प्रसितौ सन्दृशि स्थन- ते न^ उरुष्यता निद-श्शुशुक्वांसो नाग्नयः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 ते रुद्रास.स्सुमखा^ अग्नयो यथा- तुविद्युम्ना^ अव.न्त्वेवयामरुत्। दीर्घं पृथु पप्रथे सद्म पार्थिवँ- येषा.मज्मेष्वा मह-श्शर्धा.स्यद्भुतैनसाम्।।

卐 अद्वेषो नो मरुतो गातु.मेतन- श्रोता हव.ञ्जरितु रेवयामरुत्। विष्णो मह.स्समन्यवो युयोतन-स्मद्रथ्यो3(ओ) न दंसना-ऽप द्वेषांसि सनुतः।।

卐 गन्ता नो यज्ञँ यज्ञिया.स्सुशमि- श्रोता हव.मरक्ष^ एवयामरुत्। ज्येष्ठासो न पर्वतासो व्योमनि- यूय.न्तस्य प्रचेतस-स्स्यात दुर्धर्तवो निदः।।

卐 ✡ अथ परिशिष्टम्

卐 अग्नि रैतु प्रथमो देवतानां- सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्। तदयं राजा वरुणोऽनुमन्यताँ- यथेयं स्त्री पौत्र.मघन्न रोदात्।।

卐 इमा.मग्नि.स्त्रायता.ङ्गार्हपत्यः- प्रजा.मस्यै नयतु दीर्घ.मायुः। अशून्योपस्था जीवता.मस्तु माता-पौत्र .मानन्द.मभि प्रबुध्यता.मियम्।।

卐 मा ते गृहे निशि घोष ^उत्था- दन्यत्र त्वद्रुदत्य स्सँ विशन्तु। पश्यन्ती प्रजां सुमनस्यमाना।।

卐 अप्रजस्तां पौत्रमृत्युं- पाप्मान मुत वाऽघम्। शीर्ष्ण स्स्रजमिवो.न्मुच्य- द्विषद्भ्यः प्रतिमुञ्चामि पाशम्।।

卐 देवकृतं ब्राह्मणङ्कल्पमान-न्तेन हन्मि योनिषदः पिशाचान्। क्रव्यादो मृत्यू नधरा.न्पातयामि दीर्घ मायु स्तव जीवन्तु पुत्राः।।

卐 ✡।। अथ श्रीसूक्तम्।।

卐 हिरण्यवर्णां हरिणीं- सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मी-ञ्जातवेदो म आ वह।।

卐 तां म आ वह जातवेदो- लक्ष्मी.मनपगामिनीम्। यस्यां हिरण्यं विन्देय-ङ्गामश्वं पुरुषा नहम्।।

卐 अश्वपूर्वां रथमध्यां- हस्तिनादप्रबोधिनीम्(प्र मोदिनीम्)। श्रिय.न्देवी मुप ह्वये- श्रीर्मा देवी जुषताम्।।

卐 कां सोस्मितां हिरण्यप्राकारा-माद्रां.ज्वलन्ती.न्तृप्ता.न्तर्पयन्तीम्। पद्मेस्थितां पद्मवर्णा-न्तामिहोपह्वये श्रियम्।।

卐 चन्द्रां प्रभासाँ यशसा ज्वलन्तीं- श्रियँ लोके देवजुष्टा.मुदाराम्। तां पद्मिनीमीं शरणं प्रपद्ये-ऽलक्ष्मी र्मे नश्यता.न्त्वां वृणे।।

卐 आदित्यवर्णे तपसोऽधिजातो-वनस्पति स्तव वृक्षोऽथबिल्वः। तस्य फलानि तपसा नुदन्तु- मा यान्तरा याश्च बाह्या अलक्ष्मीः।।

卐 उपैतु मा.न्देवसखः- कीर्तिश्च मणिना सह। प्रादु र्भूतोऽस्मि राष्ट्रेऽस्मि-न्कीर्तिं.मृद्धिं.न्ददातु मे।।

卐 क्षुत्पिपासामलाञ्ज्येष्ठा-मलक्ष्मी न्नाशया.म्यहम्। अभूति मसमृद्धिञ्च -सर्वान्निर्णुद मे गृहात्।।

卐 गन्धद्वारा.न्दुराधर्षा-न्नित्यपुष्टा.ङ्करीषिणीम्। ईश्वरीं सर्वभूताना-न्तामिहोप ह्वये श्रियम्।।

卐 मनसः काम.माकूतिं- वाच स्सत्य मशीमहि। पशूनां रूप.मन्नस्य- मयि श्री.श्श्रयताँ यशः।।

卐 कर्दमेन प्रजाभूता-मयि संभवकर्दम। श्रियँ वासय मे कुले- मातरं पद्ममालिनीम्।।

卐 आप स्स्रजन्तु स्निग्धानि- चिक्लीत वस मे गृहे। नि च देवीं मातरं- श्रियँ वासय मे कुले।।

卐 आर्द्रां पुष्करिणीं पुष्टिं- पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मी-ञ्जातवेदो म आ वह।।

卐 आर्द्राँ यः करिणीँ यष्टिं- सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीँ लक्ष्मी-ञ्जातवेदो म आ वह।।

卐 तां म आ वह जातवेदो- लक्ष्मी.मनपगामिनीम्। यस्यां हिरण्यं प्रभूत-ङ्गावो दास्योऽश्वा-न्विन्देयं पुरुषा नहम्।।

卐 यश्शुचिः प्रयतो भूत्वा- जुहुया दाज्य.मन्वहम्। सूक्तं पञ्चदशर्चञ्च -श्रीकाम स्सततञ्जपेत्।।

卐 पद्माऽऽनने पद्मविपद्मपत्रे- पद्मप्रिये पद्मदळायताक्षि। विश्वप्रिये विष्णु मनोऽनुकूले- त्वत्पादपद्मं मयि सन्निधत्स्व।।

卐 पद्मानने पद्मऊरु -पद्माक्षी पद्मसंभवे। तन्मे भजसि पद्माक्षि- येन सौख्यँ लभा म्यहम्।।

卐 अश्वदायि गोदायि- धनदायि महाधने। धनं मे जुषता.न्देवि- सर्वकामां.श्च देहि मे।।

卐 पुत्रपौत्रधन न्धान्यं- हस्त्यश्वाश्वतरी रथम्। प्रजानां भवसि माता- आयुष्म.न्तङ्करोतु मे।।

卐 धन.मग्नि र्धनँ वायु- र्धनं सूर्यो धनँ वसुः। धन मिन्द्रो बृहस्पति- र्वरुणो धन.मश्विना।।

卐 वैनतेय सोमं पिब- सोमं पिबतु वृत्रहा। सोम.न्धनस्य सोमिनो- मह्य.न्ददातु सोमिनः।।

卐 न क्रोधो न च मात्सर्य-न्न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां- भक्त्या श्रीसूक्तजापिनाम्।।

卐 सरसिजनिलये सरोज हस्ते- धवलतरांशुकगन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे- त्रिभुवनभूतिकरि प्र सीद मह्यम्।।

卐 विष्णुपत्नीङ्क्षमा.न्देवीं- माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं भूमि-न्नमा म्यच्युतवल्लभाम्।।

卐 महालक्ष्म्यै च विद्महे- विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्।।

卐 आनन्दः कर्दम श्रीद-श्चिक्लीत इति विश्रुताः। ऋषय श्श्रियः पुत्राश्च- श्री र्देवी र्देवता मताः।।

卐 ऋणरोगादि दारिद्र्य- पापक्षु.दपमृत्यवः। भयशोकमनस्तापा- नश्यन्तु मम सर्वदा।।

卐 श्री र्वर्चस्य मायुष्य मारोग्य-माविधा च्छोभमानं महीयते। धन.न्धान्यं पशुं बहुपुत्रलाभं- शतसँवत्सर न्दीर्घमायुः।।

卐 इति श्रीसूक्तम् ।। ।। इति परिशिष्टम्।।

卐 इति पञ्चमं मण्डलम्। विश्वेश्वराय नमः। ......

## ʋ षष्ठं मण्डलम्।।

6.01 त्वं ह्यग्न इति त्रयोदशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।

❀04.04.35 卐त्वं ह्यग्ने प्रथमो मनोता-ऽस्या धियो अभवो दस्म होता। त्वं सीँ वृष.न्नकृणो र्दुष्टरीतु- सहो विश्वस्मै सहसे सहध्यै।।

卐 अधा होता.न्यसीदो यजीया-निळ.स्पद इषय.न्नीड्य.स्सन्न्। तन्त्वा नरः प्रथम.न्देवयन्तो- महो राये चितयन्तो अनु ग्मन्न्।।

卐 वृतेव यन्तं बहुभि र्वसव्यै3(ऐ)-स्त्वे रयि.ञ्जागृवांसो अनु ग्मन्न्। रुशन्त.मग्नि.न्दर्शतं बृहन्तँ- वपावन्तँ विश्वहा दीदिवांसम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 पद.न्देवस्य नमसा व्यन्त-श्श्रवस्यव.श्श्रवं आप.न्नमृक्तम्। नामानि चिद्दधिरे यज्ञियानि- भद्रायान्ते रणयन्त सन्दृष्टौ।।

卐 त्वाँ वर्धन्ति क्षितयः पृथिव्या-न्त्वां रायं उभयासो जनानाम्। त्वन्त्राता तरणे चेत्यो भूः- पिता माता सदमि.न्मानुषाणाम्।।

❀04.04.36 卐सपर्येण्य.स्स .प्रियो विक्ष्व1(अ)ग्नि- होता मन्द्रो नि षसादा यजीयान्। तन्त्वा वय.न्दम आ दीदिवांस-मुप ज्ञुबाधो नमसा सदेम।।

卐 तन्त्वा वयं सुध्यो3(ओ) नव्य.मग्ने- सुम्नायव ईमहे देवयन्तः। त्वँ विशो अनयो दीद्यानो- दिवो अग्ने बृहता रोचनेन।।

卐 विशा.ङ्कविं विश्पतिं शश्वतीना-न्नितोशनँ वृषभ.ञ्चर्षणीनाम्। प्रेतीषणि.मिषयन्तं पावकं- राजन्त.मग्निँ यजतं रयीणाम्।।

卐 सो अग्न ईजे शशमे च मर्तो- यस्त आनट्त्समिधा हव्यदातिम्। य आहुतिं परि वेदा नमोभि- र्विश्वे त्स वामा दधते त्वोतः।।

卐 अस्मा उ ते महि महे विधेम- नमोभि रग्ने समिधोत हव्यैः। वेदी सूनो सहसो गीर्भि रुक्थै-रा ते भद्रायां सुमतौ यतेम।।

卐 आ यस्ततन्थ रोदसी वि भासा- श्रवोभि.श्श्र श्रवस्य1(अ) स्तरुत्रः। बृहद्भि र्वाजै.स्स्थविरेभि रस्मे- रेवद्भि रग्ने वितरँ वि भाहि।।

卐 नृवद्वसो सदमि.द्धेह्यस्मे- भूरि तोकाय तनयाय पश्वः। पूर्वी रिषो बृहती रारेअघा- अस्मे भद्रा सौश्रवसानि सन्तु।।

卐 पुरूण्यग्ने पुरुधा त्वाया- वसूनि राज.न्वसुता ते अश्याम्। पुरूणि हि त्वे पुरुवार स-न्त्यग्ने वसु विधते राजनि त्वे।। इति चतुर्थाध्याय स्समाप्तः।।

चतुर्थाष्टके पञ्चमाध्यायः। वर्गाः(1-30)

6.02 त्वं हिक्षैतवदित्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-रनुष्टुबन्त्या शक्वरी।।

❀04.05.01 卐त्वं हि क्षैतव.द्यशो-ऽग्ने मित्रो न पत्यसे। त्वँ विचर्षणे श्रवो- वसो~ पुष्टि.न्न पुष्यसि।।

卐 त्वां हि ष्मा चर्षणयो- यज्ञेभि र्गीर्भिरीळते। त्वाँ वाजी यात्यवृको- रज.स्तू विश्वचर्षणिः।।

卐 सजोष.स्त्वा दिवो नरो- यज्ञस्य केतु.मिन्धते। यद्ध स्य^ मानुषो जन-स्सुम्नायु र्जुह्वे अध्वरे।।

卐 ऋध.द्यस्ते सुदानवे- धिया मर्त.श्शशमते। ऊती ष^ बृहतो दिवो- द्विषो अंहो न तरति।।

卐 समिधा यस्त आहुति-न्निशितिं मर्त्यो नशत्। वयावन्तं स पुष्यति- क्षय.मग्ने शताऽऽयुषम्।।

❀04.05.02 卐त्वेषस्ते धूम^ ऋण्वति- दिवि षञ्छुक्र^ आततः। सूरो न हि द्युता त्व-ङ्कृपा पावक रोचसे।।

卐 अधा हि विक्ष्वीड्यो-ऽसि प्रियो नो अतिथिः। रण्वः पुरीव जूर्य-स्सूनु र्न त्रययाय्यः।।

卐 क्रत्वा हि द्रोणे अज्यसे-ऽग्ने वाजी न कृत्व्यः। परिज्मेव स्वधा गयो-ऽत्यो न ह्वार्य.श्शिशुः।।

卐 त्वन्त्या चिदच्युता-ऽग्ने पशु र्न यवसे। धामा ह य.त्ते अजर- वना वृश्चन्ति शिक्वसः।।

卐 वेषि ह्यध्वरीयता-मग्ने होता दमे विशाम्। समृधो विश्पते कृणु- जुषस्व हव्य.मङ्गिरः।।

卐 अच्छा नो मित्रमहो देव देवा-नग्ने वोच.स्सुमतिं रोदस्योः। वीहि स्वस्तिं सुक्षिति.न्दिवो नॄ-न्द्विषो अंहांसि दुरिता तरेम- ता तरेम तवावसा तरेम।।

☙ 6.03 अग्ने स क्षेषदित्यष्टर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।

❀04.05.03 卐अग्ने स क्षेष.दृतपा^ ऋतेजा^- उरु ज्योति र्नशते देवयुष्टे। यन्त्वं मित्रेण वरुण.स्सजोषा- देव पासि त्यजसा मर्त.मंहः।।

卐 ईजे यज्ञेभि.श्शशमे शमीभि-र् ऋधद्वारा.याग्नये ददाश। एवा चन तँ यशसा.मजुष्टि- र्नांहो मर्त.न्नशते न प्रदृप्तिः।।

卐 सूरो न यस्य दृशति रेरपा^- भीमा यदेति शुचत.स्त आ धीः। हेषस्वत.श्शुरुधो नाय.मक्तोः कुत्रा चि.द्रण्वो वसति वनेजाः।।

卐 तिग्म.श्चि.देम महि वर्पो अस्य- भस.दश्वो न यमसान^ आसा। विजेहमानः परशु र्न जिह्वा-न्द्रवि र्न द्रावयति दारु धक्षत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स इदस्तेव प्रति धा.दसिष्य-ञ्छिशीत तेजोऽयसो न धाराम्। चित्रध्रजति ररति यो अक्तो- र्वेर्न.द्रुषद्वा रघुपत्मजंहाः।।

❀04.05.04 卐स ईं रेभो न प्रति वस्त उस्रा-श्शोचिषा रारपीति मित्रमहाः। नक्तं य ईमरुषो यो दिवा नृ-नमर्त्यो अरुषो यो दिवा नृन्।।

卐 दिवो न यस्य विधतो नवीनो-द्वृषा रुक्ष ओषधीषु नूनोत्। घृणा न यो ध्रजसा पत्मना य-न्नारोदसी वसुना दं सुपत्नी~।।

卐 धायोभि र्वा यो युज्येभि रर्कै- र्विद्यु.न्न दविद्यो.त्स्वेभि.श्शुष्मैः। शर्धो वा यो मरुता.न्ततक्ष ऋभु र्न त्वेषो रभसानो अद्यौत्।।

6.04 यथा होतरित्यष्टर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।

❀04.05.05 卐यथा होत र्मनुषो देवताता- यज्ञेभि स्सूनो~ सहसो यजासि। एवा नो अद्य समना समाना-नुश.न्नग्न उशतो यक्षि देवान्।।

卐 स नो विभावा चक्षणि र्न वस्तो- रग्नि र्वन्दारु वेद्य श्चनो धात्। विश्वाऽऽयु र्यो अमृतो मर्त्ये-षूषर्भु.द्भूदतिथि र्जातवेदाः।।

卐 द्यावो न यस्य पनय.न्त्यभ्वं- भासांसि वस्ते सूर्यो न शुक्रः। वि य इनो.त्यजरः पावको-ऽश्नस्य चिच्छिश्नथ.त्पूर्व्याणि।।

卐 वद्मा हि सूनो~ अस्यद्मसद्वा- चक्रे अग्नि र्जनुषाऽज्मान्नम्। स त्व.न्न ऊर्जसन ऊर्ज.न्धा- राजेव जे.रवृके क्षेष्यन्तः।।

卐 नितिक्ति यो वारण.मन्न.मत्ति- वायु.र्न राष्ट्र्य.त्येत्यक्तून्। तुर्याम यस्त आदिशा.मराती- रत्यो न ह्रुतः पततः परिह्रुत्।।

❀04.05.06 卐आ सूर्यो न भानुमद्भि रर्कै- रग्ने ततन्थ रोदसी वि भासा। चित्रो नय.त्परि तमां.स्यक्त-श्शोचिषा पत्म.न्नौशिजो न दीयन्न्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 त्वां हि मन्द्रतम.मर्कशोकै- र्ववृमहे महि न.श्श्रो.ष्यग्ने। इन्द्र.न्न त्वा शवसा देवता- वायुं पृणन्ति राधसा नृतमाः।।

卐 नू नो अग्नेऽवृकेभि.स्स्वस्ति- वेर्षि रायः पथिभिः पर्ष्यंहः। ता सूरिभ्यो गृणते रासि सुम्नं- मदेम शतहिमा.स्सुवीराः।।

6.05 हुवे व इति सप्तर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।

❀04.05.07 卐हुवे व.स्सूनुं सहसो युवान-मद्रोघवाचं मतिभि र्यविष्ठम्। य इन्वति द्रविणानि प्रचेता- विश्ववाराणि पुरुवारो अध्रुक्।।

卐 त्वे वसूनि पुर्वणीक होत- र्दोषा वस्तो रेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मि-न्त्सं सौभगानि दधिरे पावके।।

卐 त्वँ विक्षु प्रदिव.स्सीद आसु- क्रत्वा रथी रभवो वार्याणाम्। अत इनोषि विधते चिकित्वो- व्यानुष.ग्जातवेदो वसूनि।।

卐 यो न.स्सनुत्यो अभिदास.दग्ने- यो अन्तरो मित्रमहो वनुष्यात्। तमजरेभि र्वृषभि.स्तव स्वै-स्तपा तपिष्ठ तपसा तपस्वान्।।

卐 य.स्ते यज्ञेन समिधा य उक्थै- रर्केभि.स्सूनो सहसो ददाशत्। स मर्त्ये.ष्वमृत प्रचेता- राया द्युम्नेन श्रवसा वि भाति।।

卐 स तत्कृधीषित.स्तूय.मग्ने- स्पृधो बाधस्व सहसा सहस्वान्। यच्छस्यसे द्युभि रक्तो वचोभि-स्तज्जुषस्व जरितु र्घोषि मन्म।।

卐 अश्याम त.ङ्काम.मग्ने तवोती- अश्याम रयिं रयिव.स्सुवीरम्। अश्याम वाज.मभि वाजयन्तो- ऽश्याम द्युम्न.मजराजर.न्ते।।

6.06 प्र नव्यसेति सप्तर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टप्।।

❀04.05.08 卐प्र नव्यसा सहस.स्सूनु.मच्छा-यज्ञेन गातु.मव इच्छमानः। वृश्चद्वन.ङ्कृष्णयामं रुशन्तँ- वीती होतार.न्दिव्य.ञ्जिगाति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 स श्चितान.स्तन्यतू रोचनस्था^- अजरेभि र्नानदद्भि र्यविष्ठः। यः पावकः पुरुतमः पुरूणि- पृथू .न्यग्नि रनुयाति भर्वन्न्।।

卐 वि ते विष्व.ग्वातजूतासो अग्ने- भामास.श्शुचे शुचय श्चरन्ति। तुविम्रक्षासो दिव्या नवग्वा- वना वनन्ति धृषता रुजन्तः।।

卐 ये ते शुक्रास.श्शुचय.श्शुचिष्मः-≈ क्षाँ वपन्ति विषितासो अश्वाः। अध भ्रम.स्त उर्विया वि भाति- यातयमानो अधि सानु पृश्नेः।।

卐 अध जिह्वा पापतीति प्र वृष्णो- गोषुयुधो नाशनि.स्सृजाना। शूरस्येव प्रसितिः ≈ क्षाति रग्ने- र्दु.र्वर्तु र्भीमो दयते वनानि।।

卐 आ भानुना पार्थिवानि ज्रयांसि- मह.स्तोदस्य धृषता ततन्थ। स बाधस्वाप भया सहोभि-स्स्पृधो वनुष्य.न्वनुषो नि जूर्व।।

卐 स चित्र चित्र.ञ्चितयन्त.मस्मे- चित्रक्षत्र चित्रतमँ वयोधाम्। चन्द्रं रयिं पुरुवीरं बृहन्त-ञ्चन्द्र चन्द्राभि गृणते युवस्व।।

6.07 मूर्धानमिति सप्तर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- वैश्वानरोऽग्नि-स्त्रिष्टु-बन्त्ये द्वे जगत्यौ।।

❀04.05.09 卐मूर्धान.न्दिवो अरतिं पृथिव्या^- वैश्वानर.मृत आ जात.मग्निम्। कविं सम्राज .मतिथि.ञ्जनाना-मास.न्ना पात्र.ञ्जनयन्त देवाः।।

卐 नाभिँ यज्ञानां सदनं रयीणां- महा माहाव.मभि स.न्नवन्त। वैश्वानरं रथ्य.मध्वराणाँ- यज्ञस्य केतु.ञ्जनयन्त देवाः।।

卐 त्वद्विप्रो जायते वाज्यग्ने- त्वद्वीरासो अभिमातिषाहः। वैश्वानर त्वमस्मासु धेहि- वसूनि राज .न्त्स्पृहयाय्याणि।।

卐 त्वाँ विश्वे अमृत जायमानं- शिशु.न्न देवा^ अभि स.न्नवन्ते। तव क्रतुभि रमृतत्व.माय-न्वैश्वानर यत्पित्रो रदीदेः।।

卐 वैश्वानर तव तानि व्रतानि- महा.न्यग्ने नकिरा दधर्ष। यज्जायमानः पित्रो रुपस्थे-ऽविन्दः केतुँ वयुने.ष्वह्नाम्।।

卐 वैश्वानरस्य विमितानि चक्षसा- सानूनि दिवो अमृतस्य केतुना। तस्येदु विश्वा भुवनाऽधि मूर्धनि- वया^इव रुरुहु.स्सप्त विस्रुहः।।

卐 वि यो रजां.स्यमिमीत सुक्रतु- र्वैश्वानरो वि दिवो रोचना कविः। परि यो विश्वा भुवनानि पप्रथे- ऽदब्धो गोपा^ अमृतस्य रक्षिता।।

☫ 6.08 पृक्षस्येति सप्तर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- वैश्वानरोऽग्नि-र्जग-त्यन्त्या त्रिष्टुप्।।

❀04.05.10 卐पृक्षस्य वृष्णो अरुषस्य नू सहः- प्र नु वोचँ विदथा जातवेदसः। वैश्वानराय मति र्नव्यसी शुचि-स्सोम^इव पवते चारु रग्नये।।

卐 स जायमानः परमे व्योमनि- व्रता.न्यग्नि र्व्रतपा^ अरक्षत। व्य1(अ)न्तरिक्ष.ममिमीत सुक्रतु- र्वैश्वानरो महिना नाक.मस्पृशत्।।

卐 व्यस्तभ्ना.द्रोदसी मित्रो अद्भुतो-ऽन्त र्वाव.दकृणो.ज्ज्योतिषा तमः। वि चर्मणीव~ धिषणे~ अवर्तय- द्वैश्वानरो विश्व.मधत्त वृष्ण्यम्।।

卐 अपा.मुपस्थे महिषा^ अगृभ्णत- विशो राजान.मुप तस्थु.र् ऋग्मियम्। आ दूतो अग्नि.मभर.द्विवस्वतो- वैश्वानरं मातरिश्वा परावतः।।

卐 युगेयुगे विदथ्य.ङ्गृणद्भ्यो-ऽग्ने रयिँ यशस.न्धेहि नव्यसीम्। पव्येव राज.न्नघशंस.मजर- नीचा नि वृश्च वनिन.न्न तेजसा।।

卐 अस्माक.मग्ने मघवत्सु धार-यानामि क्षत्र.मजरं सुवीर्यम्। वय.ञ्जयेम शतिनं सहस्रिणँ- वैश्वानर वाज .मग्ने तवोतिभिः।।

卐 अदब्धेभि.स्तव गोपाभि रिष्टे-ऽस्माकं पाहि त्रिषधस्थ सूरीन्। रक्षा च नो ददुषां शर्धो अग्ने- वैश्वानर प्र च तारी.स्स्तवानः।।

☫ 6.09 अहश्च कृष्णमिति सप्तर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- वैश्वानरोऽग्नि-स्त्रिष्टुप्।।

❀04.05.11 卐अह.श्च कृष्ण.मह रर्जुन.ञ्च- वि वर्तेते~ रजसी~ वेद्याभिः। वैश्वानरो जायमानो न राजा-ऽवातिर.ज्ज्योतिषाऽग्नि.स्तमांसि।।

卐 नाहन्तन्तुन्न वि जाना.म्योतु-न्न यँ वयन्ति समरेऽतमानाः। कस्य स्वि.त्पुत्र^ इह वक्त्वानि- परो वदा.त्यवरेण पित्रा।।

卐 स इत्तन्तुं स वि जाना.त्योतुं- स वक्त्वा.न्यृतुथा वदाति। य^ ई.ञ्चिकेत.दमृतस्य गोपा^- अव.श्चर न्परो अन्येन पश्यन्न्।।

卐 अयं होता प्रथमᳵ पश्य.तेम-मिद.ञ्ज्योति रमृतं मर्त्येषु। अयं स जज्ञे ध्रुव^ आ निषत्तो-ऽमर्त्य .स्तन्वा3(आ) वर्धमानः।।

卐 ध्रुव.ञ्ज्योति र्निहित.न्दृशये कं- मनो जविष्ठं पतय.त्स्वन्तः~। विश्वे देवा.स्समनस.स्सकेता- एक.ङ्क्रतु .मभि वि यन्ति साधु।।

卐 वि मे कर्णा पतयतो वि चक्षु-र्वी3(ई)दञ्ज्योति र्हृदय आहितँ यत्। वि मे मन.श्चरति दूरआधीᳵ- किं स्वि.द्वक्ष्यामि किमु नूँ मनिष्ये।।

卐 विश्वे देवा^ अनमस्य.न्भियाना-स्त्वा.मग्ने तमसि तस्थिवांसम्। वैश्वानरोऽवतूतये नो- ऽमर्त्योऽवतूतये नः।।

6.10 पुरो व इति सप्तर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टु-बन्त्या द्विपदाविराट्।।

❀04.05.12 卐पुरो वो मन्द्र.न्दिव्यं सुवृक्तिं- प्रयति यज्ञे अग्नि.मध्वरे दधिध्वम्। पुर^ उक्थेभि.स्स हि नो विभावा- स्वध्वरा करति जातवेदाः।।

卐 तमु~ द्युमᳵ पुर्वणीक होत- रग्ने अग्निभि र्मनुष^ इधानः। स्तोमँ यमस्मै ममतेव शूष-ङ्घृत.न्न शुचि मतयᳵ पवन्ते।।

卐 पीपाय स श्रवसा मर्त्येषु- यो अग्नये ददाश विप्र^ उक्थैः। चित्राभि.स्तमूतिभि श्चित्रशोचि- र्व्रजस्य साता गोमतो दधाति।।

卐 आ यः प्रप्रौ जायमान उर्वी- दूरेदृशा भासा कृष्णाध्वा। अध बहु चित्तम ऊर्म्याया-स्तिर.श्शोचिषा ददृशे पावकः।।

卐 नू न.श्चित्रं पुरुवाजाभि रूती- अग्ने रयिं मघवद्ध्य.श्च धेहि। ये राधसा श्रवसा चात्यन्या-न्त्सुवीर्येभि.श्चाभि सन्ति जनान्।।

卐 इमँ यज्ञ.ञ्चनो धा अग्न उशन्यन्त आसानो जुहुते हविष्मान्। भरद्वाजेषु दधिषे सुवृक्ति-मवी र्वाजस्य गध्यस्य सातौ।।

卐 वि द्वेषांसीनुहि वर्धयेळां- मदेम शतहिमा.स्सुवीराः।।

6.11 यजस्व होतरिति षड्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।

❀04.05.13 卐यजस्व होत रिषितो यजीया-नग्ने बाधो मरुता.न्न प्रयुक्ति। आ नो मित्रावरुणा नासत्या- द्यावा होत्राय पृथिवी ववृत्याः।।

卐 त्वं होता मन्द्रतमो नो अध्रु-गन्त र्देवो विदथा मर्त्येषु। पावकया जुह्वा3(आ) वह्नि रासा-ऽग्ने यजस्व तन्व1(अ)न्तव स्वाम्।।

卐 धन्या चि.द्धि त्वे धिषणा वष्टि- प्र देवा.न्जन्म गृणते यजध्यै। वेपिष्ठो अङ्गिरसाँ यद्ध विप्रो- मधु च्छन्दो भनति रेभ इष्टौ।।

卐 अदिद्युत.त्स्वपाको विभावा-ऽग्ने यजस्व रोदसी उरूची~। आयु.न्न य.न्नमसा रातहव्या- अञ्जन्ति सुप्रयसं पञ्च जनाः।।

卐 वृञ्जे ह य.न्नमसा बर्हिरग्ना-वयामि स्त्रु.ग्घृतवती सुवृक्तिः। अम्यक्षि सद्म सदने पृथिव्या- अश्रायि यज्ञ .स्सूर्ये न चक्षुः।।

卐 दशस्या नः पुर्वणीक होत- र्देवेभि रग्ने अग्निभि रिधानः। राय.स्सूनो~ सहसो वावसाना-अति स्त्रसेम वृजन.न्नांहः।।

6.12 मध्ये होतेति षड्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

❀04.05.14 卐मध्ये होता दुरोणे बर्हिषो रा-ळग्नि.स्तोदस्य रोदसी यजध्यै। अयं स सूनु.स्सहस^ ऋतावा- दूरा.त्सूर्यो न शोचिषा ततान।।

卐 आ यस्मि.न्त्वे स्वपाके यजत्र- यक्ष.द्राज.न्त्सर्वतातेव नु द्यौः। त्रिषधस्थ.स्ततरुषो न जंहो- हव्या मघानि मानुषा यजध्यै।।

卐 तेजिष्ठा यस्यारति र्वनेरा-ट्तोदो अध्व.न्न वृधसानो अद्यौत्। अद्रोघो न द्रविता चेतति त्म-न्नमर्त्योऽवर्त्र^ ओषधीषु।।

卐 सॅाऽस्माकेभि रेतरी न शूषै- रग्निष्ष्टवे दम आ जातवेदाः। द्र्वन्नो वन्व.न्क्रत्वा नार्वोस्रः- पितेव जारयायि यज्ञैः।।

卐 अध स्मास्य पनयन्ति भासो- वृथा यत्तक्ष.दनुयाति पृथ्वीम्। सद्यो य.स्स्पन्द्रो विषितो धवीया-नृणो न तायु रति धन्वा राट्।।

卐 स त्व.न्नो अर्व.न्निदाया- विश्वेभि रग्ने अग्निभि रिधानः। वेषि रायो वि यासि दुच्छुना- मदेम शतहिमा .स्सुवीराः।।

6.13 त्वद्विश्वेति षड्ऋचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-स्त्रिष्टुप्।।

❀04.05.15 卐त्वद्विश्वा सुभग सौभगा-न्यग्ने वि यन्ति वनिनो न वयाः। श्रुष्टी रयि र्वाजो वृत्रतूर्ये- दिवो वृष्टि रीड्यो रीति रपाम्।।

卐 त्वं भगो न^ आ हि रत्न.मिषे- परिज्मेव क्षयसि दस्मवर्चाः। अग्ने मित्रो न बृहत^ ऋत-स्यासि क्षत्ता वामस्य देव भूरेः।।

卐 स सत्पति.श्शवसा हन्ति वृत्र-मग्ने विप्रो वि पणे र्भर्ति वाजम्। य.न्त्वं प्रचेत^ ऋतजात राया- सजोषा नप्त्राऽपां हिनोषि।।

卐 य.स्ते सूनो~ सहसो गीर्भि रुक्थै- र्यज्ञै र्मर्तो निशितिं वेद्यानट्। विश्वं स देव प्रति वार.मग्ने- धत्ते धान्य1(अं) पत्यते वसव्यैः।।

卐 ता नृभ्य^ आ सौश्रवसा सुवीरा-ऽग्ने सूनो~ सहसः पुष्यसे धाः। कृणोषि यच्छवसा भूरि पश्वो- वयो वृकायारये जसुरये।।

卐 वद्मा सूनो~ सहसो नो विहाया^-अग्ने तोक.न्तनयँ वाजि नो दाः। विश्वाभि र्गीर्भि रभि पूर्ति.मश्यां-मदेम शतहिमा.स्सुवीराः।।

☸ 6.14 अग्ना य इति षड्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-रनुष्टु-बन्त्या शक्करी।।

❀04.05.16 卐अग्ना यो मर्त्यो दुवो- धिय.ञ्जुजोष धीतिभिः। भस.न्नुष प्र पूर्व्य ^-इषँ वुरीतावसे।।

卐 अग्नि रिद्धि प्रचेता^- अग्नि र्वेध.स्तम^ऋषिः। अग्निं होतार.मीळते- यज्ञेषु मनुषो विशः।।

卐 नाना ह्य1(अ)ग्नेऽवसे- स्पर्धन्ते रायो अर्यः। तूर्वन्तो दस्यु.मायवो- व्रतै.स्सीक्षन्तो अव्रतम्।।

卐 अग्नि रप्सा मृतीषहँ -वीर.न्ददाति सत्पतिम्। यस्य त्रसन्ति शवस-स्स.ञ्चक्षि शत्रवो भिया।।

卐 अग्नि.र्हि विद्मना निदो- देवो मर्त.मुरुष्यति। सहावा यस्यावृतो- रयि र्वाजे.ष्ववृतः।।

卐 अच्छा नो मित्रमहो देव देवा-नग्ने वोच.स्सुमतिं रोदस्योः। वीहि स्वस्तिं सुक्षिति.न्दिवो नृ-न्द्विषो अंहांसि दुरिता तरेम- ता तरेम तवावसा तरेम।।

☸ 6.15 इममू ष्वित्येकोनविंशत्यृचस्य सूक्तस्य, आङ्गिरसो वीतहव्योऽ(भरद्वाजो वा) ग्नि-र्जगती-तृतीया पञ्चदश्यौ शक्कर्यौ- षष्ठ्यतिशक्करी- सप्तदश्यनुष्टुप्- अष्टादशी बृहती- दशम्याद्याः पञ्चषोडश्येकोनविंशी च त्रिष्टुभः।।

❀04.05.17 卐इममूषु वो अतिथि.मुषर्बुधँ- विश्वासाँ विशां पति.मृञ्जसे गिरा। वेती.द्दिवो जनुषा कच्चिदा शुचि- र्ज्यो.क्चिदत्ति गर्भो यदच्युतम्।।

卐 मित्र.न्न यं सुधितं भृगवो दधु- र्वनस्पता.वीड्य.मूर्ध्वशोचिषम्। स त्वं सुप्रीतो वीतहव्ये अद्भुत-प्रशस्तिभि र्महयसे दिवेदिवे।।

卐 स त्व.न्दक्ष.स्यावृको वृधो भू-रर्यः पर.स्यान्तरस्य तरुषः। राय.स्सूनो~ सहसो मर्त्येष्वा- छर्दि र्यच्छ वीतहव्याय सप्रथो- भरद्वाजाय सप्रथः।।

Sri Sachchidananda Avadhoota Datta Peetham Mysore

卐 द्युतानँ वो अर्तिथिं स्वर्णर-मग्निं होतारं मनुष.स्स्वध्वरम्। विप्र.न्न द्युक्षवचसं सुवृक्तिभि-र्हव्यवाह.मरति .न्देव.मृञ्जसे।।

卐 पावकया य.श्चितयन्त्या कृपा- क्षाम.न्रुरुच उषसो न भानुना। तूर्व.न्न याम.न्नेतशस्य नू रण- आ यो घृणे न ततृषाणो अजरः।।

❀04.05.18 卐अग्नि.मग्निँ व.स्समिधा दुवस्यत- प्रियंप्रियँ वो अतिथि.ङ्गृणीषणि। उप वो गीर्भि रमृतँ विवासत- देवो देवेषु वनते हि वार्य-न्देवो देवेषु वनते हि नो दुवः।।

卐 समिद्ध.मग्निं समिधा गिरा गृणे- शुचिं पावकं पुरो अध्वरे ध्रुवम्। विप्रं होतारं पुरुवार.मद्रुह-ङ्कविं सुम्नै रीमहे जातवेदसम्।।

卐 त्वान्दूत.मग्ने अमृतँ युगेयुगे- हव्यवाह.न्दधिरे पायु.मीड्यम्। देवास.श्च मर्तास.श्च जागृविं- विभुं विश्पति.न्नमसा नि षेदिरे।।

卐 विभूष.न्नग्न उभयाँ अनु व्रता- दूतो देवानां रजसी~ समीयसे। यत्ते धीतिं सुमति.मावृणीमहे-ऽध स्मा न.स्त्रिवरूथ.श्शिवो भव।।

卐 तं सुप्रतीकं सुदृशं स्वञ्च-मविद्वांसो विदुष्टरं सपेम। स ^यक्ष.द्विश्वा वयुनानि विद्वा-न्प्र हव्य.मग्नि रमृतेषु वोचत्।।

❀04.05.19 卐तमग्ने पास्युत तं पिपर्षि- यस्त आन.ट्कवये शूर धीतिम्। यज्ञस्य वा निशितिं वोदितिं वा- तमि.त्पृणक्षि शव.सोत राया।।

卐 त्वमग्ने वनुष्यतो नि पाहि- त्वमु न.स्सहसाव.न्नवद्यात्। सन्त्वा ध्वस्म.न्व दभ्येतु पाथ-स्सं रयि .स्स्पृहयाय्य.स्सहस्री।।

卐 अग्नि र्होता गृहपति.स्स राजा- विश्वा वेद जनिमा जातवेदाः। देवाना.मुत यो मर्त्यानाँ- यजिष्ठ.स्स प्र यजता.मृतावा।।

卐 अग्ने यदद्य विशो अध्वरस्य होतः- पावकशोचे वेष्ट्वं हि यज्वा। ऋता यजासि महिना वि यद्भू- र्हव्या वह यविष्ठ या ते अद्य।।

卐 अभि प्रयांसि सुधितानि हि ख्यो- नि त्वा दधीत रोदसी यजध्यै। अवा नो मघव.न्वाजसाता-वग्ने विश्वानि दुरिता तरेम- ता तरेम तवावसा तरेम।।

❀04.05.20 卐अग्ने विश्वेभि स्स्वनीक देवै- रूर्णावन्तं प्रथम.स्सीद योनिम्। कुलायिन.ङ्घृतवन्तं सवित्रे- यज्ञ.न्नय यजमानाय साधु।।

卐 इममु त्य.मथर्वव-दग्निं मन्थन्ति वेधसः। यमङ्कूयन्त.माऽनय-न्नमूरं श्याव्याभ्यः।।

卐 जनिष्वा देववीतये- सर्वताता स्वस्तये। आ देवा.न्व.क्ष्यमृता॰ ऋतावृधो- यज्ञ.न्देवेषु पिस्पृशः।।

卐 वयमु त्वा गृहपते जनाना-मग्ने अकर्म समिधा बृहन्तम्। अस्थूरि नो गार्हपत्यानि सन्तु- तिग्मेन न स्तेजसा सं शिशाधि।।

🏺 6.16 त्वमग्ने यज्ञानामित्यष्टाचत्वारिंशदृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽग्नि-र्गायत्री-आद्या षष्ठ्यौ वर्धमाने-सप्तविंश्यनुष्टुप्- षट्चत्वारिंशी त्रिष्टुप्-अन्त्ये द्वे अनुष्टुभौ।।

❀04.05.21 卐त्वमग्ने यज्ञानां- होता विश्वेषां हितः। देवेभि र्मानुषे जने।।

卐 स नो मन्द्राभि रध्वरे- जिह्वाभि र्यजा महः। आ देवा.न्वक्षि यक्षि च।।

卐 वेत्था हि वेधो अध्वनः- पथ.श्च देवा.ञ्जसा। अग्ने यज्ञेषु सुक्रतो~।।

卐 त्वामीळे अध द्विता- भरतो वाजिभि.श्शुनम्। ईजे यज्ञेषु यज्ञियम्।।

卐 त्वमिमा वार्या पुरु- दिवोदासाय सुन्वते। भरद्वाजाय दाशुषे।।

❀04.05.22 卐त्वन्दूतो अमर्त्य^- आ वहा दैव्य.ञ्जनम्। शृण्व.न्विप्रस्य सुष्टुतिम्।।

卐 त्वामग्ने स्वाध्यो3(ओ)- मर्तासो देववीतये। यज्ञेषु देव.मीळते।।

卐 तव प्र यक्षि सन्दृश-मुत क्रतुं सुदानवः। विश्वे जुषन्त कामिनः।।

卐 त्वं होता मनुर्हितो- वह्निरासा विदुष्टरः। अग्ने यक्षि दिवो विशः।।

卐 अग्न आ याहि वीतये- गृणानो हव्यदातये। नि होता सत्सि बर्हिषि।।

❀04.05.23 卐तन्त्वा समिद्भि रङ्गिरो- घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य।।

卐 स नः पृथु श्रवाय्य-मच्छा देव विवाससि। बृह.दग्ने सुवीर्यम्।।

卐 त्वामग्ने पुष्करा द-ध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः।।

卐 तमु त्वा दध्यङ्ङृषिः- पुत्र ईधे अथर्वणः। वृत्रहणं पुरन्दरम्।।

卐 तमु त्वा पाथ्यो वृषा- समीधे दस्युहन्तमम्। धनञ्जयं रणेरणे।।

❀04.05.24 卐एह्यू षु ब्रवाणि ते-ऽग्न इत्थेतरा गिरः। एभि वर्धास इन्दुभिः।।

卐 यत्र क्व च ते मनो- दक्ष.न्दधस उत्तरम्। तत्रा सदः कृणवसे।।

卐 नहि ते पूर्त.मक्षिप-द्भुव.न्नेमानाँ वसो~। अथा दुवो वनवसे।।

卐 आऽग्नि रगामि भारतो- वृत्रहा पुरुचेतनः। दिवोदासस्य सत्पतिः।।

卐 स हि विश्वाऽति पार्थिवा- रयि.न्दाश.न्महित्वना। वन्व.न्नवातो अस्तृतः।।

❀04.05.25 卐स प्रत्नव.न्नवीयसा-ऽग्ने द्युम्नेन सँयता। बृह.त्ततन्थ भानुना।।

卐 प्र व.स्सखायो अग्नये- स्तोमँ यज्ञ.ञ्च धृष्णुया। अर्च गाय च वेधसे।।

卐 स हि यो मानुषा युगा- सीद.द्धोता कविक्रतुः। दूत.श्च हव्यवाहनः।।

卐 ता राजाना शुचिव्रता-ऽऽदित्या.न्मारुत.ङ्गणम्। वसो~ यक्षीह रोदसी।।

卐 वस्वी ते अग्ने सन्दृष्टि- रिषयते मर्त्याय। ऊर्जो नपा.दमृतस्य।।

❀04.05.26 卐क्रत्वा दाअस्तु श्रेष्ठो-ऽद्य त्वा वन्व.न्त्सुरेक्णाः। मर्त आनाश सुवृक्तिम्।।

卐 ते ते अग्ने त्वोता-इषयन्तो विश्व.मायुः। तरन्तो अर्यो अराती- र्वन्वन्तो अर्यो अरातीः।।

卐 अग्नि.स्तिग्मेन शोचिषा- यास.द्विश्व.न्न्य1(अ)त्रिणम्। अग्निर्नो वनते रयिम्।।

卐 सुवीरं रयिमा भर- जातवेदो विचर्षणे। जहि रक्षांसि सुक्रतो~।।

卐 त्वन्नः पाह्यंहसो- जातवेदो अघायतः। रक्षा णो ब्रह्मण.स्कवे।।

❀04.05.27 卐यो नो अग्ने दुरेव आ- मर्तो वधाय दाशति। तस्मा.न्नः पाह्यंहसः।।

卐 त्वन्त.न्देव जिह्वया- परि बाधस्व दुष्कृतम्। मर्तो यो नो जिघांसति।।

卐 भरद्वाजाय सप्रथ-श्शर्म यच्छ सहन्त्य। अग्ने वरेण्यँ वसु।।

卐 अग्नि र्वृत्राणि जङ्घन-द्द्रविणस्यु र्विपन्यया। समिद्ध.श्शुक्र आहुतः।।

卐 गर्भे मातुः पितु.ष्पिता- विदिद्युतानो अक्षरे। सीद.न्नृतस्य योनिमा।।

❀04.05.28 卐ब्रह्म प्रजावदा भर- जातवेदो विचर्षणे। अग्ने यद्दीदय.द्दिवि।।

卐 उप त्वा रण्वसन्दृशं- प्रयस्वन्त.स्सह.स्कृत। अग्ने ससृज्महे गिरः।।

卐 उप च्छाया.मिव घृणे- रगन्म शर्म ते वयम्। अग्ने हिरण्यसन्दृशः।।

卐 य^ उग्रइव शर्यहा- तिग्मशृङ्गो न वंसगः। अग्ने पुरो रुरोजिथ।।

卐 आ यं हस्ते न खादिनं- शिशु.ञ्जात.न्न बिभ्रति। विशा.मग्निं स्वध्वरम्।।

❀04.05.29 卐प्र देव.न्देववीतये- भरता वसुवित्तमम्। आ स्वे योनौ नि षीदतु।।

卐 आ जात.ञ्जातवेदसि- प्रियं शिशी.तातिथिम्। स्योन आ गृहपतिम्।।

卐 अग्ने युक्ष्वा हि ये त-वाश्वासो देव साधवः। अरँ वहन्ति मन्यवे।।

卐 अच्छा नो याह्या व-हाभि प्रयांसि वीतये। आ देवा.न्त्सोमपीतये।।

卐 उदग्ने भारत द्युम-दजस्रेण दविद्युतत्। शोचा वि भा.ह्यजर।।

❀04.05.30 卐वीती यो देवं मर्तो दुवस्ये-दग्निमीळी.ताध्वरे हविष्मान्। होतारं सत्ययजं रोदस्यो-रुत्तानहस्तो नमसाऽविवासेत्।।

卐 आ ते अग्न ऋचा हवि- र्हृदा तष्टं भरामसि। ते ते भव.न्तूक्षण^ ऋषभासो वशा^ उत।।

卐 अग्नि.न्देवासो अग्रिय-मिन्धते वृत्रह.न्तमम्। येना वसू.न्याभृता- तृळ्हा रक्षांसि वाजिना।। ।। इति पञ्चमाध्याय स्समाप्तः।।

## चतुर्थाष्टके षष्ठाध्यायः। (वर्गाः 1-25)

6.17 पिबा सोममिति पञ्चदशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र स्त्रिष्टु-बन्त्या द्विपदात्रिष्टुप्।।

❀04.06.01 पिबा सोम.मभि यमुग्र तर्द- ऊर्व.ङ्गव्यं महि गृणान^ इन्द्र। वि यो धृष्णो ~वधिषो वज्रहस्त -विश्वा वृत्र.ममित्रिया शवोभिः।।

卐 स ईं पाहि य^ ऋजीषी तरुत्रो- य.श्शिप्रवा.न्वृषभो यो मतीनाम्। यो गोत्रभि.द्वज्रभृ.द्यो हरिष्ठा-स्स इन्द्र चित्रा^ अभि तृन्धि वाजान्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 एवा पाहि प्रत्नथा मन्दतु त्वा- श्रुधि ब्रह्म वावृध.स्वोत गीर्भिः। आवि.स्सूर्य.ङ्कृणुहि पीपिहीषो- जहि शत्रूꣳ रभि गा^ इन्द्र तृन्धि।।

卐 ते त्वा मदा^ बृह.दिन्द्र स्वधाव^- इमे पीता^ उक्षयन्त द्युमन्तम्। महा.मनून.न्तवसँ विभूतिं- मत्सरासो जर्हृषन्त प्रसाहम्।।

卐 येभि स्सूर्य.मुषसं मन्दसानो-ऽवासयोऽपे दृꣳहानि दर्द्रत्। महा.मद्रिं परि गा^ इन्द्र सन्त-न्नुत्था^ अच्युतं सदस.स्परि स्वात्।।

❀04.06.02 卐तव क्रत्वा तव त.द्दंसनाभि- रामासु पक्वं शच्या नि दीधः~। और्णो र्दुर^ उस्रियाभ्यो वि दृꣳहो-दूर्वाद्गा^ असृजो अङ्गिरस्वान्।।

卐 पप्राथ क्षां महि दंसो व्यु1(उ)र्वी-मुप द्या.मृष्वो बृह.दिन्द्र स्तभायः। अधारयो रोदसी देवपुत्रे~- प्रत्ने ~मातरा यह्वी~ ऋतस्य।।

卐 अध त्वा विश्वे पुर^ इन्द्र देवा^-एक.न्तवस.न्दधिरे भराय। अदेवो यद.भ्यौहिष्ट देवा-न्त्स्वर्षाता वृणत इन्द्र मत्र।।

卐 अध द्यौश्चि.त्ते अप सा नु वज्रा-द्द्विताऽनम.द्भियसा स्वस्य मन्योः। अहिं यदिन्द्रो अभ्योहसान-न्नि चि.द्विश्वायु.श्शयथे जघान।।

卐 अध त्वष्टा ते मह^ उग्र वज्रं- सहस्रभृष्टिं ववृत च्छताश्रिम्। निकाम.मरमणसँ येन नवन्त- महिं संपिण .गृजीषिन्न्।।

❀04.06.03 卐वर्धान्यँ विश्वे मरुत.स्सजोषा꞉- पच.च्छतं महिषाꣳ इन्द्र तुभ्यम्। पूषा विष्णु.स्त्रीणि सरांसि धाव-न्वृत्रहणं मदिर.मंशु मस्मै।।

卐 आ क्षोदो महि वृत.न्नदीनां- परिष्ठित.मसृज^ ऊर्मि.मपाम्। तासा.मनु प्रवत^ इन्द्र पन्थां -प्रार्दयो नीची रपस.स्समुद्रम्।।

卐 एवा ता विश्वा चकृवांस.मिन्द्रं -महा.मुग्र.मजुर्यं सहोदाम्। सुवीर.न्त्वा स्वायुधं सुवज्र-मा ब्रह्म नव्य मवसे ववृत्यात्।।

卐 स नो वाजाय श्रवस इषे च राये धेहि द्युमत^ इन्द्र विप्रान्। भरद्वाजे नृवत^ इन्द्र सूरी.न्दिवि च स्मैधि पार्ये न^ इन्द्र।।

卐 अया वाज.न्देवहितं सनेम- मदेम शतहिमा.स्सुवीराः।।

6.18 तमु ष्टुहीति पञ्चदशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र-स्त्रिष्टुप्।।

❀04.06.04 卐तमु॰ष्टुहि यो अभिभूत्योजा^- वन्वन्नवातः४ पुरुहूत^ इन्द्रः। अषा॰ळ्ह.मुग्रं सहमान.माभि- र्गीर्भि र्वर्ध वृषभ.ञ्चर्षणीनाम्।।

卐 स युध्म.स्सत्वा खजकृ.त्समद्वा- तुविम्रक्षो नदनुमा९ ऋजीषी। बृहद्रेणु श्च्यवनो मानुषीणा-मेकः४ कृष्टीना.मभव.त्सहावा।।

卐 त्वं ह नु त्य.ददमायो दस्यू९- रेकः४ कृष्टी रवनो रार्याय। अस्ति स्वि.न्नु वीर्य1(अ)न्तत्त इन्द्र- न स्विदस्ति तदृतुथा वि वोचः।।

卐 सदिद्धि ते तुविजातस्य मन्ये- सह.स्सहिष्ठ तुरत.स्तुरस्य। उग्र.मुग्रस्य तवस.स्तवीयो-ऽरध्रस्य रध्रतुरो बभूव।।

卐 तन्नः४ प्रत्नं सख्य.मस्तु युष्मे इत्था वदद्भि र्वल.मङ्गिरोभिः। हन्नच्युतच्यु.द्दस्मेषयन्त-मृणोः४ पुरो वि दुरो अस्य विश्वाः।।

❀04.06.05 卐स हि धीभि र्हव्यो अस्त्युग्र^- ईशानकृ.न्महति वृत्रतूर्ये। स तोकसाता तनये स वज्री- वितन्तसाय्यो अभव.त्समत्सु।।

卐 स मज्मना जनिम मानुषाणा-ममर्त्येन नाम्नाऽति प्र सर्स्रे। स द्युम्नेन स शव.सोत राया- स वीर्येण नृतम.स्समोकाः।।

卐 स यो न मुहे न मिथू जनो भू-त्सुमन्तुनामा चुमुरि.न्धुनि.ञ्च। वृणक्पिप्रुं शम्बरं शुष्ण.मिन्द्रः४- पुरा.ञ्च्यौत्नाय शयथाय नू चित्।।

卐 उदावता त्वक्षसा पन्यसा च- वृत्रहत्याय रथ.मिन्द्र तिष्ठ। धिष्व वज्रं हस्त आ दक्षिणत्रा-ऽभि प्र मन्द पुरुदत्र मायाः।।

卐 अग्नि.र्न शुष्कँ वर्न.मिन्द्र हेती- रक्षो नि धक्ष्यशनि र्न भीमा। गम्भीरयं ऋष्वया यो रुरो-जाध्वानय दुरिता दम्भय च्च।।

❀04.06.06 卐आ सहस्रं पथिभि रिन्द्र राया- तुविद्युम्न तुविवाजेभि रर्वाक्। याहि सूनो~ सहसो यस्य नूँ चि-ददेव^ ईशे पुरुहूत योतोः।।

卐 प्र तुविद्युम्नस्य स्थविरस्य घृष्वे- र्दिवो ररप्शे महिमा पृथिव्याः। नास्य शत्रु र्न प्रतिमान.मस्ति- न प्रतिष्ठिः पुरुमायस्य सह्योः।।

卐 प्र तत्ते अद्या करण.ङ्कृतं भू-त्कुत्सँ यदायु.मतिथिग्व.मस्मै। पुरू सहस्रा नि शिशा^ अभि क्षा-मुत्तूर्वयाण.न्धृषता निनेथ।।

卐 अनु त्वाऽहिघ्ने अध देव देवा^- मद.न्विश्वे कवितम.ङ्कवीनाम्। करो यत्र वरिवो बाधिताय- दिवे जनाय तन्वे गृणानः।।

卐 अनु द्यावापृथिवी~ तत्त ओजो-ऽमर्त्या^ जिहत इन्द्र देवाः। कृष्वा कृत्नो~ अकृतँ यत्ते अ-स्त्युक्थ.न्नवीयो जनयस्व यज्ञैः।।

6.19 महाँ इन्द्र इति त्रयोदशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.06.07 卐महाः इन्द्रो नृवदा चर्षणिप्रा^- उत द्विबर्हा^ अमिन.स्सहोभिः। अस्म.द्र्यग्वावृधे वीर्या-योरुः पृथु.स्सुकृतः कर्तृभि.र्भूत्।।

卐 इन्द्र.मेव धिषणा सातये धा-द्बृहन्त.मृष्व.मजरँ युवानम्। अषाळ्हेन शवसा शूशुवांसं- सद्य.श्चिद्यो वावृधे असामि।।

卐 पृथू~ करस्ना बहुला गभस्ती~- अस्मद्र्य1(अ)क्सं मिमीहि श्रवांसि। यूथेव पश्वः पशुपा^ दमूना^- अस्माः इन्द्रा.भ्यावर्वृत्स्वाऽऽजौ।।

卐 तँ व^ इन्द्र.ञ्चतिन.मस्य शाकै- रिह नूनँ वाजयन्तो हुवेम। यथा चित्पूर्वे जरितार^ आसु- रनेद्या^ अनवद्या^ अरिष्टाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 धृतव्रतो धनदा.स्सोमवृद्ध-स्स हि वामस्य वसुनः पुरुक्षुः। सञ्जग्मिरे पथ्या3(आ) रायो- अस्मि न्त्समुद्रे न सिन्धवो यादमानाः।।

❀04.06.08 卐शविष्ठ.न्न^ आ भर शूर शव^- ओजिष्ठ.मोजो अभिभूत उग्रम्। विश्वा द्युम्ना वृष्ण्या मानुषाणा-मस्मभ्य.न्दा^ हरिवो मादयध्यै ।।

卐 य.स्ते मदः पृतनाषा.ळमृध्र^- इन्द्र तन्न^ आ भर शूशुवांसम्। येन तोकस्य तनयस्य सातौ- मंसीमहि जिगीवांस.स्त्वोताः।।

卐 आ नो भर वृषणं शुष्म.मिन्द्र- धनस्पृतं शूशुवांसं सुदक्षम्। येन वंसाम पृतनासु शत्रू-न्तवोतिभि रुत जामीः रजामीन्।।

卐 आ ते शुष्मो वृषभ^ एतु पश्चा-दोत्तरा.दधरादा पुरस्तात्। आ विश्वतो अभि समे त्वर्वाङि-न्द्र द्युम्नं स्वर्व .द्धेह्यस्मे।।

卐 नृवत्त इन्द्र नृतमाभि रूती- वंसीमहि वामं श्रोमतेभिः। ईक्षे हि वस्व^ उभयस्य राज-न्धा रत्नं महि स्थूरं बृहन्तम्।।

卐 मरुत्वन्तँ वृषभँ वावृधान-मकवारि.न्दिव्यं शास.मिन्द्रम्। विश्वासाह.मवसे नूतना-योग्रं सहोदा.मिह तं हुवेम।।

卐 जनँ वज्रि.न्महि चिन्मन्यमान-मेभ्यो नृभ्यो रन्धया येष्वस्मि। अधा हि त्वा पृथिव्यां शूरसातौ- हवामहे तनये गोष्वप्सु।।

卐 वयन्त एभिः पुरुहूत सख्यै- श्शत्रोश्शत्रो रुत्तर इत्स्याम। घ्नन्तो वृत्रा.ण्युभयानि शूर- राया मदेम बृहता त्वोताः।।

6.20 द्यौर्न य इति त्रयोदशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्-सप्तमी विराट्पङ्क्तिः।।

❀04.06.09 卐द्यौ र्न य^ इन्द्राभि भूमार्य-स्तस्थौ रयि.श्शवसा पृत्सु जनान्। त.न्न.स्सहस्रभर.मुर्वरासा -न्दद्धि सूनो~ सहसो वृत्रतुरम्।।

卐 दिवो न तुभ्य.मन्विन्द्र सत्राऽसुर्य.न्देवेभि र्धायि विश्वम्। अहिँ यद्वृत्र.मपो वव्रिवांसं- हन्नृजीषि.न्विष्णुना सचानः।।

卐 तूर्व.न्नोजीया.न्तवस.स्तवीया-न्कृतब्रह्मेन्द्रो वृद्धमहाः। राजाऽभव.न्मधुन.स्सोम्यस्य- विश्वासाँय.त्पुरा .न्दर्त्नु.मावत्।।

卐 शतै रपद्र.न्पणय^ इन्द्रात्र- दशोणये कवयेऽर्कसातौ। वधै.श्शुष्ण स्याशुषस्य मायाः- पित्वो नारिरेची.त्कि.ञ्चन प्र।।

卐 महो द्रुहो अप विश्वायु धायि- वज्रस्य यत्पतने पादि शुष्णः। उरु ष^ सरथं सारथये क-रिन्द्रः कुत्साय सूर्यस्य सातौ।।

❀04.06.10 卐प्र श्येनो न मदिर.मंशु.मस्मै- शिरो दासस्य नमुचे मथायन्न्। प्राऽव.न्नमीं साप्यं ससन्तं- पृण.ग्राया समिषा सं स्वस्ति।।

卐 वि पिप्रो रहिमायस्य दृळ्हाः- पुरो वज्रि.ञ्छवसा न दर्दः~। सुदाम.न्त.द्रेक्णो अप्रमृष्य-मृजिश्वने दात्र न्दाशुषे दाः।।

卐 स वेतसु.न्दशमाय.न्दशोणि-न्तूतुजि.मिन्द्र.स्स्वभिष्टिसुम्नः। आ तुग्रं शश्व.दिभ.न्द्योतनाय- मातु र्न सी.मुप सृजा इयध्यै।।

卐 स ईं स्पृधो वनते अप्रतीतो- बिभ्र.द्वज्रं वृत्रहण.ङ्गभस्तौ। तिष्ठ.द्धरी~ अध्यस्तेव गर्ते- वचोयुजा वहत^ इन्द्र.मृष्वम्।।

卐 सनेम तेऽवसा नव्य^ इन्द्र- प्र पूरव.स्स्तवन्त^ एना यज्ञैः। सप्त यत्पुर.श्शर्म शारदी र्द-र्द्धन्दासीः पुरुकुत्साय शिक्षन्न्।।

卐 त्वँ वृध^ इन्द्र पूर्व्यो भू-र्वरिवस्य.न्नुशने काव्याय। परा नववास्त्व.मनुदेयं- महे पित्रे ददाथ स्व.न्नपातम्।।

卐 त्वन्धुर्नि रिन्द्र धुनिमती-र् ऋणो रप.स्सीरा^ न स्रवन्तीः। प्र यत्समुद्र.मति शूर पर्षि- पारया तुर्वशँ यदुं स्वस्ति।।

Sri Sachidananda Avadhoota Datta Peetham • Mysore •

卐 तव ह त्यदिन्द्र विश्व.माजौ- सस्तो धुनीचुमुरी~ या ह सिष्वप्। दीदय.दि.त्तुभ्यं सोमेभि.स्सुन्व-न्दभीर्ति रिध्मभृति॰ पक्थ्य1(अ)र्कैः।।

6.21 इमा उ त्वेति द्वादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्रो- नवम्येकादश्यो र्विश्वेदेवा-स्त्रिष्टुप्।।

❀04.06.11 卐इमा^ उ त्वा पुरुतमस्य कारो- र्हव्यं वीर हव्या हवन्ते। धियो रथेष्ठा.मजर.न्नवीयो- रयि.र्विभूति रीयते वचस्या।।

卐 तमु स्तुष इन्द्रं यो विदानो- गिर्वाहस.ङ्गीर्भि र्यज्ञवृद्धम्। यस्य दिव.मति मह्वा पृथिव्या॰- पुरुमायस्य रिरिचे महित्वम्।।

卐 स इत्तमोऽवयुन.न्ततन्व-त्सूर्येण वयुनव.च्चकार। कदा ते मर्ता^ अमृतस्य धा-मेयक्षन्तो न मिनन्ति स्वधावः।।

卐 यस्ता चकार स कुह स्विदिन्द्र॰- कमा जन.ञ्चरति कासु विक्षु। क.स्ते यज्ञो मनसे शँ वराय- को अर्क ^इन्द्र कतम.स्स होता।।

卐 इदा हि ते वेविषत॰ पुराजा॰- प्रत्नास^आसु॰ पुरुकृ.त्सखायः। ये मध्यमास^ उत नूतनास-उतावमस्य पुरुहूत बोधि।।

❀04.06.12 卐तं पृच्छन्तोऽवरास॰ पराणि- प्रत्ना त इन्द्र श्रुत्याऽनु येमुः। अर्चामसि वीर ब्रह्मवाहो-या.देव विद्म तात्वा महान्तम्।।

卐 अभि त्वा पाजो रक्षसो वि तस्थे- महि जज्ञान.मभि तत्सु तिष्ठ। तव प्रत्नेन युज्येन सख्या- वज्रेण धृष्णो~ अप ता नुदस्व।।

卐 स तु श्रुधीन्द्र नूतनस्य- ब्रह्मण्यतो वीर कारुधायः। त्वं ह्या3(आ)पि॰ प्रदिवि पितॄणां- शश्व.द्बभूथ सुहव^ एष्टौ।।

卐 प्रोतये वरुणं मित्र.मिन्द्रं- मरुत॰ कृष्वावसे नो अद्य। प्र पूषणँ विष्णु.मग्निं पुरन्धिं- सवितार.मोषधी॰ पर्वतां.श्च।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इम उ त्वा पुरुशाक प्रयज्यो ~-जरितारो अभ्यर्च.न्त्यर्कैः। श्रुधी हवमा हुवतो हुवानो- न त्वावा॥ अन्यो अमृत त्वदस्ति।।

卐 नू म आ वाच.मुप याहि विद्वा-न्विश्वेभि स्सूनो ~सहसो यजत्रैः। ये अग्निजिह्वा^ ऋतसाप^ आसु- यें मनु.श्चक्रु रुपर.न्दसाय।।

卐 स नो बोधि पुर.एता सुगे-षूत दुर्गेषु पथिकृ.द्विदानः। ये अश्रमास^ उरवो वहिष्ठा-स्तेभि र्न^ इन्द्राभि वक्षि वाजम्।।

6.22 य एक इत्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र-स्त्रिष्टुप्।।

❀04.06.13 卐य^ एक^ इद्धव्य श्चर्षणीना-मिन्द्र.न्तङ्गीर्भि रभ्यर्च आभिः। य॰ पत्यते वृषभो वृष्ण्यावा- न्त्सत्य.स्सत्वा पुरुमाय.स्सहस्वान्।।

卐 तमु न॰ पूर्वे पितरो नवग्वा-स्सप्त विप्रासो अभि वाजयन्तः। नक्षद्दाभ.न्ततुरिं पर्वतेष्ठा-मद्रोघवाचं मतिभि.श्शविष्ठम्।।

卐 तमीमह इन्द्र.मस्य राय॰- पुरुवीरस्य नृवत॰ पुरुक्षोः। यो अस्कृधोयु रजर.स्स्वर्वा-न्तमा भर हरिवो मादयध्यै।।

卐 त.न्नो वि वोचो यदि ते पुरा चि-ज्जरितार^ आनशु.स्सुम्न.मिन्द्र। क.स्ते भाग॰ किं वयो दुध्र खिद्व॰- पुरुहूत पुरूवसो~ऽसुरघ्नः।।

卐 तं पृच्छन्ती वज्रहस्तं रथेष्ठा-मिन्द्रँ वेपी वक्वरी यस्य नू गीः। तुविग्राभ.न्तुविकूर्मिं रभोदा-ङ्गातु.मिषे नक्षते तुम्र.मच्छ।।

❀04.06.14 अया ह त्यं मायया वावृधानं- मनोजुवा स्वतव॰ पर्वतेन। अच्युता चिद्वीळिता स्वोजो रुजो- वि दृळ्हा धृषता विरप्शिन्न्।।

卐 तँ वो धिया नव्यस्या शविष्ठं- प्रत्नं प्रत्नव.त्परितंसयध्यै। स नो वक्ष.दनिमान.स्सुव-ह्मेन्द्रो विश्वा.न्यति दुर्गहाणि।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 आ जनाय.द्रुह्वणे पार्थिवानि- दिव्यानि दीपयोऽन्तरिक्षा। तपा वृष.न्विश्वत.श्शोचिषा ता-न्ब्रह्मद्विषे शोचय क्षा.मप.श्च।।

卐 भुवो जनस्य दिव्यस्य राजा- पार्थिवस्य जगत.स्त्वेषसन्दृक्। धिष्व वज्र.न्दक्षिण इन्द्र हस्ते- विश्वा अजुर्य.दयसे वि मायाः।।

卐 आ सँयत.मिन्द्र ण.स्स्वस्तिं- शत्रुतूर्याय बृहती.ममृध्राम्। यया दासा.न्यार्याणि वृत्रा- करो वज्रि .न्त्सुतुका नाहुषाणि।।

卐 स नो नियुद्भिः पुरुहूत वेधो- विश्ववाराभि रा गहि प्रयज्यो~। न या^ अदेवो वरते न देव^- आभि र्याहि तूयमा मद्र्यद्रिक्।।

6.23 सुत इदिति दशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र-स्त्रिष्टुप्।।

❀04.06.15 卐सुत इत्त्व.न्निमिश्ल^ इन्द्र सोमे- स्तोमे ब्रह्मणि शस्यमान उक्थे। यद्वा युक्ताभ्यां मघव .न्हरिभ्यां- बिभ्र.द्वज्रं बाह्वो रिन्द्र यासि।।

卐 यद्वा दिवि पार्ये सुष्वि.मिन्द्र- वृत्रहत्येऽवसि शूरसातौ। यद्वा दक्षस्य बिभ्युषो अबिभ्य- दरन्धय.श्शर्धत ^इन्द्र दस्यून्।।

卐 पाता सुत.मिन्द्रो अस्तु सोमं- प्रणेनी रुग्रो जरितार.मूती। कर्ता वीराय सुष्वय उ लोक-न्दाता वसु स्तुवते कीरये चित्।।

卐 गन्तेयान्ति सवना हरिभ्यां- बभ्रि र्वज्रं पपि.स्सोम.न्ददिर्गाः। कर्ता वीर.न्नर्यं सर्ववीरं- श्रोता हव.ङ्गृणत .स्स्तोमवाहाः।।

卐 अस्मै वयँ यद्वावान तद्विविष्म^- इन्द्राय यो नः प्रदिवो अपस्कः~। सुते सोमे स्तुमसि शंस.दु-क्थेन्द्राय ब्रह्म वर्धनँ यथाऽसत्।।

❀04.06.16 ब्रह्माणि हि चकृषे वर्धनानि- तावत्त इन्द्र मतिभि र्विविष्मः। सुते सोमे सुतपा.श्शन्तमानि -रान्द्या क्रियास्म वक्षणानि यज्ञैः।।

卐 स नो॑ बोधि पुरो॒ळाशं॒ ररा॑णः- पिबा॒ तु सोम॒.ङ्गोऋ॑जीक.मिन्द्र। एदं ब॒र्हि र्यज॑मानस्य सी-दो॒रु.ङ्कृ॑धि त्वाय॒त^ उ॑ लो॒कम्।।

卐 स म॑न्दस्वा॒ ह्यनु जोष॑.मुग्र- प्र त्वा॑ य॒ज्ञास॑^ इ॒मे अ॑श्नुवन्तु। प्रेमे ह॒वास॑ः पुरुहू॒त.म॒स्मे- आ त्वे॒य.न्धी र्व॑स इन्द्र यम्याः।।

卐 तँ व॑.स्सखाय॒.स्सँ यथा॑ सु॒तेषु- सोमे॑भिरीं पृणता भो॒ज.मिन्द्र॑म्। कु॒वि.त्तस्मा॒ अस॑ति नो॒ भरा॒य- न सुष्वि॒.मिन्द्रोऽव॑से मृधाति।।

卐 ए॒वे.दिन्द्र॑.स्सुते अ॑स्तावि॒ सोमे॑- भ॒रद्वा॑जेषु॒ क्षय॒दि.न्म॒घोन॑ः। अस॒द्यथा॑ जरि॒त्र उ॒त सू॒रि रिन्द्रो॑- रा॒यो वि॒श्ववा॑रस्य दा॒ता।।

6.24 वृषा मद इति दशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र-स्त्रिष्टुप्।।

❀04.06.17 卐वृ॒षा मद॒^ इन्द्रे श्लोक॑^ उ॒क्था- सचा॒ सोमे॑षु सु॒तपा^ ऋजी॒षी। अ॒र्च॒त्र्यो॑ म॒घवा॒ नृभ्य॒^ उ॒क्थै- र्द्यु॒क्षो राजा॑ गि॒रा.मक्षि॑तोतिः।।

卐 तर्तु॒रि र्वी॒रो नर्यो॒ विचे॑ता-श्श्रोता॑ ह॒व.ङ्गृण॒त^ उ॒र्व्यू॑तिः। वसु॒.श्शंसो॑ न॒रा.ङ्का॒रुधा॑या ^-वा॒जी स्तु॒तो वि॒दथे॑ दाति॒ वाज॑म्।।

卐 अक्षो॒ न च॒क्र्यो॑ श्शूर बृह-न्प्र ते॑ म॒ह्ना रि॑रिचे॒ रोद॑स्योः। वृ॒क्षस्य॒ नु ते॑ पुरुहूत व॒या^- व्यू३~(ऊ॒)तयो॑ रुरुहु रिन्द्र पू॒र्वीः।।

卐 शची॑वत.स्ते पुरुशाक॒ शाका॒^- गवा॑.मिव स्रु॒तय॑.स्स॒.ञ्चर॑णीः। व॒त्साना॒.न्न त॒न्तय॑.स्त इन्द्र॒- दाम॑न्वन्तो अदा॒मान॑.स्सुदामन्।।

卐 अ॒न्य.द॒द्य कर्व॑र.म॒न्यदु श्वो-ऽस॑च्च सन्मु॒हु राच॒क्रि रिन्द्र॑ः। मि॒त्रो नो॒ अत्र॒ वरु॑णश्च पू॒षा-ऽर्यो वश॑स्य प॒र्येताऽस्ति॑।।

❀04.06.18 卐वि त्वदापो॒ न पर्व॑तस्य पृ॒ष्ठा-दु॒क्थेभि॑ रिन्द्रानयन्त य॒ज्ञैः। तन्त्वाऽभि.स्सु॑ष्टु॒तिभि॑ र्वा॒जय॑न्त -आ॒जि.न्न ज॑ग्मु र्गि॒र्वाहो॒ अश्वा॑ः।।

卐 न य.ञ्जरन्ति शरदो न मासा-^ न द्याव^ इन्द्र.मवकर्शयन्ति। वृद्धस्य चिद्वर्धता.मस्य तनू-स्स्तोमेभि रुक्थै.श्च शस्यमाना।।

卐 न वीळवे नमते न स्थिराय- न शर्धते दस्युजूताय स्तवान्। अज्रा^ इन्द्रस्य गिरय.श्चिदृष्वा^- गम्भीरे चिद्भवति गाध.मस्मै।।

卐 गम्भीरेण न^ उरुणाऽमत्रि-न्प्रेषो यन्धि सुतपाव.न्वाजान्। स्था^ ऊ षु ऊर्ध्व^ ऊती अरिषण्य-न्नक्तो व्युष्टौ परितक्म्यायाम्।।

卐 सचस्व नाय.मवसे अभीक-इतो वा तमिन्द्र पाहि रिषः। अमा चैन मरण्ये पाहि रिषो- मदेम शतहिमा.स्सुवीराः।।

6.25 या त ऊतिरिति नवर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र-स्त्रिष्टुप्।।

❀04.06.19 卐या त ऊति रवमा या परमा- या मध्य.मेन्द्र शुष्मि.न्नस्ति। ताभिरू षु वृत्रहत्येऽवी र्न^- एभि.श्च वाजै मंहा.न्न^ उग्र।।

卐 आभि.स्स्पृधो मिथती ररिषण्य.न्नमित्रस्य व्यथया मन्यु.मिन्द्र। आभि र्विश्वा^ अभियुजो विषूची-रार्याय विशोऽव तारी दासीः।।

卐 इन्द्र^ जामय^ उत येऽजामयो-ऽर्वाचीनासो वनुषो युयुज्रे। त्वमेषाँ विथुरा शवांसि- जहि वृष्ण्यानि कृणुही पराचः।।

卐 शूरो वा शूरँ वनते शरीरै-स्तनूरुचा तरुषि यत्कृण्वैते~। तोके वा गोषु तनये यदप्सु- वि क्रन्दसी~ उर्वरासु ब्रवैते~।।

卐 नहि त्वा शूरो न तुरो न धृष्णु- र्न त्वा योधो मन्यमानो युयोध। इन्द्र नकिष्ट्वा प्रत्य.स्त्येषाँ- विश्वा जाता.न्यभ्यसि तानि।।

❀04.06.20 卐स पत्यत उभयो र्नृम्ण.मयो- र्यदी वेधस.स्समिथे हवन्ते। वृत्रे वा महो नृवति क्षये वा -व्यचस्वन्ता यदि वितन्तसैते~।।

卐 अध स्मा ते चर्षणयो यदेजा-निन्द्र त्रातोत भवा वरूता। अस्माकासो ये नृतमासो अर्य^- इन्द्र सूरयो दधिरे पुरो नः।।

卐 अनु ते दायि मह इन्द्रियाय सत्रा ते विश्व.मनु वृत्रहत्ये। अनु क्षत्र.मनु सहो यज-त्रेन्द्र देवेभि रनु ते नृषह्ये।।

卐 एवा न.स्स्पृध.स्समजा सम-त्स्विन्द्र रारन्धि मिथती रदेवीः। विद्याम वस्तो रवसा गृणन्तो-भरद्वाजा ^उत त इन्द्र नूनम्।।

6.26 श्रुधी न इत्यष्टर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.06.21 卐श्रुधी न^ इन्द्र ह्वयामसि त्वा -महो वाजस्य सातौ वावृषाणाः। सँ यद्विशोऽयन्त शूरसाता- उग्र.न्नोऽवः पार्ये अह.न्दाः।।

卐 त्वाँ वाजी हवते वाजिनेयो- महो वाजस्य गध्यस्य सातौ। त्वाँ वृत्रे.ष्विन्द्र सत्पति.न्तरुत्र-न्त्वा.ञ्चष्टे मुष्टिहा गोषु युध्यन्न्।।

卐 त्व.ङ्कवि.ञ्चोदयोऽर्कसातौ –त्व.ङ्कुत्साय शुष्ण.न्दाशुषे वर्क्। त्वं शिरो अमर्मणः पराऽह-न्नतिथिग्वाय शंस्य.ङ्करिष्यन्न्।।

卐 त्वं रथं प्र भरो योध.मृष्व-मावो युध्यन्तँ वृषभ.न्दशद्युम्। त्व.न्तुग्रँ वेतसवे सचाऽह-न्त्व.न्तुजि.ङ्गृणन्त .मिन्द्र तूतोः~।।

卐 त्व.न्तदुक्थ.मिन्द्र बर्हणा कः~- प्र यच्छता सहस्रा शूर दर्षि। अव गिरे दासं शम्बरं ह-न्प्राऽऽवो दिवोदास.ञ्चित्राभि रूती।।

❀04.06.22 卐त्वं श्रद्धाभि र्मन्दसान.स्सोमै- र्दभीतये चुमुरि.मिन्द्र सिष्वप्। त्वं रजिं पिठीनसे दशस्य- न्षष्टिं सहस्रा शच्या सचाऽहन्न्।।

卐 अह.ञ्चन त.त्सूरिभि रानश्या-न्तव ज्याय^ इन्द्र सुम्न.मोजः। त्वया य.त्स्तवन्ते सधवीर वीरा ^-स्त्रिवरूथेन नहुषा शविष्ठ।।

卐 वय.न्ते अस्या.मिन्द्र द्युम्नहूतौ- सखाय.स्स्याम महिन प्रेष्ठाः। प्रातर्दनिः ≈ क्षत्रश्री रस्तु श्रेष्ठो- घने वृत्राणां सनये धनानाम्।।

☃ 6.27 किमस्य मद इत्यष्टर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्रः-अन्त्यायाश्चायमानो राजा त्रिष्टुप्(चायमानस्य राज्ञो दानस्तुतिः)।।

❀04.06.23 किमस्य मदे किम्वस्य पीता-विन्द्रः किमस्य सख्ये चकार। रणा वा ये निषदि कि.न्ते अस्य- पुरा विविद्रे किमु नूतनासः।।

卐 सदस्य मदे सद्वस्य पीता-विन्द्र स्सदस्य सख्ये चकार। रणा वा ये निषदि सत्ते अस्य- पुरा विविद्रे सदु नूतनासः।।

卐 नहि नु ते महिमन.स्समस्य- न मघव.न्मघवत्वस्य विद्म। न राधसोराधसो नूतन-स्येन्द्र नकि र्ददृश इन्द्रिय.न्ते।।

卐 एत.त्त्यत्त इन्द्रिय.मचेति- येनावधी वरशिखस्य शेषः। वज्रस्य यत्ते निहतस्य शुष्मा-त्स्वना.च्चिदिन्द्र परमो ददार।।

卐 वधी.दिन्द्रो वरशिखस्य शेषो-ऽभ्यावर्तिने चायमानाय शिक्षन्न्। वृचीवतो य.द्धरियूपीयायां -हन्पूर्वे अर्धे भियसाऽपरो दर्त्।।

❀04.06.24 卐त्रिंशच्छतँ वर्मिण इन्द्र साकँ- यव्यावत्यां पुरुहूत श्रवस्या। वृचीवन्त.श्शरवे पत्यमानाः- पात्रा भिन्दाना.न्यर्था.न्यायन्न्।।

卐 यस्य गावावरुषा सूयवस्यू ~-अन्तरू षु चरतो रेरिहाणा। स सृञ्जयाय तुर्वशं परा दा-द्वृचीवतो दैववाताय शिक्षन्न्।।

卐 द्वयाँ अग्ने रथिनो विंशति.ङ्गा -वधूमतो मघवा मह्यं सम्राट्। अभ्यावर्ती चायमानो ददाति-दूणाशेयन्दक्षिणा पार्थवानाम्।।

☃ 6.28 आ गाव इत्यष्टर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- गौ-स्त्रिष्टुप्-(द्वितीयाया इन्द्रश्चान्त्यपादस्य च) द्वितीयाद्या स्तिस्रो जगत्योन्त्याऽनुष्टुप्।।

❀04.06.25 卐आ गावो अग्म.न्नुत भद्र.मक्र-न्त्सीदन्तु गोष्ठे रणय.न्त्वस्मे। प्रजावतीः पुरुरूपा^ इह स्यु- रिन्द्राय पूर्वी रुषसो दुहानाः।।

卐 इन्द्रो यज्वने पृणते च शिक्ष-त्युपे.द्ददाति न स्वं मुषायति। भूयोभूयो रयि.मिदस्य वर्धय-न्नभिन्ने खिल्ये नि दधाति देवयुम्।।

卐 न ता ^नशन्ति न दभाति तस्करो- नाऽसा.मामित्रो व्यथिरा दधर्षति। देवाँ.श्च याभि र्यजते ददाति च- ज्योगित्ताभि.स्सचते गोपति.स्सह।।

卐 न ता ^अर्वा रेणुकककाटो अश्नुते- न संस्कृतत्र.मुप यन्ति ता^ अभि। उरुगाय.मभय.न्तस्य ता^ अनु - गावो मर्तस्य वि चरन्ति यज्वनः।।

卐 गावो भगो गाव^ इन्द्रो मे अच्छा-न्गाव.स्सोमस्य प्रथमस्य भक्षः। इमा^ या^ गाव.स्स^ जनास^ इन्द्र- इच्छामी.द्धृदा मनसा चिदिन्द्रम्।।

卐 यूय.ङ्गावो मेदयथा कृश.ञ्चि-दश्रीर.ञ्चित्कृणुथा सुप्रतीकम्। भद्र.ङ्गृह.ङ्कृणुथ भद्रवाचो- बृह.द्वो वय^ उच्यते सभासु।।

卐 प्रजावती.स्सूयवसं रिशन्ती-श्शुद्धा^ अप.स्सुप्रपाणे पिबन्तीः। मा व.स्स्तेन^ ईशत माऽघशंसः- परि वो हेती रुद्रस्य वृज्याः।।

卐 उपेद.मुपपर्चन-मासु गोषूप पृच्यताम्। उप ऋषभस्य रेत-स्युपेन्द्र तव वीर्ये।। इति षष्ठाध्याय स्समाप्तः।।

## चतुर्थाष्टके सप्तमाध्यायः। वर्गाः(1-35)

6.29 इन्द्रं व इति षड्‌चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.07.01 卐इन्द्रँ वो नर.स्सख्याय सेपु- र्महो यन्त.स्सुमतये चकानाः। महो हि दाता वज्रहस्तो अस्ति- महामु रण्व.मवसे यजध्वम्।।

卐 आ यस्मि.न्हस्ते नर्या मिमिक्षु- रा रथे हिरण्यये रथेष्ठाः। आ रश्मयो गभस्त्यो स्स्थूरयो- राध्व.न्नश्वासो वृषणो युजानाः।।

卐 श्रिये ते पादा दुव^ आ मिमिक्षु- र्धृष्णु र्वज्री शवसा दक्षिणावान्। वसानो अत्कं सुरभि.न्दृशे कं-
स्व1(अ)र्ण नृत.विषिरो बभूथ।।

卐 स सोम^ आमिश्लतम.स्सुतो भू-द्यस्मि.न्पक्तिः पच्यते सन्ति धानाः। इन्द्र.न्नर.स्स्तुवन्तो ब्रह्मकारा
^-उक्था शंसन्तो देववाततमाः।।

卐 न ते अन्त.श्शवसो धाय्यस्य- वि तु बाबधे रोदसी महित्वा। आ ता सूरिः पृणति तूतुजानो-
यूथेवा.प्सु समीजमान^ ऊती।।

卐 एवे.दिन्द्र स्सुहव^ ऋष्वो अ-स्तूती अनूती हिरिशिप्र.स्सत्वा। एवा हि जातो असमात्योजाः- पुरू च
वृत्रा हनति नि दस्यून्।।

6.30 भूय इति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.07.02 卐भूय^ इद्वावृधे वीर्याय- एको अजुर्यो दयते वसूनि। प्र रिरिचे दिव^ इन्द्रः पृथिव्या ^-
अर्ध .मिदस्य प्रति रोदसी उभे~।।

卐 अधा मन्ये बृह.दसुर्य.मस्य -यानि दाधार नकिरा मिनाति। दिवेदिवे सूर्यो दर्शतो भू-द्विसद्मा.न्युर्विया
सुक्रतु र्धात्।।

卐 अद्या चिन्नू चित्तदपो नदीनां- यदाभ्यो अरदो गातु.मिन्द्र। नि पर्वता^ अद्मसदो न सेदु- स्त्वया
दृळ्हानि सुक्रतो~ रजांसि।।

卐 सत्यमि.त्तन्न त्वावा॑ अन्यो- अस्तीन्द्र देवो न मर्त्यो ज्यायान्। अह.न्नहिं परिशयान.मर्णो-ऽवासृजो
अपो अच्छा समुद्रम्।।

卐 त्वमपो वि दुरो विषूची- रिन्द्र दृळ्ह.मरुजः पर्वतस्य। राजाऽभवो जगत श्चर्षणीनां- साकं
सूर्य.ञ्जनय.न्द्या.मुषासम्।।

6.31 अभूरेक इति पञ्चर्चस्य सूक्तस्य, भारद्वाज स्सुहोत्र- इन्द्र- स्त्रिष्टुप्-चतुर्थी शक्वरी- (सुहोत्र
श्शुनहोत्रो नरो गर्ग ऋजिश्वा इत्येते ऋषयो बृहस्पतेः पौत्रा उत दौष्यन्तेर्भरतस्य पौत्रा इति विषये
इतिहासः श्रूयते)।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.07.03 卐अभूरेको रयिपते रयीणा-मा हस्तयो रधिथा^ इन्द्र कृष्टीः। वि तोके अप्सु तनये च सूरे-ऽवोचन्त चर्षणयो विवाचः।।

卐 त्व.द्भियेन्द्र पार्थिवानि विश्वा-ऽच्युता चि.च्च्यावयन्ते रजांसि। द्यावाक्षामा पर्वतासो वनानि-विश्व.न्दृळ्हं भयते अज्म.न्ना ते।।

卐 त्व.ङ्कुत्सेनाभि शुष्ण.मि-न्द्राशुषँ युध्य कुयव.ङ्गविष्टौ। दश प्रपित्वे अध सूर्यस्य- मुषाय.श्चक्र.मविवे रपांसि।।

卐 त्वं शता.न्यव शम्बरस्य- पुरो जघन्थाप्रतीनि दस्योः। अशिक्षो यत्र शच्या शचीवो- दिवोदासाय सुन्वते सुतक्रे- भरद्वाजाय गृणते वसूनि।।

卐 स सत्यसत्व.न्महते रणाय- रथमा तिष्ठ तुविनृम्ण भीमम्। याहि प्रपथि.न्नवसोप मद्रि-क्प्र च श्रुत श्रावय चर्षणिभ्यः।।

☫ 6.32 अपूर्व्येति पञ्चर्चस्य सूक्तस्य, भारद्वाज स्सुहोत्र- इन्द्र- स्त्रिष्टुप्।।

❀04.07.04 卐अपूर्व्या पुरुतमा.न्यस्मै- महे वीराय तवसे तुराय। विरप्शिने वज्रिणे शन्तमानि-वचांस्यासा स्थविराय तक्षम्।।

卐 स मातरा सूर्येणा कवीना-मवासय.द्रुजदद्रि.ङ्गृणानः। स्वाधीभि र् ऋक्वभि र्वावशान^ उ-दुस्त्रियाणा मसृज.न्निदानम्।।

卐 स वह्निभिर् ऋक्वभि र्गोषु शश्व-न्मितज्ञुभिः पुरुकृत्वा जिगाय। पुरः पुरोहा सखिभि.स्सखीय-न्दृळ्हा रुरोज कविभिः कविः सन्न्।।

卐 स नीव्याभि र्जरितार.मच्छा-महो वाजेभि र्महद्भिश्च शुष्मैः। पुरुवीराभि र्वृषभ क्षितीना-मा गिर्वण .स्सुविताय प्र याहि।।

卐 स सर्गेण शवसा तक्तो अत्यै- रप^ इन्द्रो दक्षिणत.स्तुराषाट्। इत्था सृजाना^ अनपावृदर्थ-न्दिवेदिवे विविषु रप्रमृष्यम्।।

☫ 6.33 य ओजिष्ठ इति पञ्चर्चस्य सूक्तस्य, भारद्वाज श्शुनहोत्र- इन्द्र- स्त्रिष्टुप्।।

❀04.07.05 卐य^ ओजिष्ठ^ इन्द्र तं सु नो दा- मदो वृष.न्त्स्वभिष्टि दास्वान्। सौवश्व्यँ यो वनव.त्स्वश्वो -वृत्रा समत्सु सासह.दमित्रान्।।

卐 त्वां ही3(ई)न्द्रावसे विवाचो- हवन्ते चर्षणय.श्शूरसातौ। त्वँ विप्रेभिर्वि पणीऽ रशाय- स्त्वोत^इत्सनिता वाज.मर्वा।।

卐 त्वन्ताऽ इन्द्रोभयाऽ अमित्रा-न्दासा वृत्रा.ण्यार्या च शूर। वधी र्वनेव सुधितेभि रत्कै- रा पृत्सु दर्षि नृणा.न्नृतम।।

卐 स त्वन्न^ इन्द्राकवाभि रूती -सखा विश्वायुरविता वृधे भूः। स्वर्षाता यद्ध्वयामसि त्वा -युध्यन्तो नेमधिता पृत्सु शूर।।

卐 नूनन्न^ इन्द्रापराय च स्या- भवा मृळीक^ उत नो अभिष्टौ। इत्था गृणन्तो महिनस्य शर्म-न्दिवि ष्याम पार्ये गोषतमाः।।

☸ 6.34 सं च त्व इति पञ्चर्चस्य सूक्तस्य, भारद्वाज श्शुनहोत्र- इन्द्र- स्त्रिष्टुप्।।

❀04.07.06 卐स.ञ्च त्वे जग्मु र्गिर^ इन्द्र पूर्वी-र्वि च त्वद्यन्ति विभ्वो मनीषाः। पुरा नून.ञ्च स्तुतय ऋषीणां- पस्पृध्र इन्द्रे अ.ध्युक्थार्का।।

卐 पुरुहूतो यः पुरुगूर्त ^ऋभ्वाऽ- एकः पुरुप्रशस्तो अस्ति यज्ञैः। रथो न महे शवसे युजानो3(ओ)ऽस्माभि रिन्द्रो अनुमाद्यो भूत्।।

卐 न यं हिंसन्ति धीतयो न वाणी- रिन्द्र.न्नक्षन्ती.दभि वर्धयन्तीः। यदि स्तोतार.श्शतँ यत्सहस्र- ङ्गृणन्ति गिर्वणसं शन्तदस्मै।।

卐 अस्मा एत.द्दिव्य1(अ)र्चेव मासा- मिमिक्ष^ इन्द्रे न्ययामि सोमः। जन.न्न धन्व.न्नभि सँ यदाप-स्सत्रा वावृधु र्हवनानि यज्ञैः।।

卐 अस्मा एत.न्मह्याङ्गूष.मस्मा -इन्द्राय स्तोत्रं मतिभि रवाचि। असद्यथा महति वृत्रतूर्य -इन्द्रो विश्वाऽयु रविता वृध.श्च।।

☸ 6.35 कदा भुवन्निति पञ्चर्चस्य सूक्तस्य, भारद्वाजो नर- इन्द्र- स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.07.07 卐कदा भुव.न्नथक्षयाणि ब्रह्म- कदा स्तोत्रे सहस्रपोष्य.न्दाः। कदा स्तोमँ वासयोऽस्य राया- कदा धियः करसि वाजरत्नाः।।

卐 कर्हि स्वि.त्तदिन्द्र यन्नृभिर्नृ-न्वीरै वींरा.न्नीळयासे जयाऽऽजीन्। त्रिधातु गा^ अधि जयासि गो-ष्विन्द्र द्युम्नं स्वर्व.द्धेह्यस्मे।।

卐 कर्हि स्वि.त्त.दिन्द्र यज्जरित्रे- विश्वप्सु ब्रह्म कृणव.श्शविष्ठ। कदा धियो न नियुतो युवासे- कदा गोमघा हवनानि गच्छाः।।

卐 स गोमघा जरित्रे अश्वश्चन्द्रा^- वाजश्रवसो अधि धेहि पृक्षः। पीपिहीष.स्सुदुघा.मिन्द्र धेनुं- भरद्वाजेषु सुरुचो रुरुच्याः।।

卐 तमा नूनँ वृजन.मन्यथा चि-च्छूरो यच्छक्र वि दुरो गृणीषे। मा निररं शुक्रदुघस्य धेनो- राङ्गिरसा .न्ब्रह्मणा विप्र जिन्व।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

☫ 6.36 सत्रा मदास इति पञ्चर्चस्य सूक्तस्य, भारद्वाजो नर- इन्द्र- स्त्रिष्टुप्।।

❀04.07.08 卐सत्रा मदास.स्तव विश्वजन्या-स्सत्रा रायोऽध ये पार्थिवासः। सत्रा वाजाना.मभवो विभक्ता- यद्देवेषु धारयथा^ असुर्यम्।।

卐 अनु प्र येजे जन^ ओजो अस्य- सत्रा दधिरे अनु वीर्याय। स्यूमगृभे दुधयेऽर्वते च- क्रतुँ वृञ्ज.न्त्यपि वृत्रहत्ये।।

卐 तं सध्रीची रूतयो वृष्ण्यानि- पौंस्यानि नियुत.स्सश्चु रिन्द्रम्। समुद्र.न्न सिन्धव^ उक्थशुष्मा^- उरुव्यचस.ङ्गिर^ आ विशन्ति।।

卐 स रायस्खा.मुप सृजा गृणानः- पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः। पति र्बभूथासमो जनाना-मेको विश्वस्य भुवनस्य राजा।।

卐 स तु श्रुधि श्रुत्या यो दुवोयु- र्द्यौ र्न भूमाभि रायो अर्यः। असो यथा न.श्शवसा चकानो- युगेयुगे वयसा चेकितानः।।

☫ 6.37 अर्वाग्रथमिति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.07.09 卐अ॒र्वा.ग्र॒थँ वि॒श्ववा॑रन्त उ॒-ग्रेन्द्र॑ यु॒क्तासो॒ हर॑यो वहन्तु। की॒रि.श्चि॒द्धि त्वा॒ हव॑ते॒ स्व॑र्वा-नृ॒धी॒म॒हि॑ स॒ध॒माद॑.स्ते अ॒द्य।।

卐 प्रो द्रो॒णे॒ हर॑य॒ः कर्मा॑ग्म-न्पु॒ना॒नास॒ ऋज्य॑न्तो अभूवन्न्। इन्द्रो॑ नो अ॒स्य पू॒र्व्य॒ः प॑पीया-द्यु॒क्षो मद॑स्य सो॒म्यस्य॒ राजा॑।।

卐 आ॒स॒स्रा॒णास॑.श्शवसा॒न.म-च्छेन्द्रं॑ सु॒च॒क्रे र॒थ्या॑सो॒ अश्वा॑ः। अ॒भि श्रव॒ ऋज्य॑न्तो वहेयु- र्नू चि॒.न्नु वा॒यो र॒मृतं॒ वि द॑स्येत्।।

卐 वरि॑ष्ठो अ॒स्य॒ दक्षि॑णा.मि॒य-र्तीन्द्रो॑ म॒घोना॑.न्तुविकू॒र्मिन्त॑मः। यया॑ वज्रिव॒ः परि॒या.स्यंहो॑- म॒घा॑ च॑ धृष्णो॒~ दय॑से॒ वि सू॒रीन्।।

卐 इन्द्रो॒ वाज॑स्य॒ स्थवि॑रस्य दा॒-तेन्द्रो॑ गी॒र्भिर्व॑र्धतां वृ॒द्धम॑हाः। इन्द्रो॑ वृ॒त्रं हनि॑ष्ठो अस्तु॒ सत्वा-ऽऽता सू॒रि॒ः पृ॑णति॒ तू॒तु॑जानः।।

🏺 6.38 अपादित इति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.07.10 卐अपा॑.दि॒त॒ उदु॑ न॒.श्चि॒त्रत॑मो- म॒हीं भ॑र्ष.द्यु॒मती॒.मिन्द्र॑हूतिम्। पन्य॑सी न्धी॒ति.न्दैव्य॑स्य॒ या॒म-ञ्जन॑स्य रा॒तिं व॑नते सु॒दानु॑ः।।

卐 दू॒रा.च्चि॒दा व॑सतो अ॒स्य॒ कर्णा॒- घोषा॒.दिन्द्र॑स्य॒ तन्य॑ति ब्रु॒वा॒णः। एयमे॑न.न्दे॒वहू॑ति र्ववृत्या - न्म॒द्र्य1(अ)॒.गिन्द्र॒.मि॒य.मृच्य॑माना।।

卐 तं॑ वो॑ धि॒या प॑र॒मया॑ पु॒रा॒जा-म॒ज॒र.मिन्द्र॒.म॒भ्य॑नू.ष्य॒र्कैः। ब्रह्मा॑ च॒ गिरो॑ दधि॒रे स॒मस्मि॑{-न्म॒हाँ.श्च॒ स्तोमो॒ अधि॑ वर्ध.दिन्द्रे॑।।

卐 वर्धा॒द्यं॑ य॒ज्ञ॒ उ॒त सो॒म॒ इन्द्रं॑ -वर्धा॒.द्ब्रह्म॒ गिर॒ उ॒क्था च॒ मन्म॑। वर्धाहै॑न.मु॒षसो॒ याम॑.न्न॒क्तो -र्वर्धा॒ .न्मासा॑.श्श॒रदो॒ द्याव॒ इन्द्र॑म्।।

卐 ए॒वा ज॑ज्ञानं सह॑से॒ अस॑मि- वावृधा॒नं राध॑से च श्रु॒ताय॑। म॒हा.मु॒ग्र मव॑से विप्र नू॒न-मा वि॑वासेम वृ॒त्रतूर्ये॑षु।।

🏺 6.39 मन्द्रस्य कवेरिति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.07.11 मन्द्रस्य कवे दिव्यस्य वह्ने- र्विप्रमन्मनो वचनस्य मध्वः। अपा^ न स्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः।।

卐 अय.मुशानः पर्यद्रि.मुस्रा ^-ऋतधीतिभिर् ऋतयु.ग्युजानः। रुजदरुग्णँ वि वलस्य सानुं- पणीर्वचोभि.रभि योध.दिन्द्रः।।

卐 अय.न्योतय.दद्युतो व्य1(अ)क्तू-न्दोषा वस्तो.श्शरद^इन्दु.रिन्द्र। इम.ङ्केतु मदधु र्नू चिदह्नां- शुचिजन्मन^ उषस श्चकार।।

卐 अयं रोचय.दरुचो रुचानो3(ओ)-ऽयँ वासय.द्व्यृ1(ऋ)तेन पूर्वीः। अय.मीयत ऋतयुग्भि रश्वैः- स्स्वर्विदा नाभिना चर्षणिप्राः।।

卐 नू गृणानो गृणते प्रत्न राज-न्निषः पिन्व वसुदेयाय पूर्वीः। अप^ ओषधी रविषा वनानि- गा^ अर्वतो नृ.नृचसे रिरीहि।।

☬ 6.40 इन्द्र पिबेति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

❀04.07.12 卐इन्द्र पिब तुभ्यं सुतो मदा-यावस्य हरी~ वि मुचा सखाया। उत प्र गाय गण आ निष-द्याथा यज्ञाय गृणते वयो धाः।।

卐 अस्य पिब यस्य जज्ञान^ इन्द्र- मदाय क्रत्वे अपिबो विरप्शिन्न्। तमु ते गावो नर^ आपो अद्रि- रिन्दुं समह्य.न्पीतये सम.स्मै।।

卐 समिद्धे अग्नौ सुत इन्द्र सोम -आ त्वा वहन्तु हरयो वहिष्ठाः। त्वायता.मनसा जोहवी-मीन्द्रा ऽऽयाहि सुविताय महे नः।।

卐 आ याहि शश्व.दुशता ययाथेन्द्र महा मनसा सोमपेयम्। उप ब्रह्माणि शृणव^ इमा नो-ऽथा ते यज्ञस्तन्वे3(ए) वयो धात्।।

卐 यदिन्द्र दिवि पार्ये यदृध-ग्यद्वा स्वे सदने यत्र वाऽसि। अतो नो यज्ञ.मवसे नियुत्वा-न्त्सजोषाः पाहि गिर्वणो मरुद्भिः।।

☬ 6.41 अहेळमान इति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀04.07.13 卐अहेळमान^ उप याहि यज्ञ-न्तुभ्यं पवन्त इन्दव स्सुतासः। गावो न वज्रि.न्त्स्व.मोको अ-च्छेन्द्रा ऽगहि प्रथमो यज्ञियानाम्।।

卐 या ते काकु.त्सुकृता या वरिष्ठा- यया शश्व.त्पिबसि मध्व^ ऊर्मिम्। तया पाहि प्र ते अध्वर्यु रस्था- त्सन्ते वज्रो वर्तता.मिन्द्र गव्युः।।

卐 एष द्रप्सो वृषभो विश्वरूप^- इन्द्राय वृष्णे समकारि सोमः। एतं पिब हरिव.स्स्थात.रुग्र- यस्येशिषे प्रदिवि य.स्ते अन्नम्।।

卐 सुत.स्सोमो असुता.दिन्द्र वस्या-नयं श्रेया.ञ्चिकितुषे रणाय। एत.न्तितिर्व^ उप याहि यज्ञ-न्तेन विश्वा स्तविषी रा पृणस्व।।

卐 ह्वयामसि त्वेन्द्र याह्यर्वा-ङरन्ते सोम.स्तन्वे भवाति। शतक्रतो~ मादयस्वा सुतेषु- प्रास्मा॰ अव पृतनासु प्र विक्षु।।

6.42 प्रत्यस्मा इति चतुर्ऋचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्रोऽनुष्टु-बन्त्या बृहती।।

❀04.07.14 卐प्रत्यस्मै पिपीषते- विश्वानि विदुषे भर। अरङ्गमाय जग्मये-ऽपश्चा.द्दघ्वने नरे।।

卐 एमेनं प्रत्येतन -सोमेभि स्सोमपातमम्। अमत्रे.भिर् ऋजीषिण-मिन्द्रं सुतेभि रिन्दुभिः।।

卐 यदी सुतेभि रिन्दुभि-स्सोमेभिः प्रतिभूषथ। वेदा विश्वस्य मेधिरो- धृष.त्तन्त.मिदेषते।।

卐 अस्मा अस्मा इदन्धसो-ऽध्वर्यो प्र भरा सुतम्। कुवि.त्समस्य जेन्यस्य शर्धतो-ऽभिशस्ते रवस्परत्।।

6.43 यस्य त्यदिति चतुर्ऋचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्र- उष्णिक्।।

❀04.07.15 卐यस्य त्यच्छम्बरं मदे- दिवोदासाय रन्धयः। अयं स सोम^ इन्द्र ते सुतः पिब।।

卐 यस्य तीव्रसुतं मदं- मध्य.मन्त.ञ्च रक्षसे। अयं स सोम^ इन्द्र ते सुतः पिब।।

卐 यस्य गा^ अन्त रश्मनो- मदे दृळ्हा^ अवासृजः। अयं स सोम^ इन्द्र ते सुतः पिब।।

卐 यस्य मन्दानो अन्धसो- माघोन.न्दधिषे शवः। अयं स सोम^ इन्द्र ते सुतः पिब।।

6.44 यो रयिव इति चतुर्विंशत्यृचस्य सूक्तस्य, बार्हस्पत्य श्शँयु-रिन्द्र- स्त्रिष्टु-बाद्या ष्षळनुष्टुभः-सप्तम्यादि तिस्रो विराड्ढ्ङ्कयः-(तिसृष्वष्टम्येव विराड्सप्तमी नवम्यौ तु त्रिष्टुभाविति केचित्-)

❀04.07.16 卐यो रयिवो रयिन्तमो- यो द्युम्नै द्युम्नवत्तमः। सोम.स्सुत.स्स इन्द्र ते-ऽस्ति स्वधापते मदः।।

卐 य.श्शग्म.स्तुविशग्म ते- रायो दामा मतीनाम्। सोम.स्सुत.स्स इन्द्र ते-ऽस्ति स्वधापते मदः।।

卐 येन वृद्धो न शवसा -तुरो न स्वाभि रूतिभिः। सोम.स्सुत.स्स इन्द्र ते-ऽस्ति स्वधापते मदः।।

卐 त्यमु वो अप्रहण-ङ्गृणीषे शवस.स्पतिम्। इन्द्रँ विश्वासाह.न्नरं -मंहिष्ठँ विश्वचर्षणिम्।।

卐 यँ वर्धयन्ती द्गिरः- पति.न्तुरस्य राधसः। तमि.न्न्वस्य रोदसी- देवी~ शुष्मं सपर्यतः।।

❀04.07.17 卐तद्व^ उक्थस्य बर्हणे-न्द्रा.योपस्तृणीषणि। विपो न यस्योतयो- वि यद्रोहन्ति सक्षितः।।

卐 अविद.द्दक्षं मित्रो नवीया-न्पपानो देवेभ्यो वस्यो अचैत्। ससवा.न्स्तौलाभि धौतरीभि- रुरुष्या पायु रभव.त्सखिभ्यः।।

卐 ऋतस्य पथि वेधा^ अपायि- श्रिये मनांसि देवासो अक्रन्न्। दधानो नाम महो वचोभि- र्वपु र्दृशये वेन्यो व्यावः~।।

卐 द्युमत्तम.न्दक्ष.न्धेह्यस्मे- सेधा जनानां पूर्वी ररातीः। वर्षीयो वयः कृणुहि शचीभि- र्धनस्य साता .वस्मा२ अविड्ढि।।

卐 इन्द्र तुभ्यमि.न्मघव.न्नभूम- वय.न्दात्रे हरिवो मा वि वेनः। नकिरापि ददृशे मर्त्यत्रा- किमङ्ग रध्रचोदन न्त्वाऽऽहुः।।

❀04.07.18 卐मा जस्वने वृषभ नो ररीथा^- मा ते रेवत.स्सख्ये रिषाम। पूर्वी ष्ट इन्द्र नि ष्षिधो जनेषु- जह्यसुष्वी.न्प्रवृहापृणतः।।

卐 उदभ्राणीव.स्तनय.न्नियर्ती-न्द्रो राधां.स्यश्व्यानि गव्या। त्वमसि प्रदिवः कारुधाया^ -मा त्वाऽदामान^ आ दभ.न्मघोनः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अध्वर्यो~ वीर प्र महे सुताना-मिन्द्राय भर स ह्यस्य राजा। यः पूर्व्याभि रुत नूतनाभि- र्गीर्भि र्वावृधे गृणता.मृषीणाम्।।

卐 अस्य मदे पुरु वर्पांसि विद्वा-निन्द्रो वृत्रा.ण्यप्रती जघान। तमु प्र होषि मधुमन्त.मस्मै -सोमँ वीराय शिप्रिणे पिबध्यै।।

卐 पाता सुत.मिन्द्रो अस्तु सोमं- हन्ता वृत्रँ वज्रेण मन्दसानः। गन्ता यज्ञं परावत श्चिदच्छा- वसु र्धीना.मविता कारुधायाः।।

❀04.07.19 卐इद.न्त्यत्पात्र.मिन्द्रपान-मिन्द्रस्य प्रिय.ममृत.मपायि। मत्स.द्यथा सौमनसाय देवँ-व्य1(अ)स्म.द्वेषो युयव.द्व्यंहः।।

卐 एना मन्दानो जहि शूर शत्रू-न्जामि.मजामिं मघव.न्नमित्रान्। अभिषेणा॰ अभ्या3(आ)देदिशाना-न्पराच इन्द्र प्र मृणा जही च।।

卐 आसु ष्मा णो मघव.न्निन्द्र पृ-त्स्व1(अ)स्मभ्यं महि वरिव.स्सुग.ङ्कः~। अपा.न्तोकस्य तनयस्य जेषे- इन्द्र सूरी.न्कृणुहि स्मा नो अर्धम्।।

卐 आ त्वा हरयो वृषणो युजाना^- वृषरथासो वृषरश्मयोऽत्याः। अस्मत्राञ्चो वृषणो वज्रवाहो- वृष्णे मदाय सुयुजो वहन्तु।।

卐 आ ते वृष.न्वृषणो द्रोण.मस्थु- र्घृतप्रुषो नोर्मयो मदन्तः। इन्द्र प्र तुभ्यँ वृषभि.स्सुतानाँ- वृष्णे भरन्ति वृषभाय सोमम्।।

❀04.07.20 卐वृषाऽसि दिवो वृषभः पृथिव्या^- वृषा सिन्धूनाँ वृषभ.स्स्तियानाम्। वृष्णे त इन्दु र्वृषभ पीपाय- स्वादू रसो मधुपेयो वराय।।

卐 अय.न्देव.स्सहसा जायमान^-इन्द्रेण युजा पणि.मस्तभायत्। अयं स्वस्य पितु रायुधा-नीन्दु रमुष्णा.दशिवस्य मायाः।।

卐 अय.मकृणो.दुषस.स्सुपत्नी- रयं सूर्ये अदधा.ज्ज्योति रन्तः। अय.त्रिधातु दिवि रोचनेषु- त्रितेषु विन्द.दमृत.न्निगूळ्हम्।।

卐 अय.न्द्यावापृथिवी~ वि ष्कभाय-दयं रथं.मयुन.क्सप्तरश्मिम्। अय.ङ्गोषु शच्या पक्व.मन्त-स्सोमो दाधार दशयन्त्र.मुत्सम्।।

卐 अथ परिशिष्टम्।।

卐 चक्षुश्च श्रोत्रञ्च मनश्च वाक्च -प्राणापानौ देह इदं शरीरम्। द्वौ प्रत्यञ्चा वनुलोमौ विसर्गा-वेत.न्तं मन्ये दशयन्त्र.मुत्सम्।।

卐 नखश्च पृष्ठश्च करौ च बाहू- जङ्घे चोरू उदरं शिरश्च। रोमाणि मांसं रुधिराऽस्थिमज्ज-मेतच्छरीर.ञ्जलबुद्बुदोपमम्।।

卐 भ्रुवौ ललाटे च तथा च कर्णौ- हनू कपोलौ छुबुक स्तथा च। ओष्ठौ च दन्ताश्च तथैव जिह्वा- मे तच्छरीरं मुखरत्नकोशम्।।

卐 इति परिशिष्टम्।।

6.45 य आनयदिति त्रयस्त्रिंशदृचस्य सूक्तस्य, शँयु-रिन्द्रोऽन्त्यतृचस्य बृबुस्तक्षा- गायत्री-एकोनत्रिंश्यतिनिचृ-देकत्रिंशी पादनिचृ-दन्त्याऽनुष्टुप्।।

04.07.21 卐य^ आऽनय.त्परावत-स्सुनीती तुर्वशँ यदुम्। इन्द्र.स्स नो युवा सखा।।

卐 अविप्रे चिद्वयो दध-दनाशुना चिदर्वता। इन्द्रो जेता हित.न्धनम्।।

卐 मही रस्य प्रणीतयः- पूर्वी रुत प्रशस्तयः। नास्य क्षीयन्त ऊतयः।।

卐 सखायो ब्रह्मवाहसे-ऽर्चत प्र च गायत। स ^हि नः प्रमति र्मही।।

卐 त्वमेकस्य वृत्रह.न्नविता द्वयो रसि। उते.दृशे यथा वयम्।।

04.07.22 卐नयसीद्वति द्विषः- कृणो.ष्युक्थशंसिनः। नृभि.स्सुवीर^उच्यसे।।

卐 ब्रह्माणं ब्रह्मवाहस-ङ्गीर्भि स्सखाय.मृग्मियम्। गान्न दोहसे हुवे।।

卐 यस्य विश्वानि हस्तयो- रूचु र्वसूनि नि द्विता। वीरस्य पृतनाषहः।।

卐 वि दृळ्हानि चिदद्रिवो- जनानां शचीपते। वृह माया^ अनानत।।

卐 तमु त्वा सत्य सोमपा^- इन्द्र वाजानां पते। अहूमहि श्रवस्यवः।।

❀04.07.23 卐तमु त्वा यः पुराऽसिथ- यो वा नूनं हिते धने। हव्य.स्स श्रुधी हवम्।।

卐 धीभि रर्वद्भि रर्वतो -वाजाँ इन्द्र श्रवाय्यान्। त्वया जेष्म हित.न्धनम्।।

卐 अभूरु वीर गिर्वणो- महाँ इन्द्र धने हिते। भरे वितन्तसाय्यः।।

卐 या त ऊति रमित्रह-न्मक्षूजवस्तमाऽसति। तया नो हिनुही रथम्।।

卐 स रथेन रथीतमो-ऽस्माकेनाभियुग्वना। जेषि जिष्णो~ हित.न्धनम्।।

❀04.07.24 卐य^ एक^ इत्तमु ष्टुहि- कृष्टीनाँ विचर्षणिः। पति र्जज्ञे वृषक्रतुः।।

卐 यो गृणता.मिदासिथा-ऽऽपि रूती शिव स्सखा। स त्वन्न^ इन्द्र मृळय।।

卐 धिष्व वज्र.ङ्गभस्त्यो- रक्षोहत्याय वज्रिवः। सासहीष्ठा^ अभि स्पृधः।।

卐 प्रत्नं रयीणाँ युजं- सखाय.ङ्कीरिचोदनम्। ब्रह्मवाहस्तमं हुवे।।

卐 स हि विश्वानि पार्थिवाँ- एको वसूनि पत्यते। गिर्वण.स्तमो अध्रिगुः।।

❀04.07.25 卐स नो नियुद्भि रा पृण- कामँ वाजेभि रश्विभिः। गोमद्भि र्गोपते धृषत्।।

卐 तद्वो गाय सुते सचा -पुरुहूताय सत्वने। शँ यद्गवे न शाकिने।।

卐 न घा वसु र्नि यमते- दानँ वाजस्य गोमतः। यत्सी.मुप श्रव.द्गिरः।।

卐 कुवि.त्सस्य प्र हि व्रज-ङ्गोमन्त.न्दस्युहा गमत्। शचीभि रप नो वरत्।।

卐 इमा^ उ त्वा शतक्रतो~-ऽभि प्र णोनुवु र्गिरः। इन्द्र वत्स.न्न मातरः।।

❀04.07.26 卐दूणाशं सख्य.न्तव- गोरसि वीर गव्यते। अश्वो अश्वायते भव।।

卐 स मन्दस्वा ह्यन्धसो- राधसे तन्वा महे। न स्तोतार.न्निदे करः।।

卐 इमा^ उ त्वा सुतेसुते- नक्षन्ते गिर्वणो गिरः। वत्स.ङ्गावो न धेनवः।।

卐 पुरूतमं पुरूणां -स्तोतृणाँ विवाचि। वाजेभि र्वाजयताम्।।

卐 अस्माक.मिन्द्र भूतु ते- स्तोमो वाहिष्ठो अन्तमः। अस्मा.न्राये महे हिनु।।

卐 अधि बृबुः पणीनाँ- वर्षिष्ठे मूर्ध.न्नस्थात्। उरुः कक्षो न गाङ्ग्यः।।

卐 यस्य वायोरिव द्रव-द्भद्रा राति.स्सहस्रिणी। सद्यो दानाय मंहते।।

卐 तत्सु नो विश्वे अर्य^ आ- सदा गृणन्ति कारवः। बृबुं संहस्रदातमं- सूरिं संहस्रसातमम्।।

6.46 त्वामिद्धीति चतुर्दशर्चस्य सूक्तस्य, बार्हस्पत्यश्शँयु-रिन्द्र- अयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀04.07.27 卐त्वामिद्धि हवामहे- साता वाजस्य कारवः। त्वाँ वृत्रे.ष्विन्द्र सत्पतिन्नर-स्त्वाङ्काष्ठा .स्वर्वतः।।

卐 स त्व.न्न.श्चित्र वज्रहस्त धृष्णुया- मह.स्स्तवानो अद्रिवः। गामश्वं रथ्य.मिन्द्र स.ङ्किर- सत्रा वाज.न्न जिग्युषे।।

卐 य.स्सत्राहा विचर्षणि- रिन्द्र.न्तं हूमहे वयम्। सहस्रमुष्क तुविनृम्ण सत्पते- भवा समत्सु नो वृधे।।

卐 बाधसे जना.न्वृषभेव मन्युना- घृषौ मीळ्ह ऋचीषम। अस्माकं बोध्यविता महाधने -तनू.ष्वप्सु सूर्ये।।

卐 इन्द्र ज्येष्ठ.न्न^ आ भरँ- ओजिष्ठं पपुरि श्रवः। येनेमे चित्र वज्रहस्त रोदसी- ओभे~ सुशिप्र प्राः।।

❀04.07.27 卐त्वा.मुग्र.मवसे चर्षणीसहं- राज.न्देवेषु हूमहे। विश्वा सु नो विथुरा पिब्दना वसो- ऽमित्रा .न्त्सुषहा.न्कृधि।।

卐 यदिन्द्र नाहुषीष्वा३- ओजो नृम्ण.ञ्च कृष्टिषु। यद्वा पञ्च क्षितीनान्द्युम्न मा भर- सत्रा विश्वानि पौंस्या।।

卐 यद्वा तृक्षौ मघव.न्द्रुह्यावा जने- यत्पूरौ कच्च वृष्ण्यम्। अस्मभ्य.न्तद्रिरीहि सन्नृषाह्ये-ऽमित्रा.न्पृत्सु तुर्वणे।।

卐 इन्द्र त्रिधातु शरण-न्त्रिवरूथं स्वस्तिमत्। छर्दिर्यच्छ मघवद्भ्य.श्च मह्य.ञ्च- यावया दिद्युमेभ्यः।।

卐 ये गव्यता मनसा शत्रु.मादभु- रभिप्रघ्नन्ति धृष्णुया। अध स्मा नो मघव.न्निन्द्र गिर्वण-स्तनूपा^ अन्तमो भव।।

❀04.07.29 卐अध स्मा नो वृधे भ-वेन्द्र नाय.मवा युधि। यदन्तरिक्षे पतयन्ति पर्णिनो- दिद्यव .स्तिग्ममूर्धानः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 यत्र शूरास.स्तन्वो वितन्वते- प्रिया शर्म पितृणाम्। अध स्मा यच्छ तन्वे3(ए) तने- च छर्दि रचित्तँ यावय द्वेषः।।

卐 यदिन्द्र सर्गे अर्वत-श्चोदयासे महाधने। असमने अध्वनि वृजिने पथि- श्येनाऽइव श्रवस्यतः।।

卐 सिन्धूऽरिव प्रवण आशुया यतो- यदि क्लोश.मनु ष्वणि। आ ये वयो न वर्वृत.त्यामिषि- गृभीता बाह्वो गवि।।

6.47 स्वादुष्किलायमित्येकत्रिंशदृचस्य सूक्तस्य, भारद्वाजो गर्ग- इन्द्र-आद्यानां पञ्चानां सोमोऽगव्यूतीत्यस्या देव भूमीन्द्राः-प्रस्तोक इत्यादि चतसृणां प्रस्तोको- वनस्पत इत्यादि तिसृणां रथ- उप श्वासयेति द्वयो र्दुन्दुभिः-आमूरजेत्यस्या दुन्दुभीन्द्रौ त्रिष्टुप्-एकोनविंशी बृहती त्रयोविंश्यनुष्टुप्- चतुर्विंशी गायत्री- पञ्चविंशी द्विपदा- सप्तविंशी जगती।।

❀04.07.30 卐स्वादु.ष्किलायं मधुमाँ उतायं-न्तीव्रः किलायं रसवाँ उतायम्। उतो~ न्व1(अ)स्य पपिवांस.मिन्द्र-न्न कश्चन सहत आहवेषु।।

卐 अयं स्वादु रिह मदिष्ठ^ आस- यस्येन्द्रो वृत्रहत्ये ममाद। पुरूणि यश्च्यौत्ना शम्बरस्य -वि नवति.न्नव च देह्यो3(ओ) हन्न्।।

卐 अयं मे पीत^ उदियर्ति वाच-मयं मनीषा.मुशती.मजीगः~। अयं षळुर्वी रमिमीत धीरो- न याभ्यो भुवन.ङ्कच्चनाऽरे।।

卐 अयं स यो वरिमाणं पृथिव्या^- वर्ष्माण.न्दिवो अकृणो.दयं सः। अयं पीयूष.न्तिसृषु प्रवत्सु- सोमो दाधारोर्व1(अ)न्तरिक्षम्।।

卐 अयँ विद.च्चित्रदृशीक.मर्ण-श्शुक्रसद्मना.मुषसा.मनीके। अयं महा.न्महता स्कम्भने-नोद्या.मस्तभ्ना .द्वृषभो मरुत्वान्।।

❀04.07.31 卐धृष.त्पिब कलशे सोम.मिन्द्र- वृत्रहा शूर समरे वसूनाम्। माध्यन्दिने सवन आ वृषस्व- रयिस्थानो रयि.मस्मासु धेहि।।

卐 इन्द्र प्र णः पुर.एतेव पश्य- प्र नो नय प्रतरँ वस्यो अच्छ। भवा सुपारो अतिपारयो नो- भवा सुनीति रुत वामनीतिः।।

卐 उरु.न्नो लोक.मनु नेषि विद्वा-न्त्स्वर्व.ज्ज्योति रभयं स्वस्ति। ऋष्वा त इन्द्र स्थविरस्य बाहू~- उप स्थेयाम शरणा बृहन्ता।।

卐 वरिष्ठे न इन्द्र वन्धुरे धा^- वहिष्ठयो.श्शताव.न्नश्वयोरा। इषमा वक्षीषाँ वर्षिष्ठां- मा न.स्तारी.न्मघव .न्रायो अर्यः।।

卐 इन्द्र मृळ मह्य.ञ्जीवातु.मिच्छ- चोदय धिय.मयसो न धाराम्। यत्कि.ञ्चाह-न्त्वायु रिदँ वदामि- तज्जुषस्व कृधि मा देववन्तम्।।

❀04.07.32 卐त्रातार.मिन्द्र मवितार.मिन्द्रं- हवेहवे सुहवं शूर.मिन्द्रम्। ह्वयामि शक्रं पुरुहूत.मिन्द्रं - स्वस्ति नो मघवा धात्विन्द्रः।।

卐 इन्द्र.स्सुत्रामा.स्ववा अवोभि-स्सुमृळीको भवतु विश्ववेदाः। बाधता.न्द्वेषो अभय.ङ्कृणोतु- सुवीर्यस्य पतय.स्स्याम।।

卐 तस्य वयं सुमतौ यज्ञिय-स्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववा इन्द्रो अस्मे- आरा.च्चि .द्द्वेष स्सनुत युयोतु।।

卐 अव त्वे इन्द्र प्रवतो नोर्मि- र्गिरो ब्रह्माणि नियुतो धवन्ते। उरू न राध.स्सवना पुरू-ण्यपो गा ^वज्रि .न्युवसे समिन्दून्।।

卐 क^ ईं स्तव.त्कः पृणा.त्को यजाते- यदुग्रमि.न्मघवा विश्वहाऽवेत्। पादाविव प्रहर.न्नन्यमन्य- ङ्कृणोति पूर्व.मपरं शचीभिः।।

❀04.07.33 卐शृण्वे वीर^ उग्रमुग्र.न्दमाय-न्नन्यमन्य.मतिनेनीयमानः। एधमानद्वि.ळुभयस्य राजा- चोष्कूयते विश^ इन्द्रो मनुष्यान्।।

卐 परा पूर्वेषां सख्या वृणक्ति- वितर्तुराणो अपरेभि रेति। अनानुभूती रवधून्वानः- पूर्वी रिन्द्र.श्शरद स्तर्तरीति।।

卐 रूपंरूपं प्रतिरूपो बभूव- तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप^ ईयते- युक्ता.ह्यस्य हरय .श्शता दश।।

卐 युजानो हरिता रथे- भूरि त्वष्टेह राजति। को विश्वाहा द्विषतः पक्ष^आसत- उताऽसीनेषु सूरिषु।।

卐 अगव्यूति क्षेत्र.मागन्म देवा^-उर्वी सती भूमि रंहू रणाऽभूत्। बृहस्पते प्र चिकित्सा गविष्टा-वित्था सते जरित्र इन्द्र पन्थाम्।।

❀04.07.34 卐दिवेदिवे सदृशी रन्य.मर्ध-कृष्णा^ असेध.दप सद्मनो जाः। अहन्दासा वृषभो वस्नय-न्तोदव्रजे वर्चिनं शम्बरञ्च।।

卐 प्रस्तोक^ इन्नु राधस.स्त इन्द्र- दश कोशयी र्दश वाजिनोऽदात्। दिवोदासा.दतिथिग्वस्य राध-श्शाम्बरँ वसु प्रत्यग्रभीष्म।।

卐 दशाश्वा.न्दश कोशा-न्दश वस्त्राऽधिभोजना। दशो हिरण्यपिण्डा-न्दिवोदासा.दसानिषम्।।

卐 दश रथा.न्प्रष्टिमत-श्शत.ङ्गा^ अथर्वभ्यः। अश्वथः पायवेऽदात्।।

卐 महि राधो विश्वजन्य-न्दधाना.न्भरद्वाजा.न्त्साञ्जयो अभ्ययष्ट।।

❀04.07.35 卐वनस्पते वीड्वङ्गो हि भूया^ -अस्मत्सखा प्रतरण.स्सुवीरः। गोभि.स्स.न्नद्धो असि वीळयस्वा-ऽस्थाता ते जयतु जेत्वानि।।

卐 दिवस्पृथिव्याः पर्योज^ उद्धृतँ- वनस्पतिभ्यः पर्याभृतं सहः-। अपा.मोज्मानं परि गोभि रावृत-मिन्द्रस्य वज्रं हविषा रथँ यज।।

卐 इन्द्रस्य वज्रो मरुता.मनीकं- मित्रस्य गर्भो वरुणस्य नाभिः। सेमा.न्नो हव्यदाति.ञ्जुषाणो -देव रथ प्रति हव्या गृभाय।।

卐 उप श्वासय पृथिवी.मुत द्यां- पुरुत्रा ते मनुताँ विष्ठित.ञ्जगत्। स दुन्दुभे सजू रिन्द्रेण देवै- र्दूरा.द्दवीयो अप सेध शत्रून्।।

卐 आ क्रन्दय बल.मोजो न^ आ धा^- निष्टनिहि दुरिता बाधमानः। अप प्रोथ दुन्दुभे दुच्छुना^ इत^-इन्द्रस्य मुष्टिरसि वीळयस्व।।

卐 आऽमू रंज प्रत्यावर्तयेमाः- केतुम.दुन्दुभि र्वावदीति। समश्वपर्णा.श्चरन्ति नो नरो- ऽस्माकं.मिन्द्र रथिनो जयन्तु।।।। इति सप्तमाध्याय स्समाप्तः।।

## चतुर्थाष्टके अष्टमाध्यायः। वर्गाः(1-32)

6.48 यज्ञायज्ञा व इति द्वाविंशत्यृचस्य सूक्तस्य, बार्हस्पत्य शशँयु-स्तृणपाणिः- आद्यानां दशानामग्निरेकादश्यादि पञ्चानां मरुत-स्ततश्चतुर्णां पूषा-ततस्तृचस्य मरुतः(त्रयोदश्यादि तिसृणा मिन्द्रार्यम पूष विष्ण्वाद्या लिङ्गोक्त देवता वा-अन्त्ययोर्द्यावाभूमी वा पृश्निर्वा) आद्या बृहती- द्वितीया सतो बृहती- तृतीया बृहती- चतुर्थी सतो बृहती- पञ्चमी बृहती- षष्ठी महासतोबृहती- सप्तमी महाबृहती- अष्टमी महासतोबृहती- नवमी बृहती- दशमी सतोबृहती- एकादशी ककुप्- द्वादशी सतोबृहती- त्रयोदशी पुरउष्णिक्- चतुर्दशी बृहती- पञ्चदश्यतिजगती- षोडशी ककुप्- सप्तदशी सतोबृहती- अष्टादशी पुरउष्णिक्-एकोनविंशी बृहती- विंशी बृहती- एकविंशी महाबृहती- यवमध्या द्वाविंश्यनुष्टुप्- (पृश्निसूक्तमिदम्)

04.08.01 卐यज्ञायज्ञा वो अग्नये- गिरागिरा च दक्षसे। प्रप्र वय.ममृत.ञ्जातवेदसं- प्रियं.मित्र.न्न शंसिषम्।।

卐 ऊर्जो नपातं स हिनाऽय.मस्मयु- र्दाशेम हव्यदातये। भुव.द्वाजे.ष्वविता भुव.द्वृध^- उत त्राता तनूनाम्।।

卐 वृषा.ह्यग्ने अजरो- महा.न्विभा.स्यर्चिषा। अजस्रेण शोचिषा शोशुचच्छुचे- सुदीतिभि.स्सु दीदिहि।।

卐 महो देवा.न्यजसि यक्ष्यानुष-क्तव क्रत्वोत दंसना। अर्वाच स्सी.ङ्कृणु.ह्यग्नेऽवसे- रास्व वाजोत वंस्व।।

卐 यमापो अद्रयो वना- गर्भ.मृतस्य पिप्रति। सहसा यो मथितो जायते नृभिः- पृथिव्या^ अधि सानवि।।

04.08.02 卐आ यः पप्रौ भानुना रोदसी उभे~- धूमेन धावते दिवि। तिर स्तमो ददृश ऊर्म्या.स्वा-श्यावा स्वरुषो वृषा -ऽऽश्यावा अरुषो वृषा।।

卐 बृहद्भि रग्ने अर्चिभि-श्शुक्रेण देव शोचिषा। भरद्वाजे समिधानो यविष्ठ्य- रेव.न्न.श्शुक्र दीदिहि द्युम.त्पावक दीदिहि।।

卐 विश्वासा.ङ्गृहपति विशा.मसि- त्वमग्ने मानुषीणाम्। शतं पूर्भि र्यविष्ठ पाह्यंहस-स्समेद्धारं शतं हिमा-स्स्तोतृभ्यो ये च दर्दति।।

卐 त्व.न्न श्चित्र ^ऊत्या- वसो~ राधांसि चोदय। अस्य राय.स्त्वमग्ने रथीरसि- विदा गाध.न्तुचे तु नः।।

卐 पर्षि तोक.न्तनयं पर्तृभि.ष्ट्व-मदब्धै रप्रयुत्वभिः। अग्ने हेळांसि दैव्या युयोधि नो-ऽदेवानि ह्वरांसि च।।

❀04.08.03 卐आ सखाय.स्सबर्दुघा-न्धेनु.मजध्व.मुप नव्यसा वचः। सृजध्व.मनपस्फुराम्।।

卐 या शर्धाय मारुताय स्वभानवे- श्रवोऽमृत्यु धुक्षत। या मृळीके मरुता.न्तुराणाँ -या सुम्नै रेवयावरी।।

卐 भरद्वाजायाव धुक्षत द्विता। धेनु.ञ्च विश्वदोहस-मिष.ञ्च विश्वभोजसम्।।

卐 तँ व^ इन्द्र.न्न सुक्रतुँ- वरुण.मिव मायिनम्। अर्यमण.न्न मन्द्रं सृप्रभोजसँ- विष्णु.न्न स्तुष आदिशे।।

卐 त्वेषं शर्धो न मारुत.न्तुविष्व-ण्यनर्वाणं पूषणं सँ यथा शता। सं सहस्रा कारिष.च्चर्षणिभ्य^ आ९-आविर्गूळ्हा वसू करत्सुवेदा नो वसू करत्।।

卐 आ मा पूष.न्नुप द्रव- शंसिष.न्नु ते अपिकर्ण आघृणे। अघा^ अर्यो अरातयः।।

❀04.08.04 卐मा काकम्बीर.मुद्वृहो -वनस्पति.मशस्ती र्वि हि नीनशः। मोत सूरो अह~ एवा चन-ग्रीवा^ आदधते वेः~।।

卐 दृतेरिव तेऽवृक.मस्तु सख्यम्। अच्छिद्रस्य दधन्वत-स्सुपूर्णस्य दधन्वतः।।

卐 परो हि मर्त्यै रसि -समो देवै रुत श्रिया। अभि ख्यः पूष.न्पृतनासु नस्त्व-मवा नूनँ यथा पुरा।।

卐 वामी वामस्य धूतयः- प्रणीति रस्तु सूनृता। देवस्य वा मरुतो मर्त्यस्य-वेजानस्य प्रयज्यवः।।

卐 सद्य.श्चि.द्यस्य चर्कृतिः- परि द्या.न्देवो नैति सूर्यः। त्वेषं शवो दधिरे नाम यज्ञियं -मरुतो वृत्रहं शवो- ज्येष्ठँ वृत्रहं शवः।।

卐 सकृद्ध द्यौ रजायत -सकृ.द्भूमि रजायत। पृश्न्या^ दुग्धं सकृ.त्पय-स्तदन्यो नानु जायते।।

卐 ✡।। अथ परिशिष्टम्।।

卐 सूक्तान्तेऽस्येत्तृणान्यग्ना -विरिणे वोदकेऽपि वा। यदस्तृणै रधीत.न्तत्तृणानि भवति ध्रुवम्।।

卐 वापीकूपतडागानां- समुद्रङ्गच्छ स्वाहा-ऽग्नि ङ्गच्छ स्वाहा। इति परिशिष्टम्।।

6.49 स्तुषे जनमिति पञ्चदशर्चस्य सूक्तस्य, भारद्वाज ऋजिश्वा- विश्वेदेवा- स्त्रिष्टु-बन्त्या शक्वरी (इतश्चत्वारि वैश्व।।भेदपक्षे –विश्वेदेवाः 1-अग्निः 1-अहोरात्रे 1-वायुः 1-अश्विनौ 1-विश्वेदेवाः 1-सरस्वती 1-पूषा 1-अग्नित्वष्टारौ 1-रुद्रः 1-मरुतः 2-विष्णुः 1-विश्वेदेवाः 2-एवं 15)

❀04.08.05 卐स्तुषे जनं सुव्रत.न्नव्यसीभि- र्गीर्भि र्मित्रावरुणा सुम्नयन्ता। त आ गमन्तु त इह श्रुवन्तु- सुक्षत्रासो वरुणो मित्रो अग्निः।।

卐 विशोविश^ ईड्य.मध्वरे-ष्वदृप्तक्रतु.मरतिँ युवत्योः। दिव.श्शिशुं सहस.स्सूनु-मग्निँ यज्ञस्य केतु.मरुषँ यजध्यै।।

卐 अरुषस्य दुहितरा विरूपे~- स्तृभि रन्या पिपिशे सूरो अन्या। मिथस्तुरा विचरन्ती~ पावके~- मन्म श्रुत.न्नक्षत^ ऋच्यमाने~।।

卐 प्र वायु.मच्छा बृहती मनीषा- बृह.द्रयिँ विश्ववारं रथप्राम्। द्युतद्यामा नियुतः पत्यमानः- कविः कवि .मियक्षसि प्रयज्यो~।।

卐 स मे वपु.श्छदय.दश्विनो-र्यो रथो विरुक्मा.न्मनसा युजानः। येन नरा नास.त्येषयध्यै- वर्ति र्याथ .स्तनयाय त्मने च।।

❀04.08.06 卐पर्जन्यवाता वृषभा पृथिव्याः- पुरीषाणि जिन्वत.मप्यानि। सत्यश्रुतः कवयो यस्य गीर्भि- र्जगत.स्स्थात र्जगदा कृणुध्वम्।।

卐 पावीरवी कन्या चित्राऽयु-स्सरस्वती वीरपत्नी धिय.न्धात्। ग्नाभि रच्छिद्रं शरणं सजोषा^ -दुराधर्ष.ङ्गृणते शर्म यंसत्।।

卐 पथस्पथः परिपतिँ वचस्या- कामेन कृतो अभ्यान.ळर्कम्। स नो रास.च्छुरुध.श्चन्द्राग्रा^- धियन्धियं सीषधाति प्र पूषा।।

卐 प्रथमभाजँ यशसँ वयोधां- सुपाणि.न्देवं सुगभस्ति.मृभ्वम्। होता यक्ष.द्यजतं पस्त्याना-मग्नि.स्त्वष्टारं सुहवँ विभावा।।

卐 भुवनस्य पितर.ङ्गीर्भि राभी- रुद्र.न्दिवा वर्धया रुद्र.मक्तौ। बृहन्त.मृष्व.मजरं सुषुम्न-मृध.ग्घुवेम कविनेषितासः।।

❀04.08.07 卐आ युवानः कवयो यज्ञियासो- मरुतो गन्त गृणतो वरस्याम्। अचित्र.ञ्चिद्धि जिन्वथा वृधन्त^- इत्था नक्षन्तो नरो अङ्गिरस्वत्।।

卐 प्र वीराय प्र तवसे तुरा-याजा यूथेव पशुरक्षि रस्तम्। स पिस्पृशति तन्वि श्रुतस्य- स्तृभि र्न नाकँ वचनस्य विपः।।

卐 यो रजांसि विममे पार्थिवानि- त्रिश्चि.द्विष्णु र्मनवे बाधिताय। तस्य ते शर्म.न्नुपदद्यमाने- राया मदेम तन्वा3(आ)तना च।।

卐 तन्नोऽहि बुध्न्यो अद्भि रर्कै- स्त.त्पर्वत.स्तत्सविता चनो धात्। तदोषधीभि रभि रातिषाचो- भगः पुरन्धि र्जिन्वतु प्र राये।।

卐 नू नो रयिं रथ्य.ञ्चर्षणिप्रां- पुरुवीरं.मह^ ऋतस्य गोपाम्। क्षय.न्दाताजरं ये न जना-न्त्स्पृधो अदेवी रभि च क्रमाम विश^आदेवी रभ्य1(अ)श्नवाम।।

6.50 हुवे व इति पञ्चदशर्चस्य सूक्तस्य, भारद्वाद ऋजिश्वा- विश्वेदेवा- स्त्रिष्टुप्- (भेदपक्षे – विश्वे देवाः-1-सूर्यः 1-द्यावापृथिवी 1-मरुतः 2-इन्द्रः 1-अपः 1-सविता 1-अग्निः 1-अश्विनौ 1-विश्वे देवाः5-एवं 15)

❀04.08.08 卐हुवे वो देवी.मदिति.न्नमोभि- र्मृळीकाय वरुणं मित्र.मग्निम्। अभिक्षदा.मर्यमणं सुशेव -न्त्रातृ.न्देवा.न्त्सवितारं भग.ञ्च।।

卐 सुज्योतिष.स्सूर्य दक्षपितृ-ननागा.स्त्वे सुमहो वीहि देवान्। द्विजन्मानो य ऋतसाप.स्सत्या- स्स्वर्वन्तो यजता^ अग्निजिह्वाः।।

卐 उत द्यावापृथिवी~ क्षत्र.मुरु- बृह.द्रोदसी शरणं सुषुम्ने~। मह.स्करथो वरिवो यथा नो-ऽस्मे क्षयाय धिषणे~ अनेहः।।

卐 आ नो रुद्रस्य सूनवो नमन्ता- मद्या हूतासो वसवोऽधृष्टाः। यदी.मर्भे महति वा हितासो- बाधे मरुतो अह्वाम देवान्।।

卐 मिम्यक्ष येषु रोदसी नु देवी- सिषक्ति पूषा अभ्यर्धयज्वा। श्रुत्वा हवं मरुतो यद्ध याथ- भूमा रेजन्ते अध्वनि प्रविक्ते।।

❀04.08.09 卐अभि त्यँ वीर.ङ्गिर्वणस.म-चेन्द्रं ब्रह्मणा जरित र्नवेन। श्रव.दि.द्धव.मुप च स्तवानो- रास .द्वाजा१ उप महो गृणानः।।

卐 ओमान.मापो मानुषी रमृक्त-न्धात तोकाय तनयाय शँ योः। यूयं हि ष्ठा भिषजो मातृतमा^ विश्वस्य स्थातु र्जगतो जनित्रीः।।

卐 आ नो देव.स्सविता त्रायमाणो- हिरण्यपाणि र्यजतो जगम्यात्। यो दत्रवा१ उषसो न प्रतीकँ - व्यूर्णुते दाशुषे वार्याणि।।

卐 उत त्वं सूनो~ सहसो नो अद्या- देवा१ अस्मि.न्नध्वरे ववृत्याः। स्यामहन्ते सदमि.द्रातौ- तव स्या .मग्नेऽवसा सुवीरः।।

卐 उत त्या मे हव.माजग्म्यात-न्नासत्या धीभि र्युव.मङ्ग विप्रा। अत्रि.न्न मह.स्तमसोऽमुमुक्त- न्तूर्वत.न्नरा दुरिता.दभीके।।

❀04.08.10 卐ते नो रायो द्युमतो वाजवतो- दातारो भूत नृवतः पुरुक्षोः। दशस्यन्तो दिव्याः पार्थिवासो- गोजाता^ अप्या मृळता च देवाः।।

卐 ते नो रुद्र.स्सरस्वती सजोषा^-मीळ्हुष्मन्तो विष्णु र्मृळन्तु वायुः। ऋभुक्षा वाजो दैव्यो विधाता- पर्जन्यावाता पिप्यता.मिष.न्नः।।

卐 उत स्य देव.स्सविता भगो नो-ऽपान्नपा.दवतु दानु पप्रिः। त्वष्टा देवेभि र्जनिभि.स्सजोषा^- द्यौ र्देवेभिः पृथिवी समुद्रैः।।

卐 उत नोऽहिर्बुध्न्य.श्शृणो-त्वज^ एकपा.त्पृथिवी समुद्रः। विश्वे देवा^ ऋतावृधो हुवाना-स्स्तुता मन्त्राः कविशस्ता^ अवन्तु।।

卐 एवा नपातो मम तस्य धीभि- र्भरद्वाजा^ अभ्यर्च.न्त्यर्कैः। ग्ना हुतासो वसवोऽधृष्टा^- विश्वे स्तुतासो भूता यजत्राः।।

6.51 उदु त्यदिति षोळेशर्चस्य सूक्तस्य, भारद्वाद ऋजिश्वा- विश्वेदेवा- स्त्रिष्टुप्-त्रयोदश्याद्यास्तिस्र उष्णिहोऽन्त्याऽनुष्टुप्- (भेदपक्षे-सूर्यः 2-विश्वेदेवाः 10-अग्निः 1-सोमः 1-विश्वेदेवाः 2-एवं 16)

❀04.08.11 卐उदु त्य.च्चक्षु र्महि मित्रयो रा॰- एति प्रियँ वरुणयो रदब्धम्। ऋतस्य शुचि दर्शत .मनीकं- रुक्मो न दिव^ उदिता व्यद्यौत्।।

卐 वेद यस्त्रीणि विदथा.न्येषा-न्देवाना.ञ्जन्म सनुत रा च विप्रः। ऋजु मर्तेषु वृजिना च पश्य-न्नभि चष्टे सूरो अर्य^ एवान्।।

卐 स्तुष उ वो मह^ ऋतस्य गोपा-नदितिं मित्रँ वरुणं सुजातान्। अर्यमणं भग.मदब्धधीती-नच्छा वोचे सधन्य॰ पावकान्।।

卐 रिशादस.स्सत्पती॰ रदब्धा-न्महो राज्ञ.स्सुवसनस्य दातॄन्। यून.स्सुक्षत्रा.न्क्षयतो दिवो नॄ-नादित्या .न्याम्यदिति.न्दुवोयु।।

卐 द्यौ3(औ)ष्पित॰ पृथिवि मातरध्रु-गग्ने भ्रात र्वसवो मृळता नः। विश्व आदित्या^ अदिते सजोषा^- अस्मभ्यं शर्म बहुलँ वि यन्त।।

❀04.08.12 卐मा नो वृकाय वृक्ये समस्मा -अघायते रीरधता यजत्राः। यूयं हि ष्ठा रथ्यो न.स्तनूनाँ- यूय.न्दक्षस्य वचसो बभूव।।

卐 मा व^ एनो अन्यकृतं भुजेम- मा तत्कर्म वसवो यच्चयध्वे। विश्वस्य हि क्षयथ विश्वदेवा-स्स्वयं रिपु स्तन्वं रीरिषीष्ट।।

卐 नम.इदु.ग्रन्नम^ आ विवासे- नमो दाधार पृथिवी.मुत द्याम्। नमो देवेभ्यो नम^ ईश एषा-कृत.ञ्चिदेनो नमसा ऽऽविवासे।।

卐 ऋतस्यं वो रथ्यः पूतदक्षा-नृतस्यं पस्त्यसदो अदब्धान्। ताᳪ आ नमोभि रुरुचक्षसो नृ-न्विश्वान्व^ आ नमे महो यजत्राः।।

卐 ते हि श्रेष्ठवर्चस.स्त उ न-स्तिरो विश्वानि दुरिता नयन्ति। सुक्षत्रासो वरुणो मित्रो अग्नि-र् ऋतधीतयो वक्मराजसत्याः।।

❀04.08.13 卐ते न^ इन्द्रः पृथिवी क्षाम वर्ध-न्पूषा भगो अदितिः पञ्च जनाः। सुशर्माण.स्स्ववस .स्सुनीथा^- भवन्तु न.स्सुत्रात्रास.स्सुगोपाः।।

卐 नूं सद्मान.न्दिव्य.न्नंशि देवा^- भारद्वाज.स्सुमतिं याति होता। आसानेभि र्यजमानो मियेधै-र्देवाना.ञ्जन्म वसूयु र्ववन्द।।

卐 अप त्यं वृजिनं रिपुं- स्तेन.मग्ने दुराध्यम्। दविष्ठ.मस्य सत्पते कृधी सुगम्।।

卐 ग्रावाण.स्सोम नो हि कं- सखित्वनाय वावशुः। जही न्य1(अ)त्रिणं पणिं वृको हि षः।।

卐 यूयं हि ष्ठा सुदानव^- इन्द्रज्येष्ठा^ अभिद्यवः। कर्ता नो अध्वन्ना सुग.ङ्गोपा^ अमा।।

卐 अपि पन्था.मगन्महि- स्वस्तिगा.मनेहसम्। येन विश्वाः परि द्विषो- वृणक्ति विन्दते वसु।।

6.52 न तद्दिवेति सप्तदशर्चस्य सूक्तस्य, भारद्वाज ऋजिश्वा- विश्वेदेवा- स्त्रिष्टुप्-सप्तम्याद्या ष्षड्गायत्र्य-श्चतुर्दशी जगती- (भेदपक्षे – विश्वेदेवाः 2-सोमः 1-विश्वे 8-अग्निः 1-विश्वे 3-अग्निपर्जन्यौ 1-विश्वे 1-एवं 17)

❀04.08.14 卐न तद्दिवा न पृथिव्याऽनु मन्ये- न यज्ञेन नोत शमीभि राभिः। उब्जन्तु तं सुभ्व1(अः) पर्वतासो- नि हीयता.मतियाजस्य यष्टा।।

卐 अति वा यो मरुतो मन्यते नो- ब्रह्म वा यः क्रियमाण.न्निनित्सात्। तपूंषि तस्मै वृजिनानि सन्तु-ब्रह्मद्विष.मभि तं शोचतु द्यौः।।

卐 किमङ्ग त्वा ब्रह्मण.स्सोम गोपा-ङ्किमङ्ग त्वाऽऽहु रभिशस्तिपा.न्नः। किमङ्ग नः पश्यसि निद्यमाना-न्ब्रह्मद्विषे तपुषिं हेति.मस्य।।

卐 अवन्तु मा.मुषसो जायमाना^- अवन्तु मा सिन्धव॰ पिन्वमानाः। अवन्तु मा पर्वतासो ध्रुवासो-ऽवन्तु मा पितरो देवहूतौ।।

卐 विश्वदानीं सुमनस.स्स्याम -पश्येम नु सूर्य.मुच्चरन्तम्। तथा कर.द्वसुपति र्वसूना-न्देवा॰ ओहानोऽवसा ऽऽगमिष्ठः।।

❀04.08.15 卐इन्द्रो नेदिष्ठ.मवसा ऽऽगमिष्ठ-स्सरस्वती सिन्धुभि॰ पिन्वमाना। पर्जन्यो न^ ओषधीभि र्मयोभु -रग्नि.स्सुशंस.स्सुहव॰ पितेव।।

卐 विश्वे देवास^ आ गत- श्रृणुता म इमं हवम्। एदं बर्हि र्नि षीदत।।

卐 यो वो देवा^ घृतस्नुना- हव्येन प्रतिभूषति। तँ विश्व उप गच्छथ।।

卐 उप न.स्सूनवो गिर- श्श्रृण्व.न्त्वमृतस्य ये। सुमृळीका^ भवन्तु नः।।

卐 विश्वे देवा^ ऋतावृध^ -ऋतुभि र्हवनश्रुतः। जुषन्ताँ युज्यं पयः।।

❀04.08.16 卐स्तोत्र.मिन्द्रो मरुद्गण-स्त्वष्टृमा.न्मित्रो अर्यमा। इमा^ हव्या जुषन्त नः।।

卐 इम.न्नो अग्ने अध्वरं- होत र्वयुनशो यज। चिकित्वा.न्दैव्य.ञ्जनम्।।

卐 विश्वे देवा.श्श्रृणुतेमं हवं मे- ये अन्तरिक्षे य उप द्यविष्ठ। ये अग्निजिह्वा^ उत वा यजत्रा ^-आसद्यास्मि.न्बर्हिषि मादयध्वम्।।

卐 विश्वे देवा^ मम श्रृण्वन्तु यज्ञिया^- उभे~ रोदसी अपा.न्नपाच्च मन्म। मा वो वचांसि परिचक्ष्याणि वोचं -सुम्ने.ष्विद्वो अन्तमा मदेम।।

卐 ये के च ज्मा महिनो अहिमाया^- दिवो जज्ञिरे अपां सधस्थे। ते अस्मभ्य.मिषये विश्व.मायुः- ≈ क्षप^ उस्रा^ वरिवस्यन्तु देवाः।।

卐 अग्नीपर्जन्या.वर्वत.न्धियं मे-ऽस्मि.न्हवे सुहवा सुष्टुति न्नः। इळा.मन्यो जनय.द्गर्भ.मन्य॰- प्रजावती रिष आ धत्त.मस्मे।।

卐 स्तीर्णे बर्हिषि समिधाने अग्नौ -सूक्तेन महा नमसा ऽऽविवासे। अस्मि.न्नो अद्य विदथे यजत्रा^- विश्वे देवा^ हविषि मादयध्वम्।।

6.53 वयमु त्वेति दशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजः पूषा गायत्री-अष्टम्यनुष्टुप्।।

❀04.08.17 वयमु त्वा पथस्पते- रथ.न्न वाजसातये। धिये पूष.न्नयुज्महि।।

卐 अभि नो नर्यं वसु- वीरं प्रयतदक्षिणम्। वाम.ङ्गृहपति.न्नय।।

卐 अदित्सन्त.ञ्चिदाघृणे- पूष.न्दानाय चोदय। पणे.श्चिद्वि म्रदा मनः।।

卐 वि पथो वाजसातये- चिनुहि वि मृधो जहि। साधन्ता.मुग्र नो धियः।।

卐 परि तृन्धि पणीना-माऽरया हृदया कवे। अथे.मस्मभ्यं रन्धय।।

❀04.08.18 卐वि पूष.न्नारया तुद- पणे रिच्छ हृदि प्रियम् अथे.मस्मभ्यं रन्धय।।

卐 आ रिख किकि राकृणु- पणीनां हृदया कवे। अथे.मस्मभ्यं रन्धय।।

卐 यां पूष.न्ब्रह्मचोदनी.मारां बिभ.र्ष्याघृणे। तया समस्य हृदय-मा रिख किकिरा कृणु।।

卐 या ते अष्ट्रा गोओपशा-ऽऽघृणे पशुसाधनी। तस्या.स्ते सुम्न.मीमहे।।

卐 उत नो गोषणि.न्धिय-मश्वसाँ वाजसा.मुत। नृव.त्कृणुहि वीतये।।

6.54 स म्पूषन्निति दशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजः- पूषा- गायत्री।।

❀04.08.19 卐सं पूष.न्विदुषा नय- यो अञ्जसाऽनुशासति। य^ एवेद.मिति ब्रवत्।।

卐 समु

पूष्णा गमेमहि- यो गृहा॰ अभिशासति। इम एवेति च ब्रवत्।।

卐 पूष्ण श्चक्र.न्न रिष्यति- न कोशोऽव पद्यते। नो~ अस्य व्यथते पविः।।

卐 यो अस्मै हविषाऽविध-न्न तं पूषाऽपि मृष्यते। प्रथमो विन्दते वसु।।

卐 पूषा गा^ अन्वेतु नः- पूषा रक्ष.त्वर्वतः। पूषा वाजं सनोतु नः।।

❀04.08.21 卐पूष.न्ननु प्र गा^ इहि- यजमानस्य सुन्वतः। अस्माकं स्तुवता.मुत।।

卐 माकि र्नेश.न्माकीं रिष-न्माकीं सं शारि केवटे। अथारिष्टाभि रागहि।।

卐 शृण्वन्तं पूषणँ वय-मिर्य.मनष्टवेदसम्। ईशानं राय^ ईमहे।।

卐 पूष.न्तव व्रते वय-न्न रिष्येम कदा चन। स्तोतार.स्त इह स्मसि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 परि पूषा परस्ता-द्धस्त.न्दधातु दक्षिणम्। पुन र्नो नष्ट.माऽजंतु।

6.55 एहि वामिति षडृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजः- पूषा- गायत्री।।

04.08.21 卐एहि वाँ विमुचो नपा-दाघृणे सं सचावहै। रथी र् ऋतस्य नो भव।।

卐 रथीतम.ङ्कपर्दिन-मीशानं राधसो महः। राय.स्सखाय.मीमहे।।

卐 रायो धाराऽस्याघृणे- वसो~ राशि रजाश्व। धीवतोधीवत.स्सखा।।

卐 पूषण.न्न्व1(अ)जाश्व-मुप स्तोषाम वाजिनम्। स्वसु र्यो जार^ उच्यते।।

卐 मातुर्दिधिषु.मब्रवं- स्वसुर्जार.श्शृणोतु नः। भ्रातेन्द्रस्य सखा मम।।

卐 आऽजासः पूषणं रथे- निश्रुम्भा.स्ते जनश्रियम्। देवँ वहन्तु बिभ्रतः।।

6.56 य एनमिति षडृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजः- पूषा- गायत्री- अन्त्याऽनुष्टुप्।।

04.08.22 卐य^ एन मादिदेशति- करम्भादिति पूषणम्। न तेन देव^ आदिशे।।

卐 उत घा स रथीतम-स्सख्या सत्पति र्युजा। इन्द्रो वृत्राणि जिघ्नते।।

卐 उतादः परुषे गवि- सूर.श्चक्रं हिरण्ययम्। न्यैरय.द्रथीतमः।।

卐 यदद्य त्वा पुरुष्टुत- ब्रवाम दस्र मन्तुमः। तत्सु नो मन्म साधय।।

卐 इम.ञ्च नो गवेषणं- सातये सीषधो गणम्। आरा.त्पूष.न्नसि श्रुतः।।

卐 आ ते स्वस्ति.मीमह -आरेअघा.मुपावसुम्। अद्या च सर्वतातये- श्व.श्च सर्वतातये।।

6.57 इन्द्रा न्विति षडृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्रापूषणौ- गायत्री।।

04.08.23 卐इन्द्रा नु पूषणा वयं- सख्याय स्वस्तये। हुवेम वाजसातये।।

卐 सोम.मन्य^ उपासद-त्पातवे चम्वो.स्सुतम्। करम्भ.मन्य इच्छति।।

卐 अजा^ अन्यस्य वह्नयो -हरी~ अन्यस्य संभृता। ताभ्याँ वृत्राणि जिघ्नते।।

卐 यदिन्द्रो अनय.द्रितो- मही रपो वृषन्तमः। तत्र पूषाऽभव.त्सचा।।

卐 तां पूष्ण.स्सुमतिँ वयं- वृक्षस्य प्र वया.मिव। इन्द्रस्य चाऽऽरभामहे।।

卐 उत्पूषणँ युवामहे-ऽभीशूऽरिव सारथिः। मह्या इन्द्रं स्वस्तये।।

6.58 शुक्र न्त इति चतुर्ऋचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजः- पूषा- त्रिष्टुप्-द्वितीया जगती।।

❀04.08.24 卐शुक्र.न्ते अन्य.द्यजत.न्ते अन्य-द्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया^ अवसि स्वधावो -भद्रा ते पूष.न्निह राति.रस्तु।।

卐 अजाश्वः पशुपा^ वाजपस्त्यो- धिय.ञ्जिन्वो भुवने विश्वे अर्पितः। अष्ट्रां पूषा शिथिरा.मुद्वरीवृज -त्स.ञ्चक्षाणो भुवना देव^ ईयते।।

卐 या.स्ते पूष.न्नावो अन्त.स्समुद्रे- हिरण्ययी रन्तरिक्षे चरन्ति। ताभि र्यासि दूत्यां सूर्यस्य- कामेन कृत श्रव^ इच्छमानः।।

卐 पूषा सुबन्धु र्दिव^ आ पृथिव्या^-इळस्पति र्मघवा दस्मवर्चाः। यन्देवासो अददु.स्सूर्यायै -कामेन कृत .न्तवसं स्वञ्चम्।।

6.59 प्र नु वोचेति दशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्राग्नी- बृहती- अन्त्याश्चतस्रोऽनुष्टुभः।।

❀04.08.25 卐प्र नु वोचा सुतेषु वाँ -वीर्या3(आ) यानि चक्रथुः। हतासो वां पितरो देवशत्रव^- इन्द्राग्नी ~जीवथो युवम्।।

卐 बळित्था महिमा वा-मिन्द्राग्नी~ पनिष्ठ^ आ। समानो वा.ञ्जनिता भ्रातरा युवँ- यमा.विहेहमातरा।।

卐 ओकिवांसा सुते सचा९ -अश्वा सप्ती~ इवादने। इन्द्रा न्व1(अ)ग्नी~ अवसेह वज्रिणा- वय.न्देवा हवामहे।।

卐 य^ इन्द्राग्नी ~सुतेषु वां -स्तव.त्तेष्वृतावृधा। जोषवाकँ वदतः पज्रहोषिणा- न देवा भसथ.श्चन।।

卐 इन्द्राग्नी~ को अस्य वा-न्देवौ मर्त श्चिकेतति। विषूचो अश्वा.न्युयुजान^ ईयत- एक.स्समान आ रथे।।

❀04.08.26 卐इन्द्राग्नी~ अपादियं- पूर्वाऽगा.त्पद्वतीभ्यः। हित्वी शिरो जिह्वया वावद.च्चर- त्त्रिंश त्पदा न्यक्रमीत्।।

卐 इन्द्राग्नी~ आ हि तन्वते- नरो धन्वानि बाह्वोः। मा नो अस्मि.न्महाधने- परा वर्क्त.ङ्गविष्टिषु।।



Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐 इन्द्रा᳚ग्नी॒~ त᳚पन्ति -मा॒ऽघा^ अ॒र्यो अरा᳚तयः। अप॒ द्वेषां॒.स्याकृ॑तं- युयु॒तं सूर्या॒.दधि॑।।

卐 इन्द्रा᳚ग्नी॒~ युवो र॒पि॒- वसु॑ दि॒व्यानि॒ पार्थि॑वा। आ न॑^ इ॒ह प्र य॑च्छतं- र॒यिँ वि॒श्वायु॑पोषसम्।।

卐 इन्द्रा᳚ग्नी॒~ उक्थवाहसा॒- स्तोमे॑भि र्हवनश्रुता। विश्वा᳚भि र्गी॒र्भि रागत-म॒स्य सोम॑स्य पी॒तये᳚।।

6.60 श्नथद्वृत्रमिति पञ्चदशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्राग्नी- गायत्री-आद्यास्तिस्र स्त्रयोदशी च त्रिष्टुभ- श्चतुर्दशी बृहत्यन्त्याऽनुष्टुप्।।

❀04.08.27 卐श्नथ.द्वृत्र.मु॒त स॑नोति॒ वाज॒-मिन्द्रा॒ यो अ॒ग्नी~ सहु॑री~ सप॒र्यात्। इ॒र॒ज्यन्ता᳚ वस॒व्य॑स्य॒ भूरे॒-स्सह॑स्तमा॒ सह॑सा वाज॒यन्ता᳚।।

卐 ता यो॑धिष्ट.म॒भि गा᳚^ इन्द्र नू॒न-म॒प.स्स्व॑रु॒षसो᳚ अग्न ऊ॒ळ्हाः। दि॒श.स्स्व॑रु॒षस॑^ इन्द्र चि॒त्रा^-अ॒पो गा॒^ अग्ने॑ युवसे नि॒युत्वा᳚न्।।

卐 आ वृ॑त्रहणा वृत्रह॒भि॒.श्शुष्मै॒- रिन्द्र॑ या॒त.न्नमो᳚भि रग्ने अ॒र्वाक्। यु॒वं राधो᳚भि॒ रक॑वेभि रि॒-न्द्राग्ने᳚ अ॒स्मे भ॑वत.मुत्त॒मेभि॑ः।।

卐 ता हु॒वे ययो᳚ रि॒दं- प॒प्ने विश्वं᳚ पुरा कृ॒तम्। इ॒न्द्रा॒ग्नी~ न म॑र्धतः।।

卐 उ॒ग्रा वि॑घनि॒ना॒ मृध॑^- इन्द्रा॒ग्नी~ ह॑वामहे। ता नो᳚ मृळात^ ई॒दृशे᳚।।

❀04.08.27 卐ह॒तो वृ॒त्रा.ण्यार्या᳚- ह॒तो दासा᳚नि॒ सत्प॑ती। ह॒तो विश्वा॒^ अप॒ द्विषः॑।।

卐 इन्द्रा᳚ग्नी॒~ युवा.मि॒मे॒3(ए)-ऽभि स्तोमा᳚^ अनूषत। पिब॑तं शंभुवा सु॒तम्।।

卐 या वां॒ सन्ति॑ पुरु॒स्पृहो᳚- नि॒युतो᳚ दा॒शुषे᳚ नरा। इन्द्रा᳚ग्नी॒~ ताभि॒ राग॑तम्।।

卐 ताभि॒ राग॑च्छत.न्न॒-रोपे॒दं सव॑नं सुतम्। इन्द्रा᳚ग्नी॒~ सोम॑पीतये।।

卐 तमी᳚ळिष्व॒ यो अ॒र्चिषा॒- वना॒ विश्वा᳚ परि॒ष्वज॑त्। कृ॒ष्णा कृ॒णोति॑ जि॒ह्वया᳚।।

❀04.08.28 卐य^ इ॒द्ध आ᳚विवा᳚सति- सु॒म्न.मिन्द्र॑स्य॒ मर्त्यः॑। द्यु॒म्नाय॑ सु॒तरा᳚^ अ॒पः।।

卐 ता नो॒ वाज॑वती॒ रिष॑- आ॒शू॒.न्पि॑पृत.मर्व॑तः। इन्द्र॑.म॒ग्नि.ञ्च॒ वोळ्ह॑वे।।

卐 उ॒भा वा᳚.मिन्द्राग्नी~ आहु॒वध्या᳚- उ॒भा राध॑स.स्स॒ह मा᳚द॒यध्यै᳚। उ॒भा दा॒तारा᳚.वि॒षां र॑यी॒णा-मु॒भा वाज॑स्य सा॒तये᳚ हुवे वाम्।।

卐 आ नो गव्येभि रश्व्यै- र्वसव्यै3(ऐ)रुप गच्छतम्। सखायौ देवौ सख्याय शंभु-वेन्द्राग्नी~ ता हवामहे।।

卐 इन्द्राग्नी~ शृणुतं हवँ -यजमानस्य सुन्वतः। वीतं हव्यान्या गतं- पिबतं सोम्यं मधु।।

6.61 इयमददादिति चतुर्दशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- स्सरस्वती गायत्री- आद्यास्तिस्त्रस्त्रयोदशी च जगत्योऽन्त्या त्रिष्टुप्।।

❀04.08.30 卐इय.मददा.द्रभस.मृणच्युत-न्दिवोदासँ वध्र्यश्वाय दाशुषे। या शश्वन्त.माचखादावसं पणि -न्ता ते दात्राणि तविषा सरस्वति।।

卐 इयं शुष्मेभि र्बिसखाइवारुज-त्सानु गिरीणा.न्तविषेभि रूर्मिभिः। पारावतघ्नी.मवसे सुवृक्तिभि -स्सरस्वती.माविवासेम धीतिभिः।।

卐 सरस्वति देवनिदो नि बर्हय- प्रजाँ विश्वस्य बृसयस्य मायिनः। उत क्षितिभ्योऽवनी रविन्दो- विषमेभ्यो अस्रवो वाजिनीवति।।

卐 प्र णो देवी सरस्वती- वाजेभि र्वाजिनीवती। धीना.मवि.त्र्यवतु।।

❀04.08.31 य.स्त्वा देवि सरस्व-त्युपब्रूते धने हिते। इन्द्र.न्न वृत्रतूर्ये।।

卐 त्वन्देवि सरस्व-त्यवा वाजेषु वाजिनि। रदा पूषेव न.स्सनिम्।।

卐 उत स्या न.स्सरस्वती- घोरा हिरण्यवर्तनिः। वृत्रघ्नी वष्टि सुष्टुतिम्।।

卐 यस्या^ अनन्तो अह्रुत-स्त्वेष.श्चरिष्णु रर्णवः। अम.श्चरति रोरुवत्।।

卐 सा नो विश्वा^अति द्विष-स्स्वसॄ रन्या^ ऋतावरी। अतन्नहेव सूर्यः।।

卐 उत नः प्रिया^ प्रियासु- सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत्।।

❀04.08.32 卐आपप्रुषी पार्थिवा-न्युरु रजो अन्तरिक्षम्। सरस्वती निद.स्पातु।।

卐 त्रिषधस्था सप्तधातुः- पञ्च जाता वर्धयन्ती। वाजेवाजे हव्या भूत्।।

卐 प्र या महिम्ना महिनाऽसु चेकिते- द्युम्नेभि रन्या^ अपसा.मपस्तमा। रथइव बृहती विभ्वने कृ-तोपस्तुत्या चिकितुषा सरस्वती।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 सरस्व.त्यभि नो नेषि वस्यो- माऽप स्फरीः पयसा मा न^ आ धक्। जुषस्व न.स्सख्या वेश्या च-मा त्व.त्क्षेत्रा.ण्यरणानि गन्म।। इति अष्टमाध्याय स्समाप्तः।।

।। इति चतुर्थाष्टकं समाप्तम्।।

## पञ्चमाष्टकम्

## पञ्चमाष्टके प्रथमाध्यायः (वर्गाः 1-27)

6.62 स्तुषे नरेत्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो-ऽश्विनौ-त्रिष्टुप्।।

05.01.01 卐स्तुषे नरा दिवो अस्य प्रसन्ता-ऽश्विना हुवे जरमाणो अर्कैः। या सद्य^ उस्रा व्युषि ज्मो अन्ता-न्युयूषतः पर्युरू वरांसि।।

卐 ता यज्ञमा शुचिभि श्चक्रमाणा- रथस्य भानुं रुरुचू रजोभिः। पुरू वरां.स्यमिता मिमाना-ऽपो धन्वा.न्यति याथो अज्रान्।।

卐 ता ह त्य.द्वर्ति यदरध्र मु-ग्रेत्था- धिय^ ऊहथु श्शश्व.दश्वैः। मनोजवेभि, रिषिरै श्शयध्यै- परि व्यथि र्दाशुषो मर्त्यस्य।।

卐 ता नव्यसो जरमाणस्य मन्मो-प भूषतो युयुजानसप्ती~। शुभं पृक्ष मिष मूर्जँ वहन्ता- होता यक्ष.त्प्रत्नो अध्रु.ग्युवाना।।

卐 ता वल्गू~ दस्रा पुरुशाकतमा - प्रत्ना नव्यसा वचसाऽऽविवासे। या शंसते स्तुवते शम्भविष्ठा-बभूवतु र्गृणते चित्रराती~।।

05.01.02 卐ता भुज्युँ विभि रद्भ्य स्समुद्रा-त्तुग्रस्य सूनु.मूहथू रजोभिः। अरेणुभि र्योजनेभि र्भुजन्ता-पतत्रिभि रर्णसो नि रुपस्थात्।।

卐 वि जयुषा रथ्या यात.मद्रिं- श्रुतं हवँ वृषणा वध्रिमत्याः। दशस्यन्ता शयवे पिप्यथु.र्गा- मिति च्यवाना सुमतिं भुरण्यू~।।

卐 यद्रोदसी प्रदिवो अस्ति भूमा- हेळो देवाना.मुत मर्त्यत्रा। तदादित्या^ वसवो रुद्रियासो- रक्षोयुजे तपु रघ न्दधात।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 य ई राजाना.वृतुथा विदध-द्रर्जसो मित्रो वरुण.श्चिकेतत्। गम्भीराय रक्षसे हेति.मस्य- द्रोघाय चिद्वचंस आनवाय।।

卐 अन्तरैे.श्चक्रै स्तनयाय वर्ति- द्युमता ऽयात.न्नृवता रथेन। सनुत्येन त्यजसा मर्त्यस्य- वनुष्यता.मपि शीर्षा ववृक्तम्।।

卐 आ परमाभि रुत मध्यमाभि- र्नियुद्भि र्यात.मवमाभि.रर्वाक्। दृळ्हस्य चि द्गोमतो वि व्रजस्य- दुरो वर्त.ङ्गृणते चित्रराती~।।

6.63 क्व त्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजोऽश्विनौ- त्रिष्टुप्-आद्या विरा.ळन्त्यैकपदा।।

❀05.01.03 卐क्व1(अ)त्या.वल्गू~.पुरुहूताद्य- दूतो न स्तोमो.ऽविद.न्नमस्वान्। आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन्न्।।

卐 अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः। परि ह त्यद्वर्ति र्याथो रिषो न यत्परो नान्तर स्तुतुर्यात्।।

卐 अकारि वा मन्धसो वरीम.न्नस्तारि बर्हि स्सुप्रायणतमम्। उत्तानहस्तो युवयु र्ववन्दा -ऽवान्नक्षन्तो अद्रय आञ्जन्न्।।

卐 ऊर्ध्वो वा मग्नि रध्वरेष्वस्था- त्प्र राति रेति जूर्णिनी घृताची। प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन्न्।।

卐 अधि श्रिये दुहिता सूर्यस्य -रथ न्तस्थौ पुरुभुजा शतोतिम्। प्र मायाभि र्मायिना भूत मत्र नरा नृतू~ जनिम न्यज्ञियानाम्।।

❀05.01.04 卐युवं श्रीभि र्दर्शताभि राभि -श्शुभे पुष्टि मूहथु स्सूर्यायाः। प्र वाँ वयो वपुषेऽनु पप्तन्नक्ष- द्वाणी सुष्टुता धिष्ण्या वाम्।।

卐 आ वाँ वयोऽश्वासो वहिष्ठा- अभि प्रयो नासत्या वहन्तु। प्र वां रथो मनोजवा असर्जी-षः पृक्ष इषिधो अनु पूर्वीः।।

卐 पुरु हि वां पुरुभुजा देष्ण- न्धेनुन्न इषं पिन्वत मसक्राम्। स्तुतश्च वां माध्वी~ सुष्टुतिश्च -रसाश्च ये वाम.नु राति मग्मन्न्।।

卐 उत मे ऋज्रे~ पुरयस्य रघ्वी~- सुमीळ्हे शतं पेरुके च पक्का। शाण्डो दाद्धिरणिन स्स्मद्दिष्ट- न्दश वशासो अभि¤षाच ऋष्वान्।।

卐 सँ वां शता नासत्या सहस्राऽ-श्वानां पुरुपन्था^ गिरे दात्। भरद्वाजाय वीर नू गिरे दा-द्धता रक्षांसि पुरुदंससा स्युः~।।

卐 आ वां सुम्ने वरिम न्त्सूरिभि ष्ष्याम्।।

6.64 उदु श्रिय इति षडृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- उषा- स्त्रिरकष्टुप्—

05.01.05 卐उदु श्रिय उषसो रोचमाना- अस्थु रपा.न्नोर्मयो रुशन्तः। कृणोति विश्वा सुपथा सुगान्य-ऽभूदु वस्वी दक्षिणा मघोनी।।

卐 भद्रा ददृक्ष उर्विया वि भास्यु-त्ते शोचि र्भानवो द्यामऽपप्तन्न्। आवि र्वक्षः कृणुषे शुम्भमानो-षो देवि रोचमाना महोभिः।।

卐 वहन्ति सीम रुणासो रुशन्तो- गाव स्सुभगा मुर्विया प्रथानाम्। अपेजते शूरो अस्तेव शत्रू -न्बाधते तमो अजिरो न वोळ्हा।।

卐 सुगोत ते सुपथा पर्वते-ष्ववाते अप स्तरसि स्वभानो~। सा न^ आ वह पृथुयाम न्नृष्वे -रयि न्दिवो दुहित रिषयध्यै।।

卐 साऽऽवह योक्षभि रवातोषो- वरं वहसि जोष मनु। त्वन्दिवो दुहितर्या ह देवी- पूर्वहूतौ मंहना दर्शता भूः।।

卐उत्ते वयश्चि द्वसते रपप्त-न्नरश्च ये पितुभाजो व्युष्टौ। अमा सते वहसि भूरि वाम- मुषो देवि दाशुषे मर्त्याय।।

6.65 एषा स्येति षडृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- उषा-स्त्रिष्टुप्।।

05.01.06 卐एषा स्या नो दुहिता दिवोजाः ≈ -क्षिती रुच्छन्ती मानुषी रजीगः~। या भानुना रुशता राम्या स्व- ज्ञायि तिर स्तमसश्चि दक्तून्।।

卐 वि तद्ययु ररुणयुग्भि रश्वै- श्चित्रं भान्त्युषस श्चन्द्ररथाः। अग्रँ यज्ञस्य बृहतो नयन्ती- र्वि ता^ बाधन्ते तम ऊर्म्यायाः।।

卐 श्रवो वाज मिष मूर्जँ वहन्ती- र्नि दाशुष उषसो मर्त्याय। मघोनी र्वीरव त्पत्यमाना -अवो धात विधते रत्न मद्य।।
卐 इदा हि वो विधते रत्न मस्ती-दा वीराय दाशुष उषासः। इदा विप्राय जरते यदुक्था -निःष्म मावते वहथा पुरा चित्।।
卐 इदा हि त उषो अद्रिसानो~- गोत्रा गवा मङ्गिरसो गृणन्ति। व्य1(अ)र्केण बिभिदु र्ब्रह्मणा च- सत्या नृणा .मभव द्देवहूतिः।।
卐 उच्छा दिवो दुहितः~ प्रत्नवन्नो- भरद्वाजव द्विधते मघोनि। सुवीरं रयि ङ्गृणते रिरी -ह्युरुगाय मधि धेहि श्रवो नः।।
6.66 वपुर्न्वित्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- मरुत- स्त्रिष्टुप्
❀05.01.07 卐वपुर्नु तच्चिकितुषे चिदस्तु -समान न्नाम धेनु पत्यमानम्। मर्तेष्वन्य द्दोहसे पीपाय- सकृ च्छुक्र न्दुदुहे पृश्नि रूधः।।
卐 ये अग्नयो न शोशुच न्निधाना- द्वि र्य त्त्रि र्मरुतो वावृधन्त। अरेणवो हिरण्ययास एषां -साक न्नृम्णैः पौंस्येभि श्च भूवन्न्।।
卐 रुद्रस्य ये मीळ्हुष स्सन्ति पुत्रा –याँश्चो~ नु दाधृवि र्भरध्यै। विदे हि माता महो मही- षा सेत्पृश्निः स्सुभ्वे3(ए) गर्भ माऽधात्।।
卐 न य ईषन्ते जनुषोऽया न्व1(अ)न्त~ -स्सन्तोऽवद्यानि पुनानाः। नि र्य द्दुह्रे शुचयोऽनु जोष- मनु श्रिया तन्व मुक्षमाणाः।।
卐 मक्षू न येषु दोहसे चिदया- आ नाम धृष्णु मारुत न्दधानाः। न ये स्तौना अयासो मह्ना- नू चित्सुदानु रऽव यास दुग्रान्।।
❀05.01.08 卐त इदुग्रा श्शवसा धृष्णुषेणा - उभे~ युजन्त रोदसी सुमेके~। अध स्मैषु रोदसी स्वशोचि राऽमवत्सु तस्थौ न रोकः।
卐 अनेनो वो मरुतो यामो अस्त्व-नश्व श्चिद्य.मजत्यरथीः।अनवसो अनभीशू रजस्तू- र्वि रोदसी पथ्या याति साधन्न्।।

卐नास्य॑ व॒र्ता न त॑रु॒ता न्व॑स्ति- म॑रुतो॒ यमव॑थ॒ वाज॑सातौ। तो॒के वा॒ गोषु॒ तन॑ये॒ यम॒ऽप्सु -स व्र॒ज न्दर्ता॒ पार्ये॒ अध॒ द्योः।।

卐 प्र चित्र म॒र्कं॑ गृ॒ण॒ते तु॒राय॒- मारु॑ताय॒ स्वत॑वसे भरध्वम्। ये सहां॑सि॒ सह॑सा॒ सह॑न्ते॒ -रेज॑ते अग्ने पृथि॒वी म॒खेभ्यः॑।।

卐 त्वि॒षीम॑न्तो अध्व॒रस्ये॑व दि॒द्यु -त्तृ॒षुच्य॑वसो जु॒ह्वो॒3(ओ) ना॒ग्नेः। अ॒र्च॑त्र॒यो॒ धुन॑यो॒ न वी॒रा- भ्राज॑ज्जन्मानो म॒रुतो॒ अधृ॑ष्टाः।।

卐 तँ वृ॒धन्त॒म्मारु॑तं॒ भ्राज॑दृष्टिं -रु॒द्रस्य॑ सू॒नुं ह॒वसा॒ऽऽवि॑वासे। दि॒व श्शर्धा॑य॒ शुच॑यो मनी॒षा- गि॒रयो॒ ना॒ऽऽप॑ उ॒ग्रा अ॑स्पृध्रन्।।

6.67 विश्वेषामित्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- मित्रावरुणौ- त्रिष्टुप्।।

❀05.01.09 卐विश्वे॑षाँ व स्स॒ता ज्ये॑ष्ठतमा- गी॒र्भि र्मि॒त्रावरु॑णा वावृ॒धध्यै॑। सँ या र॒श्मेव॑ य॒मतु॒ र्यमि॑ष्ठा- द्वा जना॒ँ अस॑मा बा॒हुभि॒ स्स्वैः।।

卐 इ॒यं म॒द्वां प्र स्तृ॑णीते मनी॒षो-प॑ प्रि॒या नम॑सा॒ ब॒र्हि रच्छ॑। य॒न्तन्नो॑ मित्रावरुणा॒ऽवधृष्ट-ञ्छ॒र्दि र्यद्वाँ॑ व॒रूथ्यं॑ सुदानू।।

卐 आ या॑तं मित्रावरुणा सुश॒स्त्यु-प॑ प्रि॒या नम॑सा हू॒यमा॑ना। सँ या॑ व॑प्न॒स्स्थो अ॒पसे॑व॒ जना- ञ्छ्रुधीय॒तश्चि॑ द्यतथो महि॒त्वा।।

卐 अश्वा॒ न या वा॒जिना॑ पू॒तब॑न्धू -ऋ॒ता यद्गर्भ॒ म॒ऽदि॑ति॒ र्भर॑ध्यै। प्र या मर्हि॒ म॒हान्ता॒ जाय॑माना -घो॒रा मर्ता॑य रि॒पवे॒ नि दी॑धः।।

卐 विश्वे॒ यद्वां॑ मं॒हना॒ मन्द॑मानाः - क्ष॒त्र न्दे॒वासो॒ अद॑धु स्स॒जोषाः॑। परि॒ यद्भू॒थो रोद॑सी चि॒दुर्वी - सन्ति॒ स्पशो॒ अद॑ब्धासो॒ अमू॑राः।।

❀05.01.10 卐ता हि क्ष॒त्र न्धा॒रये॑थे॒ अनु॒ द्यू- न्दृंहे॑थे॒ सानु॑ मु॒पमा॑दि॒व द्योः। दृ॒ळ्हो नक्ष॑त्र उ॒त वि॒श्वदे॑वो॒- भूमि॒ मा॒ऽऽतान्द्या॒ न्धासि॑ना॒ऽऽयोः।।

卐 ता वि॒ग्रन्धै॑थे॒ ज॒ठरं॑ पृ॒णध्या॒- आ यत्सद्म॒ सभृ॑तयः पृ॒णन्ति॑। न मृ॑ष्यन्ते यु॒वत॒योऽवा॑ता॒- वि यत्पयो॑ विश्वजि॑न्वा॒ भर॑न्ते।।

卐 ता जि॒ह्वया॑ सद॒मेऽदं सु॒मेधा- आ यद्वां स॒त्यो अ॑र॒तिर् ऋ॒ते भूत्। तद्वां महि॒त्व.ङ्घृताान्ना वस्तु- यु॒व न्दा॒शु॒षे विर्चयिष्ट॒ मंहः॥

卐 प्र यद्वां मित्रावरुणा स्पूर्ध -न्प्रि॒या धाम॑ यु॒वधि॑ता मि॒नन्ति॑। न यं दे॒वास॒ ओहे॑सा॒ न मर्ता॑-अयज्ञसाचो॒ अप्यो॒ न पुत्राः॥

卐 वि यद्वाच.ङ्कीस्तासो॒ भर॑न्ते- शंस॒न्ति॒ के चि॒न्नि॒विदो॒ मना॒नाः। आद्वां ब्रवाम स॒त्यान्युक्था -नकि॑र्देवेभि॑ र्यतथो महि॒त्वा॥

卐 अ॒वो रि॒त्था वा॒ञ्छर्दिषो॒ अ॒भिष्टौ॒ -यु॒वो मि॒त्रावरुणा॒ वस्कृ॑धोयु। अनु॒ यद्गाव॑ स्स्फु॒रा नृ॑जि॒प्य -न्धृ॒ष्णुँ॒ यद्रणे॒ वृषणँ यु॒नजन्न्॥

6.68 श्रुष्टी वामित्येकादशर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्रावरुणा- त्रिष्टुप्-नवमी दशम्यौ जगत्यौ॥

05.01.11 卐श्रु॒ष्टी वाँ य॒ज्ञ उद्य॑त स्स॒जोषा॑ -मनु॒ष्व द्वृ॒क्तब॑र्हिषो॒ यज॑ध्यै। आ य इन्द्रा॒वरु॑णा वि॒षे अ॒द्य -म॒हे सु॒म्नाय॑ म॒ह आ॑वव॒र्तत्॥

卐 ता हि श्रेष्ठा दे॒वताता तु॒जा- शूरा॑णां॒ शवि॑ष्ठा॒ ता हि भू॒तम्। म॒घोनां मंहि॑ष्ठा तुवि॒शुष्म॑ - ऋ॒तेन॑ वृ॒त्रतु॒रा सर्व॑सेना॥

卐 ता गृ॒णीहि नमस्ये॑भि श्शू॒षै -स्सु॒म्नेभि॒ रि॒न्द्रावरु॑णा च॒काना। वज्रे॑णा॒ऽन्य श्शव॑सा॒ हन्ति॑ वृ॒त्रं -सिष॑क्त्यन्यो वृ॒जनेषु॒ विप्रः॥

卐 ग्नाश्च॒ यन्नर॑श्च वा॒वृ॒धन्त- विश्वे॑ दे॒वासो॒ न॒रां स्वगू॑र्ताः। प्रैभ्य इन्द्रावरुणा महि॒त्वा- द्यौ श्च पृथिवि भूतमु॒र्वी॥

卐 स इत्सुदा॒नु स्स्ववा॑ ऋ॒तावे-न्द्रा यो वाँ वरुण॒ दाश॑ति॒ त्मन्न्। इ॒षा स द्वि॒ष स्तरे॒ द्दास्वा॒ -न्वंसद्र॒यिं र॑यि॒वत॑श्च॒ जनान्॥

05.01.12 卐यँ यु॒व न्दा॒श्वध्वराय देवा -र॒यि न्ध॒त्थो वसु॑मन्तं पुरु॒क्षुम्। अ॒स्मे स इन्द्रावरुणा॒ ऽवपि॒ष्या-त्प्र यो भ॒नक्ति॑ व॒नुषा॒ मशस्तीः॥

卐 उ॒त न॑ स्सुत्रात्रो दे॒वगो॑पा -स्सू॒रिभ्य इन्द्रावरुणा र॒यिष्ष्या॑त्। येषां॒ शुष्म॒ पृत॑नासु सा॒ह्वा- न्प्र स॒द्यो द्यु॒म्ना ति॒रते॒ तर्तु॑रिः॥

卐 नू न इन्द्रावरुणा गृणाना- पृङ्क्तं रयिं सौश्रवसाय देवा। इत्था गृणन्तो महिनस्य शर्धोऽ-पो न नावा दुरिता तरेम।।

卐 प्र सम्राजे बृहते मन्म नु प्रिय -मर्च देवाय वरुणाय सप्रथः। अयँ य^ उर्वी~ महिना महिव्रतः- क्रत्वा विभात्यजरो न शोचिषा।।

卐 इन्द्रावरुणा सुतपा विमं सुतं- सोमं पिबतं मद्य न्धृतव्रता। युवो रथो अध्वर न्देववीतये- प्रति स्वसर मुप याति पीतये।।

卐 इन्द्रावरुणा मधुमत्तमस्य वृष्ण- स्सोमस्य वृषणा ऽऽवृषेथाम्। इदँ वा मन्धः परिषिक्त मस्मे - आसद्यास्मि न्बर्हिषि मादयेथाम्।।

6.69 सं वामित्यष्टर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्राविष्णू- त्रिष्टुप्।।

❀05.01.13 卐सँवाङ्कर्मणा समिषा हिनोमी-न्द्राविष्णू~ अपस स्पारे अस्य। जुषेथाँ यज्ञ न्द्रविणञ्च धत्त- मरिष्टैर्नः पथिभिः पारयन्ता।।

卐 या विश्वासाञ्जनितारा मतीना -मिन्द्राविष्णू~ कलशा सोमधाना। प्र वाङ्गिर श्शस्यमाना^ अवन्तु -प्र स्तोमासो गीयमानासो अर्कैः।।

卐 इन्द्राविष्णू~ मदपती~ मदाना –माऽऽ सोमँ यात न्द्रविणो~ दधाना। सँ वा मञ्जन्त्वक्तुभि र्मतीनां- सं स्तोमास श्शस्यमानास उक्थैः।।

卐आ वा मश्वासो अभिमातिषाह -इन्द्राविष्णू~ सधमादो वहन्तु। जुषेथाँ विश्वा हवना मतीना- मुप ब्रह्माणि शृणुत ङ्गिरो मे।।

卐 इन्द्राविष्णू~ तत्पनयाय्यँ वां- सोमस्य मद उरु चक्रमाथे~। अकृणुत मन्तरिक्षँ वरीयो- ऽप्रथतञ्जीवसे नो रजांसि।।

卐 इन्द्राविष्णू~ हविषा वावृधानाऽ-ग्राद्वाना नमसा रातहव्या। घृतासुती~ द्रविण.न्धत्त मस्मे -समुद्र स्स्थः कलश स्सोमधानः।।

卐 इन्द्राविष्णू~ पिबतं मध्वो अस्य- सोमस्य दस्रा जठरं पृणेथाम्। आ वा मन्धांसि मदिराण्यऽग्म- न्नुप ब्रह्माणि शृणुतं हवं मे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उभा जिग्यथुर्न परा जयेथे~-न परा जिग्ये कतर श्चनैनोः। इन्द्रश्च विष्णो~ यदपस्पृधेथा -न्त्रेधा सहस्रँ वि तदैरयेथाम्।।

6.70 घृतवती इति षड्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- द्यावापृथिव्यौ- जगती।।

05.01.14 卐घृतवती~ भुवनाना.मभिश्रि-योर्वी~ पृथ्वी~ मधुदुघे~ सुपेशसा। द्यावापृथिवी~ वरुणस्य धर्मणा - विष्कभिते~ अजरे ~भूरिरेतसा।।

卐 असश्चन्ती~ भूरिधारे~ पयस्वती~ घृत न्दुहाते~ सुकृते~ शुचिव्रते~। राजन्ती~ अस्य भुवनस्य रोदसी- अस्मे रेत स्सिञ्चतँ यन्मनुर्हितम्।।

卐 यो वा मृजवे क्रमणाय रोदसी- मर्तो ददाश धिषणे~ स साधति। प्र प्रजाभि र्जायते धर्मण.स्परि - युवो स्सिक्ता विषुरूपाणि सव्रता।।

卐 घृतेन द्यावापृथिवी~ अभीवृते~ -घृतश्रिया घृतपृचा घृतावृधा। उर्वी~ पृथ्वी~ होतृवूर्ये~ पुरोहिते~ – ते~ इद्विप्रा ईळते सुम्न मिष्टये।।

卐 मधु नो द्यावापृथिवी~ मिमिक्षतां- मधुश्चुता मधुदुघे~ मधुव्रते~। दधाने~ यज्ञ न्द्रविण.ञ्च देवता - महि श्रवो वाज मस्मे सुवीर्यम्।।

卐 ऊर्जन्नो द्यौ श्च पृथिवी च पिन्वतां - पिता माता विश्वविदा सुदंससा। संरराणे~ रोदसी विश्वशम्भुवा - सनिँ वाजं रयि मस्मे समिन्वताम्।।

6.71 उदुष्य इति षड्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज-स्सविता जगती-अन्त्यास्तिस्रस्त्रिष्टुभः।।

05.01.15 卐उदु ष्य देव स्सविता हिरण्यया - बाहु~ अयंस्त सवनाय सुक्रतुः। घृतेन पाणी~ अभि प्रुष्णुते मखो- युवा सुदक्षो रजसो विधर्मणि।।

卐 देवस्य वयं सवितु स्सवीमनि - श्रेष्ठे स्याम वसुनश्च दावने। यो विश्वस्य द्विपदो य श्चतुष्पदो- निवेशने प्रसवे चाऽसि भूमनः।।

卐 अदब्धेभि स्सवितः~ पायुभिष्ट्वं - शिवेभि रऽद्य परि पाहि नो गयम्। हिरण्यजिह्व स्सुविताय नव्यसे - रक्षा माकिर्नो अघशंस ईशत।।

卐उदु ष्य देव स्सविता दमूना- हिरण्यपाणिः प्रतिदोष मस्थात्। अयोहनु र्यजतो मन्द्रजिह्व- आ दाशुषे सुवति भूरि वामम्।।

卐 उदूअया॰ उपवक्तेव बाहू~- हिरण्यया सविता सुप्रतीका। दिवो रोहांस्यरुह त्पृथिव्या^- अरीरम त्पतय.त्कच्चि दभ्वम्।।

卐 वाम मद्य सवित र्वाममु श्वो- दिवेदिवे वाम मस्मभ्यं सावीः। वामस्य हि क्षयस्य देव भूरे- रया धिया वामभाज स्स्याम।।

6.72 इन्द्रासोमेति पञ्चर्चस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- इन्द्रासोमौ- त्रिष्टुप्।।

❀05.01.16 卐इन्द्रासोमा महि तद्वां महित्वँ -युवं महानि प्रथमानि चक्रथुः। युवं सूर्यँ विविदथु र्युवं स्व1(अ)-र्विश्वा तमांस्यहत न्निदश्च।।

卐 इन्द्रासोमा वासयथ^ उषास -मुत्सूर्यन्नयथो ज्योतिषा सह। उप द्यां स्कम्भथु स्स्कम्भनना-ऽप्रथतं पृथिवीं मातरँ वि।।

卐 इन्द्रासोमा वहि मपः परिष्ठां- हथो वृत्र मनु वा न्द्यौरमन्यत। प्रार्णांस्यैरयतन्नदीना -मा ऽऽसमुद्राणि पप्रथुः पुरूणि।।

卐 इन्द्रासोमा पक्व मामा स्वन्त- र्नि गवा मिद्दधथु र्वक्षणासु। जगृभथु रनपिनद्ध मासु- रुशं चित्रासु जगतीष्वन्तः~।।

卐 इन्द्रासोमा युव मङ्ग तरुत्र -मपत्यसाचं श्रुत्यं रराथे~। युवं शुष्मन्नर्यञ्चर्षणिभ्य स्सँ विव्यथुः पृतनाषा॒हं मुग्रा।।

6.73 यो अद्रिभिदिति तृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो- बृहस्पति- स्त्रिष्टुप्।।

❀05.01.17 卐यो अद्रिभि त्प्रथमजा^ ऋतावा- बृहस्पति राङ्गिरसो हविष्मान्। द्विबर्हज्मा प्राघर्मस त्पिता न^- आ रोदसी वृषभो रोरवीति।।

卐 जनाय चिद्य^ ईवत उ लोकं -बृहस्पति र्देवहूतौ चकार। घ्नन्वृत्राणि वि पुरो दर्दरीति -जयञ्छत्रूँ रमित्रा न्पृत्सु साहन्न्।।

卐 बृहस्पति स्समजय द्वसूनि- महो व्रजा न्गोमतो देव^ एषः। अप स्सि॒षास न्त्स्व1(अ)रप्रतीतो बृहस्पति र्हन्त्यमित्र मर्कैः।।

6.74 सोमारुद्रेति चतुर्ऋचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाज- स्सोमारुद्रौ- त्रिष्टुप्।।

❀05.01.13 卐सोमारुद्रा धारयेथा मसुर्य1(अं)- प्र वा मिष्टयोऽरं मश्नुवन्तु। दमेदमे सप्त रत्ना दधाना -शन्नो भूत न्द्विपदे शञ्चतुष्पदे।।

卐 सोमारुद्रा वि वृहतँ विषूची -ममीवा या नो गयं माविवेश। आरे बाधेथा न्निर्ऋतिं पराचै- रस्मे भद्रा सौश्रवसानि सन्तु।।

卐 सोमारुद्रा युव मेता न्यस्मे- विश्वा तनूषु भेषजानि धत्तम्। अव स्यतं मुञ्चतँ यन्नो अस्ति -तनूषु बद्धङ्कृत मेनो अस्मत्।।

卐 तिग्मा ऽऽयुधौ तिग्महेती~ सुशेवौ सोमारुद्रा विह सु मृळतन्नः। प्र नो मुञ्चतँ वरुणस्य पाशा द्गोपायतन्न स्सुमनस्यमाना।।

6.75 जीमूतस्येवेत्येकोनविंशत्यृचस्य सूक्तस्य, भारद्वाजः- पायुः- आद्यानां नवानां क्रमेण वर्म धनुर्ज्या धनुष्कोटीषुधिस्सारथी रश्मयोऽश्वारथो रथगोपाः- दशम्या ब्राह्मण पितृ सोम पृथिवी पूषाणः- एकादश्यादि द्वयोरिषव-स्त्रयोदश्याः प्रतोद-श्चतुर्दश्या हस्तत्राणं- पञ्चदशी षोडश्यो रिषव-स्सप्तदश्या युद्धभूमि कवच ब्रह्मणस्पत्यदित्यः- अष्टादश्या वर्म सोमवरुणाः- अन्त्याया देवब्रह्माणि- त्रिष्टुप्- षष्ठी दशम्यौ जगत्यौ- द्वादशी त्रयोदशी पञ्चदशी षोळ श्यन्त्या अनुष्टुभ-स्सप्तदशी पङ्क्तिः- (त्रयोदश्याः प्रतोद इत्यत्राश्वो देवतेति केचित्- चतुर्दश्या हस्तघ्नमित्यत्र हस्तत्राणं चतुर्दश्यामिति शौनकोक्तेर्हस्तत्राणमेव युक्तम्- पराः पञ्च्यादयो लिङ्गोक्तदेवता इत्येवमनुक्रमण्यां सत्यामन्त्यतयोर्द्वयोर्विश्वेदेवा इति केचिन्मन्यन्ते बहुदैवतत्वात्- पञ्चदश्यादि द्वयोर्विषाक्त मुख बाण इति शौनकः)- वासिष्ठे सप्तमे मण्डले षडनुवाकाः।।

卐

❀05.01.19 卐जीमूतस्येव भवति प्रतीकँ -यद्वर्मी~ याति समदा मुपस्थे। अनाविद्धया तन्वा जय त्वं -स त्वा वर्मणो महिमा पिपर्तु।।

卐 धन्वना गा^ धन्वना ऽऽजिञ्जयेम- धन्वना तीव्रा स्समदो जयेम। धनु श्शत्रो रपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम।।

卐 वक्ष्यन्तीवेदा ऽऽगनीगन्ति कर्णं- प्रियं सखायं परिषस्वजाना। योषेव शिङ्क्ते वितताऽधि धन्व-ञ्ज्या इयं समने पारयन्ती।।

卐 ते~ आचरन्ती ~ समनेव योषा -मातेव पुत्रं बिभृता मुपस्थे। अप शत्रू न्विध्यतां सँविदाने~-आर्त्नी~ इमे~ विष्फुरन्ती~ अमित्रान्।।

卐 बह्वीनां पिता बहु रस्य पुत्र- श्चिश्चा कृणोति समनाऽवगत्य। इषुधि स्सङ्काः पृतनाश्च सर्वाः- पृष्ठे निनद्धो जयति प्रसूतः।।

❀05.01.20 卐रथे तिष्ठ न्नयति वाजिनः पुरो -यत्रयत्र कामयते सुषारथिः। अभीशूनां महिमानं पनायत -मनः पश्चा दनु यच्छन्ति रश्मयः।।

卐 तीव्रान्घोषा न्कृण्वते वृषपाणयोऽ-श्वा रथेभि स्सह वाजयन्तः। अवक्रामन्तः प्रपदै रमित्रा-न्क्षिणन्ति शत्रूः रनपव्ययन्तः।।

卐 रथवाहनं हविरस्य नाम -यत्रायुध न्निहित मस्य वर्म। तत्रा रथ मुप शग्मं सदेम -विश्वाहा वयं सुमनस्यमानाः।।

卐 स्वादुषंसदः पितरो वयोधाः -कृच्छ्रेश्रित श्शक्तीवन्तो गभीराः। चित्रसेना इषुबला अमृध्रा -स्सतोवीरा उरवो व्रातसाहाः।।

卐 ब्राह्मणासः पितर स्सोम्यास- श्शिवे~ नो द्यावापृथिवी~ अनेहसा। पूषा नः पातु दुरिता दृतावृधो-रक्षा माकिर्नो अघशंस ईशत।।

❀05.01.21 卐सुपर्णँ वस्ते मृगो अस्या दन्तो -गोभि स्सन्नद्धा पतति प्रसूता। यत्रा नर स्सञ्च वि च द्रवन्ति –तत्रा स्मभ्य मिषव श्शर्म यंसन्न्।।

卐 ऋजीते परि वृङ्धि नोऽ-श्मा भवतु नस्तनूः। सोमो अधि ब्रवीतु नोऽ-दिति श्शर्म यच्छतु।।

卐 आ जङ्घन्ति सान्वेषा-ञ्जघनाः उप जिघ्नते। अश्वाजनि प्रचेतसोऽ-श्वा न्त्समत्सु चोदय।।

卐 अहिरिव भोगैः पर्येति बाहु-ञ्ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वा -न्पुमान्पुमांसं परि पातु विश्वतः।।

卐 आलाक्ता या रुरुशीर्ष्ण्य-थो~ यस्या अयो मुखम्। इदं पर्जन्यरेतस -इष्वै देव्यै बृहन्नमः।।

❀05.01.22 卐अवसृष्टा परा पत- शरव्ये ब्रह्मसंशिते। गच्छामित्रान्प्र पद्यस्व-माऽमीषा.ङ्कञ्चनोच्छिषः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यत्र बाणा स्संपतन्ति -कुमारा^ विशिखाइव। तत्रा नो ब्रह्मणस्पति- रदिति श्शर्म यच्छतु -विश्वाहा शर्म यच्छतु।।

卐 मर्माणि ते वर्मणा छादयामि- सोमस्त्वा राजा मृतेनानु वस्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु- जयन्तन्त्वाऽनु देवा^ मदन्तु।।

卐 यो न स्स्वो अरणो- यश्च निष्ट्यो जिघांसति। देवास्तं सर्वे धूर्वन्तु -ब्रह्म वर्म ममान्तरम्।। इति षष्ठं मण्डलं समाप्तम्।।

## सप्तमं मण्डलम्

7.01 अग्निं नर इति पञ्चविंशत्यृचस्य सूक्तस्य, मैत्रावरुणि- र्वसिष्ठोऽग्नि-र्विराट्- अन्त्या स्सप्तत्रिष्टुभः।।

❀05.01.23 卐अग्निन्नरो दीधितिभि ररण्यो- र्हस्तच्युती जनयन्त प्रशस्तम्। दूरेदृशं.ङ्गृहपति मथर्युम्।।

卐 तमग्नि मस्ते वसवो न्यृण्व -न्त्सुप्रतिचक्ष मवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्यः।।

卐 प्रेद्धो अग्ने दीदिहि पुरो नो-ऽजस्त्रया सूर्म्या यविष्ठ। त्वां शश्वन्त^ उप यन्ति वाजाः।।

卐 प्र ते अग्नयोऽग्निभ्यो वरन्नि- स्सुवीरास श्शोशुचन्त द्युमन्तः। यत्रा नरः स्समासते सुजाताः।।

卐 दा^ नो अग्ने धिया रयिं सुवीरं- स्वपत्यं सहस्य प्रशस्तम्। न यँ यावा तरति यातुमावान्।।

❀05.01.24 卐उप यमेति युवति स्सुदक्ष -न्दोषा वस्तो र्हविष्मती घृताची। उप स्वैन मरमति र्वसूयुः।।

卐 विश्वा^ अग्नेऽप दहाराती -र्येभि स्तपोभि रदहो जरूथम्। प्र निस्वरं.ञ्चातयस्वामीवाम्।।

卐 आ यस्ते अग्न इधते अनीकँ- वसिष्ठ शुक्र दीदिवः पावक। उतो~ न^ एभि स्स्तवथै रिह स्याः।।

卐 वि ये ते अग्ने भेजिरे अनीकं -मर्ता नरः पित्र्यासः पुरुत्रा। उतो न एभि स्सुमना^ इह स्याः।।

卐 इमे नरो वृत्रहत्येषु शूरा-^ विश्वा^ अदेवी रभि सन्तु मायाः। ये मे धियं पनयन्त प्रशस्ताम्।।

❀05.01.25मा शूने अग्ने नि षदाम नृणां -माऽशेषसोऽवीरता परि त्वा। प्रजावतीषु दुर्यासु दुर्य।।

卐 यमश्वी नित्य मुपयाति यज्ञं -प्रजावन्तं स्वपत्यङ्क्षयन्नः। स्वजन्मना शेषसा वावृधानम्।।

卐 पाहि नो अग्ने रक्षसो अजुष्टा -त्पाहि धूर्ते ररुषो अघायोः। त्वा युजा पृतनायूँ रभि ष्याम्।।

卐 से दुग्नि रग्नी॰ रत्यस्त्वन्या- न्यत्र वाजी तनयो वीळुपाणिः। सहस्रपाथा^ अक्षरा समेति।।

卐 से दुग्नि यो वनुष्यतो निपाति- समेद्धार मंहस उरुष्यात्। सुजातासः परि चरन्ति वीराः।।

❀05.01.26 卐अयं सो अग्नि राहुतः पुरुत्रा -यमीशान स्समिदिन्धे हविष्मान्। परि यमेत्यध्वरेषु होता।।

卐 त्वे अग्न आहवनानि भूरी-शानास^ आ जुहुयाम नित्या। उभा कृण्वन्तो वहतू~ मियेधे।।

卐 इमो~ अग्ने वीततमानि हव्या॰-जस्रो वक्षि देवताति मच्छ। प्रति न^ ईं सुरभीणि व्यन्तु।।

卐 मा नो अग्ने॰वीरते परा दा^- दुर्वाससे॰मतये मा नो अस्यै। मा नः≈ क्षुधे मा रक्षस ऋतावो- मा नो दमे मा वन आ जुहूर्थाः।।

卐 नू मे ब्रह्माण्यग्न उच्छशाधि- त्वन्देव मघवद्भ्य स्सुषूदः। रातौ स्यामोभयास^ आ ते- यूयं पात स्वस्तिभि स्सदा नः।।

❀05.01.27 卐त्वमग्ने सुहवो रण्वसन्दृ- क्सुदीती सूनो~ सहसो दिदीहि। मा त्वे सचा तनये नित्य आध-ङ्मा वीरो अस्मन्नर्यो वि दासीत्।।

卐 मा नो अग्ने दुर्भृतये सचैषु -देवेद्धेष्वग्निषु प्र वोचः। मा ते अस्मा न्दुर्मतयो भृमाच्चि- द्देवस्य सूनो~ सहसो नशन्त।।

卐 स मर्तो अग्ने स्वनीक रेवा न॰-मर्त्ये य^ आजुहोति हव्यम्। स देवता वसुवनि न्दधाति- यं सूरि रर्थी पृच्छमान एति।।

卐 महो नो अग्ने सुवितस्य विद्वा -न्रयिं सूरिभ्य^ आ वहा बृहन्तम्। येन वयं सहसाव न्मदेमा- ॰विक्षितास^ आयुषा सुवीराः।।

卐 नू मे ब्रह्माण्यग्न उच्छशाधि- त्वन्देव मघवद्भ्य स्सुषूदः। रातौ स्यामोभयास^ आ ते- यूयं पात स्वस्तिभि स्सदा नः।।।। इति प्रथमाध्याय स्समाप्तः।।

## पञ्चमाष्टके द्वितीयाध्यायः (वर्गाः 1-30)

☫ 7.02 जुषस्वेत्येकादशर्चस्य सूक्तस्य, मैत्रावरुणि- र्वसिष्ठ- इध्मो- नराशंस- इळो- बर्हि- र्देवीर्द्वार- उषासानक्ता- दैव्यौ होतारौ- सरस्वतीळाभारत्य- स्त्वष्टा वनस्पति-स्स्वाहाकृतय-स्त्रिष्टुप्।।

❀05.02.01 卐जुषस्व न स्समिधं मग्ने अद्य –शोचा बृह द्यजत न्धूम मृण्वन्न्। उप स्पृश दिव्यं सानु स्तूपै- स्सं रश्मिभि स्ततन स्सूर्यस्य।।

卐 नराशंसस्य महिमान मेषा -मुप स्तोषाम यजतस्य यज्ञैः। ये सुक्रतव श्शुचयो धियन्धा -स्स्वदन्ति देवा^ उभयानि हव्या।।

卐 ईळेन्यँ वो असुरं सुदक्ष -मन्त दूतं रोदसी सत्यवाचम्। मनुष्व दग्निं मनुना समिद्धं- समध्वराय सदमि न्महेम।।

卐 सपर्यवो भरमाणा^ अभिज्ञु- प्र वृञ्जते नमसा बर्हि रग्नौ। आजुह्वाना^ घृतपृष्ठं पृषद्व –दऽध्वर्यवो हविषा मर्जयध्वम्।।

卐 स्वाध्यो3(ओ) वि दुरो देवयन्तोऽ-शिश्रयू रथयु र्देवताता। पूर्वी~ शिशुन्न मातरा रिहाणे~ समग्रुवो न समनेष्वऽञ्जन्न्।।

❀05.02.02 卐उत योषणे~ दिव्ये~ मही~ न^- उषासानक्ता सुदुघेव धेनुः। बर्हिषदा पुरुहूते~ मघोनी~- आ यज्ञिये~ सुविताय श्रयेताम्।।

卐 विप्रा यज्ञेषु मानुषेषु कारू~ -मन्ये वाञ्जातवेदसा यजध्यै। ऊर्ध्वन्नो अध्वरङ्कृतं हवेषु -ता देवेषु वनथो वार्याणि।।

卐आ भारती भारतीभि स्सजोषा-^ इळा देवै र्मनुष्येभि रग्निः। सरस्वती सारस्वतेभि रर्वा-क्तिस्रो देवी र्बर्हि ऽरेदं सदन्तु।।

卐 तन्न स्तुरीप मध पोषयित्नु- देव त्वष्ट वि रराण स्स्यस्व~। यतो वीरः कर्मण्य स्सुदक्षो- युक्तग्रावा जायते देवकामः।।

卐 वनस्पतेव सृजोप देवा.-नग्नि र्हवि श्शमिता सूदयाति। सेदु होता सत्यतरो यजाति -यथा देवानाञ्जनिमानि वेद।।

卐 आ याह्यग्ने समिधानो अर्वाङि-न्द्रेण देवै स्सरथ न्तुरेभिः। बर्हिर्न^ आस्ता मदिति स्सुपुत्रा- स्वाहा देवा^ अमृता^ मादयन्ताम्।।

7.03 अग्निं व इति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि- स्त्रिष्टुप्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

❀05.02.03 卐अग्निँ वो देव मग्निभि स्सजोषा^ -यजिष्ठ न्दूत मध्वरे कृणुध्वम्। यो मर्त्येषु निध्रुविर् ऋतावा -तपुर्मूर्धा घृतान्नः पावकः।।
卐 प्रोथ दऽश्वो न यवसेऽविष्य- न्यदा मह स्सँवरणा व्यऽस्थात्। आदस्य वातो अनु वाति शोचि- रध स्म ते व्रजनङ्कृष्ण मस्ति।।
卐 उद्यस्य ते नवजातस्य वृष्णोऽ-ग्ने चरन्त्यजरा इधानाः। अच्छा द्यामरुषो धूम एति- सन्दूतो अग्न ईयसे हि देवान्।।
卐 वि यस्य ते पृथिव्यां पाजो अश्रे- त्तृषु यदन्ना समवृक्त जम्भैः। सेनेव सृष्टा प्रसितिष्ट एति- यवन्न दस्म जुह्वा विवेक्षि।।
卐 तमि द्दोषा तमुषसि यविष्ठ- मग्नि मत्यन्न मर्जयन्त नरः। निशिशाना^ अतिथि मस्य योनौ- दीदाय शोचि राहुतस्य वृष्णः।।
❀05.02.04 卐सुसन्दृ क्ते स्वनीक प्रतीकँ -वि यद्रुक्मो न रोचस^ उपाके। दिवो न ते तन्यतु रेति शुष्म- श्चित्रो न सूरः प्रति चक्षि भानुम्।।
卐 यथा व स्स्वाहाऽग्नये दाशेम- परीळाभि र्घृतवद्भिश्च हव्यैः। तेभिर्नो अग्ने अमितै र्महोभि -श्शतं पूर्भि रायसीभि र्नि पाहि।।
卐 या^ वा ते सन्ति दाशुषे अधृष्टा^ गिरो वा याभि र्नृवती रुरुष्याः। ताभिर्न स्सूनो~ सहसो नि पाहि- स्मत्सूरीन्जरितॄ न्जातवेदः।।
卐 निर्य त्पूतेव स्वधिति श्शुचिर्गा- त्स्वया कृपा तन्वा3(आ) रोचमानः। आ यो मात्रो रुशेन्यो जनिष्ट - देवयज्याय सुक्रतुः पावकः।।
卐 एता नो अग्ने सौभगा दिदीह्य-पि क्रतुं सुचेतसँ वतेम। विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभि स्सदा नः।।
7.04 प्र वः शुक्रायेति दशर्चस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठोऽग्नि- स्त्रिष्टुप्।।
❀05.02.40 卐प्र व श्शुक्राय भानवे भरध्वं -हव्यं मतिञ्चाग्नये सुपूतम्। यो दैव्यानि मानुषा जनूंष्य - न्त र्विश्वानि विद्मना जिगाति।।

卐 स गृत्सो अग्नि स्तरुण श्चिदस्तु -यतो यविष्ठो अजनिष्ट मातुः। सँ.यो वना युवते शुचिद -न्भूरि चिदन्ना समिदत्ति सद्यः।।

卐 अस्य देवस्य संसद्यनीके- यं मर्तास श्श्येतञ्जगृभ्रे। नि यो गृभं पौरुषेयी मुवोच- दुरोक मग्नि रायवे शुशोच।।

卐 अयङ्कवि रकविषु प्रचेता^- मर्तेष्वग्नि रमृतो नि धायि। स मा नो अत्र जुहुर स्सहस्व- स्सदा त्वे सुमनस स्स्याम।।

卐 आ यो योनि न्देवकृतं ससाद -क्रत्वा ह्य1(अ)ग्नि रमृता९ अतारीत्। तमोषधीश्च वनिनश्च गर्भं -भूमिश्च विश्वधायसं बिभर्ति।।

❀05.02.06 卐ईशे ह्य1(अ)ग्नि रमृतस्य भूरे- रीशे राय स्सुवीर्यस्य दातोः। मा त्वा वयं सहसावन्नवीरा^- माऽप्सवः परि षदाम मादुवः।।

卐 परिषद्यं ह्यऽरणस्य रेक्णो -नित्यस्य रायः पतय स्स्याम। न शेषो अग्ने अन्यजात मस्त्य-ऽचेतानस्य मा पथो वि दुक्षः।।

卐 नहि ग्रभायारण स्सुशेवोऽ-न्योदर्यो मनसा मन्तवा उ। अधा चिदोकः पुनरि त्स एत्याऽऽ-नो वाज्यभीषाळेतु नव्यः।।

卐 त्वमग्ने वनुष्यतो नि पाहि- त्वमु न स्सहसावन्नवद्यात्। सन्त्वा ध्वस्मन्व दभ्येतु पाथ -स्सं रयि स्स्पृहयाय्य स्सहस्री।।

卐 एता नो अग्ने सौभगा दिदी- ह्यऽपि क्रतुं सुचेतसँ वतेम। विश्वा स्तोतृभ्यो गृणते च सन्तु -यूयं पात स्वस्तिभि स्सदा नः।।

7.05 प्राग्नय इति नवर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो वैश्वानरोऽग्नि-स्त्रिष्टुप्।।

❀05.02.07 卐प्राग्नये तवसे भरध्व-ङ्गिर न्दिवो अरतये पृथिव्याः। यो विश्वेषा ममृताना मुपस्थे- वैश्वानरो वावृधे जागृवद्भिः।।

卐 पृष्टो दिवि धाय्यग्निः पृथिव्या-न्नेता सिन्धूनां वृषभ स्स्तियानाम्। स मानुषी रभि विशो वि भाति -वैश्वानरो वावृधानो वरेण।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 त्वद्भिया विशं आयन्नसिक्नी –रऽसमना^ जहती भोजनानि। वैश्वानर पूरवे शोशुचानः- पुरो यदग्ने दरयन्नदीदेः।।

卐 तव त्रिधातु पृथिवी उत द्यौ- र्वैश्वानर व्रत मग्ने सचन्त। त्वं भासा रोदसी आ ततन्था-ऽजस्रेण शोचिषा शोशुचानः।।

卐 त्वामग्ने हरितो वावशाना^ -गिर स्सचन्ते धुनयो घृताचीः। पतिङ्कृष्टीनां रथ्यं रयीणाँ -वैश्वानर मुषसाङ्केतु मह्नाम्।।

❀05.02.08 卐त्वे असुर्यं1(अँ)वसवो न्यृण्व -न्क्रतुं हि ते मित्रमहो जुषन्त। त्वन्दस्यूं रोकसो अग्न आज^ -उरु ज्योतिर्जनय न्नार्याय।।

卐 स जायमानः परमे व्योम- न्वायुर्न पाथः परि पासि सद्यः। त्वं भुवना जनयन्नभि क्रन्न-पत्याय जातवेदो दशस्यन्न्।।

卐 ता.मग्ने अस्मे इष मेरयस्व- वैश्वानर द्युमतीञ्जातवेदः। यया राधः पिन्वसि विश्ववार- पृथु श्रवो दाशुषे मर्त्याय।।

卐 त.न्नो अग्ने मघवद्भ्यः पुरुक्षुं -रयिन्नि वाजं श्रुत्यँ युवस्व। वैश्वानर महि न श्शर्म यच्छ- रुद्रेभि रग्ने वसुभि स्सजोषाः।।

7.06 प्र सम्राज इति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वैश्वानरोऽग्नि-स्त्रिष्टुप्।।

❀05.02.09 卐प्र सम्राजो असुरस्य प्रशस्तिं -पुंसः कृष्टीना मनुमाद्यस्य। इन्द्रस्येव प्र तवस स्कृतानि- वन्दे दारुँ वन्दमानो विवक्मि।।

卐 कविङ्केतु न्धासिं भानु मद्रे -र्हिन्वन्ति शं राज्यं रोदस्योः। पुरन्दरस्य गीर्भि राविवासे-ऽग्ने र्व्रतानि पूर्व्या महानि।।

卐 न्यक्रतू न्ग्रथिनो मृध्रवाचः -पणीं रश्रद्धां अवृधां अयज्ञान्। प्रप्र ता न्दस्यूं रग्नि र्विवाय- पूर्व श्चकारापरां अयज्यून्।।

卐 यो अपाचीने तमसि मदन्तीः- प्राची श्चकार नृतम श्शचीभिः। तमीशानँ वस्वो अग्निङ्गृणीषे-ऽनानत न्दमयन्तं पृतन्यून्।।

卐 यो देह्यो3(ओ) अनमय द्वधस्नै -र्यो अर्यपत्नी रुषस श्चकार। स निरुध्या नहुषो यह्वो अग्नि- र्विशश्चक्रे बलिहृत स्सहोभिः।।

卐 यस्य शर्म न्नुप विश्वे जनास -एवै स्तस्थु स्सुमतिं भिक्षमाणाः। वैश्वानरो वरमाऽ रोदस्यो –राऽग्नि स्ससाद पित्रो रुपस्थम्।।

卐 आ देवो ददे बुध्न्या3(आ) वसूनि -वैश्वानर^ उर्दिता सूर्यस्य। आ समुद्रा दवरा ऽदापरस्मा दा-ऽग्नि र्ददे दिव आ पृथिव्याः।।

7.07 प्र वो देवमिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि- स्त्रिष्टुप्।।

❀05.02.10 卐प्र वो देवञ्चित्सहसान मग्नि- मश्वन्न वाजिनं हिषे नमोभिः। भवा नो दूतो अध्वरस्य विद्वा -न्त्मना देवेषु विविदे मितद्रुः।।

卐 आ याह्यग्ने पथ्या3(आ)^ अनु स्वा -मन्द्रो देवानां सख्यञ्जुषाणः। आ सानु शुष्मै र्नदय न्पृथिव्या^ -जम्भेभि र्विश्व मुशध ग्वनानि।।

卐 प्राचीनो यज्ञ स्सुधितं हि बर्हिः॥- प्रीणीते अग्नि रीळितो न होता। आ मातरा विश्ववारे~ हुवानो -यतो यविष्ठ जज्ञिषे सुशेवः।।

卐 सद्यो अध्वरे रथिरञ्जनन्त -मानुषासो विचेतसो य^ एषाम्। विशा मधायि विश्पति र्दुरोणे3(ए)-ऽग्नि र्मन्द्रो मधुवचा^ ऋतावा।।

卐 असादि वृतो वह्नि राजगन्वा नग्नि र्ब्रह्मा नृषदने विधर्ता। द्यौश्च यं पृथिवी वा वृधाते- आ यं होता यजति विश्ववारम्।।

卐 एते द्युम्नेभि र्विश्व मातिरन्त- मन्त्रँ ये वारन्नर्या अतक्षन्न्। प्र ये विश स्तिरन्त श्रोषमाणा^ -आ ये मे अस्य दीधयन्नृतस्य।।

卐 नू त्वामग्न ईमहे वसिष्ठा^- ईशानं सूनो~ सहसो वसूनाम्। इषं स्तोतृभ्यो मघवद्भ्य^ आन-ड्यूयं पात स्वस्तिभि स्सदा नः।।

7.08 इन्धे राजेति सप्तर्चस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठोऽग्नि- स्त्रिष्टुप्।।

❀05.02.11 卐इन्धे राजा समर्यो नमोभि- र्यस्य प्रतीक माहुतङ्घृतेन। नरो हव्येभि रीळते सबाध -आऽग्नि रग्र उषसा मशोचि।।

卐 अयमु ष्य सुमहा९ अवेदि होता -मन्द्रो मनुषो यह्वो अग्निः। वि भा^ अक~ स्ससृजान॰ पृथिव्या.-ङ्कृष्णपवि रोषधीभि र्ववक्षे।।

卐 कया नो अग्ने वि वस स्सुवृक्ति-ङ्कामु स्वधा मृणव श्शस्यमानः। कदा भवेम पतय स्सुदत्र -रायो वन्तारो दुष्टरस्य साधोः।।

卐 प्रप्रा य मग्नि र्भरतस्य श्रृण्वे- वि यत्सूर्यो न रोचते बृहद्भाः। अभि य॰ पूरुं पृतनासु तस्थौ -द्युतानो दैव्यो अतिथि श्शुशोच।।

卐 असन्नित्त्वे आहवनानि भूरि -भुवो विश्वेभि स्सुमना अनीकैः। स्तुतश्चि दग्ने श्रृण्विषे गृणान- स्स्वयँ वर्धस्व तन्वं सुजात।।

卐 इदँ वच श्शतसा स्संसहस्र -मुदग्नये जनिषीष्ट द्विबर्हाः। शँ यत्स्तोतृभ्य^ आपये भवाति -द्युम दमीवचातनं रक्षोहा।।

卐नू त्वामग्न ईमहे वसिष्ठा^- ईशानं सूनो~ सहसो वसूनाम्। इषं स्तोतृभ्यो मघवद्ध्य^ आन-ड्यूयं पात स्वस्तिभि स्सदा नः।।

7.09अबोधि जार इति षड्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि-स्त्रिष्टुप्।।

05.02.12 卐अबोधि जार उषसा मुपस्था- द्धोता मन्द्र॰ कवितम॰ पावकः। दधाति केतु मुभयस्य जन्तो -र्हव्या देवेषु द्रविणं सुकृत्सु।।

卐 स सुक्रतुर्यो वि दुर॰ पणीनां -पुनानो अर्कं पुरुभोजसन्नः। होता मन्द्रो विशा न्दमूना^- स्तिर स्तमो ददृशे राम्याणाम्।।

卐 अमूर॰ कवि रदिति र्विवस्वा -न्त्सुसंसन्मित्रो अतिथि श्शिवो नः। चित्रभानु रुषसां भात्यग्रेऽ-पाङ्गर्भ॰ प्रस्व1(अ)आ विवेश।।

卐 ईळेन्यो वो मनुषो युगेषु -समनगा^ अशुच ज्ञातवेदाः। सुसन्दशा भानुना यो विभाति -प्रति गाव स्समिधानं बुधन्त।।

卐 अग्ने याहि दूत्य1(अं)मा रिषण्यो -देवा९ अच्छा ब्रह्मकृता गणेन। सरस्वतीं मरुतो अश्विनापो -यक्षि देवा न्त्रत्नधेयाय विश्वान्।।

卐 त्वाम॑ग्ने समि॒धा॒नो व॒सि॑ष्ठो॒ -जरू॑थं ह॒न्यक्षि॑ रा॒ये पुर॑न्धिम्। पु॒रु॒णी॒था जा॑तवेदो जरस्व -यू॒यं पा॑त स्व॒स्तिभि॒ स्सदा॑ नः।।

☸ 7.10 उषो न जार इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि-स्त्रिष्टुप्।।

❀05.02.13 卐उ॒षो न जा॒रः॑ पृथु पाजो॑ अश्रे॒- द्दवि॑द्यु॒त् दीद्य॒ च्छोशु॑चानः। वृषा॒ हरि॒ श्शुचि॒ राऽऽभा॑ति भा॒सा- धियो॑ हिन्वा॒न उ॑श॒ती र॑जीगः~।।

卐 स्व॑1(अ)र्ण वस्तो॑ रु॒षसा॑ मरोचि -य॒ज्ञ न्त॑न्वा॒ना॒^ उ॒शिजो॒ न मन्म॑। अ॒ग्नि र्जन्मा॑नि दे॒व^ आ वि वि॒द्वा- न्द्र॒व दू॒तो दे॑व॒यावा॒ वनि॑ष्ठः।।

卐 अच्छा॑ गिरो॑ म॒तयो॑ देव॒यन्ती॑ -र॒ग्निँ य॑न्ति द्रवि॑णं॒ भिक्ष॑माणाः। सु॒स॒न्दृशं॑ सु॒प्रती॑कं॒ स्वञ्च॑ -ह॒व्य॒वाह॑ मर॒तिं मानु॑षाणाम्।।

卐 इन्द्र॑न्नो अग्ने॒ वसु॑भि स्स॒जोषा॑^ -रु॒द्रं रु॒द्रेभि॒ राऽऽव॑हा बृ॒हन्त॑म्। आ॒दि॒त्येभि॒ रदि॑तिं वि॒श्वज॑न्यां॒ -बृह॒स्पति॒ मृक्व॑भि र्वि॒श्ववा॑रम्।।

卐 म॒न्द्रं होता॑र मु॒शिजो॒ यवि॑ष्ठ –म॒ग्निँ विश॑^ ईळते अ॒ध्वरे॑षु। स हि क्षपा॑वा॒ँ॒ अभ॑व द्रयी॒णा- मत॑न्द्रो दू॒तो य॒जथा॑य दे॒वान्।।

☸ 7.11 महाँ असीति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि-स्त्रिष्टुप्।।

❀05.02.14 卐म॒हाँ अ॑स्यध्व॒रस्य॑ प्र॒केतो॒ -न ऋ॒ते त्व॒दमृता॑^ मादयन्ते। आ विश्वे॑भि स्स॒रथ॑ँ याहि दे॒वै -र्न्य॑ग्ने॒ होता॑ प्रथ॒म स्स॑दे॒ह।।

卐 त्वामी॑ळते अजि॒र न्दू॒त्या॑य -ह॒विष्म॑न्त॒ स्सद॒मि न्मानु॑षासः। यस्य॑ दे॒वै रास॑दो ब॒र्हि र॒ग्नेऽ-हा॑न्यस्मै सु॒दिना॑ भवन्ति।।

卐 त्रिश्चि॑द॒क्तोः प्र चि॑कितु र्वसू॑नि- त्वे अ॒न्त र्दा॒शुषे॒ मर्त्या॑य। म॒नु॒ष्व द॑ग्न इ॒ह य॑क्षि दे॒वा- न्भवा॑ नो दू॒तो अ॑भिशस्ति॒पावा॑।।

卐अ॒ग्नि री॑शे बृ॒हतो अ॑ध्व॒रस्या॒ग्नि र्विश्व॑स्य ह॒विषः॑ कृ॒तस्य॑। क्रतुं॒ ह्य॑स्य॒ वस॑वो जु॒षन्ताऽथा॑ दे॒वा^ द॑धिरे हव्य॒वाह॑म्।।

卐 आऽग्ने॑ वह ह॒विर॑द्याय दे॒वा नि-न्द्र॑ज्येष्ठास इ॒ह मा॑दयन्ताम्। इ॒मँ य॒ज्ञ न्दि॒वि दे॒वेषु॑ धेहि- यू॒यं पा॑त स्व॒स्तिभि॒ स्सदा॑ नः।।

☸ 7.12 अगन्मेति तृचस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठोऽग्नि-स्त्रिष्टुप्।।

❀05.02.15 卐अगन्म महा नमसा यविष्ठं- यो दीदाय समिद्ध स्स्वे दुरोणे। चित्रभानुं रोदसी अन्त रुर्वी~- स्वाहुतं विश्वतः प्रत्यञ्चम्।।

卐 स मह्ना विश्वा दुरितानि साह्वा -नग्नि ष्ष्टवे दम आ जातवेदाः। स नो रक्षिष द्दुरिता दवद्या -दस्मा न्गृणत उत नो मघोनः।।

卐 त्वं वरुण उत मित्रो अग्ने -त्वां वर्धन्ति मतिभि र्वसिष्ठाः। त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.13 प्राग्नय इति तृचस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठो वैश्वानरोऽग्नि-स्त्रिष्टुप्।।

❀05.02.16 卐प्राऽग्नये विश्वशुचे धियन्धेऽ-सुरघ्ने मन्म धीतिं भरध्वम्। भरे हविर्न बर्हिषि प्रीणानो -वैश्वानराय यतये मतीनाम्।।

卐 त्वमग्ने शोचिषा शोशुचान -आ रोदसी अपृणा जायमानः। त्वन्देवा अभिशस्ते रमुञ्चो –वैश्वानर जातवेदो महित्वा।।

卐 जातो यदग्ने भुवना व्यख्यः- पशून्न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे विन्द गातुं -यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.14 समिधेति तृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि-स्त्रिष्टुबाद्या बृहती।।

❀05.02.17 卐समिधा जातवेदसे- देवाय देवहूतिभिः। हविर्भि श्शुक्रशोचिषे -नमस्विनो वय न्दाशेमाग्नये।।

卐 वयन्ते अग्ने समिधा विधेम -वय न्दाशेम सुष्टुती यजत्र। वयङ्घृतेनाध्वरस्य होत- र्वय न्देव हविषा भद्रशोचे।।

卐 आ नो देवेभि रुप देवहूति- मग्ने याहि वषट्कृति.ञ्जुषाणः। तुभ्य न्देवाय दाशत स्स्याम -यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.15 उपसद्यायेति पञ्चदशर्चस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठोऽग्नि-र्गायत्री।।

❀05.02.18 卐उपसद्याय मीळ्हुषे -आस्ये जुहुता हविः। यो नो नेदिष्ठ माप्यम्।।

卐 यः पञ्च चर्षणी रभि -निषसाद दमेदमे। कवि र्गृहपति र्युवा।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 स नो वेदो अमात्य- मग्नी रक्षतु विश्वतः। उतास्मा न्पात्वंहसः।।

卐 नवन्नु स्तोम मग्नये -दिवश्श्येनाय जीजनम्। वस्वः कुवि द्वनाति नः।।

卐 स्पार्हा^ यस्य श्रियो दृशे -रयि र्वीरवतो यथा। अग्रे यज्ञस्य शोचतः।।

❀05.02.19 卐सेमाँ वेतु वषट्कृति -मग्नि र्जुषत नो गिरः। यजिष्ठो हव्यवाहनः।।

卐 नि त्वा नक्ष्य विश्पते -द्युमन्त न्देव धीमहि। सुवीर मग्न आहुत।।

卐 क्षप^ उस्रश्च दीदिहि -स्वग्नय स्त्वया वयम्। सुवीर स्त्वमस्मयुः।।

卐 उप त्वा सातये नरो- विप्रासो यन्ति धीतिभिः। उपाक्षरा सहस्रिणी।।

卐 अग्नी रक्षांसि सेधति -शुक्रशोचि रमर्त्यः। शुचिः पावक ईड्यः।।

❀05.02.20 卐स नो राधांस्या ऽऽभरे-शान स्सहसो यहो~। भगश्च दातु वार्यम्।।

卐 त्वमग्ने वीरव द्यशो- देवश्च सविता भगः। दितिश्च दाति वार्यम्।।

卐 अग्ने रक्षा णो अंहसः- प्रति ष्म देव रीषतः। तपिष्ठै रजरो दह।।

卐 अधा मही न^ आयस्य-ऽनाधृष्टो नृपीतये। पूर्भवा शतभुजिः।।

卐त्वन्नः पाह्यंहसो -दोषावस्त रघायतः। दिवा नक्त मदाभ्य।।

☬ 7.16 एना वो अग्निमिति द्वादशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्निः- प्रथमाद्ययुजो बृहत्यो- द्वितीयादि युज स्सतोबृहत्यः।।

❀05.02.21 卐एना वो अग्निन्नमसो-र्जो नपात माहुवे। प्रियञ्चेतिष्ठ मरतिं स्वध्वरँ- विश्वस्य दूत ममृतम्।।

卐 स योजते अरुषा विश्वभोजसा- स दुद्रव त्स्वाहुतः। सुब्रह्मा यज्ञ स्सुशमी वसूना- न्देवं राधो जनानाम्।।

卐 उदस्य शोचि रऽस्था -दाजुह्वानस्य मीळ्हुषः। उद्धूमासो अरुषासो दिविस्पृश- स्समग्नि मिन्धते नरः।।

卐 तन्त्वा दूत.ङ्कृण्महे यशस्तम-न्देवाँ आ वीतये वह। विश्वा सूनो~ सहसो मर्तभोजना- रास्व तद्यत्त्वेमहे।।

卐 त्वमग्ने गृहपति-स्त्वं होता नो अध्वरे। त्वं पोता विश्ववार प्रचेता-^ यक्षि वेषि च वार्यम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 कृधि रत्नँ यजमानाय सुक्रतो-~ त्वं हि रत्नधा^ असि। आ न^ ऋते शिशीहि विश्व.मृत्विजं -सुशंसो यश्च दक्षते।।

❀05.02.22 卐त्वे अग्ने स्वाहुत- प्रियास स्सन्तु सूरयः। यन्तारो ये मघवानो जनाना-मूर्वा.न्दयन्त गोनाम्।।

卐 येषा.मिळा घृतहस्ता दुरोण आ९- अपि प्राता ¤निषीदति। ताँस्त्रायस्व सहस्य द्रुहो निदो- यच्छा न श्शर्म दीर्घश्रुत्।।

卐 स मन्द्रया च जिह्वया- वह्नि रासा ¤विदुष्टरः। अग्ने रयिं मघवद्भ्यो न^ आ वह- हव्यदाति.ञ्च सूदय।।

卐 ये राधांसि दद.त्यश्व्या मघा- कामेन श्रवसो महः। ता९ अंहसः पिपृहि पर्तृभिष्ट्वं- शतं पूर्भि र्यविष्ठ्य।।

卐 देवो वो द्रविणोदाः- पूर्णाँ विवि.ष्ट्यासिचम्। उद्वा सिञ्चध्व.मुप वा पृणध्व- मादिद्वो देव^ ओहते।।

卐 तं होतार.मध्वरस्य प्रचेतसँ- वह्नि.न्देवा^ अकृण्वत। दधाति रत्नँ विधते सुवीर्य-मग्नि र्जनाय दाशुषे।।

☸ 7.17 अग्ने भवेति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽग्नि-र्द्विपदात्रिष्टुप्।।

❀05.02.23 卐अग्ने भव ¤सुषमिधा समिद्ध-^ उत बर्हि रुर्विया वि स्तृणीताम्।।

卐 उत द्वार^ उशतीर्वि श्रयन्ता-मुत देवा९ उशत^ आ वहेह।।

卐 अग्ने वीहि हविषा यक्षि देवा-न्त्स्वध्वरा कृणुहि जातवेदः।।

卐 स्वध्वरा करति जातवेदा^- यक्ष द्देवा९अमृता.न्पिप्रयच्च।।

卐 वंस्व विश्वा वार्याणि प्रचेत~- स्सत्या^ भव.न्त्वाशिषो नो अद्य।।

卐 त्वामु ते दधिरे हव्यवाह .-न्देवासो अग्न ऊर्ज आ नपातम्।।

卐 ते ते देवाय दाशत स्स्याम- महो नो रत्ना वि दध^ इयानः।।

☸ 7.18 त्वे ह यदिति पञ्चविंशत्यृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रः।।

卐 अन्त्यानां चतसृणां सुदास-स्त्रिष्टुप्।।

❀05.02.24 卐त्वे ह यत्पितर श्चिन्न^ इन्द्र- विश्वा वामा जरितारो असन्वन्न्। त्वे गाव स्सुदुघा^ स्त्वे ह्यश्वा- स्त्वँ वसु देवयते वनिष्ठः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 राजेव हि जनिभिः ≈ क्षेष्येवा-व द्युभि रभि ¤विदुष्कवि सन्न्। पिशा गिरो मघव न्गोभि रश्वै-स्त्वायत श्शिशीहि राये अस्मान्।।
卐 इमा^ उ त्वा पस्पृधानासो अत्र- मन्द्रा^ गिरो देवयन्ती रुपस्थुः। अर्वाची ते पथ्या राय एतु -स्याम ते सुमता विन्द्र शर्मन्न्।।
卐 धेनुन्न त्वा सूयवसे ¤दुदुक्ष -न्नुप ब्रह्माणि ससृजे वसिष्ठः। त्वामिन्मे गोपतिं विश्व आहाऽ-न इन्द्र स्सुमति .ङ्गन्त्वच्छ।।
卐 अर्णांसि चित्पप्रथाना सुदास -इन्द्रो गाधा न्यकृणो त्सुपारा। शर्धन्तं शिम्यु मुचथस्य नव्य- श्शापं सिन्धूना मकृणो दशस्तीः।।
❀05.02.25 卐पुरोळा^ इत्तुर्वशो यक्षुरासी -द्राये मत्स्यासो निशिता^ अपीव। श्रुष्टिञ्चक्रु र्भृगवो द्रुह्यवश्च- सखा सखाय मतर द्विषूचोः।।
卐 आ पक्थासो भलानसो भनन्ता- लिनासो विषाणिन श्शिवासः। आ योनय त्सधमा^ आर्यस्य -गव्या तृत्सुभ्यो अजग .न्युधा नृन्।।
卐 दुराध्यो3(ओ) अदितिं स्रेवयन्तो -ऽचेतसो वि जगृभ्रे परुष्णीम्। मह्नाविव्य क्पृथिवीं पत्यमानः-पशु ¤ष्कवि रशय च्चायमानः।।
卐 ईयु रऽर्थन्न न्यर्थं परुष्णी .-माशुश्चने दभिपित्व.ञ्जगाम। सुदास इन्द्र स्सुतुकाº अमित्रा –नरऽन्धय न्मानुषे वध्रिवाचः।।
卐 ईयु र्गावो न यवसा दगोपा^- यथाकृत मभि मित्रञ्चितासः। पृश्निगावः पृश्निनिप्रेषितास -श्श्रुष्टि ञ्चक्रु र्नियुतो रन्तयश्च।।
❀05.02.26 卐एकञ्च यो विंशतिञ्च श्रवस्या -वैकर्णयो र्जना त्राजा न्यस्तः~। दस्मो न सद्मन्नि शिशाति बर्हि- श्शू.र स्सर्ग मकृणो दिन्द्र एषाम्।।
卐 अध श्रुतङ्कवषँ वृद्ध मप्स्व-ऽनु द्रुह्युन्नि वृण ग्वज्रबाहुः। वृणाना^ अत्र सख्याय सख्य -न्त्वायन्तो ये अमदन्ननु त्वा।।
卐 वि सद्यो विश्वा दृंहितान्येषा- मिन्द्रः पुर स्सहसा सप्त दर्दः~। व्यानवस्य तृत्सवे गयं भा-ग्जेष्म पूरुँ विदथे मृध्रवाचम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 नि गव्यवोऽनवो द्रुह्यवश्च -षष्टि श्शता ऽसुषुपु ष्षद्सहस्रा। षष्टि र्वीरासो अधि षड्दुवोयु -विश्वे दिन्द्रस्य वीर्या कृतानि।।

卐 इन्द्रेणैते तृत्सवो वेविषाणा -आपो न सृष्टा अधवन्त नीचीः। दुर्मित्रासः प्रकलवि न्मिमाना- जहु र्विश्वानि भोजना सुदासे।।

❀05.02.27 卐अर्धं वीरस्य श्रृतपा. मनिन्द्रं -परा शर्धन्त न्नुनुदे अभि क्षाम्। इन्द्रो मन्युं मन्युम्यो मिमाय -भेजे पथो वर्तनिं पत्यमानः।।

卐 आध्रेण चित्तद्वे कञ्चकार -सिंह्यं चित्पेत्वेना जघान। अव स्त्रक्ती र्वेश्याऽवृश्चदिन्द्रः- प्राऽयच्छ द्विश्वा भोजना सुदासे।।

卐 शश्वन्तो हि शत्रवो रारधु ष्टे- भेदस्य चिच्छर्धतो विन्द रन्धिम्। मर्ता एन स्स्तुवतो यः कृणोति -तिग्म .न्तस्मिन्नि जहि वज्र मिन्द्र।।

卐 आव दिन्द्रँ यमुना तृत्सवश्च- प्रात्र भेदं सर्वताता .मुषायत्। अजासश्च शिग्रवो यक्षव श्च- बलिं शीर्षाणि जभ्रु रश्व्यानि।।

卐 न त इन्द्र सुमतयो न राय- स्सञ्चक्षे पूर्वा उषसो न नूत्नाः। देवकञ्चि न्मान्यमान ञ्जघन्थाव- त्मना बृहत श्शाम्बरं भेत्।

❀05.02.28 卐प्र ये गृहा दममदु स्त्वाया- पराशर श्शतयातु र्वसिष्ठः। न ते भोजस्य सख्यं मृषन्ता-ऽधा सूरिभ्य स्सुदिना व्युच्छान्।।

卐 द्वे नप्तु र्देववत श्शते गो- र्द्वा रथा वधूमन्ता सुदासः। अर्हन्नग्ने पैजवनस्य दानं- होतेव सद्म पर्येमि रेभन्न्।।

卐 चत्वारो मा पैजवनस्य दाना- स्स्मद्दिष्टयः कृशनिनो निरेके। ऋज्रासो मा पृथिविष्ठा स्सुदास- स्तोक न्तोकाय श्रवसे वहन्ति।।

卐 यस्य श्रवो रोदसी अन्त रुर्वी- शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता। सप्ते दिन्द्रन्न स्त्रवतो गृणन्ति- नि युध्यामधि मशिशा दभीके।।

卐 इमन्नरो मरुत स्सश्चता ऽनु -दिवोदासन्न पितरं सुदासः। अविष्टना पैजवनस्य केत -न्दूणाशङ्क्षत्र मजर न्दुवोयु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

7.19 यस्तिग्मशृङ्ग इत्येकादशर्चस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.02.29 卐यस्तिग्मशृङ्गो वृषभो न भीम-^ एकः कृष्टी श्च्यावयति प्र विश्वाः। यश्शश्वतो अदाशुषो गयस्य -प्रयन्ताऽसि सुष्वितराय वेदः।।

卐त्वं ह त्यदिन्द्र कुत्समाव -श्शुश्रूषमाण स्तन्वा समर्ये। दासं यच्छुष्णङ्कुयव न्न्यस्मा- अरन्धय^ आर्जुनेयाय शिक्षन्न्।।

卐 त्वन्धृष्णो~ धृषता वीतहव्यं- प्राऽवो विश्वाभि रूतिभि स्सुदासम्। प्र पौरुकुत्सि न्त्रसदस्यु मावः ≈ -क्षेत्रसाता वृत्रहत्येषु पूरुम्।।

卐 त्वन्नृभि र्नृमणो देववीतौ- भूरीणि वृत्रा हर्यश्व हंसि। त्वन्नि दस्युञ्चुमुरि न्धुनिञ्चा-ऽस्वापयो दभीतये सुहन्तु।।

卐 तव च्यौत्नानि वज्रहस्त तानि- नव यत्पुरो नवतिञ्च सद्यः। निवेशने शततमाऽविवेषी -रहञ्च वृत्रन्नमुचि .मुताहन्न्।।

❀05.02.30 卐सना ता त इन्द्र भोजनानि- रातहव्याय दाशुषे सुदासे। वृष्णे ते हरी~ वृषणा युनज्मि- व्यन्तु ब्रह्माणि पुरुशाक वाजम्।।

卐 मा ते अस्यां सहसाव न्परिष्टा -वघाय भूम हरिवः परादै। त्रायस्व नोऽवृकेभि र्वरूथै- स्तव प्रियास स्सूरिषु स्याम।।

卐 प्रियास^ इत्ते मघवन्नऽभिष्टौ -नरो मदेम शरणे सखायः। नि तुर्वशन्नि याद्वं शिशी ह्य-ऽतिथिग्वाय शंस्यङ्करिष्यन्न्।।

卐 सद्यश्चिन्नु ते मघवन्नभिष्टौ -नर श्शंस न्त्युक्थशास^ उक्था। ये ते हवेभि र्वि पणीः रदाशन्न-ऽस्मा न्वृणीष्व युज्याय तस्मै।।

卐 एते स्तोमा^ नरान्नृतम तुभ्य -मस्मद्र्यञ्चो ददतो मघानि। तेषा मिन्द्र वृत्रहत्ये शिवो भू -स्सखा च शूरोविता च नृणाम्।।

卐 नू इन्द्र शूर स्तवमान^ ऊती -ब्रह्मजूत स्तन्वा वावृधस्व। उप नो वाजा न्मिमी ह्युपस्ती -न्यूयं पात स्वस्तिभि स्सदा नः।।इति द्वितीयाध्याय स्समाप्तः।।

7.20 उग्रो जज्ञ इति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ इन्द्र- स्त्रिष्टुप्।।

05.03.01 उग्रो जज्ञे वीर्याय स्वधावा -न्चक्रि रपो नर्यो यत्करिष्यन्न्। जग्मि र्युवा नृषदन मवोभि- स्त्राता न^ इन्द्र^ एनसो महश्चित्।।

हन्ता वृत्र मिन्द्र श्शूशुवानः- प्रावीन्नु वीरो जरितार मूती। कर्ता सुदासे अह वा उ लोक -न्दाता वसु मुहुरा दाशुषे भूत्।।

युध्मो अनर्वा खजकृ त्समद्वा- शूर स्सत्राषा ज्जनुषे.मषाळ्हः। व्यास इन्द्रः पृतना स्स्वोजा^-अधा विश्वं शत्रूयन्त ञ्जघान।।

उभे~ चिदिन्द्र रोदसी महित्वाऽऽ-पप्राथ तविषीभि स्तुविष्मः। नि वज्र मिन्द्रो हरिवा न्मिमिक्ष - न्त्समन्धसा मदेषु वा उवोच।।

वृषा जजान वृषणं रणाय -तमु चिन्नारी नर्यं ससूव। प्र य स्सेनानी रध नृभ्यो अस्ती-न स्सत्वा गवेषण स्स धृष्णुः।।

05.03.02 नू चित्स भ्रेषते जनो न रेष -न्मनो यो अस्य घोर माविवासात्। यज्ञैर्य^ इन्द्रे दधते दुवांसि -क्षयत्स^ राय ऋतपा^ ऋतेजाः।।

यदिन्द्र पूर्वो^ अपराय शिक्षन्न-ऽयज्ज्यायान्कनीयसो देष्णम्। अमृत इत्पर्याऽऽसीत दूर- मा चित्र चित्र्यं भरा रयिन्नः।।

यस्त इन्द्र प्रियो जनो ददाश -दस न्निरेके अद्रिव स्सखा ते। वयन्ते अस्यां सुमतौ चनिष्ठा -स्स्याम वरूथे अघ्नतो नृपीतौ।।

एष स्तोमो अचिक्रद द्वृषा त -उत स्तामु र्मघवन्न क्रपिष्ट। रायस्कामो जरितारन्त आऽग -न्त्वमङ्ग शक्र वस्व^ आ शको नः।।

स न^ इन्द्र त्वयताया इषे धा- स्त्मना च ये मघवानो जुनन्ति। वस्वी षु ते जरित्रे अस्तु शक्ति -र्यूयं पात स्वस्तिभि स्सदा नः।।

7.21 असावि देवमिति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

❀05.03.03 卐असावि देव.ङ्गोऋजीक मन्धो- न्यऽस्मि न्निन्द्रो जनुषे मुवोच। बोधामसि त्वा हर्यश्व यज्ञै -र्बोधा न स्स्तोम .मन्धसो मदेषु।।

卐 प्र यन्ति यज्ञँ विपयन्ति बर्हि -स्सोममादो विदथे दुध्रवाचः। न्यु भ्रियन्ते यशसो गृभादा -ऽदूरउपब्दो वृषणो नृषाचः।।

卐 त्वमिन्द्र स्रवितवा अपस्कः~- परिष्ठिता अहिना शूर पूर्वीः। त्वद्वावक्रे रथ्यो3(ओ) न धेना^-रेजन्ते विश्वा कृत्रिमाणि भीषा।।

卐 भीमो विवेषाऽयुधेभि रेषा -.मपांसि विश्वा नर्याणि विद्वान्। इन्द्रः पुरो जर्हृषाणो वि दूधो .द्वि वज्रहस्तो महिना जघान।।

卐 न यातव इन्द्र जूजुवु र्नो -न वन्दना शविष्ठ वेद्याभिः। स शर्ध दऽर्यो विषुणस्य जन्तो -र्मा शिश्नदेवा अपि गुर् ऋतन्नः।।

❀05.03.04 卐अभि क्रत्वेन्द्र भूरऽध ज्म-न्न ते विव्यङ्महिमानं रजांसि। स्वेना हि वृत्रं शवसा जघन्थ -न शत्रु रन्तँ विविद द्युधा ते।।

卐 देवा^ श्चित्ते असुर्याय पूर्वेऽ-नु क्षत्राय ममिरे सहांसि। इन्द्रो मघानि दयते विषह्ये-न्द्रँ वाजस्य जोहुवन्त सातौ।।

卐 कीरि श्चिद्धि त्वामवसे जुहावे-शान .मिन्द्र सौभगस्य भूरेः। अवो बभूथ शतमूते अस्मे -अभिक्षत्तु स्त्वावतो वरूता।।

卐 सखायस्त इन्द्र विश्वह स्याम -नमोवृधासो महिना तरुत्र। वन्वन्तु स्मा तेऽवसा समीके3(ए)-ऽभीति मर्यो वनुषां शवांसि।।

卐 स न^ इन्द्र त्वयताया इषे धा^ -स्त्मना च ये मघवानो जुनन्ति। वस्वी षु ते जरित्रे अस्तु शक्ति -र्यूयं पात स्वस्तिभि स्सदा नः।।

7.22 पिबा सोममिति नवर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रो- विराळन्त्या त्रिष्टुप्।।

❀05.03.05 卐पिबा सोम मिन्द्र मन्दतु त्वा -यन्ते सुषाव हर्यश्वाद्रिः। सोतु र्बाहुभ्यां सुयतो ना र्वा।।

卐 यस्ते मदो युज्य श्चारु रस्ति- येन वृत्राणि हर्यश्व हंसि। स त्वामिन्द्र प्रभूवसो~ ममत्तु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 बोधा सु मे मघव न्वाच .मेमाँ -यान्ते वसिष्ठो अर्चति प्रशस्तिम्। इमा ब्रह्म सधमादे जुषस्व।।

卐 श्रुधी हवँ विपिपान स्याद्रे -र्बोधा विप्र स्यार्चतो मनीषाम्। कृष्वा दुवांस्यऽन्तमा सचेमा।।

卐 न ते गिरो अपि मृष्ये तुरस्य- न सुष्टुति .मसुर्यस्य विद्वान्। सदा ते नाम स्वयशो विवक्मि।।

❀05.03.06 卐भूरि हि ते सवना मानुषेषु -भूरि मनीषी हवते त्वामित्। मा ऽऽरे अस्म .न्मघवञ्ज्यो.क्कः~।।

卐 तुभ्ये दिमा सवना शूर विश्वा -तुभ्यं ब्रह्माणि वर्धना कृणोमि। त्वन्नृभि र्हव्यो विश्वधाऽसि।।

卐 नू चिन्नु ते मन्यमानस्य दस्मो-दश्नुवन्ति महिमान मुग्र। न वीर्य मिन्द्र ते न राधः।।

卐 ये च पूर्व ऋषयो ये च नूत्ना -इन्द्र ब्रह्माणि जनयन्त विप्राः। अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभि स्सदा नः।।

☬ 7.23 उदु ब्रह्माणीति षड्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.03.07 卐उदु ब्रह्माण्यैरत श्रवस्ये-न्द्रं समर्ये महया वसिष्ठ। आ यो विश्वानि शवसा ततानो-पश्रोता म ईवतो वचांसि।।

卐 अयामि घोष इन्द्र देवजामि- रिरज्यन्त यच्छुरुधो विवाचि। नहि स्व मायु श्चिकिते जनेषु -तानीदंहांस्यति पर्ष्यस्मान्।।

卐 युजे रथङ्गवेषणं हरिभ्या .-मुप ब्रह्माणि जुजुषाण मस्थुः। वि बाधिष्ट स्य रोदसी महित्वे-न्द्रो वृत्राण्यप्रती जघन्वान्।।

卐 आपश्चि त्पिप्यु स्स्तर्यो3(ओ) न गावो -नक्षन्नृत.ञ्जरितारस्त इन्द्र। याहि वायु र्न नियुतो नो अच्छा -त्वं हि धीभि र्दयसे वि वाजान्।।

卐 ते त्वा मदा इन्द्र मादयन्तु -शुष्मिण न्तुविराधस ञ्जरित्रे। एको देवत्रा दयसे हि मर्ता- नस्मिञ्छूर सवने मादयस्व।।

卐 एवे दिन्द्रँ वृषणँ वज्रबाहुँ -वसिष्ठासो अभ्यर्च न्त्यर्कैः। स न स्स्तुतो वीरव द्धातु गोम-द्यूयं पात स्वस्तिभि स्सदा नः ।।

☬ 7.24 योनिष्ट इति षड्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.03.08 卐योनिष्ट इन्द्र सदने अकारि- तमा नृभिः पुरुहूत प्र याहि। असो यथा नोऽविता वृधे च -ददो वसूनि ममदश्च सोमैः।।

卐 गृभीत.न्ते मन^ इन्द्र द्विबर्हा -स्सुत स्सोमः परिषिक्ता मधूनि। विसृष्टधेना भरते सुवृक्ति .-रिय मिन्द्रञ्जोहुवती मनीषा।।

卐 आ नो दिव आ पृथिव्या^ ऋजीषि -न्निदं बर्हि स्सोमपेयाय याहि। वहन्तु त्वा हरयो मद्यञ्च .-माङ्गूष मच्छा तवसं मदाय।।

卐 आ नो विश्वाभि रूतिभि -स्सजोषा^ -ब्रह्म जुषाणो हर्यश्व याहि। वरीवृज त्स्थविरेभि स्सुशिप्रा-ऽस्मे दध द्वृषणं शुष्म मिन्द्र।।

卐 एष स्तोमो मह उग्राय वाहे -धुरी3(ई)वात्यो न वाजयन्नधायि। इन्द्र त्वाऽय मर्क^ ईट्टे वसूना -न्दिवीव द्यामधि न श्श्रोमतन्धाः।।

卐 एवा न^ इन्द्र वार्यस्य पूर्धि -प्र ते महीं सुमतिं वेविदाम। इषं पिन्व मघवद्ध्य स्सुवीराँ -यूयं पात स्वस्तिभि स्सदा नः।।

7.25 आ ते मह इति षडृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र-स्त्रिष्टुप्।।

❀05.03.09 卐आ ते मह^ इन्द्रोत्युग्र -समन्यवो यत्समरन्त सेनाः। पताति दिद्युन्नर्यस्य बाह्वो-र्मा ते मनो विष्वद्र्य1(अ)ग्वि चारीत्।।

卐 नि दुर्ग इन्द्र श्नथि ह्यऽमित्रा -नभि ये नो मर्तासो अमन्ति। आरे तं शंसङ्कृणुहि निनित्सो- रा ऽऽनो भर संभरणँ वसूनाम्।।

卐 शतन्ते शिप्रि न्नूतय स्सुदासे- सहस्रं शंसा^ उत राति रस्तु। जहि वध र्वनुषो मर्त्यस्याऽ-स्मे द्युम्न .मधि रत्नञ्च धेहि।।

卐 त्वावतो हीन्द्र क्रत्वे अस्मि- त्वावतोऽवितु श्शूर रातौ। विश्वेदहानि तविषीव^ उग्रँ -ओकः कृणुष्व हरिवो न मर्धीः।।

卐 कुत्सा^ एते हर्यश्वाय शूष .-मिन्द्रे सहो देवजूत मियानाः। सत्रा कृधि सुहना शूर वृत्रा- वय न्तरुत्रा स्सनुयाम वाजम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 एवा न इन्द्र वार्यस्य पूर्धि -प्र ते महीं सुमतिं वेविदाम। इषं पिन्व मघवद्भ्य स्सुवीरां -यूयं पात स्वस्तिभि स्सदा नः।।

7.26 न सोम इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.03.10 卐न सोम॑ इन्द्र .मसुतो ममाद- नाऽब्रह्माणो मघवानं सुतासः। तस्मा उक्थ.ञ्जनये यज्जुजोष -न्नृवन्नवीय श्शृणव द्यथा नः।।

卐 उक्थउक्थे सोम॑ इन्द्रं ममाद -नीथेनीथे मघवानं सुतासः। यदीं सबाधः पितरन्न पुत्रा -स्समानदक्षा॑ अवसे हवन्ते।।

卐 चकार ता कृणव न्नून मन्या -यानि ब्रुवन्ति वेधस स्सुतेषु। जनीरिव पति रेक स्समानो- नि मामृजे पुर॑ इन्द्र स्सु सर्वाः।।

卐 एवा त.माहु रुत श्रृण्व इन्द्र॑ -एको विभक्ता तरणि र्मघानाम्। मिथस्तुर॑ ऊतयो यस्य पूर्वी -रस्मेभद्राणि सश्चत प्रियाणि।।

卐 एवा वसिष्ठ इन्द्र मूतये -नृन्कृष्टीनां वृषभं सुते गृणाति। सहस्रिण॑ उप नो माहि वाजा -न्यूयं पात स्वस्तिभि स्सदा नः।।

7.27 इन्द्र न्नर इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.03.11 卐इन्द्रन्नरो नेमधिता हवन्ते -यत्पार्या॑ युनजते धियस्ताः। शूरो नृषाता शवस श्चकान- ॑ आ गोमति व्रजे भजा त्वन्नः।।

卐 य॑ इन्द्र शुष्मो मघवन्ते अस्ति -शिक्षा सखिभ्यः पुरुहूत नृभ्यः। त्वं हि दृळ्हा मघव न्विचेता – अपा वृधि परिवृतन्न राधः।।

卐 इन्द्रो राजा जगत श्चर्षणीना .-मऽधि क्षमि विषुरूपं यदस्ति। ततो ददाति दाशुषे वसूनि- चोद द्राध उपस्तुत श्चिदऽर्वाक्।।

卐 नू चिन्न॑ इन्द्रो मघवा सहूती- दानो वाजन्नि यमते न॑ ऊती। अनूना यस्य दक्षिणा पीपाय- वामन्नृभ्यो अभिवीता सखिभ्यः।।

卐 नू इन्द्र राये वरिव स्कृधी न॑ -आ ते मनो ववृत्याम मघाय। गोम दश्वाव द्रथव द्व्यन्तो -यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.28 ब्रह्मा ण इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.03.12 卐ब्रह्मा ण^ इन्द्रोप याहि विद्वा- न꣡र्वाञ्च स्ते हरय स्सन्तु युक्ताः। विश्वे चिद्धि त्वा विहवन्त मर्ता^ -अस्माक मिच्छृणुहि विश्वमिन्व।।

卐 हवन्त इन्द्र महिमा व्यान -ब्रह्म यत्पासि शवसि न्नृषीणाम्। आ यद्वज्र न्दधिषे हस्त उग्र -घोर स्सन्क्रत्वा जनिष्ठा^ अषाळ्हः।।

卐 तव प्रणीतीन्द्र जोहुवाना -न्त्सँ यन्नॄन्न रोदसी निनेथ। महे क्षत्राय शवसे हि जज्ञेऽ-तूतुजिञ्चि त्तूतुजि रशिश्नत्।।

卐 एभि र्न इन्द्राऽहभि र्दशस्य -दुर्मित्रासो हि क्षितयः पवन्ते। प्रति यच्चष्टे अनृत मनेना^ -अव द्विता वरुणो मायी न स्सात्।।

卐 वोचेमे दिन्द्रं मघवान मेनं -महो रायो राधसो यद्ददन्नः। यो अर्चतो ब्रह्मकृति मविष्ठो- यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.29 अयं सोम इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

❀05.03.13 卐अयं सोम इन्द्र तुभ्यं सुन्व -आ तु प्र याहि हरिव स्तदोकाः। पिबा त्व1(अ)स्य सुषुतस्य चारो -र्ददो मघानि मघव न्नियानः।।

卐 ब्रह्म .न्वीर ब्रह्मकृतिञ्जुषाणोऽ-र्वाचीनो हरिभि र्याहि तूयम्। अस्मिन्नू षु सवने मादयस्वो-प ब्रह्माणि शृणव इमा नः।।

卐 का ते अस्त्यरङ्कृति स्सूक्तैः- कदा नूनन्ते मघव न्दाशेम। विश्वा^ मती^ ऽऽरातनने त्वाया-ऽधा म इन्द्र शृणवो हवेमा।।

卐 उतो~ घा ते पुरुष्या3(आ)^ इदास -न्येषां पूर्वेषा मशृणोर् ऋषीणाम्। अधाहन्त्वा मघव न्जोहवीमि- त्वन्न इन्द्रासि प्रमतिः पितेव।।

卐वोचेमे दिन्द्रं मघवान मेनं -महो रायो राधसो यद्ददन्नः। यो अर्चतो ब्रह्मकृति मविष्ठो -यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.30 आ नो देवेति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्र- स्त्रिष्टुप्।।

05.03.14 卐आ नो देव शवसा याहि शुष्मि -न्भवा वृध^ इन्द्र रायो अस्य। महे नृम्णाय नृपते सुवज्र .-महि क्षत्राय पौंस्याय शूर।।

卐 हवन्त उ त्वा हव्यँ विवाचि -तनूषु शूरा स्सूर्यस्य सातौ। त्वँ विश्वेषु सेन्यो जनेषु -त्वँ वृत्राणि रन्धया सुहन्तु।।

卐 अहा यदिन्द्र सुदिना व्युच्छा -न्दधो यत्केतु मुपमं समत्सु। न्य1(अ)ग्नि स्सीद दसुरो न होता-हुवानो अत्र सुभगाय देवान्।।

卐 वयन्ते त इन्द्र ये च देव- स्तवन्त शूर ददतो मघानि। यच्छा सूरिभ्य^ उपमँ वरूथं -स्वाभुवो जरणा मश्नवन्त।।

卐वोचेमे दिन्द्रं मघवान मेनं -महो रायो राधसो यद्दन्नः। यो अर्चतो ब्रह्मकृति मविष्ठो -यूयं पात स्वस्तिभि स्सदा नः।।

🏺 7.31 प्र व इन्द्रायेति द्वादशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रो- गायत्र्यन्त्या स्तिस्रो विराजः।।

❀05.03.15 卐प्र व^ इन्द्राय माऽदनं- हर्यश्वाय गायत। सखाय स्सोमपाव्ने।।

卐 शंसे दुक्थं सुदानव -उत द्युक्षँ यथा नरः। चकृमा सत्यराधसे।।

卐 त्वन्न^ इन्द्र वाजयु -स्त्वङ्गव्यु श्शतक्रतो~। त्वं हिरण्ययु र्वसो~।।

卐वय मिन्द्र त्वायवोऽ-भि प्र णोनुमो वृषन्न्। विद्धी त्व1(अ)स्य नो वसो~।।

卐 मा नो निदे च वक्तवे-ऽर्यो रन्धी रराव्णे। त्वे अपि क्रतु र्मम।।

卐 त्वं वर्माऽसि सप्रथः -पुरोयोधश्च वृत्रहन्न्। त्वया प्रति ब्रुवे युजा।।

❀05.03.16 卐महा उतासि यस्य तेऽनु स्वधावरी~ सहः। मम्नाते~ इन्द्र रोदसी।।

卐 तन्त्वा मरुत्वती परि -भुव द्वाणी सयावरी। नक्षमाणा सह द्युभिः।।

卐 ऊर्ध्वास स्त्वाऽन्विन्दवो -भुव न्दस्म मुप द्यवि। सन्ते नमन्त कृष्टयः।।

卐प्र वो महे महिवृधे भरध्वं -प्रचेतसे प्र सुमतिङ्कृणुध्वम्। विशः पूर्वीः प्र चरा चर्षणिप्राः।।

卐 उरुव्यचसे महिने सुवृक्ति -मिन्द्राय ब्रह्म जनयन्त विप्राः। तस्य व्रतानि न मिनन्ति धीराः।।

卐 इन्द्रँ वाणी रनुत्तमन्यु मेव- सत्रा राजान न्दधिरे सहध्यै। हर्यश्वाय बर्हया समापीन्।।

7.32 मो षु त्वेति सप्तविंशत्यृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रः- प्रथमा चतुर्थी षष्ठ्यादि युगृचश्च बृहत्यः-द्वितीया पञ्चम्याद्ययुगृचश्च सतोबृहत्यः-रायस्काम इति तृतीया द्विपदाविराट्-(इन्द्र क्रतुन्न इत्यर्धर्चो वासिष्ठ श्शक्ति ऋषिरिति शाट्यायन ब्राह्मणम्-इन्द्र क्रतुन्न इत्यृग्द्वयात्मकस्य शक्ति ऋषिरिति ताण्डकब्राह्मणम्-)

❀05.03.17 卐मो~ षु त्वा वाघतश्चना-ऽऽरे अस्मन्नि^ रीरमन्न्। आरात्ता च्चित्सधमादन्न आ गही-ह वा सन्नुप श्रुधि।।

卐 इमे हि ते ब्रह्मकृत स्सुते सचा- मधौ न मक्ष^ आसते। इन्द्रे कामञ्जरितारो वसूयवो- रथे न पादमा दधुः।।

卐 रायस्कामो वज्रहस्तं सुदक्षिणं -पुत्रो न पितरं हुवे।।

卐 इम इन्द्राय सुन्विरे -सोमासो दध्याशिरः। ताँ आ मदाय वज्रहस्त पीतये -हरिभ्याँ याह्योक^ आ।।

卐 श्रव च्छ्रुत्कर्ण^ ईयते वसूना- न्नू चिन्नो मर्धिषद्गिरः। सद्यश्चिद्य स्सहस्राणि शता दद-न्नकि र्दित्सन्त माऽऽ मिनत्।।

❀05.03.18 卐स वीरो अप्रतिष्कुत-^ इन्द्रेण शूशुवे नृभिः। यस्ते गभीरा^ सवनानि वृत्रह- न्त्सुनोत्या च धावति।।

卐 भवा वरूथं मघव न्मघोनाँ -यत्समजासि शर्धतः। वि त्वाहतस्य वेदनं भजेम-ह्या दूणाशो भरा गयम्।।

卐 सुनोता सोमपाव्ने -सोम मिन्द्राय वज्रिणे। पचता पक्ती रवसे कृणुध्व मि-त्पृणन्नि.त्पृणते मयः।।

卐 मा स्रेधत सोमिनो दक्षता महे -कृणुध्वं राय आतुजे। तरणिरि ज्जयति क्षेति पुष्यति- न देवासः कवत्नवे।।

卐 नकि स्सुदासो रथं- पर्यास न रीरमत्। इन्द्रो यस्याविता यस्य- मरुतो गमत्स गोमति व्रजे।।

❀05.03.19 卐गम द्वाजँ वाजयन्निन्द्र मर्त्यो -यस्य त्वमविता भुवः। अस्माकं बोध्यविता रथाना- ऽमस्माकं शूर नृणाम्।।

卐 उदिन्न्वस्य रिच्यतेंऽ-शो धनन्न जिग्युषः। य^ इन्द्रो हरिवान्न दभन्ति तं -रिपो दक्ष न्दधाति सोमिनि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 मन्त्र मखर्वं सुधितं सुपेशस .-न्दधात यज्ञियेष्वा। पूर्वीश्चन प्रसितय स्तरन्ति तँ -य^ इन्द्रे कर्मणा भुवत्।।

卐 कस्तमिन्द्र त्वावसु -मा मर्त्यो दधर्षति। श्रद्धा इत्ते मघव न्पार्ये दिवि- वाजी वाजं ꣳसिषासति।।

卐 मघोन स्स्म वृत्रहत्येषु चोदय -ये ददति प्रिया वसु। तव प्रणीती हर्यश्व सूरिभि -र्विश्वा तरेम दुरिता।।

❀05.03.20 卐तवेदिन्द्रावमँ वसु -त्वं पुष्यसि मध्यमम्। सत्रा विश्वस्य परमस्य राजसि -नकिष्ट्वा गोषु वृण्वते।।

卐 त्वँ विश्वस्य धनदा^ असि श्रुतो -य ईं भव न्त्याजयः। तवायँ विश्वः पुरुहूत पार्थिवो-ऽवस्यु र्नाम भिक्षते ।।

卐 यदिन्द्र यावतस्त्व- मेताव दह मीशीय। स्तोतार मिद्दिधिषेय रदावसो~- न पापत्वाय रासीय।।

卐 शिक्षेयमि न्महयते दिवेदिवे- राय^ आ कुहचिद्विदे। नहि त्वदन्य न्मघवन्न^ आप्यँ- वस्यो अस्ति पिता चन।।

卐 तरणिरि ꣳत्सिषासति -वाजं पुरन्ध्या युजा। आ व इन्द्रं पुरुहूतन्नमे गिरा- नेमि न्तष्टेव सुद्रुम्।।

❀05.03.21 卐न ꣳदुष्टुती मर्त्यो विन्दते वसु -न स्रेधन्तं रयि र्नशत्। सुशक्ति रिन्मघव न्तुभ्यं मावते -देष्णँ यत्पार्ये दिवि।।

卐 अभि त्वा शूर नोनुमोऽ-दुग्धाइव धेनवः। ईशान मस्य जगत स्स्वर्दृश .-मीशान मिन्द्र तस्थुषः।।

卐 न त्वावाँ अन्यो दिव्यो न पार्थिवो -न जातो न जनिष्यते। अश्वायन्तो मघव न्निन्द्र वाजिनो -गव्यन्तस्त्वा हवामहे।।

卐 अभी षत स्तदा भरे-न्द्र ज्यायः कनीयसः। पुरूवसुर्हि मघव न्त्सना दसि- भरेभरे च हव्यः।।

卐 परा ꣳणुदस्व मघवन्नमित्रा -न्त्सुवेदा नो वसू कृधि। अस्माकं बोध्यविता महाधने -भवा वृध स्सखीनाम्।।

卐 इन्द्र क्रतुन्न^ आ भर -पिता पुत्रेभ्यो यथा। शिक्षा णो अस्मि न्पुरुहूत यामनि -जीवा^ ज्योति रशीमहि।।

卐 मा नो अज्ञाता वृजना दुराध्यो3(ओ)- माऽशिवासो अव क्रमुः। त्वया वयं प्रवत श्शश्वती रपो-ऽति शूर तरामसि।।

☸ 7.33 श्वित्यञ्च इति चतुर्दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ -आद्यानां पंचानां वसिष्ठपुत्रा ऋषयः- आद्यानां नवानां वसिष्ठपुत्रा देवताः-अन्त्यानां पञ्चानां वसिष्ठो देवता- त्रिष्टुप् ( आद्यानां नवानामिन्द्रो देवता- अन्त्यानां पंचानां वसिष्ठो देवता- व्यत्यासेन मिथस्तौ वा ऋषी-)

❀05.03.22 卐श्वित्यञ्चो मा दक्षिणतस्कपर्दा -धियञ्जिन्वासो अभि हि प्रमन्दुः। उत्तिष्ठ न्वोचे परि बर्हिषो- नृन्न मे दूरा दवितवे वसिष्ठाः।।

卐 दूरा .दिन्द्र मनय ऽन्नासुतेन -तिरो वैशन्त मति पान्त मुग्रम्। पाशद्युम्नस्य वायतस्य सोमा -त्सुता दिन्द्रोऽवृणीता वसिष्ठान्।।

卐 एवेन्नु कं सिन्धु मेभि स्ततारे-वेन्नुकं भेदमेभि र्जघान। एवेन्नुक न्दाशराज्ञे सुदासं -प्राऽव दिन्द्रो ब्रह्मणा वो वसिष्ठाः।।

卐 जुष्टी नरो ब्रह्मणा वः पितृणा -.मक्ष मव्ययन्न किला रिषाथ। यच्छक्वरीषु बृहता रवेणे-न्द्रे शुष्म मदधाता वसिष्ठाः।।

卐 उद्यामिवे त्तृष्णजो नाथितासोऽ-दीधयु र्दाशराज्ञे वृतासः। वसिष्ठस्य स्तुवत इन्द्रो अश्रो -दुरु न्तृत्सुभ्यो अकृणोदु लोकम्।।

❀05.03.23 卐दण्डाइवे द्गोअजनास आस -न्परिच्छिन्ना भरता अर्भकासः। अभवच्च पुरएता वसिष्ठ -आदि त्तृत्सूनाँ विशो अप्रथन्त।।

卐 त्रयः कृण्वन्ति भुवनेषु रेत -स्तिस्रः प्रजा आर्या ज्योति रग्राः। त्रयो घर्मास उषसं सचन्ते -सर्वा इत्ता अनु विदु र्वसिष्ठाः।।

卐 सूर्यस्येव वक्षथो ज्योति रेषां -समुद्रस्येव महिमा गभीरः। वातस्येव प्रजवो नान्येन -स्तोमो वसिष्ठा अन्वेतवे वः।।

卐 त इन्निण्यं हृदयस्य प्रकेतै -स्सहस्रवल्श मभि सञ्चरन्ति। यमेन ततं परिधिं वयन्तो-ऽप्सरस उप सेदु र्वसिष्ठाः।।

卐 विद्युतो ज्योतिः परि सञ्जिहानं -मित्रावरुणा यदपश्यतान्त्वा। तत्ते जन्मोतैकँ वसिष्ठा-गस्त्यो यत्त्वा विश आजभार।।

❀05.03.24 卐उतासि मैत्रावरुणो वसिष्ठो-र्वश्या ब्रह्मन्मनसोऽधि जातः। द्रप्सं स्कन्नं ब्रह्मणा दैव्येन -विश्वे देवाः पुष्करे त्वाऽददन्त।।

卐 स प्रकेत उभयस्य प्रविद्वा -न्त्सहस्रदान उत वा सदानः। यमेन ततं परिधिं वयिष्यन्न-ऽप्सरसः परि जज्ञे वसिष्ठः।।

卐 सत्रे ह जाता विषिता नमोभिः- कुम्भे रेतः सिषिचतु स्समानम्। ततो ह मान उदियाय मध्या -त्ततो जात मृषि माहु र्वसिष्ठम्।।

卐 उक्थभृतं सामभृतं बिभर्ति -ग्रावाणं बिभ्रत्प्र वदा त्यग्रे। उपैन माध्वं सुमनस्यमाना -आ वो गच्छाति प्रतृदो वसिष्ठः।।

☸ 7.34 प्र शुक्रैत्विति पञ्चविंशत्यृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा- द्विपदाविराट्-अन्त्या श्चतस्र स्त्रिष्टुभः-अब्जामुक्थैरिति द्विपदाया अहिर्देवता-मा नोऽहिर्बुध्न्योरित्यस्या अहिर्बुध्न्यः (इतश्चत्वारि वैश्वदेवसूक्तानि- भेदपक्षे - देवाः 1-आपः 1-इन्द्रः 2-यज्ञः 3-देवाः 2-वरुणः 1-देवाः 3-अग्निः 1-अपांनपात् 1-अहिः 1-अहिर्बुध्न्यः 1-देवाः 2-देवपत्नी त्वष्टारः 1-त्वष्टा 1-विश्वे 4-एवं 25)

❀05.03.25 卐प्र शुक्रैतु देवी मनीषा -अस्म त्सुतष्टो रथो न वाजी।।

卐 विदुः पृथिव्या दिवो जनित्रं -शृण्वन्त्यापो अध क्षरन्तीः।।

卐 आपश्चि दस्मै पिन्वन्त पृथ्वी -र्वृत्रेषु शूरा मंसन्त उग्राः।।

卐 आ धूर्ष्वस्मै दधाताश्वा -निन्द्रो न वज्री हिरण्यबाहुः।।

卐 अभि प्र स्थाताहेव यज्ञँ -यातेव पत्म न्त्मना हिनोत।।

卐 त्मना समत्सु हिनोत यज्ञ -न्दधात केतुञ्जनाय वीरम्।।

卐 उदस्य शुष्मा द्भानु र्नार्त -बिभर्ति भारं पृथिवी न भूम।।

卐 ह्वयामि देवाँ अयातु रग्ने -साधन्नृतेन धिय न्दधामि।।

卐 अभि वो देवी न्धियं न्दधिध्वं -प्र वो देवत्रा वाच ङ्कृणुध्वम्।।

卐 आ चष्ट आसां पाथो नदीनाँ -वरुण उग्र स्सहस्रचक्षाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀05.03.26 卐राजा राष्ट्रानां पेशो नदीना .-मनुत्त मस्मै क्षत्रँ विश्वायु।।
卐 अविष्टो~ अस्मा न्विश्वासु विक्ष्व-ऽद्युङ्कृणोत शंस न्निनित्सोः।।
卐 व्येतु दिद्यु द्विषा मशेवा -युयोत विष्वग्रप स्तनूनाम्।।
卐 अवीन्नो अग्नि र्हव्यान्नमोभिः- प्रेष्ठो अस्मा अधायि स्तोमः।।
卐 सजू र्देवेभि रपान्नपातं- सखायङ्कृध्वं शिवो नो अस्तु।।
卐 अब्जा मुक्थै रहिङ्गृणीषे -बुध्ने नदीनां रजस्सु षीदन्न्।।
卐मा नोऽहिर्बुध्न्यो रिषे धा -न्मा यज्ञो अस्य स्रिध दृतायोः।।
卐 उत न^ एषु नृषु श्रवो धुः -प्र राये यन्तु शर्धन्तो अर्यः।।
卐 तपन्ति शत्रुं स्व1(अ)र्ण भूमा - महासेनासो अमेभि रेषाम्।।
卐 आ यन्नः पत्नी र्गमन्त्यच्छा –त्वष्टा सुपाणि र्दधातु वीरान्।।
❀05.03.27 卐प्रति न स्स्तोम न्त्वष्टा जुषेत -स्यादस्मे अरमति र्वसूयुः।।
卐 ता नो रास न्रातिषाचो वसून्या- रोदसी वरुणानी शृणोतु। वरूत्रीभि स्सुशरणो नो अस्तु -त्वष्टा सुदत्रो वि दधातु रायः।।
卐 तन्नो रायः पर्वता स्तन्न आप -स्तद्रातिषाच ओषधी रुत द्यौः। वनस्पतिभिः पृथिवी सजोषा-^ उभे~ रोदसी परि पासतो नः।।
卐 अनु तदुर्वी~ रोदसी जिहाता -मनु द्युक्षो वरुण इन्द्रसखा। अनु विश्वे मरुतो ये सहासो- राय स्स्याम धरुण न्धियध्यै।।
卐 तन्न^ इन्द्रो वरुणो मित्रो अग्नि -राप ओषधी र्वनिनो जुषन्त। शर्मन्त्स्याम मरुता मुपस्थे- यूयं पात स्वस्तिभि स्सदा नः।।
7.35 शन्न इन्द्राग्नी इति पञ्चदशर्चस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठो- विश्वेदेवा- स्त्रिष्टुप्- (अत्र सूक्ते सर्वेऽपि विश्वेदेवाः)।।
❀05.03.28 卐शन्न इन्द्राग्नी~ भवता मवोभि- श्शन्न इन्द्रावरुणा रातहव्या। शमिन्द्रासोमा सुविताय शँयो -श्शन्न इन्द्रापूषणा वाजसातौ।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 शन्नो भग श्शमु न श्शंसो अस्तु -शन्नः पुरन्धि श्शमु सन्तु रायः। शन्न स्सत्यस्य सुयमस्य शंस -श्शन्नो अर्यमा पुरुजातो अस्तु।।

卐 शन्नो धाता शमु धर्ता नो अस्तु -शन्न उरूची भवतु स्वधाभिः। शं रोदसी बृहती~ शन्नो अद्रि -श्शन्नो देवानां सुहवानि सन्तु।।

卐 शन्नो अग्नि र्ज्योति^रनीको अस्तु -शन्नो मित्रवरुणा वश्विना शम्। शन्न स्सुकृतां सुकृतानि सन्तु -शन्न^ इषिरो अभि वातु वातः।।

卐 शन्नो द्यावापृथिवी~ पूर्वहूतौ शमन्तरिक्ष न्दृशये नो अस्तु। शन्न ओषधी र्वनिनो भवन्तु -शन्नो रजसस्पति रस्तु जिष्णुः।।

05.03.29 卐शन्न इन्द्रो वसुभि र्देवो अस्तु- शमादित्येभि र्वरुण स्सुशंसः। शन्नो रुद्रो रुद्रेभि र्जलाष-श्शन्न स्त्वष्टा ग्नाभि रिह शृणोतु।।

卐 शन्न स्सोमो भवतु ब्रह्म शन्न -श्शन्नो ग्रावाण श्शमु सन्तु यज्ञाः। शन्न स्स्वरूणां मितयो भवन्तु -शन्नः प्रस्व1(अ)श्शम्वस्तु वेदिः।।

卐 शन्न स्सूर्य उरुचक्षा^ उदेतु -शन्न श्चतस्रः प्रदिशो भवन्तु। शन्नः पर्वता^ ध्रुवयो भवन्तु -शन्न स्सिन्धव श्शमु सन्त्वापः।।

卐 शन्नो अदिति र्भवतु व्रतेभि -श्शन्नो भवन्तु मरुत स्स्वर्काः। शन्नो विष्णु श्शमु पूषा नो अस्तु -शन्नो भवित्रं शम्वस्तु वायुः।।

卐 शन्नो देव स्सविता त्रायमाण -श्शन्नो भवन्तूषसो विभातीः। शन्नः पर्जन्यो भवतु प्रजाभ्य -श्शन्नः ≈ क्षेत्रस्य पतिरस्तु शंभुः।।

~स्मे

05.03.30 卐शन्नो देवा विश्वदेवा भवन्तु -शं सरस्वती सह धीभि रस्तु। शमभिषाच श्शमु रातिषाच -श्शन्नो दिव्याः पार्थिवा^ श्शन्नो अप्याः।।

卐शन्न स्सत्यस्य पतयो भवन्तु -शन्नो अर्वन्त श्शमु सन्तु गावः। शन्न ऋभव स्सुकृत स्सुहस्ता -श्शन्नो भवन्तु पितरो हवेषु।।

卐 शन्नो अज^ एकपा देवो अस्तु -शन्नोऽहिर्बुध्न्य1(अ)श्शं समुद्रः। शन्नो अपान्नपा त्पेरु रस्तु- शन्नः पृश्नि र्भवतु देवगोपा।।

卐आदित्या^ रुद्रा^ वसवो जुषन्ते-दं ब्रह्म क्रियमाणन्नवीयः। शृण्वन्तु नो दिव्याः पार्थिवासो -गोजाता^ उत ये यज्ञियासः।।

卐 ये देवानाँ यज्ञिया^ यज्ञियानां -मनो र्यजत्रा^ अमृता^ ऋतज्ञाः। ते नो रासन्ता मुरुगाय मद्य यूयं पात स्वस्तिभि स्सदा नः।।

✡।। अथ परिशिष्टम्।।

卐 शँवती: पारय न्त्येते तं पृच्छन्ति वचो युजा। अभ्यारन्तँ यमाकेतुँ य एवेद मिति ब्रवन्न्।।

卐 भासाकेतुं परिस्त्रुतं भारती ब्रह्मवर्धनीः। सञ्ज्ञानाना मही माता य एवेद मिति ब्रवत्।।

卐 इन्द्रस्तङ्किँ विभुं प्रभुं भानुनेयं सरस्वतीम्। येन सूर्य मरोचय द्येनेमे रोदसी उभे।।

卐 जुषस्वाग्ने अङ्गिरः काण्वं मेध्यातिथिम्। मा त्वा सोमस्य बर्बृह त्सुतस्य मधुमत्तमः।।

卐 त्वमग्ने अङ्गिर श्शोचस्व देववीतमः। आ शन्तम शन्तमाभि रभिष्टिभि श्शान्ति स्स्वस्ति मकुर्वत।।

卐 शन्नः कनिक्रद देवः पर्जन्यो अभि वर्षतु। शन्नो द्यावापृथिवी~ शं प्रजाभ्य श्शन्न एधि द्विपदे शञ्चतुष्पदे।। ।। इति परिशिष्टम्।। ।। इति तृतीयाध्याय स्समाप्तः।।

## ಽ೧ಽ ಽ೧ಽपञ्चमाष्टके चतुर्थाध्यायः (वर्गाः 1-30)

7.36 प्र ब्रह्मेति नवर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा- स्त्रिष्टुप्- (भेदपक्षे – विश्वेदेवाः 3-इंद्रार्यमणौ 1-रुद्रः 1-नद्यः 1-मरुतः 1-विश्वेदेवाः 1-विष्णुमरुतः 1-एवं 9)।।

❀05.04.01 卐प्र ब्रह्मैतु सदना दृतस्य -वि रश्मिभि स्ससृजे सूर्यो गाः। वि सानुना पृथिवी सस्र उर्वी -पृथु प्रतीक मध्येधे अग्निः।।

卐 इमाँ वां मित्रावरुणा सुवृक्ति .-मिषन्न कृण्वे असुरा नवीयः। इनो वामन्यः पदवी रदब्धो -जनञ्च मित्रो यतति ब्रुवाणः।।

卐 आ वातस्य ध्रजतो रन्त इत्या^ -अपीपयन्त धेनवो न सूदाः। महो दिव स्सदने जायमानो-ऽचिक्रद दृषभ स्सस्मिन्नूधन्न्।।

卐 गिरा य^ एता युनज द्धरी~ त -इन्द्र प्रिया सुरथा शूर धायू~। प्र यो मन्युं रिरिक्षतो मिनात्या-ऽऽ सुक्रतु मर्यमणँ ववृत्याम्।।

卐 यजन्ते अस्य सख्यँ वयश्च -नमस्विन स्स्व ऋतस्य धामन्न्। वि पृक्षो बाबधे नृभि स्स्तवान^ -इदन्नमो रुद्राय प्रेष्ठम्।।

❀05.04.02 卐आ यत्साकँ यशसो वावशाना -स्सरस्वती सप्तथी सिन्धुमाता। या^ ¤स्सुष्वयन्त सुदुघा स्सुधारा -अभि स्वेन पयसा पीप्यानाः।।

卐 उत त्ये नो मरुतो मन्दसाना^ -धियं न्तोकञ्च वाजिनोऽवन्तु। मा नः परि ख्यदक्षरा चर -न्त्यवीवृध न्युज्य.न्ते रयिन्नः।।

卐 प्र वो महीं मरमतिङ्कृणुध्वं -प्र पूषणँ विदथ्य1(अ)न्न वीरम्। भग न्धियोऽवितारन्नो अस्या -स्सातौ वाजं रातिषाचं पुरन्धिम्।।

卐 अच्छायँ वो मरुत श्श्लोक एत्व-ऽच्छा विष्णु न्निषिक्तपा मवोभिः। उत प्रजायै गृणते वयो धु- र्यूयं पात स्वस्तिभि स्सदा नः।।

⚱ 7.37 आ वो वाहिष्ठ इत्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा- स्त्रिष्टुप्- (भेदपक्षे - ऋभवः 2-इन्द्रः 6-एवमष्टौ)।।

❀05.04.03 卐आ वो वाहिष्ठो वहतु स्तवध्यै –रथो वाजा^ ऋभुक्षणो अमृक्तः। अभि त्रिपृष्ठै स्सवनेषु सोमै -र्मदे सुशिप्रा महभिः पृणध्वम्।।

卐 यूयं ह रत्नं मघवत्सु धत्थ -स्स्वर्दृश^ ऋभुक्षणो अमृक्तम्। सँ यज्ञेषु स्वधावन्तः पिबध्वँ -वि नो राधांसि मतिभि र्दयध्वम्।।

卐 उवोचिथ हि मघव न्देष्णं -महो अर्भस्य वसुनो विभागे। उभा ते पूर्णा वसुना गभस्ती~- न सूनृता नि यमते वसव्या।।

卐 त्वमिन्द्र स्वयशा ऋभुक्षा- वाजो न साधु रस्त मेष्यृक्वा। वयन्नु ते दाश्वांस स्स्याम- ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः।।

卐 सनिताऽसि प्रवतो दाशुषे चि -द्याभि र्विवेषो हर्यश्व धीभिः। ववन्मा नु ते युज्याभि रूती -कदा न^ इन्द्र राय^ आ दशस्येः।।

❀05.04.04 卐वासयसीव वेधस स्त्वन्नᳲ- कदा न इन्द्र वचसो बुबोधः। अस्त न्तात्या धिया रयिं सुवीरं- पृक्षो नो अर्वा न्युहीत वाजी।।

卐 अभि यन्देवी निर्ऋति श्चिदीशे -नक्षन्त इन्द्रं शरद स्सुपृक्षः। उप त्रिबन्धु र्जरदष्टि मेत्य-ऽस्ववेशँ यङ्कृणवन्त मर्ताः।।

卐 आ नो राधांसि सवित~ स्स्तवध्या -आ रायो यन्तु पर्वतस्य रातौ। सदा नो दिव्यᳲ पायु स्सिषक्तु -यूयं पात स्वस्तिभि स्सदा नः ।।

7.38 उदु ष्य देव इत्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आद्यानां षण्णां सविता-अन्त्ययो र्द्वयो र्वाजिन- स्त्रिष्टुप्।।

❀05.04.05 卐उदु ष्य देव स्सविता ययाम- हिरण्ययी ममतिँ यामशिश्रेत्। नूनं भगो हव्यो मानुषेभि -र्वि यो रत्ना पुरूवसु र्दधाति।।

卐 उदु तिष्ठ सवित~ श्श्रुध्य1(अ)स्य -हिरण्यपाणे प्रभृता वृतस्य। व्यु1(उ)र्वीं पृथ्वी ममतिं सृजान^ -आ नृभ्यो मर्तभोजनं सुवानः।।

卐 अपि ष्टुत स्सविता देवो अस्तु -यमा ऽऽचिद्विश्वे वसवो गृणन्ति। स न स्स्तोमान्नमस्य1(अ)श्चनो -धाद्विश्वेभिᳲ पातु पायुभि र्नि सूरीन्।।

卐अभि यन्देव्यदिति र्गृणाति -सव न्देवस्य सवितु र्जुषाणा। अभि सम्राजो वरुणो गृणन्त्य-ऽभि मित्रासो अर्यमा सजोषाः।।

卐 अभि ये मिथो वनुष स्सपन्ते -रातिं न्दिवो रातिषाचᳲ पृथिव्याः। अहिर्बुध्न्य^ उत न श्शृणोतु -वरूत्र्येकधेनुभि र्नि पातु।।

卐 अनु तन्नो जास्पति र्मंसीष्ट -रत्न न्देवस्य सवितु रियानः। भग मुग्रोऽवसे जोहवीति -भग मनुग्रो अध याति रत्नम्।।

卐 शन्नो भवन्तु वाजिनो हवेषु -देवताता मितद्रव स्वर्काः। जम्भयन्तोऽहिं वृकं रक्षांसि -सनेम्यस्म द्युयवन्नमीवाः।।

卐 वाजेवाजेऽवत वाजिनो नो- धनेषु विप्रा^ अमृता^ ऋतज्ञाः। अस्य मध्वᳲ पिबत मादयध्व -न्तृप्ता^ यात पथिभि र्देवयानैः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

☸ 7.39 ऊर्ध्वो अग्निरिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा-स्त्रिष्टुप्- (भेदपक्षे-विश्वेदेवाः 1-वायुपूषणौ 1-विश्वेदेवाः 5-एवं 7)।।

❀05.04.06 卐ऊर्ध्वो अग्नि स्सुमतिँ वस्वो अश्रे -त्प्रतीची जूर्णि र्देवताति मेति। भेजाते~ अद्री~ रथ्येव पन्था -मृतं होता न^ इषितो यजाति।।

卐 प्र वावृजे सुप्रया बर्हि रेषा -मा विश्पतीव~ बीरिट इयाते~। विशा मक्तो रुषसः पूर्वहूतौ -वायुः पूषा स्वस्तये नियुत्वान्।।

卐 ज्मया^ अत्र वसवो रन्त देवा^ -उरा वन्तरिक्षे मर्जयन्त शुभ्राः। अर्वा क्पथ^ उरुज्रयः कृणुध्वं – श्रोता दूतस्य जग्मुषो नो अस्य।।

卐 ते हि यज्ञेषु यज्ञियास^ ऊमा- स्सधस्थँ विश्वे अभि सन्ति देवाः। ताँ अध्वर^ उशतो यक्ष्यग्ने -श्रुष्टी भग न्नासत्या पुरन्धिम्।।

卐 आऽग्ने गिरो दिव^ आ पृथिव्या -मित्रँ वह वरुण .मिन्द्र मग्निम्। आऽर्यमण मदितिँ विष्णु मेषां - सरस्वती मरुतो मादयन्ताम्।।

卐 ररे हव्यं मतिभि र्यज्ञियाना-न्नक्ष त्कामं मर्त्याना मसिन्वन्न्। धाता रयि मविदस्यं सदासां -सक्षीमहि युज्येभि र्नु देवैः।।

卐 नू रोदसी अभिष्टुते~ वसिष्ठैर् -ऋतावानो वरुणो मित्रो अग्निः। यच्छन्तु चन्द्रा^ उपमन्नो अर्कँ यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.40 ओ श्रुष्टिरिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा- स्त्रिष्टुप्- (अत्राखिला विश्वेदेवाः)।।

❀05.04.07 卐ओ~ श्रुष्टि र्विदथ्या3(आ)समेतु- प्रति स्तोम न्दधीमहि तुराणाम्। यदद्य देव स्सविता सुवाति -स्यामास्य रत्निनो विभागे।।

卐 मित्र स्तन्नो वरुणो रोदसी च -द्युभक्त मिन्द्रो अर्यमा ददातु। दिदेष्टु देव्यदिती रेक्णो- वायुश्च यन्नियुवैते~ भगश्च।।

卐 सेदुग्रो अस्तु मरुत स्स शुष्मी -यं मर्त्यं पृषदश्वा अवाथ। उते मग्नि स्सरस्वती जुनन्ति -न तस्य रायः पर्येताऽस्ति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अयं हि नेता वरुण ऋतस्य -मित्रो राजानो अर्यमाऽपो धुः~। सुहवा देव्यदिति रनर्वा -ते नो अंहो अति पर्षन्नरिष्टान्।।

卐 अस्य देवस्य मीळ्हुषो वया -विष्णो रेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वँ -यासिष्टँ वर्ति रश्विना विरावत्।।

卐 मात्र पूषन्नाघृण इरस्यो -वरूत्री यद्रातिषाचश्च रासन्न्। मयोभुवो नो अर्वन्तो नि पान्तु -वृष्टिं परिज्मा वातो ददातु।।

卐 नू रोदसी अभिष्टुते~ वसिष्ठैर् -ऋतावानो वरुणो मित्रो अग्निः। यच्छन्तु चन्द्रा उपमन्नो अर्कँ यूयं पात स्वस्तिभि स्सदा नः।।

7.41 प्रातरग्निमिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- भग-आद्याया अग्नीन्द्र मित्रावरुणाश्वि भग पूष ब्रह्मणस्पति रुद्रा देवाताः-अन्त्याया उषा- आद्या जगती-शेषास्त्रिष्टुभः।।

❀05.04.08 卐प्रात रग्निं प्रात रिन्द्रं हवामहे -प्रात र्मित्रावरुणा प्रात रश्विना। प्रात र्भगं पूषणं ब्रह्मणस्पतिं -प्रात~ स्सोम मुत रुद्रं हुवेम।।

卐 प्रातर्जितं भग मुग्रं हुवेम -वयं पुत्र मदिते र्यो विधर्ता। आध्रश्चिद्यं मन्यमान स्तुरश्चि-द्राजा चिद्यं भगं भक्षीत्याह।।

卐 भग प्रणेत~ र्भग सत्यराधो -भगेमा न्धिय मुदवा ददन्नः। भग प्र णो जनय गोभिरश्वै -र्भग प्र नृभि र्नृवन्त स्स्याम।।

卐 उतेदानीं भगवन्त स्स्यामो-त प्रपित्व उत मध्ये अह्नाम्। उतोदिता मघव न्त्सूर्यस्य- वय न्देवानां सुमतौ स्याम।।

卐 भग एव भगवा९ अस्तु देवा -स्तेन वयं भगवन्त स्स्याम। तन्त्वा भग सर्व इज्जोहवीति -स नो भग पुरएता भवेह।।

卐 समध्वरायोषसो नमन्त- दधिक्रावेव शुचये पदाय। अर्वाचीनँ वसुविदं भगन्नो- रथमिवाश्वा वाजिन आ वहन्तु।।

卐 अश्वावती र्गोमतीर्न उषासो -वीरवती स्सद मुच्छन्तु भद्राः। घृत न्दुहाना विश्वत४ प्रपीता -यूयं पात स्वस्तिभि स्सदा नः।।

7.42 प्र ब्रह्माण इति षड्ृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा- स्त्रिष्टुप्- (भेदपक्षे – विश्वेदेवाः 1-अग्निः 1-देवाः 1-अग्निः 3-एवं 6)।।

05.04.09 卐प्र ब्रह्माणो अङ्गिरसो नक्षन्त -प्र क्रन्दनु र्नभन्यस्य वेतु। प्र धेनव उदप्रुतो नवन्त -युज्याता मद्री~ अध्वरस्य पेशः।।

卐 सुगस्ते अग्ने सनवित्तो अध्वा -युक्ष्वा सुते हरितो रोहितश्च। ये वा सद्मन्नरुषा^ वीरवाहो -हुवे देवानाञ्जनिमानि सत्तः।।

卐 समु वो यज्ञं महयन्नमोभिः- प्र होता मन्द्रो रिरिच उपाके। यजस्व सु पुर्वणीक देवाना- ऽयज्ञिया मरमतिँ ववृत्याः।।

卐 यदा वीरस्य रेवतो दुरोणे -स्योनशी रतिथि राचिकेतत्। सुप्रीतो अग्नि स्सुधितो दम आ -स विशे दाति वार्य मियत्यै।।

卐 इमन्नो अग्ने अध्वरञ्जुषस्व -मरुत्स्विन्द्रे यशसङ्कृधी नः। आ नक्ता बर्हि स्सदता मुषासो-शन्ता मित्रावरुणा यजेह।।

卐 एवाग्निं सहस्य1(अँ) वसिष्ठो -रायस्कामो विश्वप्स्न्यस्य स्तौत्। इषं रयिं पप्रथ द्वाज मस्मे-यूयं पात स्वस्तिभि स्सदा नः।।

7.43 प्र वो यज्ञेष्विति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विश्वेदेवा स्त्रिष्टुप्-(भेदपक्षे-विश्वेदेवाः 1-यज्ञः 1-विश्वेदेवाः 2-अग्निः 1-एवं 5)।।

05.04.10 卐प्र वो यज्ञेषु देवयन्तो अर्च -न्द्यावा नमोभिः पृथिवी~ इषध्यै। येषां ब्रह्माण्यसमानि विप्रा^ -विष्वग्वियन्ति वनिनो न शाखाः।।

卐 प्र यज्ञ^ एतु हेत्वो न सप्ति -रुद्यच्छध्वं समनसो घृताचीः। स्तृणीत बर्हि रध्वराय साधू-र्ध्वा शोचींषि देवयू न्यस्थुः।।

卐 आ पुत्रासो न मातरँ विभृत्रा- स्सानौ देवासो बर्हिष स्सदन्तु। आ विश्वाची विदथ्या मनक्त्व-ऽग्ने मा नो देवताता मृधस्कः~।।

卐 ते सीषपन्त जोषमा यजत्रा^ -ऋतस्य धारा^ स्सुदुघा^ दुहानाः। ज्येष्ठँ वो अद्य मह आ वसूना-. मागन्तन समनसो यतिष्ठ।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 एवा नो अग्ने विक्ष्वाऽऽ दशस्य -त्वया वयं सहसाव न्नाऽस्क्राः। राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभि स्सदा नः।।

☬ 7.44 दधिक्राँव इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- दधिक्रा- आद्याया दधिक्राऽश्व्युषोऽग्नि-भगेन्द्र- विष्णु- पूष- ब्रह्मणस्प-त्यादित्य द्यावापृथि-व्याप- स्त्रिष्टुबाद्या जगती।।

❀05.04.111 卐दधिक्राँ वः प्रथम मश्विनोषस -मग्निं समिद्धं भग मूतये हुवे। इन्द्रँ विष्णुं पूषणं ब्रह्मणस्पति- मादित्या न्द्यावापृथिवी~ अपस्स्वः~।।

卐 दधिक्रामुनमसा बोधयन्त^ -उदीराणा यज्ञ मुपप्रयन्तः। इळा न्देवीं बर्हिषि सादयन्तो-ऽश्विना विप्रा सुहवा हुवेम।।

卐 दधिक्रावाणं बुबुधानो अग्नि -मुप ब्रुव उषसं सूर्यङ्गाम्। ब्रध्नं मंश्चतो र्वरुणस्य बभ्रु-न्ते विश्वाऽस्म द्दुरिता यावयन्तु।।

卐 दधिक्रावा प्रथमो वाज्यर्वा-ऽग्रे रथानां भवति प्रजानन्न्। सँविदान^ उषसा सूर्येणा-ऽऽदित्येभि र्वसुभि रङ्गिरोभिः।।

卐 आ नो दधिक्राः पथ्या.मन -त्त्वृतस्य पन्था मन्वेतवा उ। शृणोतु नो दैव्यं शर्धो अग्नि -श्शृण्वन्तु विश्वे महिषा^ अमूराः।।

☬ 7.45 आ देव इति चतुर्ऋचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- स्सविता- त्रिष्टुप्।।

❀05.04.12- 卐आ देवो यातु सविता सुरत्नो-ऽन्तरिक्षप्रा^ वहमानो अश्वैः। हस्ते दधानो नर्या पुरूणि -निवेशयन्च प्रसुवञ्च भूम।।

卐 उदस्य बाहू~ शिथिरा बृहन्ता -हिरण्यया दिवो अन्ताँअनष्टाम्। नूनं सो अस्य महिमा पनिष्ट-सूरश्चि दस्मा अनु दादपस्याम्।।

卐 स घा नो देव स्सविता सहावा-ऽसाविष द्वसुपति र्वसूनि। विश्रयमाणो अमति मुरूचीं -मर्तभोजन मध रासते नः।।

卐 इमा^ गिर स्सवितारं सुजिह्वं -पूर्णगभस्ति मीळते सुपाणिम्। चित्रँ वयो बृह दस्मे दधातु यूयं पात स्वस्तिभि स्सदा नः।।

☬ 7.46 इमा रुद्रायेति चतुर्ऋचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- रुद्रो- जगत्यन्या त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀05.04.13 卐इमा^ रुद्राय स्थिरधन्वने गिरः -≈ क्षिप्रेषवे देवाय स्वधाव्ने। अषाळ्हाय सहमानाय वेधसे -तिग्माऽयुधाय भरता शृणोतु नः।।

卐 स हि क्षयेण क्षम्यस्य जन्मन -स्साम्राज्येन दिव्यस्य चेतति। अवन्नवन्ती रुप नो दुरश्चरा-ऽनमीवो रुद्र जासु नो भव।।

卐 या ते दिद्यु दवसृष्टा दिवस्परि- क्ष्मया चरति परि सा वृणक्तु नः। सहस्रन्ते स्वपिवात भेषजा -मा न स्तोकेषु तनयेषु रीरिषः।।

卐 मा नो वधी रुद्र मा परा दा -मा ते भूम प्रसितौ हीळितस्य। आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभि स्सदा नः।।

☙ 7.47 आपो यँ व इति चतुर्ऋचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आप-स्त्रिष्टुप्।।

❀05.04.14 卐आपो यँ वः प्रथम न्देवयन्त^ -इन्द्रपान मूर्मि. मकृण्वतेळः। तँ वो वयं शुचि मरिप्र मद्य -घृतप्रुषं मधुमन्तँ वनेम।।

卐 तमूर्मि मापो मधुमत्तमँ वो-ऽपान्नपा दवत्वाशुहेमा। यस्मिन्निन्द्रो वसुभि र्मादयाते -तमश्याम देवयन्तो वो अद्य।।

卐 शतपवित्रा स्स्वधया मदन्ती -र्देवी र्देवाना मपि यन्ति पाथः। ता^ इन्द्रस्य न मिनन्ति व्रतानि -सिन्धुभ्यो हव्यङ्घृतव ज्जुहोत।।

卐 या^ स्सूर्यो रश्मिभि राततान -याभ्य^ इन्द्रो अरद द्गातु मूर्मिम्। ते सिन्धवो वरिवो धातना नो -यूयं पात स्वस्तिभि स्सदा नः।।

☙ 7.48 ऋभुक्षण इति चतुर्ऋचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- ऋभव- स्त्रिष्टुप्-अन्त्याया विश्वेदेवा वा।।

❀05.04.15 卐ऋभुक्षणो वाजा^ मादयध्व- मस्मे नरो मघवान स्सुतस्य। आ वोऽर्वाचः क्रतवो न याताँ -विभ्वो रथन्नयँ वर्तयन्तु।।

卐 ऋभुर् ऋभुभि रभि व स्स्याम -विभ्वो विभुभि श्शवसा शवांसि। वाजो अस्मा॰ अवतु वाजसाता –विन्द्रेण युजा तरुषेम वृत्रम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ते चिद्धि पूर्वी रभि सन्ति शासा -विश्वा॰ अर्य उपरतााति वन्वन्न्। इन्द्रो विभ्वा॰ ऋभुक्षा॑ वाजो अर्य -श्शत्रो र्मिथत्या कृणव न्वि नृम्णम्।।

卐 नू देवासो वरिव॰ कर्तना नो -भूत नो विश्वेऽवसे सजोषाः। समस्मेइषँ वसवो ददीर- न्यूयं पात स्वस्तिभि स्सदा नः।।

7.49 समुद्रज्येष्ठा इति चतुर्ऋचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आप-स्त्रिष्टुप्।।

❀05.04.16 卐समुद्रज्येष्ठा स्सलिलस्य मध्या -त्पुनाना॑ यन्त्यनिविशमानाः। इन्द्रो या॑ वज्री वृषभो रराद् -ता॑ आपो देवी रिह मामवन्तु।।

卐 या॑ आपो दिव्या॑ उत वा स्रवन्ति -खनित्रिमा॑ उत वा या॑ स्स्वयञ्जाः। समुद्रार्था॑ या॑ श्शुचय॰पावकास्ता॑ आपो देवी रिह मामवन्तु।।

卐 यासां राजा वरुणो याति मध्ये -सत्यानृते~ अवपश्य न्जनानाम्। मधुश्चुत श्शुचयो या॰ पावकास्ता आपो देवी रिह मामवन्तु।।

卐 यासु राजा वरुणो यासु सोमो -विश्वे देवा॑ यासूर्जं मदन्ति। वैश्वानरो यास्वग्नि॰ प्रविष्ट स्ता॑ आपो देवी रिह मामवन्तु।।

7.50 आमामिति चतुर्ऋचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मित्रावरुणा- वग्नि- र्विश्वेदेवा- नद्य इति क्रमेण देवता जगत्यन्त्याऽतिजगती शक्करी वा।।

❀05.04.17 卐आ मां मित्रावरुणेह रक्षत-ङ्कुलायय द्विश्वय न्मा न॑ आ गन्न्। अजकाव न्दुर्दृशीक न्तिरो दधे -मा मां पद्येन रपसा विदत्त्सरुः।।

卐 यद्विजाम न्परुषि वन्दनं भुव –ऽदष्ठीवन्तौ परि कुल्फौ च देहत्। अग्निष्टच्छोचन्नप बाधता मितो मा मां पद्येन रपसा विदत्त्सरुः।।

卐 यच्छल्मलौ भवति यन्नदीषु -यदोषधीभ्य॰ परि जायते विषम्। विश्वे देवा निरित स्तत्सुवन्तु मा मां पद्येन रपसा विदत्त्सरुः।।

卐 या॰ प्रवतो निवत॑ उद्वत॑ -उदन्वती रनुदकाश्च याः। ता॑ अस्मभ्यं पयसा पिन्वमाना- श्शिवा॑ देवी॑ रशिपदा॑ भवन्तु -सर्वा॑ नद्यो अशिमिदा ॑भवन्तु।।

7.51 आदित्यानामिति तृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आदित्या-स्त्रिष्टुप्।।

❀05.04.18 卐☞आदित्याना मवसा नूतनेन -सक्षीमहि शर्मणा शन्तमेन। अनागा^स्त्वे अदितित्वे तुरास^ -इमँ यज्ञ न्दधतु श्रोषमाणाः।।

卐 आदित्यासो अदिति र्मादयन्तां -मित्रो अर्यमा वरुणो रजिष्ठाः। अस्माकं सन्तु भुवनस्य गोपाꣳ -पिबन्तु सोम मवसे नो अद्य।।

卐 आदित्या^ विश्वे मरुतश्च विश्वे -देवा^ श्च विश्व ऋभवश्च विश्वे। इन्द्रो अग्नि रश्विना ꣳतुष्टुवाना^ -यूयं पात स्वस्तिभि स्सदा नः।।

⚱ 7.52 आदित्यास इति तृचस्य सूक्तस्य, मैत्रावरुणिर्वसिष्ठ- आदित्या-स्त्रिष्टुप्।।

❀05.04.19 卐आदित्यासो अदितय स्स्याम -पू र्देवत्रा वसवो मर्त्यत्रा। सनेम मित्रावरुणा सनन्तो- भवेम द्यावापृथिवी~ भवन्तः।।

卐 मित्र स्तन्नो वरुणो मामहन्त -शर्म तोकाय तनयाय गोपाः। मा वो भुजेमान्यजात मेनो- मा तत्कर्म वसवो यच्चयध्वे।।

卐 तुरण्यवोऽङ्गिरसो नक्षन्त -रत्न न्देवस्य सवितु रियानाः। पिता च तन्नो महा न्यजत्रो -विश्वे देवा स्समनसो जुषन्त।।

⚱ 7.53 प्र द्यावेति तृचस्यसूक्तस्य, मैत्रावरुणि र्वसिष्ठो- द्यावापृथिव्यौ- त्रिष्टुप्।।

❀05.04.20 卐प्र द्यावा यज्ञैꣳ पृथिवी~ नमोभि -स्सबाध^ ईळे बृहती~ यजत्रे~। ते~ चिद्धि पूर्वे कवयो गृणन्तꣳ- पुरो मही~ दधिरे देवपुत्रे~।।

卐 प्र पूर्वजे~ पितरा नव्यसीभि- र्गीर्भिꣳ कृणुध्वं सदने ऋतस्य। आ नो द्यावापृथिवी~ दैव्येन -जनेन यातं महि वाँ वरूथम्।।

卐 उतो~ हि वां रत्नधेयानि सन्ति -पुरूणि द्यावापृथिवी~ सुदासे। अस्मे धत्तँ यदस दस्कृधोयु यूयं पात स्वस्तिभि स्सदा नः।।

⚱ 7.54 वास्तोष्पत इति तृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वास्तोष्पति- स्त्रिष्टुप्।।

❀05.04.21 卐☞वास्तोष्पते प्रति जानी ह्य-ऽस्मा न्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व -शन्नो भव द्विपदे शञ्चतुष्पदे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 वास्तोष्पते प्रतरणो न॑ एधि -गयस्फानो गोभि रश्वेभि रिन्दो~। अजरासस्ते सख्ये स्याम -पितेव पुत्रान्प्रति नो जुषस्व।।

卐 वास्तोष्पते शग्मया संसदा ते -सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरन्नो -यूयं पात स्वस्तिभि स्सदा नः।।

7.55 अमीवहेत्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आद्याया वास्तोष्पति- र्द्वितीयादि सप्तानां प्रस्वापिनी-आद्या गायत्री-तत स्तिस्र उपरिष्टाद्बृहत्यः- अन्त्याश्चतस्रोऽनुष्टुभः।।

❀05.04.22 卐अमीवहा वास्तोष्पते -विश्वा रूपाण्याविशन्न्। सखा सुशेव एधि नः।।

卐 यदर्जुन सारमेय -दत॰ पिशङ्ग यच्छसे। वीव भ्राजन्त ऋष्टय- उप स्रक्वेषु बप्सतो नि षु स्वप।

卐 स्तेनं राय सारमेय -तस्करँ वा पुनस्सर। स्तोतृ निन्द्रस्य रायसि -किमस्मा न्दुच्छुनायसे नि षु स्वप।।

卐 त्वं सूकरस्य दर्दृहि -तव दर्दर्तु सूकरः। स्तोतृ निन्द्रस्य रायसि- किमस्मा न्दुच्छुनायसे –नि षु स्वप।।

卐 सस्तु माता सस्तु पिता- सस्तु श्वा सस्तु विश्पतिः। ससन्तु सर्वे ज्ञातय- स्सस्त्वय मभितो जनः।।

卐 य॑ आस्ते यश्च चरति -यश्च पश्यति नो जनः। तेषां सं हन्मो अक्षाणि- यथेदं हर्म्य न्तथा।।

卐 सहस्रशृङ्गो वृषभो -य स्समुद्रा दुदाचरत्। तेना सहस्येना वय-न्नि जना.न्त्स्वापयामसि।।

卐 प्रोष्ठेशया॑ वह्येशया॑ -नारीर्या स्तल्पशीवरीः। स्त्रियो या॰ पुण्यगन्धा -स्तास्सर्वा स्स्वापयामसि।।

✡।। अथ परिशिष्टम्।।

卐 स्वप्न स्स्वप्नाधिकरणे- सर्वन्निष्वापया जनम्। आ सूर्य मन्या न्त्स्वापया- व्युं1(उ)षञ्जाग्रिया महम्।।

卐 अजगरो नाम सर्प -स्सर्पि रविषो महान्। तस्मिन्हि सर्प स्सुधित .-स्तेन त्वा स्वापयामसि।।

卐 सर्प स्सर्पो अजगर -स्सर्पि रविषो महान्। तस्य सर्पात्सिन्धव -स्तस्य गाध मशीमहि।।

卐 काळिको नाम सर्पो- नवनाग सहस्रबलः। यमुनह्रदे ह सो जातो3(ओ)- यो नारायणवाहनः।।

卐 यदि काळिकदूतस्य -यदि का॰ काळिका द्भयात्। जन्मभूमि मतिक्रान्तो -निर्विषो याति काळिकः।।

卐 आ याहीन्द्र पथिभि रीळितेभि -र्यज्ञ मिमन्नो भागधेयञ्जुषस्व। तृप्ताञ्जहु र्मातुलस्येव योषा -भागस्ते पैतृष्वसेयी वपामिव।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यशस्करं बलवन्तं प्रभुत्व -न्तमेव राजाऽधिपति र्बभूव। सङ्कीर्णनागाऽश्वपति र्नराणां -सुमङ्गल्यं सतत न्दीर्घ मायुः।।

卐 कर्कोटको नाम सर्पो -यो दृष्टीविष उच्यते। तस्य सर्पस्य सर्पत्व -न्तस्मै सर्प नमोऽस्तुते।।

卐 येऽदो रोचने दिवो -ये वा सूर्यस्य रश्मिषु। येषा मप्सु सदस्कृत -न्तेभ्य स्सर्पेभ्यो नमः।।

卐 या इषवो यातुधानानाँ -ये वा वनस्पती ननु। ये वाऽवटेषु शेरते -तेभ्य स्सर्पेभ्यो नमः।।

卐 नमो अस्तु सर्पेभ्यो -ये के च पृथिवी मनु। ये अन्तरिक्षे ये दिवि -तेभ्य स्सर्पेभ्यो नमः।।

卐 उग्राऽऽयुधाः प्रमतिनः प्रवीरा -मायाविनो बलिना मिच्छमानाः। ये देवा नसुराः पराऽभव न्ताऽ-स्त्वँ वज्रेण मघव न्निवारय।। इति परिशिष्टम्।।

7.56 क ई व्यक्ता इति पञ्चविंशत्यृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मरुत- स्त्रिष्टुप्-आद्या एकादश द्विपदाविराजः- (अत्रान्त्याया वैश्वदेवत्वं कश्चि न्मन्यते तन्मानाभावादुपेक्ष्यम्)

❀05.04.23 卐क ईं व्यक्ता^ नर स्सनीळा^ -रुद्रस्य मर्या^ अधा स्वश्वाः।।

卐 नकिर्ह्येषाञ्जनूंषि वेद -ते अङ्ग विद्रे मिथो जनित्रम्।।

卐 अभि स्वपूभि र्मिथो वपन्त -वातस्वनस श्श्येना^ अस्पृध्रन्न्।।

卐 एतानि धीरो निण्या चिकेत -पृश्नि र्यदूधो मही जभार।।

卐 सा विड्सुवीरा मरुद्भि रस्तु -सना त्सहन्ती पुष्यन्ती नृम्णम्।।

卐 यामँ येष्ठा श्शुभा शोभिष्ठा -श्श्रिया संमिश्ला^ ओजोभि रुग्राः।।

卐 उग्रँ व ओज स्स्थिरा शवांस्यऽ-धा मरुद्भि र्गण स्तुविष्मान्।।

卐 शुभ्रो व श्शुष्मः क्रुध्मी मनांसि -धुनि र्मुनिरिव शर्धस्य धृष्णोः।।

卐 सनेम्यस्म द्युयोत दिद्युं .-मा वो दुर्मति रिह प्रणङ्गः।।

卐 प्रिया वो नाम हुवे तुराणा माऽऽ- यत्तृप न्मरुतो वावशानाः।।

❀05.04.24 卐स्वायुधास^ इष्मिण स्सुनिष्का-^ उत स्वय न्तन्व1(अ)श्शुम्भमानाः।।

卐 शुची वो हव्या मरुत श्शुचीनां -शुचिं हिनोम्यध्वरं शुचिभ्यः। ऋतेन सत्य मृतसाप^ आय -न्छुचिजन्मान श्शुचयः पावकाः।।

卐 अंसेष्वा ऽऽमरुतः खादयो वो- वक्षस्सु रुक्मा^ उपशिश्रियाणाः। वि विद्युतो न वृष्टिभी रुचाना^ -अनु स्वधा .मायुधै र्यच्छमानाः।।

卐 प्र बुध्न्या व^ ईरते महांसि -प्र नामानि प्रयज्यव स्तिरध्वम्। सहस्रिय न्दम्यं भाग मेत-ङ्गृहमेधीयं मरुतो जुषध्वम्।।

卐 यदि स्तुतस्य मरुतो अधीथेत्था -विप्रस्य वाजिनो हवीमन्न्। मक्षू राय स्सुवीर्यस्य दात –नू चिद्य मन्य आदभ द्ऽरावा।।

❀05.04.25 卐अत्यासो न ये मरुत स्स्वञ्चो -यक्षदृशो न शुभयन्त मर्याः। ते हर्म्येष्ठा श्शिशवो न शुभ्रा^ -वत्सासो न प्रक्रीळिनः पयोधाः।।

卐 दशस्यन्तो नो मरुतो मृळन्तु -वरिवस्यन्तो रोदसी सुमेके~। आरे गोहा नृहा वधो वो अस्तु -सुम्नेभि रस्मे वसवो नमध्वम्।।

卐 आ वो होता जोहवीति सत्त- स्सत्राचीं रातिं मरुतो गृणानः। य^ ईवतो वृषणो अस्ति गोपा -स्सो अद्वयावी हवते व^ उक्थैः।।

卐 इमे तुरं मरुतो रामयन्ती-मे सह स्सहस आ नमन्ति। इमे शंसँ वनुष्यतो नि पान्ति -गुरु द्वेषो अररुषे दधन्ति।।

卐 इमे रध्रञ्चि न्मरुतो जुनन्ति -भृमिञ्चिद्यथा वसवो जुषन्त। अप बाधध्वँ वृषण स्तमांसि -धत्त विश्व न्तनय न्तोक मस्मे।।

❀05.04.26 卐मा वो दात्रा न्मरुतो निरराम -मा पश्चा द्दघ्म रथ्यो विभागे। आ न स्स्पार्हे भजतना वसव्ये3(ए) -यदीं सुजातँ वृषणो वो अस्ति।।

卐 सँ यद्धनन्त मन्युभि र्जनास -श्शूरा^ यह्वीष्वोषधीषु विक्षु। अध स्मा नो मरुतो रुद्रियास -स्त्रातारो भूत पृतना स्वर्यः।।

卐 भूरि चक्र मरुतः पित्र्याण्यु-क्थानि या व श्शस्यन्ते पुरा चित्। मरुद्भि रुग्रः पृतनासु साळ्हा -मरुद्भि रित्सनिता वाज मर्वा।।

卐 अस्मे वीरो मरुत श्शुष्म्यस्तु -जनानाँ यो असुरो विधर्ता। अपो येन सुक्षितये तरेमा -ऽध स्वमोको अभि वस्स्याम।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 तन्न इन्द्रो वरुणो मित्रो अग्नि -रा॒ऽप ओषधी र्वनिनो जुषन्त। शर्मन्त्स्याम मरुता मुपस्थे यूयं पात स्वस्तिभि स्सदा नः।।

7.57 मध्वो व इति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मरुत- स्त्रिष्टुप्।।

❀05.04.27 卐मध्वो वो नाम मारुतँ यजत्राः- प्र यज्ञेषु शवसा मदन्ति। ये रेजयन्ति रोदसी चिदुर्वी~- पिन्व न्त्युत्सँ यदयासु रुग्राः।।

卐 निचेतारो हि मरुतो गृणन्तं -प्रणेतारो यजमानस्य मन्म। अस्माक मद्य विदथेषु बर्हि-ऽरा वीतये सदत पिप्रियाणाः।।

卐 नैताव दन्ये मरुतो यथेमे -भ्राजन्ते रुक्मै रायुधै स्तनूभिः। आ रोदसी विश्वपिशः पिशाना -स्समान मञ्ज्यञ्जते शुभे कम्।।

卐 ऋधक्सा वो मरुतो दिद्यु दस्तु -यद्व आगः पुरुषता कराम। मा व स्तस्या मपि भूमा यजत्रा -अस्मे वो अस्तु सुमति श्चनिष्ठा।।

卐 कृते चिदत्र मरुतो रणन्ता -ऽनवद्यास श्शुचयः पावकाः। प्रणोऽवत सुमतिभि र्यजत्राः- प्र वाजेभि स्तिरत पुष्यसे नः।।

卐 उत स्तुतासो मरुतो व्यन्तु -विश्वेभि र्नामभि र्नरो हवींषि। ददात नो अमृतस्य प्रजायै -जिगृत राय स्सूनृता मघानि।।

卐 आ स्तुतासो मरुतो विश्व ऊती -अच्छा सूरी न्त्सर्वताता जिगात। ये नस्त्मना शतिनो वर्धयन्ति -यूयं पात स्वस्तिभि स्सदा नः।।

7.58 प्र साकमुक्ष इति षड़्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मरुत- स्त्रिष्टुप्—

❀05.04.28 卐प्र साकमुक्षे अर्चता गणाय -यो दैव्यस्य धाम्न स्तुविष्मान्। उत क्षोदन्ति रोदसी महित्वा -नक्षन्ते नाकन्निर्ऋते रवंशात्।।

卐 जनूश्चिद्वो मरुत स्त्वेष्येण -भीमास स्तुविमन्यवोऽयासः। प्र ये महोभि रोजसोत सन्ति -विश्वो वो याम न्भयते स्वर्दृक्।।

卐 बृहद्वयो मघवद्भ्यो दधात -जुजोष न्निन्मरुत स्सुष्टुतिन्नः। गतो ना ऽध्वा वि तिराति जन्तुं -प्र ण स्स्पार्हाभि रूतिभि स्तिरेत।।

卐 युष्मोतो विप्रो मरुत श्शतस्वी -युष्मोतो अर्वा सहुरि स्सहस्री। युष्मोत स्सम्राळुत हन्ति वृत्रं -प्र तद्वो अस्तु धूतयो देष्णम्।।

卐 ता॒ँ आ रुद्रस्य मीळ्हुषो विवासे -कुविन्नंसन्ते मरुतः पुनर्नः। यत्सस्वर्ता जिहीळिरे यदावि –रऽव तदेन ईमहे तुराणाम्।।

卐 प्र सा वाचि सुष्टुति र्मघोना.- मिदं सूक्तं मरुतो जुषन्त। आराच्चि द्वेषो वृषणो युयोत यूयं पात स्वस्तिभि स्सदा नः।।

7.59 यन्त्रायध्व इति द्वादशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मरुतोऽन्त्याया रुद्रः-आद्या तृतीया पञ्चम्यो बृहत्यः- द्वितीया चतुर्थी षष्ठ्य स्सतोबृहत्यः-सप्तम्यष्टम्यौ त्रिष्टुभौ-नवम्याद्यास्तिस्रो गायत्र्योऽन्त्याऽनुष्टुप्।।

❀05.04.29 卐यन्त्रायध्व इदमिद -न्देवासो यञ्च नयथ। तस्मा अग्ने वरुण मित्रार्यम -न्मरुत श्शर्म यच्छत।।

卐 युष्माक न्देवा॒ अवसाऽहनि प्रिय -ईजान स्तरति द्विषः। प्र स क्षय न्तिरते वि मही -रिषो यो वो वराय दाशति।।

卐 नहि वश्चरमञ्चन -वसिष्ठः परिमंसते। अस्माक मद्य मरुत स्सुते सचा- विश्वे पिबत कामिनः।।

卐 नहि व॒ ऊतिः पृतनासु मर्धति -यस्मा अराध्वन्नरः। अभि व आवर्त्सुमति र्नवीयसी -तूयँ यात पिपीषवः।

卐 ओ षु घृष्विराधसो -यातनान्धांसि पीतये। इमा वो हव्या मरुतो ररे हि कं –मो~ ष्व1(अ)न्यत्र गन्तन।।

卐 आ च नो बर्हि स्सदताविता च न -स्स्पार्हाणि दातवे वसु। अस्रेधन्तो मरुत स्सोम्ये मधौ -स्वाहेह मादयाध्वै।।

❀05.04.30 卐सस्व~ श्चिद्धि तन्व1(अ)श्शुम्भमाना॒ -आ हंसासो नीलपृष्ठा॒ अपप्तन्। विश्वं शर्धो अभितो मा नि षेद -नरो न रण्वा स्सवने मदन्तः।।

卐 यो नो मरुतो अभि दुर्हृणायु -स्तिर श्चित्तानि वसवो जिघांसति। द्रुहः पाशा न्प्रति स मुचीष्ट -तपिष्ठेन हन्मना हन्तना तम्।।

卐 सान्तपना^ इदं हवि -र्मरुत स्तज्जुजुष्टन। युष्माकोती रिशादसः।।

卐 गृहमेधास^ आ गत -मरुतो माऽप भूतन। युष्माकोती सुदानवः।।

卐 इहेह व स्स्वतवसः -कवय स्सूर्यत्वचः। यज्ञं मरुत आ वृणे।।

卐 त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धना न्मृत्यो मुक्षीय माऽमृतात्।।।। इति चतुर्थोध्याय स्समाप्तः ।।

## ऽ()ऽ ऽ()ऽपञ्चमाध्याये पञ्चमाध्यायः (वर्गाः 1-27)

7.60 यदद्येति द्वादशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मित्रावरुणा- वाद्याया स्सूर्य- स्त्रिष्टुप्।।

05.05.01 卐यदद्य सूर्य ब्रवोऽनागा^ -उद्य न्मित्राय वरुणाय सत्यम्। वय न्देवत्राऽदिते स्याम -तव प्रियासो अर्यम न्गृणन्तः।।

卐 एष स्य मित्रावरुणा नृचक्षा^ -उभे~ उदेति सूर्यो अभि ज्मन्न्। विश्वस्य स्थातु र्जगतश्च गोपा^ -ऋजु मर्तेषु वृजिना च पश्यन्न्।।

卐 अयुक्त सप्त हरित स्सधस्था -द्या^ ईं वहन्ति सूर्यङ्घृताचीः। धामानि मित्रावरुणा युवाकु -स्सँ यो यूथेव जनिमानि चष्टे।।

卐 उद्वां पृक्षासो मधुमन्तो अस्थु -रा ऽऽसूर्यो अरुह च्छुक्र मर्णः। यस्मा आदित्या^ अध्वनो रदन्ति -मित्रो अर्यमा वरुण स्सजोषाः।।

卐 इमे चेतारो अनृतस्य भूरे -र्मित्रो अर्यमा वरुणो हि सन्ति। इम ऋतस्य वावृधु र्दुरोणे -शग्मासः पुत्रा^ अदिते रदब्धाः।।

卐 इमे मित्रो वरुणो दूळभासो-ऽचेतसञ्चि च्चितयन्ति दक्षैः। अपि क्रतुं सुचेतसँ वतन्त -स्तिर श्चिदंह स्सुपथा नयन्ति।।

❀05.05.02 卐इमे दिवो अनिमिषा पृथिव्या^ -श्चिकित्वांसो अचेतसन्नयन्ति। प्रव्राजे चिन्नद्यो गाध मस्ति -पारन्नो अस्य विष्पितस्य पर्षन्न्।।

卐 यद्गोपाव ददिति श्शर्म भद्रं -मित्रो यच्छन्ति वरुण स्सुदासे। तस्मिन्ना ऽऽतोक न्तनय न्दधाना^ -मा कर्म देवहेळन न्तुरासः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अव वेदिं होत्राभि र्यजेत -रिपः काश्चि द्वरुणध्रुत स्सः। परि द्वेषोभि रर्यमा वृणक्तु-रुं सुदासे वृषणा उ लोकम्।।
卐 सस्व श्चिद्धि समृति स्त्वेष्येषा .-मपीच्येन सहसा सहन्ते। युष्मद्भिया वृषणो रेजमाना^ -दक्षस्य चिन्महिना मृळता नः।।
卐 यो ब्रह्मणे सुमति मायजाते- वाजस्य सातौ परमस्य रायः। सीक्षन्त मन्युं मघवानो अर्य^ -उरु क्षयाय चक्रिरे सुधातु।।
卐 इय न्देव पुरोहिति र्युवभ्याँ -यज्ञेषु मित्रावरुणा वकारि। विश्वानि दुर्गा पिपृत न्तिरो नो यूयं पात स्वस्तिभि स्सदा नः।।
7.61 उद्वा ञ्चक्षु रिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मित्रावरुणौ- त्रिष्टुप्-
❀05.05.03 卐उद्वाञ्चक्षु र्वरुण सुप्रतीक .-न्देवयो रेति सूर्य स्ततन्वान्। अभि यो विश्वा भुवनानि चष्टे -स मन्युं मर्त्येष्वा ऽचिकेत।।
卐 प्र वां स मित्रावरुणा वृतावा -विप्रो मन्मानि दीर्घश्रु दियर्ति। यस्य ब्रह्माणि सुक्रतू~ अवाथ^ -आ यत्क्रत्वा न शरदः पृणैथे~।।
卐 प्रोरो मित्रावरुणा पृथिव्याः -प्र दिव^ ऋष्वा द्बृहत स्सुदानू~। स्पशो दधाथे ~ओषधीषु विक्ष्वृ-ध ग्यतो अनिमिषं रक्षमाणा।।
卐 शंसा मित्रस्य वरुणस्य धाम -शुष्मो रोदसी बद्बधे महित्वा। अयन्मासा^ अयज्वना मवीराः- प्र यज्ञमन्मा वृजन न्तिराते।।
卐 अमूरा विश्वा वृषणा विमा^ वा-.न्न यासु चित्र न्ददृशे न यक्षम्। द्रुह स्सचन्ते अनृता जनानान्न- वान्निण्या न्यचिते अभूवन्न्।।
卐 समु वाँ यज्ञं महयन्नमोभि -र्हुवे वां मित्रावरुणा सबाधः। प्र वां मन्मान्यृचसे नवानि -कृतानि ब्रह्म जुजुष न्निमानि।।
卐 इय न्देव पुरोहिति र्युवभ्याँ -यज्ञेषु मित्रावरुणा वकारि। विश्वानि दुर्गा पिपृत न्तिरो नो यूयं पात स्वस्तिभि स्सदा नः।।

☬ 7.62 उत्सूर्य इति षड़ृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आद्यानां तिसृणां सूर्य स्ततस्तिसृणां मित्रावरुणौ- त्रिष्टुप्।।

❀05.05.04 卐उत्सूर्यो बृहदर्चींष्यश्रे -त्पुरु विश्वा जनिम मानुषाणाम्। समो दिवा ददृशे रोचमानः- क्रत्वा कृत स्सुकृतः कर्तृभि र्भूत्।।

卐 स सूर्य प्रति पुरो न उद्गा -एभि स्स्तोमेभि रेतशेभि रेवैः। प्र नो मित्राय वरुणाय वोचो-ऽनागसो अर्यम्णे अग्नये च।।

卐 वि न स्सहस्रं शुरुधो रद -न्त्वृतावानो वरुणो मित्रो अग्निः। यच्छन्तु चन्द्रा उपमन्नो अर्क.- मा नः कामं पूपुरन्तु स्तवानाः।।

卐 द्यावाभूमी~ अदिते त्रासीथान्नो -ये वाञ्जज्ञु स्सुजनिमान ऋष्वे~। मा हेळे भूम वरुणस्य वायो -र्मा मित्रस्य प्रियतमस्य नृणाम्।।

卐 प्र बाहवा सिसृतञ्जीवसे न -आ नो गव्यूति मुक्षतङ्घृतेन। आ नो जने श्रवयतँ युवाना -श्रुतं मे मित्रावरुणा हवेमा।।

卐 नू मित्रो वरुणो अर्यमा न -स्त्मने तोकाय वरिवो दधन्तु। सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभि स्सदा नः।।

☬ 7.63 उद्वेतीति षड़ृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठः-आद्यानां साऽर्धचतसृणां सूर्य-स्ततो मित्रावरुणौ- त्रिष्टुप्।।

❀05.05.05 卐उद्वेति सुभगो विश्वचक्षा- स्साधारण स्सूर्यो मानुषाणाम्। चक्षु र्मित्रस्य वरुणस्य देव -श्चर्मेव यस्समविव्य क्तमांसि।।

卐 उद्वेति प्रसवीता जनानां -महा न्केतु रर्णव स्सूर्यस्य। समानञ्चक्रं पर्याविवृत्स -न्यदेतशो वहति धूर्षु युक्तः।।

卐 विभ्राजमान उषसा मुपस्था .-द्रेभै रुदे त्यनुमद्यमानः। एष मे देव स्सविता चच्छन्द -यस्समानन्न प्रमिनाति धाम।।

卐 दिवो रुक्म उरुचक्षा उदेति -दूरेअर्थ स्तरणि र्भ्राजमानः। नूनञ्जना स्सूर्येण प्रसूता -अयन्नर्थानि कृणवन्नपांसि।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 यत्रा चक्रु रमृता गातु मस्मै –श्येनो न दीयन्नन्वेति पाथः। प्रति वां सूर उदिते विधेम -नमोभि र्मित्रावरुणोत हव्यैः।।

卐 नू मित्रो वरुणो अर्यमा न -स्त्मने तोकाय वरिवो दधन्तु। सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभि स्सदा नः।।

7.64 दिवि क्षयन्तेति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मित्रावरुणौ- त्रिष्टुप्।।

❀05.05.06 卐दिवि क्षयन्ता रजसः पृथिव्यां -प्र वाङ्गृतस्य निर्णिजो ददीरन्न्। हव्यन्नो मित्रो अर्यमा सुजातो -राजा सुक्षत्रो वरुणो जुषन्त।।

卐 आ राजाना मह ऋतस्य गोपा -सिन्धुपती क्षत्रिया यात मर्वाक्। इळान्नो मित्रावरुणोत वृष्टि .- मऽवं दिव इन्वतञ्जीरदानू।।

卐 मित्र स्तन्नो वरुणो देवो अर्यः- प्र साधिष्ठेभिः पथिभि र्नयन्तु। ब्रव द्यथा न आदरि स्सुदास -इषा मदेम सह देवगोपाः।।

卐 यो वाङ्गर्तं मनसा तक्षदेत -मूर्ध्वां न्धीतिङ्कृणव द्धारयच्च। उक्षेथां मित्रावरुणा घृतेन -ता राजाना सुक्षिती स्तर्पयेथाम्।।

卐 एष स्तोमो वरुण मित्र तुभ्यं -सोम श्शुक्रो न वायवेऽयामि। अविष्ट न्धियो जिगृतं पुरन्धी र्यूयं पात स्वस्तिभि स्सदा नः।।

7.65 प्रति वामिति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- मित्रावरुणौ- त्रिष्टुप्।।

❀05.05.07 卐प्रति वां सूर उदिते सूक्तै -र्मित्रं हुवे वरुणं पूतदक्षम्। ययो रसुर्य1(अ) मक्षितञ्ज्येष्ठं .- विश्वस्य यामन्नाऽऽचिता जिगत्नु।।

卐 ता हि देवाना मसुरा तावर्या -ता नः क्षितीः करत मूर्जयन्तीः। अश्याम मित्रावरुणा वयँ वा- न्द्यावा च यत्र पीपयन्नहा च।।

卐 ता भूरिपाशा वनृतस्य सेतू- दुरत्येतू रिपवे मर्त्याय। ऋतस्य मित्रावरुणा पथा वा .-मपो न नावा दुरिता तरेम।।

卐 आ नो मित्रावरुणा हव्यजुष्टि-ङ्घृतै र्गव्यूति मुक्षत मिळाभिः। प्रति वा मत्र वरमा जनाय -पृणीत मुद्नो दिव्यस्य चारोः।।

卐 एष स्तोमो वरुण मित्र तुभ्यं सोम श्शुक्रो न वायवेऽयामि। अविष्ट न्धियो जिगृतं पुरन्धी र्यूयं पात स्वस्तिभि स्सदा नः।।

7.66 प्र मित्रयोरित्येकोनविंशत्यृचस्य सूक्तस्य, मेत्रावरुणि र्वसिष्ठो- मित्रावरुणौ- चतुर्थ्यादि दशाना मादित्या- श्चतुर्दश्यादि तिसृणां सूर्यो- गायत्री- दशमी द्वादशी चतुर्दश्यो बृहत्य- एकादशी त्रयोदशी पञ्चदश्य-स्सतोबृहत्य ष्षोडशी पुरउष्णिक्।।

❀05.05.08 卐प्र मित्रयो र्वरुणयो -स्स्तोमो न एतु शूष्यः। नमस्वा न्तुविजातयोः।।

卐 या धारयन्त देवा -स्सुदक्षा दक्षपितरा। असुर्याय प्रमहसा।।

卐 ता न स्स्तिपा तनूपा -वरुण जरितृणाम्। मित्र साधयत न्धियः।।

卐 यदद्य सूर उदितेऽ-नागा मित्रो अर्यमा। सुवाति सविता भगः।।

卐 सुप्रावी रस्तु स क्षयः- प्र नु याम न्त्सुदानवः। ये नो अंहोऽतिपिप्रति।।

❀05.05.09 卐उत स्वराजो अदिति -रदब्धस्य व्रतस्य ये। महो राजान ईशते।।

卐 प्रति वां सूर उदिते -मित्रङ्गृणीषे वरुणम्। अर्यमणं रिशादसम्।।

卐 राया हिरण्यया मति -रिय मवृकाय शवसे। इयँ विप्रा मेधसातये।।

卐 ते स्याम देव वरुण -ते मित्र सूरिभि स्सह। इषं स्व~श्च धीमहि।।

卐 बहव स्सूरचक्षसो-ऽग्निजिह्वा^ ऋतावृधः। त्रीणि ये येमु र्विदथानि धीतिभि- र्विश्वानि परिभूतिभिः।।

❀05.05.10 卐वि ये दधु श्शरदं मास मादह- र्यज्ञ मक्तुञ्चाऽऽदृचम्। अनाप्यँ वरुणो मित्रो अर्यमा -क्षत्रं राजान आशत।।

卐 तद्वो अद्य मनामहे -सूक्तै स्सूर उदिते। यदोहते वरुणो मित्रो अर्यमा- यूय मृतस्य रथ्यः।।

卐 ऋतावान^ ऋतजाता^ ऋतावृधो -घोरासो अनृतद्विषः। तेषाँ व स्सुम्ने सुच्छर्दिष्टमे -नर स्स्याम ये च सूरयः।।

卐 उदु त्यद्दर्शतँ वपु -र्दिव एति प्रतिह्वरे। यदी माशु र्वहति देव एतशो -विश्वस्मै चक्षसे अरम्।।

卐 शीर्ष्णश्शीर्ष्णो जगत स्तस्थुषस्पतिं -समया विश्वमा रजः। सप्त स्वसार स्सुविताय सूर्यँ -वहन्ति हरितो रथे।।

❀05.05.11 卐तच्चक्षु र्देवहितं -शुक्र मुच्चरत्। पश्येम शरद श्शत-ञ्जीवेम शरद श्शतम्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 काव्येभि रदाभ्याऽऽ-यातँ वरुण द्युमत्। मित्रश्च सोमपीतये।।

卐 दिवो धामभि र्वरुण -मित्रश्चा ऽऽयात मद्रुहा। पिबतं सोम मातुजी~।।

आ यातं मित्रावरुणा -जुषाणा वाहुतिन्नरा। पातं सोम मृतावृधा।।

7.67 प्रति वामिति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्।।

❀05.05.12 卐प्रति वां रथ न्नृपती~ जरध्यै -हविष्मता मनसा यज्ञियेन। यो वा न्दूतो न धिष्ण्या वजीग~ रच्छा सूनु र्न पितरा विवक्मि।।

卐 अशोच्यग्नि स्समिधानो अस्मे -उपो~ अदृश्र न्तमस श्चिदन्ताः। अचेति केतु रुषसः पुरस्ता -च्छ्रिये दिवो दुहितु र्जायमानः।।

卐 अभि वान्नून मश्विना सुहोता -स्तोमै स्सिषक्ति नासत्या विवक्वान्। पूर्वीभि र्यातं पथ्याभि रर्वा -क्स्वर्विदा वसुमता रथेन।।

卐 अवो वान्नून मश्विना युवाकु -र्हुवे यद्वां सुते माध्वी~ वसूयुः। आ वाँ वहन्तु स्थविरासो अश्वाः -पिबाथो अस्मे सुषुता मधूनि।।

卐 प्राचीमु देवाऽश्विना धियं मे-ऽमृध्रां सातये कृतँ वसूयुम्। विश्वा अविष्टँ वाज आ पुरन्धी -स्ता न श्शक्तं शचीपती~ शचीभिः।।

❀05.05.13 卐अविष्ट न्धीष्वश्विना न आसु -प्रजाव द्रेतो अह्वयन्नो अस्तु। आ वा न्तोके तनये तूतुजाना -स्सुरत्नासो देववीतिङ्गमेम।।

卐 एष स्य वां पूर्वगत्वेव सख्ये -निधि र्हितो माध्वी~ रातो अस्मे। अहेळता मनसा ऽऽयात मर्वा -गश्नन्ता हव्यं मानुषीषु विक्षु।।

卐 एकस्मि न्योगे भुरणा समाने -परि वां सप्त स्रवतो रथो गात्। न वायन्ति सुभ्वो देवयुक्ता -ये वा न्धूर्षु तरणयो वहन्ति।।

卐 असश्चता मघवद्भ्यो हि भूतँ -ये राया मघदेयञ्जुनन्ति। प्र ये बन्धुं सूनृताभि स्तिरन्ते -गव्या पृञ्चन्तो अश्व्या मघानि।।

卐 नू मे हवमा श्रृणुतँ युवाना -यासिष्टँ वर्ति रश्विना विरावत्। धत्तं रत्नानि जरतञ्च सूरी न्यूयं पात स्वस्तिभि स्सदा नः।।

7.68 आ शुभ्रेति नवर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्-आद्या स्सप्तविराजः।।

❀05.05.14 卐आ शुभ्रा यात मश्विना स्वश्वा -गिरो दस्रा जुजुषाणा युवाकोः। हव्यानि च प्रतिभृता वीतन्नः।।

卐 प्र वा मन्धांसि मद्या न्यस्थु –रऽरङ्गन्तं हविषो वीतये मे। तिरो अर्यो हवनानि श्रुतन्नः।।

卐 प्र वां रथो मनोजवा^ इयर्ति -तिरो रजांस्यश्विना शतोतिः। अस्मभ्यं सूर्यावसू~ इयानः।।

卐 अयं ह यद्वा न्देवया उ अद्रि -रूर्ध्वो विवक्ति सोमसु द्युवभ्याम्। आ वल्गू~ विप्रो ववृतीत हव्यैः।।

卐 चित्रं ह यद्वां भोजनन्न्वस्ति -न्यत्रये महिष्वन्तँ युयोतम्। यो वा मोमान न्दधते प्रियस्सन्न्।।

❀05.05.15 卐उत त्यद्वाञ्जुरते अश्विना भू-च्च्यवानाय प्रतीत्यं हविर्दे। अधि यद्वर्प इतऊति धत्थः।।

卐 उत त्यं भुज्यु मश्विना सखायो -मध्ये जहु दुरेवास स्समुद्रे। निरीं पर्ष दरावा यो युवाकुः।।

卐 वृकाय चिज्जसमानाय शक्त .-मुत श्रुतं शयवे हूयमाना। यावघ्न्या मपिन्वत मपो न -स्तर्यञ्चि.च्छक्त्यश्विना शचीभिः।।

卐 एष स्य कारु जरते सूक्तै –रऽग्रे बुधान उषसां सुमन्मा। इषा तँ वर्ध दघ्न्या पयोभि र्यूयं पात स्वस्तिभि स्सदा नः।।

7.69 आ वां रथ इत्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्।।

❀05.05.16 卐आ वां रथो रोदसी बद्बधानो -हिरण्ययो वृषभि र्यात्वश्वैः। घृतवर्तनिः पविभी रुचान^ -इषाँ वोळ्हा नृपति र्वाजिनीवान्।।

卐 स पप्रथानो अभि पञ्च भूमा -त्रिवन्धुरो मनसा ऽऽयातु युक्तः। विशो येन गच्छथो देवयन्तीः- कुत्रा चिद्याम मश्विना दधाना।।

卐 स्वश्वा यशसा ऽऽयात मर्वा -ग्दस्रा निधिं मधुमन्तं पिबाथः। वि वां रथो वध्वा3(आ) यादमानो-ऽन्ता न्दिवो बाधते वर्तनिभ्याम्।।

卐 युवो श्श्रियं परि योषा वृणीत -सूरो दुहिता परितक्म्यायाम्। यद्देवयन्त मवथ श्शचीभिः -परि घ्रंस मोमना वाँ वयो गात्।।

卐 यो ह स्य वां रथिरा वस्त उस्रा -रथो युजानः परियाति वर्तिः। तेन न श्शँ यो रुषसो व्युष्टौ न्यश्विना वहतँ यज्ञे अस्मिन्न्।।

卐 नरा गौरेव विद्युत न्तृषाणा ऽस्माकं मद्य सवनोप यातम्। पुरुत्रा हि वां मतिभि र्हवन्ते -मा वामन्ये नि यंम न्देवयन्तः।।

卐 युवं भुज्यु मर्वविद्धं समुद्र -उदूहथु रर्णसो अस्रिधानैः। पतत्रिभि रश्रमै रव्यथिभि -र्दंसनाभि रश्विना पारयन्ता।।

卐 नू मे हव मा शृणुतं युवाना -यासिष्टं वर्ति रश्विना विरावत्। धत्तं रत्नानि जरतञ्च सूरी न्यूयं पात स्वस्तिभि स्सदा नः।।

7.70 आ विश्ववारेति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्।।

05.05.17 卐आ विश्ववाराऽश्विना गतन्नः -प्र तत्स्थान मवाचि वां पृथिव्याम्। अश्वो न वाजी शुनपृष्ठो अस्थादा-ऽऽ यत्सेदथु र्ध्रुवसे न योनिम्।।

卐सिषक्ति सा वां सुमति श्चनिष्ठा-ऽतापि घर्मो मनुषो दुरोणे। यो वां समुद्रा न्त्सरितः पिपर्त्ये-तग्वा चिन्न सुयुजा युजानः।।

卐 यानि स्थाना न्यश्विना दधाथे -दिवो यह्वीष्वोषधीषु विक्षु। नि पर्वतस्य मूर्धनि सदन्ते-षञ्जनाय दाशुषे वहन्ता।।

卐 चनिष्ट न्देवा ओषधी ष्वप्सु -यद्योग्या अश्नवैथे ऋषीणाम्। पुरूणि रत्ना दधतौ न्य1(अ)स्मे- अनु पूर्वाणि चख्यथु र्युगानि।।

卐 शुश्रुवांसा चिदश्विना पुरू –ण्यऽभि ब्रह्माणि चक्षाथे ऋषीणाम्। प्रति प्र यातं वरमा जनाया ऽस्मे वा मस्तु सुमति श्चनिष्ठा।।

卐 यो वां यज्ञो नासत्या हविष्मा -न्कृतब्रह्मा समर्यो3(ओ) भवाति। उप प्र यातं वरमा वसिष्ठ मिमा ब्रह्माण्यृच्यन्ते युवभ्याम्।।

卐 इयं मनीषा इय मश्विना गी -रिमां सुवृक्तिं वृषणा जुषेथाम्। इमा ब्रह्माणि युवयू न्यग्मन् न्यूयं पात स्वस्तिभि स्सदा नः।।

7.71 अप स्वसु रिति षड्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्।।

❀05.05.18 卐अप स्वसु रुषसो नग्जिहीते -रिणक्ति कृष्णी ररुषाय पन्थाम्। अश्वामघा गोमघा वां हुवेम -दिवा नक्तं शरु मस्म द्युयोतम्।।

卐 उपाऽयात न्दाशुषे मर्त्याय -रथेन वाम मश्विना वहन्ता। युयुत मस्म दनिरा ममीवा -न्दिवा नक्तं माध्वी त्रासीथान्नः।।

卐 आ वां रथ मवमस्याँ व्युष्टौ -सुम्नायवो वृषणो वर्तयन्तु। स्यूमगभस्ति मृतयुग्भि रश्वै -राऽश्विना वसुमन्तँ वहेथाम्।।

卐 यो वां रथो नृपती~ अस्ति वोळ्हा -त्रिवन्धुरो वसुमा॰ उस्रयामा। आ न^ एना नासत्योप यात –मभि यद्वाँ विश्वप्स्न्यो जिगाति।।

卐 युवञ्च्यवानञ्जरसोऽमुमुक्त .-न्निपेदव ऊहथु राशु मश्वम्। निरंहस स्तमस स्स्पर्त मत्रि-न्नि जाहुषं शिथिरे धातमन्तः।।

卐 इयं मनीषा इय मश्विना गी -रिमां सुवृक्तिं वृषणा जुषेथाम्। इमा ब्रह्माणि युवयू न्यग्म न्यूयं पात स्वस्तिभि स्सदा नः।।

7.72 आ गोमतेति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्।।

❀05.05.19 卐आ गोमता नासत्या रथेना-ऽश्वावता पुरुश्चन्द्रेण यातम्। अभि वाँ विश्वा नियुत स्सचन्ते -स्पार्हया श्रिया तन्वा शुभाना।।

卐 आ नो देवेभि रुप यात मर्वा -क्सजोषसा नासत्या रथेन। युवोर्हि न स्सख्या पित्र्याणि -समानो बन्धु रुत तस्य वित्तम्।।

卐 उदु स्तोमासो अश्विनो रबुध्र-ञ्जामि ब्रह्माण्युषसश्च देवीः। आविवास न्रोदसी धिष्ण्ये~ मे~-अच्छा विप्रो नासत्या विवक्ति।।

卐 वि चेदुच्छ न्त्यश्विना उषासः -प्र वां ब्रह्माणि कारवो भरन्ते। ऊर्ध्वं भानुं सविता देवो अश्रे -द्बृह दग्नय स्समिधा जरन्ते।।

卐 आ पश्चाता न्नासत्या पुरस्ता –दाऽश्विना यात मधरा दुदक्तात्। आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभि स्सदा नः।।

7.73 अतारिष्मेति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- त्रिष्टुप्।।

❀05.05.20 卐अतारिष्म तमस स्पार मस्य -प्रति स्तोम न्देवयन्तो दधानाः। पुरुदंसा पुरुतमा पुराऽजा- ऽमर्त्या हवते अश्विना गीः।।

卐 न्यु प्रियो मनुष स्सादि होता -नासत्या यो यजते वन्दते च। अश्नीतं मध्वो^ अश्विना उपाक -आ वाँ वोचे विदथेषु प्रयस्वान्।।

卐 अहेम यज्ञं पथा मुराणा^ - इमां सुवृक्तिँ वृषणा जुषेथाम्। श्रुष्टीवेव प्रेषितो वामबोधि -प्रति स्तोमै र्जरमाणो वसिष्ठः।।

卐 उप त्या वह्नी~ गमतो विशन्नो -रक्षोहणा संभृता वीळुपाणी।~ समन्धांस्यग्मत मत्सराणि -मा नो मर्धिष्ट मा गतं शिवेन।।

卐 आ पश्चाता न्नासत्याऽऽपुरस्ता -दाऽश्विना यात मधरा दुदक्तात्। आ विश्वतः॰ पाञ्चजन्येन राया यूयं पात स्वस्तिभि स्सदा नः।।

7.74 इमा उ वामिति षड्टचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठोऽश्विनौ- बृहती-द्वितीया चतुर्थी षष्ठ्य स्सतोबृहत्यः।।

❀05.05.21 卐इमा उ वा न्दिविष्टय^ -उस्रा हवन्ते अश्विना। अयँ वामह्वेऽवसे शचीवसू~ विशँविशं हि गच्छथः।।

卐 युवञ्चित्र न्ददथु र्भोजनन्नरा- चोदेथां सूनृतावते। अर्वा ग्रथं समनसा नि यच्छतं –पिबतं सोम्यं मधु।।

卐 आ यात मुप भूषतं -.मध्वः॰ पिबत मश्विना। दुग्धं पयो वृषणा जेन्यावसू~ मा नो मर्धिष्ट मा गतम्।।

卐 अश्वासो ये वा मुप दाशुषो गृहँ -युवा न्दीयन्ति बिभ्रतः। मक्षूयुभि र्नरा हयेभि रश्विना-ऽऽदेवा यात मस्मयू~।।

卐 अधा ह यन्तो अश्विना- पृक्ष स्सचन्त सूरयः। ता यंसतो मघवद्भ्यो ध्रुवँ यश -श्छर्दि रस्मभ्य न्नासत्या।।

卐 प्र ये ययु रवृकासो रथाइव -नृपातारो जनानाम्। उत स्वेन शवसा शूशुवु -र्नर उत क्षियन्ति सुक्षितिम्।।

7.75 व्युषा आव इत्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा-स्त्रिष्टुप्।।

❀05.05.22 卐व्यु1(उ)षा^ आवो दिविजा^ ऋतेना-ऽविष्कृण्वाना महिमान. माऽगात्। अप द्रुह स्तम आव रजुष्ट -मङ्गिरस्तमा पथ्या अजीगः~।।

卐 महे नो अद्य सुवितार्य बोध्यु-षो महे सौभगाय प्र यन्धि। चित्रं रयिँ यशस न्धेह्यस्मे -देवि मर्तेषु मानुषि श्रवस्युम्।।

卐 एते त्ये भानवो दर्शताया -श्चित्रा^ उषसो अमृतास आऽगुः। जनयन्तो दैव्यानि व्रता -न्याऽऽपृणन्तो अन्तरिक्षा व्यस्थुः।।

卐 एषा स्या युजाना पराका -त्पञ्च क्षिती॰ परि सद्यो जिगाति। अभिपश्यन्ती वयुना जनाना -न्दिवो दुहिता भुवनस्य पत्नी।।

卐 वाजिनीवती सूर्यस्य योषा -चित्रामघा राय ईशे वसूनाम्। ऋषि॰ष्टुता जरयन्ती मघो -न्युषा उच्छति वह्निभि गृणाना।।

卐 प्रति द्युताना मरुषासो अश्वा -श्चित्रा अदृश्र न्नुषसँ वहन्तः। याति शुभ्रा विश्वपिशा रथेन -दधाति रत्नँ विधते जनाय।।

卐 सत्या सत्येभि महती महद्भि -र्देवी देवेभि र्यजता यजत्रैः। रुजद्दृळ्हानि दद दुस्त्रियाणां -प्रति गाव उषसँ वावशन्त।।

卐 नूँ नो गोम द्वीरव द्धेहि रत्न .-मुषो अश्वाव त्पुरुभोजो अस्मे। मा नो बर्हि॰ पुरुषता निदे क- र्यूयं पात स्वस्तिभि स्सदा नः।।

7.76 उदु ज्योतिरिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा-स्त्रिष्टुप्।।

❀05.05.23 卐उदु ज्योति रमृतँ विश्वजन्यँ -विश्वानर स्सविता देवो अश्रेत्। क्रत्वा देवाना मजनिष्ट चक्षु -रावि रक भुवनँ विश्व मुषाः।।

卐 प्र मे पन्था^ देवयाना^ अदृश्रन्न-ऽमर्धन्तो वसुभि रिष्कृतासः। अभूदु केतु रुषस॰ पुरस्ता -त्प्रतीच्याऽगा दधि हर्म्येभ्यः।।

卐 तानीदहानि बहुला न्यास -न्या प्राचीन मुदिता सूर्यस्य। यत॰ परि जारइवाऽऽचर -न्त्युषो ददृक्षे न पुन र्यतीव।।

卐 त इद्देवानां सधमाद^ आस -न्नृतावान॰ कवय॰ पूर्व्यासः। गूळ्हञ्ज्योति॰ पितरो अन्वविन्द -न्त्सत्यमन्त्रा^ अजनय न्नुषासम्।।

卐 समान ऊर्वे अधि सङ्गतास -स्सञ्ज्ञानते न यतन्ते मिथस्ते। ते देवानान्न मिनन्ति व्रता -न्यमर्धन्तो वसुभि र्यादमानाः।।

卐 प्रति त्वा स्तोमै रीळते वसिष्ठा^ -उषर्बुध स्सुभगे तुष्टुवांसः। गवान्नेत्री वाजपत्नी न उच्छो-ष स्सुजाते प्रथमा जरस्व।।

卐 एषा नेत्री राधस स्सूनृताना -.मुषा^ उच्छन्ती रिभ्यते वसिष्ठैः। दीर्घश्रुतं रयि मस्मेदधाना -यूयं पात स्वस्तिभि स्सदा नः।।

7.77 उपो रुरुच इति षड़ृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा-स्त्रिष्टुप्।।

❀05.05.24 卐उपो~ रुरुचे युवतिर्न योषा -विश्वञ्जीवं प्रसुवन्ती चरायै। अभू द॒ग्नि स्समिधे मानुषाणा.- मऽक ज्योति र्बाधमाना तमांसि।।

卐 विश्वं प्रतीची सप्रथा उदस्था -द्रुश द्वासो बिभ्रती शुक्र मश्वैत्। हिरण्यवर्णा सुदृशीकसन्दृ -ग्गवां माता नेत्र्यह्ना मरोचि।।

卐 देवानाञ्चक्षु स्सुभगा वहन्ती -श्वेतन्नयन्ती सुदृशीक मश्वम्। उषा^ अदर्शि रश्मिभि र्व्यक्ता -चित्रामघा विश्वमऽनु प्रभूता।।

卐 अन्तिवामा दूरे अमित्र मुच्छो-र्वीञ्जव्यूति मभयङ्कृधी नः। यावय द्वेष^ आ भरा वसूनि -चोदय राधो गृणते मघोनि।।

卐 अस्मे श्रेष्ठेभि र्भानुभि र्विभाह्यु-षो देवि प्रतिरन्ती न आयुः। इषञ्चनो दधती विश्ववारे~ -गोम दश्वाव द्रथवच्च राधः।।

卐 यान्त्वा दिवो दुहित र्वर्धय -न्त्युष स्सुजाते मतिभि र्वसिष्ठाः। साऽस्मासु धा रयि मृष्वं बृहन्तँ यूयं पात स्वस्तिभि स्सदा नः।।

7.78 प्रति केतव इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा-स्त्रिष्टुप्।।

❀05.05.25 卐प्रति केतव॰ प्रथमा^ अदृश्र -न्नूर्ध्वा^ अस्या^ अञ्जयो वि श्रयन्ते। उषो^ अर्वाचा बृहता रथेन -ज्योतिष्मता वाम मस्मभ्यँ वक्षि।।

卐 प्रति षी मग्नि जैरते समिद्धः -प्रति विप्रासो मतिभि र्गृणन्तः। उषा^ याति ज्योतिषा बाधमाना -विश्वा तमांसि दुरिताऽपं देवी।।

卐 एता उ त्याः प्रत्यदृश्र न्पुरस्ता -ज्ज्योति र्यच्छन्ती रुषसो विभातीः। अजीजन न्त्सूर्यं यज्ञ मग्नि .मऽपाचीन न्तमो अगा दजुष्टम्।।

卐 अचेति दिवो दुहिता मघोनी -विश्वे पश्य न्त्युषसँ विभातीम्। आऽस्था द्रथं स्वधया युज्यमान -मा यमश्वास स्सुयुजो वहन्ति।।

卐 प्रति त्वाद्य सुमनसो बुधन्ता-ऽस्माकासो मघवानो वयञ्च। तिल्विलायध्व मुषसो विभाती यूयं पात स्वस्तिभि स्सदा नः।।

7.79 व्युषा आव इति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा-स्त्रिष्टुप्।।

❀05.05.26 卐व्यु1(उ)षा आवः पथ्या3(आ) जनानां -पञ्च क्षिती र्मानुषी र्बोधयन्ती। सुसन्दृग्भि रुक्षभि र्भानु मऽश्रे -द्वि सूर्यो रोदसी चक्षसाऽऽवः~।।

卐 व्यञ्जते दिवो अन्तेष्वक्तू -न्विशो न युक्ता उषसो यतन्ते। सन्ते गाव स्तम आ वर्तयन्ति -ज्योति र्यच्छन्ति सवितेव बाहू~।।

卐 अभू दुषा^ इन्द्रतमा मघोन्य-ऽजीजन त्सुविताय श्रवांसि। वि दिवो देवी दुहिता दधा – त्यऽङ्गिरस्तमा सुकृते वसूनि।।

卐 तावदुषो राधो अस्मभ्यं रास्व -यावं त्स्तोतृभ्यो अरदो गृणाना। यान्त्वा जज्ञु र्वृषभस्या रवेण -वि दृळ्हस्य दुरो अद्रे रौर्णोः।।

卐 देवन्देवं राधसे चोदय न्त्य-ऽस्मद्र्य क्सूनृता^ ईरयन्ती। व्युच्छन्ती न स्सनये धियो धा यूयं पात स्वस्तिभि स्सदा नः।।

7.80 प्रति स्तोमेभिरिति तृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा-स्त्रिष्टुप्।।

❀05.05.27 卐प्रति स्तोमेभि रुषसँ वसिष्ठा^ -गीर्भि र्विप्रासः प्रथमा अबुध्रन्न्। विवर्तयन्ती रजसी~ समन्ते~- आविष्कृण्वती र्भुवनानि विश्वा।।

卐 एषा स्या नव्य मायु र्दधाना -गूढ्वी तमो ज्योतिषोषा^ अबोधि। अग्र एति युवति रह्रयाणा -प्राचिकित त्सूर्यं यज्ञ मग्निम्।।

卐 अश्वावती गोमतीर्न उषासो -वीरवती स्सद मुच्छन्तु भद्राः। घृत न्दुहाना विश्वत॰ प्रपीता यूयं पात स्वस्तिभि स्सदा नः।।।। इति पञ्चमाध्याय स्समाप्तः।।

## ꧁꧂ ꧁꧂पञ्चमाष्टके षष्ठाध्यायः(वर्गाः 1-25)

7.81 प्रत्यु अदर्शीति षड़्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- उषा- बृहती-द्वितीया चतुर्थी षष्ठ्य स्सतोबृहत्यः।।

❀05.06.01 卐प्रत्यु अदर्श्यायत्यु1-(उ)च्छन्ती दुहिता दिवः। अपो ~महि व्ययति चक्षसे- तमो ज्योति ष्कृणोति सूनरी।।

卐 उदुस्रिया स्सृजते सूर्य स्सचा॰ -उद्यन्नक्षत्र मर्चिवत्। तवेदुषो व्युषि सूर्यस्य च -सं भक्तेन गमेमहि।।

卐 प्रति त्वा दुहित र्दिव^ -उषो जीरा अभुत्स्महि। या वहसि पुरु स्पार्हँ वनन्व-ति- रत्नन्न दाशुषे मयः।।

卐 उच्छन्ती या कृणोषि मंहना -महि प्रख्यै देवि स्वर्दृशे। तस्यास्ते रत्नभाज^ ईमहे -वयं स्याम मातुर्न सूनवः।।

卐 तच्चित्रं राध^ आ भरो-षो यद्दीर्घश्रुत्तमम्। यत्ते दिवो दुहित र्मर्तभोजन- न्तद्रास्व भुनजामहै।।

卐 श्रव स्सूरिभ्यो अमृतँ वसुत्वनँ -वाजा॰ अस्मभ्यङ्गोमतः। चोदयित्री मघोन स्सूनृताव त्युषा उच्छदप स्रिधः।।

7.82 इन्द्रावरुणेति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रावरुणौ-जगती।।

❀05.06.02 卐इन्द्रावरुणा युव मध्वराय नो- विशे जनाय महि शर्म यच्छतम्। दीर्घप्रयज्यु.मति यो वनुष्यति -वयञ्जयेम पृतनासु दूढ्यः।।

卐 सम्राळन्य स्स्वराळन्य^ उच्यते वां -महान्ता विन्द्रावरुणा महावसू~। विश्वे देवास॰ परमे व्योमनि -सँ वा मोजो वृषणा सं बल न्दधुः।।

卐 अन्वपा.ङ्खान्यऽतृन्त मोजसाऽ-सूर्य मैरयत न्दिवि प्रभुम्। इन्द्रावरुणा मदे अस्य मायिनो-ऽपिन्वत मपित॰ पिन्वत न्धियः।।

卐 युवामि द्युत्सु पृतनासु वह्नयो -युवाङ्क्षेमस्य प्रसवे मितज्ञवः। ईशाना वस्व^ उभयस्य कारव^ -इन्द्रावरुणा सुहवा हवामहे।।

Sri Ganapati Sachchidananda Datta Peetham • Mysore •

卐 इन्द्रावरुणा यदिमानि चक्रथु -र्विश्वा जातानि भुवनस्य मज्मना। क्षेमेण मित्रो वरुण न्दुवस्यति -
मरुद्भि रुग्र श्शुभ मन्य ईयते।।

❀05.06.03 卐महे शुल्काय वरुणस्य नु त्विष -ओजो मिमाते~ ध्रुवमस्य यत्स्वम्। अजामि मन्य
श्श्नथयन्त माऽतिर -द्दभ्रेभि रन्यः प्र वृणोति भूयसः।।

卐 न तमंहो न दुरितानि मर्त्य -मिन्द्रावरुणा न तपः कुतश्चन। यस्य देवा गच्छथो वीथो अध्वर.-न्न तं
मर्तस्य नशते परिह्वृतिः।।

卐 अर्वाङ्नरा दैव्येनावसा ऽऽगतं -शृणुतं हवँ यदि मे जुजोषथः। युवोर्हि सख्य मुत वा यदाप्यं -मार्डीक
मिन्द्रावरुणा नि यच्छतम्।।

卐 अस्माक मिन्द्रावरुणा भरेभरे -पुरोयोधा भवत.ङ्कृष्ट्योजसा। यद्वां हवन्त उभये अध स्पृधि -नर
स्तोकस्य तनयस्य सातिषु।।

卐 अस्मे इन्द्रो वरुणो मित्रो अर्यमा -द्युम्नँ यच्छन्तु महि शर्म सप्रथः। अवध्रञ्ज्योति रदितेर् ऋतावृधो -
देवस्य श्लोकं सवितु र्मनामहे।।

☙ 7.83 युवान्नरेति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रावरुणौ- जगती।।

❀05.06.04 卐युवान्नरा पश्यमानास आप्यं -प्राचा गव्यन्तः पृथुपर्शवो ययुः। दासा च वृत्रा हत
.मार्याणि च -सुदास मिन्द्रावरुणाऽवसाऽवतम्।।

卐 यत्रा नर स्समयन्ते कृतध्वजो -यस्मिन्नाजा भवति किञ्चन प्रियम्। यत्रा भयन्ते भुवना स्वर्दृश –
स्तत्रा न^ इन्द्रावरुणाऽधि वोचतम्।।

卐 सं भूम्या^ अन्ता ध्वसिरा^ अदृक्षते-न्द्रावरुणा दिवि घोष आऽरुहत्। अस्थु र्जनाना मुप मामरातयो-
ऽर्वा गवसा हवनश्रुता ऽऽगतम्।।

卐 इन्द्रावरुणा वधनाभि रप्रति भेदँ .-वन्वन्ता प्र सुदास मावतम्। ब्रह्माण्येषां शृणुतं हवीमनि -सत्या
तृत्सूना मभव त्पुरोहितिः।।

卐 इन्द्रावरुणा वभ्या तपन्ति माघा-न्यर्यो वनुषा मरातयः। युवं हि वस्व^ उभयस्य राजथो-ऽध स्मा
नोऽवतं पार्ये दिवि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀05.06.05 卐युवां हवन्त उभयास आजि -ष्विन्द्रञ्च वस्वो वरुणञ्च सातये। यत्र राजभि र्दशभि र्निबाधितं -प्र सुदास मावत न्तृत्सुभि स्सह।।

卐 दश राजान स्समिता^ अयज्यव -स्सुदास .मिन्द्रावरुणा न युयुधुः। सत्या नृणा मद्मसदा मुपस्तुति -र्देवा^ एषा मभव न्देवहूतिषु।।

卐 दाशराज्ञे परियत्ताय विश्वत -स्सुदास इन्द्रावरुणा वशिक्षतम्। श्वित्यञ्चो यत्र नमसा कपर्दिनो -धिया धीवन्तो असपन्त तृत्सवः।।

卐 वृत्राण्यन्य स्समिथेषु जिघ्नते -व्रतान्यन्यो अभि रक्षते सदा। हवामहे वाँ वृषणा सुवृक्तिभि -रस्मे इन्द्रावरुणा शर्म यच्छतम्।।

卐 अस्मे इन्द्रो वरुणो मित्रो अर्यमा -द्युम्नँ यच्छन्तु महि शर्म सप्रथः। अवध्रञ्ज्योति रदितेर् ऋतावृधो -देवस्य श्लोकं सवितु र्मनामहे।।

☃ 7.84 आ वां राजानाविति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रावरुणौ- त्रिष्टुप्।।

❀05.06.06 卐आ वां राजाना वध्वरे ववृत्यां -हव्येभि रिन्द्रावरुणा नमोभिः। प्र वाङ्घृताची^ बाह्वो र्दधाना - परि त्मना विषुरूपा जिगाति।।

卐 युवो राष्ट्रं बृह दिन्वति द्यौ-र्यौ सेतृभि ररज्जुभि स्सिनीथः। परि नो हेळो वरुणस्य वृज्या^ -उरुन्न^ इन्द्रः कृणवदु लोकम्।।

卐 कृतन्नो यज्ञँ विदथेषु चारु-ङ्कृतं ब्रह्माणि सूरिषु प्रशस्ता। उपो~ रयि र्देवजूतो न एतु -प्र णं स्स्पार्हाभि रूतिभि स्तिरेतम्।।

卐 अस्मे इन्द्रावरुणा विश्ववारं- रयि न्धत्तँ वसुमन्तं पुरुक्षुम्। प्र य^ आदित्यो अनृता मिना -त्यमिता शूरो दयते वसूनि।।

卐 इय मिन्द्रँ वरुण मष्ट मे गीः प्राव त्तोके तनये तूतुजाना। सुरत्नासो देववीतिङ्गमेम यूयं पात स्वस्तिभि स्सदा नः।।

☃ 7.85 पुनीषे वामिति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रावरुणौ- त्रिष्टुप्।।

❀05.06.07 卐पुनीषे वा मरक्षसं मनीषां .-सोम मिन्द्राय वरुणाय जुह्वत्। घृतप्रतीका मुषसन्न देवी -न्ता नो याम न्नुरुष्यता .मभीके।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 स्पर्धन्ते वा उ देवहूये अत्र -येषु ध्वजेषु दिद्यवः पतन्ति। युव न्ताँ इन्द्रावरुणा वमित्रा -न्हतं पराच श्शर्वा विषूचः।।

卐 आप श्चिद्धि स्वयशस स्सदस्सु -देवी रिन्द्रं वरुण न्देवता धुः~। कृष्टी रन्यो धारयति प्रविक्ता -वृत्राण्यन्यो अप्रतीनि हन्ति।।

卐 स सुक्रतुर् ऋतचिदस्तु होता -य आदित्य शवसा वान्नमस्वान्। आववर्त दवसे वां हविष्मा – नऽसदि.त्स सुविताय प्रयस्वान्।।

卐 इय मिन्द्रं वरुण मष्ट मे गीः -प्राऽऽव त्तोके तनये तूतुजाना। सुरत्नासो देववीतिङ्गमेम यूयं पात स्वस्तिभि स्सदा नः।।

7.86 धीरा त्वित्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वरुण- स्त्रिष्टुप्।।

❀05.06.08 卐धीरा त्वस्य महिना जनूंषि -वि य स्तस्तम्भ रोदसी चिदुर्वी~। प्र नाक मृष्व न्नुनुदे बृहन्त -न्द्विता नक्षत्रं पप्रथच्च भूम।।

卐 उत स्वया तन्वा3(आ) सँ वदे त-त्कदा न्व1(अ)न्त र्वरुणे भुवानि। किं मे हव्य महृणानो जुषेत -कदा मृळीकं सुमना अभि ख्यम्।।

卐 पृच्छे तदेनो वरुण दिदृक्षू-पो~ एमि चिकितुषो विपृच्छम्। समान मिन्मे कवयश्चि दाहु -रयं ह तुभ्यँ वरुणो हृणीते।।

卐 किमागं आस वरुण ज्येष्ठँ -यत्स्तोतारञ्जिघांससि सखायम्। प्र तन्मे वोचो दूळभ स्वधावो-ऽव त्वाऽनेना ऽऽनमसा तुर इयाम्।।

卐 अव द्रुग्धानि पित्र्या सृजा -नोऽव या वयञ्चकृमा तनूभिः। अव राज न्पशुतृपन्न तायुं -सृजा वत्सन्न दाम्नो वसिष्ठम्।।

卐 न स स्वो दक्षो वरुण ध्रुति -स्सा सुरा मन्यु र्विभीदको अचित्तिः। अस्ति ज्याया न्कनीयस उपारे -स्वप्नश्चने दनृतस्य प्रयोता।।

卐 अर न्दासो न मीळ्हुषे करा -ण्यह न्देवाय भूर्णयेऽनागाः। अचेतय दचितो देवो अर्यो -गृत्सं राये कवितरो जुनाति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 अयं सु तुभ्यँ वरुण स्वधावो -हृदि स्तोम उपश्रित श्चिदस्तु। शन्नः ≈ क्षेमे शमुयोगे नो अस्तु यूयं पात स्वस्तिभि स्सदा नः।।

☫ 7.87 रदत्पथ इति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वरुण- स्त्रिष्टुप्।।

❀05.06.09 卐रद त्पथो वरुण स्सूर्याय -प्राणांसि समुद्रिया नदीनाम्। सर्गो न सृष्टो अर्वतीर् ऋताय- .ञ्चकार मही रवनी रहभ्यः।।

卐 आत्मा ते वातो रज^ आ नवीनो -त्पशुर्न भूर्णि र्यवसे ससवान्। अन्त र्मही~ बृहती~ रोदसीमे ~विश्वा ते धाम वरुण प्रियाणि।।

卐 परि स्पशो वरुणस्य स्मदिष्टा- उभे~ पश्यन्ति रोदसी सुमेके~। ऋतावान॰ कवयो यज्ञधीरा॰- प्रचेतसो य इषयन्त मन्म।।

卐 उवाच मे वरुणो मेधिराय -त्रि स्सप्त नामाघ्न्या बिभर्ति। विद्वा न्पदस्य गुह्या न वोच -द्युगाय विप्र^ उपराय शिक्षन्न्।।

卐 तिस्रो द्यावो निहिता^ अन्त रस्मि -न्तिस्रो भूमी रुपरा ष्षड्विधानाः। गृत्सो राजा वरुण श्चक्र -एत न्दिवि प्रेङ्खं हिरण्ययं शुभे कम्।।

卐 अव सिन्धुँ वरुणो द्यौरिव स्था -द्द्रप्सो न श्वेतो मृग स्तुविष्मान्। गम्भीरशंसो रजसो विमान -स्सुपारक्षत्र स्सतो अस्य राजा।।

卐 यो मृळयाति चक्रुषे चिदागो -वयं स्याम वरुणे अनागाः। अनु व्रता न्यदितेर् ऋधन्तो यूयं पात स्वस्तिभि स्सदा नः।।

☫ 7.88 प्र शुन्ध्युवमिति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वरुणस्त्रिष्टुबन्त्या जगती- (अन्त्या पाशविमोचनीति गुणः)

❀05.06.10 卐प्र शुन्ध्युवँ वरुणाय प्रेष्ठां -मतिँ र्वसिष्ठ मीळ्हुषे भरस्व। य^ ईमर्वाञ्च.ङ्करते यजत्रं -सहस्रामघँ वृषणं बृहन्तम्।।

卐 अधा न्वस्य सन्दृशञ्जगन्वा -नग्ने रनीकँ वरुणस्य मंसि। स्व1(अ)र्य दश्मन्नधिपा उ अन्धो-ऽभि मा वपु र्दृशये निनीयात्।।

卐 आ यद्रुहाव वरुणश्च नावं -प्र यत्समुद्र मीरयाव मध्यम्। अधि यदपां स्नुभि श्चराव -प्र प्रेङ्ख ईङ्खयावहै शुभे कम्।।

卐 वसिष्ठं ह वरुणो नाव्याधा -दृषिञ्चकार स्वपा महोभिः। स्तोतारँ विप्र स्सुदिनत्वे अह्नाँ -यान्नु द्याव स्ततनन्या दुषासः।।

卐 क्व1(अ)त्यानि नौ सख्या बभूवु -स्सचावहे~ यदवृकं पुरा चित्। बृहन्तं मानँ वरुण स्वधाव - स्सहस्रद्वार.ञ्जगमा गृहन्ते।।

卐 य^ आपि र्नित्यो वरुण प्रिय -स्सन्त्वा मागांसि कृणवत्सखा ते। मा त एनस्वन्तो यक्षि न्भुजेम - यन्धि ष्मा विप्रस्स्तुवते वरूथम्।।

卐 ध्रुवासु त्वाऽसु क्षितिषु क्षियन्तो -व्य1(अ)स्म त्पाशँ वरुणो मुमोचत्। अवो वन्वाना^ अदिते रुपस्था द्यूयं पात स्वस्तिभि स्सदा नः।।

☸ 7.89 मो षु वरुणेति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वरुणो- गायत्र्यन्त्या जगती।।

❀05.06.11 卐मो~ षु वरुण मृन्मयं-ङ्गृहं राजन्नहङ्गमम्। मृळा सुक्षत्र मृळय।।

卐 यदेमि प्रस्फुरन्निव -दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय।।

卐 क्रत्व स्समह दीनता -प्रतीपञ्जगमा शुचे। मृळा सुक्षत्र मृळय।।

卐 अपां मध्ये तस्थिवांस -न्तृष्णाऽविद ज्जरितारम्। मृळा सुक्षत्र मृळय।।

卐 यत्किञ्चेदं वरुण दैव्ये जने-ऽभिऽद्रोहं मनुष्या3(आ)श्चरामसि। अचित्ती यत्तव धर्मा युयोपिम -मा न स्तस्मा देनसो देव रीरिषः।।

☸ 7.93 प्र वीरयेति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- आद्यानां चतसृणां वायुरन्त्यानां तिसृणामिन्द्रवायू त्रिष्टुप्।।

❀05.06.12 卐प्र वीरया शुचयो दद्रिरे वा –मऽध्वर्युभि र्मधुमन्त स्सुतासः। वह वायो~ नियुतो याह्यच्छा –पिबा सुतस्यान्धसो मदाय।।

卐 ईशानाय प्रहुतिँ यस्त आन -ट्छुचिं सोमं शुचिपा स्तुभ्यँ वायो~। कृणोषि तं मर्त्येषु प्रशस्त- ञ्जातोजातो जायते वाज्यस्य।।

卐 राये नु यञ्जज्ञतू रोदसीमे~ राये देवी धिषणा धाति देवम्। अध वायु न्नियुत स्सश्चत स्वा^ -उत श्वेतँ वसुधितिन्निरेके।।

卐 उच्छन्नुषस स्सुदिना^ अरिप्रा^ -उरु ज्योति र्विविदु दीध्यानाः। गव्यञ्चिदूर्व मुशिजो वि वव्रु -स्तेषा मनु प्रदिव स्सस्रु रापः।।

卐 ते सत्येन मनसा दीध्याना -स्स्वेन युक्तास॰ क्रतुना वहन्ति। इन्द्रवायू~ वीरवाहं रथँ वा -मीशानयो रभि पृक्ष स्सचन्ते।।

卐 ईशानासो ये दधते स्वर्णो -गोभि रश्वेभि र्वसुभि र्हिरण्यैः। इन्द्रवायू ~सूरयो विश्व मायु –रऽर्वद्भि र्वीरै॰ पृतनासु सह्युः।।

卐 अर्वन्तो न श्रवसो भिक्षमाणा^- इन्द्रवायू~ सुष्टुतिभि र्वसिष्ठाः। वाजयन्त स्स्ववसे हुवेम यूयं पात स्वस्तिभि स्सदा नः।।

7.90 कुविदङ्गेति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रवायू-आद्य तृतीययो र्वायु-स्त्रिष्टुप्।।

❀05.06.13 卐कुविदङ्ग नमसा ये वृधास॰- पुरा देवा^ अनवद्यास^ आसन्न्। ते वायवे मनवे बाधिताया-ऽवासय न्नुषसं सूर्येण।।

卐 उशन्ता दूता न दभाय गोपा -मासश्च पाथ श्शरदश्च पूर्वीः। इन्द्रवायू सु॰ष्टुति र्वा मियाना -मार्डीक मीट्टे सुवितञ्च नव्यम्।।

卐 पीवोअन्ना॰ रयिवृध स्सुमेधा -श्श्वेत ॰स्सिषक्ति नियुता मभिश्रीः। ते वायवे समनसो वि तस्थु -र्विश्वेन्नर स्स्वपत्यानि चक्रुः।।

卐 याव त्तर स्तन्वो3(ओ) याव दोजो -यावन्नर श्चक्षसा दीध्यानाः। शुचिं सोमं शुचिपा पात मस्मे- इन्द्रवायू सदतं बर्हिऽरेदम्।।

卐 नियुवाना नियुत स्स्पार्हवीरा^ इन्द्रवायू~ सरथँ यात मर्वाक्। इदं हि वां प्रभृतं मध्वो अग्र.–मऽध प्रीणाना वि मुमुक्त मस्मे।।

卐 या^ वां शत न्नियुतो या^ स्सहस्र –मिन्द्रवायू ~विश्ववारा स्सचन्ते। आभिर्यातं सुविदत्राभि र्र्वा -क्पातन्नरा प्रतिभृतस्य मध्वः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अर्वन्तो न श्रवसो भिक्षमाणा- इन्द्रवायू~ सुष्टुतिभि र्वसिष्ठाः। वाजयन्त स्स्ववसे हुवेम यूयं पात स्वस्तिभि स्सदा नः।।

7.91 आ वायविति पञ्चर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- वायु- र्द्वितीया चतुर्थ्यौ रिन्द्रवायू- त्रिष्टुप्।।

❀05.06.14 卐आ वायो~ भूष शुचिपा^ उप न -स्सहस्रन्ते नियुतो विश्ववार। उपो~ ते अन्धो मद्य मयामि -यस्य देव दधिषे पूर्वपेयम्।।

卐 प्र सोता जीरो अध्वरेष्वस्था -त्सोम मिन्द्राय वायवे पिबध्यै। प्र यद्वां मध्वो अग्रियं भर न्त्य-ऽध्वर्यवो देवयन्त श्शचीभिः।।

卐 प्र याभि र्यासि दाश्वांस मच्छा -नियुद्भि र्वाय~ विष्टये दुरोणे। नि नो रयिं सुभोजसं युवस्व -नि वीरङ्गव्य मश्व्यञ्च राधः।।

卐 ये वायव इन्द्रमादनास -आदेवासो नितोशनासो अर्यः। घ्नन्तो वृत्राणि सूरिभिष्ष्याम –सासह्वांसो युधा नृभि रमित्रान्।।

卐 आ नो नियुद्भि श्शतिनीभि रध्वरं -सहस्रिणीभि रुप याहि यज्ञम्। वायो~ अस्मि न्त्सवने मादयस्व यूयं पात स्वस्तिभि स्सदा नः।।

7.92 शुचि न्त्वित्यष्टर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्राग्नी- त्रिष्टुप्।।

❀05.06.15 卐शुचिन्नु स्तोमन्नवजात मद्ये-न्द्राग्नी~ वृत्रहणा जुषेथाम्। उभा हि वां सुहवा जोहवीमि -ता वाजं सद्य^ उशते धेष्ठा।।

卐 ता सानसी~ शवसाना हि भूतं -साकंवृधा शवसा शूशुवांसा। क्षयन्तौ रायो यवसस्य भूरेः- पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः।।

卐 उपो~ ह यद्विदथं वाजिनो गु -र्धीभि र्विप्राः प्रमति मिच्छमानाः। अर्वन्तो न काष्ठान्नक्षमाणा^ -इन्द्राग्नी~जोहुवतो नरस्ते।।

卐 गीर्भि र्विप्रः प्रमति मिच्छमान^ -ईट्टे रयिं यशसं पूर्वभाजम्। इन्द्राग्नी~ वृत्रहणा सुवज्रा -प्र नो नव्येभि स्तिरत न्देष्णैः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 सँ यन्मही~ मिंथती~ स्पर्धमाने~ तनूरुचा शूरसाता यतैते~। अदेवयुँ विदथे देवयुभि -स्सत्रा हतं सोमसुता जनेन।।

❀05.06.16 卐इमामुषु सोमसुति मुप न^ -एन्द्राग्नी~ सौमनसाय यातम्। नू चिद्धि परिमम्नाथे~ अस्मा -ना वां शश्वद्भि र्ववृतीय वाजैः।।

卐 सो अग्न एना नमसा समिद्धो-ऽच्छा मित्रँ वरुण मिन्द्रँ वोचेः। यत्सी माग श्चकृमा तत्सु मृळ -तदर्यमाऽदिति श्शिश्रथन्तु।।

卐 एता^ अग्न आशुषाणास^ इष्टी -र्युवो स्सचाऽभ्यश्याम वाजान्। मेन्द्रो नो विष्णु र्मरुतः परि ख्य न्यूयं पात स्वस्तिभि स्सदा नः।।

☙ 7.93 इयँ वामिति द्वादशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्राग्नी- गायत्र्यन्त्याऽनुष्टुप्।।

❀05.06.17 卐इयँ वामस्य मन्मन^ -इन्द्राग्नी~ पूर्व्यस्तुतिः। अभ्रा द्वृष्टिरिवाजनि।।

卐 शृणुतञ्जरितु र्हव -मिन्द्राग्नी~ वनतङ्गिरः। ईशाना पिप्यत न्धियः।।

卐 मा पापत्वाय नो नरे-न्द्राग्नी~ माऽभिशस्तये। मा नो रीरधत न्निदे।।

卐 इन्द्रे अग्ना नमो बृह -त्सुवृक्ति मेरयामहे। धिया धेना^अवस्यवः।।

卐 ता हि शश्वन्त^ ईळत -इत्था विप्रास ऊतये। सबाधो वाजसातये।।

卐 ता वाङ्गीर्भि र्विपन्यवः -प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः।।

❀05.06.18 卐इन्द्राग्नी~ अवसाऽऽगत –मऽस्मभ्यञ्चर्षणीसहा। मा नो दुश्शंस ईशत।।

卐 मा कस्य नो अररुषो धूर्तिः प्रणङ्मर्त्यस्य। इन्द्राग्नी~ शर्म यच्छतम्।।

卐 गोम द्धिरण्यव द्वसु यद्वा मश्वाव दीमहे। इन्द्राग्नी~ तद्वनेमहि।।

卐 यत्सोम आ सुते नर -इन्द्राग्नी~ अजोहवुः। सप्तीवन्ता सपर्यवः।।

卐 उक्थेभि र्वृत्रहन्तमा -या मन्दाना चिदा गिरा। आङ्गूषै राविवासतः।।

卐 तावि दुश्शंसं मर्त्य -न्दुर्विद्वांसं रक्षस्विनम्। आभोगं हन्मना हत -मुदधिं हन्मना हतम्।।

☙ 7.94 प्र क्षोदसेति षड्र्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- स्सरस्वती- तृतीयाया स्सरस्वां-स्त्रिष्टुप्।।

❀05.06.19 卐प्र क्षोदसा धायसा सस्र एषा -सरस्वती धरुण मायसी पूः। प्रबाबधाना रथ्येव याति -विश्वा^ अपो महिना सिन्धु रन्याः।।

卐 एका॒चेतत्सर॑स्वती न॒दीनां॒ -शुचि॒ र्यती॑ गि॒रिभ्य॒ आ स॑मु॒द्रात्। रा॒य श्चेत॑न्ती॒ भुव॑नस्य॒ भूरे॑ -र्घृ॒तं पयो॑ दुदुहे॒ नाहु॑षाय।।

卐 स वा॑वृधे॒ नर्यो॒ योष॑णासु॒ -वृषा॒ शिशु॒ र्वृष॒भो य॒ज्ञिया॑सु। स वा॒जिनं॑ म॒घव॑द्भ्यो दधाति॒ -वि सा॒तये॑ त॒न्वं॑ मामृजीत।।

卐 उ॒त स्या न॒ स्सर॑स्वती जुषा॒णो-प॑ श्रव त्सु॒भगा॑ य॒ज्ञे अ॒स्मिन्न्। मि॒तज्ञु॑भि र्न॒मस्यै॑ रिया॒ना -रा॒या यु॒जा चि॒दुत्त॑रा॒ सखि॑भ्यः।।

卐 इ॒मा जुह्वा॑ना युष्मदा॒ नमो॑भि॒ -प्रति॒ स्तोम॑ं सरस्वति जुषस्व। तव॒ शर्म॑ न्प्रि॒यत॑मे॒ दधा॑ना॒ -उप॑ स्थेयाम शर॒णन्न वृ॒क्षम्।।

卐 अ॒यमु ते सरस्वति॒ वसि॑ष्ठो॒ -द्वारा॑ वृ॒तस्य॑ सुभगे॒ व्या॑वः। वर्ध॑ शुभ्रे स्तु॒वते रा॑सि॒ वाजा॑ न्यू॒यं पा॑त स्व॒स्तिभि॒ स्सदा॑ नः।।

7.95 बृहदु गायिष इति षडृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- स्सरस्वती अन्त्यानां तिसृणां सरस्वान्- आद्या बृहती- द्वितीया सतोबृहती- तृतीया प्रस्तारपङ्क्तिः-अन्त्यास्तिस्रो गायत्र्यः।।

05.06.20 卐बृ॒हदु गायिषे॒ वचो॒-सु॒र्या॒ न॒दीना॑म्। सर॑स्वती॒ मिन्म॑हया सुवृ॒क्तिभि॒ -स्स्तोमै॑ र्वसिष्ठ॒ रोद॑सी।।

卐 उ॒भे यत्ते॑ महि॒ना शु॑भ्रे॒ अन्ध॑सी -अधिक्षि॒यन्ति॑ पू॒रवः॑। सा नो॑ बोध्यवि॒त्री म॒रुत्स॑खा॒- चोद॒ राधो॑ म॒घोना॑म्।।

卐 भ॒द्रमि॒ द्भ॒द्रा कृ॑णव॒ त्सर॑स्व॒त्य-क॑वारी चेतति वा॒जिनी॑वती। गृ॒णा॒ना ज॑मदग्नि॒व -त्स्तु॒वा॒ना च॑ वसि॒ष्ठवत्।।

卐 ज॒नी॒यन्तो॒ न्वग्र॑वः -पुत्री॒यन्त॑ स्सु॒दान॑वः। सर॑स्वन्तं हवामहे।।

卐 ये ते॑ सरस्व ऊ॒र्मयो॒ -मधु॑मन्तो घृत॒श्चुतः॑। तेभि॑र्नो॒ऽवि॒ता भ॑व।।

卐 पी॒पि॒वांस॑ं॒ सर॑स्वत॒ -स्स्तन॒ं यो वि॒श्वद॑र्शतः। भ॒क्षी॒महि॑ प्र॒जा मिष॑म्।।

।। अथ परिशिष्टम्।।

卐 यस्य॑ व्र॒तं प॒शवो॒ यन्ति॒ सर्वे॑ यस्य॑ व्र॒त मु॑प॒तिष्ठ॑न्त॒ आपः॑। यस्य॑ व्र॒ते पु॑ष्टि॒प॒ति॒ र्नि॑विष्ट॒ स्तं सर॑स्वन्त॒ मव॑से हुवेम।। ।। इति परिशिष्टम्।।

☫ 7.96 यज्ञे दिव इति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो बृहस्पतिः-आद्याया इन्द्रः-तृतीया नवम्योरिन्द्राब्रह्मणस्पती अन्त्याया इन्द्राबृहस्पती त्रिष्टुप्।।

❀05.06.21 卐यज्ञे दिवो नृषदने पृथिव्या -नरो यत्र देवयवो मदन्ति। इन्द्राय यत्र सवनानि सुन्वे -गम न्मदाय प्रथमँ वयश्च।।

卐 आ दैव्या वृणीमहेऽवांसि -बृहस्पतिर्नो मह आ सखायः। यथा भवेम मीऌहुषे अनागा -यो नो दाता परावतः पितेव।।

卐 तमु ज्येष्ठन्नमसा हविर्भि -स्सुशेवं ब्रह्मणस्पति ङ्गृणीषे। इन्द्रं श्लोको महि दैव्य स्सिसक्तु -यो ब्रह्मणो देवकृतस्य राजा।।

卐 स आ नो योनिं सदतु प्रेष्ठो -बृहस्पति र्विश्ववारो यो अस्ति। कामो राय स्सुवीर्यस्य तन्दा -त्पर्षन्नो अति सश्चतो अरिष्टान्।।

卐 तमा नो अर्क ममृताय जुष्ट -मिमे धासु रमृतासः पुराजाः। शुचिक्रन्दँ यजतं पस्त्यानां -बृहस्पति मनर्वाणं हुवेम।।

❀05.06.22 卐तं शग्मासो अरुषासो अश्वा- बृहस्पतिं सहवाहो वहन्ति। सहश्चि द्यस्य नीलव त्सधस्थ-न्नभो न रूप मरुषँ वसानाः।।

卐 स हि शुचि श्शतपत्र स्स शुन्ध्यु- र्हिरण्यवाशी रिषिर स्स्वर्षाः। बृहस्पति स्स स्वावेश ऋष्वः -पुरू सखिभ्य आसुतिङ्करिष्ठः।।

卐 देवी~ देवस्य रोदसी जनित्री~ बृहस्पतिँ वावृधतु र्महित्वा। दक्षाय्याय दक्षता सखायः -कर द्ब्रह्मणे सुतरा सुगाधा।।

卐 इयँ वां ब्रह्मणस्पते सुवृक्ति -र्ब्रह्मेन्द्राय वज्रिणे अकारि। अविष्ट न्धियो जिगृतं पुरन्धी -र्जजस्त मर्यो वनुषा मरातीः।।

卐 बृहस्पते युव मिन्द्रश्च वस्वो -दिव्य स्येशाथे~ उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चि-द्यूयं पात स्वस्तिभि स्सदा नः।।

☫ 7.97 अध्वर्यव इति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठ- इन्द्रोऽन्त्याया इन्द्राबृहस्पती- त्रिष्टुप्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀05.06.23 卐अध्वर्यवोऽरुण न्दुग्ध मंशु-ञ्जुहोतन वृषभाय क्षितीनाम्। गौरा द्वेदीया॰ अवपान .मिन्द्रो -विश्वाहेद्याति सुतसोम मिच्छन्न्।।

卐 यद्दधिषे प्रदिवि चार्वन्न -न्दिवेर्दिवे पीति मिदस्य वक्षि। उत हृदोत मनसा जुषाण^ -उशन्निन्द्र प्रस्थिता न्पाहि सोमान्।।

卐 जज्ञान स्सोमं सहसे पपाथ -प्र ते माता महिमान मुवाच। एन्द्र पप्राथोर्व1(अ)न्तरिक्षँ -युधा देवेभ्यो वरिव श्चकर्थ।।

卐 यद्योधया^ महतो मन्यमाना -न्त्साक्षाम तान्बाहुभि श्शाशदानान्। यद्वा नृभि र्वृत^ इन्द्राभियुध्या-स्तन्त्वयाऽऽजिं सौश्रवस.ञ्जयेम।।

卐 प्रेन्द्रस्य वोचं प्रथमा कृतानि -प्र नूतना मघवा या चकार। यदे ददेवी रसहिष्ट माया^ -अथाभव त्केवल स्सोमो अस्य।।

卐 तवेदँ विश्वं मभित॰ पशव्य1(अँ) -यत्पश्यसि चक्षसा सूर्यस्य। गवामसि गोपति रेक^ इन्द्र -भक्षीमहि ते प्रयतस्य वस्वः।।

卐 बृहस्पते युव मिन्द्रश्च वस्वो -दिव्यस्येशाथे~ उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभि स्सदा नः।।

7.98 परो मात्रयेति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विष्णुः।।

卐 उरुँ यज्ञायेति तिसृणा मिन्द्राविष्णू- त्रिष्टुप्।।

❀05.06.24 卐परो मात्रया तन्वा वृधान -न ते महित्व मन्वश्नुवन्ति। उभे~ ते विद्म रजसी~ पृथिव्या^- विष्णो~ देव त्वं परमस्य वित्से।।

卐 न ते विष्णो~ जायमानो न जातो -देव महिम्न॰ परमन्त माप। उदस्तभ्ना नाक मृष्वं बृहन्त ~न्दाधर्थ प्राचीङ्ककुभं पृथिव्याः।।

卐 इरावती~ धेनुमती~ हि भूतं सूयवसिनी~ मनुषे दशस्या। व्यस्तभ्ना द्रोदसी विष्ण~वेते~ दाधर्थ पृथिवी मभितो मयूखैः।।

卐 उरुँ यज्ञाय चक्रथुरु लोक-ञ्जनयन्ता सूर्य मुषास मग्निम्। दासस्य चिद्वृषशिप्रस्य माया^ -जघ्नथु र्नरा पृतनाज्येषु।।

卐 इन्द्राविष्णू~ दृंहिता श्शम्बरस्य- नव पुरो नवतिञ्च श्नथिष्टम्। शतँ वर्चिन स्सहस्रञ्च साकं -हथो अप्रत्यसुरस्य वीरान्।।

卐 इयं मनीषा बृहती बृहन्तो-रुक्रमा तवसा वर्धयन्ती। ररे वां स्तोमँ विदथेषु विष्णो~- पिन्वत मिषो वृजनेष्विन्द्र।।

卐 वषट्ते विष्ण~ वास आ कृणोमि -तन्मे जुषस्व शिपिविष्ट हव्यम्। वर्धन्तु त्वा सु◌ष्टुतयो गिरो मे यूयं पात स्वस्तिभि स्सदा नः।।

☃ 7.99 नू मर्त इति सप्तर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठो- विष्णु-स्त्रिष्टुप्।।

❀05.06.25 卐नू मर्तो दयते सनिष्य-न्यो विष्णव उरुगायाय दाशत्। प्र य स्सत्राचा मनसा यजात -एतावन्तन्नर्य माविवासात्।।

卐 त्वँ विष्णो~ सुमतिँ विश्वजन्या .-मप्रयुता मेवयावो मतिन्दाः। पर्चो यथा न स्सुवितस्य भूरे -रश्वावतः पुरुश्चन्द्रस्य रायः।।

卐 त्रिर्देवः पृथिवी मेष एताँ -वि चक्रमे शतर्चसं महित्वा। प्र विष्णु रस्तु तवस स्तवीया -न्त्वेषं ह्यऽस्य स्थविरस्य नाम।।

卐 वि चक्रमे पृथिवी मेष एता.-ङ्क्षेत्राय विष्णु र्मनुषे दशस्यन्न्। ध्रुवासो अस्य कीरयो जनास -उरुक्षितिं सुजनिमा चकार।।

卐 प्र तत्ते अद्य शिपिविष्ट नामा -ऽर्य श्शंसामि वयुनानि विद्वान्। तन्त्वा गृणामि तवस मतव्या -न्क्षयन्त मस्य रजसः पराके।।

卐 किमित्ते विष्णो~ परिचक्ष्यं भूत्प्र- यद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अस्म दप गूह एत- द्यदन्यरूप स्समिथे बभूथ।।

卐 वषट्ते विष्ण~ वास आ कृणोमि -तन्मे जुषस्व शिपिविष्ट हव्यम्। वर्धन्तु त्वा सु◌ष्टुतयो गिरो मे यूयं पात स्वस्तिभि स्सदा नः।। इति षष्ठाध्याय स्समाप्तः।।

## SGS SGSपञ्चमाष्टके सप्तमाध्यायः (वर्गाः 1-33)

☃ 7.100 तिस्रो वाच इति षड़्चस्य सूक्तस्याऽऽग्नेयः कुमारः पर्जन्य-स्त्रिष्टुप्-(तिस्रो वाचः पर्जन्यायेति सूक्तयो- र्वृष्टिकामो वसिष्ठः- पाक्षिकः।।

❀05.07.0 卐तिस्रो वाचः प्र वद ज्योतिरग्रा-^ या^ एत द्दुह्रे मधुदोघ .मूधः। स वत्सङ्कृण्व न्गर्भ मोषधीनां -सद्यो जातो वृषभो रोरवीति।।

卐 यो वर्धन ओषधीनाँ यो अपाँ -यो विश्वस्य जगतो देव^ ईशे। स त्रिधातु शरणं शर्म यंस -त्त्रिवर्तु ज्योति स्स्वभिष्ट्य1(अ)स्मे।।

卐 स्तरीरु त्वद्भवति सूत उ त्व-द्यथावश न्तन्वञ्चक्र एषः। पितुः पयः प्रति गृभ्णाति माता -तेन पिता वर्धते तेन पुत्रः।।

卐 यस्मि न्विश्वानि भुवनानि तस्थु -स्तिस्रो द्याव स्त्रेधा सस्रु रापः। त्रयः कोशास उपसेचनासो -मध्व श्श्चोत न्त्यभितो विरप्शम्।।

卐 इदँ वचः पर्जन्याय स्वराजे -हृदो अस्त्वन्तर न्तज्जुजोषत्। मयोभुवो वृष्टय स्सन्त्वस्मे -सुपिप्पला^ ओषधी र्देवगोपाः।।

卐 स रेतोधा वृषभ श्शश्वतीना -न्तस्मिन्नात्मा जगत स्तस्थुषश्च। तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभि स्सदा नः।।

☬ 7.101 पर्जन्यायेति तृचस्य सूक्तस्याऽऽग्नेयः कुमारः- पर्जन्यो- गायत्री।।

❀05.07.02 卐पर्जन्याय प्र गायत -दिवस्पुत्राय मीळ्हुषे। स नो यवस मिच्छतु।।

卐 यो गर्भ मोषधीना-ङ्गवाङ्कृणो त्यर्वताम्। पर्जन्यः पुरुषीणाम्।।

卐 तस्मा इदास्ये हवि -र्जुहोता मधुमत्तमम्। इळान्न स्सँयतङ्करत्।।

☬ 7.103 सँवत्सरमिति दशर्चस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठः- पर्जन्यस्तुति- संहृष्ट मण्डूका स्त्रिष्टुबाद्याऽनुष्टुप्।।

❀05.07.03 卐सँवत्सरं शशयाना^ -ब्राह्मणा^ व्रतचारिणः। वाचं पर्जन्यजिन्वितां -प्र मण्डूका^ अवादिषुः।।

卐 दिव्या^ आपो अभि यदेन माय -न्दृतिन्न शुष्कं सरसी~ शयानम्। गवा मह न मायु र्वत्सिनीनां -मण्डूकानाँ वग्नु रत्रा समेति।।

卐 यदी मेनाः उशतो अभ्यवर्षी -त्तृष्यावतः प्रावृष्याऽऽगतायाम्। अक्खलीकृत्या पितरन्न पुत्रो -अन्यो अन्य .मुप वदन्त मेति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अन्यो अन्य मनु गृभ्णात्येनो -रपां प्रसर्गे यदमन्दिषाताम्। मण्डूको यदभिवृष्टः ॒कनिष्क -न्पृश्नि स्संपृङ्क्ते हरितेन वाचम्।।

卐 यदेषा मन्यो अन्यस्य वाचं -शाक्तस्येव वदति शिक्षमाणः। सर्व न्तदेषां समृधेव पर्व -यत्सुवाचो वदथनाध्यप्सु।।

❀05.07.04 卐गोमायु रेको अजमायु रेकः- पृश्नि रेको हरित एक एषाम्। समान न्नाम बिभ्रतो विरूपाः- पुरुत्रा वाचं पिपिशु वदन्तः।।

卐 ब्राह्मणासो अतिरात्रे न सोमे -सरो न पूर्ण मभितो वदन्तः। सँवत्सरस्य तदहः परि ॒ष्ठ -यन्मण्डूकाः प्रावृषीणं बभूव।।

卐 ब्राह्मणास स्सोमिनो वाच मक्रत -ब्रह्म कृण्वन्तः परिवत्सरीणम्। अध्वर्यवो घर्मिण ॒स्सिष्विदाना -आवि र्भवन्ति गुह्या न के चित्।।

卐 देवहितिं जुगुपु र्द्वादशस्य -ऋतुन्नरो न प्र मिनन्त्येते। सँवत्सरे प्रावृष्यागताया -न्तप्ता घर्मा अश्नुवते विसर्गम्।।

卐 गोमायु रदा दजमायु रदा -त्पृश्नि रदा द्धरितो नो वसूनि। गवां मण्डूका ददत श्शतानि -सहस्रसावे प्र तिरन्त आयुः।।

✡।। अथ परिशिष्टम्।।

卐 उपप्लवत मण्डूकि -वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व -निगृह्य चतुरः पदः।।

卐 ।। इति परिशिष्टम्।।

7.104 इन्द्रासोमेति पञ्चविंशत्यृ सूक्तस्य, मैत्रावरुणिर्वसिष्ठ- इन्द्रासोमौ अष्टमी षोड-श्येको नविंशी विंश्येकविंशी द्वाविंशी चतुर्विंशीनामिन्द्रः- नवमी द्वादशी त्रयोदशीनां सोमः-दशमी चतुर्दश्योरग्निः-एकादश्या विश्वेदेवाः-सप्तदश्या ग्रावाणः-अष्टादश्या मरुतः-त्रयोविंश्या वसिष्ठाशीः-पृथिव्यन्तरिक्षाणि-आद्या ष्षडष्टादशी द्वाविंशी त्रयोविंश्यो जगत्योऽन्त्याऽनुष्टु-प्शिष्टा स्त्रिष्टुभः- (अस्मिन्सूक्ते रक्षोघ्नत्वं गुण स्सर्वासां देवतानां वक्तव्यः) प्रागाथेऽष्टमे मण्डले दशानुवाका स्तत्र प्रथमेऽनुवाके पञ्चसूक्तानि।।

❀05.07.05 卐इन्द्रासोमा तपतं रक्ष उब्जत-न्न्यर्पयतँ वृषणा तमोवृधः। परा श्शृणीत मचितो न्योषतं -हत न्नुदेथा न्निशिशीत मत्रिणः।।

卐 इन्द्रासोमा समघशंस मभ्य1(अ)घ -न्तपु र्ययस्तु चरु रग्निवाँ इव। ब्रह्मद्विषे क्रव्यादे घोरचक्षसे -द्वेषो धत्त मनवाय.ङ्किमीदिने।।

卐 इन्द्रासोमा दुष्कृतो वव्रे अन्त -रनारम्भणे तमसि प्र विध्यतम्। यथा नातः पुन रेक श्चनोदय -त्तद्वा मस्तु सहसे मन्युमच्छवः।।

卐 इन्द्रासोमा वर्तयत न्दिवो वधं -सं पृथिव्या अघशंसाय तर्हणम्। उत्तक्षतं स्वर्य1(अं) पर्वतेभ्यो -येन रक्षो वावृधान न्निजूर्वथः।।

卐 इन्द्रासोमा वर्तयत न्दिवस्प र्य-ऽग्नितप्तेभि र्युव मश्महन्मभिः। तपुर्वधेभि रजरेभि रत्रिणो -नि पर्शाने विध्यतँ यन्तु निस्वरम्।।

❀05.07.06 卐इन्द्रासोमा परि वां भूतु विश्वत- इयं मतिः कक्ष्याश्वेव वाजिना। यां वां होत्रां परिहिनोमि मेधये-मा ब्रह्माणि नृपतीव जिन्वतम्।।

卐 प्रति स्मरेथा न्तुजयद्भि रेवै -र्हत न्द्रुहो रक्षसो भङ्गुरावतः। इन्द्रासोमा दुष्कृते मा सुगं भू-द्यो नः कदा चिदभिदासति द्रुहा।।

卐 यो मा पाकेन मनसा चरन्त -मभिचष्टे अनृतेभि र्वचोभिः। आपइव काशिना सङ्गृभीता -असन्न स्त्वासत इन्द्र वक्ता।।

卐 ये पाकशंसँ विहरन्त एवै -र्ये वा भद्र न्दूषयन्ति स्वधाभिः। अहये वा तान्प्रददातु सोम -आ वा दधातु निर्ऋते रुपस्थे।।

卐 यो नो रस .न्दिप्सति पित्वो अग्ने -यो अश्वानाँ यो गवाँ यस्तनूनाम्। रिपु स्तेन स्स्तेयकृ द्दभ्रमेतु -नि ष हीयता न्तन्वा3(आ) तना च।।

❀05.07.07 卐पर स्सो अस्तु तन्वा3(आ)तना च -तिस्रः पृथिवी रधो अस्तु विश्वाः। प्रति शुष्यतु यशो अस्य देवा -यो नो दिवा दिप्सति यश्च नक्तम्।।

卐 सुविज्ञान.ञ्चिकितुषे जनाय -सच्चासच्च वचसी पस्पृधाते। तयोर्य त्सत्यँ यतर दृजीय -स्तादि त्सोमोऽवति हन्त्यासत्।।

卐 न वा उ सोमो वृजिनं हिनोति -न क्षत्रियं मिथुया धारयन्तम्। हन्ति रक्षो हन्त्यास द्वदन्त .-मुभा विन्द्रस्य प्रसितौ शयाते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यदि वाह मनृतदेव^ आस -मोघँ वा देवा९ अप्यूहे अग्ने। किमस्मभ्यञ्जातवेदो हृणीषे- द्रोघवाचस्ते निर्ऋथं सचन्ताम्।।

卐 अद्या मुरीय यदि यातुधानो -अस्मि यदि वाऽयु स्ततप पूरुषस्य। अधा स वीरै र्दशभि र्वियूया -यो मा मोघँ यातुधानेत्याह।।

❀05.07.08 卐यो माऽयातुँ यातुधानेत्याह -यो वा रक्षा श्शुचिरस्मीत्याह। इन्द्रस्तं हन्तु महता वधेन -विश्वस्य जन्तो रधमस्पदीष्ट।।

卐 प्र या जिगाति खर्गलेव नक्त .-मप द्रुहा तन्व1(अ)ङ्गूहमाना। वव्राः९ अनन्ता९ अव सा पदीष्ट -ग्रावाणो घ्नन्तु रक्षस उपब्दैः।।

卐 वि तिष्ठध्वं मरुतो विक्ष्वि1(इ)च्छत -गृभायत रक्षस स्सं पिनष्टन। वयो ये भूत्वी पतयन्ति नक्तभि -र्ये वा रिपो दधिरे देवे अध्वरे।।

卐 प्र वर्तय दिवो अश्मान मिन्द्र -सोमशितं मघवन्त्सं शिशाधि। प्राक्ता दपाक्ता दधरा दुदक्ता- दभि जहि रक्षस४ पर्वतेन।।

卐 एत उ त्ये पतयन्ति श्वयातव -इन्द्र न्दिप्सन्ति दिप्सवोऽदाभ्यम्। शिशीते शक्र४ पिशुनेभ्यो वध -न्नूनं सृज दशनिँ यातुमद्भ्यः।।

❀05.07.09 卐इन्द्रो यातूना मभव त्पराशरो -हविर्मथीना मभ्या3(आ) विवासताम्। अभीदु शक्र४ परशु र्यथा वनं -पात्रेव भिन्द न्त्सत एति रक्षसः।।

卐 उलूकयातुं शुशुलूकयातु-ञ्जहि श्वयातु मुत कोकयातुम्। सुपर्णयातु मुत गृध्रयातु -न्दृषदेव प्र मृण रक्ष^ इन्द्र।।

卐 मा नो रक्षो अभिनड्यातुमावता .-मपोच्छतु मिथुना या किमीदिना। पृथिवी न४ पार्थिवा त्पात्वंहसोऽ-न्तरिक्ष न्दिव्या त्पात्वस्मान्।।

卐 इन्द्र जहि पुमांसँ यातुधान .-मुत स्त्रियं मायया शाशदानाम्। विग्रीवासो मूरदेवा ऋदन्तु -मा ते दृश न्त्सूर्य मुच्चरन्तम्।।

卐 प्रति चक्ष्व वि चक्ष्वेन्द्र-श्च सोम जागृतम्। रक्षोभ्यो वध मस्यत .-मऽशनिँ यातुमद्भ्यः।।।। इति सप्तमं मण्डलम्।। विश्वेश्वराय नमः ....

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

# अष्टमं मण्डलम्।।

8.01 मा चिदन्यदिति चतुस्त्रिंशदृचस्य सूक्तस्य, आद्ययो र्द्वयोः काण्वः प्रगाथ ऋषिः-शिष्टानां काण्वौ मेधातिथि मेध्यातिथी ऋषी-स्तुहि स्तुहीत्यादि चतसृणां प्लायोङ्गिरासङ्ग ऋषिः-अन्त्याया आङ्गिरसी शश्वती ऋषिका-इन्द्रो देवता स्तुहिस्तुहीत्यादि पञ्चानामासङ्गो देवता-बृहती- द्वीतीया सतोबृहती- अन्त्ये द्वे त्रिष्टुभौ- (काण्वः प्रगाथ इत्यत्र त्यः प्रगाथो वस्तुतो घौर स्सन्भ्रातुः कण्वस्य पुत्रताङ्गत इतीतिहासश्शृयते।।

05.07.10 मा चिदन्यद्वि शंसत- सखायो मा रिषण्यत। इन्द्रमित्स्तोता वृषणं सचा सुते- मुहु रुक्था च शंसत।।

अवक्रक्षिणँ वृषभँ यथाजुर-ङ्गान्न चर्षणीसहम्। विद्वेषणं सँवननोभयङ्करं- मंहिष्ठ .मुभयाविनम्।।

यच्चिद्धि त्वा जना^ इमे- नाना हवन्त ऊतये। अस्माकं ब्रह्मेद मिन्द्र भूतु ते-हा विश्वा च वर्धनम्।।

वि तर्तूर्यन्ते मघव न्विपश्चितो-ऽर्यो विपो जनानाम्। उप क्रमस्व पुरुरूप मा भर- वाज न्नेदिष्ठ मूतये।।

महे चन त्वामद्रिवः- परा शुल्काय देयाम्। न सहस्राय नायुताय वज्रिवो- न शताय शतामघ।।

05.07.11 वस्याँ इन्द्रासि मे पितु- रुत भ्रातु रभुञ्जतः। माता च मे छदयथ स्समा वसो~- वसुत्वनाय राधसे।।

क्वे यथ क्वे दसि -पुरुत्रा चिद्धि ते मनः। अलर्षि युध्म खजकृ त्पुरन्दर -प्र गायत्रा अगासिषुः।।

प्रास्मै गायत्र मर्चत- वावातुर्यः पुरन्दरः। याभिः काण्वस्योप बर्हि रासदँ- यास द्वज्री भिन त्पुरः।।

ये ते सन्ति दशग्विन -श्शतिनो ये सहस्रिणः। अश्वासो ये ते वृषणो रघुद्रुव -स्तेभिर्न स्तूयमा गहि।।

आ त्व1(अ)द्य सबर्दुघां -हुवे गायत्रवेपसम्। इन्द्र न्धेनुं सुदुघा मन्या मिष- मुरुधारा मरङ्कृतम्।।

05.07.12 यत्तुद त्सूर एतशँ -वङ्कू~ वातस्य पर्णिना। वहत्कुत्स मार्जुनेयं शतक्रतुः≈- त्सर द्गन्धर्व मस्तृतम्।।

य^ ऋते चिदभिश्रिषः -पुरा जत्रुभ्य आतृदः। सन्धाता सन्धिं मघवा पुरूवसु -रिष्कर्ता विह्रुतं पुनः~।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 मा भूम निष्ट्याइवे-न्द्र त्वदरणाइव। वनानि न प्रजहिता न्यद्रिवो- दुरोषासो अमन्महि।।

卐 अमन्महीदनाशवोऽ-नुग्रासश्च वृत्रहन्न्। सकृत्सु ते महता शूर राधसा-ऽनु स्तोमं मुदीमहि।।

卐 यदि स्तोमं मम श्रव –दस्माक मिन्द्र मिन्दवः। तिरः पवित्रं ससृवांस आशवो- मन्दन्तु तुग्र्यावृधः।।

❀05.07.13 卐आ त्व1(अ)द्य सधस्तुतिँ –वावातु स्सख्यु रागहि। उपस्तुति र्मघोनां प्र त्वा-ऽवत्वधा ते वश्मि सुष्टुतिम्।।

卐 सोता हि सोम मद्रिभि- रेमेन मप्सु धावत। गव्या वस्त्रेव वासयन्त इन्नरो- निर्धुक्ष न्वक्षणाभ्यः।।

卐 अध ज्मो अध वा दिवो- बृहतो रोचना.दधि। अया वर्धस्व तन्वा गिरा ममा-ऽऽजाता सुक्रतो~ पृण।।

卐 इन्द्राय सु मदिन्तमं -सोमं सोता वरेण्यम्। शक्र एणं पीपय द्विश्वया धिया -हिन्वानन्न वाजयुम्।।

卐 मा त्वा सोमस्य गल्दया -सदा याचन्नहङ्गिरा। भूर्णिं मृगन्न सवनेषु चुक्रुध-ङ्क- ईशानन्न याचिषत्।।

❀05.07.14 卐मदेनेषितं मद -मुग्र मुग्रेण शवसा। विश्वेषा न्तरुतारं मदच्युतं -मदे हि ष्मा ददाति नः।।

卐 शेवारे वार्या पुरु -देवो मर्ताय दाशुषे। स सुन्वते च स्तुवते च रासते- विश्वगूर्तो अरिष्टुतः।।

卐 एन्द्र याहि मत्स्व -चित्रेण देव राधसा। सरो न प्रास्युदरं सपीतिभि- ऽऽरा सोमेभि रुरु स्फिरम्।।

卐 आ त्वा सहस्रमा शतँ -युक्ता रथे हिरण्यये। ब्रह्मयुजो हरय इन्द्र केशिनो -वहन्तु सोमपीतये।।

卐 आ त्वा रथे हिरण्यये- हरी~ मयूरशेप्या। शितिपृष्ठा वहतां मध्वो अन्धसो- विवक्षणस्य पीतये।।

❀05.07.15 卐पिबा त्व1(अ)स्य गिर्वण -स्सुतस्य पूर्वपाइव। परिष्कृतस्य रसिन इय मासुति- श्चारु र्मदाय पत्यते।।

卐 य एको अस्ति दंसना -महा उग्रो अभि व्रतैः। गमत्स शिप्री न स योष दाऽऽगम -द्धवन्न परि वर्जति।।

卐 त्वं पुरञ्चरिष्ण्वँ -वधै श्शुष्णस्य सं पिणक्। त्वं भा अनु चरो अध द्विता- यदिन्द्र हव्यो भुवः।।

卐 मम त्वा सूर उदिते -मम मध्यन्दिने दिवः। मम प्रपित्वे अपिशर्वरे -वस~-वा स्तोमासो अवृत्सत।।

卐 स्तुहि स्तुही देते घा ते- मंहिष्ठासो मघोनाम्। निन्दिताश्वः प्रपथी परमज्या -मघस्य मेध्यातिथे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀05.07.16 卐आ यदश्वा न्वनन्वत -श्श्रद्धयाऽहं रथे रुहम्। उत वामस्य वसुन श्चिकेतति -यो अस्ति याद्वः पशुः।।
卐 य ऋज्रा मह्यं मामहे -सह त्वचा हिरण्यया। एष विश्वान्यभ्यस्तु सौभगा-ऽऽसङ्गस्य स्वनद्रथः।।
卐 अध प्लायोगि रति दासदन्या- नासङ्गो अग्ने दशभि स्सहस्रैः। अधोक्षणो दश मह्यं रुशन्तो -नळा इव सरसो निरतिष्ठन्न्।।
卐 अन्वस्य स्थूर न्ददृशे पुरस्ता -दनस्थ ऊरु रवरम्बमाणः। शश्वती नार्यभिचक्ष्याह- सुभद्र मर्य भोजनं बिभर्षि।।
🏺 8.02 इदँ वसो सुतमिति द्विचत्वारिंशदृचस्य सूक्तस्य, मेधातिथिराङ्गिरसः- प्रियमेध श्चेत्युभा वृषी- अन्त्ययोर्द्वयोः काण्वो मेधातिथि र्ऋषि-रिन्द्रः- अन्त्ययो र्विभिन्दु- र्गायत्री- अष्टाविंश्युनुष्टुप्- (विभिन्दोर्दानस्तुतिः)
❀05.07.1 卐इदँ वसो~ सुत मन्धः -पिबा सुपूर्ण मुदरम्। अनाभयि.न्ररिमा ते।।
卐 नृभि र्धूत स्सुतो अश्नै- रव्यो वारैः परिपूतः। अश्वो न निक्तो नदीषु।।
卐 तन्ते यवँ यथा गोभि -स्स्वादु मकर्म श्रीणन्तः। इन्द्र त्वाऽस्मिन्त्सधमादे।।
卐 इन्द्र इत्सोमपा एक -इन्द्र स्सुतपा विश्वाऽऽयुः। अन्त र्देवा न्मर्त्याँश्च।।
卐 न यं शुक्रो न दुराशी -र्न तृप्रा उरुव्यचसम्। अपस्पृण्वते सुहार्दम्।।
❀05.07.18 卐गोभि र्यदीमन्ये अस्म .-न्मृगन्न व्रा मृगयन्ते। अभित्सरन्ति धेनुभिः।।
卐 त्रय इन्द्रस्य सोमा- स्सुतास स्सन्तु देवस्य। स्वे क्षये सुतपान्नः।।
卐 त्रयः कोशास श्श्चोतन्ति -तिस्र श्चम्व1(अ) स्सुपूर्णाः। समाने अधि भार्मन्न्।।
卐 शुचि रसि पुरुनिष्ठाः ≈- क्षीरै मध्यत आशीर्तः। दध्ना मन्दिष्ठ श्शूरस्य।।
卐 इमे त इन्द्र सोमा -स्तीव्रा अस्मे सुतासः। शुक्रा आशिरँ याचन्ते।।
❀05.07.19 卐ताँ आशिरं पुरोळाश .-मिन्द्रेमं सोमं श्रीणीहि। रेवन्तं हि त्वा शृणोमि।।
卐 हृत्सु पीतासो युध्यन्ते -दुर्मदासो न सुरायाम्। ऊधर्न नग्ना जरन्ते।।
卐 रेवाँ इद्रेवत स्स्तोता -स्यात्त्वावतो मघोनः। प्रेदु हरिव श्श्रुतस्य।।
卐 उक्थञ्चन शस्यमान.- मगो ररिरा चिकेत। न गायत्र.ङ्गीयमानम्।।

卐 मा न^ इन्द्र पीयत्नवे- मा शर्धते परा दाः। शिक्षा शचीव श्शचीभिः।।

❀05.07.20 卐वयमु त्वा तदिदर्था^- इन्द्र त्वायन्त स्सखायः। कण्वा^ उक्थेभि र्जरन्ते।।

卐 न घे मन्यदा पपन -वज्रिन्नपसो नविष्टौ। तवेदु स्तोमञ्चिकेत।।

卐 इच्छन्ति देवा स्सुन्वन्त-न्न स्वप्नाय स्पृहयन्ति। यन्ति प्रमाद मतन्द्राः।।

卐 ओ~ षु प्र याहि वाजेभि -र्मा हृणीथा^ अभ्य1(अ)स्मान्। महाँ इव युवजानिः।।

卐 मो~ ष्व1(अ)द्य दुर्हणावा -न्त्सायङ्करदारे अस्मत्। अश्रीरइव जामाता।।

❀05.07.21 卐विद्मा ह्यस्य वीरस्य -भूरिदावरीं सुमतिम्। त्रिषु जातस्य मनांसि।।

卐 आ तू षिञ्च कण्वमन्त-न्न घा विद्म शवसानात्। यशस्तरं शतमूतेः।।

卐 ज्येष्ठेन सोत रिन्द्राय- सोमँ वीराय शक्राय। भरा पिबन्नर्याय।।

卐 यो वेदिष्ठो अव्यथि ष्व-ऽश्वावन्त.ञ्जरितृभ्यः। वाजं स्तोतृभ्यो गोमन्तम्।।

卐 पन्यंपन्य मित्सोतार -आ धावत मद्याय। सोमँ वीराय शूराय।।

❀05.07.22 卐पाता वृत्रहा सुत-मा घा गम न्नारे अस्मत्। नि यमते शतमूतिः।।

卐 एह हरी~ ब्रह्मयुजा- शग्मा वक्षत स्सखायम्। गीर्भि श्श्रुतङ्गिर्वणसम्।।

卐 स्वादव स्सोमा^ आ याहि- श्रीता स्सोमा आ याहि। शिप्रिन्नृषीव श्शचीवो- नाय मच्छा सधमादम्।।

卐 स्तुतश्च या^ स्त्वा वर्धन्ति- महे राधसे नृम्णाय। इन्द्र कारिणँ वृधन्तः।।

卐 गिरश्च या^ स्ते गिर्वाह^ -उक्था च तुभ्य न्तानि। सत्रा दधिरे शवांसि।।

❀05.07.23 卐एवेदेष तुविकूर्मि- र्वाजा एको वज्रहस्तः। सना दमृक्तो दयते।।

卐 हन्ता वृत्र न्दक्षिणेने-न्द्रः पुरू पुरुहूतः। महा न्महीभि श्शचीभिः।।

卐 यस्मिन्विश्वा श्चर्षणय^- उत च्यौत्ना ज्रयांसि च। अनु घेन्मन्दी मघोनः।।

卐 एष^ एतानि चकारे-न्द्रो विश्वा योऽति शृण्वे। वाजदावा मघोनाम्।।

卐 प्रभर्ता रथङ्गव्यन्त -.मपाकाच्चिद्य मवति। इनो वसु स हि वोळ्हा।।

❀05.07.24 卐सनिता विप्रो अर्वद्भि- र्हन्ता वृत्रन्नृभि श्शूरः। सत्योऽविता विधन्तम्।।

卐 यजध्वैनं प्रियमेधा^- इन्द्रं सत्राचा मनसा। यो भूत्सोमै स्सत्यमद्वा।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 गाथश्रवसं सत्पतिं- श्रवस्कामं पुरुत्मानम्। कण्वासो गात वाजिनम्।।

卐 य ऋते चिद्गा स्पदेभ्यो- दात्सखा नृभ्य श्शचीवान्। ये अस्मि न्काम मश्रियन्न्।।

卐 इत्था धीवन्त मद्रिवः- काण्वं मेध्यातिथिम्। मेषो भूतो3(ओ)ऽभि यन्नयः।।

卐 शिक्षा विभिन्दो~ अस्मै- चत्वार्ययुता ददत्। अष्टा पर स्सहस्रा।।

卐 उत सु त्ये~ पयोवृधा -माकी~ रणस्य नप्त्या। जनित्वनाय मामहे।।

8.03 पिबा सुतस्येति चतुर्विंशत्यृचस्य सूक्तस्य, काण्वो मेध्यातिथि- रिन्द्रः- अन्त्यचतसृणां पाकस्थामा देवता- प्रथमाद्येकोनविंश्यंता अयुजो बृहत्यः-द्वितीयादि विंश्यन्ता युज स्सतोबृहत्यः- अन्त्याश्चतस्रः क्रमेणानुष्टुब्गायत्र्यौ बृहती च।।

05.07.25 卐पिबा सुतस्य रसिनो- मत्स्वा न इन्द्र गोमतः। आपि नो बोधि सधमाद्यो वृधे3-(ए)ऽस्मा अवन्तु ते धियः।।

卐 भूयाम ते सुमतौ वाजिनो वयं -मा न स्स्त रभिमातये। अस्मान्चित्राभि रवता दभिष्टिभि- रा न स्सुम्नेषु यामय।।

卐 इमा उ त्वा पुरूवसो~- गिरो वर्धन्तु या मम। पावकवर्णा श्शुचयो विपश्चितो-ऽभि स्तोमै रनूषत।।

卐 अयं सहस्र मृषिभि स्सहस्कृत- स्समुद्रइव पप्रथे। सत्य स्सो अस्य महिमा गृणे शवो- यज्ञेषु विप्रराज्ये।।

卐 इन्द्रमि द्देवतातय -इन्द्रं प्रयत्यध्वरे। इन्द्रं समीके वनिनो हवामह -इन्द्र न्धनस्य सातये।।

05.07.26 卐इन्द्रो मह्ना रोदसी पप्रथ च्छव- इन्द्र स्सूर्य मरोचयत्। इन्द्रे ह विश्वा भुवनानि येमिर- इन्द्रे सुवानास इन्दवः।।

卐 अभि त्वा पूर्वपीतय -इन्द्र स्तोमेभि रायवः। समीचीनास ऋभव स्समस्वर -न्रुद्रा गृणन्त पूर्व्यम्।।

卐 अस्ये दिन्द्रो वावृधे वृष्ण्यं शवो- मदे सुतस्य विष्णवि। अद्या तमस्य महिमान मायवो-ऽनु ष्टुवन्ति पूर्वथा।।

卐 तत्त्वा यामि सुवीर्य- न्तद्ब्रह्म पूर्वचित्तये। येना यतिभ्यो भृगवे धने हिते -येन प्रस्कण्व माविथ।।

卐 येना समुद्र मसृजो मही रप -स्तदिन्द्र वृष्णि ते शवः। सद्य स्सो अस्य महिमा न सन्नशे -यङ्क्षोणी रनुचक्रदे।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

❀05.07.27 卐शग्धी न इन्द्र यत्त्वा -रयिं यामि सुवीर्यम्। शग्धि वाजाय प्रथमं ॒सिषासते -शग्धि स्तोमाय पूर्व्य।।

卐 शग्धी नो अस्य यद्ध पौर मावित्थ- धिय इन्द्र ॒सिषासतः। शग्धि यथा रुशमं श्यावकङ्कृप-. मिन्द्र प्राव स्स्वर्णरम्।।

卐 कन्नव्यो अतसीना -न्तुरो गृणीत मर्त्यः। नही न्वस्य महिमान मिन्द्रियं -स्वर्गृणन्त आनशुः।।

卐 कदु स्तुवन्त ऋतयन्त देवत -ऋषिः को विप्र ओहते। कदा हवं मघवन्निन्द्र सुन्वतः- कदु स्तुवत आ गमः।।

卐 उदु त्ये मधुमत्तमा -गिर स्स्तोमास ईरते। सत्राजितो धनसा अक्षितोतयो -वाजयन्तो रथाइव।।

❀05.07.28 卐कण्वाइव भृगव स्सूर्याइव- विश्वमि द्धीत मानशुः। इन्द्रं स्तोमेभि र्महयन्त आयवः- प्रियमेधासो अस्वरन्न्।।

卐 युक्ष्वा हि वृत्रहन्तम- हरी इन्द्र परावतः। अर्वाचीनो मघव न्त्सोमपीतय -उग्र ऋष्वेभि रा गहि।।

卐 इमे हि ते कारवो वावशु र्धिया- विप्रासो मेधसातये। स त्वन्नो मघवन्निन्द्र गिर्वणो- वेनो न श्रृणुधी हवम्।।

卐 निरिन्द्र बृहतीभ्यो -वृत्र न्धनुभ्यो अस्फुरः। निरर्बुदस्य मृगयस्य मायिनो- निः पर्वतस्य गा आजः।।

卐 निरग्नयो रुरुचु र्निरु सूर्यो -नि स्सोम इन्द्रियो रसः। निरन्तरिक्षा दधमो महा महि-.ङ्कृषे तदिन्द्र पौंस्यम्।।

❀05.07.29 卐यं मे दुरिन्द्रो मरुतः- पाकस्थामा कौरयाणः। विश्वेषा न्त्मना शोभिष्ठ .-मुपेव दिवि धावमानम्।।

卐 रोहितं मे पाकस्थामा -सुधुरङ्कक्ष्यप्राम्। अदा द्रायो विबोधनम्।।

卐 यस्मा.अन्ये दश प्रति- धुरँ वहन्ति वह्नयः। अस्तँ वयो न तुग्र्यम्।।

卐 आत्मा पितु स्तनू र्वास -ओजोदा अभ्यञ्जनम्। तुरीय मिद्रोहितस्य पाकस्थामानं -भोज न्दातार मब्रवम्।।

8.04 यदिन्द्रेत्येकविंशत्यृचस्य सूक्तस्य, काण्वो मेधातिथि-रिन्द्रः-अन्त्यतिसृणां कुरुङ्गोऽयुजो बृहत्यो- युज स्सतोबृहत्योऽअन्त्या पुरउष्णिक् (प्र पूषणमित्यादि चतसृणां पूषा देवता वा)।।

❀05.07.30 卐यदिन्द्र प्रागपा गुदङ्-न्यग्वा हूयसे नृभिः। सिमा पुरू नृषूतो अस्यानवे-ऽसि प्रशर्ध तुर्वशे।।

卐 यद्वा रुमे रुशमे श्यावके कृप-इन्द्र मादयसे सचा। कण्वासस्त्वा ब्रह्मभि स्स्तोमवाहस -इन्द्राऽऽयच्छन्त्या गहि।।

卐 यथा गौरो अपा कृत -न्तृष्य न्नेत्यवेरिणम्। आपित्वे नः प्रपित्वे तूयमा गहि- कण्वेषु सु सचा पिब।।

卐 मन्दन्तु त्वा मघव न्निन्द्रेन्दवो -राधोदेयाय सुन्वते। आमुष्या सोम मपिब श्चमू सुत-ज्येष्ठ न्तद्दधिषे सहः।।

卐 प्र चक्रे सहसा सहो -बभञ्ज मन्यु मोजसा। विश्वे त इन्द्र पृतनायवो- यहो ~नि वृक्षाइव येमिरे।।

❀05.07.31 卐सहस्रेणेव सचते यवीयुधा -यस्त आनळुपस्तुतिम्। पुत्रं प्रावर्गङ्कृणुते सुवीर्ये -दाश्नोति नमउक्तिभिः।।

卐 मा भेम मा श्रमिष्मो-ग्रस्य सख्ये तव। महत्ते वृष्णो अभिचक्ष्यङ्कृतं -पश्येम तुर्वशँ यदुम्।।

卐 सव्या मनु स्फिग्यँ वावसे वृषा- न दानो अस्य रोषति। मध्वा संपृक्ता स्सारघेण धेनव- स्तूय मेहि द्रवा पिब।।

卐 अश्वी रथी सुरूप इ-द्गोमा इदिन्द्र ते सखा। श्वात्रभाजा वयसा सचते सदा- चन्द्रो याति सभा मुप।।

卐 ऋश्यो न तृष्यन्नवपान मा गहि- पिबा सोमँ वशा अनु। निमेघमानो मघव न्दिवेदिव- ओजिष्ठ न्दधिषे सहः।।

❀05.07.32 卐अध्वर्यो~ द्रावया त्वं- सोम मिन्द्रः पिपासति। उप नूनँ युयुजे वृषणा हरी-~ आ च जगाम वृत्रहा।।

卐 स्वयञ्चित्स मन्यते दाशुरि जनो- यत्रा सोमस्य तृम्पसि। इद न्ते अन्नँ युज्यं समुक्षित -न्तस्येहि प्र द्रवा पिब।।

卐 रथे॰ष्ठायाध्वर्यव- स्सोम मिन्द्राय सोतन। अधि ब्रध्नस्याद्रयो वि चक्षते -सुन्वन्तो दाश्वध्वरम्।।

卐 उप ब्रध्नँ वावाता वृषणा हरी-~ इन्द्र मपसु वक्षतः। अर्वाञ्चन्त्वा सप्तयो ध्वरश्रियो -वहन्तु सवने दुप।।

卐 प्र पूषणँ वृणीमहे- युज्याय पुरूवसुम्। स शक्र शिक्ष पुरुहूत नो -धिया तुजे राये विमोचन।।

❀05.07.33 卐सन्न शिशीहि भुरिजोरिव क्षुरं- रास्व रायो^ विमोचन। त्वेतन्न स्सुवेद मुस्त्रियँ वसु-यन्त्वं हिनोषि मर्त्यम्।।

卐 वेमि त्वा पूषन्नृञ्जसे- वेमि स्तोतव आघृणे। न तस्य वेम्यरणं हि तद्वसो ~-स्तुषे पज्राय साम्ने।।

卐 परा गावो यवसङ्कच्चि दाघृणे- नित्यं रेक्णो अमर्त्य। अस्माकं पूषन्नविता शिवो भव- मंहिष्ठो वाजसातये।।

卐 स्थूरं राध श्शताश्व-ङ्कुरुङ्गस्य दिविष्टिषु। राज्ञस्त्वेषस्य सुभगस्य रातिषु- तुर्वशेष्वमन्महि।।

卐 धीभि स्सातानि काण्वस्य वाजिनः- प्रियमेधै रभिद्युभिः। षष्टिं सहस्राऽनु निर्मजामजे- निर्यूथानि गवा मृषिः।।

卐 वृक्षा श्चिन्मे -अभिपित्वे अराराणुः। गां भजन्त मेहना-ऽश्वं भजन्त मेहना।।

卐 ।। इति सप्तमाध्याय स्समाप्तः।।

## पञ्चमाष्टके अष्टमाध्यायः (वर्गाः 1-36)

8.05 दूरादिहेवेत्येकोनचत्वारिंशदृचस्य सूक्तस्य, काण्वो ब्रह्मातिथि- रश्विनौ-यथा चिच्चैद्यः कशुरित्यादि सार्धद्वयोः कशुर्गायत्री-अन्त्यास्तिस्रः क्रमेण बृहत्या-वनुष्टुप्च।।

❀05.08.01 卐दूरा दिहेव यत्स-त्यरुणप्सु रशिश्वितत्। वि भानुं विश्वधाऽतनत्।।

卐 नृवद्दस्रा मनोयुजा -रथेन पृथुपाजसा। सचेथे~ अश्विनोषसम्।।

卐 युवाभ्याँ वाजिनीवसू~- प्रति स्तोमा^ अदृक्षत। वाच न्दूतो यथोहिषे।।

卐 पुरुप्रिया ण^ ऊतये- पुरुमन्द्रा पुरूवसू~। स्तुषे कण्वासो अश्विना।।

卐 मंहिष्ठा वाजसात -मेषयन्ता शुभ स्पती~। गन्तारा दाशुषो गृहम्।।

❀05.08.02 卐ता सुदेवाय दाशुषे- सुमेधा मवितारिणीम्। घृतै र्गव्यूति मुक्षतम्।।

卐 आ न स्स्तोम मुप द्रव -त्तूयं श्येनेभि राशुभिः। यात मश्वेभि रश्विना।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysuru

卐 येभि स्तिस्रः परावतो- दिवो विश्वानि रोचना। त्रीँ रक्तू न्परिदीयथः।।

卐 उत नो गोमती रिषˆ -उत साती रहर्विदा। वि पथ स्सातये सितम्।।

卐 आ नो गोमन्त मश्विना- सुवीरं सुरथं रयिम्। वोऽह मश्वावती रिषः।।

❀05.08.03 卐वावृधाना शुभस्पती~ दस्रा हिरण्यवर्तनी~। पिबतं सोम्यं मधु।।

卐 अस्मभ्यँ वाजिनीवसू~- मघवद्भ्यश्च सप्रथः। छर्दि र्यन्त मदाभ्यम्।।

卐 नि षु ब्रह्म जनानाँ -याविष्ट न्तूयमा गतम्। मो~ ष्व1(अ)न्याँ उपारतम्।।

卐 अस्य पिबत मश्विना -युवं मदस्य चारुणः। मध्वो रातस्य धिष्ण्या।।

卐 अस्मे आ वहतं रयिं -शतवन्तं सहस्रिणम्। पुरुक्षुं विश्वधायसम्।।

❀05.08.04 卐पुरुत्रा चिद्धि वान्नरा -विह्वयन्ते मनीषिणः। वाघद्भि रश्विना ऽगतम्।।

卐 जनासो वृक्तबर्हिषो -हविष्मन्तो अरङ्कृतः। युवां हवन्ते अश्विना।।

卐 अस्माक मद्य वामयं -स्तोमो वाहिष्ठो अन्तमः। युवाभ्यां भूत्वश्विना।।

卐 यो ह वां मधुनो दृति- राहितो रथचर्षणे। ततः पिबत मश्विना।।

卐 तेन नो वाजिनीवसू ~-पश्वे तोकाय शङ्गवे। वहतं पीवरी रिषः।।

❀05.08.05 卐उत नो दिव्याˆ इषˆ -उत सिन्धूँ रहर्विदा। अप द्वारेव वर्षथः।।

卐 कदा वा न्तौग्र्यो विध- त्समुद्रे जहितो नरा। यद्वां रथो विभिष्पतात्।।

卐 युवङ्कण्वाय नासत्या-ऽपिरिप्ताय हर्म्ये। शश्व दूती र्दशस्यथः।।

卐 ताभि रायात मूतिभि -र्नव्यसीभि स्सुशस्तिभिः। यद्वाँ वृषण्वसू~ हुवे।।

卐 यथा चित्कण्व मावतं- प्रियमेध मुपस्तुतम्। अत्रिं शिञ्जार मश्विना।।

❀05.08.0 卐यथोत कृत्व्ये धने-ऽंशु.ङ्गोष्वगस्त्यम्। यथा वाजेषु सोभरिम्।।

卐 एतावद्वाँ वृषण्वसू~- अतो वा भूयो अश्विना। गृणन्त स्सुम्न मीमहे।।

卐 रथं हिरण्यवन्धुरं- हिरण्याभीशु.मश्विना। आ हि स्थाथो दिविस्पृशम्।।

卐 हिरण्ययी वां रभि -रीषा अक्षो हिरण्ययः। उभा चक्रा हिरण्यया।।

卐 तेन नो वाजिनीवसू~- परावतश्चि दागतम्। उपेमां सुष्टुतिं मम।।

❀05.08.0 卐आ वहेथे~ पराका- त्पूर्वी रश्नन्ता वश्विना। इषो दासी रमर्त्या।।

卐 आ नो द्युम्नै रा श्रवोभि -रा राया यात मश्विना। पुरुश्चन्द्रा नासत्या।।

卐 एह वां प्रुषितप्सवो -वयो वहन्तु पर्णिनः। अच्छा स्वध्वरञ्जनम्।।

卐 रथँ वा मनुगायसँ -य^ इषा वर्तते सह। न चक्र मभि बाधते।।

卐 हिरण्ययेन रथेन -द्रवत्पाणिभि रश्वैः। धीजवना नासत्या।।

❀05.08.08 卐युवं मृगञ्जागृवांसं- स्वदथो वा वृषण्वसू~। ता नः पृङ्क्त मिषा रयिम्।।

卐 ता मे अश्विना सनीनाँ -विद्यातन्नवानाम्। यथा चिच्चैद्यः कशु- श्शत मुष्ट्राना न्दद- त्सहस्रा दश गोनाम्।।

卐 यो मे हिरण्यसन्दशो- दश राज्ञो अमंहत। अधस्पदा^ इच्चैद्यस्य कृष्टय- श्चर्मम्ना^ अभितो जनाः।।

卐 माकि रेना पथा गा -द्येनेमे यन्ति चेदयः। अन्यो नेत्सूरि रोहते -भूरिदावत्तरो जनः।।

☃ 8.06 महाँ इन्द्र इत्यष्टाचत्वारिंशदृचस्य सूक्तस्य, काण्वो वत्स इन्द्रोऽन्त्य तिसृणां तिरिन्दिरो- गायत्री- (पार्शव्यस्य दानस्तुतिः)

❀05.08.09 卐महा इन्द्रो य^ ओजसा- पर्जन्यो वृष्टिमा इव। स्तोमै र्वत्सस्य वावृधे।।

卐 प्रजा मृतस्य पिप्रतः- प्र यद्भरन्त वह्नयः। विप्रा^ ऋतस्य वाहसा।।

卐 कण्वा^ इन्द्रँ यदक्रत –स्तोमै र्यज्ञस्य साधनम्। जामि ब्रुवत आयुधम्।।

卐 समस्य मन्यवे विशो- विश्वा^ नमन्त कृष्टयः। समुद्रायेव सिन्धवः।।

卐 ओज स्तदस्य तित्विष- उभे~ यत्समवर्तयत्। इन्द्र श्चर्मेव रोदसी।।

❀05.08.10 卐वि चिद्वृत्रस्य दोधतो- वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना।।

卐 इमा^ अभि प्र णोनुमो -विपा मग्रेषु धीतयः। अग्ने श्शोचि र्न दिद्युतः।।

卐 गुहा सती रुप त्मना -प्र यच्छोचन्त धीतयः। कण्वा^ ऋतस्य धारया।।

卐 प्र तमिन्द्र नशीमहि -रयिङ्गोमन्त मश्विनम्। प्र ब्रह्म पूर्वचित्तये।।

卐 अह मिद्धि पितु ष्परि- मेधा मृतस्य जग्रभ। अहं सूर्यइवाजनि।।

❀05.08.11 卐अहं प्रत्नेन मन्मना- गिर श्शुम्भामि कण्ववत्। येनेन्द्र श्शुष्ममि द्दधे।।

卐 ये त्वामिन्द्र न तुष्टुवु -ऋषयो ये च तुष्टुवुः। ममे द्वर्धस्व सुष्टुतः।।

卐 यदस्य मन्यु रध्वनी- द्वि वृत्रं पर्वशो रुजन्न्। अप स्समुद्र मैरयत्।।

卐 नि शुष्ण इन्द्र धर्णसिँ -वज्रञ्जघन्थ दस्यवि। वृषा ह्युग्र शृण्विषे।।

卐 न द्याव^ इन्द्र मोजसा- नान्तरिक्षाणि वज्रिणम्। न विव्यचन्त भूमयः।।

❀05.08.12 卐य^ स्त इन्द्र मही रप- स्स्तभूयमान आशयत्। नि तं पद्यासु शिश्नथः।।

卐 य^ इमे~ रोदसी मही~ समीची~ समजग्रभीत्। तमोभि रिन्द्र तङ्गुहः।।

卐 य इन्द्र यतय स्त्वा- भृगवो ये च तुष्टुवुः। ममे दुग्र श्रुधी हवम्।।

卐 इमा^ स्त इन्द्र पृश्नयो- घृत न्दुहत आशिरम्। एना मृतस्य पिप्युषीः।।

卐 या^ इन्द्र प्रस्वस्त्वाऽ-सा गर्भ मचक्रिरन्न्। परि धर्मेव सूर्यम्।।

❀05.08.13 卐त्वा मिच्छवसस्पते -कण्वा^ उक्थेन वावृधुः। त्वां सुतास इन्दवः।।

卐 तवे दिन्द्र प्रणीतिषूत- प्रशस्ति रद्रिवः। यज्ञो वितन्तसाय्यः।।

卐 आ न^ इन्द्र मही मिषं- पुरन्न दर्षि गोमतीम्। उत प्रजां सुवीर्यम्।।

卐 उत त्यदाश्वश्व्यँ- यदिन्द्र नाहुषीष्वा। अग्रे विक्षु प्रदीदयत्।।

卐 अभि व्रजन्न तत्निषे- सूर उपाकचक्षसम्। यदिन्द्र मृळयासि नः।।

❀05.08.14 卐यदङ्ग तविषीयस -इन्द्र प्रराजसि क्षितीः। महा॰ अपार ओजसा।।

卐 तन्त्वा हविष्मती विंश-^ उप ब्रुवत ऊतये। उरुज्रयस .मिन्दुभिः।।

卐 उपह्वरे गिरीणां -सङ्गथे च नदीनाम्। धिया विप्रो अजायत।।

卐 अत स्समुद्र मुद्वत- श्चिकित्वा॰ अव पश्यति। यतो विपान एजति।।

卐 आदि त्प्रत्नस्य रेतसो- ज्योति ꣳष्पश्यन्ति वासरम्। परो यदिध्यते दिवा।।

❀05.08.15 卐कण्वास^ इन्द्र ते मतिँ- विश्वे वर्धन्ति पौंस्यम्। उतो~ शविष्ठ वृष्ण्यम्।।

卐 इमां म इन्द्र सुꣳष्टुति-ञ्जुषस्व प्र सु मामव। उत प्र वर्धया मतिम्।।

卐 उत ब्रह्मण्या वय -न्तुभ्यं प्रवृद्ध वज्रिवः। विप्रा^ अतक्ष्म जीवसे।।

卐 अभि कण्वा^ अनूषता-ऽपो न प्रवता यतीः। इन्द्रँ वनन्वती मतिः।।

卐 इन्द्र मुक्थानि वावृधु -स्समुद्रमिव सिन्धवः। अनुत्तमन्यु मजरम्।।

❀05.08.16 卐आ नो याहि परावतो- हरिभ्यां हर्यताभ्याम्। इम मिन्द्र सुतं पिब।।

卐 त्वामि द्वृत्रहन्तम -जनासो वृक्तबर्हिषः। हवन्ते वाजसातये।।

卐 अनु त्वा रोदसी उभे~- चक्रन्न वर्त्येतशम्। अनु सुवानास इन्दवः।।
卐 मन्दस्वा सु स्वर्णर -उतेन्द्र शर्यणावति। मत्स्वा विवस्वतो मती।।
卐 वावृधान^ उप द्यवि- वृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः।।
❀05.08.17 卐ऋषिर्हि पूर्वजा^ अस्ये-क ईशान^ ओजसा। इन्द्र चोष्कूयसे वसु।।
卐 अस्माकन्त्वा सुता^ उप- वीतपृष्ठा^ अभि प्रयः। शतँ वहन्तु हरयः।।
卐 इमां सु पूर्व्या न्धियं -मधो र्घृतस्य पिप्युषीम्। कण्वा^ उक्थेन वावृधुः।।
卐 इन्द्रमि द्विमहीनां- मेधे वृणीत मर्त्यः। इन्द्रं सनिष्यु रूतये।।
卐 अर्वाञ्चन्त्वा पुरुष्टुत- प्रियमेधस्तुता हरी~। सोमपेयाय वक्षतः।।
卐 शत मह न्तिरिन्दिरे -सहस्रं पर्शावा ददे। राधांसि याद्वानाम्।।
卐 त्रीणि शता न्यर्वतां -सहस्रा दश गोनाम्। ददु ष्पज्राय साम्ने।।
卐 उदान ट्ककुहो दिव .-मुष्ट्राञ्चतुर्युजो ददत्। श्रवसा याद्वञ्जनम्।।
8.07 प्र यद्व इति षट्त्रिंशदृचस्य सूक्तस्य, काण्वः पुनर्वत्सो- मरुतो- गायत्री।।
❀05.08.18 卐प्र यद्व स्त्रिष्टुभ मिषं- मरुतो विप्रो अक्षरत्। वि पर्वतेषु राजथ।।
卐 यदङ्ग तविषीयवो -यामं शुभ्रा^ अचिध्वम्। नि पर्वता^ अहासत।।
卐 उदीरयन्त वायुभि- र्वाश्रास पृश्निमातरः। धुक्षन्त पिप्युषी मिषम्।।
卐 वपन्ति मरुतो मिहं- प्र वेपयन्ति पर्वतान्। यद्यामँ यान्ति वायुभिः।।
卐 नि यद्यामाय वो- गिरि र्निसिन्धवो विधर्मणे। महे शुष्माय येमिरे।।
❀05.08.19 卐युष्मा^ उ नक्त मूतये- युष्मा न्दिवा हवामहे। युष्मा न्प्रय त्यध्वरे।।
卐 उदु त्ये अरुणप्सव- श्चित्रा^ यामेभि रीरते। वाश्रा^ अधि ष्णुना दिवः।।
卐 सृजन्ति रश्मि मोजसा -पन्थां सूर्याय यातवे। ते भानुभि र्वि तस्थिरे।।
卐 इमां मे मरुतो गिर.- मिमं स्तोम मृभुक्षणः। इमं मे वनता हवम्।।
卐 त्रीणि सरांसि पृश्नयो -दुदुह्रे वज्रिणे मधु। उत्सङ्कवन्ध मुद्रिणम्।।
❀05.08.20 卐मरुतो यद्ध वो दिव -स्सुम्नायन्तो हवामहे। आ तू न उप गन्तन।।
卐 यूयं हि ष्ठा सुदानवो- रुद्रा^ ऋभुक्षणो दमे। उत प्रचेतसो मदे।।

卐 आ नो॑ र॒यिं म॑द॒च्युतं॑ -पुरु॒क्षुं॑ वि॒श्वधा॑यसम्। इय॑र्ता मरुतो दि॒वः।।
卐 अधी॑व॒ यद्गि॒रीणाँ॑ -यामं॑ शु॒भ्रा॒ अचि॑ध्वम्। सु॒वानै॒ र्मन्दध्व॒ इन्दु॑भिः।।
卐 ए॒ताव॑त श्चिदे॒षां -सु॒म्नं भि॑क्षेत॒ मर्त्यः॑। अदा॑भ्यस्य॒ मन्म॑भिः।।
❀05.08.21 卐ये द्र॒प्साइ॑व॒ रोद॑सी धम॒ न्त्यनु॑ वृ॒ष्टिभिः॑। उत्स॑ न्दु॒हन्तो॒ अक्षि॑तम्।।
卐 उदु॑ स्वा॒नेभि॑ रीरत॒ उद्र॒थै रु॒दु॑ वा॒युभिः॑। उत्स्तोमैः॑ पृश्नि॑मातरः।।
卐 येना॒ऽव तु॒र्वशं॒ यदुं॑ -येन॒ कण्वं॑ न्धन॒स्पृत॑म्। रा॒ये सु तस्य॑ धीमहि।।
卐 इ॒मा उ॑ व स्सुदानवो- घृ॒तन्न पि॒प्युषी॒रिषः॑। वर्धा॑ न्का॒ण्वस्य॒ मन्म॑भिः।।
卐 क्व॑ नू॒नं सु॑दानवो -मद॑था वृक्तबर्हिषः। ब्र॒ह्मा को व॑ स्सपर्यति।।
❀05.08.22 卐न॒हि ष्म॒ यद्ध॑ वः पु॒रा -स्तोमे॑भि र्वृक्तबर्हिषः। शर्धा॑ ऋ॒तस्य॒ जिन्व॑थ।।
卐 समु॒त्ये म॑ह॒ती र॒प- स्सक्षो॒णी समु॒ सूर्य॑म्। सँ वज्रं॒ पर्व॒शो द॑धुः।।
卐 वि वृ॒त्रं प॑र्व॒शो य॑यु॒- र्वि पर्व॑ताँ अराजि॒नः। चक्रा॒णा॒ वृष्णि॒ पौंस्य॑म्।।
卐 अनु॑ त्रि॒तस्य॒ युध्य॑त- श्शुष्म॑ माव॒न्नुत क्रतु॑म्। अन्विन्द्रं॑ वृत्र॒तूर्ये॑।।
卐 वि॒द्युद्ध॑स्ता अ॒भिद्य॑व- श्शि॒प्राः शी॒र्षन् हि॑र॒ण्ययीः॑। शु॒भ्रा व्य॑ञ्जत श्रि॒ये।।
❀05.08.23 卐उ॒शना॒ यत्प॑रा॒वत॑ उ॒क्ष्णो रन्ध्र॒ मया॑तन। द्यौर्न च॑क्रद द्भि॒या।।
卐 आ नो॑ म॒खस्य॑ दा॒वने॒ऽश्वै र्हिर॑ण्यपाणिभिः। देवा॑स॒ उप॑ गन्तन।।
卐 यदे॑षां॒ पृष॑ती॒ रथे॒- प्रष्टि॒ र्वह॑ति॒ रोहि॑तः। यान्ति॑ शु॒भ्रा रि॒णन्न॒पः।।
卐 सु॒षोमे॑ श॒र्यणा॑व॒ -त्यार्जी॑के प॒स्त्याव॑ति। य॒यु र्निच॑क्रया॒ नरः॑।।
卐 क॒दा ग॑च्छाथ मरुत॒ -इत्था विप्रं॒ हव॑मानम्। मा॒र्डीके॑भि॒ र्नाध॑मानम्।।
❀05.08.24 卐कद्ध॑ नू॒नं क॑धप्रियो॒- यदिन्द्र॒ मज॑हातन। को व॑ स्सखि॒त्व ओ॑हते।।
卐 स॒हो षु णो॒ वज्र॑हस्तैः॒- कण्वा॑सो अ॒ग्निं म॒रुद्भिः॑। स्तु॒षे हिर॑ण्यवाशीभिः।।
卐 ओ षु वृष्ण॒ः प्रय॑ज्यू॒ -नान॑व्यसे सुवि॒ताय॑। व॒वृ॒त्या श्चि॒त्रवा॑जान्।।
卐 गि॒रय॑ श्चि॒न्नि जि॑हते॒ -पर्शा॑नासो॒ मन्य॑मानाः। पर्व॑ता श्चि॒न्नि ये॑मिरे।।
卐 आ॒क्ष्ण॒या॒वानो वह॒ -न्त्यन्तरि॑क्षेण॒ पत॑तः। धा॒तार॑ स्स्तुव॒ते वयः॑।।
卐 अ॒ग्निर्हि जानि॑ पू॒र्व्य- श्छन्दो॒ न सूरो॑ अ॒र्चिषा॑। ते भा॒नुभि॒ र्वि त॑स्थिरे।।

8.08 आ नो विश्वाभिरिति त्रयोविंशत्यृचस्य सूक्तस्य, काण्व स्सध्वंसोऽश्विना-वनुष्टुप्।।

❀05.08.25 卐आ नो विश्वाभि रूतिभि -रश्विना गच्छतँ युवम्। दस्रा हिरण्यवर्तनी~ पिबतं सोम्यं मधु।।

卐 आ नूनँ यात मश्विना- रथेन सूर्यत्वचा। भुजी~ हिरण्यपेशसा कवी~ गम्भीरचेतसा।।

卐 आ यातन्नहुषस्पर्या-ऽऽन्तरिक्षा त्सुवृक्तिभिः। पिबाथो अश्विना मधु -कण्वानां सवने सुतम्।।

卐 आ नो यात न्दिवस्पर्या-ऽऽन्तरिक्षा दधप्रिया। पुत्रः कण्वस्य वामिह -सुषाव सोम्यं मधु।।

卐 आ नो यात मुपश्रुत्य ऽश्विना सोमपीतये। स्वाहा स्तोमस्य वर्धना- प्र कवी~ धीतिभि र्नरा।।

❀05.08.26 卐यच्चिद्धि वां पुर ऋषयो- जुहूरेऽवसे नरा। आ यात मश्विनाऽऽगत .-मुपेमां सुष्टुतिं मम।।

卐 दिवश्चि द्रोचना दध्या- ऽऽनो गन्तं स्वर्विदा। धीभि र्वत्सप्रचेतसा -स्तोमेभि र्हवनश्रुता।।

卐 किमन्ये पर्यासते-ऽस्म त्स्तोमेभि रश्विनौ। पुत्रः कण्वस्य वामृषि- र्गीर्भि र्वत्सो अवीवृधत्।।

卐 आ वाँ विप्र इहावसे-ऽह्व त्स्तोमेभि रश्विना। अरिप्रा वृत्रहन्तमा- ता नो भूतं मयोभुवा।।

卐 आ यद्वाँ योषणा रथ- मतिष्ठ द्वाजिनीवसू~। विश्वान्यश्विना युवं -प्र धीता न्यगच्छतम्।।

❀05.08.27 卐अत स्सहस्रनिर्णिजा- रथेनाऽऽ यात मश्विना। वत्सो वां मधुम द्वचो-ऽशंसी त्काव्यः कविः।।

卐 पुरुमन्द्रा पुरूवसू~ -मनोतरा रयीणाम्। स्तोमं मे अश्विना -विम मभि वह्नी~ अनूषाताम्।।

卐 आ नो विश्वा न्यश्विना- धत्तं राधांस्यह्रया। कृतन्न ऋत्वियावतो- मा नो रीरधत न्निदे।।

卐 यन्नासत्या परावति यद्वा स्थो .अध्यम्बरे। अत स्सहस्रनिर्णिजा- रथेना ऽऽयात मश्विना।।

卐 यो वा न्नासत्यावृषि- र्गीर्भि र्वत्सो अवीवृधत्। तस्मै सहस्रनिर्णिज- मिष न्धत्त.ङ्घृतश्चुतम्।।

❀05.08.28 卐प्रास्मा ऊर्जङ्घृतश्चुत- मश्विना यच्छतँ युवम्। यो वां सुम्नाय तुष्टव- द्वसूया द्दानुनस्पती~।।

卐 आ नो गन्तं रिशादसे -मं स्तोमं पुरुभुजा। कृतन्न स्सुश्रियो नरे-मा दात मभिष्टये।।

卐 आ वाँ विश्वाभि रूतिभिः- प्रियमेधा अहूषत। राजन्ता वध्वराणा -मश्विना यामहूतिषु।।

卐 आ नो गन्तं मयोभुवा-ऽश्विना शंभुवा युवम्। यो वाँ विपन्यू धीतिभि- र्गीर्भि र्वत्सो अवीवृधत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 याभिः॒ कण्वं॒ मेधा॑तिथिँ॒- याभि॒ र्वशं॒ न्दश॑व्रजम्। याभि॒ र्गोश॑र्य॒ माव॑त॒- न्ताभि॑र्नोऽवतन्नरा।।

❀05.08.29 卐याभि॑ र्नरा त्र॒सद॑स्यु॒ -माव॑तङ्कृ॒त्व्ये॑ धने॑। ताभि॒ ष्ष्व1(अ)स्मा॑ँ अ॒श्विना॒- प्राऽव॑तँ॒ वाज॑सातये।।

卐 प्र वां॒ स्तोमा॑ स्सुवृ॒क्तयो॒- गिरो॑ वर्धन्त्वश्विना। पुरु॑त्रा॒ वृत्र॑हन्तमा॒- ता नो॑ भू॒तं पुरु॒स्पृहा॑।।

卐 त्रीणि॑ प॒दा न्य॒श्विनो॑- रा॒वि स्सा॑न्ति॒ गुहा॑ प॒रः। क॒वी ऋ॒तस्य॒ पत्म॑भि -र्र्वा॒ ग्जी॒वेभ्य॒ स्परि॑।।

8.09 आ नून मित्येकविंशत्यृचस्य सूक्तस्य, काण्व श्शशकर्णोऽश्विना-वनुष्टुप्-आद्या चतुर्थी षष्ठी चतुर्दशी पञ्चदश्यो बृहत्यः-द्वितीया तृतीया विंश्येकविंश्यो गायत्र्यः-पञ्चमी ककुप्-दशमी त्रिष्टु-बेकादशी विराट्- द्वादशी जगती।।

❀05.08.30 卐आ नू॒न म॑श्विना यु॒वँ -व॒त्सस्य॑ ग॒न्त म॑वसे। प्रास्मै॑ यच्छत म॒वृकं॑ पृ॒थु -च्छ॒र्दि र्यु॑यु॒तँ या अरा॑तयः।।

卐 यद॒न्तरि॑क्षे॒ यद्दि॒वि- यत्पञ्च॒ मानु॑षा॒ँ अनु॑। नृ॒म्ण न्तद्ध॑त्त म॑श्विना।।

卐 ये वा॒ न्दंसां॑स्य॒श्विना- विप्रा॑सः परिमा॑मृ॒शुः। ए॒वे त्का॒ण्वस्य॑ बोधतम्।।

卐 अ॒यँ वा॑ङ्घ॒र्मो अ॑श्विना॒- स्तोमे॑न॒ परि॑ षिच्यते। अ॒यं सोमो॒ मधु॑मा न्वाजिनीवसू॒- येन॑ वृ॒त्रञ्चिके॑तथः।।

卐 यद॒प्सु यद्व॒नस्पतौ॒ -यदोष॑धीषु पुरुदंससा कृ॒तम्। तेन॑ माविष्ट मश्विना।।

❀05.08.31 卐यन्ना॑सत्या भुर॒ण्यथो॒- यद्वा॑ देव भि॒षज्यथः॑। अ॒यँ वाँ॑ व॒त्सो म॒तिभि॒र्न वि॑न्धते- ह॒विष्म॑न्तं॒ हि गच्छ॑थः।।

卐 आ नू॒न म॒श्विनो॒र् ऋषि॒- स्स्तोम॑ञ्चिकेत वा॒मया॑। आ सोमं॒ मधु॑मत्तम-ङ्घ॒र्मं सि॑ञ्चा॒ दथ॑र्वणि।।

卐 आ नू॒नं र॒घुव॑र्तनिं -रथ॑ न्तिष्ठाथो अश्विना। आ वां॒ स्तोमा॑ इ॒मे मम॒- नभो॒ न चु॑च्यवीरत।।

卐 यद॒द्य वा॑ न्नासत्यो॒-क्थै रा॑चुच्यु॒वीम॑हि। यद्वा॒ वाणी॑भि रश्विने॒-वेत्का॒ण्वस्य॑ बोधतम्।।

卐 यद्वा॑ङ्क॒क्षीवा॑ँ उ॒त यद्व्य॑श्व॒ -ऋषि॒र्य॑ द्वा न्दी॒र्घत॑मा जु॒हाव॑। पृथी॒ यद्वाँ॑ वै॒न्य स्साद॑नेष्वे॒-वेदतो॑ अश्विना चेतयेथाम्।।

❀05.08.32 卐या॒त.ञ्छ॒र्दि॒ष्पा उ॒त नः॑ पर॒स्पा- भू॒तञ्ज॑ग॒त्पा उ॒त न॑ स्त॒नूपा। व॒र्ति स्तो॒काय॒ तन॑याय यातम्।।

卐 यदिन्द्रेण सरथँ याथो अश्विना- यद्वा वायुना भवथ स्समोकसा। यदादित्येभिर् ऋभुभि स्सजोषसा- यद्वा विष्णो विक्रमणेषु तिष्ठथः।।

卐 यदद्याश्विना वहं -हुवेय वाजसातये। यत्पृत्सु तुर्वणे सह-स्तच्छ्रेष्ठ मश्विनो रवः।।

卐 आ नूनँ यात मश्विनेमा -हव्यानि वां हिता। इमे सोमासो अधि तुर्वशे- यदा विमे कण्वेषु वामथ।।

卐 यन्नासत्या पराके -अर्वाके अस्ति भेषजम्। तेन नूनँ विमदाय प्रचेतसा -छर्दि र्वत्साय यच्छतम्।।

❀05.08.33 卐अभुत्स्यु प्र देव्या -साकँ वाचाऽह मश्विनोः। व्याव र्देव्या मतिँ- वि रातिं मर्त्येभ्यः।।

卐 प्र बोधयोषो अश्विना- प्र देवि सूनृते महि। प्रयज्ञहोत रानुष -क्प्रमदाय श्रवो बृहत्।।

卐 यदुषो यासि भानुना- सं सूर्येण रोचसे। आ हाय मश्विनो रथो- वर्ति र्याति नृपाय्यम्।।

卐 यदापीतासो अंशवो- गावो न दुह्र ऊधभिः। यद्वा वाणी रनूषत- प्र देवयन्तो अश्विना।।

卐 प्र द्युम्नाय प्र शवसे- प्र नृषाह्याय शर्मणे। प्र दक्षाय प्रचेतसा।।

卐 यन्नून न्धीभि रश्विना- पितु र्योना निषीदथः। यद्वा सुम्नेभि रुक्थ्या।।

8.10 यत्स्थ इति षड्चस्य सूक्तस्य, काण्वः प्रगाथोऽश्विनौ- क्रमेण बृहती- मध्ये ज्योतिरनुष्टुबास्तारपङ्क्ति-र्बृहती- सतोबृहत्यः।।

❀05.08.34 卐यत्स्थो दीर्घप्रसद्मनि- यद्वाऽदो रोचने दिवः। यद्वा समुद्रे अध्याकृते -गृहेत आ यात मश्विना।।

卐 यद्वा यज्ञं मनवे संमिमिक्षथु- रेवे त्काण्वस्य बोधतम्। बृहस्पतिँ विश्वा न्देवा॰ अहं हुव- इन्द्राविष्णू~ अश्विना वाशुहेषसा।।

卐 त्या न्व1(अ)श्विना हुवे- सुदंससा गृभे कृता। ययो रस्ति प्रण स्सख्य -न्देवेष्वध्याप्यम्।।

卐 ययो रधि प्र यज्ञा^- असूरे सन्ति सूरयः। ता यज्ञस्याध्वरस्य प्रचेतसा -स्वधाभि र्या पिबत स्सोम्यं मधु।।

卐 यदद्याश्विना वपा-ग्यत्प्राक्स्थो वाजिनीवसू~। यद्द्रुह्य व्यनवि तुर्वशे यदौ- हुवे वामथ मा गतम्।।

卐 यदन्तरिक्षे पतथः पुरुभुजा- यद्वेमे~ रोदसी अनु। यद्वा स्वधाभि रधितिष्ठथो रथ- मत^ आ यात मश्विना।।

☬ 8.11 त्वमग्न इति दशर्चस्य सूक्तस्य, काण्वो वत्सोऽग्नि-र्गायत्री- प्रथमा प्रतिष्ठा द्वितीया वर्धमानाऽन्त्या त्रिष्टुप्।।

❀05.08.35 卐त्वमग्ने व्रतपा^ असि- देव^ आ मर्त्येष्वा। त्वँ यज्ञे ष्वीड्यः।।

卐 त्वमसि प्रशस्यो- विदथेषु सहन्त्य। अग्ने रथी रध्वराणाम्।।

卐 स त्वमस्म दप द्विषो- युयोधि जातवेदः। अदेवी रग्ने अरातीः।।

卐 अन्ति चित्सन्त मह -यज्ञं मर्तस्य रिपोः। नोप वेषि जातवेदः।।

卐 मर्ता^ अमर्त्यस्य ते -भूरि नाम मनामहे। विप्रासो जातवेदसः।।

❀05.08.36 卐विप्रँ विप्रासोऽवसे -देवं मर्तास ऊतये। अग्निङ्गीर्भि र्हवामहे।।

卐 आ ते वत्सो मनो यम -त्परमाच्चि त्सधस्थात्। अग्ने त्वाङ्कामया गिरा।।

卐 पुरुत्रा हि सदृङ्ङसि- विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे।।

卐 समत्स्वग्नि मवसे -वाजयन्तो हवामहे। वाजेषु चित्रराधसम्।।

卐 प्रत्नो हि क मीड्यो अध्वरेषु- सनाच्च होता नव्यश्च सत्सि। स्वाञ्चाग्ने तन्वं पिप्रयस्वा-स्मभ्यञ्च सौभग मायजस्व।।।। इत्यष्टमाध्याय स्समाप्तः।। ।। इति पञ्चमाष्टकं समाप्तम् ।।

## ❀षष्ठाष्टकम्

## षष्ठाष्टके प्रथमाध्यायः (वर्गाः 1-40)

☬ 8.12 य इन्द्रेति त्रयस्त्रिंशदृचस्य सूक्तस्य, काण्वः पर्वत- इन्द्र- उष्णिक्।।

❀06.01.01 卐य^ इन्द्र सोमपातमो- मद श्शविष्ठ चेतति। येना हंसि न्य1(अ)त्रिण न्तमीमहे।।

卐 येना दशग्व मध्रिगुँ- वेपयन्तं स्वर्णरम्। येना समुद्र माविथा तमीमहे।।

卐 येन सिन्धुं मही रपो- रथाँइव प्रचोदयः। पन्था मृतस्य यातवे तमीमहे।।

卐 इमं स्तोम मभिष्टये- घृतन्न पूत मद्रिवः। येना नु सद्य ओजसा ववक्षिथ।।

卐 इमञ्जुषस्व गिर्वण- स्समुद्रइव पिन्वते। इन्द्र विश्वाभि रूतिभि र्ववक्षिथ।।

❀06.01.02 卐यो नो देवः परावत- स्सखित्वनाय मामहे। दिवो न वृष्टिं प्रथय न्ववक्षिथ।।

卐 ववक्षु रस्य केतव^- उत वज्रो गभस्त्योः। यत्सूर्यो न रोदसी अवर्धयत्।।

卐 यदि प्रवृद्ध सत्पते- सहस्रं महिषाँ अघः। आदित्त इन्द्रियं महि प्र वावृधे।।

卐 इन्द्र स्सूर्यस्य रश्मिभि- र्न्यर्शसान मोषति। अग्नि र्वनेव सासहिः प्र वावृधे।।

卐 इयन्त ऋत्वियावती- धीति रेति नवीयसी। सपर्यन्ती पुरुप्रिया मिमीत इत्।।

❀06.01.03 卐गर्भो यज्ञस्य देवयुः- क्रतुं पुनीत आनुषक्। स्तोमै रिन्द्रस्य वावृधे मिमीत इत्।।

卐 सनि र्मित्रस्य पप्रथ -इन्द्र स्सोमस्य पीतये। प्राची वाशीव सुन्वते मिमीत इत्।।

卐 यँ विप्रा^ उक्थवाहसो-ऽभिप्रमन्दु रायवः। घृतन्न पिप्य आस न्यृतस्य यत्।।

卐 उत स्वराजे अदिति- स्स्तोम मिन्द्राय जीजनत्। पुरुप्रशस्त मूतय ऋतस्य यत्।।

卐 अभि वह्नय^ ऊतये-ऽनूषत प्रशस्तये। न देव विव्रता हरी~ ऋतस्य यत्।।

❀06.01.04 卐यत्सोम मिन्द्र विष्णवि- यद्वा घ त्रित आप्त्ये। यद्वा मरुत्सु मन्दसे समिन्दुभिः।।

卐 यद्वा शक्र परावति- समुद्रे अधि मन्दसे। अस्माक मित्सुते रणा समिन्दुभिः।।

卐 यद्वाऽसि सुन्वतो वृधो- यजमानस्य सत्पते। उक्थे वा यस्य रण्यसि समिन्दुभिः।।

卐 देवन्देवँ वोऽवस- इन्द्रमिन्द्र.ङ्गृणीषणि। अधा यज्ञाय तुर्वणे व्यानशुः।।

卐 यज्ञेभि र्यज्ञवाहसं- सोमेभि स्सोमपातमम्। होत्राभि रिन्द्रँ वावृधु र्व्यानशुः।।

❀06.01.05 卐मही रस्य प्रणीतयः- पूर्वी रुत प्रशस्तयः। विश्वा वसूनि दाशुषे व्यानशुः।।

卐 इन्द्रँ वृत्राय हन्तवे- देवासो दधिरे पुरः। इन्द्रँ वाणी रनूषता समोजसे।।

卐 महान्तं महिना वयं- स्तोमेभि र्हवनश्रुतम्। अर्कै रभि प्र णोनुम स्समोजसे।।

卐 न यँ विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम्। अमा दिदस्य तित्विषे समोजसः।।

卐 यदिन्द्र पृतनाज्ये- देवास्त्वा दधिरे पुरः। आदित्ते हर्यता हरी~ ववक्षतुः।।

❀06.01.06 卐यदा वृत्रन्नदीवृतं- शवसा वज्रिन्नवधीः। आदित्ते हर्यता हरी ~ववक्षतुः।।

卐 यदा ते विष्णु रोजसा- त्रीणि पदा विचक्रमे। आदित्ते हर्यता हरी~ ववक्षतुः।।

卐 यदा ते हर्यता हरी~- वावृधाते दिवेदिवे। आदित्ते विश्वा भुवनानि येमिरे।।

卐 यदा ते मारुती र्विश- स्तुभ्य मिन्द्र नियेमिरे। आदित्ते विश्वा भुवनानि येमिरे।।

卐 यदा सूर्य ममु न्दिवि- शुक्रञ्ज्योति रधारयः। आदित्ते विश्वा भुवनानि येमिरे।।

卐 इमान्त इन्द्र सुꣳष्टुतिं- विप्र^ इयर्ति धीतिभिः। जामिं पदेव पिप्रतीं प्राध्वरे।।

卐 यदस्य धामनि प्रिये- समीचीनासो अस्वरन्न्। नाभा यज्ञस्य दोहना प्राध्वरे।।

卐 सुवीर्यं स्वश्व्यं सुगव्य- मिन्द्र दद्धि नः। होतेव पूर्वचित्तये प्राध्वरे।।

8.13 इन्द्र स्सुतेष्विति त्रयस्त्रिंशदृचस्य सूक्तस्य, काण्वो नारद- इन्द्र- उष्णिक्।।

❀06.01.07 卐इन्द्र स्सुतेषु सोमेषु- क्रतुं पुनीत उक्थ्यम्। विदे वृधस्य दक्षसो महान्हिषः।।

卐 स प्रथमे व्योमनि- देवानां सदने वृधः। सुपार स्सुश्रवस्तम स्समप्सुजित्।।

卐 तमह्वे वाजसातय -इन्द्रं भराय शुष्मिणम्। भवा न स्सुम्ने अन्तम स्सखा वृधे।।

卐 इयन्त इन्द्र गिर्वणो- रातिः≈क्षरति सुन्वतः। मन्दानो अस्य बर्हिषो वि राजसि।।

卐 नून न्तदिन्द्र दद्धि नो- यत्त्वा सुन्वन्त^ ईमहे। रयिन्न श्चित्रमा भरा स्वर्विदम्।।

❀06.01.08 卐स्तोता यत्ते विचर्षणि- रतिप्रशर्धय द्गिरः। वयाइवानु रोहते जुषन्त यत्।।

卐 प्रत्नव ज्जनया गिर- श्शृणुधी जरितु र्हवम्। मदेमदे ववक्षिथा सुकृत्वने।।

卐 क्रीळन्त्यस्य सूनृता^ -आपो न प्रवता यतीः। अया धिया य^ उच्यते पति र्दिवः।।

卐 उतो~ पति र्य^ उच्यते -कृष्टीना मेक^ इद्वशी। नमोवृधै रवस्युभि स्सुते रण।।

卐 स्तुहि श्रुतँ विपश्चितं- हरी~ यस्य प्रसक्षिणा। गन्तारा दाशुषो गृहन्नमस्विनः।।

❀06.01.09 卐तूतुजानो महेमते-ऽश्वेभिः प्रुषितप्सुभिः। आ याहि यज्ञ माशुभि श्शमिद्धि ते।।

卐 इन्द्र शविष्ठ सत्पते -रयिङ्गृणत्सु धारय। श्रव स्सूरिभ्यो अमृतँ वसुत्वनम्।।

卐 हवे त्वा सूर उदिते- हवे मध्यन्दिने दिवः। जुषाण^ इन्द्र सप्तिभिर्न आ गहि।।

卐 आ तू गहि प्र तु द्रव- मत्स्वा सुतस्य गोमतः। तन्तु न्तनुष्व पूर्व्यँ यथा विदे।।

卐 यच्छक्रासि परावति- यदर्वावति वृत्रहन्न्। यद्वा समुद्रे अन्धसो वितेदसि।।

❀06.01.10 卐इन्द्रँ वर्धन्तु नो गिर^- इन्द्रं सुतास^ इन्दवः। इन्द्रे हविष्मती र्विशो अराणिषुः।।

卐 तमि द्विप्रा^ अवस्यवः- प्रवत्वतीभि रूतिभिः। इन्द्रङ्क्षोणी रवर्धय न्वयाइव।।

卐 त्रिकद्रुकेषु चेतन- न्देवासो यज्ञ मत्नत। तमि द्वर्धन्तु नो गिर स्सदावृधम्।।

卐 स्तोता यत्ते अनुव्रत^- उक्था न्यृतुथा दधे। शुचिः पावक^ उच्यते सो अद्भुतः।।

卐 तदि द्रुद्रस्य चेतति- यह्वं प्रत्नेषु धामसु। मनो यत्रा वि तद्दधु र्विचेतसः।।

❀06.01.11 卐यदि मे सख्य मावर^- इमस्य पाह्यन्धसः। येन विश्वा^ अति द्विषो अतारिम।।

卐 कदा त इन्द्र गिर्वण- स्स्तोता भवाति शन्तमः। कदा नो गव्ये अश्व्ये वसौ दधः।।

Sri Ganapati Sachchidananda Avadhoota Peetham Mysore

卐 उत ते सु¤ष्टुता हरी~- वृषणा वहतो रथम्। अजुर्यस्य मदिन्तमँ यमीमहे।।

卐 तमीमहे पुरुष्टुतँ -यह्वं प्रत्नाभि रूतिभिः। नि बर्हिषि प्रिये सद दध द्विता।।

卐 वर्धस्वा सु पुरुष्टुत- ऋषि¤ष्टुताभि रूतिभिः। धुक्षस्व पिप्युषी मिष मवा च नः।।

❀06.01.12 卐इन्द्र त्वमवितेदसी-त्था स्तुवतो अद्रिवः। ऋता दियर्मि ते धियं मनोयुजम्।।

卐 इह त्या सधमाद्या-युजान स्सोमपीतये। हरी~ इन्द्र प्रतद्वसू~ अभि स्वर।।

卐 अभि स्वरन्तु ये तव- रुद्रास स्सक्षत श्रियम्। उतो~ मरुत्वती र्विशो अभि प्रयः।।

卐 इमा^ अस्य प्रतूर्तयꣳ- पदञ्जुषन्त यद्दिवि। नाभा यज्ञस्य सन्दधु र्यथा विदे।।

卐 अय न्दीर्घाय चक्षसे- प्राचि प्रयत्यध्वरे। मिमीते यज्ञ मानुष ग्विचक्ष्य।।

❀06.01.13 卐वृषाय मिन्द्र ते रथ- उतो~ ते वृषणा हरी~। वृषा त्वं शतक्रतो~ वृषा हवः।।

卐 वृषा ग्रावा वृषा मदो- वृषा सोमो अयं सुतः। वृषा यज्ञो यमिन्वसि वृषा हवः।।

卐 वृषा त्वा वृषणं हुवे- वज्रि न्चित्राभि रूतिभिः। वावन्थ हि प्रतिष्टुतिँ वृषा हवः।।

8.14 यदिन्द्राहमिति पञ्चदशर्चस्य सूक्तस्य, काण्वायनौ गोषूक्त्यश्व सूक्तिना-विन्द्रो- गायत्री।।

❀06.01.14 卐यदिन्द्राहँ यथा त्व-मीशीय वस्व^ एक^ इत्। स्तोता मे गोषखा स्यात्।।

卐 शिक्षेय मस्मै दित्सेयं -शचीपते मनीषिणे। यदहङ्गोपति स्स्याम्।।

卐 धेनुष्ट इन्द्र सूनृता- यजमानाय सुन्वते। गामश्वं पिप्युषी दुहे।।

卐 न ते वर्तास्ति राधस^- इन्द्र देवो न मर्त्यः। यद्दित्ससि स्तुतो मघम्।।

卐 य^ इन्द्र मवर्धय -द्यद्भूमिँ व्यवर्तयत्। चक्राण^ ओपश न्दिवि।।

❀06.01.15 卐वावृधानस्य ते वयँ- विश्वा धनानि जिग्युषः। ऊति मिन्द्रा ऽऽवृणीमहे।।

卐 व्य1(अ)न्तरिक्ष मतिर- न्मदे सोमस्य रोचना। इन्द्रो यदभिन द्वलम्।।

卐 उद्गा^ आज दङ्गिरोभ्य^- आवि¤ष्कृण्व न्गुहा सतीः। अर्वाञ्च न्नुनुदे वलम्।।

卐 इन्द्रेण रोचना दिवो -दृळ्हानि दृंहितानि च। स्थिराणि न पराणुदे।।

卐 अपा मूर्मि र्मदन्निव- स्तोम^ इन्द्राजिरायते। वि ते मदा^ अराजिषुः।।

❀06.01.16 卐त्वं हि स्तोमवर्धन- इन्द्रास्युक्थवर्धनः। स्तोतृणा मुत भद्रकृत्।।

卐 इन्द्र मित्केशिना हरी-~ सोमपेयाय वक्षतः। उप यज्ञं सुराधसम्।।

卐 अपां फेनेन नमुचे- शिरर॒ इन्द्रोदवर्तयः। विश्वा॒ यदजय स्स्पृधः।।

卐 मायाभि रुत्सिसृप्सत॒- इन्द्र द्या मारुरुक्षतः। अव दस्यूꣳ रधूनुथाः।।

卐 असुन्वा मिन्द्र संसदँ- विषूचीँ व्यनाशयः। सोमपा॒ उत्तरो भवन्न्।।

8.15 तम्वभीति त्रयोदशर्चस्य सूक्तस्य, काण्वायनौ गोषूक्त्यश्व सूक्तिना-विन्द्र- उष्णिक्।।

06.01.17 卐तम्वभि प्र गायत- पुरुहूतं पुरुष्टुतम्। इन्द्रङ्गीर्भि स्तविष मा विवासत।।

卐 यस्य द्विबर्हसो बृह- त्सहो दाधार रोदसी। गिरीꣳ रज्राꣳ अप स्स्वर्वृषत्वना।।

卐 स राजसि पुरुष्टुतँ-ꣳ एको वृत्राणि जिघ्नसे। इन्द्र जैत्रा श्रवस्या च यन्तवे।।

卐 तन्ते मदङ्गृणीमसि- वृषणं पृत्सु सासहिम्। उ लोककृत्नु मद्रिवो हरिश्रियम्।।

卐 येन ज्योतींष्यायवे- मनवे च विवेदिथ। मन्दानो अस्य बर्हिषो वि राजसि।।

06.01.18 卐तदद्या चित्त उक्थिनो-ऽनुष्टुवन्ति पूर्वथा। वृषपत्नी रपो जया दिवेदिवे।।

卐 तव त्यदिन्द्रियं बृह- त्तव शुष्म मुत क्रतुम्। वज्रं शिशाति धिषणा वरेण्यम्।।

卐 तव द्यौरिन्द्र पौंस्यं- पृथिवी वर्धति श्रवः। त्वामापः पर्वतासश्च हिन्विरे।।

卐 त्वाँ विष्णु बृहन्क्षयो- मित्रो गृणाति वरुणः। त्वां शर्धो मद त्यनु मारुतम्।।

卐 त्वँ वृषा जनानां- मंहिष्ठ॒ इन्द्र जज्ञिषे। सत्रा विश्वा स्वपत्यानि दधिषे।।

06.01.19 卐सत्रा त्वं पुरुष्टुतँ-ꣳ एको वृत्राणि तोशसे। नान्य॒ इन्द्रा त्करणं भूय॒ इन्वति।।

卐 यदिन्द्र मन्मशस्त्वा- नाना हवन्त ऊतये। अस्माकेभि र्नृभि रत्रा स्वर्जय।।

卐 अरङ्क्षयाय नो महे- विश्वा रूपाण्याविशन्न्। इन्द्रञ्जैत्राय हर्षया शचीपतिम्।।

8.16 प्र सम्राजमिति द्वादशर्चस्य सूक्तस्य, काण्व इरिम्बिठि-रिन्द्रो- गायत्री।।

06.01.20 卐प्र सम्राजञ्चर्षणीना- मिन्द्रं स्तोता नव्यङ्गीर्भिः। नर न्नृषाहं मंहिष्ठम्।।

卐 यस्मि न्नुक्थानि रण्यन्ति- विश्वानि च श्रवस्या। अपा मवो न समुद्रे।।

卐 तं सुष्टुत्याऽविवासे- ज्येष्ठराजं भरे कृत्नुम्। महो वाजिनं सनिभ्यः।।

卐 यस्यानूना गभीरा॒- मदा॒ उरव॒ स्तरुत्राः। हर्षुमन्त श्शूरसातौ।।

卐 तमि द्धनेषु हितेष्व्-ऽधिवाकाय हवन्ते। येषा मिन्द्र स्ते जयन्ति।।

卐 तमि च्च्यौत्नै रार्यन्ति- तङ्कृतेभिश्चर्षणयः। एष॒ इन्द्रो वरिवस्कृत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀06.01.21 卐इन्द्रो ब्रह्मेन्द्र^ ऋषि- रिन्द्रः॰ पुरू पुरुहूतः। महा न्महीभि श्शचीभिः।।
卐 स स्स्तोम्य स्स हव्य- स्सत्यस्सत्वा तुविकूर्मिः। एकश्चित्सन्नभिभूतिः।।
卐 तमर्केभि स्तं सामभि- स्तङ्गायत्रै श्चर्षणयः। इन्द्रँ वर्धन्ति क्षितयः।।
卐 प्रणेतारँ वस्यो अच्छा -कर्तारञ्ज्योति स्समत्सु। सासह्वांसँ युधाऽमित्रान्।।
卐 स नः॰ पप्रिः॰ पारयाति- स्वस्ति नावा पुरुहूतः। इन्द्रो विश्वा अति द्विषः।।
卐 स त्वन्न^ इन्द्र वाजेभि- र्दशस्या च गातुया च। अच्छा च न स्सुम्नन्नेषि।।
8.17 आ याहीति पञ्चदशर्चस्य सूक्तस्य, काण्व इरिम्बिठि-रिन्द्रो- गायत्री-अन्त्ये द्वे बृहती सतोबृहत्यौ- वास्तोष्पत इत्यस्या वास्तोष्पतिर्देवतेति शौनकः- उपान्त्याया अर्धर्चे देवो वास्तोष्पतिः- स्तुत इति हि तद्वाक्यम्।।
❀06.01.22 卐आ याहि सुषुमा हि त- इन्द्र सोमं पिबा इमम्। एदं बर्हिस्सदो मम।।
卐 आ त्वा ब्रह्मयुजा हरी~- वहता मिन्द्र केशिना। उप ब्रह्माणि न श्शृणु।।
卐 ब्रह्माण स्त्वा वयँ युजा- सोमपा मिन्द्र सोमिनः। सुतावन्तो हवामहे।।
卐 आ नो याहि सुतावतो-ऽस्माकं सुष्टुती रुप। पिबा सु शिप्रिन्नन्धसः।।
卐 आ ते सिञ्चामि कुक्ष्यो- रनु गात्रा वि धावतु। गृभाय जिह्वया मधु।।
❀06.01.23 卐स्वादुष्टे अस्तु संसुदे- मधुमा न्तन्वे3(ए) तव। सोम श्शमस्तु ते हृदे।।
卐 अयमु त्वा विचर्षणे- जनीरिवाभि सँवृतः। प्र सोम^ इन्द्र सर्पतु।।
卐 तुविग्रीवो वपोदर- स्सुबाहु रन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते।।
卐 इन्द्र प्रेहि पुर स्त्वँ -विश्वस्येशान^ ओजसा। वृत्राणि वृत्रहन्जहि।।
卐 दीर्घस्ते अस्त्वङ्कुशो- येना वसु प्रयच्छसि। यजमानाय सुन्वते।।
❀06.01.24 卐अयन्त इन्द्र सोमो- निपूतो अधि बर्हिषि। एही मस्य द्रवा पिब।।
卐 शाचिगो~ शाचिपूजना-ऽयं रणाय ते सुतः। आखण्डल प्र हूयसे।।
卐 यस्ते श्रृङ्गवृषो नपा- त्प्रणपा~ त्कुण्डपाय्यः। न्यस्मि न्दध्र आ मनः।।
卐 वास्तोष्पते ध्रुवा स्थूणा-ऽसत्रं सोम्यानाम्। द्रप्सो भेत्ता पुरां शश्वतीना- मिन्द्रो मुनीनां सखा।।

卐 पृदाकुसानु र्यजतो गवेषण- एक स्सन्नभि भूयसः। भूर्णि मश्वन्नय त्तुजा पुरो -गृभेन्द्रं सोमस्य पीतये।।

🏺 8.18 इदं हेति द्वाविंशत्यृचस्य सूक्तस्य, काण्व इरिम्बिठि-रादित्याः-चतुर्थी षष्ठी सप्तमीनामदितिः-अष्टम्या अश्विनौ-नवम्या अग्नि सूर्यानिला उष्णिक्।।

❀06.01.25 卐इदं ह नून मेषां- सुम्नं भिक्षेत मर्त्यः। आदित्याना मपूर्व्यं सवीमनि।।

卐 अनर्वाणो ह्येषां -पन्था^ आदित्यानाम्। अदब्धा स्सन्ति पायव स्सुगेवृधः।।

卐 तत्सु न स्सविता भगो- वरुणो मित्रो अर्यमा। शर्म यच्छन्तु सप्रथो यदीमहे।।

卐 देवेभि र्दैव्यदिते-ऽरिष्टभर्म न्ना गहि। स्मत्सूरिभिः पुरुप्रिये सुशर्मभिः।।

卐 ते हि पुत्रासो अदिते- र्विदु र्द्वेषांसि योतवे। अंहोश्चि दुरुचक्रयोऽनेहसः।।

❀06.01.26 卐अदिति र्नो दिवा पशु- .मदिति र्नक्त मद्वयाः। अदितिः पात्वंहस स्सदावृधा।।

卐 उत स्या नो दिवा मति- रदिति रूत्या गमत्। सा शन्ताति मयस्कर दप स्त्रिधः।।

卐 उत त्या दैव्या भिषजा- शन्नः करतो अश्विना। युयुयाता मितो रपो अप स्त्रिधः।।

卐 शमग्नि रग्निभिः करच्छ-न्न स्तपतु सूर्यः। शँ वातो वात्वरपा अप स्त्रिधः।।

卐 अपामीवा मप स्त्रिध-. मप सेधत दुर्मतिम्। आदित्यासो युयोतना नो अंहसः।।

❀06.01.27 卐युयोता शरु मस्मदा-ँ आदित्यास उतामतिम्। ऋधग्द्वेषः कृणुत विश्ववेदसः।।

卐 तत्सु न श्शर्म यच्छताऽऽदित्या यन्मुमोचति। एनस्वन्तश्चिदेनस स्सुदानवः।।

卐 यो नः कश्चि द्रिरिक्षति- रक्षस्त्वेन मर्त्यः। स्वैः ष एवै रिरिषीष्ट युर्जनः।।

卐 समि त्तमघ मश्नव- द्दुश्शंसं मर्त्यं रिपुम्। यो अस्मत्रा दुर्हणावाँ उप द्वयुः।।

卐 पाकत्रा स्थन देवा^- हृत्सु जानीथ मर्त्यम्। उप द्वयुञ्चाद्वयुञ्च वसवः।।

❀06.01.28 卐आ शर्म पर्वताना- मोतापाँ वृणीमहे। द्यावाक्षामाऽऽरे अस्म द्रपस्कृतम्।।

卐 ते नो भद्रेण शर्मणा- युष्माक न्नावा वसवः। अति विश्वानि दुरिता पिपर्तन।।

卐 तुचे तनाय तत्सु नो- द्राघीय आयु र्जीवसे। आदित्यास स्सुमहसः कृणोतन।।

卐 यज्ञो हीळो वो अन्तर^- आदित्या^ अस्ति मृळत। युष्मे इद्वो अपि ष्मसि सजात्ये।।

卐 बृह द्वरूथं मरुता -न्देव न्त्रातार मश्विना। मित्र मीमहे वरुणं स्वस्तये।।

卐 अनेहो मित्रार्यम -न्नृव द्वरुण शंस्यम्। त्रिवरूथं मरुतो यन्त नश्छर्दिः।।

卐 ये चिद्धि मृत्युबन्धव-^ आदित्या मनव स्स्मसि। प्र सू न आयु र्जीवसे तिरेतन।।

☫ 8.19 त ङ्गूर्धयेति सप्तत्रिंशदृचस्य सूक्तस्य, काण्वस्सोभरिरग्निः-चतुस्त्रिंशी पञ्चत्रिंश्योरादित्या-अन्त्ययो र्द्वयो स्त्रसदस्युः-प्रथमादि पञ्चविंश्यन्ता अयुजः ककुभः-द्वितीयादि षड्विंश्यन्तायुज स्सतोबृहत्यः-पितुर्नेति सप्तविंशी द्विपदा-अष्टाविंशी विंशी द्वात्रिंशी षड्विंश्यः ककुभः-एकोनत्रिंश्येकत्रिंशी त्रयास्त्रिंशी पञ्चत्रिंश्य स्सतोबृहत्यः-चतुस्त्रिंश्युष्णिक्सप्तत्रिंशी पङ्क्तिः।।

❀06.01.29 卐तङ्गूर्धया स्वर्णर -न्देवासो देव मरति न्दधन्विरे। देवत्रा हव्य मोहिरे।।

卐 विभूतरातिं विप्र चित्रशोचिषु- मग्नि मीळिष्व यन्तुरम्। अस्य मेधस्य सोम्यस्य सोभरे- प्रेमध्वराय पूर्व्यम्।।

卐 यजिष्ठन्त्वा ववृमहे- देव न्देवत्रा होतार ममर्त्यम्। अस्य यज्ञस्य सुक्रतुम्।।

卐 ऊर्जो नपातं सुभगं सुदीदिति- मग्निं श्रेष्ठशोचिषम्। स नो मित्रस्य वरुणस्य सो- अपामा सुम्नं यक्षते दिवि।।

卐 यस्समिधा य^ आहुती- यो वेदेन ददाश मर्तो अग्नये। यो नमसा स्वध्वरः।।

❀06.01.30 卐तस्ये दर्वन्तो रंहयन्त आशव- स्तस्य द्युम्नितमं यशः। न तमंहो देवकृतङ्कुतश्चन- न मर्त्यकृतन्नशत्।।

卐 स्वग्नयो वो अग्निभि-स्स्याम सूनो~ सहस ऊर्जां पते। सुवीर स्त्वमस्मयुः।।

卐 प्रशंसमानो अतिथि-र्न मित्रियोऽग्नी रथो न वेद्यः। त्वे क्षेमासो अपि सन्ति साधव- स्त्वं राजा रयीणाम्।।

卐 सो अद्धा दाश्वध्वरो-ऽग्ने मर्त स्सुभग स प्रशंस्यः। स धीभि रस्तु सनिता।।

卐 यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि- क्षयद्वीर स्स साधते। सो अर्वद्भि स्सनिता स विपन्युभि- स्स शूरै स्सनिता कृतम्।।

❀06.01.31 卐यस्याग्नि र्वपुर्गृहे- स्तोमञ्चनो दधीत विश्ववार्यः। हव्या वा वेविषद्विषः।।

卐 विप्रस्य वा स्तुवत स्सहसो यहो~- मक्षूतमस्य रातिषु। अवोदेव मुपरिमर्त्यङ्कृधि- वसो~ विविदुषो वचः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यो अग्निं हव्यदातिभि -र्नमोभिर्वा सुदक्ष माविवासति। गिरा वाऽजिरशोचिषम्।।

卐 समिधा यो निशिती दाश ददिति- न्धामभि रस्य मर्त्यः। विश्वे त्स धीभि स्सुभगो जना९ अति- द्युम्नै रुद्रइव तारिषत्।।

卐 तदग्ने द्युम्नमा भर यत्सासह-त्सदने कञ्चिदत्रिणम्। मन्युञ्जनस्य दूढ्यः।।

❀06.01.32 卐येन चष्टे वरुणो मित्रो अर्यमा- येन नासत्या भगः। वयन्तत्ते शवसा गातुवित्तमा- इन्द्रत्वोता विधेमहि।।

卐 ते घेदग्ने स्वाध्यो3(ओ)- ये त्वा विप्र निदधिरे नृचक्षसम्। विप्रासो देव सुक्रतुम्।।

卐 त इद्वेदिं सुभग त आहुति-न्ते सोतुञ्चक्रिरे दिवि। त इद्वाजेभि र्जिग्यु र्मह- द्धनँ ये त्वे काम न्न्येरिरे।।

卐 भद्रो नो अग्नि राहुतो- भद्रा राति स्सुभग भद्रो अध्वरः। भद्रा^ उत प्रशस्तयः।।

卐 भद्रं मनः कृणुष्व वृत्रतूर्ये- येना समत्सु सासहः। अव स्थिरा तनुहि भूरि शर्धताँ- वनेमा ते अभिष्टिभिः।।

❀06.01.33 卐ईळे गिरा मनुर्हितँ- यन्देवा^ दूत मरति न्न्येरिरे। यजिष्ठं हव्यवाहनम्।।

卐 तिग्मजम्भाय तरुणाय राजते- प्रयो गायस्यग्नये। यः पिंशते सूनृताभि स्सुवीर्य- मग्नि र्घृतेभि राहुतः।।

卐 यदी घृतेभि राहुतो- वाशी मग्नि र्भरत उच्चाव च। असुरइव निर्णिजम्।।

卐 यो हव्या न्यैरयता मनुर्हितो- देव^ आसा सुगन्धिना। विवासते वार्याणि स्वध्वरो- होता देवो अमर्त्यः।।

卐 यदग्ने मर्त्यस्त्वं स्यामहं- मित्रमहो अमर्त्यः। सहस स्सून~ वाहुत।।

❀06.01.34 卐न त्वा रासीयाभिशस्तये- वसो~ न पापत्वाय सन्त्य। न मे स्तोतामतीवा न दुर्हित- स्स्यादग्ने न पापया।।

卐 पितु र्न पुत्र स्सुभृतो दुरोण- आ देवा९ एतु प्र णो हविः।।

卐 तवाह मग्न ऊतिभि -र्नेदिष्ठाभि स्सचेय जोषमा वसो~। सदा देवस्य मर्त्यः।।

卐 तव क्रत्वा सनेय न्तव रातिभि -रग्ने तव प्रशस्तिभिः। त्वामिदाहुः प्रमतिँ वसो~- ममाग्ने हर्षस्व दातवे।।

卐 प्र सो अग्ने तवोतिभि- स्सुवीराभि स्तिरते वाजभर्मभिः। यस्य त्वं सख्य मावरः।।

❀06.01.35 卐तव द्रप्सो नीलवा न्वाश ऋत्विय- इन्धान स्सिष्ण~ वा ददे। त्वं महीना मुषसा मसि प्रियः≈- क्षपो वस्तुषु राजसि।।

卐 तमा गन्म सोभरय -स्सहस्रमुष्कं स्वभिष्टि मवसे। सम्राज न्त्रासदस्यवम्।।

卐 यस्य ते अग्ने अन्ये अग्नय उपक्षितो वया इव। विपो न द्युम्ना नि युवे जनाना- न्तव क्षत्राणि वर्धयन्न्।।

卐 यमादित्यासो अद्रुहः- पारन्नयथ मर्त्यम्। मघोनाँ विश्वेषां सुदानवः।।

卐 यूयं राजानः कञ्चिच्चर्षणीसहः-≈क्षयन्तं मानुषा अनु। वयन्ते वो वरुण मित्रार्यम-न्त्स्यामेदृतस्य रथ्यः।।

卐 अदान्मे पौरुकुत्स्यः पञ्चाशत- न्त्रसदस्यु र्वधूनाम्। मंहिष्ठो अर्य स्सत्पतिः।।

卐 उत मे प्रयियो र्वयियो- स्सुवास्त्वा अधि तुग्वनि। तिसृणां सप्ततीनां- श्यावः प्रणेता भुव- द्वसु र्दियानां पतिः।।

8.20 आ गन्तेति षड्विंशत्यृचस्य सूक्तस्य, काण्व स्सोभरिर्मरुतः-अयुजः ककुभो युज स्सतोबृहत्यः।।

卐 चतुर्थेऽनुवाके दशसूक्तानि।।

❀06.01.36 卐आ गन्ता मा रिषण्यत -प्रस्थावानो माप स्थाता समन्यवः। स्थिरा चिन्नमयिष्णवः।।

卐 वीळुपविभि र्मरुत ऋभुक्षण- आ रुद्रास स्सुदीतिभिः। इषा नो अद्याऽगता पुरुस्पृहो- यज्ञमा सोभरीयवः।।

卐 विद्मा हि रुद्रियाणां शुष्म- मुग्रं मरुतां शिमीवताम्। विष्णो रेषस्य मीळ्हुषाम्।।

卐 वि द्वीपानि पापत न्तिष्ठ-दुच्छुनोभे~ युजन्त रोदसी। प्र धन्वान्यैरत शुभ्रखादयो- यदेजथ स्वभानवः।।

卐 अच्युता चिद्वो अज्मन्ना- नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजते।।

❀06.01.37 卐अमाय वो मरुतो यातवे -द्यौ र्जिहीत उत्तरा बृहत्। यत्रा नरो देदिशते तनूष्वा-ऽऽत्वक्षांसि बाह्वोजसः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 स्वधा मनु श्रियन्नरो- महि त्वेषा^ अमवन्तो वृषप्सवः। वहन्ते अह्रुतप्सवः।।

卐 गोभि र्वाणो अज्यते सोभरीणां- रथे कोशे हिरण्यये। गोबन्धव स्सुजातास^ इषे भुजे -महान्तो न स्स्परसे नु।।

卐 प्रति वो वृषदञ्जयो -वृष्णे शर्धाय मारुताय भरध्वम्। हव्या वृषप्रयाव्णे।।

卐 वृषणश्वेन मरुतो वृषप्सुना- रथेन वृषनाभिना। आ श्येनासो न पक्षिणो वृथा नरो- हव्या नो वीतये गत।।

❀06.01.38 卐समान मञ्ज्येषाँ वि भ्राजन्ते- रुक्मासो अधि बाहुषु। दविद्युत त्यृष्टयः।।

卐 त उग्रासो वृषण^ उग्रबाहवो- नकि ष्टनूषु येतिरे। स्थिरा धन्वा न्यायुधा रथेषु वो-ऽनीकेष्वधि श्रियः।।

卐 येषा मर्णो न सप्रथो -नाम त्वेषं शश्वता मेकमि द्भुजे। वयो न पित्र्यं सहः।।

卐 ता न्वन्दस्व मरुत स्ता९ उप स्तुहि- तेषां हि धुनीनाम्। अराणान्न चरम स्तदेषा न्दाना मह्ना तदेषाम्।।

卐 सुभग स्स व^ ऊतिष्वा-स पूर्वासु मरुतो व्युष्टिषु। यो वा नून मुतासति।।

❀06.01.38 卐यस्य वा यूयं प्रति वाजिनो नर- आ हव्या वीतये गथ। अभि ष द्युम्नै रुत वाजसातिभि- स्सुम्ना वो धूतयो नशत्।।

卐 यथा रुद्रस्य सूनवो -दिवो वश न्त्यसुरस्य वेधसः। युवान स्तथेदसत्।।

卐 ये चार्हन्ति मरुत स्सुदानव- स्स्मन्मीळ्हुषश्चरन्ति ये। अतश्चिदा न उप वस्यसा हृदा- युवान आ ववृध्वम्।।

卐 यून ऊ षु नविष्ठया -वृष्णः पावका९अभि सोभरे गिरा। गाय गाइव चर्कृषत्।।

卐 साँहा^ ये सन्ति मुष्टिहेव हव्यो- विश्वासु पृत्सु होतृषु। वृष्णश्चन्द्रान्न सुश्रवस्तमा -न्गिरा वन्दस्व मरुतो अह।।

❀06.01.40 卐गावश्चिद्घा समन्यव -स्सजात्येन मरुत स्सबन्धवः। रिहते ककुभो मिथः।।

卐 मर्तश्चिद्वो नृतवो रुक्मवक्षस-^ उप भ्रातृत्व मायति। अधि नो गात मरुत स्सदा हि व-^ आपित्व मस्ति निध्रुवि।।

卐 मरुतो मारुतस्य न-^ आ भेषजस्य वहता सुदानवः। यूयं सखाय स्सप्तयः।।

卐 याभि स्सिन्धु मवथ याभि स्तूर्वथ- याभि र्दशस्यथा क्रिविम्। मयो नो भूतोतिभि र्मयोभुव- श्शिवाभि रसचद्विषः।।

卐 यत्सिन्धौ यदसिक्न्याँ- यत्समुद्रेषु मरुत स्सुबर्हिषः। यत्पर्वतेषु भेषजम्।।

卐 विश्वं पश्यन्तो बिभृथा तनू-ऽष्वा तेना नो अधि वोचत। क्षमा रपो मरुत आतुरस्य न- इष्कर्ता विह्रुतं पुनः~।।।। इति प्रथमाध्याय स्समाप्तः।।

## ऽ०ऽ ऽ०ऽषष्ठाष्टके द्वितीयाध्यायः (वर्गाः 1-40)

8.21 वयमु त्वेत्यष्टादशर्चस्य सूक्तस्य, काण्व स्सोभरि-रिन्द्रोऽन्त्ययो-र्द्वयोश्चित्रः-अयुजः ककुभो युज स्सतोबृहत्यः।।

❀06.02.01 卐वयमुत्वामपूर्व्य -स्थूरन्न कच्चि द्भरन्तोऽवस्यवः। वाजे चित्रं हवामहे।।

卐 उप त्वा कर्म न्नूतये -स नो युवोग्र श्चक्राम यो धृषत्। त्वामिद्ध्यवितारँ ववृमहे -सखाय^ इन्द्र सानसिम्।।

卐 आ याहीम इन्दवो-ऽश्वपते गोपत उर्वरापते। सोमं सोमपते पिब।।

卐 वयं हि त्वा बन्धुमन्त मबन्धवो- विप्रास^ इन्द्र येमिम। या ते धामानि वृषभ तेभि रागहि- विश्वेभि स्सोमपीतये।।

卐 सीदन्तस्ते वयो यथा -गोश्रीते मधौ मदिरे विवक्षणे। अभि त्वामिन्द्र नोनुमः।।

❀06.02.02 卐अच्छा च त्वैना नमसा वदामसि- किं मुहुश्चि द्वि दीधयः। सन्ति कामासो हरिवो ददिष्ट्वं- स्मो वयं सन्ति नो धियः।।

卐 नूत्ना^ इदिन्द्र ते वय .-मूती अभूम नहि नू ते अद्रिवः। विद्मा पुरा परीणसः।।

卐 विद्मा सखित्व मुत शूर भोज्य1(अ)-मा ते ता वज्रि न्नीमहे। उतो~ समस्मिन्ना शिशीहि नो वसो~ -वाजे सुशिप्र गोमति।।

卐 यो न^ इदमिदं पुरा- प्र वस्य^ आनिनाय तमु व स्स्तुषे। सखाय^ इन्द्र मूतये।।

卐 हर्यश्वं सत्पतिञ्चर्षणीसहं- स हि ष्मा यो अमन्दत। आ तु न स्स वयति गव्य .-मश्व्यं स्तोतृभ्यो मघवा शतम्।।

❀06.02.03 卐त्वया ह स्विद्युजा वयं- प्रति श्वसन्तँ वृषभ ब्रुवीमहि। संस्थे जनस्य गोमतः।।

卐 जयेम कारे पुरुहूत कारिणो-ऽभि तिष्ठेम दूढ्यः। नृभि र्वृत्रं हन्याम शूशुयाम -चावेरिन्द्र प्र णो धियः।।

卐 अभ्रातृव्यो अना त्व -.मनापि रिन्द्र जनुषा सनादसि। युधे दापित्व मिच्छसे।।

卐 नकी रेवन्तं सख्याय विन्दसे- पीयन्ति ते सुराश्वः। यदा कृणोषि नदनुं समूह- स्यादि त्पितेव हूयसे।।

卐 मा ते अमाजुरो यथा -मूरास^ इन्द्र सख्ये त्वावतः। नि षदाम सचा सुते।।

❀06.02.04 卐मा ते गोदत्र निरराम राधस^ - इन्द्र मा ते गृहामहि। दृळ्हा चिदर्यः प्र मृशाभ्याभर- न ते दामान^ आदभे।।

卐 इन्द्रो वा घेदियन्मघं -सरस्वती वा सुभगा ददि र्वसु। त्वँ वा चित्र दाशुषे।।

卐 चित्र^ इद्राजा राजका^ इदन्यके- यके सरस्वती मनु। पर्जन्यइव ततनद्धि वृष्ट्या- सहस्र मयुता ददत्।।

8.22 ओ त्यमह्व इत्यष्टादशर्चस्य सूक्तस्य, काण्व स्सोभरि- रश्विनौ-प्रथमा तृतीया पञ्चमी सप्तमी बृहत्यः-द्वितीया चतुर्थी षष्ठ्य स्सतोबृहत्यः-अष्टम्यनुष्टुप्-नवमी त्रयोदशी पञ्चदशी सप्तदश्यः ककुभः-दशमी चतुर्दशी षोडश्यष्टादश्य स्सतोबृहत्यः-एकादशी द्वादश्यौ ककुम्मध्ये ज्योतिषी।।

❀06.02.02 卐ओ~ त्यमह्व आ रथ- मद्या दंसिष्ठ मूतये। यमश्विना सुहवा रुद्रवर्तनी~- आ सूर्यायै तस्थथुः।।

卐 पूर्वाऽपुषं सुहवं पुरुस्पृहं- भुज्युँ वाजेषु पूर्व्यम्। सचनावन्तं सुमतिभि स्सोभरे- विद्वेषस मनेहसम्।।

卐 इह त्या पुरुभूतमा- देवा नमोभि रश्विना। अर्वाचीना स्ववसे करामहे- गन्तारा दाशुषो गृहम्।।

卐 युवो रथस्य परि चक्र मीयत -ईर्मान्यद्वा मिषण्यति। अस्मा^ अच्छा सुमतिर्वां शुभस्पती~- आ धेनुरिव धावतु।।

卐 रथो यो वा न्त्रिवन्धुरो- हिरण्याभीशु रश्विना। परि द्यावापृथिवी~ भूषति श्रुत -स्तेन नासत्या ऽगतम्।।

❀06.02.06 卐दशस्यन्ता मनवे पूर्व्य न्दिवि- यवँ वृकेण कर्षथः। ता वा मद्य सुमतिभि श्शुभस्पती~ -अश्विना प्र स्तुवीमहि।।
卐 उप नो वाजिनीवसू~ यात मृतस्य पथिभिः। येभिस्तृक्षिँ वृषणा त्रासदस्यवं- महे क्षत्राय जिन्वथः।।
卐 अयँ वा मद्रिभि स्सुत- स्सोमो नरा वृषण्वसू~। आ यातं सोमपीतये- पिबत न्दाशुषो गृहे।।
卐 आ हि रुहत मश्विना- रथे कोशे हिरण्यये वृषण्वसू~। युञ्जाथां पीवरी रिषः।।
卐 याभिः पक्थ मवथो याभि रध्रिगुँ- याभि र्बभ्रुँ विजोषसम्। ताभिर्नो मक्षू तूय मश्विना ऽगतं- भिषज्यतँ यदातुरम्।।
❀06.02.07 卐यदध्रिगावो अध्रिगू~ -इदा चिदह्नो अश्विना हवामहे। वयङ्गीर्भि र्विपन्यवः।।
卐 ताभिरा यातँ वृषणोप मे हवं- विश्वप्सुँ विश्ववार्यम्। इषा मंहिष्ठा पुरुभूतमा नरा- याभिः क्रिविँ वावृधु स्ताभिरा गतम्।।
卐 ताविदा चिदहाना- न्तावश्विना वन्दमान उपब्रुवे। ता ऊ नमोभि रीमहे।।
卐 ताविद्दोषा ता उषसि शुभस्पती~- ता याम न्रुद्रवर्तनी~। मा नो मर्ताय रिपवे वाजिनीवसू ~-परो रुद्रावति ख्यतम्।।
卐 आ सुग्म्याय सुग्म्यं प्राता-~रथेनाश्विना वा सक्षणी। हुवे पितेव सोभरी।।
❀06.02.08 卐मनोजवसा वृषणा मदच्युता- मक्षुङ्गमाभि रूतिभिः। आरात्ताच्चि द्भूतमस्मेअवसे- पूर्वीभिः पुरुभोजसा।।
卐 आ नो अश्वाव दश्विना- वर्ति र्यासिष्टं मधुपातमा नरा। गोमद्दस्रा हिरण्यवत्।।
卐 सुप्रावर्गं सुवीर्यं सुष्ठु वार्य- मनाधृष्टं रक्षस्विना। अस्मिन्ना वा मायाने वाजिनीवसू~- विश्वा वामानि धीमहि।।
8.23 ईळिष्वेति त्रिंशदृचस्य सूक्तस्य, वैयश्वो विश्वमना – अग्नि - रुष्णिक्।।
❀06.02.09 卐ईळिष्वा हि प्रतीव्य1(अँ)- यजस्व जातवेदसम्। चरिष्णुधूम म.गृभीतशोचिषम्।।
卐 दामानँ विश्वचर्षणे-ऽग्निँ विश्वमनो गिरा। उत स्तुषे विष्पर्धसो रथानाम्।।
卐 येषा माबाध^ ऋग्मिय^ -इषः पृक्षश्च निग्रभे। उपविदा वह्नि र्विन्दते वसु।।
卐 उदस्य शोचिरस्था- द्दीदियुषो व्य1(अ)जरम्। तपुर्जम्भस्य सुद्युतो गणश्रियः।।

卐 उदु तिष्ठ स्वध्वर- स्तवानो देव्या कृपा। अभिख्या भासा बृहता शुशुक्वनिः।।

❀06.02.10 卐अग्ने याहि सुशस्तिभि -र्हव्या जुह्वान^ आनुषक्। यथा दूतो बभूथ हव्यवाहनः।।

卐 अग्निँ वः पूर्व्यं हुवे- होतारञ्चर्षणीनाम्। तमया वाचा गृणे तमु व स्स्तुषे।।

卐 यज्ञेभि रद्भुतक्रतुँ -यङ्कृपा सूदयन्त इत्। मित्रन्न जने सुधित मृतावनि।।

卐 ऋतावान मृतायवो -यज्ञस्य साधनङ्गिरा। उपो~ एनञ्जुजुषु र्नमस स्पदे।।

卐 अच्छा नो अङ्गिरस्तमँ- यज्ञासो यन्तु सँयतः। होता यो अस्ति विक्ष्वा यशस्तमः।।

❀06.02.11 卐अग्ने तव त्ये अजरे-न्धानासो बृहद्भाः। अश्वाइव वृषण स्तविषीयवः।।

卐 स त्वन्न^ ऊर्जां पते -रयिं रास्व सुवीर्यम्। प्राव न स्तोके तनये समत्स्वा।।

卐 यद्वा उ विश्पति श्शित -स्सुप्रीतो मनुषो विशि। विश्वेदग्निः प्रति रक्षांसि सेधति।।

卐 श्रुष्ट्यग्ने नवस्य मे -स्तोमस्य वीर विश्पते। नि मायिन स्तपुषा रक्षसो दह।।

卐 न तस्य मायया चन -रिपु रीशीत मर्त्यः। यो अग्नये ददाश हव्यदातिभिः।।

❀06.02.012 卐व्यश्वस्त्वा वसुविद .-मुक्षण्यु रप्रीणा दृषिः। महो राये तमु त्वा समिधी
महि।।

卐 उशना काव्यस्त्वा- नि होतार मसादयत्। आयजिन्त्वा मनवे जातवेदसम्।।

卐 विश्वे हि त्वा सजोषसो- देवासो दूत मक्रत। श्रुष्टी देव प्रथमो यज्ञियो भुवः।।

卐 इम.ङ्घा वीरो अमृत- न्दूतङ्कृण्वीत मर्त्यः। पावकङ्कृष्णवर्तनिँ विहायसम्।।

卐 तं हुवेम यतस्रुच- स्सुभासं शुक्रशोचिषम्। विशा मग्नि मजरं प्रत्न मीड्यम्।।

❀06.02.013 卐यो अस्मै हव्यदातिभि- राहुतिं मर्तोऽविधत्। भूरि पोषं स धत्ते वीरवद्यशः।।

卐 प्रथमञ्जातवेदस- मग्निँ यज्ञेषु पूर्व्यम्। प्रति स्रुगेति नमसा हविष्मती।।

卐 आभि र्विधेमाग्नये- ज्येष्ठाभि र्व्यश्ववत्। मंहिष्ठाभि र्मतिभि श्शुक्रशोचिषे।।

卐 नून मर्च विहायसे- स्तोमेभि स्स्थूरयूपवत्। ऋषे वैयश्व दम्यायाग्नये।।

卐 अतिथिं मानुषाणां- सूनुँ वनस्पतीनाम्। विप्रा^ अग्नि मवसे प्रत्न मीळते।।

❀06.02.14 卐महो विश्वाः अभि षतो3(ओ)-ऽभि हव्यानि मानुषा। अग्ने नि षत्सि नमसाऽधि
बर्हिषि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 वंस्वा नो वार्यो पुरु- वंस्वं रायः पुरुस्पृहः। सुवीर्यस्य प्रजावतो यशस्वतः।।
卐 त्वं वरो~ सुषाम्णे-ऽग्ने जनाय चोदय। सदा वसो~ रातिं यविष्ठ शश्वते।।
卐 त्वं हि सुप्रतूरसि- त्वन्नो गोमती रिषः। महो राय स्साति मग्ने अपा वृधि।।
卐 अग्ने त्वं यशा^ -अस्या मित्रावरुणा वह। ऋतावाना सम्राजा पूतदक्षसा।।

8.24 सखाय इति त्रिंशदृचस्य सूक्तस्य, वैयश्वो विश्वमना - इन्द्रोऽन्त्यतृचस्य वरुरुष्णिगन्त्याऽनुष्टुप्- (वरु स्सौषाम्णोऽयं राजा)।।

❀06.02.15 卐सखाय^ आ शिषामहि- ब्रह्मेन्द्राय वज्रिणे। स्तुष ऊ षु वो नृतमाय धृष्णवे।।
卐 शवसा ह्यसि श्रुतो- वृत्रहत्येन वृत्रहा। मघै र्मघोनो अति शूर दाशसि।।
卐 स न स्स्तवान^ आ भर- रयिञ्चित्रश्रवस्तमम्। निरेके चिद्यो हरिवो वसु र्ददिः।।
卐 आ निरेक मुत प्रिय- मिन्द्र दर्षि जनानाम्। धृषता धृष्णो~ स्तवमान^ आ भर।।
卐 न ते सव्यन्न दक्षिणं- हस्तं वरन्त आमुरः। न परिबाधो हरिवो गविष्टिषु।।
❀06.02.16 卐आ त्वा गोभिरिव व्रज-ङ्गीर्भि र्ऋणोम्यद्रिवः। आ स्मा कामञ्जरितुरा मनः पृण।।
卐 विश्वानि विश्वमनसो- धिया नो वृत्रहन्तम। उग्र प्रणेत ~रधि षू वसो~ गहि।।
卐 वयन्ते अस्य वृत्रह- न्विद्याम शूर नव्यसः। वसो~ स्स्पार्हस्य पुरुहूत राधसः।।
卐 इन्द्र यथा ह्यस्ति ते-ऽपरीत न्नृतो~ शवः। अमृक्ता रातिः पुरुहूत दाशुषे।।
卐 आ वृषस्व महामह -महे नृतम राधसे। दृळ्ह श्चिद्दृह्य मघव न्मघत्तये।।
❀06.02.17 卐नू अन्यत्रा चिदद्रिव- स्त्वन्नो जग्मु राशसः। मघवञ्छग्धि तव तन्न ऊतिभिः।।
卐 नह्य1(अ)ङ्ग नृतो~- त्वदन्यं विन्दामि राधसे। राये द्युम्नाय शवसे च गिर्वणः।।
卐 एन्दु मिन्द्राय सिञ्चत- पिबाति सोम्यं मधु। प्र राधसा चोदयाते महित्वना।।
卐 उपो~ हरीणां पति- न्दक्षं पृञ्चन्त मब्रवम्। नूनं श्रुधि स्तुवतो अश्व्यस्य।।
卐 नह्य1(अ)ङ्ग पुरा चन- जज्ञे वीरतर स्त्वत्। नकी राया नैवथा न भन्दना।।
❀06.02.18 卐एदु मध्वो मदिन्तरं- सिञ्च वाऽध्वर्यो~ अन्धसः। एवा हि वीर स्स्तवते सदावृधः।।
卐 इन्द्र स्थात हरीणा-न्नकिष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना।।
卐 तं वो वाजानां पति-. महूमहि श्रवस्यवः। अप्रायुभि र्यज्ञेभि र्वावृधेन्यम्।।

卐 एतो~ न्विन्द्रं स्तवाम- सखाय स्स्तोम्यन्नरम्। कृष्टीर्यो विश्वा अभ्यस्त्येक इत्।।

卐 अगोरुधाय गविषे- द्युक्षाय दस्म्यँ वचः। घृता त्स्वादीयो मधुनश्च वोचत।।

❀06.02.19 卐यस्यामितानि वीर्या3(आ)- न राधः पर्येतवे। ज्योतिर्न विश्व मभ्यस्ति दक्षिणा।।

卐 स्तुहीन्द्रँ व्यश्ववद-ऽनूर्मिँ वाजिनँ यमम्। अर्यो गयं मंहमानँ वि दाशुषे।।

卐 एवा नूनमुप स्तुहि -वैयश्व दशमन्नवम्। सुविद्वांस ञ्चर्कृत्यञ्चरणीनाम्।।

卐 वेत्था हि निर्ऋतीनाँ- वज्रहस्त परिवृजम्। अहरह श्शुन्ध्युः परिपदा मिव।।

卐 तदिन्द्राव आ भर- येना दंसिष्ठ कृत्वने। द्विता कुत्साय शिश्नथो नि चोदय।।

❀06.02.20 卐तमु त्वा नून मीमहे- नव्य न्दंसिष्ठ सन्यसे। स त्व न्नो विश्वा अभिमाती स्सक्षणिः।।

卐 य ऋक्षा दंहसो मुच -द्यो वार्या त्सप्त सिन्धुषु। वध र्दासस्य तुविनृम्ण नीनमः।।

卐 यथा वरो~ सुषाम्णे- सनिभ्य आऽवहो रयिम्। व्यश्वेभ्य स्सुभगे वाजिनीवति।।

卐 आ नार्यस्य दक्षिणा- व्यश्वाँ एतु सोमिनः। स्थूरञ्च राध श्शतव त्सहस्रवत्।।

卐 यत्त्वा पृच्छा दीजानः- कुहया कुहयाकृते। एषो अपश्रितो वलो गोमती मव तिष्ठति।।

8.25 ता वाँ विश्वस्येति चतुर्विंशत्यृचस्य सूक्तस्य, वैयश्वो विश्वमना- मित्रावरुणौ-दशम्यादि तिसृणाँ विश्वे देवा उष्णिक्-उपान्त्योष्णि ग्गर्भा।।

❀06.02.21 卐ता वाँ विश्वस्य गोपा- देवा देवेषु यज्ञिया। ऋतावाना यजसे पूतदक्षसा।।

卐 मित्रा तना न रथ्या3(आ)- वरुणो यश्च सुक्रतुः। सना त्सुजाता तनया धृतव्रता।।

卐 ता माता विश्ववेदसा-ऽसुर्याय प्रमहसा। मही जजानादितिर् ऋतावरी।।

卐 महान्ता मित्रावरुणा- सम्राजा देवा वसुरा। ऋतावाना वृतमा घोषतो बृहत्।।

卐 नपाता शवसो मह- स्सूनू~ दक्षस्य सुक्रतू~। सृप्रदानू~ इषो वास्त्वधि क्षितः।।

❀06.02.22 卐सँ या दानूनि येमथु- र्दिव्याः पार्थिवी रिषः। नभस्वती रावाञ्चरन्तु वृष्टयः।।

卐 अधि या बृहतो दिवो3(ओ)-ऽभि यूथेव पश्यतः। ऋतावाना सम्राजा नमसे हिता।।

卐 ऋतावाना नि षेदतु- स्साम्राज्याय सुक्रतू~। धृतव्रता क्षत्रिया क्षत्र माशतुः।।

卐 अक्ष्णश्चि.द्गातुवित्तरा-ऽनुल्बणेन चक्षसा। नि चिन्मिषन्ता निचिरा नि चिक्यतुः।।

卐 उत नो देव्यदिति- रुरुष्यता न्नासत्या। उरुष्यन्तु मरुतो वृद्धशवसः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

❀06.02.23 卐ते नो नाव मुरुष्यत- दिवा नक्तं सुदानवः। अरिष्यन्तो नि पायुभि स्सचेमहि।।
卐 अग्नेते विष्णवे वय- मरिष्यन्त स्सुदानवे। श्रुधि स्वयाव न्त्सिन्धो ~पूर्वचित्तये।।
卐 तद्वार्यँ वृणीमहे- वरिष्ठङ्गोपयत्यम्। मित्रो यत्पान्ति वरुणो यदर्यमा।।
卐 उत न स्सिन्धु रपा- न्तन्मरुत स्तदश्विना। इन्द्रो विष्णु र्मीढ्वांस स्सजोषसः।।
卐 ते हि ष्मा वनुषो नरो-ऽभिमातिङ्कयस्य चित्। तिग्मन्न क्षोदः प्रतिघ्नन्ति भूर्णयः।।
❀06.02.24 卐अय मेकं इत्था पुरू-रु चष्टे वि विश्पतिः। तस्य व्रता न्यनु वश्चरामसि।।
卐 अनु पूर्वाण्योक्या- साम्राज्यस्य सश्चिम। मित्रस्य व्रता वरुणस्य दीर्घश्रुत्।।
卐 परि यो रश्मिना दिवो-ऽन्ता न्ममे पृथिव्याः। उभे~ आ पप्रौ रोदसी महित्वा।।
卐 उदु ष्य शरणे दिवो- ज्योति रयंस्त सूर्यः। अग्निर्न शुक्र स्समिधान आहुतः।।
卐 वचो दीर्घप्रसद्मनी-शे वाजस्य गोमतः। ईशे हि पित्वोऽविषस्य दावने।।
❀06.02.25 卐तत्सूर्यं रोदसी उभे~- दोषा वस्तो रुप ब्रुवे। भोजेष्वस्मा९ अभ्युच्चरा सदा।।
卐 ऋज्र मुक्षण्यायने- रजतं हरयाणे। रथँ युक्त मसनाम सुषामणि।।
卐 ता मे अश्व्यानां- हरीणा न्नितोशना। उतो~ नु कृत्व्याना न्नृवाहसा।।
卐 स्मदभीशू~ कशावन्ता -विप्रा नविष्ठया मती। महो वाजिना वर्वन्ता सचासनम्।।
8.26 युवोरु ष्विति पञ्चविंशच्यृचस्य सूक्तस्याऽऽङ्गिरसो व्यश्वोऽश्विना-वन्त्य षण्णां वायु-रुष्णिक्-वाहिष्ठो वामित्यादि चतस्रो गायत्र्यः-विंश्येकविंश्यन्त्यानुष्टुभः-(व्यश्वो वेति सर्वानुक्रमोक्ता वपि शौनकेन व्यश्वस्यैव मुख्यत्वद्योतना दत्र व्यश्वेमुख्यत्व द्योतना दत्र व्यश्वे मुख्यत्व माद्दतं तेन पाक्षिको विश्वमनाः)।।
❀06.02.26 卐युवोरु षू रथं हुवे- सधस्तुत्याय सूरिषु। अतूर्तदक्षा वृषणा वृषण्वसू~।।
卐 युवँ वरो~ सुषाम्णे- महे तने नासत्या। अवोभि र्याथो वृषणा वृषण्वसू~।।
卐 ता वा मद्य हवामहे- हव्येभि र्वाजिनीवसू~। पूर्वी रिष^ इषयन्ता वति क्षपः।।
卐 आ वाँ वाहिष्ठो अश्विना- रथो यातु श्रुतो नरा। उप स्तोमा न्तुरस्य दर्शथ श्श्रिये।।
卐 जुहुराणा चिंदश्विना-ऽऽमन्येथाँ वृषण्वसू~। युवं हि रुद्रा पर्षथो अति द्विषः।।
❀06.02.27 卐दस्रा हि विश्व मानुष-ञ्मक्षूभिः परिदीयथः। धियञ्जिन्वा मधुवर्णा शुभ स्पती~।।

卐 उप नो यात मश्विना- राया विश्वपुषा सह। मघवाना सुवीरा वनपच्युता।।
卐 आ मे अस्य प्रतीव्य1(अ)-मिन्द्र नासत्या गतम्। देवा देवेभि रद्य सचनस्तमा।।
卐 वयं हि वां हवामह -उक्षण्यन्तो व्यश्ववत्। सुमतिभि रुप विप्रा विहाऽऽगतम्।।
卐 अश्विना स्वृषे स्तुहि- कुवित्ते श्रवतो हवम्। नेदीयसः कूळयातः पणीँ रुत।।
❀06.02.28 卐वैयश्वस्य श्रुतन्नरो-तो~ मे अस्य वेदथः। सजोषसा वरुणो मित्रो अर्यमा।।
卐 युवादत्तस्य धिष्ण्या- युवानीतस्य सूरिभिः। अहरह वृषणा मह्यं शिक्षतम्।।
卐 यो वाँ यज्ञेभि रावृतो-ऽधिवस्त्रा वधूरिव। सपर्यन्ता शुभे चक्राते~ अश्विना।।
卐 यो वा मुरुव्यचस्तम-श्चिकेतति नृपाय्यम्। वर्ति रश्विना परि यात मस्मयू~।।
卐 अस्मभ्यं सु वृषण्वसू~- यातँ वर्ति नृपाय्यम्। विषुद्रुहेव यज्ञ मूहथु गिरा।।
❀06.02.29 卐वाहिष्ठो वाँ हवानां- स्तोमो दूतो हुवन्नरा। युवाभ्यां भूत्वश्विना।।
卐 यददो दिवो अर्णव- इषो वा मदथो गृहे। श्रुत मिन्मे अमर्त्या।।
卐 उत स्या श्वेतयावरी- वाहिष्ठा वान्नदीनाम्। सिन्धु र्हिरण्यवर्तनिः।।
卐 स्मदेतया सुकीर्त्या-ऽश्विना श्वेतया धिया। वहेथे~ शुभ्रयावाना।।
卐 युक्ष्वा हि त्वं रथासहा- युवस्व पोष्या वसो~। आन्नो वायो~ मधु पिबा-ऽस्माकं सवना ऽऽगहि।।
❀06.02.30 卐तव वाय~ वृतस्पते- त्वष्टु र्जामात रद्भुत। अवांस्या वृणीमहे।।
卐 त्वष्टु र्जामातरँ वय- मीशानं राय ईमहे। सुतावन्तो वायु न्द्युम्ना जनासः।।
卐 वायो~ याहि शिवाऽऽदिवो- वहस्वा सु स्वश्व्यम्। वहस्व महः पृथुपक्षसा रथे।।
卐 त्वां हि सुप्सरस्तम- न्नृषदनेषु हूमहे। ग्रावाण न्नाश्वपृष्ठं मंहना।।
卐 स त्वन्नो देव मनसा- वायो~ मन्दानो अग्रियः। कृधि वाजाँ अपो धियः।।
☸ 8.27 अग्नि रुक्थ इति द्वाविंशत्यृचस्य सूक्तस्य, वैवस्वतो मनु-र्विश्वे देवाः-अयुजो बृहत्यो युज स्सतोबृहत्यः- (अग्निरुक्थ इत्यादि वैश्वदेवेषु चतु स्सूक्तेषु आद्ययोरन्त्ये च सर्वे विश्वे देवा एव नात्र भेदः)।।
❀06.02.31 卐अग्नि रुक्थे पुरोहितो- ग्रावाणो बर्हि रध्वरे। ऋचा यामि मरुतो ब्रह्मणस्पति- न्देवाँ अवो वरेण्यम्।।

卐 आ पशुङ्गासि पृथिवीँ वनस्पती- नुषासा नक्त मोषधीः। विश्वे च नो वसवो विश्ववेदसो- धीनां भूत प्राविताराः।।

卐 प्र सू न एत्वध्वरो3(ओ)-ऽग्ना देवेषु पूर्व्यः। आदित्येषु प्र वरुणे धृतव्रते- मरुत्सु विश्वभानुषु।।

卐 विश्वे हि ष्मा मनवे विश्ववेदसो- भुवन्वृधे रिशादसः। अरिष्टेभिः पायुभि र्विश्ववेदसो- यन्ता नोऽवृकञ्छर्दिः।।

卐 आ नो अद्य समनसो- गन्ता विश्वे सजोषसः। ऋचा गिरा मरुतो देव्यदिते- सदने पस्त्ये महि।।

❀06.02.32 卐अभि प्रिया मरुतो या वो अश्व्या- हव्या मित्र प्रयाथन। आ बर्हि रिन्द्रो वरुण स्तुरा नर- आदित्यास स्सदन्तु नः।।

卐 वयँ वो वृक्तबर्हिषो- हितप्रयस आनुषक्। सुतसोमासो वरुण हवामहे- मनुष्व दिद्धाग्नयः।।

卐 आ प्र यात मरुतो विष्णो~ अश्विना- पूष न्माकीनया धिया। इन्द्र आ यातु प्रथम स्सनिष्युभि- वृषा यो वृत्रहा गृणे।।

卐 वि नो देवासो अद्रुहो-ऽच्छिद्रं शर्म यच्छत। न यद्दूरा द्वसवो नू चिदन्तितो- वरूथ मादधर्षति।।

卐 अस्ति हि व स्सजात्यं रिशादसो- देवासो अस्त्याप्यम्। प्र णः पूर्वस्मै सुविताय वोचत -मक्षू सुम्नाय नव्यसे।।

❀06.02.33 卐इदा हि व उपस्तुति- मिदा वामस्य भक्तये। उप वो विश्ववेदसो- नमस्यु रा असृक्ष्यन्यामिव।।

卐 उदु ष्य व स्सविता सुप्रणीतयो-ऽस्था दूर्ध्वो वरेण्यः। नि द्विपाद श्चतुष्पादो अर्थिनो-ऽविश्र न्पतयिष्णवः।।

卐 देवन्देवँ वोऽवसे- देवन्देव मभिष्टये। देवन्देवं हुवेम वाजसातये- गृणन्तो देव्या धिया।।

卐 देवासो हि ष्मा मनवे समन्यवो- विश्वे साकं सरातयः। ते नो अद्य ते अपर न्तुचे तु नो- भवन्तु वरिवोविदः।।

卐 प्र व श्शंसा म्यद्रुह- स्संस्थ उपस्तुतीनाम्। न तन्धूर्ति र्वरुण मित्र मर्त्यं- यो वो धामभ्योऽविधत्।।

卐 प्र स क्षय न्तिरते वि मही- रिषो यो वो वराय दाशति। प्र प्रजाभि र्जायते धर्मणस्प- र्यरिष्ट स्सर्व एधते।।

❀06.02.34 卐ऋते स विन्दते युध- स्सुगेभि र्यात्यध्वनः। अर्यमा मित्रो वरुण स्सरातयो- यन्त्रायन्ते सजोषसः।।

卐 अज्रे चिदस्मै कृणुथा न्यञ्चन- न्दुर्गे चिदा सुसरणम्। एषा चिदस्मा दशनिः परो नु- साऽस्रेधन्ती वि नश्यतु।।

卐 यदद्य सूर्य उद्यति- प्रियक्षत्रा^ ऋत न्दध। यन्निम्रुचि प्रबुधि विश्ववेदसो- यद्वा मध्यन्दिने दिवः।।

卐 यद्वाऽभिपित्वे असुरा^ ऋतँ यते- छर्दि र्येम वि दाशुषे। वय न्तद्वो वसवो विश्ववेदस^- उप स्थेयाम मध्य आ।।

卐 यदद्य सूर उदिते -यन्मध्यन्दिन आतुचि। वाम न्धत्थ मनवे विश्ववेदसो- जुह्वानाय प्रचेतसे।।

卐 वय न्तद्व स्सम्राज^ आ वृणीमहे- पुत्रो न बहुपाय्यम्। अश्याम तदादित्या जुह्वतो हवि- र्येन वस्योऽनशामहै।।

8.28 ये त्रिंश तीति पञ्चर्चस्य सूक्तस्य, वैवस्वतो मनु-र्विश्वे देवा- गायत्री-चतुर्थी पुरउष्णिक्।।

❀06.02.35 卐ये त्रिंशति त्रयस्परो- देवासो बर्हि राऽसदन्। विदन्नह द्विताऽसनन्।।

卐 वरुणो मित्रो अर्यमा- स्मद्रातिषाचो अग्नयः। पत्नीवन्तो वषट्कृताः।।

卐 ते नो गोपा^ अपाच्या-स्त उदक्त इत्था न्यक्। पुरस्ता त्सर्वया विशा।।

卐 यथा वशन्ति देवा स्तथेदस- त्तदेषान्नकि रा मिनत्। अरावा चन मर्त्यः।।

卐 सप्तानां सप्त ऋष्टय- स्सप्त द्युम्नान्येषाम्। सप्तो~ अधि श्रियो धिरे।।

8.29 बभ्रु रेक इति दशर्चस्य सूक्तस्य, वैवस्वतो मनु-र्विश्वे देवा- द्विपदा विराट् –(भेदपक्षे - सोमः 1-अग्निः 1-त्वष्टा 1-इन्द्रः 1-रुद्रः 1-पूषा 1-विष्णुः 1-अश्विनौ 1-मित्रावरुणौ 1-अश्विनौ 1-एवं दश-अस्मिन्मारीचः कश्यपर्षिः पाक्षिकः)।।

❀06.02.36 卐बभ्रु रेको विषुण स्सूनरो- युवाऽञ्ज्यङ्क्ते हिरण्ययम्।।

卐 योनि मेक^ आ ससाद द्योतनो-ऽन्त र्देवेषु मेधिरः।।

卐 वाशी मेको बिभर्ति हस्त आयसी- मन्त र्देवेषु निध्रुविः।।

卐 वज्र मेको बिभर्ति हस्त आहित- न्तेन वृत्राणि जिघ्नते।।

卐 तिग्म मेको बिभर्ति हस्त आयुधं- शुचि रुग्रो जलाषभेषजः।।

卐 पथ^ एकः पीपाय तस्करो यथाँ- एष वेद निधीनाम्।।

卐 त्रीण्येक^ उरुगायो वि चक्रमे- यत्र देवासो मदन्ति।।

卐 विभिर्द्वा चरत^ एकया सह- प्र प्रवासेव वसतः।।

卐 सदो द्वा चक्राते~ उपमा दिवि- सम्राजा सर्पिरासुती~।।

卐 अर्चन्त^ एके महि साम मन्वत- तेन सूर्य मरोचयन्न्।।

8.30 नहि व इति चतुर्ऋचस्य सूक्तस्य, वैवस्वतो मनु-र्विश्वे देवा- गायत्री-पुरउष्णि ग्बृह त्यनुष्टुभः।।

06.02.37 卐 नहि वो अस्त्यर्भको- देवासो न कुमारकः। विश्वे सतोमहान्त इत्।।

卐 इति स्तुतासो असथा रिशादसो- ये स्थ त्रयश्च त्रिंशच्च। मनो देवा यज्ञियासः।।

卐 ते नस्त्राध्व न्तेऽवत- त उ नो अधि वोचत। मा नः पथः पित्र्या न्मानवा दधि- दूर न्नैष्ट परावतः।।

卐 ये देवास^ इह स्थन -विश्वे वैश्वानरा^ उत। अस्मभ्यं शर्म सप्रथो -गवेऽश्वाय यच्छत।।

यो यजातीत्यष्टादशर्चस्य सूक्तस्य, वैवस्वतो मनुः – यज्ञो देवता, तृतीयादि द्वयो र्यजमानः, पञ्चम्यादीना न्दम्पती – दशम्यादि नवाना न्दम्पत्याशिषो देवता गायत्री, नवमी चतुर्दश्या वनुष्टुभौ, दशमी पादनिचृ दन्त्या श्चतस्रः पङ्क्तयः – (प्रथमयो र्द्वयो रिन्द्रो देवतेति केचित्, दशम्या यजमान पत्न्याशी – स्ततो द्वयोः पूषा, तत एकस्या मित्रार्यमवरुणा – स्तत एकस्या अग्निः – अन्त्य चतसृणाँ यजमान इति शौनकाद्यभिप्रायेण केचिदाहुः )

06.02.38 卐 यो यजाति यजात इ-त्सुनवच्च पचाति च। ब्रह्मे दिन्द्रस्य चाकनत्।।

卐 पुरोळाशँ यो अस्मै- सोमं ररत आशिरम्। पादित्तं शक्रो अंहसः।।

卐 तस्य द्युमाँ असद्रथो- देवजूत स्स शूशुवत्। विश्वा वन्वन्नमित्रिया।।

卐 अस्य प्रजावती गृहे-ऽसश्चन्ती दिवेदिवे। इळा धेनुमती दुहे।।

卐 या दम्पती~ समनसा- सुनुत^ आ च धावतः। देवासो नित्यया ऽऽशिरा।।

06.02.39 卐 प्रति प्राशव्याँ इत- स्सम्यञ्चा बर्हि राशाते~। न ता वाजेषु वायतः।।

卐 न देवाना मपि ह्नुत- स्सुमतिन्न जुगुक्षतः। श्रवो बृह द्विवासतः।।

卐 पुत्रिणा ता कुमारिणा- विश्व मायु र्व्यश्नुतः। उभा हिरण्यपेशसा।।

卐 वीतिहोत्रा कृतद्वसू~- दशस्यन्ता मृताय कम्। समूधो रोमशं हतो- देवेषु कृणुतो दुवः।।

卐 आ शर्म पर्वतानाँ- वृणीमहे नदीनाम्। आ विष्णो स्सचाभुवः।।

❀06.02.40 卐ऐतु पूषा रयि र्भगः- स्वस्ति सर्वधातमः। उरु रध्वा स्वस्तये।।

卐 अरमति रनर्वणो- विश्वो देवस्य मनसा। आदित्याना.मनेह इत्।।

卐 यथा नो मित्रो अर्यमा- वरुण स्सन्ति गोपाः। सुगा ऋतस्य पन्थाः।।

卐 अग्निँ वः पूर्व्यङ्गिरा- देव मीळे वसूनाम्। सपर्यन्तः पुरुप्रियं- मित्रन्न क्षेत्रसाधसम्।।

卐 मक्षू देववतो रथ- श्शूरो वा पृत्सु कासु चित्। देवानाँ य इन्मनो- यजमान इयक्ष -त्यभी दयज्वनो भुवत्।।

卐 न यजमान रिष्यसि -न सुन्वान न देवयो~। देवानाँ य इन्मनो- यजमान इयक्ष- त्यभी दयज्वनो भुवत्।।

卐 नकिष्टङ्कर्मणा नश-न्न प्र योषन्न योषति। देवानाँ य इन्मनो- यजमान इयक्ष- त्यभी दयज्वनो भुवत्।।

卐 अस दत्र सुवीर्य- मुत त्यदाश्वश्व्यम्। देवानाँ य इन्मनो- यजमान इयक्ष -त्यभी दयज्वनो भुवत्।।।।

इति द्वितीयाध्याय स्समाप्तः।।

## षष्ठाष्टके तृतीयाध्यायः (वर्गाः 1-49)

8.32 प्र कृतानीति त्रिंशदृचस्य सूक्तस्य, काण्वो मेधातिथि-रिन्द्रो- गायत्री।।

❀06.03.01 卐प्र कृता न्यृजीषिणः- कण्वा इन्द्रस्य गाथया। मदे सोमस्य वोचत।।

卐 यस्सृबिन्द मनर्शनिं- पिप्रु न्दास महीशुवम्। वधी दुग्रो रिणन्नपः।।

卐 न्यर्बुदस्य विष्टपँ- वर्ष्माणं बृहत स्तिर। कृषे तदिन्द्र पौँस्यम्।।

卐 प्रति श्रुताय वो धृष- त्तूर्णाशन्न गिरे रधि। हुवे सुशिप्र मूतये।।

卐 स गोरश्वस्य वि व्रजं- मन्दान स्सोम्येभ्यः। पुरन्न शूर दर्षसि।।

❀06.03.02 卐यदि मे रारण स्सुत- उक्थे वा दधसे चनः। आरा दुप स्वधा ऽगहि।।

卐 वयङ्घा ते अपि ष्मसि- स्तोतार इन्द्र गिर्वणः। त्वन्नो जिन्व सोमपाः।।

卐 उत नः पितु माभर- संरराणो अविक्षितम्। मघव न्भूरि ते वसु।।

卐 उत नो गोमत स्कृधि- हिरण्यवतो अश्विनः। इळाभि स्सं रभेमहि।।

卐 बृबदुक्थं हवामहे- सृप्रकरस्न मूतये। साधु कृण्वन्त मवसे।।

❀06.03.03 卐य स्संस्थे चिच्छतक्रतु- रादीङ्कृणोति वृत्रहा। जरितृभ्यः पुरूवसुः।।

卐 स नः श्शक्र श्चिदा शक- द्दानवाः अन्तराभरः। इन्द्रो विश्वाभि रूतिभिः।।

卐 यो रायो3(ओ)ऽवनि- र्महान्त्सुपार स्सुन्वत स्सखा। तमिन्द्र मभि गायत।।

卐 आयन्तारं महि स्थिरं- पृतनासु श्रवोजितम्। भूरे रीशान मोजसा।।

卐 नकि रस्य शचीना-. न्नियन्ता सूनृतानाम्। नकि र्वक्ता न दादिति।।

❀06.03.04 卐न नूनं ब्रह्मणा .मृणं -प्राशूना मस्ति सुन्वताम्। न सोमो अप्रता पपे।।

卐 पन्य इदुप गायत- पन्य उक्थानि शंसत। ब्रह्मा कृणोत पन्य इत्।।

卐 पन्य आ दर्दिरच्छता- सहस्रा वाज्यवृतः। इन्द्रो यो यज्वनो वृधः।।

卐 वि षू चर स्वधा अनु -कृष्टीना मन्वाहुवः। इन्द्र पिब सुतानाम्।।

卐 पिब स्वधैनवाना -मुत यस्तुग्र्ये सचा। उताय मिन्द्र यस्तव।।

❀06.03.05 卐अतीहि मन्युषाविणं- सुषुवांस मुपाऽरणे। इमं रातं सुतं पिब।।

卐 इहि तिस्रः परावत- इहि पञ्च जनाः अति। धेना इन्द्रावचाकशत्।।

卐 सूर्यो रश्मिँ यथा सृजा-ऽत्वा यच्छन्तु मे गिरः। निम्न मापो न सध्र्यक्।।

卐 अध्वर्य~ वा तु हि षिञ्च- सोमँ वीराय शिप्रिणे। भरा सुतस्य पीतये।।

卐 य उद्नः फलिगं भिन-न्न्य1(अ)क्सिन्धूः रवासृजत्। यो गोषु पक्व न्धारयत्।।

❀06.03.06 卐अहन्वृत्र मृचीषम- और्णवाभ महीशुवम्। हिमेनाविध्य दर्बुदम्।।

卐 प्र व उग्राय निष्टुरे-ऽषाळ्हाय प्रसक्षिणे। देवत्तं ब्रह्म गायत।।

卐 यो विश्वा न्यभि व्रता- सोमस्य मदे अन्धसः। इन्द्रो देवेषु चेतति।।

卐 इह त्या सधमाद्या- हरी~ हिरण्यकेश्या। वोळ्हा मभि प्रयो हितम्।।

卐 अर्वाञ्चन्त्वा पुरुष्टुत- प्रियमेधस्तुता हरी~। सोमपेयाय वक्षतः।।

8.33 वय ङ्घेत्येकोनविंशत्यृचस्य सूक्तस्य, काण्वो मेध्यातिथि- रिन्द्रो- बृहती-षोडश्याद्या स्तिस्त्रो गायत्र्योऽन्त्याऽनुष्टुप्।।

❀06.03.07 卐वयङ्क त्वा सुतावन्त- आपो न वृक्तबर्हिषः। पवित्रस्य प्रस्रवणेषु वृत्रह- न्परि स्तोतार आसते।।

卐 स्वरन्ति त्वा सुते नरो -वसो~ निरेक उक्थिनः। कदा सुतन्तृषाण ओक आ गम- इन्द्र स्वब्दीव वंसगः।।

卐 कण्वेभि र्धृष्ण~वा धृष- द्वाज न्दर्षि सहस्रिणम्। पिशङ्गरूपं मघव न्विचर्षणे- मक्षू गोमन्त मीमहे।।

卐 पाहि गायान्धसो- मद इन्द्राय मेध्यातिथे। य स्संमिश्लो हर्यो र्यस्सुते सचा -वज्री रथो हिरण्ययः।।

卐 य स्सुषव्य स्सुदक्षिण- इनो य स्सुक्रतु र्गृणे। य आकर स्सहस्रा य श्शतामघ- इन्द्रो यः पूर्भिदारितः।।

❀06.03.08 卐यो धृषितो योऽवृतो- यो अस्ति श्मश्रुषु श्रितः। विभूतद्युम्न श्च्यवनः पुरुष्टुतः- क्रत्वा गौरिव शाकिनः।।

卐 क ईं वेद सुते सचा- पिबन्तङ्कद्वयो दधे। अयँ यः पुरो विभिन त्त्योजसा- मन्दान श्शिप्र्यन्धसः।।

卐 दाना मृगो न वारणः- पुरुत्रा चरथ न्दधे। नकिष्ट्वा नि यम दासुते गमो- महाँश्चर स्योजसा।।

卐 य उग्र स्सन्ननिष्टृत- स्स्थिरो रणाय संस्कृतः। यदि स्तोतु र्मघवा श्शृणव द्धव- न्नेन्द्रो योषत्या गमत्।।

卐 सत्य मित्था वृषेदसि- वृषजूतिर्नोऽवृतः। वृषा ह्युग्र श्शृण्विषे परावति- वृषो~ अर्वावति श्रुतः।।

❀06.03.09 卐वृषणस्ते अभीशवो- वृषा कशा हिरण्ययी। वृषा रथो मघव न्वृषणा हरी~- वृषा त्वं शतक्रतो~।।

卐 वृषा सोता सुनोतु ते- वृष न्नृजीपि न्नाभर। वृषा दधन्वे वृषणन्नदीष्वा -तुभ्यं स्थात हरीणाम्।।

卐 एन्द्र याहि पीतये- मधु शविष्ठ सोम्यम्। नाय मच्छा मघवा श्शृणव द्गिरो- ब्रह्मोक्था च सुक्रतुः।।

卐 वहन्तु त्वा रथेष्ठा .-माहरयो रथयुजः। तिरश्चिदर्यं सवनानि वृत्रहन्न-ऽन्येषाँ या शतक्रतो~।।

卐 अस्माक मद्यान्तमं- स्तोम न्धिष्व महामह। अस्माकन्ते सवना सन्तु शन्तमा- मदाय द्युक्ष सोमपाः।।

❀06.03.10 卐नहि षस्तव नो~ मम- शास्त्रे अन्यस्य रण्यति। यो अस्मान्वीर आऽनयत्।।

卐 इन्द्रश्चिद्घा तदब्रवी- त्स्त्रिया अशास्यं मनः। उतो~ अह क्रतुं रघुम्।।

Sri Ganapati Sachchidananda Avadhoota Peetham Mysore

卐 सप्ती~ चिद्धा मद्च्युता- मिथुना वहतो रथम्। एवेद्धूर्वृष्ण^ उत्तरा।।

卐 अधः पश्यस्व मोपरि- सन्तरां पादकौ हर। मा ते कशप्लकौ दृशन्- स्त्री हि ब्रह्मा बभूविथ।।

8.34 एन्द्र याहीत्यष्टादशर्चस्य सूक्तस्य, काण्वो नीपातिथि-रिन्द्रः-आ यदिन्द्र इत्यादि तिसृणामाङ्गिरसाः-सहस्र वसुरोचिष ऋषय-इन्द्रोऽनुष्टुबन्त्यास्तिस्रो गायत्र्यः।।

❀06.03.11 卐एन्द्र याहि हरिभि- रुप कण्वस्य सुष्टुतिम्। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ त्वा ग्रावा वदन्निह- सोमी घोषेण यच्छतु। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 अत्रा वि नेमि रेषा- .मुरान्न धूनुते वृकः। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ त्वा कण्वा^ इहावसे- हवन्ते वाजसातये। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 दधामि ते सुतानाँ- वृष्णे न पूर्वपाय्यम्। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

❀06.03.12 卐स्मत्पुरन्धिर्न^ आ गहि- विश्वतो धीर्न ऊतये। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ नो याहि महेमते- सहस्रोते शतामघ। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ त्वा होता मनुर्हितो- देवत्रा वक्षदीड्यः। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ त्वा मदच्युता हरी~ श्येनं पक्षेव वक्षतः। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ याह्यर्य आ परि- स्वाहा सोमस्य पीतये। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

❀06.03.13 卐आ नो याह्युपश्रु -त्युक्थेषु रणया इह। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 सरूपै रा सु नो गहि- संभृतै स्संभृताश्वः। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ याहि पर्वतेभ्य- स्समुद्रस्याधि विष्टपः। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ नो गव्या न्यश्व्या- सहस्रा शूर दर्दृहि। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ न स्सहस्रशो भरा-ऽयुतानि शतानि च। दिवो अमुष्य शासतो- दिवँ यय दिवावसो~।।

卐 आ यदिन्द्रश्च दद्वहे~- सहस्रँ वसुरोचिषः। ओजिष्ठ मश्व्यं पशुम्।।

卐 य ऋज्रा^ वातरंहसो-ऽरुषासो रघुष्यदः। भ्राजन्ते सूर्याइव।।

卐 पारावतस्य रातिषु- द्रव च्चक्रेष्वाशुषु। तिष्ठँ वनस्य मध्य आ।।

☸ 8.35 अग्निनेन्द्रेणेति चतुर्विंशत्यृचस्य सूक्तस्याऽऽत्रेय श्श्यावाश्वोऽश्विना-वुपरिष्टाज्ज्योति-रन्त्यास्तिस्रः-क्रमेण पङ्क्ति-महाबृहती- पङ्क्तयः।।

❀06.03.14 卐अग्निनेन्द्रेण वरुणेन विष्णुना-ऽऽदित्यै^ रुद्रै^ र्वसुभि स्सचाभुवा। सजोषसा उषसा सूर्येण च- सोमं पिबत मश्विना।।

卐 विश्वाभि र्धीभि र्भुवनेन वाजिना- दिवा पृथिव्याऽद्रिभि स्सचाभुवा। सजोषसा उषसा सूर्येण च- सोमं पिबत मश्विना।।

卐 विश्वै र्देवै स्त्रिभि^ रेकादशै रिहा-ऽद्भि र्मरुद्भि र्भृगुभि स्सचाभुवा। सजोषसा उषसा सूर्येण च- सोमं पिबत मश्विना।।

卐 जुषेथाँ यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनाऽव गच्छतम्। सजोषसा उषसा सूर्येण -चेषन्नो वोऴ्ह मश्विना।।

卐 स्तोमञ्जुषेथाँ युवशेव कन्यनाँ विश्वेह देवौ सवनाऽव गच्छतम्। सजोषसा उषसा सूर्येण- चेषन्नो वोऴ्ह मश्विना।।

卐 गिरो जुषेथा मध्वरञ्जुषेथाँ विश्वेह देवौ सवनाऽव गच्छतम्। सजोषसा उषसा सूर्येण -चेषन्नो वोऴ्ह मश्विना।।

❀06.03.15 卐हारिद्रवेव पतथो वने दुप -सोमं सुतं महिषेवाव गच्छथः। सजोषसा उषसा सूर्येण च -त्रिर्वर्ति यात मश्विना।।

卐 हंसाविव पतथो अध्वगाविव –सोमं सुतं महिषेवाव गच्छथः। सजोषसा उषसा सूर्येण च -त्रिर्वर्ति यात मश्विना।।

卐 श्येनाविव पतथो हव्यदातये- सोमं सुतं महिषेवाव गच्छथः। सजोषसा उषसा सूर्येण च -त्रिर्वर्ति यात मश्विना।।

卐 पिबत ञ्च तृप्णुतञ्चाऽऽच गच्छतं- प्रजाञ्च धत्त न्द्रविणञ्च धत्तम्। सजोषसा उषसा सूर्येण चो-र्जन्नो धत्त मश्विना।।

卐 जयत ञ्च प्रस्तुत ञ्च प्र चावतं –प्रजा ञ्च धत्त न्द्रविणञ्च धत्तम्। सजोषसा उषसा सूर्येण चो-र्जन्नो धत्तमश्विना।।

卐 हत ञ्च शत्रू न्यतत ञ्च मित्रिण॰- प्रजा ञ्च धत्त न्द्रविणञ्च धत्तम्। सजोषसा उषसा सूर्येण चो-र्जन्नो धत्त मश्विना।।

❀06.03.16 卐मित्रावरुणवन्ता उत धर्मवन्ता- मरुत्वन्ता जरितु र्गच्छथो हवम्। सजोषसा उषसा सूर्येण चा-ऽदित्यै यात मश्विना।।

卐 अङ्गिरस्वन्ता उत विष्णुवन्ता –मरुत्वन्ता जरितु र्गच्छथो हवम्। सजोषसा उषसा सूर्येण चा-ऽदित्यै यात मश्विना।।

卐 ऋभुमन्ता वृषणा वाजवन्ता- मरुत्वन्ता जरितु र्गच्छथो हवम्। सजोषसा उषसा सूर्येण चाऽदित्यै यात मश्विना।।

卐 ब्रह्म जिन्वत मुत जिन्वत न्धियो- हतं रक्षांसि सेधत ममीवाः। सजोषसा उषसा सूर्येण च -सोमं सुन्वतो अश्विना।।

卐 क्षत्रञ्जिन्वत मुत जिन्वत.न्नृन् हतं रक्षांसि सेधत.ममीवाः। सजोषसा. उषसा सूर्येण च- सोमं सुन्वतो अश्विना।।

卐 धेनू र्जिन्वत.मुत जिन्वतँ विशो -हतं रक्षांसि सेधत.ममीवाः। सजोषसा उषसा सूर्येण च- सोमं सुन्वतो अश्विना।।

❀06.03.17 卐अत्रेरिव श्रृणुतं पूर्व्यस्तुतिं- श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चा-ऽश्विना तिरोअह्न्यम्।।

卐 सर्गाँइव सृजतं सु॒ष्टुती रुप- श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चा-ऽश्विना तिरोअह्न्यम्।।

卐 रश्मीँरिव यच्छत.मध्वराँ उप- श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण-चाश्विना तिरोअह्न्यम्।।

卐 अर्वा.ग्रथ.न्नि यच्छतं- पिबतं सोम्यं मधु। आ यात.मश्विनाऽऽगत.-मवस्यु र्वामहं हुवे- धत्तं रत्नानि दाशुषे।।

卐 नमोवाके प्रस्थिते अध्वरे नरा- विवक्षणस्य पीतये। आ यात .मश्विनाऽऽगत-मवस्यु र्वामहं हुवे- धत्तं रत्नानि दाशुषे।।

卐 स्वाहाकृतस्य तृम्पतं- सुतस्य देवा वन्धसः। आ यात.मश्विनाऽगत-मवस्यु वामहं हुवे- धत्तं रत्नानि दाशुषे।।

8.36 अवितासीति सप्तर्चस्य सूक्तस्याऽत्रेय श्श्यावाश्व- इन्द्र-श्शक्र-
र्यन्त्या महापङ्क्तिः।।

❀06.03.18 卐अविताऽसि सुन्वतो वृक्तबर्हिषः- पिबा सोमं मदाय कं शतक्रतो~। यन्ते भाग मधारय -न्विश्वा स्सेहानः पृतना^- उरु ज्रय स्समप्सुजि -न्मरुत्वा॰ इन्द्र सत्पते।।

卐 प्राव स्तोतारं मघवन्नव त्वां –पिबा सोमं मदाय कं शतक्रतो~। यन्ते भाग मधारय -न्विश्वा स्सेहानः पृतना^- उरु ज्रय स्समप्सुजि -न्मरुत्वा॰ इन्द्र सत्पते।।

卐 ऊर्जा देवा॰ अवस्योजसा त्वां –पिबा सोमं मदाय कं शतक्रतो~। यन्ते भाग मधारय -न्विश्वा स्सेहानः पृतना^- उरु ज्रय स्समप्सुजि -न्मरुत्वा॰ इन्द्र सत्पते।।

卐 जनिता दिवो जनिता पृथिव्याः- पिबा सोमं मदाय कं शतक्रतो~। यन्ते भाग मधारय -न्विश्वा स्सेहानः पृतना^- उरु ज्रय स्समप्सुजि -न्मरुत्वा॰ इन्द्र सत्पते।।

卐 जनिताऽश्वानाञ्जनिता गवामसि- पिबा सोमं मदाय कं शतक्रतो~। यन्ते भाग मधारय -न्विश्वा स्सेहानः पृतना^- उरु ज्रय स्समप्सुजि -न्मरुत्वा॰ इन्द्र सत्पते।।

卐 अत्रीणां स्तोम मद्रिवो महस्कृधि- पिबा सोमं मदाय कं शतक्रतो~। यन्ते भाग मधारय -न्विश्वा स्सेहानः पृतना^- उरु ज्रय स्समप्सुजि -न्मरुत्वा॰ इन्द्र सत्पते।।

卐 श्यावाश्वस्य सुन्वत स्तथा श्रृणु- यथाऽश्रृणो रत्रेः कर्माणि कृण्वतः। प्र त्रसदस्यु माविथ- त्वमेक इन्नृषाह्य- इन्द्र ब्रह्माणि वर्धयन्न्।।

8.37 प्रेद मिति सप्तर्चस्य सूक्तस्याऽत्रेय श्श्यावाश्व- इन्द्रो- महापङ्क्तिराद्याऽतिजगती।।

❀06.03.19 卐प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ- प्र सुन्वत श्शचीपत- इन्द्र विश्वाभि रूतिभिः। माध्यन्दिनस्य सवनस्य- वृत्रहन्ननेद्य- पिबा सोमस्य वज्रिवः।।

卐 सेहान^ उग्र पृतना^- अभि द्रुह श्शचीपत- इन्द्र विश्वाभि रूतिभिः। माध्यन्दिनस्य सवनस्य- वृत्रहन्ननेद्य- पिबा सोमस्य वज्रिवः।।

卐 एकराळस्य भुवनस्य- राजसि- शचीपत- इन्द्र विश्वाभि रूतिभिः। माध्यन्दिनस्य सवनस्य- वृत्रहन्ननेद्य- पिबा सोमस्य वज्रिवः।।

卐 सस्थावाना यवयसि- त्वमेक इच्छचीपत- इन्द्र विश्वाभि रूतिभिः। माध्यन्दिनस्य सवनस्य- वृत्रहन्ननेद्य- पिबा सोमस्य वज्रिवः।।

卐 क्षेमस्य च प्रयुजश्च- त्वमीशिषे शचीपत- इन्द्र विश्वाभि रूतिभिः। माध्यन्दिनस्य सवनस्य- वृत्रहन्ननेद्य- पिबा सोमस्य वज्रिवः।।

卐 क्षत्राय त्वमवसि न- त्वमाविथ शचीपत- इन्द्र विश्वाभि रूतिभिः। माध्यन्दिनस्य सवनस्य- वृत्रहन्ननेद्य- पिबा सोमस्य वज्रिवः।।

卐 श्यावाश्वस्य रेभत स्तथा श्रृणु यथाऽश्रृणो रत्रेः कर्माणि कृण्वतः। प्र त्रसदस्यु माविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन्न्।।

8.38 यज्ञस्येति दशर्चस्य सूक्तस्याऽऽत्रेयश्श्यावाश्व- इन्द्राग्नी- गायत्री।।

06.03.20 卐यज्ञस्य हि स्थ ऋत्विजा- सस्नी~ वाजेषु कर्मसु। इन्द्राग्नी ~तस्य बोधतम्।।

卐 तोशासा रथयावाना- वृत्रहणा ऽपराजिता। इन्द्राग्नी~ तस्य बोधतम्।।

卐 इदँ वां मदिरं मध्व-ऽधुक्षन्नद्रिभि नरः। इन्द्राग्नी~ तस्य बोधतम्।।

卐 जुषेथाँ यज्ञ मिष्टये- सुतं सोमं सधस्तुती~। इन्द्राग्नी~ आ गतन्नरा।।

卐 इमा जुषेथां सवना- येभि र्हव्या न्यूहथुः। इन्द्राग्नी~ आ गतन्नरा।।

卐 इमा.ङ्गायत्रवर्तनि-ञ्जुषेथां सुष्टुतिं मम। इन्द्राग्नी~ आ गतन्नरा।।

06.03.21 卐प्रातर्यावभि रागत- न्देवेभि र्जेन्यावसू~। इन्द्राग्नी~ सोमपीतये।।

卐 श्यावाश्वस्य सुन्वतो-ऽत्रीणां श्रृणुतं हवम्। इन्द्राग्नी~ सोमपीतये।।

卐 एवा वामह्व ऊतये- यथाऽहुवन्त मेधिराः। इन्द्राग्नी~ सोमपीतये।।

卐 आऽहं सरस्वतीवतो- रिन्द्राग्न्यो रवो वृणे। याभ्याङ्गायत्र मृच्यते।।

8.39 अग्निमिति दशर्चस्य सूक्तस्य, काण्वो नाभाकोऽग्नि-र्महापङ्क्तिः।।

06.03.22 卐अग्नि मस्तो ष्यृग्मियं. -मग्नि मीळा यजध्यै। अग्नि र्देवा९ अनक्तु न- उभे~ हि विदथे~ कवि- रन्त~ श्चरति दूत्य1(अ)-न्नभन्ता.मन्यके समे।।

卐 न्यग्ने नव्यसा वचः स्तनूषु शंस मेषाम्। न्यराती रराव्णाँ- विश्वा अर्यो अराती- रितो युच्छ न्त्वामुरो- नभन्ता मन्यके समे।।

卐 अग्ने मन्मानि तुभ्यङ्क-ङ्घृतन्न जुह्व आसनि। स देवेषु प्र चिकिद्धि- त्वं ह्यसि पूर्व्य श्शिवो- दूतो विवस्वतो- नभन्ता मन्यके समे।।

卐 तत्तदग्नि र्वयो दधे- यथायथा कृपण्यति। ऊर्जाऽऽहुति र्वसूनां- शञ्च योश्च मयो दधे- विश्वस्यै देवहूत्यै- नभन्ता मन्यके समे।।

卐 स चिकेत सहीयसा-ऽग्नि श्चित्रेण कर्मणा। स होता शश्वतीना.- न्दक्षिणाभि रभीवृत- इनोति च प्रतीव्य1(अ)-न्नभन्ता मन्यके समे।।

❀06.03.23 卐अग्नि र्जाता देवाना.- मग्नि र्वेद मर्ताना मपीच्यम्। अग्नि स्स द्रविणोदा^- अग्नि र्द्वारा व्यूर्णुते- स्वाहुतो नवीयसा- नभन्ता मन्यके समे।।

卐 अग्नि र्देवेषु संवसु- स्स विक्षु यज्ञियास्वा। स मुदा काव्या पुरु- विश्वं भूमेव पुष्यति- देवो देवेषु यज्ञियो- नभन्ता मन्यके समे।।

卐 यो अग्नि स्सप्तमानुष- श्श्रितो विश्वेषु सिन्धुषु। तमाऽगन्म त्रिपस्त्यं- मन्धातु र्दस्युहन्तम.- मग्निँ यज्ञेषु पूर्व्य.-न्नभन्ता मन्यके समे।।

卐 अग्नि स्त्रीणि त्रिधातू-ऽऽन्या क्षेति विदथा कविः। स त्रीꣳ रेकादशाꣳ इह -यक्षच्च पिप्रयच्च नो- विप्रो दूतꣳ परिष्कृतो- नभन्ता मन्यके समे।।

卐 त्वन्नो अग्न आयुषु- त्वन्देवेषु पूर्व्य- वस्व^ एक^ इरज्यसि। त्वामापꣳ परिस्रुतꣳ- परि यन्ति स्वसेतवो -नभन्ता मन्यके समे।।

🏺 8.40 इन्द्राग्नी इति द्वादशर्चस्य सूक्तस्य, काण्वो नाभाक- इन्द्राग्नी- महापन्क्ति-र्द्वितीया शक्क-र्यन्त्या त्रिष्टुप्।।

❀06.03.24 卐इन्द्राग्नी~ युवं सु न- स्सहन्ता दासथो रयिम्। येन दृꣳहा समत्स्वा- वीळु चित्साँहिषीम-ह्यग्नि र्वनेव वात इ-न्नभन्ता मन्यके समे।।

卐 नहि वाँ वव्रयामहे-ऽथेन्द्र मिद्यजामहे- शविष्ठ न्नृणान्नरम्। स नꣳ कदा चिदर्वता- गमदा वाजसातये- गमदा मेधसातये- नभन्ता मन्यके समे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 ता हि मध्यं भराणा.-मिन्द्राग्नी~ अधिक्षितः। ता उ कवित्वना कवी~ पृच्छ्यमाना सखीयते- सन्धीत मश्नुतन्नरा नभन्ता मन्यके समे।।

卐 अभ्यर्च नभाकव-.दिन्द्राग्नी~ यजसा गिरा। ययो र्विश्वमिदञ्जग -दियन्द्यौः पृथिवी मह्यु1(उ)-पस्थे बिभृतो वसु नभन्ता मन्यके समे।।

卐 प्र ब्रह्माणि नभाकव -दिन्द्राग्निभ्या मिरज्यत। या सप्तबुध्न मर्णव-ञ्जिह्मबार मपोर्णुत^ - इन्द्र^ ईशान^ ओजसा -नभन्ता मन्यके समे।।

卐 अपि वृश्च पुराणव- द्व्रततेरिव गुष्पित- मोजो दासस्य दम्भय। वय न्तदस्य संभृतँ- वस्विन्द्रेण वि भजेमहि- नभन्ता मन्यके समे।।

❀06.03.25 卐यदिन्द्राग्नी~ जना^ इमे- विह्वयन्ते तना गिरा। अस्माकेभि र्नृभि र्वयं- सासह्याम पृतन्यतो- र्वनुयाम वनुष्यतो -नभन्ता मन्यके समे।।

卐 या नु श्वेताववो दिव^- उच्चरात उप द्युभिः। इन्द्राग्न्यो रनु व्रत.- मुहाना यन्ति सिन्धवो- यान्त्सीं बन्धा दमुञ्चता.-न्नभन्ता मन्यके समे।।

卐 पूर्वीष्ट इन्द्रोपमातयः- पूर्वी रुत प्रशस्तय- स्सूनो~ हिन्वस्य हरिवः। वस्वो वीरस्याऽऽपृचो- या नु साधन्त नो धियो- नभन्ता मन्यके समे।।

卐 तं शिशीता सुवृक्तिभि- स्त्वेषं सत्वान मृग्मियम्। उतो~ नु चिद्य ओजसा -शुष्णस्याऽऽण्डानि भेदति- जेष त्स्वर्वती रपो- नभन्ता मन्यके समे।।

卐 तं शिशीता स्वध्वरं- सत्यं सत्वान .मृत्वियम्। उतो~ नु चिद्य ओहत -आण्डा शुष्णस्य भेद-त्यजै स्स्वर्वती रपो- नभन्ता मन्यके समे।।

卐 एवेन्द्राग्निभ्यां पितृवन्नवीयो- मन्धातृव दङ्गिरस्व दवाचि। त्रिधातुना शर्मणा पात मस्मा- न्वयं स्याम पतयो रयीणाम्।।

8.41 अस्मा ऊष्विति दशर्चस्य सूक्तस्य, काण्वो नाभाको- वरुणो- महापङ्क्तिः।।

❀06.03.26 卐अस्मा ऊ षु प्रभूतये- वरुणाय मरुद्भ्यो-ऽर्चा विदुष्टरेभ्यः। यो धीता मानुषाणां- पश्वो गाइव रक्षति- नभन्ता मन्यके समे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 तमू षु समना गिरा- पितृणाञ्च मन्मभिः। नाभाकस्य प्रशस्तिभि -र्यस्सिन्धूना मुपोदये- सप्तस्वसा स मध्यमो -नभन्ता मन्यके समे।।

卐 स क्षपः परि षस्वजे- न्यु1(उ)स्रो मायया दधे- स विश्वं परि दर्शतः। तस्य वेनी रनु व्रत.- मुष स्तिस्रो अवर्धय-न्नभन्ता मन्यके समे।।

卐 यः ककुभो निधारयः- पृथिव्या.मधि दर्शतः। स माता पूर्व्यं पद .-न्तद्वरुणस्य सत्यं- स हि गोपाइवेर्यो- नभन्ता मन्यके समे।।

卐 यो धर्ता भुवनानाँ- य^ उस्राणा मपीच्या3(आ)- वेद नामानि गुह्या। स कविः काव्या पुरु- रूप न्द्यौरिव पुष्यति- नभन्तामन्यके समे।।

❀06.03.27 卐यस्मि न्विश्वानि काव्या- चक्रे नाभिरिव श्रिता। त्रितञ्जूती सपर्यत- व्रजे गावो न सँयुजे- युजे अश्वाँ अयुक्षत -नभन्ता मन्यके समे।।

卐 य^ आस्वत्क^ आशये- विश्वा जातान्येषाम्। परि धामानि मर्मृश- द्वरुणस्य पुरो गये- विश्वे देवा अनु व्रत-.न्नभन्ता मन्यके समे।।

卐 स समुद्रो अपीच्य- स्तुरो द्यामिव रोहति- नि यदासु यजु र्दधे। स माया^ अर्चिना पदा-ऽस्तृणा न्नाक माऽरुह-न्नभन्ता मन्यके समे।।

卐 यस्य श्वेता विचक्षणा- तिस्रो भूमी रधिक्षितः। त्रिरुत्तराणि पप्रतु- र्वरुणस्य ध्रुवं सद- स्स सप्ताना मिरज्यति नभन्ता मन्यके समे।।

卐 यश्श्वेताँ अधिनिर्णिज- श्चक्रे कृष्णाँ अनु व्रता। स धाम पूर्व्यं ममे- य स्स्कम्भेन वि रोदसी- अजो न द्या मधारय-न्नभन्ता मन्यके समे।।

☃ 8.42 अस्तभ्नादिदिति षड्चस्य सूक्तस्य, काण्वो नाभाक ऋषि-रन्त्यानां तिसृणामात्रेयार्चनाना ऋषि-राद्यानांतिसृणां वरुणोऽन्त्यानां तिसृणामश्विनौ-आद्यास्तिस्रस्त्रिष्टुभोऽन्त्यास्तिस्रोऽनुष्टुभः।।

❀06.03.2 卐अस्तभ्ना द्यामसुरो विश्ववेदा^- अमिमीत वरिमाणं पृथिव्याः। आसीद द्विश्वा भुवनानि सम्रा-ड्विश्वेत्तानि वरुणस्य व्रतानि।।

卐 एवा वन्दस्व वरुणं बृहन्त-न्नमस्या धीर .ममृतस्य गोपाम्। स न श्शर्म त्रिवरूथँ वि यंस -त्पात न्नो द्यावापृथिवी~ उपस्थे।।

卐 इमा न्धियं शिक्षमाणस्य देव- क्रतु न्दक्षँ वरुण सं शिशाधि। ययाऽति विश्वा दुरिता तरेम- सुतर्माण. मधि नावं रुहेम।।

卐 आ वाङ्गावाणो अश्विना- धीभि र्विप्रा^ अचुच्यवुः। नासत्या सोमपीतये- नभन्ता मन्यके समे।।

卐 यथा वा मत्रि रश्विना- गीर्भि र्विप्रो अजोहवीत्। नासत्या सोमपीतये नभन्ता मन्यके समे।।

卐 एवा वामह्व ऊतये- यथाऽहुवन्त मेधिराः। नासत्या सोमपीतये नभन्ता मन्यके समे।।

8.43 इमे विप्रस्येति त्रयस्त्रिंशदृचस्य सूक्तस्याऽऽङ्गिरसो- विरूपोऽग्नि-र्गायत्री।।

❀06.03.29 卐इमे विप्रस्य वेधसो-ऽग्ने रस्तृतयज्वनः। गिर स्स्तोमास^ ईरते।।

卐 अस्मै ते प्रतिहर्यते- जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्।।

卐 आरोकाइव घेदह- तिग्मा^ अग्ने तव त्विषः। दद्भि र्वनानि बप्सति।।

卐 हरयो धूमकेतवो- वातजूता^ उप द्यवि। यतन्ते वृथ गग्नयः।।

卐 एते त्ये वृथ गग्नय^- इद्धास स्समदृक्षत। उषसामिव केतवः।।

❀06.03.31 卐कृष्णा रजांसि पत्सुतः- प्रयाणे जातवेदसः। अग्नि र्यद्रोधति क्षमि।।

卐 धासिं.ङ्कृण्वान^ ओषधी- र्बप्स दग्निर्न वायति। पुनर्य न्तरुणी रपि।।

卐 जिह्वाभि रह नन्नम- दर्चिषा जञ्जणाभवन्न्। अग्नि र्वनेषु रोचते।।

卐 अप्स्वग्ने सधि ष्टव- सौषधी रनु रुध्यसे। गर्भे सञ्जायसे पुनः~।।

卐 उदग्ने तव तद्घृता- दर्ची रोचत आहुतम्। निंसानञ्जुह्वो3(ओ) मुखे।।

❀06.03.31 卐उक्षान्नाय वशाऽन्नाय- सोमपृष्ठाय वेधसे। स्तोमै र्विधेमाऽग्नये।।

卐 उत त्वा नमसा वयं- होत र्वरेण्यक्रतो~। अग्ने समिद्भि रीमहे।।

卐 उत त्वा भृगुवच्छुचे- मनुष्व दग्न आहुत। अङ्गिरस्व द्धवामहे।।

卐 त्वं ह्यग्ने अग्निना- विप्रो विप्रेण सन्त्सता। सखा सख्या समिध्यसे।।

卐 स त्वँ विप्राय दाशुषे- रयि न्देहि सहस्रिणम्। अग्ने वीरवती मिषम्।।

❀06.03.32 卐अग्ने भ्रात~ स्सहस्कृत- रोहिदश्व शुचिव्रत। इमं स्तोमञ्जुषस्व मे।।

卐 उत त्वाऽग्ने मम स्तुतो- वाश्राय प्रतिहर्यते। गोष्ठङ्गावइवाऽऽशत।।

卐 तुभ्यन्ता^ अङ्गिरस्तम- विश्वा स्सुक्षितयः पृथक्। अग्ने कामाय येमिरे।।

卐 अग्नि न्धीभि र्मनीषिणो- मेधिरासो विपश्चितः। अद्मसद्याय हिन्विरे।।
卐 तन्त्वामज्मेषु वाजिन.- न्तन्वाना^ अग्ने अध्वरम्। वह्निं होतार मीळते।।
❀06.03.33 卐पुरुत्रा हि सदृङ्ङसि- विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे।।
卐 तमीळिष्व य^ आहुतो-ऽग्नि र्विभ्राजते घृतैः। इमन्नः श्शृणव द्धवम्।।
卐 तन्त्वा वयं हवामहे- श्शृण्वन्तञ्जातवेदसम्। अग्ने घ्नन्त .मप द्विषः।।
卐 विशां राजान मद्भुत.- मध्यक्ष न्धर्मणा मिमम्। अग्नि मीळे स उ श्रवत्।।
卐 अग्निँ विश्वायुवेपसं- मर्यन्न वाजिनं हितम्। सप्तिन्न वाजयामसि।।
❀06.03.34 卐घ्नन्मृध्राण्यप द्विषो- दह त्रक्षांसि विश्वहा। अग्ने तिग्मेन दीदिहि।।
卐 यन्त्वा जनास इन्धते- मनुष्व दङ्गिरस्तम। अग्ने स बोधि मे वचः।।
卐 यदग्ने दिविजा^ अस्य-ऽप्सुजा^ वा सहस्कृत। तन्त्वा गीर्भि र्हवामहे।।
卐 तुभ्यङ्घेत्ते जना^ इमे- विश्वा स्सुक्षितयः पृथक्। धासिं हिन्वन्त्यत्तवे।।
卐 ते घेदग्ने स्वाध्यो-ऽहा विश्वा नृचक्षसः। तरन्त स्स्याम दुर्गहा।।
❀06.03.35 卐अग्निं मन्द्रं पुरुप्रियं- शीरं पावकशोचिषम्। हृद्भि र्मन्द्रेभि रीमहे।।
卐 स त्वमग्ने विभावसु- स्सृजन्त्सूर्यो न रश्मिभिः। शर्ध न्तमांसि जिघ्नसे।।
卐 तत्ते सहस्व^ ईमहे- दात्रँ यन्नोपदस्यति। त्वदग्ने वार्यँ वसु।।
8.44 समिधाग्निमिति त्रिंशदृचस्य सूक्तस्याऽऽङ्गिरसो- विरूपोऽग्नि-र्गायत्री।।
❀06.03.36 卐समिधाऽग्नि न्दुवस्यत- घृतै र्बोधयतातिथिम्। आऽस्मिन्हव्या जुहोतन।।
卐 अग्ने स्तोमञ्जुषस्व मे- वर्धस्वाऽनेन मन्मना। प्रति सूक्तानि हर्य नः।।
卐 अग्नि न्दूतं पुरो दधे- हव्यवाह. मुप ब्रुवे। देवाः आ सादया दिह।।
卐 उत्ते बृहन्तो अर्चय- स्समिधानस्य दीदिवः। अग्ने शुक्रास^ ईरते।।
卐 उप त्वा जुह्वो3(ओ) मम- घृताची र्यन्तु हर्यत। अग्ने हव्या जुषस्व नः।।
❀06.03.37 卐मन्द्रं होतार मृत्विज-श्चित्रभानुँ विभावसुम्। अग्नि मीळे स उ श्रवत्।।
卐 प्रत्नं होतार मीड्य-ञ्जुष्ट.मग्निङ्कविक्रतुम्। अध्वराणा.मभिश्रियम्।।
卐 जुषाणो अङ्गिरस्त- मेमा हव्यान्यानुषक्। अग्ने यज्ञन्नय ऋतुथा।।

卐 समिधान^ उ सन्त्य- शुक्रशोच इहा ऽऽवह। चिकित्वा न्दैव्यञ्जनम्।।

卐 विप्रं होतार मद्रुह- न्धूमकेतुं विभावसुम्। यज्ञानाङ्केतु मीमहे।।

❀06.03.38 卐अग्ने नि पाहि नस्त्वं- प्रति ष्म देव रीषतः। भिन्धि द्वेष स्सहस्कृत।।

卐 अग्निः प्रत्नेन मन्मना- शुम्भान स्तन्व1(अं) स्वाम्। कवि र्विप्रेण वावृधे।।

卐 ऊर्जो नपात.मा ऽऽहुवे-ऽग्निं पावकशोचिषम्। अस्मि न्यज्ञे स्वध्वरे।।

卐 स नो मित्रमह- स्त्वमग्ने शुक्रेण शोचिषा। देवै रासत्सि बर्हिषि।।

卐 यो अग्नि न्तन्वो3(ओ) दमे- देवं मर्त स्सपर्यति। तस्मा इद्दीदय द्वसु।।

❀06.03.39 卐अग्नि मूर्धा दिवः- ककुत्पतिः पृथिव्या^ अयम्। अपां रेतांसि जिन्वति।।

卐 उदग्ने शुचय स्तव- शुक्रा^ भ्राजन्त^ ईरते। तव ज्योतींष्यर्चयः।।

卐 ईशिषे वार्यस्य हि- दात्रस्याऽग्ने स्वर्पतिः। स्तोता स्यान्तव शर्मणि।।

卐 त्वामग्ने मनीषिण- स्त्वां हिन्वन्ति चित्तिभिः। त्वाँ वर्धन्तु नो गिरः।।

卐 अदब्धस्य स्वधावतो -दूतस्य रेभत स्सदा। अग्ने स्सख्यँ वृणीमहे।।

❀06.03.40 卐अग्नि श्शुचिव्रततम- श्शुचि र्विप्र श्शुचिः कविः। शुची रोचत आहुतः।।

卐 उत त्वा धीतयो मम- गिरो वर्धन्तु विश्वहा। अग्ने सख्यस्य बोधि नः।।

卐 यदग्ने स्यामह .-न्त्वन्त्वँ वा घा स्या^ अहम्। स्युष्टे सत्या^ इहाऽऽशिषः।।

卐 वसु र्वसुपति र्हि कम.-ऽस्यग्ने विभावसुः। स्याम ते सुमतावपि।।

卐 अग्ने धृतव्रताय ते- समुद्रायेव सिन्धवः। गिरो वाश्रास^ ईरते।।

❀06.03.41 卐युवानँ विश्पतिङ्कविँ- विश्वादं पुरुवेपसम्। अग्निं शुम्भामि मन्मभिः।।

卐 यज्ञानां रथ्ये वय.-न्तिग्मजम्भाय वीळवे। स्तोमै रिषेमाऽग्नये।।

卐 अय मग्ने त्वे अपि- जरिता भूतु सन्त्य। तस्मै पावक मृळय।।

卐 धीरो ह्यस्यद्मस-द्विप्रो न जागृवि स्सदा। अग्ने दीदयसि द्यवि।।

卐 पुराऽग्ने दुरितेभ्यः- पुरा मृध्रेभ्यः कवे। प्र ण आयु र्वसो~ तिर।।

8.45 आ घा य इति द्विचत्वारिंशदृचस्य सूक्तस्य, काण्वस्त्रिशोक- इन्द्र- आद्याया अग्नीन्द्रा- गायत्री।।

❀06.03.42 卐आ घा ये अग्निमिन्धते- स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा।।

卐 बृहन्नि दिध्म^ एषां- भूरि शस्तं पृथु स्स्वरुः। येषा मिन्द्रो युवा सखा।।

卐 अयुद्ध^ इद्युधा वृतं- शूर आजति सत्वभिः। येषा मिन्द्रो युवा सखा।।

卐 आ बुन्दँ वृत्रहा ददे- जातः पृच्छद्वि मातरम्। क उग्राः के ह श्वण्विरे।।

卐 प्रति त्वा शवसी वेद-द्गिरा वप्सो न योधिषत्। यस्ते शत्रुत्व माचके।।

❀06.03.43 卐उत त्वं मघवञ्छृणु- यस्ते वष्टि ववक्षि तत्। यद्वीळयासि वीळु तत्।।

卐 यदाजिँ यात्याजिकृ -दिन्द्र स्स्वश्वयु रुप। रथीतमो रथीनाम्।।

卐 वि षु विश्वा^ अभियुजो- वज्रि न्विष्व ग्यथा वृह। भवा न स्सुश्रवस्तमः।।

卐 अस्माकं सु रथं पुर- इन्द्रः कृणोतु सातये। न य न्धूर्वन्ति धूर्तयः।।

卐 वृज्याम ते परि द्विषो-ऽरन्ते शक्र दावने। गमेमे दिन्द्र गोमतः।।

❀06.03.44 卐शनैश्चि द्यन्तो अद्रिवो-ऽश्वावन्त श्शतग्विनः। विवक्षणा^ अनेहसः।।

卐 ऊर्ध्वा^ हि ते दिवेदिवे- सहस्रा सूनृता शता। जरितृभ्यो विमंहते।।

卐 विद्मा हि त्वा धनञ्जय.-मिन्द्र दृळ्हा चिदारुजम्। आदारिणँ यथा गयम्।।

卐 ककुहश्चित्त्वा कवे- मन्दन्तु धृष्ण~विन्दवः। आ त्वा पणिँ यदीमहे।।

卐 यस्ते रेवाꣳ अदाशुरिः- प्रममर्ष मघत्तये। तस्य नो वेद आ भर।।

❀06.03.45 卐इम उ त्वा वि चक्षते- सखाय^ इन्द्र सोमिनः। पुष्टावन्तो यथा पशुम्।।

卐 उत त्वाऽबधिरँ वयं- श्रुत्कर्ण सन्त मूतये। दूरा दिह हवामहे।।

卐 यच्छुश्रूया^ इमं हव.- न्दुर्मर्षञ्चक्रिया^ उत। भवे रापिर्नो अन्तमः।।

卐 यच्चिद्धि ते अपि व्यथि- र्जगन्वांसो अमन्महि। गोदा^ इदिन्द्र बोधि नः।।

卐 आ त्वा रम्भन्न जिव्रयो- ररम्भा शवसस्पते। उश्मसि त्वा सधस्थ आ।।

❀06.03.46 卐स्तोत्र.मिन्द्राय गायत- पुरुनृम्णाय सत्वने। नकि यँ वृण्वते युधि।।

卐 अभि त्वा वृषभा सुते- सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम्।।

卐 मा त्वा मूरा^ अविष्यवो- मोपहस्वान^ आ दभन्न्। माकीं ब्रह्मद्विषो वनः।।

卐 इह त्वा गोपरीणसा- महे मन्दन्तु राधसे। सरो गौरो यथा पिब।।

卐 या वृत्रहा परावति- सना नवा च चुच्युवे। ता संसत्सु प्र वोचत ।।

❀06.03.47 卐अपिब त्कद्रुव स्सुत.-मिन्द्र स्सहस्रबाह्वे। अत्रादेदिष्ट पौंस्यम्।।

卐 सत्य न्तत्तुर्वशे यदौ- विदानो अह्ववाय्यम्। व्यान ड्डुर्वणे शमि।।

卐 तरणिँ वो जनाना- न्त्रदँ वाजस्य गोमतः। समानमुप्र शंसिषम्।।

卐 ऋभुक्षणन्न वर्तव- उक्थेषु तुग्र्यावृधम्। इन्द्रं सोमे सचा सुते।।

卐 यः कृन्त दिद्वियोन्य-न्त्रिशोकाय गिरिं पृथुम्। गोभ्यो गातु न्निरेतवे।।

❀06.03.48 卐यद्दधिषे मनस्यसि- मन्दानः प्रेदियक्षसि। मा तत्क रिन्द्र मृळय।।

卐 दभ्रञ्चिद्धि त्वावतः- कृतं शृण्वे अधि क्षमि। जिगात्विन्द्र ते मनः।।

卐 तवेदु ता स्सुकीर्तयो-ऽसन्नुत प्रशस्तयः। यदिन्द्र मृळयासि नः।।

卐 मा न^ एकस्मि न्नागसि- मा द्वयो रुत त्रिषु। वधी र्मा शूर भूरिषु।।

卐 बिभया हि त्वावत^- उग्रा दभिप्रभङ्गिणः। दस्मा दह मृतीषहः।।

❀06.03.49 卐मा सख्यु श्शूनमा विदे- मा पुत्रस्य प्रभूवसो~। आवृत्व द्भूतु ते मनः।।

卐 को नु मर्या^ अमिथित- स्सखा सखाय मब्रवीत्। जहा को अस्म दीषते।।

卐 एवाऽऽरे वृषभा सुते-ऽसिन्व न्भूर्यावयः। श्वघ्नीव निवता चरन्।।

卐 आ त एता वचोयुजा- हरी~ गृभ्णे सुमद्रथा। यदीं ब्रह्मभ्य इद्ददः।।

卐 भिन्धि विश्वा^ अप द्विषः- परि बाधो जही मृधः। वसु स्पार्ह न्तदा भर।।

卐 यद्वीळाविन्द्र यत्स्थिरे- यत्पर्शाने पराभृतम्। वसु स्पार्ह न्तदा भर।।

卐 यस्य ते विश्वमानुषो- भूरे र्दत्तस्य वेदति। वसु स्पार्ह न्तदा भर।।

卐 ।। इति तृतीयाध्याय स्समाप्तः।।

## षष्ठाष्टके चतुर्थाध्यायः (वर्गाः 1-54)

8.46 त्वावत इति त्रयस्त्रिंशदृचस्य सूक्तस्याश्व्यो वश ऋषिः-पृथुश्रवा देवता-आद्यानां विंशत्यृचा-मिन्द्रो देवता-आ नो वायवित्यादि चतसृणां शतं दास इत्यस्याश्च वायुर्देवता-आद्या पादनिचृत्-द्वितीयादि तिस्रो गायत्र्यः- पञ्चम्याद्याः क्रमेण ककुब्गायत्री बृहत्यनुष्टुप्-सतोबृहती- गायत्री- बृहती-विपरीता- द्विपदागायत्री- बृहती- पिपीलिकमध्या ककुम्न्यङ्कुशिरा विराड्-जग-त्युपरिष्टाद्बृहती- बृहती-

विषमपदाबृहती- पङ्क्ति-संस्तार पङ्क्ति- गायत्री- पङ्क्ति-बृहती- सतोबृहती- बृहती- सतोबृहती- गायत्री- द्विपदाविराडुष्णिक्- पङ्क्ति- गायत्र्यः- (पृथुश्रवाः कानीतो राजा तस्य दानस्तुतिः)।।

❀06.04.01 卐त्वावतः पुरूवसो~- वय मिन्द्र प्रणेतः। स्मसि स्थात हरीणाम्।।

卐 त्वां हि सत्य मद्रिवो- विद्म दातार मिषाम्। विद्म दातारं रयीणाम्।।

卐 आ यस्य ते महिमानं- शतमूते शतक्रतो~। गीर्भि गृणन्ति कारवः।।

卐 सुनीथो घा स मर्त्यो- यं मरुतो यमर्यमा। मित्रः पान्त्यद्रुहः।।

卐 दधानो गोम दश्वव -त्सुवीर्य मादित्यजूत एधते। सदा राया पुरुस्पृहा।।

❀06.04.02 卐तमिन्द्र न्दान मीमहे- शवसान मभीर्वम्। ईशानं राय ईमहे।।

卐 तस्मि न्हि सन्त्यूतयो- विश्वा^ अभीरव स्सचा। तमा वहन्तु सप्तयः पुरूवसुं- मदाय हरय स्सुतम्।।

卐 यस्ते मदो वरेण्यो- य^ इन्द्र वृत्रहन्तमः। य^ आददि स्व1(अ)र्नृभि-र्यः पृतनासु दुष्टरः।।

卐 यो दुष्टरो विश्ववार श्रवाय्यो- वाजेष्वस्ति तरुता। स न श्शविष्ठ सवना ऽऽवसो~ गहि- गमेम गोमति व्रजे।।

卐 गव्यों षु णो यथा पुरा-ऽश्वयोत रथया। वरिवस्य महामह।।

❀06.04.03 卐नहि ते शूर राधसो-ऽन्तँ विन्दामि सत्रा। दशस्या नो मघवन्नू चिदद्रिवो- धियो वाजेभि राविथ।।

卐 य^ ऋष्व श्श्रावयत्सखा- विश्वेत्स वेद जनिमा पुरुष्टुतः। तँ विश्वे मानुषा युगे-न्द्रं हवन्ते तविषँ यतस्रुचः।।

卐 स नो वाजे ष्ववितां पुरूवसुः- पुरस्स्थाता मघवा वृत्रहा भुवत्।।

卐 अभि वो वीर मन्धसो मदेषु- गाय गिरा महा विचेतसम्। इन्द्र न्नाम श्रुत्यं- शाकिनँ वचो यथा।।

卐 ददी रेक्ण स्तन्वे ददि र्वसु- ददि र्वाजेषु पुरुहूत वाजिनम्। नून.मथ।।

❀06.04.04 卐विश्वेषा.मिरज्यन्तँ वसूनां- सासह्वांस ञ्चिदस्य वर्पसः। कृपयतो नून.मत्यथ।।

卐 मह स्सु वो अरमिषे स्तवामहे- मीळ्हुषे अरङ्गमाय जग्मये। यज्ञेभि र्गीर्भि र्विश्वमनुषां- मरुता मियक्षसि- गाये त्वा नमसा गिरा।।

卐 ये पातयन्ते अज्मभि- र्गिरीणां स्नुभि रेषाम्। यज्ञं महिष्वणीनां- सुम्न न्तुविष्वणीनां प्राध्वरे।।

卐 प्रभङ्ग न्दुर्मतीना.-मिन्द्र शविष्ठाऽभर। रयि मस्मभ्यँ युज्यञ्चोदयन्मते- ज्येष्ठ ञ्चोदयन्मते।।

卐 सनित~ स्सुसनित- रुग्र चित्र चेतिष्ठ सूनृत। प्रासहा सम्राड्डहुरि सहन्तं -भुज्युँ वाजेषु पूर्व्यम्।।

❀06.04.05 卐आ स एतु^ य ईवदा॰- अदेव॰ पूर्त माददे। यथा चिद्वशो अश्व्य॰ पृथुश्रवसि-कानीते3(ए)ऽस्या व्युष्याददे।।

卐 षष्टिं सहस्राऽश्व्यस्यायुतासन.मुष्ट्रानाँ विंशतिं शता। दश श्यावीनां शता दश त्र्यरुषीणा.-न्दश गवां सहस्रा।।

卐 दश श्यावा^ ऋधद्रयो- वीतवारास^ आशवः। मथ्रा^ नेमि.न्नि वावृतुः।।

卐 दानास॰ पृथुश्रवस॰- कानीतस्य सुराधसः। रथं हिरण्यय न्दद- न्मंहिष्ठ स्सूरि रभू -द्वर्षिष्ठ मकृत श्रवः।।

卐 आ नो वायो~ महे तने- याहि मखाय पाजसे। वयं हि ते चकृमा भूरि दावने- सद्यश्चि न्महि दावने।।

❀06.04.06 卐यो अश्वेभि र्वहते वस्त उस्रा- स्त्रिस्सप्त सप्ततीनाम्। एभि स्सोमेभि स्सोमसुद्भि स्सोमपा^- दानाय शुक्रपूतपाः।।

卐 यो म इमञ्चिदु त्मना-ऽमन्दच्चित्र न्दावने। अरट्वे अक्षे नहुषे सुकृत्वनि- सुकृत्तराय सुक्रतुः।।

卐 उचथ्ये3(ए) वपुषि य स्स्वरा-ळुत वायो~ घृतस्नाः। अश्वेषितं रजेषितं शुनेषितं- प्राज्म तदिदन्नु तत्।।

卐 अध प्रिय मिषिराय- षष्टिं सहस्राऽसनम्। अश्वाना.मिन्न वृष्णाम्।।

卐 गावो न यूथ.मुप यन्ति वध्रय^- उप माऽयन्ति वध्रयः।।

卐 अध यच्चारथे गणे- शत मुष्ट्रा॰ अचिक्रदत्। अध श्वित्नेषु विंशतिं शता।।

卐 शत न्दासे बल्बूथे- विप्र स्तरुक्ष आ ददे। ते ते वाय~ विमे जना^- मदन्तीन्द्रगोपा- मदन्ति देवगोपाः।।

卐 अध स्या योषणा मही- प्रतीची वशमश्व्यम्। अधिरुक्मा वि नीयते।।

8.47 महि व इत्यष्टादशर्चस्य सूक्तस्याऽऽप्त्यस्त्रित- आदित्या- अन्त्यपञ्चानामादित्योषसो- महापङ्क्तिः- (अन्त्याः पञ्च दुस्स्वप्नघ्न्यः)।।

❀06.04.07 卐महि वो महता मवो- वरुण मित्र दाशुषे। यमादित्या अभि द्रुहो- रक्षथा नेमघन्नश – दऽनेहसो व ऊतय -स्सुऊतयो व ऊतयः।।

卐 विदा देवा^ अघाना-.मादित्यासो अपाकृतिम्। पक्षा वयो यथोपरि- व्य1(अ)स्मे शर्म यच्छता-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

卐 व्य1(अ)स्मे अधि शर्म त-त्पक्षा वयो न यन्तन। विश्वानि विश्ववेदसो -वरूथ्या मनामहे-ऽनेहसो व^ ऊतय -स्सु ऊतयो व^ ऊतयः।।

卐 यस्मा अरासत क्षय-ञ्जीवातुञ्च प्रचेतसः। मनो विश्वस्य घेदिम- आदित्या राय ईशते-ऽनेहसो व^ ऊतय -स्सु ऊतयो व^ ऊतयः।।

卐 परि णो वृणजन्नघा- दुर्गाणि रथ्यो यथा। स्यामेदिन्द्रस्य शर्मण्या-ऽऽदित्याना मुतावस्य-ऽनेहसो व^ ऊतय- स्सुऊतयो व^ ऊतयः।।

❀06.04.08 卐परिह्वृते दना जनो- युष्मादत्तस्य वायति। देवा अदभ्रमाश वो- यमादित्या अहेतना-ऽनेहसो व^ ऊतय -स्सु ऊतयो व^ ऊतयः।।

卐 न त न्तिग्मञ्चन त्यजो- न द्रास दभि त ङ्गुरु। यस्मा उ शर्म सप्रथ- आदित्यासो अराध्व.-मनेहसो व^ ऊतय- स्सुऊतयो व^ ऊतयः।।

卐 युष्मे देवा अपि ष्मसि- युध्यन्तइव वर्मसु। यूयं महो न एनसो- यूयमर्भा दुरुष्यता-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

卐 अदिति र्न^ उरुष्य –त्वऽदिति श्शर्म यच्छतु। माता मित्रस्य रेवतो-ऽर्यम्णो वरुणस्य चा-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

卐 यद्देवा श्शर्म शरणँ- यद्भद्रँ यदनातुरम्। त्रिधातु यद्वरूथ्य1(अ) -न्तदस्मासु वि यन्तना-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

❀06.04.09 卐आदित्या^ अव हि ख्यता-ऽधि कूलादिव स्पशः। सुतीर्थ मर्वतो यथा-ऽनु नो नेषथा सुग.-मनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

卐 नेह भद्रं रक्षस्विने-नाऽवयै नोपया उत। गवे च भद्र न्धेनवे-वीराय च श्रवस्यते-ऽनेहसो व^ ऊतय -स्सु ऊतयो व^ ऊतयः।।

卐 यदावि यंदपीच्यं1(अ)-न्देवासो अस्ति दुष्कृतम्। त्रिते तद्विश्वं.माप्त्य^-आरे अस्म द्दधातना-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

卐 यच्च गोषु दुष्ष्वप्न्यँ- यच्चास्मे दुहित र्दिवः। त्रिताय तद्विभाव-र्याप्त्याय परा वहा-ऽनेहसो व^ ऊतय –स्सुऊतयो व^ ऊतयः।।

卐 निष्कँ वा घा कृणवते- स्त्रजँ वा दुहित र्दिवः। त्रिते दुष्ष्वप्न्यं सर्वं.-माप्त्ये परि दद्म स्य-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

❀06.04.10 卐तदन्नाय तर्दपसे- तं भाग मुपसेदुषे। त्रिताय च द्विताय चो-षो दुष्ष्वप्न्यँ वहा-ऽनेहसो व^ ऊतय- स्सुऊतयो व^ ऊतयः।।

卐 यथा कलाँ यथा शफँ- यथ ऋणं सन्नयामसि। एवा दुष्ष्वप्न्यं सर्वं-.माप्त्ये सन्नयामस्य-ऽनेहसो व^ ऊतय -स्सुऊतयो व^ ऊतयः।।

卐 अजैष्माद्यासनाम चा-ऽभूमानागसो वयम्। उषो यस्मा द्दुष्ष्वप्न्या-दभैष्माप तदुच्छ –त्वऽनेहसो व^ ऊतय -स्सु ऊतयो व^ ऊतयः।।

8.48 स्वादोरिति पञ्चदशर्चस्य सूक्तस्य, काण्वः प्रगाथ- स्सोम-स्त्रिष्टुप्- पञ्चमी जगती।।

卐 अथैकादशसूक्तात्मकं वालखिल्याख्यं भागं पाठका अस्मिन्नध्याये पठन्ति-स वेदपारायणादौ नेष्यते-खिलत्वात्- सूक्तसहस्रं ससप्तदशकमृग्वेदे पारायणपाठे शाकल्ये इत्यत्र सिद्धान्तिताया स्सप्तदशाधिकसहस्र सूक्तसङ्ख्यायाः खिलरहित संहितयेवपूर्तेश्च- यश्च सर्वानुक्रमण्या मेषामनुक्रमो दृश्यते स विचारणी यो वैदिकधुरीणैः- सत्यप्येवमेषां पारायणादौ निषेधेऽध्ययनाध्यापनादावृष्यादि ज्ञानं श्रेयो हेतुरित्यभिप्रेत्य दृष्टसर्वानुक्रमानुसारेण सूक्तप्रतीकाद्यं लिख्यते।।-

❀06.04.11 卐स्वादो रभक्षि वयस स्सुमेधा- स्स्वाध्यो वरिवोवित्तरस्य। विश्वे यन्देवा^ उत मर्त्यासो- मधु ब्रुवन्तो अभि सञ्चरन्ति।।

卐 अन्त~श्च प्रागा^ अदिति र्भवा –स्यऽवयाता हरसो दैव्यस्य। इन्द~ विन्द्रस्य सख्यञ्जुषाण- श्श्रौष्टीव धुर.मनु राय ऋध्याः।।

卐 अपाम सोम ममृता^ अभूमा-ऽगन्म ज्योति रविदाम देवान्। किं नूनं मस्मा न्कृणव दराति॰- किमु धूर्ति रमृत मर्त्यस्य।।

卐 शन्नो भव हृद आ पीत इन्दो- पितेव सोम सूनवे सुशेवः। सखेव सख्य उरुशंस धीरः- प्र ण आयु र्जीवसे सोम तारीः।।

卐 इमे मा पीता यशस उरुष्यवो- रथन्न गाव स्समनाह पर्वसु। ते मा रक्षन्तु विस्रसश्चरित्रा- दुत मा स्रामा द्यवय न्त्विन्दवः।।

❀06.04.12 卐अग्निन्न मा मथितं सन्दिदीपः- प्र चक्षय कृणुहि वस्यसो नः। अथा हि ते मद आ सोम मन्ये- रेवाऽइव प्र चरा पुष्टि मच्छ।।

卐 इषिरेण ते मनसा सुतस्य- भक्षीमहि पित्र्यस्येव रायः। सोम राजन्प्र ण आयूंषि तारी- रहानीव सूर्यो वासराणि।।

卐 सोम राज न्मृळया न स्स्वस्ति- तव स्मसि व्रत्या3(आ) स्तस्य विद्धि। अलर्ति दक्ष उत मन्यु रिन्दो- मा नो अर्यो अनुकामं परा दाः।।

卐 त्वं हि न स्तन्व स्सोम गोपा- गात्रेगात्रे निषसत्था नृचक्षाः। यत्ते वयं प्रमिनाम व्रतानि- स नो मृळ सुषखा देव वस्यः।।

卐 ऋदूदरेण सख्या सचेय- यो मा न रिष्येद्धर्यश्व पीतः। अयँ य स्सोमो न्यधाय्यस्मे- तस्मा इन्द्रं प्रतिर मेम्यायुः।।

❀06.04.13 卐अप त्या अस्थु रनिरा अमीवा- निरत्रस न्तमिषीची रभैषुः। आ सोमो अस्माँ अरुह द्विहाया- अगन्म यत्र प्रतिरन्त आयुः।।

卐 यो न इन्दुः पितरो हृत्सु पीतो-ऽमर्त्यो मर्त्याँ आविवेश। तस्मै सोमाय हविषा विधेम- मृळीके अस्य सुमतौ स्याम।।

卐 त्वं सोम पितृभि स्सँविदानो-ऽनु द्यावापृथिवी आ ततन्थ। तस्मै त इन्दो हविषा विधेम- वयं स्याम पतयो रयीणाम्।।

卐 त्रातारो देवा अधि वोचता नो- मा नो निद्रा ईशत मोत जल्पिः। वयं सोमस्य विश्वह प्रियास- स्सुवीरासो विदथ.मा वदेम।।

卐 त्वन्न स्सोम विश्वतो वयोधा- स्त्वं स्वर्विदा ऽऽविशा नृचक्षाः। त्वन्न इन्द्र ऊतिभि स्सजोषाः- पाहि पश्चाता दुत वा पुरस्तात्।।

卐 ।। अथ वालखिल्यम्।।

8.49 अभि प्रेति दशर्चस्य सूक्तस्य, काण्वः प्रस्कण्व इन्द्रः अयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.15 卐अभि प्र व स्सुराधस.- मिन्द्र.मर्च यथा विदे। यो जरितृभ्यो मघवा पुरूवसु- स्सहस्रेणेव शिक्षति।।

卐 शतानीकेव प्र जिगाति धृष्णुया- हन्ति वृत्राणि दाशुषे। गिरेरिव प्र रसा अस्य पिन्विरे- दत्राणि पुरुभोजसः।।

卐 आ त्वा सुतास इन्दवो- मदा य इन्द्र गिर्वणः। आपो न वज्रिन्नन्वोक्य1(अं)- सरः पृणन्ति शूर राधसे।।

卐 अनेहसं प्रतरणँ विवक्षणं- मध्व स्स्वादिष्ठमीं पिब। आ यथा मन्दसानः किरासि नः- प्र क्षुद्रेव त्मना धृषत्।।

卐 आ न स्स्तोम मुप द्रव -द्धियानो अश्वो न सोतृभिः। यन्ते स्वधाव न्त्स्वदयन्ति धेनव- इन्द्र कण्वेषु रातयः।।

❀06.04.15 卐उग्रन्न वीरन्नमसोप सेदिम- विभूति मक्षितावसुम्। उद्रीव वज्रिन्नवतो न सिञ्चते- क्षरन्तीन्द्र धीतयः।।

卐 यद्ध नूनँ यद्वा यज्ञे- यद्वा पृथिव्या.मधि। अतो नो यज्ञ माशुभि र्महेमत -उग्र उग्रेभि रागहि।।

卐 अजिरासो हरयो ये त आशवो- वाताइव प्रसक्षिणः। येभि रपत्यं मनुषः परीयसे- येभि र्विश्वं स्वर्दृशे।।

卐 एतावत स्त ईमह -इन्द्र सुम्नस्य गोमतः। यथा प्राऽवो मघव न्मेध्यातिथिँ -यथा नीपातिथि न्धने।।

卐 यथा कण्वे मघव न्त्रसदस्यवि- यथा पक्थे दशव्रजे। यथा गोशर्ये असनोर् ऋजिश्वनी-न्द्र गोम द्धिरण्यवत्।।

8.50 प्र सु श्रुतमिति दशर्चस्य सूक्तस्य, पुष्टिगुरिन्द्रोऽयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.16 卐प्र सु श्रुतं सुराधस .-मर्चा शक्र मभिष्टये। य स्सुन्वते स्तुवते काम्यँ वसु- सहस्रेणेव मंहते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 शतानीका हेतयो अस्य दुष्टरा- इन्द्रस्य समिषो महीः। गिरिर्न भुज्मा मघवत्सु पिन्वते- यदीं सुता अमन्दिषुः।।

卐 यदीं सुतास इन्दवो-ऽभि प्रिय ममन्दिषुः। आपो न धायि सवनं म आ वसो~- दुघाइवोप दाशुषे।।

卐 अनेहसँ वो हवमान मूतये- मध्वः≈क्षरन्ति धीतयः। आ त्वा वसो~ हवमानास इन्दव- उप स्तोत्रेषु दधिरे।।

卐 आ न स्सोमे स्वध्वर- इयानो अत्यो न तोशते। यन्ते स्वदाव न्त्स्वदन्ति गूर्तयः- पौरे छन्दयसे हवम्।।

❀06.04.17 卐प्र वीर मुग्रँ विविचि न्धनस्पृतँ- विभूतिं राधसो महः। उद्रीव वज्रिन्नवतो वसुत्वना- सदा पीपेथ दाशुषे।।

卐 यद्ध नूनं परावति- यद्वा पृथिव्या न्दिवि। युजान इन्द्र हरिभि र्महेमत -ऋष्व ऋष्वेभि रागहि।।

卐 रथिरासो हरयो ये ते अस्रिध- ओजो वातस्य पिप्रति। येभिर्नि दस्युं मनुषो निघोषयो- येभि स्स्वः~ परीयसे।।

卐 एतावतस्ते वसो~- विद्याम शूर नव्यसः। यथा प्राऽव एतशङ्कृत्व्ये धने- यथा वश न्दशव्रजे।।

卐 यथा कण्वे मघव न्मेधे अध्वरे- दीर्घनीथे दमूनसि। यथा गोशर्ये असिषासो अद्रिवो- मयि गोत्रं हरिश्रियम्।।

8.51 यथा मनाविति दशर्चस्य सूक्तस्य, श्रुष्टिगुरिन्द्रोऽयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.18 卐यथा मनौ साँवरणौ- सोम.मिन्द्रापिब स्सुतम्। नीपातिथौ मघव न्मेध्यातिथौ- पुष्टिगौ श्रुष्टिगौ सचा।।

卐 पार्षद्वाणः प्रस्कण्वं समसादय- च्छयानञ्जिव्रि मुद्धितम्। सहस्राण्यसिषास द्गवा मृषि- स्त्वोतो दस्यवे वृकः।।

卐 य उक्थेभिर्न विन्धते- चिकिद्य ऋषिचोदनः। इन्द्र न्तमच्छा वद नव्यस्या मत्य-ऽरिष्यन्तन्न भोजसे।।

卐 यस्मा अर्कं सप्तशीर्षाण मानृचु- स्त्रिधातु मुत्तमे पदे। स त्वि1(इ)मा विश्वा भुवनानि चिक्रद- दादि ज्जनिष्ट पौंस्यम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यो नो दाता वसूना- मिन्द्रन्तं हूमहे वयम्। विद्मा ह्यस्य सुमतिन्नवीयसी-ङ्गमेम गोमति व्रजे।।

❀06.04.19 卐यस्मै त्वँ वसो~ दानाय शिक्षसि- स रायस्पोष मश्नुते। तन्त्वा वयं मघव न्निन्द्र गिर्वण- स्सुतावन्तो हवामहे।।

卐 कदा चन स्तरी रसि- नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघव न्भूय^ -इन्नु ते दान न्देवस्य पृच्यते।।

卐 प्र यो ननक्षे अभ्योजसा क्रिविँ- वधै श्शुष्ण न्निघोषयन्न्। यदे दस्तम्भी त्प्रथयन्नमू न्दिव- मादि ज्जनिष्ट पार्थिवः।।

卐 यस्यायँ विश्व^ आर्यो- दास श्शेवधिपा अरिः। तिरश्चि दर्ये रुशमे पवीरवि- तुभ्येत्सो अज्यते रयिः।।

卐 तुरण्यवो मधुमन्तङ्घृतश्चुतँ- विप्रासो अर्क मानृचुः। अस्मे रयिः पप्रथे वृष्ण्यं शवो-ऽस्मे सुवानास^ इन्दवः।।

8.52 यथा मनाविति दशर्चस्य सूक्तस्याऽऽयुरिन्द्रोऽयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.20 卐यथा मनौ विवस्वति- सोमं शक्रापिब स्सुतम्। यथा त्रिते छन्द^ इन्द्र जुजोष - स्यायौमादयसे सचा।।

卐 पृषध्रे मेध्ये मातरिश्व -नीन्द्र सुवाने अमन्दथाः। यथा सोम न्दशशिप्रे दशोण्ये -स्यूमरश्मा वृजूनसि।।

卐 य^ उक्था केवला दधे- य स्सोम न्धृषिता पिबत्। यस्मै विष्णु स्त्रीणि पदा विचक्रम -उप मित्रस्य धर्मभिः।।

卐 यस्य त्वमिन्द्र स्तोमेषु चाकनो- वाजे वाजि ञ्छतक्रतो~। त न्त्वा वयं सुदुघामिव गोदुहो- जुहूमसि श्रवस्यवः।।

卐 यो नो दाता स नः पिता- महाँ उग्र ईशानकृत्। अयाम न्नुग्रो मघवा पुरूवसु- र्गो रश्वस्य प्र दातु नः।।

❀06.04.21 卐यस्मै त्वँ वसो दानाय मंहसे- स रायस्पोष मिन्वति। वसूयवो वसुपतिं शतक्रतुं- स्तोमै रिन्द्रं हवामहे।।

卐 कदा चन प्र युच्छ -स्युभे~ नि पासि जन्मनी~। तुरीयादित्य हवनन्त इन्द्रिय-मा तस्था वमृत न्दिवि।।

卐 यस्मै त्वं मघव न्निन्द्र गिर्वण- श्शिक्षो~ शिक्षसि दाशुषे। अस्माकङ्गिर उत सुष्टुतिँ वसो~- कण्वव च्छृणुधी हवम्।।

卐 अस्तावि मन्म पूर्व्यं- ब्रह्मेन्द्राय वोचत। पूर्वीर् ऋतस्य बृहती रनूषत- स्तोतु मेधा^ असृक्षत।।

卐 समिन्द्रो रायो बृहती रधूनुत- सङ्क्षोणी समु सूर्यम्। सं शुक्रास श्शुचय स्सङ्गवाशिर- स्सोमा^ इन्द्र ममन्दिषुः।।

☸ 8.53 उपम न्त्वेत्यष्टर्चस्य सूक्तस्य, मेध्य इन्द्रोऽयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.0 卐उपमन्त्वा मघोना-ञ्ज्येष्ठञ्च वृषभाणाम्। पूर्भित्तमं मघव न्निन्द्र गोविद.-मीशानं राय^ ईमहे।।

卐 य^ आयुङ्कुत्स मतिथिग्व मर्दयो- वावृधानो दिवेदिवे। तन्त्वा वयं हर्यश्वं शतक्रतुं- वाजयन्तो हवामहे।।

卐 आ नो विश्वेषां रसं- मध्व स्सिञ्च न्त्वद्रयः। ये परावति सुन्विरे जनेष्वा- ये अर्वाव तीन्दवः।।

卐 विश्वा द्वेषांसि जहि चाव चा -ऽकृधि विश्वे सन्वन्त्वा वसु। शीष्टेषु चित्ते मदिरासो अंशवो- यत्रा सोमस्य तृम्पसि।।

❀06.04.23 卐इन्द्र नेदीय^ एदिहि- मितमेधाभि रूतिभिः। आ शन्तम शन्तमाभि रभिष्टिभि- राऽस्वापे स्वापिभिः।।

卐 आजितुरं सत्पतिँ विश्वचर्षणि-ङ्कृधि प्रजा स्वाभगम्। प्र सू तिरा शचीभिर्ये त उक्थिनः- क्रतुं पुनत आनुषक्।।

卐 य स्ते साधिष्ठोऽवसे- ते स्याम भरेषु ते। वयं होत्राभि रुत देवहूतिभि- स्ससवांसो मनामहे।।

卐 अहं हि ते हरिवो ब्रह्म वाजयु- राजिँ यामि सदोतिभिः। त्वामिदेव तममे समश्वयु- र्गव्यु रग्रे मथीनाम्।।

☸ 8.54 एतत्त इत्यष्टर्चस्य सूक्तस्य, मातरिश्वान इन्द्रस्तृतीया चतुर्थ्यो विश्वेदेवा अयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.24 卐एतत्त इन्द्र वीर्य-ङ्गीर्भि र्गृणन्ति कारवः। ते स्तोभन्त ऊर्जमाव न्घृतश्चुतं- पौरासो नक्ष न्धीतिभिः।।

卐 नक्षन्त इन्द्र मवसे सुकृत्यया- येषां सुतेषु मन्दसे। यथा सँवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व।।

卐 आ नो विश्वे सजोषसो- देवासो गन्तनोप नः। वसवो रुद्रा अवसे न आ गम-ञ्छृण्वन्तु मरुतो हवम्।।

卐 पूषा विष्णु र्हवनं मे सरस्व –त्यऽवन्तु सप्त सिन्धवः। आपो वातः पर्वतासो वनस्पति- श्शृणोतु पृथिवी हवम्।।

❀06.04.25 卐यदिन्द्र राधो अस्ति ते- माघोनं मघवत्तम। तेन नो बोधि सधमाद्यो वृधे- भगो दानाय वृत्रहन्न्।।

卐 आजिपते नृपते त्वमिद्धि नो- वाज आ वक्षि सुक्रतो। वीती होत्राभि रुत देववीतिभि- स्ससवांसो वि शृण्विरे।।

卐 सन्ति ह्य1(अ)र्य आशिष- इन्द्र आयु र्जनानाम्। अस्मान्नक्षस्व मघव न्नुपावसे- धुक्षस्व पिप्युषी मिषम्।।

卐 वयन्त इन्द्र स्तोमेभि र्विधेम- त्वमस्माकं शतक्रतो। महि स्थूरं शशयं राधो अह्रयं- प्रस्कण्वाय नि तोशय।।

8.50 भूरीदिति पञ्चर्चस्य सूक्तस्य, कृश इन्द्रो गायत्री-तृतीया पञ्चम्यावनुष्टुभौ।।

❀06.04.26 卐भूरी दिन्द्रस्य वीर्य1(अँ)- व्यख्य मभ्यायति। राधस्ते दस्यवे वृक।।

卐 शतं श्वेतास उक्षणो- दिवि तारो न रोचन्ते। मह्ना दिवन्न तस्तभुः।।

卐 शतं वेणूञ्छतं शुन- श्शतञ्चर्माणि म्लातानि। शतं मे बल्बजस्तुका -अरुषीणाञ्चतुश्शतम्।।

卐 सुदेवा स्स्थ काण्वायना- वयोवयो विचरन्तः। अश्वासो न चङ्क्रमत।।

卐 आदि त्साप्तस्य चर्किर- न्नानूनस्य महि श्रवः। श्यावी रतिध्वस न्पथ- श्चक्षुषा चन सन्नशे।।

8.56 प्रति त इति पञ्चर्चस्य सूक्तस्य, पृषध्र इन्द्रोऽन्त्याया अग्नि सूर्यौ गायत्र्यन्त्या पङ्क्तिः।।

❀06.04.27 卐प्रति ते दस्यवे वृक- राधो अदर्श्यह्रयम्। द्यौर्न प्रथिना शवः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 दश मह्यं पौतक्रत- स्सहस्रा दस्यवे वृकः। नित्या द्रायो अमंहत।।

卐 शतं मे गर्दभानां- शत मूर्णावतीनाम्। शत न्दासा॰ अति स्रजः।।

卐 तत्रो~ अपि प्रा॒ऽणीयत- पूतक्रतायै व्यक्ता। अश्वाना मिन्न यूथ्याम्।।

卐 अचे त्यग्नि श्चिकितु- र्हव्यवाड्ढ सुमद्रथः। अग्नि श्शुक्रेण शोचिषा- बृह त्सूरो अरोचत- दिवि सूर्यो अरोचत।।

8.57 युवं देवेति चतुर्ऋचस्य सूक्तस्य, मेध्योऽश्विनौ त्रिष्टुप्।।

❀06.04.28 卐युव न्देवा क्रतुना पूर्व्येण- युक्ता^ रथेन तविषँ यजत्रा। आऽगच्छत न्नासत्या शचीभि- रिद न्तृतीयं सवनं पिबाथः।।

卐 युवा न्देवा स्त्रय एकादशासः- स्सत्या स्सत्यस्य ददृशे पुरस्तात्। अस्माकँ यज्ञं सवनञ्जुषाणा- पातं सोम मश्विना दीद्यग्नी~।।

卐 पनाय्य न्तदश्विना कृतँ वाँ- वृषभो दिवो रजसः॰ पृथिव्याः। सहस्रं शंसा^ उत ये गविष्टौ- सर्वा॰ इत्ता॰ उप याता पिबध्यै।।

卐 अयँ वां भागो निहितो यजत्रे-मा गिरो नासत्योप यातम्। पिबतं सोमं मधुमन्त मस्मे-प्र दाश्वांस मवतं शचीभिः।।

8.58 यमृत्विज इति तृचस्य सूक्तस्य, मेध्यो विश्वेदेवास्त्रिष्टुप्- ( आद्याया ऋत्विजो देवता वा)।।

❀06.04.29 卐यमृत्विजो बहुधा कल्पयन्त- स्सचेतसो यज्ञ मिमँ वहन्ति। यो अनूचानो ब्राह्मणो युक्त^ आसी-त्का स्वित्तत्र यजमानस्य सँवित्।।

卐 एक एवाग्नि र्बहुधा समिद्ध^- एक स्सूर्यो विश्व मनु प्रभूतः। एकैवोषा स्सर्व मिदँ वि भात्ये-कँ वा इदँ वि बभूव सर्वम्।।

卐 ज्योतिष्मन्तङ्केतुमन्त न्त्रिचक्रं- सुखं रथं सुषदं भूरिवारम्। चित्रामघा यस्य योगेऽधिजज्ञे- तँ वां हुवे अति रिक्तं पिबध्यै।।

8.59 इमानि वामिति सप्तर्चस्य सूक्तस्य, सुपर्ण इन्द्रावरुणौ जगती।।

❀06.04.30 卐इमानि वां भागधेयानि सिस्रत- इन्द्रावरुणा प्र महे सुतेषु वाम्। यज्ञेयज्ञे ह सवना भुरण्यथो- यत्सुन्वते यजमानाय शिक्षथः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 निष्षिर्ध्वरी रोषधी रार्प^ आस्ता- मिन्द्रावरुणा महिमान.माशत। या सिस्रतू रजसः पारे अध्वनो- ययो श्शत्रु र्नकिरादेव ओहते।।

卐 सत्य न्तदिन्द्रावरुणा कृशस्य वां- मध्व^ ऊर्मि न्दुहते सप्त वाणीः। ताभि र्दाश्वांस मवतं शुभस्पती~- यो वामदब्धो अभि पाति चित्तिभिः।।

卐 घृतप्रुष स्सौम्या जीरदानव- स्सप्त स्वसार स्सदन ऋतस्य। या^ ह वा मिन्द्रावरुणा घृतश्चुत- स्ताभि र्धत्तँ यजमानाय शिक्षतम्।।

❀06.04.31 卐अवोचाम महते सौभगाय- सत्य न्त्वेषाभ्यां महिमान मिन्द्रियम्। अस्मा न्त्स्विन्द्रावरुणा घृतश्चुत- स्त्रिभि स्साप्तेभि रवतं शुभस्पती~।।

卐 इन्द्रावरुणा यदृषिभ्यो मनीषाँ- वाचो मतिं श्रुत मदत्त मग्रे। यानि स्थाना न्यसृजन्त धीरा^- यज्ञ न्तन्वाना स्तपसाऽभ्यपश्यम्।।

卐 इन्द्रावरुणा सौमनस मदृप्तं- रायस्पोषँ यजमानेषु धत्तम्। प्रजां पुष्टिं भूति मस्मासु धत्त.- न्दीर्घायुत्वाय प्रतिरतन्न आयुः।।

卐 ।। इति वालखिल्यं समाप्तम्।।

8.60 अग्न आयाहीति विंशत्यृचस्य सूक्तस्य, प्रागाथो भर्गोऽग्निः-अयुजो बृहत्यो युज स्सतोबृहत्यः।।

❀06.04.32 卐अग्न आ या ह्यग्निभि- र्होतारन्त्वा वृणीमहे। आ त्वामनक्तु प्रयता हविष्मती- यजिष्ठं बर्हि रासदे।।

卐 अच्छा हि त्वा सहस स्सूनो~ अङ्गिर- स्स्रुचश्चर न्त्यध्वरे। ऊर्जो नपातङ्घृतकेश मीमहे-ऽग्निँ यज्ञेषु पूर्व्यम्।।

卐 अग्ने कवि र्वेधा^ असि- होता पावक यक्ष्यः। मन्द्रो यजिष्ठो अध्वरेष्वीड्यो -विप्रेभि श्शुक्र मन्मभिः।।

卐 अद्रोघ मावहोशतो यविष्ठ्य- देवाँ अजस्र वीतये। अभि प्रयांसि सुधिता ऽऽवसो~ गहि- मन्दस्व धीतिभि र्हितः।।

卐 त्वमि त्सप्रथा^ अस्य-ऽग्ने त्रातर् ऋत स्कविः। त्वाँ विप्रास स्समिधान दीदिव^- आ विवासन्ति वेधसः।।

❀06.04.33 卐शोचा शोचिष्ठ दीदिहि विशे मयो- रास्व स्तोत्रे महा९ असि। देवानां शर्म न्मम सन्तु सूरय- श्शत्रूषाह स्स्वग्नयः।।

卐 यथा चिद्वृद्ध मतस मग्ने- सञ्जूर्वसि क्षमि। एवा दह मित्रमहो यो अस्मध्रु -ग्दुर्मन्मा कश्च वेनति।।

卐 मा नो मर्ताय रिपवे रक्षस्विने- माऽघशंसाय रीरधः। अस्रेधद्भि स्तरणिभि र्यविष्ठ्य- शिवेभि॰ पाहि पायुभिः।।

卐 पाहि नो अग्न एकया- पाह्यु1(उ)त द्वितीयया। पाहि गीर्भि स्तिसृभि रूर्जां पते- पाहि चतसृभि र्वसो~।।

卐 पाहि विश्वस्मा द्रक्षसो अराव्ण॰- प्र स्म वाजेषु नोऽव। त्वामिद्धि नेदिष्ठ न्देवतातय -आपिन्नक्षामहे वृधे।।

❀06.04.34 卐आ नो अग्ने वयोवृधं- रयिं पावक शंस्यम्। रास्वा च न^ उपमाते पुरुस्पृहं- सुनीती स्वयशस्तरम्।।

卐 येन वंसाम पृतनासु शर्धत- स्तरन्तो अर्य आदिशः। स त्वन्नो वर्ध प्रयसा शचीवसो~- जिन्वा धियो वसुविदः।।

卐 शिशानो वृषभो यथा-ऽग्नि श्शृङ्गे~ दविध्वत्। तिग्मा^ अस्य हनवो न प्रतिधृषे- सुजम्भ स्सहसो यहुः।।

卐 नहि ते अग्ने वृषभ प्रतिधृषे- जम्भासो यद्वितिष्ठसे। स त्वन्नो होत~ स्सुहुतं हविष्कृधि- वंस्वा नो वार्या पुरु।।

卐 शेषे वनेषु मात्रो- स्सन्त्वा मर्तास^ इन्धते। अतन्द्रो हव्या वहसि हविष्कृत^- आदि द्देवेषु राजसि।।

❀06.04.35 卐सप्त होतार स्तमिदीळते- त्वाऽग्ने सुत्यज मह्रयम्। भिनत्स्यद्रि न्तपसा वि शोचिषा- प्राग्ने तिष्ठ जना९ अति।।

卐 अग्निमग्निँ वो अध्रिगुं- हुवेम वृक्तबर्हिषः। अग्निं हितप्रयस श्शश्वतीष्वा -होतारञ्चर्षणीनाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

卐 केतेन शर्मं न्त्सचते सुषामण्य-ऽग्ने तुभ्यञ्चिकित्वना। इषण्यया नः पुरुरूप मा भर- वाज.न्नेदिष्ठ मूतये।।

卐 अग्ने जरित विश्पति- स्तेपानो देव रक्षसः। अप्रोषिवा न्गृहपति महाँ असि- दिव स्पायु दुरोणयुः।।

卐 मा नो रक्ष^ आ वेशी दाघृणीवसो~- मा यातुर्यातुमावताम्। परोगव्यू त्यनिरा मप क्षुध- मऽग्ने सेध रक्षस्विनः।।

🏺 8.61 उभय मित्यष्टादशर्चस्य सूक्तस्य, प्रागाथो भर्ग- इन्द्रोऽयुजो- बृहत्यो- युज- स्सतोबृहत्यः।।

❀06.04.36 卐उभयं शृणवच्च न^- इन्द्रो अर्वा गिदँ वचः। सत्राच्या मघवा सोमपीतये- धिया शविष्ठ आऽगमत्।।

卐 तं हि स्वराजँ वृषभ न्तमोजसे- धिषणे~ निष्टतक्षतुः। उतोपमानां प्रथमो नि षीदसि- सोमकामं हि ते मनः।।

卐 आ वृषस्व पुरूवसो~- सुतस्येन्द्रान्धसः। विद्मा हि त्वा हरिवः पृत्सु सासहि- मधृष्टञ्चि द्दधृष्वणिम्।।

卐 अप्रामिसत्य मघव न्तथेदस -दिन्द्र क्रत्वा यथा वशः। सनेम वाज न्तव शिप्रिन्नवसा- मक्षू चिद्यन्तो अद्रिवः।।

卐 शग्ध्यू3(ऊ)षु शचीपत -इन्द्र विश्वाभि रूतिभिः। भगन्न हि त्वा यशसँ वसुविद- मनु शूर चरामसि।।

❀06.04.37 卐पौरो अश्वस्य पुरुकृ द्गवाम-स्युत्सो देव हिरण्ययः। नकिर्हि दानं परिमर्धिषत्त्वे- यद्यद्यामि तदा भर।।

卐 त्वं ह्येहि चेरवे- विदा^ भगँ वसुत्तये। उद्वावृषस्व मघव न्गविष्टय -उदिन्द्राश्वमिष्टये।।

卐 त्वं पुरू सहस्राणि शतानि च- यूथा दानाय मंहसे। आ पुरन्दरञ्चकृम विप्रवचस -इन्द्रङ्गायन्तोऽवसे।।

卐 अविप्रो वा यदविध- द्विप्रो वेन्द्र ते वचः। स प्र ममन्द त्त्वाया शतक्रतो~- प्राचामन्यो~ अहंसन।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उग्रबाहु र्म्रक्षकृत्वा पुरन्दरो- यदि मे शृणव द्धवम्। वसूयवो वसुपतिं शतक्रतुं- स्तोमै रिन्द्रं हवामहे।।

❀06.04.38 卐न पापासो मनामहे- नारायासो न जल्हवः। यदिन्विन्द्रं वृषणं सचा सुते- सखायङ्कृणवामहै।।

卐 उग्रँ युयुज्म पृतनासु सासहि- मृणकाति मदाभ्यम्। वेदा भृमश्चि त्सनिता रथीतमो- वाजिनँ यमिदू नशत्।।

卐 यत^ इन्द्र भयामहे- ततो नो अभयङ्कृधि। मघवञ्छग्धि तव तन्न^ ऊतिभि- र्वि द्विषो वि मृधो जहि।।

卐 त्वं हि राधस्पते राधसो महः-≈क्षयस्यासि विधतः। तन्त्वा वयं मघव न्निन्द्र गिर्वण- स्सुतावन्तो हवामहे।।

卐 इन्द्र स्स्पळुत वृत्रहा- परस्पा नो वरेण्यः। स नो रक्षिष च्चरमं स मध्यमं- स पश्चा त्पातु नः पुरः।।

❀06.04.39 卐त्वन्नः पश्चा दधरा दुत्तरा- त्पुर^ इन्द्र नि पाहि विश्वतः। आरे अस्म त्कृणुहि दैव्यं- भय मारे हेती रदेवीः।।

卐 अद्याद्या श्वश्श्व^- इन्द्र त्रास्व परे च नः। विश्वा च नो जरितृन्त्सत्पते- अहा दिवा नक्तञ्च रक्षिषः।।

卐 प्रभङ्गी शूरो मघवा तुवीमघ- स्संमिश्लो वीर्याय कम्। उभा ते बाहू~ वृषणा शतक्रतो~ नि या वज्रं मिमिक्षतुः।।

8.62 प्रो अस्मा इति द्वादशर्चस्य सूक्तस्य, काण्वः प्रगाथ- इन्द्रः- पङ्क्तिः-सप्तम्याद्या स्तिस्रो बृहत्यः।।

❀06.04.40 卐प्रो~ अस्मा उपस्तुतिं- भरता यज्जुजोषति। उक्थै रिन्द्रस्य माहिनँ- वयो वर्धन्ति सोमिनो- भद्रा इन्द्रस्य रातयः।।

卐 अयुजो असमो नृभिरे-कः कृष्टी रयास्यः। पूर्वी रति प्र वावृधे- विश्वा^ जाता न्योजसा- भद्रा^ इन्द्रस्य रातयः।।

卐 अहितेन चिदर्वता- जीरदानु स्सिषासति। प्रवाच्य मिन्द्र -तत्तव वीर्याणि करिष्यतो- भद्रा^ इन्द्रस्य रातयः।।

卐 आ याहि कृणवाम त- इन्द्र ब्रह्माणि वर्धना। येभि श्शविष्ठ चाकनो- भद्र मिह श्रवस्यते- भद्रा^ इन्द्रस्य रातयः।।

卐 धृषतश्चि द्धृष न्मनः- कृणोषीन्द्र यत्त्वम्। तीव्रै स्सोमै स्सपर्यतो- नमोभिः प्रतिभूषतो- भद्रा^ इन्द्रस्य रातयः।।

卐 अव चष्ट ऋचीषमो-ऽवताँइव मानुषः। जुष्ट्वी दक्षस्य सोमिन- स्सखाय ङ्कृणुते युजं- भद्रा^ इन्द्रस्य रातयः ।।

❀06.04.41 卐विश्वे त इन्द्र वीर्य- न्देवा^ अनु क्रतु न्ददुः। भुवो विश्वस्य गोपतिः पुरुष्टुत- भद्रा^ इन्द्रस्य रातयः।।

卐 गृणे तदिन्द्र ते शव- उपम न्देवतातये। यद्धंसि वृत्र मोजसा शचीपते- भद्रा^ इन्द्रस्य रातयः।।

卐 समनेव वपुष्यतः- कृणव न्मानुषा युगा। विदे तदिन्द्र श्चेतन मध श्रुतो -भद्रा^ इन्द्रस्य रातयः।।

卐 उज्जात मिन्द्र ते शव- उत्त्वा मुत्तव क्रतुम्। भूरिगो~ भूरि वावृधु- र्मघव न्तव शर्मणि- भद्रा^ इन्द्रस्य रातयः।।

卐 अहञ्च त्वञ्च वृत्रह- न्त्सँ युज्याव सनिभ्य^ आ। अरातीवा चिदद्रिवो-ऽनु नौ शूर मंसते- भद्रा^ इन्द्रस्य रातयः।।

卐 सत्यमिद्वा उ तँ वय- मिन्द्रं स्तवाम नानृतम्। महाँ असुन्वतो वधो- भूरि ज्योतींषि सुन्वतो- भद्रा^ इन्द्रस्य रातयः।।

8.63 स पूर्व्य इति द्वादशर्चस्य सूक्तस्य, काण्वः प्रगाथ- इन्द्रोऽन्त्याया देवा गायत्री-आद्या चतुर्थी पञ्चमी सप्तम्योऽनुष्टुभोऽन्त्या त्रिष्टुप्।।

❀06.04.42 卐स पूर्व्यो महानाँ- वेनः क्रतुभि रानजे। यस्य द्वारा मनुष्पिता -देवेषु धिय^ आनजे।।

卐 दिवो मान न्नोत्सद- न्त्सोमपृष्ठासो अद्रयः। उक्था ब्रह्म च शंस्या।।

卐 स विद्वाँ अङ्गिरोभ्य- इन्द्रो गा^ अवृणो दप। स्तुषे तदस्य पौंस्यम्।।

卐 स प्रत्नथा कविवृध^- इन्द्रो वाकस्य वक्षणिः। शिवो अर्कस्य होम –न्यऽस्मत्रा गन्त्ववसे।।

卐 आदू नु ते अनु क्रतुं- स्वाहा वरस्य यज्यवः। श्वात्र मर्का^ अनूषते-न्द्र गोत्रस्य दावने।।

卐 इन्द्रे विश्वानि वीर्या- कृतानि कर्त्वानि च। यमर्का^ अध्वरँ विदुः।।

❀06.04.43 卐यत्पाञ्चजन्यया विशे-न्द्रे घोषा^ असृक्षत। अस्तृणा द्बर्हणा विपो3(ओ)-ऽर्यो मानस्य स क्षयः।।

卐 इयमु ते अनुष्टुति- श्चकृषे तानि पौंस्या। प्राऽवश्चक्रस्य वर्तनिम्।।

卐 अस्य वृष्णो व्योदन^- उरु क्रमिष्ट जीवसे। यवन्न पश्व^ आ ददे।।

卐 तद्दधाना^ अवस्यवो- युष्माभि र्दक्षपितरः। स्याम मरुत्वतो वृधे।।

卐 बळृत्वियाय धाम्न- ऋक्वभि श्शूर नोनुमः। जेषामेन्द्र त्वया युजा।।

卐 अस्मे रुद्रा^ मेहना पर्वतासो- वृत्रहत्ये भरहूतौ सजोषाः। य श्शंसते स्तुवते धायि पज्र- इन्द्रज्येष्ठा^ अस्मा९ अवन्तु देवाः।।

☫ 8.64 उत्त्वा मन्दन्त्विति द्वादशर्चस्य सूक्तस्य, काण्वः प्रगाथ- इन्द्रो- गायत्री।।

❀06.04.44 卐उत्त्वा मन्दन्तु स्तोमाः- कृणुष्व राधो अद्रिवः। अव ब्रह्मद्विषो जहि।।

卐 पदा पणी९ रराधसो- नि बाधस्व महा९ असि। नहि त्वा कश्चन प्रति।।

卐 त्वमीशिषे सुताना- मिन्द्र त्वमसुतानाम्। त्वं राजा जनानाम्।।

卐 एहि प्रेहि क्षयो दिव्या3-(आ)घोषञ्चर्षणीनाम्। ओभे~ पृणासि रोदसी।।

卐 त्यञ्चि त्पर्वतङ्गिरिं- शतवन्तं सहस्रिणम्। वि स्तोतृभ्यो रुरोजिथ।।

卐 वयमु त्वा दिवा सुते- वयन्नक्तं हवामहे। अस्माकङ्काम मापृण।।

❀06.04.45 卐क्व1(अ)स्य वृषभो युवा- तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति।।

卐 कस्य स्वित्सवनँ वृषा- जुजुष्वा९ अव गच्छति। इन्द्रङ्क उ स्विदा ऽचके।।

卐 कन्ते दाना^ असक्षत- वृत्रह न्कं सुवीर्या। उक्थे क^ उ स्विदन्तमः।।

卐 अयन्ते मानुषे जने- सोमः पूरुषु सूयते। तस्ये ऽहि प्र द्रवा पिब।।

卐 अयन्ते शर्यणावति- सुषोमाया मधि प्रियः। आर्जीकीये मदिन्तमः।।

卐 तमद्य राधसे महे- चारुं मदाय घृष्वये। एही मिन्द्र द्रवा पिब।।

☫ 8.65 यदिन्द्रेति द्वादशर्चस्य सूक्तस्य, काण्वः प्रगाथ- इन्द्रो- गायत्री।।

❀06.04.46 卐यदिन्द्र प्रागपा गुद-ङ्न्यग्वा हूयसे नृभिः। आ याहि तूय माशुभिः।।

卐 यद्वा प्रस्रवणे दिवो- मादयासे स्वर्णरे। यद्वा समुद्रे अन्धसः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 आ त्वा गीर्भि र्महा मुरुं- हुवे गामिव भोजसे। इन्द्र सोमस्य पीतये।।

卐 आ त इन्द्र महिमानं- हरयो देव ते महः। रथे वहन्तु बिभ्रतः।।

卐 इन्द्र गृणीष उ स्तुषे- महाऽ उग्र ईशानकृत्। एहि न स्सुतं पिब।।

卐 सुतावन्तस्त्वा वयं- प्रयस्वन्तो हवामहे। इदन्नो बर्हि रासदे।।

❀06.04.47 卐यच्चिद्धि शश्वता.मसी-न्द्र साधारणस्त्वम्। तन्त्वा वयं हवामहे।।

卐 इदन्ते सोम्यं मध्व-ऽधुक्षन्नद्रिभि र्नरः। जुषाण इन्द्र तत्पिब।।

卐 विश्वाऽ अर्यो विपश्चितो-ऽति ख्यस्तूय मा गहि। अस्मे धेहि श्रवो बृहत्।।

卐 दाता मे पृषतीनां- राजा हिरण्यवीनाम्। मा देवा मघवा रिषत्।।

卐 सहस्रे पृषतीना- मधि श्चन्द्रं बृह त्पृथु। शुक्रं हिरण्य.मा ददे।।

卐 नपातो दुर्गहस्य मे- सहस्रेण सुराधसः। श्रवो देवेष्वक्रत।।

8.66 तरोभिरिति पञ्चदशर्चस्य सूक्तस्य, प्रागाथः कलि-रिन्द्रः-प्रथमादि त्रयोदश्यन्ता अयुजो बृहत्यः-द्वितीयादि युज स्सतोबृहत्योऽन्त्याऽनुष्टुप्।।

❀06.04.48 卐तरोभि र्वो विदद्वसु- मिन्द्रं सबाध ऊतये। बृहद्गायन्त स्सुतसोमे अध्वरे- हुवे भरन्न कारिणम्।।

卐 न य.न्दुध्रा वरन्ते न स्थिरा मुरो- मदे सुशिप्र मन्धसः। य आदृत्या शशमानाय सुन्वते- दाता जरित्र उक्थ्यम्।।

卐 य श्शक्रो मृक्षो अश्व्यो- यो वा कीजो हिरण्ययः। स ऊर्वस्य रेजय त्यपावृति- मिन्द्रो गव्यस्य वृत्रहा।।

卐 निखातञ्चिद्यः पुरुसंभृतँ- वसूदि द्वपति दाशुषे। वज्री सुशिप्रो हर्यश्व इत्कर -दिन्द्रः क्रत्वा यथा वशत्।।

卐 यद्वावन्थ पुरुष्टुत- पुरा चिच्छूर नृणाम्। वय न्तत्त इन्द्र सं भरामसि- यज्ञ मुक्थ न्तुरँ वचः।।

❀06.04.49 卐सचा सोमेषु पुरुहूत वज्रिवो- मदाय द्युक्ष सोमपाः। त्वमिद्धि ब्रह्मकृते काम्यँ वसु- देष्ठ स्सुन्वते भुवः।।

卐 वय मेन मिदा ह्यो-ऽपीपेमेह वज्रिणम्। तस्मा उ अद्य समना सुतं भरा-ऽऽनूनं भूषत श्रुते।।

卐 वृकश्चिदस्य वारण^ उरामथि- रा वयुनेषु भूषति। सेमन्न स्स्तोमञ्जुजुषाण^ आ गही-न्द्र प्र चित्रया धिया।।

卐 कदू न्व1(अ)स्याकृत- मिन्द्रस्यास्ति पौंस्यम्। केनो~ नु कं श्रोमतेन न शुश्रुवे- जनुषः परि वृत्रहा।।

卐 कदू महीरधृष्टा^ अस्य तविषीः- कदु वृत्रघ्नो अस्तृतम्। इन्द्रो विश्वा न्बेकनाटाँ अहर्दृश^- उत क्रत्वा पणीँ रभि।।

❀06.04.50 卐वयङ्घा ते अपूर्व्ये-न्द्र ब्रह्माणि वृत्रहन्। पुरूतमासः पुरुहूत वज्रिवो- भृतिन्न प्र भरामसि।।

卐 पूर्वीश्चिद्धि त्वे तुविकूर्मि- न्नाशसो हवन्त इन्द्रोतयः। तिरश्चि दर्य स्सवना वसो~ गहि- शविष्ठ श्रुधि मे हवम्।।

卐 वयङ्घा ते त्वे इद्धि-न्द्र विप्रा^ अपि ष्मसि। नहि त्वदन्यः पुरुहूत कश्चन- मघवन्नस्ति मर्डिता।।

卐 त्वन्नो अस्या^ अमते रुत क्षुधो3(ओ)-ऽभिशस्ते रव स्पृधि। त्वन्न^ ऊती तव चित्रया धिया- शिक्षा शचिष्ठ गातुवित्।।

卐 सोम^ इद्व स्सुतो अस्तु- कलयो मा बिभीतन। अपेदेष ध्वस्मायति -स्वयङ्घैषो अपायति।।

8.67 त्यान्वित्येकविंशत्यृचस्य सूक्तस्य, सांमदो मत्स्य आदित्या दशम्यादि तिसृणामदिति र्गायत्री (मैत्रावरुणि र्मान्यो बहवो वामत्स्या जालनद्धा ऋषयः)

❀06.04.51 卐त्यान्नु क्षत्रियाँ अव- आदित्या न्याचिषामहे। सुमृळीकाँ अभिष्टये।।

卐 मित्रो नो अत्यंहतिं- वरुणः पर्ष दर्यमा। आदित्यासो यथा विदुः।।

卐 तेषां हि चित्र मुक्थ्य1(अँ)- वरूथ मस्ति दाशुषे। आदित्याना. मरङ्कृते।।

卐 महि वो महता मवो- वरुण मित्रार्यमन्न्। अवांस्या वृणीमहे।।

卐 जीवान्नो अभि धेतना-ऽऽदित्यासः पुरा हथात्। कद्ध स्थ हवनश्रुतः।।

❀06.04.52 卐यद्व श्श्रान्ताय सुन्वते- वरूथ मस्ति यच्छर्दिः। तेना नो अधि वोचत।।

卐 अस्ति देवा अंहो रुर्व-ऽस्ति रत्न मनागसः। आदित्या अद्भुतैनसः।।

卐 मा न स्सेतु स्सिषेदयं- महे वृणक्तु नस्परि। इन्द्र^ इद्धि श्रुतो वशी।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 मा नो मृचा रिपूणाँ- वृजिनाना मविष्यवः। देवा^ अभि प्र मृक्षत।।

卐 उत त्वामदिते मह्य-ऽह न्देव्युप ब्रुवे। सुमृळीका मभिष्टये।।

❀06.04.53 卐पर्षि दीने गभीर आँ९- उग्रपुत्रे जिघांसतः। माकि स्तोकस्य नो रिषत्।।

卐 अनेहो न^ उरुव्रज-उरूचि वि प्रसर्तवे। कृधि तोकाय जीवसे।।

卐 ये मूर्धानः ≈ क्षितीना- मऽदब्धास स्स्वयशसः। व्रता रक्षन्ते अद्रुहः।।

卐 ते न^ आस्नो वृकाणा- मादित्यासो मुमोचत। स्तेनं बद्ध मिवादिते।।

卐 अपो षु ण^ इयं शरु- रादित्या अप दुर्मतिः। अस्मदे त्वजघ्नुषी।।

❀06.04.54 卐शश्वद्धि व स्सुदानव-^ आदित्या^ ऊतिभि र्वयम्। पुरा नूनं बुभुज्महे।।

卐 शश्वन्तं हि प्रचेतस४- प्रतियन्तश्चि देनसः। देवा४ कृणुथ जीवसे।।

卐 तत्सु नो नव्यं सन्यस- आदित्या^ यन्मुमोचति। बन्धा द्बद्धमिवादिते।।

卐 नास्माकमस्ति तत्तर^- आदित्यासो अतिष्कदे। यूय मस्मभ्यं मृळत।।

卐 मा नो हेति र्विवस्वत-^ आदित्या४ कृत्रिमा शरुः। पुरा नु जरसो वधीत्।।

卐 वि षु द्वेषो व्यंहति- मादित्यासो वि संहितम्। विष्वग्वि वृहता रपः।।।। इति षष्ठाष्टके चतुर्थाध्याय स्समाप्तः ।।

## षष्ठाष्टके पञ्चमाध्यायः (वर्गाः1-37)

8.68 आ त्वेत्येकोनविंशत्यृचस्य सूक्तस्याऽऽङ्गिरसः प्रियमेध- इन्द्र-श्चतुर्दश्यादि षण्णामृक्षाश्वमेधौ गायत्री-आद्या चतुर्थी सप्तमी दशम्योऽनुष्टुभः।।

❀06.05.01 卐आ त्वा रथँ यथोतये- सुम्नाय वर्तयामसि। तुविकूर्मि मृतीषह- मिन्द्र शविष्ठ सत्पते।।

卐 तुविशुष्म तुविक्रतो~- शचीवो विश्वया मते। आ पप्राथ महित्वना।।

卐 यस्य ते महिना मह४- परि ज्मायन्त मीयतुः। हस्ता वज्रं हिरण्ययम्।।

卐 विश्वानरस्य वस्पति –मऽनानतस्य शवसः। एवैश्च चर्षणीना- मूती हुवे रथानाम्।।

卐 अभिष्टये सदावृधं- स्वर्मीऌहेषु यन्नरः। नाना हवन्त ऊतये।।

❀06.05.02 卐परोमात्र मृचीषम- मिन्द्र मुग्रं सुराधसम्। ईशानञ्चि द्वसूनाम्।।

卐 तन्त मिद्राधसे मह- इन्द्रञ्चोदामि पीतये। य४ पूर्व्या मनुष्टुति- मीशे कृष्टीना न्नृतुः।।

卐 न यस्य ते शवसान- सख्य मानंश मर्त्यः। नकि श्शवांसि ते नशत्।।

卐 त्वोतासस्त्वा युजा-ऽप्सु सूर्ये मह द्धनम्। जयेम पृत्सु वज्रिवः।।

卐 तन्त्वा यज्ञेभि रीमहे- तङ्गीर्भि र्गिर्वणस्तम। इन्द्र यथा चिदाविथ- वाजेषु पुरुमाय्यम्।।

❀06.05.03 卐यस्य ते स्वादु सख्यं- स्वाद्वी प्रणीति रद्रिवः। यज्ञो वितन्तसाय्यः।।

卐 उरु ण स्तन्वे3(ए)तन -उरु क्षयाय नस्कृधि। उरु णो यन्धि जीवसे।।

卐 उरु न्नृभ्य^ उरुङ्गव -उरुं रथाय पन्थाम्। देववीतिं मनामहे।।

卐 उप मा षड्वाद्वा नर- स्सोमस्य हर्ष्या। तिष्ठन्ति स्वादुरातयः।।

卐 ऋज्रा विन्द्रोत आ ददे- हरी~ ऋक्षस्य सूनवि। आश्वमेधस्य रोहिता।।

❀06.05.04 卐सुरथा॰ आतिथिग्वे- स्वभीशू॰ रार्क्षे। आश्वमेधे सुपेशसः।।

卐 षळश्वा॰ आतिथिग्व- इन्द्रोते वधूमतः। सचा पूतक्रतौ सनम्।।

卐 ऐषु चेत द्वृषण्व- त्यऽन्तर् ऋज्रेष्वऽरुषी। स्वभीशुः कशावती।।

卐 न युष्मे वाजबन्धवो- निनित्सुश्चन मर्त्यः। अवद्य मधि दीधरत्।।

8.69 प्रप्र व इत्यष्टादशर्चस्य सूक्तस्याऽऽङ्गिरसः प्रियमेध- इन्द्रोऽपादिन्द्र इत्यस्य विश्वेदेवा वरुणा देवताः-सुदेव इत्यस्य वरुणोऽनुष्टुब्द्वितीयोष्णिक्-चतुर्थ्याद्यास्तिस्रो गायत्र्यः-एकादशी षोळश्यौ पङ्क्ती अन्त्ये द्वे बृहत्यौ।।

卐 अष्टमेऽनुवाक एकादश सूक्तानि

❀06.05.05 卐प्रप्र व स्त्रिष्टुभ मिषं- मन्दद्वीरायेन्दवे। धिया वो मेधसातये- पुरन्ध्याविवासति।।

卐 नदँ व^ ओदतीना-.न्नदँ योयुवतीनाम्। पतिँ वो अघ्न्याना- न्धेनूना मिषुध्यसि।।

卐 ता^ अस्य सूददोहस- स्सोमं श्रीणन्ति पृश्नयः। जन्म न्देवानाँ विश- स्त्रिष्वा रोचने दिवः।।

卐 अभि प्र गोपतिङ्गिरे-न्द्र मर्च यथा विदे। सूनुं सत्यस्य सत्पतिम्।।

卐 आ हरय स्ससृज्रिरे-ऽरुषी रधि बर्हिषि। यत्राभि सन्नवामहे।।

❀06.05.06 卐इन्द्राय गाव^ आशिर.-न्दुदुह्रे वज्रिणे मधु। यत्सी मुपह्वरे विदत्।।

卐 उद्यद्ब्रध्नस्य विष्टप-.ङ्गृह मिन्द्रश्च गन्वहि। मध्वः पीत्वा सचेवहि- त्रिस्सप्त सख्युः पदे।।

卐 अर्चत प्रार्चत- प्रियमेधासो अर्चत। अर्चन्तु पुत्रका^ उत- पुरन्न धृष्ण्वर्चत।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अव स्वराति गर्गरो- गोधा परि सनिष्वणत्। पिङ्गा परि ᳡चनिष्कद- दिन्द्राय ब्रह्मोद्यतम्।।

卐 आ यत्पतन्त्येन्य- स्सुदुघा^ अनपस्फुरः। अपस्फुर.ङ्गृभायत- सोम मिन्द्राय पातवे।।

❀06.05.07 卐अपादिन्द्रो अपादग्नि- र्विश्वे देवा^ अमत्सत। वरुण इदिह क्षय- त्तमापो अभ्यनूषत- वत्सं संशिश्वरीरिव।।

卐 सुदेवो असि वरुण- यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं- सूर्म्यं सुषिरामिव।।

卐 यो व्यती९ रफाणय- त्सुयुक्ता९ उप दाशुषे। तक्को नेता तदिद्वपु- रुपमा यो अमुच्यत।।

卐 अतीदु शक्र^ ओहत- इन्द्रो विश्वा^ अति द्विषः। भिन त्कनीन^ ओदनं -पच्यमानं परो गिरा।।

卐 अर्भको न कुमारको-ऽधि तिष्ठन्नवं रथम्। स पक्ष न्महिषं मृगं- पित्रे मात्रे विभुक्रतुम्।।

卐 आ तू सुशिप्र दम्पते- रथ न्तिष्ठा हिरण्ययम्। अध द्युक्षं सचेवहि -सहस्रपाद मरुषं- स्वस्तिगा मनेहसम्।।

卐 तङ्घेमित्था नमस्विन^- उप स्वराज मासते। अर्थञ्चिदस्य सुधितं यदेतव -आवर्तयन्ति दावने।।

卐 अनु प्रत्नस्यौकसः- प्रियमेधास^ एषाम्। पूर्वा मनु प्रयतिं- वृक्तबर्हिषो हितप्रयस^ आशत।।

8.70 यो राजेति पञ्चदशर्चस्य सूक्तस्याऽङ्गिरसः पुरुह-न्मेन्द्रो- बृहती-द्वितीया चतुर्थी षष्ठ्य स्सतोबृहत्यः-त्रयोदश्युष्णिक्- चतुर्दश्यनुष्टु-बन्त्या पुरउष्णिक्।।

❀06.05.08 卐यो राजा चर्षणीनाँ- याता रथेभि रध्रिगुः। विश्वासा न्तरुता पृतनाना-ञ्ज्येष्ठो यो वृत्रहा गृणे।।

卐 इन्द्रन्तं शुम्भ पुरुहन्मन्नवसे- यस्य द्विता विधर्तरि। हस्ताय वज्रः प्रति धायि दर्शतो- महो दिवे न सूर्यः।।

卐 नकिष्टङ्कर्मणा नश -द्यश्चकार सदावृधम्। इन्द्रन्न यज्ञै विश्वगूर्त मृभ्वस –मऽधृष्ट न्धृष्णवोजसम्।।

卐 अषाळ्ह मुग्रं पृतनासु सासहिं- यस्मि न्मही रुरुज्रयः। सन्धेनवो जायमाने अनोनवु- र्द्यावः ≈ क्षामो अनोनवुः।।

卐 यद्याव^ इन्द्र ते शतं- शतं भूमी रुत स्युः। न त्वा वज्रि न्त्सहस्रं सूर्या- अनु न जात मष्ट रोदसी।।

❀06.05.09 卐आ पप्राथ महिना वृष्ण्या वृष- न्विश्वा शविष्ठ शवसा। अस्मा९ अव मघव न्गोमति व्रजे- वज्रि न्चित्राभि रूतिभिः।।

卐 न सी मदेव^ आप दिष- न्दीर्घायो~ मर्त्यः। एतग्वा चिद्य^ एतशा युयोजते- हरी~ इन्द्रो युयोजते।।

卐 तँ वो महो महाय्य- मिन्द्र न्दानाय सक्षणिम्। यो गाधेषु य^ आरणेषु हव्यो -वाजे ष्वस्ति हव्यः।।

卐 उदू षु णो वसो~- महे मृशस्व शूर राधसे। उदू षु मह्यै मघव न्मघत्तय -उदिन्द्र श्रवसे महे।।

卐 त्वन्न^ इन्द्र ऋतयु- स्त्वानिदो नि तृम्पसि। मध्ये वसिष्व तुविनृम्णो-र्वो र्नि दासं शिश्नथो हथैः।।

❀06.05.10 卐अन्यव्रत ममानुष- मयज्वान मदेवयुम्। अव स्व स्सखा दुधुवीत पर्वत- स्सुघ्नाय दस्युं पर्वतः।।

卐 त्वन्न इन्द्राऽऽसां- हस्ते शविष्ठ दावने। धानानान्न सङ्गृभायास्मयु- र्द्विस्सङ्गृभायास्मयुः।।

卐 सखाय꞉ क्रतु मिच्छत- कथा राधाम शरस्य। उपस्तुतिं भोज स्सूरि र्यो अह्रयः।।

卐 भूरिभि स्समह ऋषिभि- र्बर्हिष्मद्भि स्स्तविष्यसे। यदित्थ मेकमेक -मिच्छर वत्सा न्पराददः।।

卐 कर्णगृह्या मघवा शौरदेव्यो- वत्सन्न स्त्रिभ्य^ आऽनयत्। अजां सूरिर्न धातवे।।

☸ 8.71 त्वन्नो अग्न इति पञ्चदशर्चस्य सूक्तस्य, सुदीति पुरुमीह्ला-वग्नि-र्गायत्री-दशमी द्वादशी चतुर्दश्यो बृहत्य- एकादशी त्रयोदशी पञ्चदश्य स्सतोबृहत्यः- (अत्र सुदीति पुरुमीह्ळयो रन्यतरो वा ऋषिः)।।

❀06.05.11 卐त्वन्नो अग्ने महोभि꞉- पाहि विश्वस्या^ अरातेः। उत द्विषो मर्त्यस्य।।

卐 नहि मन्यु꞉ पौरुषेय^- ईशे हि व꞉ प्रियजात। त्वमिदसि क्षपावान्।।

卐 स नो विश्वेभि र्देवेभि- रूर्जो नपा द्भद्रशोचे। रयिन्देहि विश्ववारम्।।

卐 न तमग्ने अरातयो- मर्तँ युवन्त रायः। यन्त्रायसे दाश्वांसम्।।

卐 यन्त्वँ विप्र मेधसाता-वऽग्ने हिनोषि धनाय। स तवोती गोषु गन्ता।।

❀06.05.12 卐त्वं रयिं पुरुवीर- मऽग्ने दाशुषे मर्ताय। प्र णो नय वस्यो अच्छ।।

卐 उरुष्या णो मा परा दा-^ अघायते जातवेदः। दुराध्ये3(ए) मर्ताय।।

卐 अग्ने माकिष्टे देवस्य- रातिं मदेवो युयोत। त्वमीशिषे वसूनाम्।।

卐 स नो वस्व^ उप मास्यू-र्जो नपा न्माहिनस्य। सखे वसो~ जरितृभ्यः।।

卐 अच्छा न श्शीरशोचिष-ङ्गिरो यन्तु दर्शतम्। अच्छा यज्ञासो नमसा पुरूवसुं- पुरुप्रशस्त मूतये।।

❀06.05.13 卐अग्निं सूनुं सहसो जातवेदस- न्दानाय वार्याणाम्। द्विता यो भू दमृतो मर्त्येष्वा- होता मन्द्रतमो विशि।।
卐 अग्निँ वो देवयज्यया-ऽग्निं प्रय त्यध्वरे। अग्नि न्धीषु प्रथम मग्नि मर्व –त्यऽग्निङ्क्षैत्राय साधसे।।
卐 अग्नि रिषां सख्ये ददातु न-^ ईशे यो वार्याणाम्। अग्नि न्तोके तनये शश्व दीमहे- वसुं सन्त न्तनूपाम्।।
卐 अग्नि मीळिष्वावसे- गाथाभि श्शीरशोचिषम्। अग्निं राये पुरुमीळ्ह श्रुतन्नरो-ऽग्निं सुदीतये छर्दिः।।
卐 अग्नि न्द्वेषो योतवै नो गृणीमस्य-ऽग्निं शँ योश्च दातवे। विश्वासु विक्ष्ववितेव हव्यो- भुव द्वस्तुर् ऋषूणाम्।।
8.72 हवि रित्यष्टादशर्चस्य सूक्तस्य, प्रागाथो हर्यतोऽग्नि- र्गायत्री- (हविषां स्तुतिर्वा देवता)
❀06.05.14 卐हविष्कृणुध्व मागम –दऽध्वर्यु र्वनते पुनः। विद्वा॰ अस्य प्रशासनम्।।
卐 नि तिग्म मभ्य1(अं)शुं- सीदद्धोता मनावधि। जुषाणो अस्य सख्यम्।।
卐 अन्त रिच्छन्ति तञ्जने- रुद्रं परो मनीषया। गृभ्णन्ति जिह्वया ससम्।।
卐 जाम्यतीतपे धनु- र्वयोधा^ अरुह द्वनम्। दृषदञ्जिह्वयाऽवधीत्।।
卐 चरन्वत्सो रुशन्निह- निदातारन्न विन्दते। वेति स्तोतव अम्ब्यम्।।
❀06.05.15 卐उतो~ न्वस्य यन्मह –दऽश्वाव द्योजनं बृहत्। दामा रथस्य ददृशे।।
卐 दुहन्ति सप्तैका-. मुप द्वा पञ्च सृजतः। तीर्थे सिन्धो रधि स्वरे।।
卐 आ दशभि र्विवस्वत^- इन्द्र॰ कोश मचुच्यवीत्। खेदया त्रिवृता दिवः।।
卐 परि त्रिधातु रध्वर-ञ्जूर्णि रेति नवीयसी। मध्वा होतारो अञ्जते।।
卐 सिञ्चन्ति नमसाऽवत-.मुच्चाचक्रं परिज्मानम्। नीचीनबार मक्षितम्।।
❀06.05.16 卐अभ्यार मिदद्रयो- निषिक्तं पुष्करे मधु। अवतस्य विसर्जने।।
卐 गाव उपावतावतं- मही~ यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया।।
卐 आ सुते सिञ्चत श्रियं- रोदस्यो रभिश्रियम्। रसा दधीत वृषभम्।।
卐 ते जानत स्वमोक्य1(अं)- सँ वत्सासो न मातृभिः। मिथो नसन्त जामिभिः।।
卐 उप स्रक्वेषु बप्सत॰- कृण्वते धरुण न्दिवि। इन्द्रे अग्ना नमस्स्वः~।।

❀06.05.17 卐अधुक्ष त्पिप्युषी मिष.-मूर्जं सप्तपदी.मरिः। सूर्यस्य सप्त रश्मिभिः।।
卐 सोमस्य मित्रावरुणो-दिता सूर आ ददे। तदातुरस्य भेषजम्।।
卐 उतो न्वस्य यत्पदं- हर्यतस्य निधान्यम्। परि द्याञ्जिह्वयाऽतनत्।।
☬ 8.73 उदीराथामित्यष्टादशर्चस्य सूक्तस्याऽऽत्रेयो गोपवनोऽश्विनौ- गायत्री-(सप्तवध्रिर्वा ऋषिः)
❀06.05.18 卐उदीराथा मृतायते- युञ्जाथा मश्विना रथम्। अन्ति षद्भूतु वामवः।।
卐 निमिषश्चि ज्जवीयसा- रथेना ऽऽयात मश्विना। अन्ति षद्भूतु वामवः।।
卐 उप स्तृणीत मत्रये- हिमेन घर्म मश्विना। अन्ति षद्भूतु वामवः।।
卐 कुह स्थः कुह जग्मथुः- कुह श्येनेव पेतथुः। अन्ति षद्भूतु वामवः।।
卐 यदद्य कर्हि कर्हि -चिच्छुश्रूयात मिमं हवम्। अन्ति षद्भूतु वामवः।।
❀06.05.19 卐अश्विना यामहूतमा- नेदिष्ठँ याम्याप्यम्। अन्ति षद्भूतु वामवः।।
卐 अवन्त मत्रये गृह-ङ्कृणुतँ युव मश्विना। अन्ति षद्भूतु वामवः।।
卐 वरेथे~ अग्नि मातपो- वदते वल्ग्वत्रये। अन्ति षद्भूतु वामवः।।
卐 प्र सप्तवध्रि राशसा- धारा.मग्ने रशायत। अन्ति षद्भूतु वामवः।।
卐 इहाऽऽगतँ वृषण्वसू~- श्रृणुतं म इमं हवम्। अन्ति षद्भूतु वामवः।।
❀06.05.20 卐किमिदं वां पुराणव- ज्जरतोरिव शस्यते। अन्ति षद्भूतु वामवः।।
卐 समानँ वां सजात्यं- समानो बन्धु रश्विना। अन्ति षद्भूतु वामवः।।
卐 यो वां रजांस्यश्विना- रथो वियाति रोदसी। अन्ति षद्भूतु वामवः।।
卐 आ नो गव्येभि रश्व्यैः- स्सहस्रै रुप गच्छतम्। अन्ति षद्भूतु वामवः।।
卐 मा नो गव्येभि रश्व्यैः- स्सहस्रेभि रति ख्यतम्। अन्ति षद्भूतु वामवः।।
卐 अरुणप्सु रुषा अभू- दऽक ज्योतिर् ऋतावरी। अन्ति षद्भूतु वामवः।।
卐 अश्विना सु विचाकश -द्वृक्षं परशुमा॰इव। अन्ति षद्भूतु वामवः।।
卐 पुरन्न धृष्ण~वा रुज- कृष्णया बाधितो विशा। अन्ति षद्भूतु वामवः।।
☬ 8.74 विशोविश इति पञ्चदशर्चस्य सूक्तस्याऽऽत्रेयो गोपवनोऽग्नि-रन्त्यतिसृणां श्रुतर्वा गायत्री-आद्या चतुर्थी सप्तमी दशम्यस्त्रयोदश्यादि तिस्रश्चानुष्टुभः।।

❀06.05.21 卐विशोविशो वो अतिथिँ- वाजयन्तः॰ पुरुप्रियम्। अग्निँ वो दुर्यँ वच- स्स्तुषे शूषस्य मन्मभिः।।

卐 यज्ञनासो हविष्मन्तो- मित्रन्न सर्पिरासुतिम्। प्रशंसन्ति प्रशस्तिभिः।।

卐 पन्यांसञ्जातवेदसँ- यो देवतात्युद्यता। हव्यान्यैरय द्दिवि।।

卐 आऽगन्म वृत्रहन्तम-ञ्ज्येष्ठ मग्नि मानवम्। यस्य श्रुतर्वा बृह- न्नार्क्षो अनीक एधते।।

卐 अमृतञ्जातवेदस- न्तिर स्तमांसि दर्शतम्। घृताऽऽहवन मीड्यम्।।

❀06.05.22 卐सबाधो यज्ञना इमे3(ए)-ऽग्निं हव्येभि रीळते। जुह्वानासो यतस्रुचः।।

卐 इयन्ते नव्यसी मति- रऽग्ने अधाय्यस्मदा। मन्द्र सुजात सुक्रतो~ऽमूर दस्मातिथे।।

卐 सा ते अग्ने शन्तमा- चनिष्ठा भवतु प्रिया। तया वर्धस्व सुष्टुतः।।

卐 सा द्युम्नै र्द्युम्निनी बृह- दुपोप श्रवसि श्रवः। दधीत वृत्रतूर्ये।।

卐 अश्व मिद्गां रथप्रा- न्त्वेष मिन्द्रन्न सत्पतिम्। यस्य श्रवांसि तूर्वथ -पन्यंपन्यञ्च कृष्टयः।।

❀06.05.24 卐यन्त्वा गोपवनो गिरा- चनिष्ठ दग्ने अङ्गिरः। स पावक श्रुधी हवम्।।

卐 यन्त्वा जनास^ ईळते- सबाधो वाजसातये। स बोधि वृत्रतूर्ये।।

卐 अहं हुवान^ आर्क्षे- श्रुतर्वणि मदच्युति। शर्धांसीव स्तुकाविनां- मृक्षा शीर्षा चतुर्णाम्।।

卐 माञ्चत्वार^ आशव- श्शविष्ठस्य द्रवित्नवः। सुरथासो अभि प्रयो- वक्ष न्वयो न तुग्र्यम्।।

卐 सत्य मित्त्वा महेनदि- परुष्ण्यव देदिशम्। नेमापो अश्वदातर- श्शविष्ठा दस्ति मर्त्यः।।

8.75 युक्ष्वा हीति षोळशर्चस्य सूक्तस्याऽऽङ्गिरसो विरूपोऽग्नि-र्गायत्री।।

❀06.05.25 卐युक्ष्वा हि देवहूतमा॰- अश्वा॰ अग्ने रथीरिव। नि होता पूर्व्य स्सदः।।

卐 उत नो देव देवा॰- अच्छा वोचो विदुष्टरः। श्रद्विश्वा वार्या कृधि।।

卐 त्वं ह यद्यविष्ठ्य- सहस स्सून~वाहुत। ऋतावा यज्ञियो भुवः।।

卐 अय मग्नि स्सहस्रिणो- वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम्।।

卐 तन्नेमि मृभवो यथा-ऽऽनमस्व सहूतिभिः। नेदीयो यज्ञ मङ्गिरः।।

❀06.05.25 卐तस्मै नून मभिद्यवे- वाचा विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिम्।।

卐 कमु ष्विदस्य सेनया-ऽग्ने रपाकचक्षसः। पणिङ्गोषु स्तरामहे।।

卐 मा नो देवानाँ विशः- प्रस्नातीरिवोस्राः। कृशन्न ऽहासु रघ्याः।।

卐 मा न स्समस्य दूढ्य1(अ)ः- परिद्वेषसो अंहतिः। ऊर्मिर्न नाव माऽवधीत्।।

卐 नमस्ते अग्न ओजसे- गृणन्ति देव कृष्टयः। अमै रमित्र मर्दय।।

❀06.05.26 卐कुवित्सु नो गविष्टये-ऽग्ने सँवेषिषो रयिम्। उरुकृ दुरु ण स्कृधि।।

卐 मा नो अस्मि न्महाधने- परा वर्ग्भारभृ द्यथा। संवर्गं सं रयिञ्जय।।

卐 अन्य मस्म द्भिया इय- मऽग्ने सिषक्तु दुच्छुना। वर्धा नो अमवच्छवः।।

卐 यस्याजुषन्नमस्विन- श्शमी मदुर्मखस्य वा। तङ्घेदग्नि वृधाऽवति।।

卐 परस्या^ अधि सँवतो-ऽवरा अभ्या तर। यत्राह.मस्मि ता अव।।

卐 विद्मा हि ते पुरा वय- मऽग्ने पितु र्यथाऽवसः। अधा ते सुम्न मीमहे।।

8.76 इमन्विति द्वादशर्चस्य सूक्तस्य, काण्वः कुरुसुति-रिन्द्रो- गायत्री।।

❀06.05.27 卐इम न्नु मायिनं हुव- इन्द्र.मीशान.मोजसा। मरुत्वन्तन्न वृञ्जसे।।

卐 अय मिन्द्रो मरुत्सखा- वि वृत्रस्याभिनच्छिरः। वज्रेण शतपर्वणा।।

卐 वावृधानो मरुत्सखे-न्द्रो वि वृत्र मैरयत्। सृज न्त्समुद्रिया अपः।।

卐 अयं ह येन वा इदं- स्वर्मरुत्वता जितम्। इन्द्रेण सोमपीतये।।

卐 मरुत्वन्त मृजीषिण- मोजस्वन्तँ विरप्शिनम्। इन्द्रङ्गीर्भि र्हवामहे।।

卐 इन्द्रं प्रत्नेन मन्मना- मरुत्वन्तं हवामहे। अस्य सोमस्य पीतये।।

❀06.05.28 卐मरुत्वा इन्द्र मीढ्वः- पिबा सोमं शतक्रतो। अस्मिन्यज्ञे पुरुष्टुत।।

卐 तुभ्येदिन्द्र मरुत्वते- सुता स्सोमासो अद्रिवः। हृदा हूयन्त उक्थिनः।।

卐 पिबेदिन्द्र मरुत्सखा- सुतं सोमन्दिविष्टिषु। वज्रं शिशान^ ओजसा।।

卐 उत्तिष्ठ न्नोजसा सह- पीत्वी शिप्रे~ अवेपयः। सोम मिन्द्र चमू~ सुतम्।।

卐 अनु त्वा रोदसी उभे~- क्रक्षमाण मकृपेताम्। इन्द्र यद्दस्युहाऽभवः।।

卐 वाचं मष्टापदी मह.-न्नवस्रक्ति मृतस्पृशम्। इन्द्रा त्परि तन्वं ममे।।

8.77 जज्ञान इत्येकादशर्चस्य सूक्तस्य, काण्वः कुरुसुति-रिन्द्रो- गायत्री-अन्त्ये द्वे बृहती सतोबृहत्यौ।।

❀06.05.29 卐जज्ञानो नु शतक्रतु- र्विपृच्छ दिति मातरम्। क उग्राः के ह श्रृण्विरे।।
卐 आदीं शवस्यब्रवी- दौर्णवाभ महीशुवम्। ते पुत्र सन्तु निष्टुरः।।
卐 समित्ता न्वृत्रहाऽखिद-त्खे अराऽइव खेदया। प्रवृद्धो दस्युहाऽभवत्।
卐 एकया प्रतिधा पिब -त्साकं सरांसि त्रिंशतम्। इन्द्र स्सोमस्य काणुका।।
卐 अभि गन्धर्व मतृण –दऽबुध्नेषु रजस्स्वा। इन्द्रो ब्रह्मभ्य इद्वृधे।।
❀06.05.30 卐निराविध्यद्गिरिभ्य-^ आ धारय त्पक्व मोदनम्। इन्द्रो बुन्दं स्वाततम्।।
卐 शतब्रध्न^ इषुस्तव- सहस्रपर्ण^ एक^ इत्। यमिन्द्र चकृषे युजम्।।
卐 तेन स्तोतृभ्य^ आ भर- नृभ्यो नारिभ्यो अत्तवे। सद्यो जात^ ऋभुष्ठिर।।
卐 एता च्यौत्नानि ते कृता- वर्षिष्ठानि परीणसा। हृदा वीड्वधारयः।।
卐 विश्वेत्ता विष्णु राऽभर -दुरुक्रम स्त्वेषितः। शतं महिषा न्क्षीरपाक मोदनं- वराह मिन्द्र^ एमुषम्।।
卐 तुविक्ष न्ते सुकृतं सूमय न्धनु- स्साधु बुन्दो हिरण्ययः। उभा ते बाहू~ रण्या सुसंस्कृत- ऋदूपे चिद्दृवृधा।।
8.78 पुरोळाशमिति दशर्चस्य सूक्तस्य, काण्वः कुरुसुति-रिन्द्रो- गायत्र्यन्त्या बृहती।।
❀06.05.31 卐पुरोळाशन्नो अन्धस-^ इन्द्र सहस्रमा भर। शता च शूर गोनाम्।।
卐 आ नो भर व्यञ्जन-ङ्गामश्व मभ्यञ्जनम्। सचा मना हिरण्यया।।
卐 उत नः कर्णशोभना- पुरूणि धृष्ण~वा भर। त्वं हि श्रृण्विषे वसो~।।
卐 नकीं वृधीक^ इन्द्र ते- न सुषा^ न सुदा^ उत। नान्य स्त्वच्छूर वाघतः।।
卐 नकी मिन्द्रो निकर्तवे- न शक्रः परिशक्तवे। विश्वं श्रृणोति पश्यति।।
❀06.05.32 卐स मन्युं मर्त्याना- मऽदब्धो नि चिकीषते। पुरा निद श्चिकीषते।।
卐 क्रत्व इत्पूर्ण मुदर- न्तुरस्याऽस्ति विधतः। वृत्रघ्न स्सोमपाव्नः।।
卐 त्वे वसूनि सङ्गता- विश्वा च सोम सौभगा। सुदा त्वऽपरिह्वृता।।
卐 त्वामि द्यवयु र्मम- कामो गव्यु र्हिरण्ययुः। त्वामश्वयुरेषते।।
卐 तवेदिन्द्राह माशसा- हस्ते दात्रञ्चनाऽऽददे। दिनस्य वा मघवन्त्संभृतस्य- वा पूर्धि यवस्य काशिना।।

🕉 8.79 अय ङ्कृत्नुरिति नवर्चस्य सूक्तस्य, कृत्नुर्भार्गव- स्सोमो- गाय-त्र्यन्त्याऽनुष्टुप्।।

❀06.05.33 卐अयङ्कृत्नु रगृभीतो- विश्वजि दुद्भिदि त्सोमः। ऋषि र्विप्रः काव्येन।।

卐 अभ्यूर्णोति यन्नग्नं- भिषक्ति विश्वँ यत्तुरम्। प्रेमन्धः ख्यन्निश्श्रोणो भूत्।।

卐 त्वं सोम तनूकृद्भ्यो- द्वेषोभ्योऽन्यकृतेभ्यः। उरु यन्तासि वरूथम्।।

卐 त्वञ्चित्ती तव दक्षै- र्दिव आ पृथिव्या ऋजीषिन्न्। यावी रघस्य चिद्वेषः।।

卐 अर्थिनो यन्ति चेदर्थ-ङ्गच्छा निद्ददुषो रातिम्। ववृज्यु स्तृष्यतः कामम्।।

❀06.05.34 卐विदद्यत्पूर्व्यन्नष्ट.-मुदीमृतायु मीरयत्। प्रेमायु स्तारी दतीर्णम्।।

卐 सुशेवो नो मृळयाकु- रऽदृप्तक्रतु रवातः। भवा न स्सोम शं हृदे।।

卐 मा नस्सोम सँ वीविजो- मा वि बीभिषथा राजन्न्। मा नो हार्दि त्विषा वधीः।।

卐 अव यत्स्वे सधस्थे- देवाना न्दुर्मती रीक्षे। राजन्नप द्विष स्सेध- मीढ्वो अप स्त्रिध स्सेध।।

🕉 8.80 नह्यन्यमिति दशर्चस्य सूक्तस्य, नौधस एकद्यू-रिन्द्रोऽन्त्याया देवा गाय-त्र्यन्त्या त्रिष्टुप्।।

卐 🕉नवमेऽनुवाके त्रयोदशसूक्तानि

❀06.05.35 卐नह्य1(अ)न्यं बळाकरं- मर्डितारं शतक्रतो~। त्वन्न इन्द्र मृळय।।

卐 यो न श्शश्व त्पुराऽऽविथा-ऽमृध्रो वाजसातये। स त्वन्न इन्द्र मृळय।।

卐 किमङ्ग रध्रचोदन -स्सुन्वानस्यावितेदसि। कुवित्स्विन्द्र ण श्शकः।।

卐 इन्द्र प्र णो रथमव- पश्चाच्चि त्सन्त.मद्रिवः। पुरस्ता देनं मे कृधि।।

卐 हन्तो~ नु किमाससे- प्रथम न्नो रथङ्कृधि। उपमँ वाजयु श्रवः।।

❀06.05.36 卐अवा नो वाजयुं रथं- सुकरन्ते किमि त्परि। अस्मान्त्सु जिग्युषस्कृधि।।

卐 इन्द्र दृह्यस्व पूरसि- भद्रा त एति निष्कृतम्। इयन्धीर् ऋत्वियावती।।

卐 मा सीमवद्य आ भा-गुर्वी काष्ठा हित न्धनम्। अपावृक्ता अरत्नयः।।

卐 तुरीय न्नाम यज्ञियँ- यदा कर स्तदुश्मसि। आदि त्पतिर्न ओहसे।।

卐 अवीवृधद्वो अमृता अमन्दी- देकद्यू र्देवा उत याश्च देवीः। तस्मा उ राधः कृणुत प्रशस्तं- प्रात र्मक्षू धियावसु र्जगम्यात्।।

🕉 8.81 आ तू न इति नवर्चस्य सूक्तस्य, काण्वः कुसीदीन्द्रो गायत्री।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀06.05.37 卐आ तू न^ इन्द्र क्षुमन्त- श्चित्र ङ्ग्राभं सङ्गृभाय। महाहस्ती दक्षिणेन।।

卐 विद्मा हि त्वा तुविकूर्मि- न्तुविदेष्ण न्तुवीमघम्। तुविमात्र मवोभिः।।

卐 नहि त्वा शूर देवा^- न मर्तासो दित्सन्तम्। भीमन्न गाँ वारयन्ते।।

卐 एतो न्विन्द्रं स्तवामे-शानं वस्व स्स्वराजम्। न राधसा मर्धिषन्नः।।

卐 प्र स्तोष दुप गासिष-च्छ्रवत्साम गीयमानम्। अभि राधसा जुगुरत्।।

❀06.05.38 卐आ नो भर दक्षिणेना-ऽभि सव्येन प्र मृश। इन्द्र मा नो वसो र्निर्भाक्।।

卐 उप क्रमस्वाऽऽ भर -धृषता धृष्णो~ जनानाम्। अदाशूष्टरस्य वेदः।।

卐 इन्द्र य^ उ नु ते अस्ति- वाजो विप्रेभिस्सनित्वः। अस्माभिस्सु तं सनुहि।।

卐 सद्योजुव स्ते वाजा^- अस्मभ्यँ विश्वश्चन्द्राः। वशैश्च मक्षू जरन्ते।।।।इति पञ्चमाध्याय स्समाप्तः ।।

## ऽ०ऽ ऽ०ऽषष्ठाष्टके षष्ठाध्यायः (वर्गाः 1-38)

卐 8.82 आ प्र द्रवेति नवर्चस्य सूक्तस्य, काण्वः कुसीदीन्द्रो गायत्री।।

❀06.06.01 卐आ प्र द्रव परावतो-ऽर्वावतश्च वृत्रहन्न्। मध्वः प्रति प्रभर्मणि।।

卐 तीव्रा स्सोमास आ गहि- सुतासो मादयिष्णवः। पिबा दधृ ग्यथोचिषे।।

卐 इषा मन्दस्वादु ते-ऽरँ वराय मन्यवे। भुवत्त इन्द्र शं हृदे।।

卐 आ त्वशत्र~ वा ऽऽगहि- न्यु1(उ)क्थानि च हूयसे। उपमे रोचने दिवः।।

卐 तुभ्याय मद्रिभि स्सुतो- गोभि श्श्रीतो मदाय कम्। प्र सोम^ इन्द्र हूयते।।

❀06.06.02 卐इन्द्र श्रुधि सु मे हव.- मस्मेसुतस्य गोमतः। वि पीति न्तृप्ति मश्नुहि।।

卐 य^ इन्द्र चमसेष्वा- सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे।।

卐 यो अप्सु चन्द्रमाइव- सोमश्चमूषु दद्दशे। पिबेदस्य त्वमीशिषे।।

卐 यन्ते श्येनः पदाभर- त्तिरो रजांस्यस्पृतम्। पिबेदस्य त्वमीशिषे।।

卐 8.83 देवानामिति नवर्चस्य सूक्तस्य, काण्वः कुसीदी- विश्वेदेवा- गायत्री- (भेदपक्षे विश्वेदेवाः 3-अर्यमवरुणौ 1-विश्वेदेवाः 5-एवं 9)

❀06.06.03 卐देवाना मिदवो मह-त्त दावृणीमहे वयम्। वृष्णा मस्मभ्य मूतये।।

卐 ते न स्सन्तु युज स्सदा- वरुणो मित्रो अर्यमा। वृधासश्च प्रचेतसः।।

卐 अर्ति नो विष्पिता पुरु- नौभि रपो न पर्षथ। यूय मृतस्य रथ्यः।।

卐 वामन्नो अस्त्वर्यम- न्वामँ वरुण शंस्यम्। वामं ह्यावृणीमहे।।

卐 वामस्य हि प्रचेतस^- ईशानासो रिशादसः। नेमादित्या^ अघस्य यत्।।

❀06.06.04 卐वय मिद्व स्सुदानवः-≈क्षियन्तो यान्तो अध्वन्ना। देवा^ वृधाय हूमहे।।

卐 अधि न इन्द्रैषाँ- विष्णो~ सजात्यानाम्। इता मरुतो अश्विना।।

卐 प्र भ्रातृत्वं सुदानवो-ऽध द्विता समान्या। मातु गर्भे भरामहे।।

卐 यूयं हि ष्ठा सुदानव-^ इन्द्रज्येष्ठा अभिद्यवः। अधा चिद्व^ उत ब्रुवे।।

8.84 प्रेष्ठं व इति नवर्चस्य सूक्तस्य, काव्य उशना- अग्नि- र्गायत्री।।

❀06.06.04 卐प्रेष्ठँ वो अतिथिं- स्तुषे मित्रमिव प्रियम्। अग्निं रथन्न वेद्यम्।।

卐 कवि मिव प्रचेतसँ- यन्देवासो अध द्विता। नि मर्त्येष्वाऽऽदधुः।।

卐 त्वँ यविष्ठ दाशुषो- नृ९४ पाहि श्रृणुधी गिरः। रक्षा तोक मुत त्मना।।

卐 कया ते अग्ने अङ्गिर-^ ऊर्जो नपा दुपस्तुतिम्। वराय देव मन्यवे।।

卐 दाशेम कस्य मनसा- यज्ञस्य सहसो यहो~। कदु वोच इदन्नमः।।

❀06.06.06 卐अधा त्वं हि नस्करो- विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिरः।।

卐 कस्य नूनं परीणसो- धियो जिन्वसि दम्पते। गोषाता यस्य ते गिरः।।

卐 तं मर्जयन्त सुक्रतुं- पुरोयावान माजिषु। स्वेषु क्षयेषु वाजिनम्।।

卐 क्षेति क्षेमेभि स्साधुभि- र्नकिर्यङ्घ्नन्ति हन्ति यः। अग्ने सुवीर^ एधते।।

8.85 आ मे हवमिति नवर्चस्य सूक्तस्याऽऽङ्गिरसः कृष्णोऽश्विनौ- गायत्री।।

❀06.06.07 卐आ मे हव न्नासत्या-ऽश्विना गच्छतँ युवम्। मध्व स्सोमस्य पीतये।।

卐 इमं मे स्तोम मश्विने -मं मे श्रृणुतं हवम्। मध्व स्सोमस्य पीतये।।

卐 अयँ वाङ्कृष्णो अश्विना- हवते वाजिनीवसू~। मध्व स्सोमस्य पीतये।।

卐 श्रृणुतञ्जरितु र्हव-ङ्कृष्णस्य स्तुवतो नरा। मध्व स्सोमस्य पीतये।।

卐 छर्दिर्यन्त मदाभ्यँ- विप्राय स्तुवते नरा। मध्व स्सोमस्य पीतये।।

❀06.06.08 卐गच्छत न्दाशुषो गृह- मित्था स्तुवतो अश्विना। मध्व स्सोमस्य पीतये।।

卐 युञ्जाथां रासभं रथे- वीड्वङ्गे वृषण्वसू~। मध्व स्सोमस्य पीतये।।

卐 त्रिवन्धुरेण त्रिवृता- रथेनाऽऽयात मश्विना। मध्व स्सोमस्य पीतये।।

卐 नू मे गिरो नासत्या-ऽश्विना प्रावतँ युवम्। मध्व स्सोमस्य पीतये।।

8.86 उभा हीति पञ्चर्चस्य सूक्तस्याऽऽङ्गिरसः कृष्णोऽश्विनौ- जगती-(अत्र कर्ष्णिर्विश्वक ऋषिः पाक्षिकः)।।

❀06.06.09 卐उभा हि दस्रा भिषजा मयोभुवो-भा दक्षस्य वर्चसो बभूवथुः। ता वाँ विश्वको हवते तनूकृथे- मा नो वि यौष्टं सख्या मुमोचतम्।।

卐 कथा नूनँ वाँ विमना^ उप स्तव -द्युव न्धिय न्ददथु र्वस्यइष्टये। ता वाँ विश्वको हवते तनूकृथे- मा नो वि यौष्टं सख्या मुमोचतम्।।

卐 युवं हि ष्मा पुरुभुजे ममेधतुं- विष्णाप्वे ददथु र्वस्यइष्टये। ता वाँ विश्वको हवते तनूकृथे- मा नो वि यौष्टं सख्या मुमोचतम्।।

卐 उत त्यँ वीर न्धनसा मृजीषिण- न्दूरे चित्सन्त मवसे हवामहे। यस्य स्वादिष्ठा सुमतिः पितुर्यथा- मा नो वि यौष्टं सख्या मुमोचतम्।।

卐 ऋतेन देव स्सविता शमायत -ऋतस्य शृङ्ग मुर्विया वि पप्रथे। ऋतं सासाह महि चित्पृतन्यतो- मा नो वि यौष्टं सख्या मुमोचतम्।।

8.87 द्युम्नी वामिति षड्चस्य सूक्तस्याऽऽङ्गिरसः कृष्णोऽश्विनौ- अयुजो बृहत्यो- युज स्सतोबृहत्यः-(अत्र वासिष्ठो द्युम्नीक आङ्गिरसः प्रियमेधश्चेत्युभावृषी वैकल्पिकौ)।।

❀06.06.10 卐द्युम्नी वां स्तोमो अश्विना- क्रिविर्न सेक आ गतम्। मध्व स्सुतस्य स दिवि प्रियो नरा-पातङ्गौराविवेरिणे।।

卐 पिबतङ्घर्मं मधुमन्त मश्विना-ऽऽबर्हि स्सीदतन्नरा। ता मन्दसाना मनुषो दुरोण -आ नि पातँ वेदसा वयः।।

卐 आ वाँ विश्वाभि रूतिभिः- प्रियमेधा^ अहूषत। ता वर्ति र्यात मुप वृक्तबर्हिषो- जुष्टँ यज्ञ न्दिविष्टिषु।।

卐 पिबतं सोमं मधुमन्त मश्विना-ऽऽबर्हि स्सीदतं सुमत्। ता वावृधाना उप सुष्टुति न्दिवो-गन्तङ्गौराविवेरिणम्।।

卐 आ नूनँ यात मश्विना-ऽश्वेभिः प्रुषितप्सुभिः। दस्रा हिरण्यवर्तनी~ शुभ स्पती~पातं सोम मृतावृधा।।

卐 वयं हि वां हवामहे विपन्यवो- विप्रासो वाजसातये। ता वल्गू~ दस्रा पुरुदंससा धिया-ऽश्विना श्रुष्ट्या गतम्।।

8.88 तँ वो दस्ममिति षड्ृचस्य सूक्तस्य, गौतमो नोधा- इन्द्रोऽयुजो बृहत्यो- युज स्सतोबृहत्यः—

❀06.06.11 卐तँ वो दस्म मृतीषहँ- वसो र्मन्दान मन्धसः। अभि वत्सन्न स्वसरेषु धेनव-^ इन्द्रङ्गीर्भि र्नवामहे।।

卐 द्युक्षं सुदानु न्तविषीभि रावृत-ङ्गिरिन्न पुरुभोजसम्। क्षुमन्तँ वाजं शतिनं सहस्रिणं- मक्षू गोमन्त मीमहे।।

卐 न त्वा बृहन्तो अद्रयो- वरन्त इन्द्र वीळवः। यद्दित्ससि स्तुवते मावते वसु- नकिष्टदा ऽऽमिनाति ते।।

卐 योद्धाऽसि क्रत्वा शवसोत दंसना- विश्वा जाताऽभि मज्मना। आ त्वाऽय मऽर्क^ ऊतये ववर्तति- यङ्गोतमा^ अजीजनन्।।

卐 प्र हि रिरिक्ष ओजसा- दिवो अन्तेभ्य स्परि। न त्वा विव्याच रज^ इन्द्र पार्थिव- मऽनु स्वधाँ ववक्षिथ।।

卐 नकिः परिष्टि र्मघव न्मघस्य ते- यद्दाशुषे दशस्यसि। अस्माकं बोध्युचथस्य चोदिता- मंहिष्ठो वाजसातये।।

8.89 बृहदिन्द्रायेति सप्तर्चस्य सूक्तस्याऽऽङ्गिरसौ नृमेध पुरुमेधा-विन्द्रो- बृहती-द्वितीया चतुर्थ्यौ सतोबृहत्यौ-पञ्चमी षष्ठ्यावनुष्टुभौ।।

❀06.06.12 卐बृह दिन्द्राय गायत- मरुतो वृत्रहन्तमम्। येन ज्योति रजनय न्नृतावृधो- देव न्देवाय जागृवि।।

卐 अपाधम दभिशस्ती रशस्तिहा-ऽथेन्द्रो द्युम्न्याऽभवत्। देवास्त इन्द्र सख्याय येमिरे- बृहद्भानो~ मरुद्गण।।

卐 प्र व^ इन्द्राय बृहते- मरुतो ब्रह्मार्चत। वृत्रं हनति वृत्रहा शतक्रतु- र्वज्रेण शतपर्वणा।।

卐 अभि प्र भर धृषता धृषन्मन- श्श्रवश्चित्ते असद्बृहत्। अर्षन्त्वापो जवसा वि मातरो- हनो वृत्रञ्जया स्वः~।।

卐 यज्जायथा^ अपूर्व्य- मघव न्वृत्रहत्याय। तत्पृथिवी मप्रथय -स्तदस्तभ्ना^ उत द्याम्।।

卐 तत्ते यज्ञो अजायत- तदर्क^ उत हस्कृतिः। तद्विश्वं मभिभूरसि- यज्जातँ यच्च जन्त्वम्।।

卐 आमासु पक्व मैरय-^ आ सूर्यं रोहयो दिवि। घर्मन्न साम न्तपता सुवृक्तिभि- र्जुष्ट.ङ्गिर्वणसे बृहत्।।

8.90 आ नो विश्वास्विति षड्चस्य सूक्तस्याऽऽङ्गिरसौ नृमेध पुरुमेधा-विन्द्रोऽयुजो बृहत्यो- युज स्सतोबृहत्यः।।

❀06.06.14 卐आ नो विश्वासु हव्य-^ इन्द्र स्समत्सु भूषतु। उप ब्रह्माणि सवनानि वृत्रहा- परमज्या^ ऋचीषमः।।

卐 त्वन्दाता प्रथमो राधसामस्य-ऽसि सत्य ईशानकृत्। तुविद्युम्नस्य युज्याऽऽ वृणीमहे- पुत्रस्य शवसो महः।।

卐 ब्रह्मा त इन्द्र गिर्वणः- क्रियन्ते अनतिद्भुता। इमा जुषस्व हर्यश्व योजने-न्द्र या ते अमन्महि।।

卐 त्वं हि सत्यो मघवन्नऽनानतो- वृत्रा भूरि न्यृञ्जसे। स त्वं शविष्ठ वज्रहस्त दाशुषे-ऽर्वाञ्चं रयि मार्कृधि।।

卐 त्वमिन्द्र यशा^ अ-स्यृजीषी शवसस्पते। त्वँ वृत्राणि हंस्यप्रती-न्येक^ इदनुत्ता चर्षणीधृता।।

卐 तमु त्वा नून मसुर प्रचेतसं- राधो भागमिवेमहे। महीव कृत्ति श्शरणा त इन्द्र- प्र ते सुम्ना नो अश्नवन्न्।।

8.91 कन्या वा रिति सप्तर्चस्य सूक्तस्याऽऽत्रेय्यपालेन्द्रोऽनुष्टु-बाद्ये द्वे पङ्क्ती।।

❀06.06.14 卐कन्या3(आ) वारवायती- सोम मपि स्रुताऽविदत्। अस्तं भरन्त्यब्रवी- दिन्द्राय सुनवै त्वा- शक्राय सुनवै त्वा।।

卐 असौ य^ एषि वीरको- गृहङ्गृहँ विचाकशत्। इमञ्जम्भसुतं पिब -धानावन्तङ्करम्भिण- मऽपूपवन्त मुक्थिनम्।।

卐 आ चन त्वा चिकित्सामो-ऽधि चन त्वा नेमसि। शनैरिव शनकैरि -वेन्द्रायेन्दो~ परि स्रव।।

卐 कुविच्छकत्कुवित्कर- त्कुविन्नो वस्यस स्करत्। कुवि त्पतिद्विषो यती- रिन्द्रेण सङ्गमामहै।।

卐 इमानि त्रीणि विष्टपा- तानीन्द्र वि रोहय। शिर स्ततस्योर्वरा- मादिदं म उपोदरे।।

卐 असौ च या^ न^ उर्वरा -ऽऽदिमा न्तन्व1(अं) मम। अथो~ ततस्य यच्छिर- स्सर्वा ता रोमशा कृधि।।

卐 खे रथस्य खेऽनसः- खे युगस्य शतक्रतो~। अपाला मिन्द्र त्रिष्पूत्व्य-ऽकृणो स्सूर्यत्वचम्।।

8.92 पान्त मिति त्रयस्त्रिंशदृचस्य सूक्तस्याऽऽगिरसश्श्रुतकक्ष इन्द्रो गायत्र्याद्याऽनुष्टुप्-(सुकक्षो वा ऋषिः)।।

❀06.06.15 卐पान्तमा वो अन्धस-^ इन्द्र मभि प्र गायत। विश्वासाहं शतक्रतुं- मंहिष्ठञ्चर्षणीनाम्।।

卐 पुरुहूतं पुरुष्टुत-ङ्गाथान्य1(अं) सनश्रुतम्। इन्द्र^ इति ब्रवीतन।।

卐 इन्द्र^ इन्नो महाना- न्दाता वाजाना न्नृतुः। महाँ अभिज्ञ्वा ऽऽयमत्।।

卐 अपादु शिप्र्यन्धस -स्सुदक्षस्य प्रहोषिणः। इन्दो रिन्द्रो यवाऽऽशिरः।।

卐 तम्वभि प्रार्चते-न्द्रं सोमस्य पीतये। तदिद्ध्यस्य वर्धनम्।।

❀06.06.16 卐अस्य पीत्वा मदाना- न्देवो देवस्यौजसा। विश्वाऽभि भुवना भुवत्।।

卐 त्यमु व स्सत्रासाहँ- विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये।।

卐 युध्मं सन्त मनर्वाणं- सोमपा मनपच्युतम्। नर मऽवार्यक्रतुम्।।

卐 शिक्षा ण^ इन्द्र राय^ आ- पुरु विद्वाँ ऋचीषम। अवा नः पार्ये धने।।

卐 अत श्चिदिन्द्र ण^ उपा-ऽऽयाहि शतवाजया। इषा सहस्रवाजया।।

❀06.06.17 卐अयाम धीवतो धियो-ऽर्वद्भि श्शक्र गोदरे। जयेम पृत्सु वज्रिवः।।

卐 वयमु त्वा शतक्रतो~- गावो न यवसेष्वा। उक्थेषु रणयामसि।।

卐 विश्वा हि मर्त्यत्वना-ऽनुकामा शतक्रतो~। अगन्म वज्रि न्नाशसः।।

卐 त्वे सु पुत्र शवसो-ऽवृत्र न्कामकातयः। न त्वा मिन्द्राति रिच्यते।।

卐 स नो वृष न्त्सनिष्ठया- सङ्घोरया द्रवित्न्वा। धियाऽविड्ढि पुरन्ध्या।।

❀06.06.18 卐यस्ते नूनं शतक्रत~ विन्द्र द्युम्नितमो मदः। तेन नूनं मदे मदेः~।।

卐 यस्ते चित्रश्रवस्तमो- य^ इन्द्र वृत्रहन्तमः। य^ ओजोदातमो मदः।।

卐 विद्मा हि यस्ते अद्रिव- स्त्वादत्त स्सत्य सोमपाः। विश्वासु दस्म कृष्टिषु।।

卐 इन्द्राय मद्वने सुतं- परि ष्टोभन्तु नो गिरः। अर्क मर्चन्तु कारवः।।

卐 यस्मि न्विश्वा^ अधि श्रियो- रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे।।

❀06.06.19 卐त्रिकद्रुकेषु चेतन- न्देवासो यज्ञ मत्नत। तमिद्वर्धन्तु नो गिरः।।

卐 आ त्वा विश न्त्विन्दव- स्समुद्रमिव सिन्धवः। न त्वामिन्द्राति रिच्यते।।

卐 विव्यक्थ महिना वृष -न्भक्षं सोमस्य जागृवे। य^ इन्द्र जठरेषु ते।।

卐 अरन्त इन्द्र कुक्षये- सोमो भवतु वृत्रहन्न्। अर न्धामभ्य^ इन्दवः।।

卐 अर मश्वाय गायति- श्रुतकक्षो अरङ्गवे। अर मिन्द्रस्य धाम्ने।।

卐 अरं हि ष्मा सुतेषुण- स्सोमेष्विन्द्र भूषसि। अरन्ते शक्र दावने।।

❀06.06.20 卐पराकात्ता च्चिदद्रिव- स्त्वान्नक्षन्त नो गिरः। अरङ्गमाम ते वयम्।।

卐 एवा ह्यसि वीरयु- रेवा शूर^ उत स्थिरः। एवा ते राध्यं मनः।।

卐 एवा राति स्तुवीमघ- विश्वेभि र्धायि धातृभिः। अधा चिदिन्द्र मे सचा।।

卐 मो~ षु ब्रह्मेव तन्द्रयु- र्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः।।

卐 मा न इन्द्राभ्या3(आ)दिश- स्सूरो अक्तुष्वा यमन्न्। त्वा युजा वनेम तत्।।

卐 त्वयेदिन्द्र युजा वयं- प्रति ब्रुवीमहि स्पृधः। त्वमऽस्माक न्तव स्मसि।।

卐 त्वामिद्धि त्वायवो-ऽनुनोनुवत श्चरान्। सखाय इन्द्र कारवः।।

8.93 उद्धेदभीति चतुस्त्रिंशदृचस्य सूक्तस्याऽऽङ्गिरसस्सुकक्ष- इन्द्रोऽन्त्याया इन्द्रर्भवो गायत्री।।

卐 दशमेऽनुवाके दशसूक्तानि

❀06.06.21 卐उद्धेदभि श्रुतामघँ- वृषभन्नर्यापसम्। अस्तार मेषि सूर्य।।

卐 नव यो नवतिं पुरो- बिभेद बाह्वोजसा। अहिञ्च वृत्रहाऽवधीत्।।

卐 स न^ इन्द्र श्शिव स्सखा-ऽश्वाव द्गोम द्यवमत्। उरुधारेव दोहते।।

卐 यदद्य कच्च वृत्रह न्नु-.दगा^ अभि सूर्य। सर्व न्तदिन्द्र ते वशे।।

卐 यद्वा प्रवृद्ध सत्पते -न मरा इति मन्यसे। उतो~ तत्सत्य मित्तव।।

❀06.06.22 卐ये सोमासः परावति- ये अर्वावति सुन्विरे। सर्वाँ स्ताँ इन्द्र गच्छसि।।

卐 तमिन्द्रँ वाजयामसि- महे वृत्राय हन्तवे। स वृषा वृषभो भुवत्।।

卐 इन्द्र स्स दामने कृत- ओजिष्ठ स्समदे हितः। द्युम्नी श्लोकी स सोम्यः।।
卐 गिरा वज्रो न संभृत- स्सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः।।
卐 दुर्गे चिन्न स्सुगङ्कृधि- गृणान इन्द्र गिर्वणः। त्वञ्च मघवन्वशः।।
❀06.06.23 卐यस्य ते नू चिदादिश-न्न मिनन्ति स्वराज्यम्। न देवो नाऽध्रिगु र्जनः।।
卐 अधा ते अप्रतिष्कुत- न्देवी~ शुष्मं सपर्यतः। उभे~ सुशिप्र रोदसी।।
卐 त्वमेत दधारय- कृष्णासु रोहिणीषु च। परुष्णीषु रुश त्पयः।।
卐 वि यदहे रध त्विषो- विश्वे देवासो अक्रमुः। विद न्मृगस्य ताँ अमः।।
卐 आदु मे निवरो भुव -द्वृत्रहाऽदिष्ट पौंस्यम्। अजातशत्रु रस्तृतः।।
❀06.06.24 卐श्रुतँ वो वृत्रहन्तमं- प्र शर्धञ्चर्षणीनाम्। आ शुषे राधसे महे।।
卐 अया धिया च गव्यया- पुरुणाम न्पुरुष्टुत। यत्सोमेसोम आऽभवः।।
卐 बोधिन्मना इदस्तु नो- वृत्रहा भूर्यासुतिः। श्रृणोतु शक्र आशिषम्।।
卐 कया त्वन्न ऊत्या-ऽभि प्र मन्दसे वृषन्न्। कया स्तोतृभ्य आ भर।।
卐 कस्य वृषा सुते सचा -नियुत्वा न्वृषभो रणत्। वृत्रहा सोमपीतये।।
❀06.06.25 卐अभी षु णस्त्वं रयिं- मन्दसान स्सहस्रिणम्। प्रयन्ता बोधि दाशुषे।।
卐 पत्नीवन्त स्सुता इम -उशन्तो यन्ति वीतये। अपाङ्गमि र्निचुम्पुणः।।
卐 इष्टा होत्रा असृक्षते-न्द्रँ वृधासो अध्वरे। अच्छा वभृथ मोजसा।।
卐 इह त्या सधमाद्या- हरी~ हिरण्यकेश्या। वोळ्हा मभि प्रयो हितम्।।
卐 तुभ्यं सोमा स्सुता इमे- स्तीर्णं बर्हि र्विभावसो~। स्तोतृभ्य इन्द्रमा ऽऽवह।।
❀06.06.26 卐आ ते दक्षँ वि रोचना- दध द्रत्ना वि दाशुषे। स्तोतृभ्य इन्द्र मर्चत।।
卐 आ ते दधा मीन्द्रिय -मुक्था विश्वा शतक्रतो~। स्तोतृभ्य इन्द्र मृळय।।
卐 भद्रंभद्रन्न आ भरे-ष मूर्जं शतक्रतो~। यदिन्द्र मृळयासि नः।।
卐 स नो विश्वान्या ऽऽभर- सुवितानि शतक्रतो~। यदिन्द्र मृळयासि नः।।
卐 त्वामि द्वृत्रहन्तम- सुतावन्तो हवामहे। यदिन्द्र मृळयासि नः।।
❀06.06.27 卐उप नो हरिभि स्सुतँ- याहि मदानां पते। उप नो हरिभि स्सुतम्।।

卐 द्विता यो वृत्रहन्तमो- विद इन्द्र श्शतक्रतुः। उप नो हरिभि स्सुतम्।।

卐 त्वं हि वृत्रह न्नेषां- पाता सोमानामसि। उप नो हरिभि स्सुतम्।।

卐 इन्द्र^ इषे ददातु न-^ ऋभुक्षण मृभुं रयिम्। वाजी ददातु वाजिनम्।।

8.94 गौर्धयतीति द्वादशर्चस्य सूक्तस्याऽऽङ्गिरसो बिन्दु-र्मरुतो- गायत्री- (पूतदक्षो वा ऋषिः) ।।

06.06.28 卐गौर्धयति मरुतां- श्रवस्यु र्माता मघोनाम्। युक्ता वह्नी रथानाम्।।

卐 यस्या देवा^ उपस्थे- व्रता विश्वे धारयन्ते। सूर्यामासा दृशे कम्।।

卐 तत्सुनो विश्वे अर्य^ -आ सदा गृणन्ति कारवः। मरुत स्सोमपीतये।।

卐 अस्ति सोमो अयं सुतः- पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना।।

卐 पिबन्ति मित्रो अर्यमा- तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः।।

卐 उतो न्वस्य जोषमाँ- इन्द्र स्सुतस्य गोमतः। प्रात र्होतेव मत्सति।।

06.06.29 卐कदत्विषन्त सूरय- स्तिर^ आपइव स्रिधः। अर्षन्ति पूतदक्षसः।।

卐 कद्वो अद्य महाना- न्देवाना मवो वृणे। त्मना च दस्मवर्चसाम्।।

卐 आ ये विश्वा पार्थिवानि- पप्रथ न्रोचना दिवः। मरुत स्सोमपीतये।।

卐 त्यान्नु पूतदक्षसो- दिवो वो मरुतो हुवे। अस्य सोमस्य पीतये।।

卐 त्यान्नु ये वि रोदसी- तस्तभु र्मरुतो हुवे। अस्य सोमस्य पीतये।।

卐 त्यन्नु मारुतङ्गण-ङ्गिरिष्ठाँ वृषणं हुवे। अस्य सोमस्य पीतये।।

8.95 आ त्वा गिर इति नवर्चस्य सूक्तस्याऽऽङ्गिरस स्तिरश्ची-रिन्द्रोऽनुष्टुप्।।

06.06.30 卐आ त्वा गिरो रथीरिवा-ऽस्थु स्सुतेषु गिर्वणः। अभि त्वा समनूषते-न्द्र वत्सन्न मातरः।।

卐 आ त्वा शुक्रा^ अचुच्यवु- स्सुतास^ इन्द्र गिर्वणः। पिबा त्व1(अ)स्यान्धस^-इन्द्र विश्वासु ते हितम्।।

卐 पिबा सोमं मदाय कमि-न्द्र श्येनाऽऽभृतं सुतम्। त्वं हि शश्वतीनां- पती राजा विशामसि।।

卐 श्रुधी हव न्तिरश्च्या-^ इन्द्र यस्त्वा सपर्यति। सुवीर्यस्य गोमतो- राय स्पूर्धि महाँ असि।।

卐 इन्द्र यस्ते नवीयसी.-ङ्गिरं मन्द्रा मजीजनत्। चिकित्विन्मनस न्धियं- प्रत्ना मृतस्य पिप्युषीम्।।

❀06.06.31 卐तमु ष्टवाम यङ्गिर-^ इन्द्र मुक्थानि वावृधुः। पुरूण्यस्य पौंस्या -॰सिषासन्तो वनामहे।।

卐 एतो न्विन्द्रं स्तवाम- शुद्धं शुद्धेन साम्ना। शुद्धै रुक्थै र्वावृध्वांसं- शुद्ध आशीर्वा न्ममत्तु।।

卐 इन्द्र शुद्धो न^ आ गहि- शुद्ध श्शुद्धाभि रूतिभिः। शुद्धो रयिन्नि धारय- शुद्धो ममद्धि सोम्यः।।

卐 इन्द्र शुद्धो हि नो रयिं- शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे- शुद्धो वाजं ॰सिषाससि।।

8.96 अस्मा इत्येकविंशत्यृचस्य सूक्तस्याऽऽङ्गिरस स्तिरश्ची-रिन्द्र श्चतुर्दश्या इन्द्रामरुतः-पञ्चदश्या इन्द्राबृहस्पती त्रिष्टुप्-चतुर्थी विराट् (द्युतानो वा ऋषिः)

❀06.06.32 卐अस्मा उषास^ आऽतिरन्त याम- मिन्द्राय नक्त मूर्म्या स्सुवाचः। अस्मा आपो मातर स्सप्त तस्थु- र्नृभ्य स्तराय सिन्धव स्सुपाराः।।

卐 अतिविद्धा विथुरेणा चिदस्त्रा- त्रि स्सप्त सानु संहिता गिरीणाम्। न तद्देवो न मर्त्य स्तुतुर्या- द्यानि प्रवृद्धो वृषभश्चकार।।

卐 इन्द्रस्य वज्र^ आयसो निमिश्ल-^ इन्द्रस्य बाह्वो र्भूयिष्ठ मोजः। शीर्ष न्निन्द्रस्य क्रतवो निरेक -आस न्नेषन्त श्रुत्या उपाके।।

卐 मन्ये त्वा यज्ञियँ यज्ञियानां- मन्ये त्वा च्यवन मच्युतानाम्। मन्ये त्वा सत्वना मिन्द्र केतुं- मन्ये त्वा वृषभञ्चर्षणीनाम्।।

卐 आ यद्वज्रं बाह्वो रिन्द्र धत्से- मदच्युत महये हन्तवा उ। प्र पर्वता अनवन्त प्र गाव॰- प्र ब्रह्माणो अभिनक्षन्त इन्द्रम्।।

❀06.06.33 卐तमु ष्टवाम य^ इमा जजान- विश्वा जाता न्यवराण्यऽस्मात्। इन्द्रेण मित्र न्दिधिषेम गीर्भि –रुपो~ नमोभि र्वृषभँ विशेम।।

卐 वृत्रस्य त्वा श्वसथा दीषमाणा^- विश्वे देवा^ अजहु र्ये सखायः। मरुद्भि रिन्द्र सख्यन्ते अस्त्व-ऽथेमा विश्वा॰ पृतना जयासि।।

卐 त्रि ष्षष्टिस्त्वा मरुतो वावृधाना-^ उस्त्राइव राशयो यज्ञियासः। उप त्वेम॰ कृधि नो भागधेयं- शुष्मन्त एना हविषा विधेम।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 तिग्म मायुधं मरुता मनीक-ङ्कस्त इन्द्र प्रति वज्र न्दधर्ष। अनायुधासो असुरा^ अदेवा- श्चक्रेण ता॰ अप वप ऋजीषिन्न्।।

卐 मह उग्राय तवसे सुवृक्तिं- प्रेरय शिवतमाय पश्वः। गिर्वाहसे गिर^ इन्द्राय पूर्वी- र्धेहि तन्वे कुविदङ्ग वेदत्।।

❀06.06.34 卐उक्थवाहसे विभ्वे मनीषा- न्द्रुणा न पार मीरया नदीनाम्। नि स्पृश धिया तन्वि श्रुतस्य- जुष्टतरस्य कुविदङ्ग वेदत्।।

卐 तद्विविड्ढि यत्त इन्द्रो जुजोष -त्स्तुहि सुष्टुतिन्नमसाऽविवास। उप भूष जरितर्मा रुवण्य -श्श्रावया वाचङ्कुविदङ्ग वेदत्।।

卐 अव द्रप्सो अंशुमती मतिष्ठ -दियानः कृष्णो दशभि स्सहस्रैः। आव त्तमिन्द्र श्शच्या धमन्त- मप स्नेहिती र्नृमणा^ अधत्त।।

卐 द्रप्स मपश्यँ विषुणे चरन्त- मुपह्वरे नद्यो अंशुमत्याः। नभो न कृष्ण मवतस्थिवांस -मिष्यामि वो वृषणो युध्यताऽजौ।।

卐 अध द्रप्सो अंशुमत्या^ उपस्थेऽधारय त्तन्वन्तित्विषाणः। विशो अदेवी रभ्या3(आ)चरन्ती- र्बृहस्पतिना युजेन्द्र स्ससाहे।।

❀06.06.35 卐त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभव श्शत्रु रिन्द्र। गूळ्हे~ द्यावापृथिवी~ अन्वविन्दो- विभुमद्भ्यो भुवनेभ्यो रणन्धाः।।

卐 त्वं ह त्य.दप्रतिमान मोजो- वज्रेण वज्रि न्धृषितो जघन्थ। त्वं शुष्णस्यावातिरो वधत्रै- स्त्वङ्गा इन्द्र शच्ये दविन्दः।।

卐 त्वं ह त्यद्वृषभ चर्षणीना-ङ्घनो वृत्राणा न्तविषो बभूथ। त्वं सिन्धू॰ रसृज स्तस्तभाना -न्त्वमपो अजयो दासपत्नीः।।

卐 स सुक्रतू रणिता य स्सुते –ष्वऽनुत्तमन्युर्यो अहेव रेवान्। य^ एक इन्नर्यपांसि कर्ता- स वृत्रहा प्रतीदन्य माहुः।।

卐 स वृत्रहेन्द्रश्चर्षणीधृ- त्तं सुष्टुत्या हव्यं हुवेम। स प्राविता मघवा नोऽधिवक्ता- स वाजस्य श्रवस्यस्य दाता।।

卐 स वृत्रहेन्द्र ऋभुक्षा- स्सद्यो जज्ञानो हव्यो बभूव। कृण्वन्नपांसि नर्या पुरूणि- सोमो न पीतो हव्य स्सखिभ्यः।।

🏺 8.97 या इन्द्रेति पञ्चदशर्चस्य सूक्तस्य, काश्यपो रेभ- इन्द्रो- बृहती-दशम्याद्याः क्रमेणातिजगत्युपरिष्टाद्बृहत्यो जगती त्रिष्टुब्जगत्यः।।

❀06.06.36 卐या इन्द्र भुज आऽभर- स्स्वर्वाँ असुरेभ्यः। स्तोतारमि न्मघव.न्नस्य- वर्धय ये च त्वे वृक्तबर्हिषः।।

卐 यमिन्द्र दधिषे त्वम-ऽश्वङ्गां भाग मव्ययम्। यजमाने सुन्वति दक्षिणावति- तस्मि न्तन्धेहि मा पणौ।।

卐 य इन्द्र सस्त्यव्रतो- ऽनुष्वाप मदेवयुः। स्वैष्ष एवै र्मुमुर त्पोष्यं रयिं- सनुत र्धेहि तन्ततः।।

卐 यच्छक्रासि परावति- यदर्वावति वृत्रहन्न्। अतस्त्वा गीर्भि र्द्युगदिन्द्र केशिभि- स्सुतावाँ आ विवासति।।

卐 यद्वाऽसि रोचने दिव- स्समुद्रस्याधि विष्टपि। यत्पार्थिवे सदने वृत्रहन्तम -यदन्तरिक्ष आ गहि।।

❀06.06.37 卐स न स्सोमेषु सोमपा- स्सुतेषु शवसस्पते। मादयस्व राधसा सूनृताव- तेन्द्र राया परीणसा।।

卐 मा न इन्द्र परा वृण -ग्भवा न स्सधमाद्यः। त्वन्न ऊती त्वमिन्न आप्यं- मा न इन्द्र परा वृणक्।।

卐 अस्मे इन्द्र सचा सुते- नि षदा पीतये मधु। कृधी जरित्रे मघवन्नवो मह द-स्मे इन्द्र सचा सुते।।

卐 न त्वा देवास आशत- न मर्त्यासो अद्रिवः। विश्वा जातानि शवसाऽभिभू रसि- न त्वा देवास आशत।।

卐 विश्वाः पृतना अभिभूतरन्नरं- सजू स्ततक्षु रिन्द्रञ्जजनुश्च राजसे। क्रत्वा वरिष्ठं वर आमुरि- मुतोग्र मोजिष्ठ न्तवस न्तरस्विनम्।।

❀06.06.38 卐समीं रेभासो अस्वर -न्निन्द्रं सोमस्य पीतये। स्वर्पतिं यदीं वृधे धृतव्रतो- ह्योजसा समूतिभिः।।

卐 नेमिन्नमन्ति चक्षसा- मेषं विप्रा अभिस्वरा। सुदीतयो वो अद्रुहो-ऽपि कर्णे तरस्विन स्समृक्वभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 तमिन्द्रञ्जोहवीमि मघवान मुग्रं- सत्रा दधान मऽप्रतिष्कुतं शवांसि। मंहिष्ठो गीर्भि रा चं यज्ञियो-ववर्त द्राये नो विश्वा- सुपथा कृणोतु वज्री।।

卐 त्वं पुर^ इन्द्र चिकिदेना व्योजसा- शविष्ठ शक्र नाशयध्यै। त्वद्विश्वानि भुवनानि वज्रि- न्द्यावा रेजेते~ पृथिवी~ चं भीषा।।

卐 तन्म ऋत मिन्द्र शूर चित्र पात्व-ऽपो न वज्रि न्दुरिताऽति पर्षि भूरि। कदा न^ इन्द्र राय^ आ दशस्ये- र्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन्न्।।।। इति षष्ठाध्याय स्समाप्तः।।

## ऽ()ऽ ऽ()ऽषष्ठाष्टके सप्तमाध्यायः (वर्गाः 1-39)

8.97 इन्द्राय सामेति द्वादशर्चस्य सूक्तस्याऽऽङ्गिरसो नृमेध- इन्द्र- उष्णिक्-सप्तमी दशम्येकादश्यः ककुभो नवम्यन्त्ये पुरउष्णिहौ।।

❀06.07.01 卐इन्द्राय साम गायत- विप्राय बृहते बृहत्। धर्मकृते विपश्चिते पनस्यवे।।

卐 त्वमिन्द्राभिभू रसि- त्वं सूर्य मरोचयः। विश्वकर्मा विश्वदेवो महाऽ असि।।

卐 विभ्राजन्ज्योतिषा स्व1(अ)-रऽगच्छो रोचन न्दिवः। देवास्त इन्द्र सख्याय येमिरे।।

卐 एन्द्र नो गधि प्रिय- स्सत्राजि दगोह्यः। गिरि र्न विश्वत स्पृथुः पति र्दिवः।।

卐 अभि हि सत्य सोमपा- उभे~ बभूथ रोदसी। इन्द्रासि सुन्वतो वृधः पति र्दिवः।।

卐 त्वं हि शश्वतीना -मिन्द्र दर्ता पुरा मसि। हन्ता दस्यो र्मनो र्वृधः पति र्दिवः।।

❀06.07.02 卐अधा हीन्द्र गिर्वण-^ उप त्वा कामा न्मह स्ससृज्महे। उदेव यन्त^ उदभिः।।

卐 वार्णत्वा यव्याभि- र्वर्धन्ति शूर ब्रह्माणि। वावृध्वांस.श्चिदद्रिवो दिवेदिवे।।

卐 युञ्जन्ति हरी~ इषिरस्य गाथ-योरौ रथ उरुयुगे। इन्द्रवाहा वचोयुजा।। ☞

卐 त्वन्न^ इन्द्रा ऽऽभरँ ओजो- नृम्णं शतक्रतो~ विचर्षणे। आ वीरं पृतनाषहम्।।

卐 त्वं हि नः पिता वसो~- त्वं माता शतक्रतो~ बभूविथ। अधा ते सुम्नमीमहे।।

卐 त्वां शुष्मि न्पुरुहूत वाजयन्त- मुप ब्रुवे शतक्रतो~। स नो रास्व सुवीर्यम्।।

8.99 त्वामिदेत्यष्टर्चस्य सूक्तस्याऽऽङ्गिरसो नृमेध- इन्द्रोऽयुजो बृहत्यो- युज स्सतोबृहत्यः।।

❀06.07.03 卐त्वामिदा ह्यो नरो-ऽपीप्य न्वज्रि न्भूर्णयः। स इन्द्र स्तोमवाहसा मिह श्रु-ध्युप स्वसरमा गहि।।

卐 मत्स्वा सुशिप्र हरिव स्तदीमहे- त्वे आ भूषन्ति वेधसः। तव श्रवांस्युपमा.न्युक्थ्या- सुतेष्विन्द्र गिर्वणः।।

卐 श्रायन्तइव सूर्यँ- विश्वे दिन्द्रस्य भक्षत। वसूनि जाते जनमान ओजसा- प्रति भागन्न दीधिम।।

卐 अनर्शरातिँ वसुदा मुप स्तुहि- भद्रा इन्द्रस्य रातयः। सो अस्य कामँ विधतो न रोषति- मनो दानाय चोदयन्न्।।

卐 त्वमिन्द्र प्रतूर्तिष्व-ऽभि विश्वा असि स्पृधः। अशस्तिहा जनिता विश्वतू रसि- त्वन्तूर्य तरुष्यतः।।

卐 अनु ते शुष्म न्तुरयन्त मीयतुः-क्षोणी शिशुन्न मातरा। विश्वास्ते स्पृध श्श्नथयन्त मन्यवे- वृत्रँ यदिन्द्र तूर्वसि।।

卐 इत ऊती वो अजरं- प्रहेतार मप्रहितम्। आशुञ्जेतारं हेतारं रथीतम- मतूर्त न्तुग्र्यावृधम्।।

卐 इष्कर्तार मनिष्कृतं सहस्कृतं- शतमूतिं शतक्रतुम्। समान मिन्द्र मवसे हवामहे- वसवानँ वसूजुवम्।।

8.100 अयन्त इति द्वादशर्चस्य सूक्तस्य, भार्गवो नेम ऋषिः-अयन्त इति द्वयोरिन्द्रऋषिः-इन्द्रो देवता-मनोजवा इत्यस्या स्सुपर्णो देवता-समुद्रे इत्यस्या वज्रं-यद्वाग्वदन्तीति द्वयोर्वाग्देवता त्रिष्टुप्-षष्ठी जगती सप्तम्याद्यास्तिस्रोऽनुष्टुभः।।

❀06.07.04 卐अयन्त एमि तन्वा पुरस्ता -द्विश्वे देवा अभि मा यन्ति पश्चात्। यदा मह्य न्दीधरो भागमिन्द्रा-ऽऽदिन्मया कृणवो वीर्याणि।।

卐 दधामि ते मधुनो भक्ष मग्रे- हितस्ते भाग स्सुतो अस्तु सोमः। असश्च त्व न्दक्षिणत स्सखा -मेऽधा वृत्राणि जङ्घनाव भूरि।।

卐 प्र सु स्तोमं भरत वाजयन्त- इन्द्राय सत्यं यदि सत्य मस्ति। नेन्द्रो अस्तीति नेम उ त्व आह- क ईन्ददर्श कमभि ष्टवाम।।

卐 अय मस्मि जरितः पश्य मेह- विश्वा जाता न्यभ्यऽस्मि मह्ना। ऋतस्य मा प्रदिशो वर्धय न्त्या-ऽदर्दिरो भुवना दर्दरीमि।।

卐 आ यन्मा वेना अरुह न्नृतस्यँ- एक मासीनं हर्यतस्य पृष्ठे। मनश्चिन्मे हृद आ प्रत्यवोच -दऽचिक्रदन्छिशुमन्त स्सखायः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 विश्वेत्ता ते सवनेषु प्रवाच्या- या चकर्थ मघव न्निन्द्र सुन्वते। पारावतँ यत्पुरुसंभृतँ वस्व-पाऽवृणो श्शरभाय ऋषिबन्धवे।।

❀06.07.05 卐प्र नून न्धावता पृथ-ङ्नेह यो वो अवावरीत्। निषीँ वृत्रस्य मर्मणि- वज्रमिन्द्रो अपीपतत्।।

卐 मनोजवा^ अयमान-^ आयसी मतर त्पुरम्। दिवं सुपर्णो गत्वाय- सोमँ वज्रिण आऽभरत्।।

卐 समुद्रे अन्त~ श्शयत -उद्ना वज्रो अभीवृतः। भरन्त्यस्मै सँयतः- पुरः प्रस्रवणा^ बलिम्।।

卐 यद्वाग्वद न्त्यविचेतनानि- राष्ट्री देवाना न्निषसाद मन्द्रा। चतस्र^ ऊर्ज न्दुदुहे पयांसि- क्व स्विदऽस्याः परमञ्जगाम।।

卐 देवीँ वाच मऽजनयन्त देवा- स्ताँ विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेष मूर्ज न्दुहाना- धेनु र्वागस्मा नुप सुष्टुतैतु।।

卐 सखे विष्णो वितरँ वि क्रमस्व- द्यौ र्देहि लोकँ वज्राय विष्कभे। हनाव वृत्रं रिणचाव सिन्धू- निन्द्रस्य यन्तु प्रसवे विसृष्टाः।।

8.101 ऋधगित्थेति षोळशर्चस्य सूक्तस्य, भार्गवो जमदग्निर्ऋषि-र्मित्रावरुणौ देवते-पञ्चम्या मित्रावरुणादित्या देवताः-षष्ठ्या आदित्याः-सप्तम्यष्टम्योरश्विनौ-नवमी दशम्योर्वायुरेकादशी-द्वादशयोस्सूर्य-स्त्रयोदश्या उषा-श्चतुर्दश्याःपवमान-स्ततो द्वयोर्गौ-र्बृहती-द्वितीया चतुर्थी षष्ठ्यष्टम्य स्सतोबृहत्यः-तृतीया गाय-त्र्यन्त्यास्तिस्त्रस्त्रिष्टुभः।।

❀06.07.06 卐ऋधगित्था स मर्त्य- श्शशमे देवतातये। यो नूनं मित्रावरुणा वभिष्टय आचक्रे हव्यदातये।।

卐 वर्षिष्ठक्षत्रा उरुचक्षसा नरा- राजाना दीर्घश्रुत्तमा। ता बाहुता न दंसना रथर्यत -स्साकं सूर्यस्य रश्मिभिः।।

卐 प्र यो वां मित्रावरुणा-ऽजिरो दूतो अद्रवत्। अयश्शीर्षा मदेरघुः।।

卐 न य स्संपृच्छे न पुन र्हवीतवे- न सँवादाय रमते। तस्मान्नो अद्य समृते रुरुष्यतं- बाहुभ्यान्न उरुष्यतम्।।

卐 प्र मित्राय प्राऽर्यम्णे सचथ्य मृतावसो~। वरूथ्य1(अँ) वरुणे छन्द्यँ वच- स्स्तोत्रं राजसु गायत।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀06.07.07 卐ते हिन्विरे अरुणञ्जेन्यँ वस्वे-कं पुत्रन्तिसृणाम्। ते धामा न्यमृता मर्त्यानां- मदब्धा^ अभि चक्षते।।

卐 आ मे वचांस्युद्यता- द्युमत्तमानि कर्त्वा। उभा यात न्नासत्या सजोषसा- प्रति हव्यानि वीतये।।

卐 रातिँ यद्वा मरक्षसं हवामहे- युवाभ्याँ वाजिनीवसू~। प्राचीं होत्रां प्रतिरन्ता वितन्नरा- गृणाना जमदग्निना।।

卐 आ नो यज्ञ न्दिविस्पृशँ- वायो~ याहि सुमन्मभिः। अन्तः~ पवित्र उपरि श्रीणानो3(ओ)-ऽयं शुक्रो अयामि ते।।

卐 वेत्यध्वर्युः पथिभी रजिष्ठैः- प्रति हव्यानि वीतये। अधा नियुत्व^ उभयस्य नः पिब- शुचिं सोमङ्गवाशिरम्।।

❀06.07.08 卐बण्महा॰ असि सूर्य- बळादित्य महा॰ असि। महस्ते सतो महिमा पनस्यते-ऽद्धा देव महा॰ असि।।

卐 बट्सूर्य श्रवसा महा॰ असि- सत्रा देव महा॰ असि। मह्ना देवाना मसुर्यः पुरोहितो- विभु ज्योति रदाभ्यम्।।

卐 इयँ या नीच्यर्किणी- रूपा रोहिण्या कृता। चित्रेव प्रत्यदर्श्यायत्य1(अ)-ऽन्त र्दशसु बाहुषु।।

卐 प्रजा^ ह तिस्रो अत्यायं मीयु- र्न्य1(अ)न्या^ अर्क म ऽभितो विविश्रे। बृहद्ध तस्थौ भुवने ष्वन्तः~ - पवमानो हरित^ आ विवेश।।

卐 माता रुद्राणा न्दुहिता वसूनां- स्वसाऽऽदित्याना ममृतस्य नाभिः। प्र नु वोचञ्चिकितुषे जनाय- मा गा मनागा मदितिँ वधिष्ट।।

卐 वचोविदँ वाच मुदीरयन्तीँ- विश्वाभि र्धीभि रुपतिष्ठमानाम्। देवी न्देवेभ्यः पर्येयुषीङ्गा मऽऽमावृक्त मर्त्यो दभ्रचेताः।।

8.102 त्वमग्न इति द्वाविंशत्यृचस्य सूक्तस्य, भार्गवः प्रयोगोऽग्नि-गायत्री- अस्मिन्सूक्ते एत ऋषयो विकल्प्यन्ते-बार्हस्पत्योऽग्निःपावकः-यद्वा सहसः- पुत्रौ गृहपति यविष्ठौ-अनयोरन्यतरो वा।।

❀06.07.09 卐त्वमग्ने बृह द्वयो- दधासि देव दाशुषे। कवि र्गृहपति र्युवा।।

卐 स न^ ईळानया सह- देवा॰ अग्ने दुवस्युवा। चिकि द्विभान~वा वह।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 त्वया ह स्विद्युजा वय-ञ्चोदिष्ठेन यविष्ठ्य। अभिष्मो वाजसातये।।

卐 और्वभृगुव च्छुचिं- मप्नवानव दा हुवे। अग्निं समुद्रवाससम्।।

卐 हुवे वातस्वनङ्कविं- पर्जन्यक्रन्द्यं सहः। अग्निं समुद्रवाससम्।।

❀06.07.10 卐☞आ सवं सवितु यथा- भगस्येव भुजिं हुवे। अग्निं समुद्रवाससम्।।

卐 अग्निँ वो वृधन्त- मऽध्वराणां पुरूतमम्। अच्छा नप्त्रे सहस्वते।।

卐 अयँ यथा न आभुव- त्त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः।।

卐 अयँ विश्वा^ अभि श्रियो-ऽग्नि र्देवेषु पत्यते। आ वाजै रुप नो गमत्।।

卐 विश्वेषा मिह स्तुहि- होतृणाँ यशस्तमम्। अग्निँ यज्ञेषु पूर्व्यम्।।

❀06.07.11 卐शीरं पावकशोचिष-ञ्ज्येष्ठो यो दमेष्वा। दीदाय दीर्घश्रुत्तमः।।

卐 तमर्वन्तन्न सानसि-ङ्गृणीहि विप्र शुष्मिणम्। मित्रन्न यातयज्जनम्।।

卐 उप त्वा जामयो गिरो- देदिशती र्हविष्कृतः। वायो रनीके अस्थिरन्न्।।

卐 यस्य त्रिधा त्ववृतं- बर्हि स्तस्था☞ वसन्दिनम्। आप श्चि.न्नि दधा पदम्।।

卐 पद न्देवस्य मीळ्हुषो-ऽनाधृष्टाभि रूतिभिः। भद्रा सूर्यइवोपदृक्।।

❀06.07.12 卐अग्ने घृतस्य धीतिभि- स्तेपानो देव शोचिषा। आ देवा न्वक्षि यक्षि च।।

卐 तन्त्वाऽजनन्त मातरꣳ- कवि न्देवासो अङ्गिरः। हव्यवाह ममर्त्यम्।।

卐 प्रचेतसन्त्वा कवे-ऽग्ने दूतँ वरेण्यम्। हव्यवाह न्नि षेदिरे।।

卐 नहि मे अस्त्यऽघ्न्या- न स्वधिति र्वनन्वति। अथैताद्दृ.ग्भरामि ते।।

卐 यदग्ने कानि कानि चिदा-ऽऽते दारूणि दध्मसि। ता जुषस्व यविष्ठ्य।।

卐 यदत्त्युपजिह्विका- यद्वम्रो अतिसर्पति। सर्व न्तदऽस्तु ते घृतम्।।

卐 अग्नि मिन्धानो मनसा- धियं सचेत मर्त्यः। अग्नि मीधे विवस्वभिः।।

☸ 8.103 अदर्शीति चतुर्दशर्चस्य सूक्तस्य, काण्व स्सोभरि-रग्नि-रन्त्याया अग्नामरुतो बृहती-पञ्चमीविराड्रूपा- सप्तम्याद्ययुज स्सतोबृहत्योऽष्टम्यादि युजः क्रमेण ककुब्भ्रसीयसी- ककुबनुष्टुभः।।

卐

❀06.07.14 卐अदर्शि गातुवित्तमो- यस्मि न्व्रता न्यादधुः। उपो~ षु जात मार्यस्य वर्धन-मग्निन्नक्षन्त नो गिरः।।

卐 प्र दैवोदासो अग्नि- र्देवा॰ अच्छा न मज्मना। अनु मातरं पृथिवीं वि वावृते- तस्थौ नाकस्य सानवि।।

卐 यस्मा द्रेजन्त कृष्टय-श्चर्कृत्यानि कृण्वतः। सहस्त्रसां मेधसाताविव त्मना-ऽग्नि न्धीभि स्सपर्यत।।

卐 प्र यं राये निनीषसि- मर्तो यस्ते वसो~ दाशत्। स वीरन्धत्ते अग्न उक्थशंसिन- न्त्मना सहस्त्रपोषिणम्।।

卐 स दृळ्हे चिदभि तृणत्ति वाज मर्वता- स धत्ते अक्षिति श्रवः। त्वे देवत्रा सदा पुरूवसो~ -विश्वा वामानि धीमहि।।

❀06.07.14 卐यो विश्वा दयते वसु- होता मन्द्रो जनानाम्। मधोर्न पात्रा प्रथमान्यस्मै- प्र स्तोमा यन्त्यऽग्नये।।

卐 अश्वन्न गीर्भी रथ्यं सुदानवो- मर्मृज्यन्ते देवयवः। उभे~ तोके~ तनये दस्म विश्पते -पर्षि राधो मघोनाम्।।

卐 प्र मंहिष्ठाय गायत -ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये।।

卐 आ वंसते मघवा वीरव द्यश- स्समिद्धो द्युम्न्याऽहुतः। कुविन्नो अस्य सुमति र्नवीय-स्यऽच्छा वाजेभि रागमत्।।

卐 प्रेष्ठमु प्रियाणां- स्तुह्यासावातिथिम्। अग्निं रथानाँ यमम्।।

❀06.07.15 卐उदिता यो निदिता वेदिता- वस्वा यज्ञियो ववर्तति। दुष्टरा यस्य प्रवणे नोर्मयो- धिया वाजं सिषासतः।।

卐 मा नो हृणीता मतिथि र्वसु- रग्निः पुरुप्रशस्त एषः। य स्सुहोता स्वध्वरः।।

卐 मो~ ते रिषन्ये अच्छोक्तिभि र्वसो~-ऽग्ने केभि श्चिदेवैः। कीरि श्चिद्धि त्वामीट्टे दूत्याय- रातहव्य स्स्वध्वरः।।

卐 आऽग्ने याहि मरुत्सखा- रुद्रेभि स्सोमपीतये। सोभर्या उप सुष्टुतिं- मादयस्व स्वर्णरे।।।। इत्यष्टमं मण्डलम् समाप्तम्।। विश्वेश्वराय नमः.....

卐 नवमं मण्डलम्।। अथ पवमानम्।।

पावमाने नवमे मण्डले सप्तानुवाकाः-तत्र प्रथमेऽनुवाके चतुर्विंशति सूक्तानि

9.01 स्वादिष्ठयेति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दाः-पवमान-स्सोमो- गायत्री।।

❀06.07.16 卐स्वादिष्ठया मदिष्ठया- पवस्व सोम धारया। इन्द्राय पातवे सुतः।।

卐 रक्षोहा विश्वचर्षणि- रभि योनि मयोहतम्। द्रुणा सधस्थ माऽसदत्।।

卐 वरिवोधातमो भव- मंहिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम्।।

卐 अभ्यर्ष महाना- न्देवानाँ वीतिमन्धसा। अभि वाज मुत श्रवः।।

卐 त्वामच्छा चरामसि- तदिदर्थ न्दिवेदिवे। इन्दो~ त्वे न^ आशसः।।

❀06.07.17 卐पुनाति ते परिस्रुतं- सोमं सूर्यस्य दुहिता। वारेण शश्वता तना।।

卐 तमी मण्वी स्समर्य आ- गृभ्णन्ति योषणो दश। स्वसारः पार्ये दिवि।।

卐 तमीं हिन्व न्त्यग्रुवो- धमन्ति बाकुर न्दृतिम्। त्रिधातु वारणं मधु।।

卐 अभी3(ई)म मघ्न्या-^ उत श्रीणन्ति धेनव श्शिशुम्। सोम मिन्द्राय पातवे।।

卐 अस्ये दिन्द्रो मदेष्वा- विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते।।

9.02 पवस्वेति दशर्चस्य सूक्तस्य, काण्वो मेधातिथिः- पवमान-स्सोमो-गायत्री।।

❀06.07.18 卐पवस्व देववी रति- पवित्रं सोम रंह्या। इन्द्र मिन्दो~ वृषा ऽऽविश।।

卐 आ वच्यस्व महि प्सरो- वृषेन्दो~ द्युम्नवत्तमः। आ योनि न्धर्णसि स्सदः।।

卐 अधुक्षत प्रियं मधु- धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः।।

卐 महान्त न्त्वा मही रन्वा-ऽऽपो अर्षन्ति सिन्धवः। यद्गोभि र्वासयिष्यसे।।

卐 समुद्रो अप्सु मामृजे- विष्टम्भो धरुणो दिवः। सोमः पवित्रे अस्मयुः।।

❀06.07.19 卐अचिक्रद द्वृषा हरि- र्महा न्मित्रो न दर्शतः। सं सूर्येण रोचते।।

卐 गिरस्त इन्द~ ओजसा- मर्मृज्यन्ते अपस्युवः। याभि र्मदाय शुम्भसे।।

卐 तन्त्वा मदाय घृष्वय- उ लोककृत्नु मीमहे। तव प्रशस्तयो महीः।।

卐 अस्मभ्य मिन्द~ विन्द्रयु- र्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँइव।।

卐 गोषा इन्दो~ नृषा^ अस्य-ऽश्वसा^ वाजसा^ उत। आत्मा यज्ञस्य पूर्व्यः।।

☸ 9.03 एष देव इति दशर्चस्य सूक्तस्याऽजीगर्ति श्शुनश्शेप- स्सकृत्रिमो वैश्वामित्रो देवरातः- पवमान-स्सोमो-गायत्री।।

❀06.07.20 卐एष देवो अमर्त्यः- पर्णवीरिव दीयति। अभि द्रोणा न्यासदम्।।
卐 एष देवो विपा कृतो-ऽति ह्वरांसि धावति। पवमानो अदाभ्यः।।
卐 एष देवो विपन्युभिः- पवमान ऋतायुभिः। हरि र्वाजाय मृज्यते।।
卐 एष विश्वानि वार्या- शूरो यन्निव सत्वभिः। पवमान स्सिषासति।।
卐 एष देवो रथर्यति- पवमानो दशस्यति। आविष्कृणोति वग्वनुम्।।

❀06.07.21 卐एष विप्रै रभिष्टुतो-ऽपो देवो वि गाहते। दध द्रत्नानि दाशुषे।।
卐 एष दिवँ वि धावति- तिरो रजांसि धारया। पवमानः कनिक्रदत्।।
卐 एष दिवँ व्याऽसर -त्तिरो रजांस्यऽस्पृतः। पवमान स्स्वध्वरः।।
卐 एष प्रत्नेन जन्मना- देवो देवेभ्य स्सुतः। हरिः पवित्रे अर्षति।।
卐 एष उ स्य पुरुव्रतो- जज्ञानो जनय न्निषः। धारया पवते सुतः।।

☸ 9.04 सना चेति दशर्चस्य सूक्तस्याऽङ्गिरसो हिरण्यस्तूपः-पवमान-स्सोमो-गायत्री।।

❀06.07.22 卐सना च सोम जेषि च- पवमान महि श्रवः। अथा नो वस्यसस्कृधि।।
卐 सना ज्योति स्सना स्व1(अ)-र्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि।।
卐 सना दक्ष मुत क्रतु- मप सोम मृधो जहि। अथा नो वस्यस स्कृधि।।
卐 पवीतारः पुनीतन- सोम मिन्द्राय पातवे। अथा नो वस्यस स्कृधि।।
卐 त्वं सूर्ये न आ भज- तव क्रत्वा तवोतिभिः।अथा नो वस्यस स्कृधि ।।

❀06.07.23 卐तव क्रत्वा तवो तिभि –र्ज्योक्पश्येम सूर्यम्। अथा नो वस्यस स्कृधि।।
卐 अभ्यर्ष स्वायुध- सोम द्विबर्हसं रयिम्। अथा नो वस्यस स्कृधि।।
卐 अभ्य1(अ)र्षानपच्युतो- रयिं समत्सु सासहिः। अथा नो वस्यस स्कृधि।।
卐 त्वाँ यज्ञै रवीवृध- न्पवमान विधर्मणि। अथा नो वस्यस स्कृधि।।
卐 रयिन्न श्चित्र मश्विन- मिन्दो विश्वायु मा भर। अथा नो वस्यस स्कृधि।।

☃ 9.05 समिद्ध इत्येकादशर्चस्य सूक्तस्य, काश्यपोऽसितः-क्रमेणेध्म-स्तनूनपा-दिळो- बर्हि-र्देवीर्द्वार-उषासानक्ता- दैव्यौ होतारौ- तिस्रो देव्य स्सरस्वतीळा भारत्य-स्त्वष्टा वनस्पति-स्स्वाहाकृतयो- गायत्री-अन्त्याश्चतस्रोऽनुष्टुभः- (इत आरभ्य विंशति सूक्तेषु काश्यपो देवलोऽसितेन सह विकल्पते)।।

❀06.07.24 卐समिद्धो विश्वतस्पतिः- पवमानो वि राजति। प्रीण न्वृषा कनिक्रदत्।।

卐 तनूनपा त्पवमान- श्शृङ्गे~ शिशानो अर्षति। अन्तरिक्षेण रारजत्।।

卐 ईळेन्यः पवमानो- रयिर्वि राजति द्युमान्। मधो र्धाराभि रोजसा।।

卐 बर्हिः प्राचीन मोजसा- पवमान स्स्तृणन्हरिः। देवेषु देव ईयते।।

卐 उदाऽऽतै र्जिहते बृह- द्वारो देवी र्हिरण्ययीः। पवमानेन सुष्टुताः।।

❀06.07.25 卐सुशिल्पे~ बृहती~ मही~- पवमानो वृषण्यति। नक्तोषासा न दर्शते~।।

卐 उभा देवा नृचक्षसा- होतारा दैव्या हुवे। पवमान^ इन्द्रो वृषा।।

卐 भारती पवमानस्य- सरस्वतीळा मही। इमन्नो यज्ञमा गम- न्तिस्रो देवी स्सुपेशसः।।

卐 त्वष्टार मग्रजा.ङ्गोपां- पुरोयावान माहुवे। इन्दुरिन्द्रो वृषा हरिः- पवमानः प्रजापतिः।।

卐 वनस्पतिं पवमान- मध्वा समङ्ग्धि धारया। सहस्रवल्शं हरितं- भ्राजमानं हिरण्ययम्।।

卐 विश्वे देवा स्स्वाहाकृतिं- पवमानस्याऽऽ गत। वायु र्बृहस्पति स्सूर्यो-ऽग्नि रिन्द्र स्सजोषसः।।

☃ 9.06 मन्द्रयेति नवर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

❀06.07.26 卐मन्द्रया सोम धारया- वृषा पवस्व देवयुः। अव्यो वारेष्वस्मयुः।।

卐 अभि त्यं मद्यं मद- मिन्द ~विन्द्र^ इति क्षर। अभि वाजिनो अर्वतः।।

卐 अभि त्यं पूर्व्यं मदं- सुवानो अर्ष पवित्र आ। अभि वाज मुत श्रवः।।

卐 अनु द्रप्सास^ इन्दव-^ आपो न प्रवताऽसरन्न्। पुनाना^ इन्द्र माशत।।

卐 यमत्यमिव वाजिनं- मृजन्ति योषणो दश। वने क्रीळन्त मत्यविम्।।

❀06.07.27 卐तङ्गोभि र्वृषणं रसं- मदाय देववीतये। सुतं भराय सं सृज।।

卐 देवो देवाय धारये-न्द्राय पवते सुतः। पयो यदस्य पीपयत्।।

卐 आत्मा यज्ञस्य रंह्या- सुष्वाणः पवते सुतः। प्रत्नन्नि पाति काव्यम्।।

卐 एवा पुनान^ इन्द्रयु- र्मदं मदिष्ठ वीतये। गुहा चिद्दधिषे गिरः।।

☫ 9.07 असृग्रमिति नवर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो-गायत्री।।

❀06.07.28 卐 असृग्र मिन्दवः पथा- धर्मन्नृतस्य सुश्रियः। विदाना^ अस्य योजनम्।।

卐 प्र धारा मध्वो अग्रियो- मही रपो वि गाहते। हवि र्हविष्षु वन्द्यः।।

卐 प्र युजो वाचो अग्रियो- वृषाऽव चक्रद द्वने। सद्माभि सत्यो अध्वरः।।

卐 परि यत्काव्या कवि- र्नृम्णा वसानो अर्षति। स्वर्वाजी सिषासति।।

卐 पवमानो अभि स्पृधो- विशो राजेव सीदति। यदीमृण्वन्ति वेधसः।।

❀06.07.29 卐 अव्यो वारे परि प्रियो- हरि र्वनेषु सीदति। रेभो वनुष्यते मती।।

卐 स वायु मिन्द्र मश्विना- साकं मदेन गच्छति। रणा यो अस्य धर्मभिः।

卐 आ मित्रावरुणा भगं- मध्वः पवन्त ऊर्मयः। विदाना^ अस्य शक्मभिः।।

卐 अस्मभ्यं रोदसी~ रयिं- मध्वो वाजस्य सातये। श्रवो वसूनि सञ्जितम्।।

☫ 9.08 एते सोमा इति नवर्चस्य सूक्तस्य, काश्यपोसितः-पवमान-स्सोमो- गायत्री।।

❀06.07.30 卐 एते सोमा^ अभि प्रिय-.मिन्द्रस्य काममक्षरन्न्। वर्धन्तो अस्य वीर्यम्।।

卐 पुनानास श्चमूषदो- गच्छन्तो वायु मश्विना। ते नो धान्तु सुवीर्यम्।।

卐 इन्द्रस्य सोम राधसे- पुनानो हार्दि चोदय। ऋतस्य योनि मासदम्।।

卐 मृजन्ति त्वा दश क्षिपो- हिन्वन्ति सप्त धीतयः। अनु विप्रा^ अमादिषुः।।

卐 देवेभ्यस्त्वा मदाय कं -सृजान मति मेष्यः। सङ्गोभि र्वासयामसि।।

❀06.07.31 卐 पुनानः कलशेष्वा- वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत।।

卐 मघोन^ आ पवस्व नो- जहि विश्वा^ अप द्विषः। इन्दो~ सखाय माविश।।

卐 वृष्टि न्दिवः परि स्रव- द्युम्नं पृथिव्या^ अधि। सहो न स्सोम पृत्सु धाः।।

卐 नृचक्षसन्त्वा वय- मिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजा मिषम्।।

☫ 9.09 परि प्रियेति नवर्चस्य सूक्तस्य, काश्यपोऽसित-पवमान-स्सोमो- गायत्री।।

❀06.07.32 卐 परि प्रिया दिवः कवि- र्वयांसि नप्त्योर्हितः। सुवानो याति कविक्रतुः।।

卐 प्रप्र क्षयाय पन्यसे- जनाय जुष्टो अद्रुहे। वीत्यऽर्ष चनिष्ठया।।

卐 स सूनु र्मातरा शुचि- र्जातो जाते~ अरोचयत्। महा न्मही~ ऋतावृधा।।

卐 स स॒प्त धीति॑भि र्हि॒तो- न॒द्यो॑ अजिन्व द॒द्रुहः॑। या^ एक॒ मक्षि॑ वा॒वृधुः॥

卐 ता^ अ॒भि सन्त॒ मस्तृ॑तं- म॒हे युवा॑न॒ मा द॑धुः। इन्दु॑ मिन्द्र॒ तव॑ व्र॒ते॥

❀06.07.33 卐अ॒भि वह्नि॒ रम॑र्त्य- स्स॒प्त प॑श्यति॒ वाव॑हिः। क्रिवि॑ र्दे॒वी र॑तर्पयत्॥

卐 अवा॑ कल्पे॑षु नः पुम॒- स्तमां॑सि सोम॒ योध्या॑। तानि॑ पुनान जङ्घनः॥

卐 नू॑ नव्य॑से नवी॑यसे- सू॒क्ताय॑ साधया॑ प॒थः। प्र॒त्नव द्रो॑चया॑ रु॒चः॥

卐 पव॑मान॒ महि॒ श्रवो॒- गामश्वं॑ रासि वी॒रव॑त्। सना॑ मे॒धां सना॑ स्वः॑~॥

🏺 9.10 प्र स्वानास इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री॥

❀06.07.34 卐प्र स्वा॒नासो॒ रथा॑इवा-ऽर्वन्तो॒ न श्र॑व॒स्यवः॑। सोमा॑सो रा॒ये अ॑क्रमुः॥

卐 हि॒न्वा॒नासो॒ रथा॑इव- दधन्वि॒रे गभ॑स्त्योः। भरा॑सः का॒रिणा॑मिव॥

卐 राजा॑नो॒ न प्रश॑स्तिभि॒- स्सोमा॑सो॒ गोभि॑ रञ्जते। य॒ज्ञो न स॒प्त धा॒तृभिः॑॥

卐 परि॑ सुवा॒नास॒^ इन्द॑वो॒- मदा॑य ब॒र्हणा॑ गि॒रा। सुता^ अ॑र्षन्ति॒ धार॑या॥

卐 आ॒पा॒नासो॑ वि॒वस्व॑तो॒- जन॑न्त^ उ॒षसो॒ भग॑म्। सू॒रा^ अण्वँ॒ वि त॑न्वते॥

❀06.07.35 卐अप॒ द्वारा॑ मती॒नां- प्र॒त्ना^ ऋ॑ण्वन्ति का॒रवः॑। वृष्णो॑ ह॒रस॑ आ॒यवः॑॥

卐 स॒मी॒ची॒नास॒^ आसते- होता॑र स्स॒प्तजा॒मयः। प॒द मे॑कस्य॒ पिप्र॑तः॥

卐 नाभा॒ नाभि॑न्न^ आ द॑दे- चक्षु॑श्चि॒ त्सूर्ये॒ सचा॑। क॒वे र॑पत्य॒ मा॑दुहे॥

卐 अ॒भि प्रि॒या दि॒वस्प॒द- मऽध्व॒र्युभि॒ र्गुहा॑ हि॒तम्। सूरः॑ पश्यति॒ चक्ष॑सा॥

🏺 9.11 उपास्मा इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री॥

❀06.07.36 卐उपा॑स्मै गायता॑ नरः- पव॑माना॒येन्द॑वे। अ॒भि दे॒वा॑ इय॑क्षते॥

卐 अ॒भि ते॒ मधु॑ना॒ पयो॒-ऽथर्वा॑णो अशिश्रयुः। दे॒व न्दे॒वाय॑ देव॒यु॥

卐 स नः॑ पवस्व॒ शङ्ग॑वे- शङ्ज॑ना॒य शम॑र्वते। शं रा॑ज॒ न्नोष॑धीभ्यः॥

卐 ब॒भ्रवे॑ नु स्वत॑वसे-ऽरु॒णाय॑ दिवि॒स्पृशे॑। सोमा॑य गा॒थ म॑र्चत॥

卐 हस्त॑च्युतेभि॒ रऽद्रि॑भि- स्सु॒तं सोमं॑ पुनीतन। म॒धा॑वा धा॑वता॒ मधु॑॥

❀06.07.37 卐नम॑सेदुप॑ सीदत- द॒ध्ने द॒भि श्री॑णीतन। इन्दु॒ मिन्द्रे॑ दधातन॥

卐 अ॒मि॒त्र॒हा विच॑र्षणिः- पव॑स्व सोम॒ शङ्ग॑वे। दे॒वेभ्यो॑ अनुकामकृ॒त्॥

卐 इन्द्राय सोम पातवे- मदाय परि षिच्यसे। मनश्चि न्मनसस्पतिः।।

卐 पवमान सुवीर्यं- रयिं सोम रिरीहि नः। इन्द~ विन्द्रेण नो युजा।।

9.12 सोमा असृग्रमिति नवर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

06.07.38 卐सोमा^ असृग्र मिन्दव- स्सुता^ ऋतस्य सादने। इन्द्राय मधुमत्तमाः।।

卐 अभि विप्रा^ अनूषत- गावो वत्सन्न मातरः। इन्द्रं सोमस्य पीतये।।

卐 मदच्युत्क्षेति सादने- सिन्धो रूर्मा विपश्चित्। सोमो गौरी~ अधि श्रितः।।

卐 दिवो नाभा विचक्षणो-ऽव्यो वारे महीयते। सोमो य स्सुक्रतुः कविः।।

卐 य स्सोमः कलशेष्वाँ- अन्तः~ पवित्र आहितः। तमिन्दुः परि षस्वजे।।

06.07.39 卐प्र वाच मिन्दु रिष्यति- समुद्रस्याऽधि विष्टपि। जिन्वन्कोशं मधुश्चुतम्।।

卐 नित्यस्तोत्रो वनस्पति- र्धीना मन्त~ स्सबर्दुघः। हिन्वानो मानुषा युगा।।

卐 अभि प्रिया दिवस्पदा- सोमो हिन्वानो अर्षति। विप्रस्य धारया कविः।।

卐 आ पवमान धारय- रयिं सहस्रवर्चसम्। अस्मे इन्दो~ स्वाभुवम्।।।। इति सप्तमाध्याय स्समाप्तः।।

## षष्ठाष्टके अष्टमाध्यायः (वर्गाः 1-33)

9.13 सोमः पुनान इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

06.08.01 卐सोमः पुनानो अर्षति- सहस्रधारो अत्यविः। वायो रिन्द्रस्य निष्कृतम्।।

卐 पवमान मवस्यवो- विप्र मभि प्र गायत। सुष्वाण न्देववीतये।।

卐 पवन्ते वाजसातये- सोमा स्सहस्रपाजसः। गृणाना देववीतये।।

卐 उत नो वाजसातये- पवस्व बृहतीरिषः। द्युम दिन्दो~ सुवीर्यम्।।

卐 ते न स्सहस्रिणं रयिं- पवन्तामा सुवीर्यम्। सुवाना^ देवास^ इन्दवः।।

06.08.02 卐अत्या^ हियाना^ न हेतृभि- रऽसृग्रँ वाजसातये। वि वार मव्य माशवः।।

卐 वाश्रा^ अर्षन्तीन्दवो-ऽभि वत्सन्न धेनवः। दधन्विरे गभस्त्योः।।

卐 जुष्ट^ इन्द्राय मत्सरः- पवमान कनिक्रदत्। विश्वा^ अप द्विषो जहि।।

卐 अपघ्नन्तो अराव्णः- पवमाना स्स्वर्दृशः। योना वृतस्य सीदत।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

☸ 9.14 परि प्रेत्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

❀06.08.03 卐 परि प्राऽसिष्यद त्कवि- स्सिन्धो रूर्मा वधि श्रितः। कारं बिभ्र त्पुरुस्पृहम्।।

卐 गिरा यदी सबन्धव- पञ्च व्राता अपस्यवः। परिष्कृण्वन्ति धर्णसिम्।।

卐 आदस्य शुष्मिणो रसे- विश्वे देवा अमत्सत। यदी गोभि र्वसायते।।

卐 निरिणानो वि धावति- जह च्छर्याणि तान्वा। अत्रा सञ्जिघ्नते युजा।।

卐 नप्तीभिर्यो विवस्वत- श्शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजम्।।

❀06.08.04 卐 अति श्रिती तिरश्चता- गव्या जिगात्यण्व्या। वग्नु मियर्ति यँ विदे।।

卐 अभि क्षिप स्समग्मत- मर्जयन्ती रिषस्पतिम्। पृष्ठा गृभ्णत वाजिनः।।

卐 परि दिव्यानि मर्मृश- द्विश्वानि सोम पार्थिवा। वसूनि याह्यस्मयुः।।

☸ 9.15 एष धियेत्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

❀06.08.05 卐 एष धिया यात्यऽण्व्या- शूरो रथेभि राशुभिः। गच्छन्निन्द्रस्य निष्कृतम्।।

卐 एष पुरू धियायते- बृहते देवतातये। यत्रा ऽमृतास आसते।।

卐 एष हितो वि नीयते-ऽन्त~ श्शुभ्रावता पथा। यदी तुञ्जन्ति भूर्णयः।।

卐 एष शृङ्गाणि दोधुव- च्छिशीते यूथ्यो3(ओ) वृषा। नृम्णा दधान ओजसा।।

卐 एष रुक्मिभि रीयते- वाजी शुभ्रेभि रंशुभिः। पति स्सिन्धूनां भवन्न्।।

卐 एष वसूनि पिब्दना- परुषा ययिवा९ अति। अव शादेषु गच्छति।।

卐 एतं मृजन्ति मर्ज्य- मुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः।।

卐 एतमु त्यन्दश क्षिपो- मृजन्ति सप्त धीतयः। स्वायुधं मदिन्तमम्।।

☸ 9.16 प्र ते सोतार इत्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

❀06.08.06 卐 प्र ते सोतार ओण्यो3(ओ)- रसं मदाय घृष्वये। सर्गो न तक्त्येतशः।।

卐 क्रत्वा दक्षस्य रथ्य- मपो वसान मन्धसा। गोषा मऽण्वेषु सश्चिम।।

卐 अनप्त मप्सु दुष्टरं- सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे।।

卐 प्र पुनानस्य चेतसा- सोमः पवित्रे अर्षति। क्रत्वा सधस्थ माऽसदत्।।

卐 प्र त्वा नमोभि रिन्दव- इन्द्र सोमा असृक्षत। महे भराय कारिणः।।

卐 पुनानो रूपे अव्यये- विश्वा^ अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति।।
卐 दिवो न सानु पिप्युषी- धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति।।
卐 त्वं सोम विपश्चित-न्तना पुनान^ आयुषु। अव्यो वारँ वि धावसि।।
9.17 प्र निम्नेनेवेत्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।
❀06.08.07 卐प्र निम्नेनेव सिन्धवो- घ्नन्तो वृत्राणि भूर्णयः। सोमा^ असृग्रमाशवः।।
卐 अभि सुवानास^ इन्दवो- वृष्टयः पृथिवीमिव। इन्द्रं सोमासो अक्षरन्न्।।
卐 अत्यूर्मि र्मत्सरो मद- स्सोमः पवित्रे अर्षति। विघ्न न्रक्षांसि देवयुः।।
卐 आ कलशेषु धावति- पवित्रे परि षिच्यते। उक्थै र्यज्ञेषु वर्धते।।
卐 अति त्री सोम रोचना- रोहन्न भ्राजसे दिवम्। इष्ण न्त्सूर्य.न्नचोदयः।।
卐 अभि विप्रा^ अनूषत- मूर्ध न्यज्ञस्य कारवः। दधाना श्चक्षसि प्रियम्।।
卐 तमु त्वा वाजिनन्नरो- धीभि र्विप्रा^ अवस्यवः। मृजन्ति देवतातये।।
卐 मधो र्धारा मनु क्षर- तीव्र स्सधस्थ माऽसदः। चारुर् ऋताय पीतये।।
9.18 परि सुवान इति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।
❀06.08.08 卐☞परि सुवानो गिरिष्ठाः- पवित्रे सोमो अक्षाः~। मदेषु सर्वधा^ असि।।
卐 त्वं विप्रस्त्वङ्कवि- र्मधु प्र जात मन्धसः। मदेषु सर्वधा^ असि।।
卐 तव विश्वे सजोषसो- देवासः पीति माशत। मदेषु सर्वधा^ असि।।
卐 आ यो विश्वानि वार्या- वसूनि हस्तयोर्दधे। मदेषु सर्वधा^ असि।।
卐 य इमे~ रोदसी मही~- सं मातरेव दोहते। मदेषु सर्वधा^ असि।।
卐 परि यो रोदसी उभे~- सद्यो वाजेभि रर्षति। मदेषु सर्वधा^ असि।।
卐 स शुष्मी कलशेष्वा- पुनानो अचिक्रदत्। मदेषु सर्वधा^ असि।।
9.19 यत्सोमेति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।
❀06.08.09 卐यत्सोम चित्र मुक्थ्य- न्दिव्यं पार्थिवँ वसु। तन्नः पुनान^ आ भर।।
卐 युवं हि स्थ स्स्वर्पती- इन्द्रश्च सोम गोपती~। ईशाना पिप्यत.न्धियः।।
卐 वृषा पुनान^ आयुषु- स्तनयन्नऽधि बर्हिषि। हरि स्सन्योनि माऽसदत्।।

卐 अवावशन्त धीतयो- वृषभस्याऽधि रेतसि। सूनो र्वत्सस्य मातरः।।

卐 कुवि द्वृषण्यन्तीभ्यः- पुनानो गर्भ मादधत्। याः शुक्र न्दुहते पयः।।

卐 उप शिक्षापतस्थुषो- भियस.माऽधेहि शत्रुषु। पवमान विदा रयिम्।।

卐 नि शत्रो स्सोम वृष्ण्य-न्नि शुष्म न्निवयस्तिर। दूरे वा सतो अन्ति वा।।

9.20 प्र कविरिति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

06.08.10 卐प्र कवि र्देववीतये-ऽव्यो वारेभि रर्षति। साह्वा न्विश्वा अभि स्पृधः।।

卐 स हिष्मा जरितृभ्य आ- वाजङ्गोमन्त मिन्वति। पवमान स्सहस्रिणम्।।

卐 परि विश्वानि चेतसा- मृशसे पवसे मती। स न स्सोम श्रवो विदः।।

卐 अभ्यर्ष बृहद्यशो- मघवद्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य आ भर।।

卐 त्वं राजेव सुव्रतो- गिर स्सोमाऽविवेशिथ। पुनानो वह्ने अद्भुत।।

卐 स वह्नि रप्सु दुष्टरो- मृज्यमानो गभस्त्योः। सोम श्चमूषु सीदति।।

卐 क्रीळु र्मखो न मंहयुः- पवित्रं सोम गच्छसि। दध त्स्तोत्रे सुवीर्यम्।।

9.21 एते धावन्तीति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

06.08.11 卐एते धावन्तीन्दव- स्सोमा इन्द्राय घृष्वयः। मत्सरास स्स्वर्विदः।।

卐 प्रवृण्वन्तो अभियुज- स्सुष्वये वरिवोविदः। स्वयं स्तोत्रे वयस्कृतः।।

卐 वृथा क्रीळन्त इन्दव- स्सधस्थ.मभ्येक मित्। सिन्धो रूर्मा व्यऽक्षरन्न्।।

卐 एते विश्वानि वार्या- पवमानास आशत। हिता न सप्तयो रथे।।

卐 आऽस्मि न्पिशङ्ग मिन्दवो- दधाता वेन.मादिशे। यो अस्मभ्य मरावा।।

卐 ऋभुर्न रथ्यन्नव- न्दधाता केत मादिशे। शुक्राः पवध्व मर्णसा।।

卐 एत उ त्ये अवीवश- न्काष्ठाँ वाजिनो अक्रत। सतः प्राऽसाविषु र्मतिम्।।

9.22 एते सोमास इति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

06.08.12 卐एते सोमास आशवो- रथाइव प्र वाजिनः। सर्गा स्सृष्टा अहेषत।।

卐 एते वाताइवोरवः- पर्जन्यस्येव वृष्टयः। अग्नेरिव भ्रमा वृथा।।

卐 एते पूता विपश्चित- स्सोमासो दध्याशिरः। विपा व्याऽनशु र्धियः।।

卐 एते मृष्टा^ अमर्त्या- स्ससृवांसो न शश्रमुः। इयक्षन्तः पथो रजः।।

卐 एते पृष्ठानि रोदसो- र्विप्रयन्तो व्याऽऽनशुः। उतेद मुत्तमं रजः।।

卐 तन्तु न्तन्वान मुत्तम- मनु प्रवत^ आशत। उतेद मुत्तमाय्यम्।।

卐 त्वं सोम पणिभ्य^ आ- वसु गव्यानि धारयः। तत न्तन्तु मचिक्रदः।।

9.23 सोमा असृग्रमिति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

❀06.08.13 卐सोमा^ असृग्र माशवो- मधो र्मदस्य धारया। अभि विश्वानि काव्या।।

卐 अनु प्रत्नास^ आयवः- पदन्नवीयो अक्रमुः। रुचे जनन्त सूर्यम्।।

卐 आ पवमान नो भरा-ऽर्यो अदाशुषो गयम्। कृधि प्रजावती रिषः।।

卐 अभि सोमास^ आयवः- पवन्ते मद्यं मदम्। अभि कोशं मधुश्चुतम्।।

卐 सोमो अर्षति धर्णसि- र्दधान^ इन्द्रियं रसम्। सुवीरो अभिशस्तिपाः।।

卐 इन्द्राय सोम पवसे- देवेभ्य स्सधमाद्यः। इन्दो~ वाजं सिषाससि।।

卐 अस्य पीत्वा मदाना- मिन्द्रो वृत्राण्यप्रति। जघान जघनच्च नु।।

9.24 प्र सोमास इति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान-स्सोमो- गायत्री।।

卐 द्वितीयेऽनुवाके षड्विंशत्सूक्तानि।।

❀06.08.14 卐प्र सोमासो अधन्विषुः- पवमानास^ इन्दवः। श्रीणाना^ अप्सु मृञ्जत।।

卐 अभि गावो अधन्विषु- रापो न प्रवता यतीः। पुनाना^ इन्द्र माशत।।

卐 प्र पवमान धन्वसि- सोमेन्द्राय पातवे। नृभिर्यतो वि नीयसे।।

卐 त्वं सोम नृमादनः- पवस्व चर्षणीसहे। सस्नि र्यो अनुमाद्यः।।

卐 इन्दो~ यदद्रिभि स्सुतः- पवित्रं परिधावसि। अर.मिन्द्रस्य धाम्ने।।

卐 पवस्व वृत्रहन्तमो-क्थेभि रनुमाद्यः। शुचिः पावको अद्भुतः।।

卐 शुचिः पावक उच्यते- सोम स्सुतस्य मध्वः। देवावी रऽघशंसहा।।

9.25 पवस्वेति षड्चस्य सूक्तस्यागस्त्यो दृह्ळच्युतः-पवमान-स्सोमो- गायत्री।।

❀06.08.15 卐पवस्व दक्षसाधनो- देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः।।

卐 पवमान धिया हितो3(ओ)-ऽभि योनिङ्कनिक्रदत्। धर्मणा वायुमा विश।।

卐 सन्देवै श्शोभते वृषा- कविर्योनावधि प्रियः। वृत्रहा देववीतमः।।

卐 विश्वा रूपाण्याऽविश- न्पुनानो याति हर्यतः। यत्राऽमृतास आसते।।

卐 अरुषो जनय न्गिर- स्सोमः पवत आयुषक्। इन्द्रङ्गच्छ न्कविक्रतुः।।

卐 आ पवस्व मदिन्तम- पवित्र न्धारया कवे। अर्कस्य योनि मासदम्।।

9.26 तममृक्षन्तेति षडृचस्य सूक्तस्य, दार्ढच्युत इध्मवाहः-पवमान-स्सोमो- गायत्री।।

❀06.08.16 卐 तममृक्षन्त वाजिन- मुपस्थे अदिते रधि। विप्रासो अण्व्या धिया।।

卐 तङ्गावो अभ्यनूषत- सहस्रधार मऽक्षितम्। इन्दु न्धर्तारमा दिवः।।

卐 तँ वेधां मेधयाऽह्य- न्पवमान मधि द्यवि। धर्णसिं भूरिधायसम्।।

卐 तमह्य न्भुरिजो र्धिया- सँवसानँ विवस्वतः। पतिँ वाचो अदाभ्यम्।।

卐 तं साना वधि जामयो- हरिं हिन्व न्त्यद्रिभिः। हर्यतं भूरिचक्षसम्।।

卐 तन्त्वा हिन्वन्ति वेधसः- पवमान गिरावृधम्। इन्द~ विन्द्राय मत्सरम्।।

9.27 एष कविरिति षडृचस्य सूक्तस्याऽङ्गिरसो नृमेधःपवमान-स्सोमो- गायत्री।।

❀06.08.17 卐 एष कवि रभिष्टुतः- पवित्रे अधि तोशते। पुनानो घ्नन्नप स्त्रिधः।।

卐 एष इन्द्राय वायवे- स्वर्जि त्परि षिच्यते। पवित्रे दक्षसाधनः।।

卐 एष नृभि र्विनीयते- दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित्।।

卐 एष गव्यु रचिक्रद- त्पवमानो हिरण्ययुः। इन्दु स्सत्राजि दऽस्तृतः।।

卐 एष सूर्येण हासते- पवमानो अधि द्यवि। पवित्रे मत्सरो मदः।।

卐 एष शुष्म्यसिष्यद द-ऽन्तरिक्षे वृषा हरिः। पुनान^ इन्दु रिन्द्रमा।।

9.28 एष वाजीति षडृचस्य सूक्तस्याऽङ्गिरसः प्रियमेधः-पवमान-स्सोमो- गायत्री।।

❀06.08.18 卐 एष वाजी हितो नृभि-र्विश्ववि न्मनसस्पतिः। अव्यो वारँ विधावति।।

卐 एष पवित्रे अक्षर- त्सोमो देवेभ्य स्सुतः। विश्वा धामा न्याऽविशन्।।

卐 एष देव श्शुभायते-ऽधि योना वमर्त्यः। वृत्रहा देववीतमः।।

卐 एष वृषा कनिक्रद- द्दशभि र्जामिभि र्यतः। अभि द्रोणानि धावति।।

卐 एष सूर्य मरोचय- त्पवमानो विचर्षणिः। विश्वा धामानि विश्ववित्।।

卐 एष शुष्म्यदाभ्य- स्सोमः पुनानो अर्षति। देवावी रघशंसहा।।

☸ 9.29 प्रास्य धारा इति षडृचस्य सूक्तस्याऽऽङ्गिरसो नृमेधः-पवमान-स्सोमो- गायत्री।।

❀06.08.19 卐प्रास्य धारा अक्षर- न्वृष्ण स्सुतस्यौजसा। देवा अनु प्रभूषतः।।

卐 सप्तिं मृजन्ति वेधसो- गृणन्तः कारवो गिरा। ज्योति र्जज्ञान मुक्थ्यम्।।

卐 सुषहा सोम तानि ते- पुनानाय प्रभूवसो। वर्धा समुद्र मुक्थ्यम्।।

卐 विश्वा वसूनि सञ्जय- न्पवस्व सोम धारया। इनु द्वेषांसि सध्र्यक्।।

卐 रक्षा सु नो अररुष- स्स्वना त्समस्य कस्य चित्। निदो यत्र मुमुच्महे।।

卐 एन्दो पार्थिवं रयि- न्दिव्यं पवस्व धारया। द्युमन्तं शुष्ममा ऽऽभर।।

☸ 9.30 प्र धारा इति षडृचस्य सूक्तस्याऽऽङ्गिरसो बिन्दुः-पवमान-स्सोमो- गायत्री।।

❀06.08.20 卐प्र धारा अस्य शुष्मिणो- वृथा पवित्रे अक्षरन्न्। पुनानो वाचमिष्यति।।

卐 इन्दु र्हियान स्सोतृभि- र्मृज्यमानः कनिक्रदत्। इयर्ति वग्नु मिन्द्रियम्।।

卐 आ न श्शुष्म न्नृषाह्यँ- वीरवन्तं पुरुस्पृहम्। पवस्व सोम धारया।।

卐 प्र सोमो अति धारया- पवमानो असिष्यदत्। अभि द्रोणा न्याऽऽसदम्।।

卐 अप्सु त्वा मधुमत्तमं- हरिं हिन्वन्त्यद्रिभिः। इन्द विन्द्राय पीतये।।

卐 सुनोता मधुमत्तमं- सोम मिन्द्राय वज्रिणे। चारुं शर्धाय मत्सरम्।।

☸ 9.31 प्र सोमास इति षडृचस्य सूक्तस्य, राहूगणो गोतमः-पवमान-स्सोमो- गायत्री।।

❀06.08.21 卐प्र सोमास स्स्वाध्य1(अः)- पवमानासो अक्रमुः। रयिङ्कृण्वन्ति चेतनम्।।

卐 दिव स्पृथिव्या अधि- भवेन्दो द्युम्नवर्धनः। भवा वाजानां पतिः।।

卐 तुभ्यँ वाता अभिप्रिय- स्तुभ्य मर्षन्ति सिन्धवः। सोम वर्धन्ति ते महः।।

卐 आ प्यायस्व समेतु ते- विश्वत स्सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे।।

卐 तुभ्यङ्गावो घृतं पयो- बभ्रो दुदुह्रे अक्षितम्। वर्षिष्ठे अधि सानवि।।

卐 स्वायुधस्य ते सतो- भुवनस्य पते वयम्। इन्दो सखित्व मुश्मसि।।

☸ 9.32 प्र सोमास इति षडृचस्य सूक्तस्याऽऽत्रेयश्श्यावाश्वः-पवमान-स्सोमो- गायत्री।।

❀06.08.22 卐प्र सोमासो मदच्युत- श्श्रवसे नो मघोनः। सुता विदथे अक्रमुः।।

卐 आदीन्त्रितस्य योषणो- हरिं हिन्व न्त्यद्रिभिः। इन्दु.मिन्द्राय पीतये।।

卐 आदीं हंसो यथा गणँ- विश्वस्यावीवश न्मतिम्। अत्यो न गोभि रज्यते।।

卐 उभे~ सोमावचाकश- न्मृगो न तक्तो अर्षसि। सीद न्नृतस्य योनि.मा।।

卐 अभि गावो अनूषत- योषा जारमिव प्रियम्। अग न्नाऽजिँ यथा हितम्।।

卐 अस्मे धेहि द्युम द्यशो- मघवद्भ्यश्च मह्यञ्च। सनिं मेधा.मुत श्रवः।।

🏺 9.33 प्र सोमास इति षडृचस्य सूक्तस्याऽऽस्त्यस्त्रितः-पवमान-स्सोमो- गायत्री।।

❀06.08.23 卐प्र सोमासो विपश्चितो-ऽपान्न यन्त्यूर्मयः। वनानि महिषाइव।।

卐 अभि द्रोणानि बभ्रव- श्शुक्रा^ ऋतस्य धारया। वाज.ङ्गोमन्त.मऽक्षरन्न्।।

卐 सुता^ इन्द्राय वायवे- वरुणाय मरुद्भ्यः। सोमा^ अर्षन्ति विष्णवे।।

卐 तिस्रो वाच^ उदीरते- गावो मिमन्ति धेनवः। हरि रेति कनिक्रदत्।।

卐 अभि ब्रह्मी रनूषत- यह्वीर् ऋतस्य मातरः। मर्मृज्यन्ते दिव श्शिशुम्।।

卐 राय स्समुद्रांश्चतुरो-ऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः।।

🏺 9.34 प्र सुवान इति षडृचस्य सूक्तस्याऽऽस्त्यस्त्रितः-पवमान-स्सोमो- गायत्री।।

❀06.08.24 卐प्र सुवानो धारया तने-न्दु र्हिन्वानो अर्षति। रुज द्दृळ्हा व्योजसा।।

卐 सुत^ इन्द्राय वायवे- वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे।।

卐 वृषाणँ वृषभि र्यतं- सुन्वन्ति सोम मद्रिभिः। दुहन्ति शक्मना पयः।।

卐 भुव त्त्रितस्य मर्ज्यो- भुव दिन्द्राय मत्सरः। सं रूपै रज्यते हरिः।।

卐 अभी मृतस्य विष्टप- न्दुहते पृश्निमातरः। चारु प्रियतमं हविः।।

卐 समेन मह्नुता^ इमा^- गिरो अर्षन्ति सस्रुतः। धेनू र्वाश्रो अवीवशत्।।

🏺 9.35 आ नः पवस्वेति षडृचस्य सूक्तस्याऽऽङ्गिरसः प्रभूवसुः-पवमान-स्सोमो- गायत्री।।

❀06.08.25 卐आ नः पवस्व धारया- पवमान रयिं पृथुम्। यया ज्योति र्विदासि नः।।

卐 इन्दो~ समुद्र मीङ्खय- पवस्व विश्वमेजय। रायो धर्ता न ओजसा।।

卐 त्वया वीरेण वीरवो-ऽभिष्याम पृतन्यतः। क्षराणो अभि वार्यम्।।

卐 प्र वाज मिन्दु रिष्यति- ꣳसिषास न्वाजसा ऋषिः। व्रता विदान^ आयुधा।।

卐 तङ्गीर्भि वाचमीङ्ग्यं- पुनानँ वासयामसि। सोम.ञ्जनस्य गोपतिम्।।

卐 विश्वो यस्य व्रते जनो- दाधार धर्मणस्पतेः। पुनानस्य प्रभूवसोः।।

9.36 असर्जीति षड्टचस्य सूक्तस्याऽऽङ्गिरसः प्रभूवसुः-पवमान-स्सोमो- गायत्री।।

❀06.08.26 卐असर्जि रथ्यो यथा- पवित्रे चम्वो स्सुतः। कार्ष्म न्वाजी न्यऽक्रमीत्।।

卐 स वह्नि स्सोम जागृविः- पवस्व देववी रऽति। अभि कोशं मधुश्चुतम्।।

卐 स नो ज्योतींषि पूर्व्य- पवमान वि रोचय। क्रत्वे दक्षाय नो हिनु।।

卐 शुम्भमानॅ ऋतायुभि- र्मृज्यमानो गभस्त्योः। पवते वारे अव्यये।।

卐 स विश्वा दाशुषे वसु- सोमो दिव्यानि पार्थिवा। पवता माऽन्तरिक्ष्या।।

卐 आ दिव स्पृष्ठ मश्वयु- र्गव्ययु स्सोम रोहसि। वीरयु श्शवसस्पते।।

9.37 स सुत इति षड्टचस्य सूक्तस्याऽऽङ्गिरसो रहूगणः-पवमान-स्सोमो- गायत्री।।

❀06.08.27 卐स सुतः पीतये वृषा- सोमः पवित्रे अर्षति। विघ्न न्रक्षांसि देवयुः।।

卐 स पवित्रे विचक्षणो- हरि रर्षति धर्णसिः। अभि योनिङ्कनिक्रदत्।।

卐 स वाजी रोचना दिवः- पवमानो वि धावति। रक्षोहा वार मव्ययम्।।

卐 स त्रितस्याधि सानवि- पवमानो अरोचयत्। जामिभि स्सूर्यं सह।।

卐 स वृत्रहा वृषा सुतो- वरिवोवि ददाभ्यः। सोमो वाजमिवाऽसरत्।।

卐 स देवः कविनेषितो3(ओ)-ऽभि द्रोणानि धावति। इन्दु रिन्द्राय मंहना।।

9.38 एष उ स्य इति षड्टचस्य सूक्तस्याऽऽङ्गिरसो रहूगणः-पवमान-स्सोमो- गायत्री।।

❀06.08.28 卐एष उ स्य वृषा रथो-ऽव्यो वारेभिरर्षति। गच्छ न्वाजं सहस्रिणम्।।

卐 एत न्त्रितस्य योषणो- हरिं हिन्व न्त्यद्रिभिः। इन्दु मिन्द्राय पीतये।।

卐 एतन्त्यं हरितो दश- मर्मृज्यन्ते अपस्युवः। याभि र्मदाय शुम्भते।।

卐 एष स्य मानुषीष्वा- श्येनो न विक्षु सीदति। गच्छन्जारो न योषितम्।।

卐 एष स्य मद्यो रसो-ऽव चष्टे दिव श्शिशुः। यॅ इन्दु र्वार माऽविशत्।।

卐 एष स्य पीतये सुतो- हरि रर्षति धर्णसिः। क्रन्द न्योनि मऽभि प्रियम्।।

9.39 आशुरर्षेति षड्टचस्य सूक्तस्याऽऽङ्गिरसो बृहन्मतिः-पवमान-स्सोमो- गायत्री।।

❀06.08.29 卐आशु रर्ष बृहन्मते- परि प्रियेण धाम्ना। यत्र देवा^ इति ब्रवन्न्।।

卐 परिष्कृण्व न्ननिष्कृत-ञ्जनाय यातयन्निषः। वृष्टि.न्दिव॰ परि स्त्रव।।

卐 सुत एति पवित्र आ- त्विषि.न्दधान ओजसा। विचक्षाणो विरोचयन्न्।।

卐 अयं स यो दिवस्परि- रघुयामा पवित्र आ। सिन्धो रूर्मा व्यऽक्षरत्।।

卐 आविवास न्परावतो- अथो~ अर्वावत स्सुतः। इन्द्राय सिच्यते मधु।।

卐 समीचीना^ अनूषत- हरिं हिन्व न्त्यद्रिभिः। योना वृतस्य सीदत।।

9.40 पुनान इति षडृचस्य सूक्तस्याऽऽङ्गिरसो बृहन्मतिः-पवमान-स्सोमो- गायत्री।।

❀06.08.30 卐पुनानो अक्रमी दभि- विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्र.न्धीतिभिः।।

卐 आ योनिं मरुणो रुह- द्गम दिन्द्रँ वृषा सुतः। ध्रुवे सदसि सीदति।।

卐 नू नो रयिं महा मिन्दो~ऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्त्रिणम्।।

卐 विश्वा सोम पवमान- द्युम्नानीन्दवा भर। विदा स्सहस्त्रिणी रिषः।।

卐 स न॰ पुनान^ आ भर- रयिं स्तोत्रे सुवीर्यम्। जरितु वर्धया गिरः।।

卐 पुनान इन्द~वा भर- सोम द्विबर्हसं रयिम्। वृष न्निन्दो~ न उक्थ्यम्।।

9.41 प्र ये गाव इति षडृचस्य सूक्तस्य, काण्वो मेध्यातिथिः-पवमान-स्सोमो- गायत्री।।

❀06.08.31 卐प्र ये गावो न भूर्णय-स्त्वेषा^ अयासो अक्रमुः। घ्नन्त॰ कृष्णा मप त्वचम्।।

卐 सुवितस्य मनामहे-ऽति सेतु न्दुराव्यम्। साह्वांसो दस्यु मव्रतम्।।

卐 शृण्वे वृष्टेरिव स्वन॰- पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि।।

卐 आ पवस्व मही मिष-ङ्गोम दिन्दो~ हिरण्यवत्। अश्वावद्वाजव त्सुतः।।

卐 स पवस्व विचर्षण -आ मही~ रोदसी पृण। उषा स्सूर्यो न रश्मिभिः।।

卐 परि ण श्शर्मयन्त्या- धारया सोम विश्वतः। सरा रसेव विष्टपम्।।

9.42 जनयन्निति षडृचस्य सूक्तस्य, काण्वो मेध्यातिथिः-पवमान-स्सोमो- गायत्री।।

❀06.08.32 卐जनय न्रोचना दिवो- जनयन्नऽप्सु सूर्यम्। वसानो गा^ अपो हरिः।।

卐 एष प्रत्नेन मन्मना- देवो देवेभ्य स्परि। धारया पवते सुतः।।

卐 वावृधानाय तूर्वये- पवन्ते वाजसातये। सोमा स्सहस्त्रपाजसः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 दुहानः प्रत्नमि त्पयः- पवित्रे परि षिच्यते। क्रन्द न्देवा॑ अजीजनत्।।

卐 अभि विश्वानि वार्या-ऽभि देवा॑ ऋतावृधः। सोमः पुनानो अर्षति।।

卐 गोमन्न स्सोम वीरव –दऽश्वाव द्वाजव त्सुतः। पवस्व बृहती रिषः।।

9.43 यो अत्यइवेति षड़ृचस्य सूक्तस्य, काण्वो मेध्यातिथिः-पवमान-स्सोमो- गायत्री।।

❀06.08.33 卐यो अत्यइव मृज्यते- गोभि र्मदाय हर्यतः। तङ्गीर्भि र्वासयामसि।।

卐 तन्नो विश्वा^ अवस्युवो- गिर श्शुम्भन्ति पूर्वथा। इन्दु.मिन्द्राय पीतये।।

卐 पुनानो याति हर्यत- स्सोमो गीर्भिः परिष्कृतः। विप्रस्य मेध्यातिथेः।।

卐 पवमान विदा रयि- मस्मभ्यं सोम सुश्रियम्। इन्दो~ सहस्रवर्चसम्।।

卐 इन्दु रत्यो न वाजसृ- त्कनिक्रन्ति पवित्र आ। यदक्षारति देवयुः।।

卐 पवस्व वाजसातये- विप्रस्य गृणतो वृधे। सोम रास्व सुवीर्यम्।।

卐 ।। इत्यष्टमाध्याय स्समाप्तः।।।। इति षष्ठाष्टकं समाप्तम्।।

## ❀सप्तमाष्टकम्

## सप्तमाष्टके प्रथमाध्यायः (1-41)

9.44 प्र ण इन्दविति षड़ृचस्य सूक्तस्याऽऽङ्गिरसोऽयास्यः-पवमान-स्सोमो- गायत्री।।

❀07.01.01 卐प्र ण इन्दो~ महे तन -ऊर्मिन्न बिभ्र दर्षसि। अभि देवा॑ अयास्यः।।

卐 मती जुष्टो धिया हित- स्सोमो हिन्वे परावति। विप्रस्य धारया कविः।।

卐 अय न्देवेषु जागृवि- स्सुत^ एति पवित्र आ। सोमो याति विचर्षणिः।।

卐 स नः पवस्व वाजयु- श्चक्राण श्चारु मध्वरम्। बर्हिष्मा॑ आ विवासति।।

卐 स नो भगाय वायवे- विप्रवीर स्सदावृधः। सोमो देवेष्वा ऽऽयमत्।।

卐 स नो अद्य वसुत्तये- क्रतुवि द्गातुवित्तमः। वाजञ्जेषि श्रवो बृहत्।।

9.45 स पवस्वेति षड़ृचस्य सूक्तस्याऽऽङ्गिरसोऽयास्यः-पवमान-स्सोमो- गायत्री।।

❀07.01.02 卐स पवस्व मदाय क-न्नृचक्षा^ देववीतये। इन्द~ विन्द्राय पीतये।।

卐 स नो अर्षाभि दूत्य1(अ)-न्त्वमिन्द्राय तोशसे। देवा न्त्सखिभ्य आवरम्।।

卐 उत त्वा मरुणँ वय-ङ्गोभिरञ्ज्मो मदाय कम्। वि नो राये दुरो वृधि।।

卐 अत्यू पवित्र मक्रमी- द्वाजी धुरन्न यामनि। इन्दु र्देवेषु पत्यते।।

卐 समी सखायो अस्वर- न्वने क्रीळन्त मऽत्यविम्। इन्दु न्नावा^ अनूषत।।

卐 तया पवस्व धारया- यया पीतो विचक्षसे। इन्दो~ स्तोत्रे सुवीर्यम्।।

9.46 असृग्र मिति षड्चस्य सूक्तस्याऽऽङ्गिरसोऽयास्यः-पवमान-स्सोमो- गायत्री।।

❀07.01.03 卐असृग्र न्देववीतये-ऽत्यास॰ कृत्व्याइव। क्षरन्त॰ पर्वतावृधः।।

卐 परिष्कृतास^ इन्दवो- योषेव पित्र्यावती। वायुं सोमा^ असृक्षत।।

卐 एते सोमास^ इन्दव॰- प्रयस्वन्त श्चमू~ सुताः। इन्द्रं वर्धन्ति कर्मभिः।।

卐 आ धावता सुहस्त्य- श्शुक्रा गृभ्णीत मन्थिना। गोभि श्श्रीणीत मत्सरम्।।

卐 स पवस्व धनञ्जय- प्रयन्ता राधसो महः। अस्मभ्यं सोम गातुवित्।।

卐 एतं मृजन्ति मर्ज्यं- पवमान.न्दश क्षिपः। इन्द्राय मत्सरं मदम्।।

9.47 अया सोम इति पञ्चर्चस्य सूक्तस्य, भार्गवः कवि- पवमान-स्सोमो- गायत्री।।

❀07.01.04 卐अया सोम स्सुकृत्यया- महश्चि दभ्यऽवर्धत। मन्दान^ उद्वृषायते।।

卐 कृतानीदऽस्य कर्त्वा- चेतन्ते दस्युतर्हणा। ऋणा च धृष्णु श्चयते।।

卐 आत्सोम^ इन्द्रियो रसो- वज्र स्सहस्रसा^ भुवत्। उक्थँ यदस्य जायते।।

卐 स्वयङ्कवि विधर्तरि- विप्राय रत्न मिच्छति। यदी मर्मृज्यते धियः।।

卐॰सिषासतू रयीणाँ- वाजे ष्वर्वतामिव। भरेषु जिग्युषा मसि।।

9.48 तन्त्वेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः- पवमान-स्सोमो- गायत्री।।

❀07.01.05 卐तन्त्वा नृम्णानि बिभ्रतं- सधस्थेषु महो दिवः। चारुं सुकृत्यये महे।।

卐 सँवृक्तधृष्णु मुक्थ्यं- महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम्।।

卐 अतस्त्वा रयि मभि- राजानं सुक्रतो दिवः। सुपर्णो अव्यथि भरत्।।

卐 विश्वस्मा इत्स्वर्दृशे- साधारणं रजस्तुरम्। गोपा मृतस्य विर्भरत्।।

卐 अधा हिन्वान^ इन्द्रिय-ञ्ज्यायो महित्व मानशे। अभिष्टिकृ द्विचर्षणिः।।

9.49 पवस्वेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः- पवमान-स्सोमो- गायत्री।।

❀07.01.06 卐पवस्व वृष्टिमा सु नो-ऽपा मूर्मि न्दिव स्परि। अयक्ष्मा^ बृहती रिषः।।

卐 तया पवस्व धारया- यया गाव इहाऽऽगमन्न्। जन्यास उप नो गृहम्।।

卐 घृतं पवस्व धारया- यज्ञेषु देववीतमः। अस्मभ्यँ वृष्टिमा.ऽऽपव।।

卐 स न^ ऊर्जे व्य1(अ)व्ययं- पवित्र न्धाव धारया। देवास श्शृणव न्हिकम्।।

卐 पवमानो असिष्यद्- द्रक्षांस्यऽपजङ्घनत्। प्रत्नव द्रोचय न्रुचः।।

9.50 उत्ते शुष्मास इति पञ्चर्चस्य सूक्तस्याऽऽङ्गिरस उचथ्यः- पवमान-स्सोमो- गायत्री।।

❀07.01.07 卐उत्ते शुष्मास^ ईरते- सिन्धो रूर्मेरिव स्वनः। वाणस्य चोदया पविम्।।

卐 प्रसवे त उदीरते- तिस्रो वाचो मखस्युवः। यदऽव्य एषि सानवि।।

卐 अव्यो वारे परि प्रियं- हरिं हिन्व न्त्यऽद्रिभिः। पवमानं मधुश्चुतम्।।

卐 आ पवस्व मदिन्तम- पवित्र न्धारया कवे। अर्कस्य योनि मा्ऽऽसदम्।।

卐 स पवस्व मदिन्तम- गोभि रऽञ्जानो अक्तुभिः। इन्द~ विन्द्राय पीतये।। 7।।

9.51 अध्वर्यो इति पञ्चर्चस्य सूक्तस्याऽऽङ्गिरस उचथ्यः-पवमान-स्सोमो- गायत्री।।

❀07.01.08 卐अध्वर्यो~ अद्रिभि स्सुतं- सोमं पवित्र आ सृज। पुनीही न्द्राय पातवे।।

卐 दिवः पीयूष मुत्तमं- सोम मिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्।।

卐 तव त्य इन्दो~ अन्धसो- देवा^ मधो व्यश्नते। पवमानस्य मरुतः।।

卐 त्वं हि सोम वर्धय- न्त्सुतो मदाय भूर्णये। वृष न्त्स्तोतार मूतये।।

卐 अभ्यर्ष विचक्षण- पवित्र न्धारया सुतः। अभि वाज मुत श्रवः।।

9.52 परि द्युक्ष इति पञ्चर्चस्य सूक्तस्याऽऽङ्गिरस उचथ्यः-पवमान-स्सोमो- गायत्री।।

❀07.01.09 卐परि द्युक्ष स्सनद्रयि- भरद्वाजन्नो अन्धसा। सुवानो अर्ष पवित्र आ।।

卐 तव प्रत्नेभि रध्वभि- रऽव्यो वारे परि प्रियः। सहस्रधारो यात्तना।।

卐 चरुर्न यस्त मीङ्ख-येन्दो~ न दान मीङ्खय। वधै र्वधस्न~ वीङ्खय।।

卐 नि शुष्म.मिन्द~ वेषां- पुरुहूत जनानाम्। यो अस्माऽ आदिदेशति।।

卐 शतन्न^ इन्द~ ऊतिभि- स्सहस्रँ वा शुचीनाम्। पवस्व मंहयद्रयिः।।

9.53 उत्ते शुष्मास इति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

❀07.01.10 卐उत्ते शुष्मासो अस्थू- रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः।।

卐 अया निजघ्नि रोजसा- रथसङ्गे धने हिते। स्तवा अबिभ्युषा हृदा।।

卐 अस्य व्रतानि नाऽऽधृषे- पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति।।

卐 तं हिन्वन्ति मदच्युतं- हरिन्नदीषु वाजिनम्। इन्दु.मिन्द्राय मत्सरम्।।

9.54 अस्य प्रत्ना मिति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

07.01.11 卐अस्य प्रत्ना मनु द्युतं- शुक्र न्दुदुह्रे अह्रयः। पय स्सहस्रसा मृषिम्।।

卐 अयं सूर्यइवोपदृ-गयं सरांसि धावति। सप्त प्रवत^ आ दिवम्।।

卐 अयँ विश्वानि तिष्ठति- पुनानो भुवनोपरि। सोमो देवो न सूर्यः।।

卐 परि णो देववीतये- वाजाँ॰ अर्षसि गोमतः। पुनान^ इन्द~ विन्द्रयुः।।

9.55 यवँयव मिति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

07.01.12 卐यवँयवन्नो अन्धसा- पुष्टंपुष्टं परि स्रव। सोम विश्वा च सौभगा।।

卐 इन्दो~ यथा तव स्तवो- यथा ते जात मन्धसः। नि बर्हिषि प्रिये सदः।।

卐 उत नो गोवि दश्ववि- त्पवस्व सोमान्धसा। मक्षूतमेभि रऽहभिः।।

卐 यो जिनाति न जीयते- हन्ति शत्रु.मभीत्य। स पवस्व सहस्रजित्।।

9.56 परि सोम इति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

07.01.13 卐परि सोम^ ऋतं बृह- दाशुः॰ पवित्रे अर्षति। विघ्न न्रक्षांसि देवयुः।।

卐 यत्सोमो वाज मर्षति- शत न्धारा^ अपस्युवः। इन्द्रस्य सख्य.माविशन्न्।।

卐 अभि त्वा योषणो दश- जारन्न कन्याऽनूषत। मृज्यसे सोम सातये।।

卐 त्वमिन्द्राय विष्णवे- स्वादु रिन्दो~ परि स्रव। नॄन्त्स्तोतॄ न्पाह्यंहसः।।

9.57 प्र ते धारा इति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

07.01.14 卐प्र ते धारा^ असश्चतो- दिवो न यन्ति वृष्टयः। अच्छा वाजं सहस्रिणम्।।

卐 अभि प्रियाणि काव्या- विश्वा चक्षाणो अर्षति। हरि स्तुञ्जान^ आयुधा।।

卐 स मर्मृजान^ आयुभि- रिभो राजेव सुव्रतः। श्येनो न वंसु षीदति।।

卐 स नो विश्वा दिवो वसू-तो पृथिव्या अधि। पुनान इन्द~ वा भर।।

9.58 तरत्स मन्दीति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

❀07.01.15 卐तरत्स मन्दी धावति- धारा सुतस्याऽन्धसः। तरत्स मन्दी धावति।।

卐 उस्रा वेद वसूनां- मर्तस्य देव्यवसः। तरत्स मन्दी धावति।।

卐 ध्वस्रयोः पुरुषन्त्यो-रा सहस्राणि दद्महे। तरत्स मन्दी धावति।।

卐 आ ययो स्त्रिंशत न्तना- सहस्राणि च दद्महे। तरत्स मन्दी धावति।।

9.59 पवस्वेति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः-पवमान-स्सोमो- गायत्री।।

❀07.01.16 卐पवस्व गोजि दश्वजि- द्विश्वजि त्सोम रण्यजित्। प्रजाव द्रत्न मा भर।।

卐 पवस्वाद्भ्यो अदाभ्यः- पवस्वौषधीभ्यः। पवस्व धिषणाभ्यः।।

卐 त्वं सोम पवमानो- विश्वानि दुरिता तर। कवि स्सीद नि बर्हिषि।।

卐 पवमान स्वर्विदो- जायमानोऽभवो महान्। इन्दो~ विश्वाँ अभीदसि।।

9.60 प्र गायत्रेणेति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सरः-पवमान-स्सोमो- गायत्री- तृतीया पुरउष्णिक्।।

❀07.01.17 卐प्र गायत्रेण गायत- पवमानँ विचर्षणिम्। इन्दुं सहस्रचक्षसम्।।

卐 तन्त्वा सहस्रचक्षस- मथो~ सहस्रभर्णसम्। अति वार.मपाविषुः।।

卐 अति वारा न्पवमानो- असिष्यद-त्कलशाँ अभिधावति। इन्द्रस्य हार्द्याऽऽविशन्न्।।

卐 इन्द्रस्य सोम राधसे- शं पवस्व विचर्षणे। प्रजाव द्रेत^ आ भर।।

9.61 अया वीतीति त्रिंशदृचस्य सूक्तस्याऽऽङ्गिरसोऽमहीयुः-पवमान-स्सोमो- गायत्री।।

❀07.01.18 卐अया वीती परि स्रव- यस्त^ इन्दो~ मदेष्वा। अवाहन्नवती र्नव।।

卐 पुर स्सद्य^ इत्थाधिये- दिवोदासाय शम्बरम्। अध त्यन्तुर्वशँ यदुम्।।

卐 परिणो अश्व मश्वावि -द्गोमदिन्दो~ हिरण्यवत्। क्षरा सहस्रिणी रिषः।।

卐 पवमानस्य ते वयं- पवित्र मऽभ्युन्दतः। सखित्वमा ऽऽवृणीमहे।।

卐 ये ते पवित्र मूर्मयो-ऽभिक्षरन्ति धारया। तेभि र्न स्सोम मृळय।।

❀07.01.19 卐 स नः पुनान^ आ भर- रयिँ वीरवती मिषम्। ईशान स्सोम विश्वतः।।

卐 एतमु त्यन्दश क्षिपो- मृजन्ति सिन्धुमातरम्। समाऽऽदित्येभि रख्यत।।

卐 समिन्द्रेणोत वायुना- सुत^ एति पवित्र आ। सं सूर्यस्य रश्मिभिः।।

Sri Ganapati Sachchidananda Avadhoota Peetham Mysore

卐 स नो भगाय वायवे- पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च।।
卐 उच्चा ते जात मऽन्धसो- दिवि षद्भूम्या ददे। उग्रं शर्म महि श्रवः।।
❀07.01.20 卐एना विश्वा न्यर्य^ आ- द्युम्नानि मानुषाणाम्। ¤सिषासन्तो वनामहे।।
卐 स न^ इन्द्राय यज्यवे- वरुणाय मरुद्भ्यः। वरिवोवि त्परि स्रव।।
卐 उपो~ षु जात मप्तुर-ङ्गोभि र्भङ्गं परिष्कृतम्। इन्दु न्देवा^ अयासिषुः।।
卐 तमि द्वर्धन्तु नो गिरो- वत्सं संशिश्वरीरिव। य^ इन्द्रस्य हृदंसनिः।।
卐 अर्षाण स्सोम शङ्गवे- धुक्षस्व पिप्युषी मिषम्। वर्धा समुद्र मुक्थ्यम्।।
❀07.01.21 卐पवमानो अजीजन- द्दिव श्चित्रन्न तन्यतुम्। ज्योति र्वैश्वानरं बृहत्।।
卐 पवमानस्य ते रसो- मदो राजन्नदुच्छुनः। वि वार.मव्य मर्षति।।
卐 पवमान रस स्तव- दक्षो वि राजति द्युमान्। ज्योति र्विश्वं स्वर्दृशे।।
卐 यस्ते मदो वरेण्य- स्तेना पवस्वान्धसा। देवावी रघशंसहा।।
卐 जघ्नि र्वृत्र ममित्रियं- सस्नि र्वाज न्दिवेदिवे। गोषा^ उ अश्वसा^ असि।।
❀07.01.22 卐संमिश्लो अरुषो भव- सूपस्थाभि र्न धेनुभिः। सीदञ्छ्येनो न योनिमा।।
卐 स पवस्व य^ आविथे-न्द्रँ वृत्राय हन्तवे। वव्रिवांसं मही रपः।।
卐 सुवीरासो वय न्धना- जयेम सोम मीढ्वः। पुनानो वर्ध नो गिरः।।
卐 त्वोतास स्तवावसा- स्याम वन्वन्त^ आमुरः। सोम व्रतेषु जागृहि।।
卐 अपघ्न न्पवते मृधो-ऽप सोमो अराव्णः। गच्छन्नि न्द्रस्य निष्कृतम्।।
❀07.01.23 卐महो नो राय^ आ भर- पवमान जही मृधः। रास्वेन्दो~ वीरव द्यशः।।
卐 न त्वा शतञ्चन ह्रुतो- राधो दित्सन्त मा मिनन्न्। यत्पुनानो मखस्यसे।।
卐 पवस्वेन्दो~ वृषा सुतः- कृधी नो यशसो जने। विश्वा^ अप द्विषो जहि।।
卐 अस्य ते सख्ये वय- न्तवेन्दो~ द्युम्न उत्तमे। सासह्याम पृतन्यतः।।
卐 याते भीमा न्यायुधा- तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः।।
9.62 एते असृग्रमिति त्रिंशदृचस्य सूक्तस्य, भार्गवो जमदग्निः-पवमान-स्सोमो- गायत्री।।
❀07.01.24 卐एते असृग्र मिन्दव- स्तिरः पवित्र माशवः। विश्वा न्यऽभि सौभगा।।

卐 विघ्नन्तो दुरिता पुरु- सुगा तोकाय वाजिनः। तना कृण्वन्तो अर्वते।।

卐 कृण्वन्तो वरिवो गवे-ऽभ्यर्षन्ति सुष्टुतिम्। इळा.मस्मभ्यं सँयतम्।।

卐 असाव्यंशु र्मदाया-ऽप्सु दक्षो गिरिष्ठाः। श्येनो न योनि माऽसदत्।।

卐 शुभ्र मन्धो देववात- मऽप्सु धूतो नृभि स्सुतः। स्वदन्ति गावः पयोभिः।।

❀07.01.25 卐आदीं मश्वन्न हेतारो-ऽशूशुभन्नमृताय। मध्वो रसं सधमादे।।

卐 यास्ते धारा मधुश्चुतो-ऽसृग्र मिन्द~ ऊतये। ताभिः पवित्र माऽसदः।।

卐 सो अर्षेन्द्राय पीतये- तिरो रोमाण्यव्यया। सीद न्योना वनेष्वा।।

卐 त्वमिन्दो~ परि स्रव- स्वादिष्ठो अङ्गिरोभ्यः। वरिवोविद्घृतं पयः।।

卐 अयँ विचर्षणि र्हितः- पवमान स्स चेतति। हिन्वान^ आप्यं बृहत्।।

❀07.01.26 卐एष वृषा वृषव्रतः- पवमानो अशस्तिहा। कर द्वसूनि दाशुषे।।

卐 आ पवस्व सहस्रिणं- रयिं.ङ्गोमन्त मश्विनम्। पुरुश्चन्द्रं पुरुस्पृहम्।।

卐 एष स्य^ परि षिच्यते- मर्मृज्यमान आयुभिः। उरुगायः कविक्रतुः।।

卐 सहस्रोति श्शतामघो- विमानो रजसः कविः। इन्द्राय पवते मदः।।

卐 गिरा जात^ इह स्तुत^- इन्दु रिन्द्राय धीयते। विर्योना वसताविव।।

❀07.01.27 卐पवमान स्सुतो नृभि- स्सोमो वाजं.मिवासरत्। चमूषु शक्मनाऽऽसदम्।।

卐 तन्त्रिपृष्ठे त्रिवन्धुरे- रथे युञ्जन्ति यातवे। ऋषीणां सप्त धीतिभिः।।

卐 तं सोतारो धनस्पृत- माशुँ वाजाय यातवे। हरिं हिनोत वाजिनम्।।

卐 आविश न्कलशं सुतो- विश्वा^ अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति।।

卐 आ त इन्दो~ मदाय कं- पयो दुह न्त्यायवः। देवा देवेभ्यो मधु।।

❀07.01.28 卐आ न स्सोमं पवित्र आ- सृजता मधुमत्तमम्। देवेभ्यो देवश्रुत्तमम्।।

卐 एते सोमा^ असृक्षत- गृणाना श्श्रवसे महे। मदिन्तमस्य धारया।।

卐 अभि गव्यानि वीतये- नृम्णा पुनानो अर्षसि। सनद्वाजः परि स्रव।।

卐 उत नो गोमती रिषो- विश्वा^ अर्ष परिष्टुभः। गृणानो जमदग्निना।।

卐 पवस्व वाचो अग्रिय- स्सोम चित्राभि रूतिभिः। अभि विश्वानि काव्या।।

❀07.01.29 卐त्वं समुद्रिया^ अपो-ऽग्रियो वाच ईरयन्न्। पवस्व विश्वमेजय।।

卐 तुभ्येमा भुवना कवे- महिम्ने सोम तस्थिरे। तुभ्यं मर्षन्ति सिन्धवः।।

卐 प्र ते दिवो न वृष्टयो- धारा^ यन्त्य सश्चतः। अभि शुक्रा मुपस्तिरम्।।

卐 इन्द्रायेन्दुं पुनीत- नोग्र न्दक्षाय साधनम्। ईशानँ वीतिराधसम्।।

卐 पवमान^ ऋतः कवि- स्सोमः पवित्र माऽसदत्। दध त्स्तोत्रे सुवीर्यम्।।

9.63 आ पवस्वेति त्रिंशदृचस्य सूक्तस्य, कास्यपो निध्रुविः-पवमान-स्सोमो- गायत्री।।

❀07.01.30 卐आ पवस्व सहस्रिणं- रयिं सोम सुवीर्यम्। अस्मे श्रवांसि धारय।।

卐 इषमूर्जञ्च पिन्वस- इन्द्राय मत्सरिन्तमः। चमूष्वा नि षीदसि।।

卐 सुत^ इन्द्राय विष्णवे- सोमः कलशे अक्षरत्। मधुमाः अस्तु वायवे।।

卐 एते असृग्र माशवो-ऽति ह्वरांसि बभ्रवः। सोमा^ ऋतस्य धारया।।

卐 इन्द्रँ वर्धन्तो अप्तुरः- कृण्वन्तो विश्व मार्यम्। अपघ्नन्तो अराव्णः।।

❀07.01.31 卐सुता^ अनु स्वमा रजो-ऽभ्यर्षन्ति बभ्रवः। इन्द्र.ङ्गच्छन्त^ इन्दवः।।

卐 अया पवस्व धारया- यया सूर्य मरोचयः। हिन्वानो मानुषी रपः।।

卐 अयुक्त सूर^ एतशं- पवमानो मनावधि। अन्तरिक्षेण यातवे।।

卐 उत त्या हरितो दश- सूरो अयुक्त यातवे। इन्दु रिन्द्र^ इति ब्रुवन्न्।।

卐 परीतो वायवे सुत-ङ्गिर^ इन्द्राय मत्सरम्। अव्यो वारेषु सिञ्चत।।

❀07.01.32 卐पवमान विदा^ रयि- मऽस्मभ्यं सोम दुष्टरम्। यो दूणाशो वनुष्यता।।

卐 अभ्यर्ष सहस्रिणं- रयिङ्गोमन्त मश्विनम्। अभि वाज.मुत श्रवः।।

卐 सोमो देवो न सूर्यो-ऽद्रिभिः पवते सुतः। दधानः कलशे रसम्।।

卐 एते धामान्यार्या- शुक्रा^ ऋतस्य धारया। वाज.ङ्गोमन्त मक्षरन्न्।।

卐 सुता^ इन्द्राय वज्रिणे- सोमासो दध्याशिरः। पवित्र मत्यक्षरन्न्।।

❀07.01.33 卐प्र सोम मधुमत्तमो- राये अर्ष पवित्र आ। मदो यो देववीतमः।।

卐 त मी मृज न्त्यायवो- हरिन्नदीषु वाजिनम्। इन्दु.मिन्द्राय मत्सरम्।।

卐 आ पवस्व हिरण्यव- दऽश्वाव त्सोम वीरवत्। वाज.ङ्गोमन्त मा भर।।

卐 परि वाजे न वाजयु- मऽव्यो वारेषु सिञ्चत। इन्द्राय मधुमत्तमम्।।

卐 कविं मृजन्ति मर्ज्य.- न्धीभि र्विप्रा^ अवस्यवः। वृषा कनिक्र दर्षति।।

❀07.01.34 卐वृषण न्धीभि रप्तुरं- सोमं मृतस्य धारया। मती विप्रा स्समऽस्वरन्न्।।

卐 पवस्व देवाऽऽयुष -गिन्द्रङ्गच्छतु ते मदः। वायु.मा रोह धर्मणा।।

卐 पवमान नि तोशसे- रयिं सोम श्रवाय्यम्। प्रिय स्समुद्रमा विश।।

卐 अपघ्न न्पवसे मृधः- क्रतुवि त्सोम मत्सरः। नुदस्वाऽदेवयुञ्जनम्।।

卐 पवमाना^ असृक्षत- सोमा श्शुक्रास इन्दवः। अभि विश्वानि काव्या।।

❀07.01.35 卐पवमानास^ आशव- श्शुभ्रा^ असृग्र मिन्दवः। घ्नन्तो विश्वा^ अप द्विषः।।

卐 पवमाना दिवस्पर्य-ऽन्तरिक्षा दसृक्षत। पृथिव्या^ अधि सानवि।।

卐 पुनान स्सोम धारये-न्दो~ विश्वा अप स्रिधः। जहि रक्षांसि सुक्रतो~।।

卐 अपघ्न न्त्सोम रक्षसो-ऽभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्म मुत्तमम्।।

卐 अस्मे वसूनि धारय- सोम दिव्यानि पार्थिवा। इन्दो~ विश्वानि वार्या।।

9.64 वृषा सोमेति त्रिंशदृचस्य सूक्तस्य, मारीचः कश्यपः-पवमान-स्सोमो- गायत्री।।

❀07.01.36 卐वृषा सोम द्युमा॰ असि- वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे।।

卐 वृष्णस्ते वृष्ण्यं शवो- वृषा वनँ वृषा मदः। सत्यँ वृष न्वृषेदसि।।

卐 अश्वो न चक्रदो वृषा- सङ्गा इन्दो~ समर्वतः। वि नो राये दुरो वृधि।।

卐 असृक्षत प्र वाजिनो- गव्या सोमासो अश्वया। शुक्रासो वीरयाऽऽशवः।।

卐 शुम्भमाना^ ऋतायुभि- र्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये।।

❀07.01.37 卐ते विश्वा दाशुषे वसु- सोमा दिव्यानि पार्थिवा। पवन्ता माऽन्तरिक्ष्या।।

卐 पवमानस्य विश्ववि- त्प्र ते सर्गा^ असृक्षत। सूर्यस्येव न रश्मयः।।

卐 केतुङ्कृण्व न्दिवस्परि- विश्वा रूपाऽभ्यर्षसि। समुद्र स्सोम पिन्वसे।।

卐 हिन्वानो वाच मिष्यसि- पवमान विधर्मणि। अक्रा न्देवो न सूर्यः।।

卐 इन्दुः पविष्ट चेतनः- प्रियः कवीनां मती। सृज दश्वं रथीरिव।।

❀07.01.38 卐ऊर्मि र्यस्ते पवित्र आ- देवावीः पर्यक्षरत्। सीदन्नृतस्य योनि.मा।।

卐 स नो अर्ष पवित्र आ- मदो यो देववीतमः। इन्द~ विन्द्राय पीतये।।

卐 इषे पवस्व धारया- मृज्यमानो मनीषिभिः। इन्दो~ रुचाभि गा^ इहि।।

卐 पुनानो वरिव स्कृ -ध्यूर्जञ्जनाय गिर्वणः। हरे सृजान^ आशिरम्।।

卐 पुनानो देववीतय -इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभि र्यतः।।

❀07.01.39 卐प्र हिन्वानास^ इन्दवो-ऽच्छा समुद्र माशवः। धिया जूता^ असृक्षत।।

卐 मर्मृजानास^ आयवो- वृथा समुद्र मिन्दवः। अग्मन्नृतस्य योनिमा।।

卐 परि णो याह्यऽस्मयु- र्विश्वा वसू न्योजसा। पाहि न श्शर्म वीरवत्।।

卐 मिमाति वह्नि रेतश४- पदँ युजान^ ऋक्वभिः। प्र यत्समुद्र आहितः।।

卐 आ यद्योनिं हिरण्यय- माशुर् ऋतस्य सीदति। जहा त्यप्रचेतसः।।

❀07.01.40 卐अभि वेना^ अनूषते-यक्षन्ति प्रचेतसः। मज्ज न्त्यविचेतसः।।

卐 इन्द्रायेन्दो~ मरुत्वते- पवस्व मधुमत्तमः। ऋतस्य योनि.मासदम्।।

卐 तन्त्वा विप्रा^ वचोविद४- परि ष्कृण्वन्ति वेधसः। सन्त्वा मृजन्त्यायवः।।

卐 रसन्ते मित्रो अर्यमा- पिबन्ति वरुण४ कवे। पवमानस्य मरुतः।।

卐 त्वं सोम विपश्चितं- पुनानो वाच मिष्यसि। इन्दो~ सहस्रभर्णसम्।।

❀07.01.41 卐उतो~ सहस्रभर्णसँ- वाचं सोम मखस्युवम्। पुनान^ इन्द~वा भर।।

卐 पुनान^ इन्द~ वेषां- पुरुहूत जनानाम्। प्रिय स्समुद्रमा विश।।

卐 दविद्युतत्या रुचा- परिष्टोभन्त्या कृपा। सोमा श्शुक्रा^ गवाशिरः।।

卐 हिन्वानो हेतृभि र्यत^- आ वाजँ वाज्यक्रमीत्। सीदन्तो वनुषो यथा।।

卐 ऋधक्सोम स्वस्तये- सञ्जग्मानो दिव४ कविः। पवस्व सूर्यो दृशे।।

इति प्रथमाध्याय स्समाप्तः।।

## ॐ ॐसप्तमाष्टके द्वितीयाध्यायः (वर्गाः 30)

☸ 9.65 हिन्वन्तीति त्रिंशदृचस्य सूक्तस्य, वारुणिर्भृगुः-पवमान-स्सोमो- गायत्री- (अत्र भार्गवो जमदग्निः पाक्षिकः)।।

❀07.02.01 卐हिन्वन्ति सूर मुस्रय- स्स्वसारो जामयस्पतिम्। महा मिन्दुं महीयुवः।

卐 पवमान रुचारुचा- देवो देवेभ्य स्परि। विश्वा वसून्या ऽऽविश।।
卐 आ पवमान सुष्टुतिँ- वृष्टि न्देवेभ्यो दुवः। इषे पवस्व सँयतम्।।
卐 वृषा ह्यसि भानुना- द्युमन्तन्त्वा हवामहे। पवमान स्स्वाध्यः।।
卐 आ पवस्व सुवीर्यं- मन्दमान स्वायुध। इहो~ ष्विन्द~वा गहि।।
❀07.02.02 卐यदद्भिः परिषिच्यसे- मृज्यमानो गभस्त्योः। द्रुणा सधस्थ मश्नुषे।।
卐 प्र सोमाय व्यश्ववत्- त्पवमानाय गायत। महे सहस्रचक्षसे।।
卐 यस्य वर्णं मधुश्चुतं- हरिं हिन्व न्त्यद्रिभिः। इन्दु.मिन्द्राय पीतये।।
卐 तस्य ते वाजिनो वयँ- विश्वा धनानि जिग्युषः। सखित्वमा वृणीमहे।।
卐 वृषा पवस्व धारया- मरुत्वते च मत्सरः। विश्वा दधान ओजसा।।
❀07.02.03 卐तन्त्वा धर्तार मोण्यो3(ओ)ः- पवमान स्वर्दृशम्। हिन्वे वाजेषु वाजिनम्।।
卐 अया चित्तो विपाऽनया- हरिः पवस्व धारया। युजँ वाजेषु चोदय।।
卐 आ न इन्दो~ मही मिषं- पवस्व विश्वदर्शतः। अस्मभ्यं सोम गातुवित्।।
卐 आ कलशा^ अनूषते-न्दो~ धाराभि रोजसा। एन्द्रस्य पीतये विश।।
卐 यस्य ते मद्यं रस-न्तीव्र न्दुह न्त्यद्रिभिः। स पवस्वाऽभिमातिहा।।
❀07.02.04 卐राजा मेधाभि रीयते- पवमानो मनावधि। अन्तरिक्षेण यातवे।।
卐 आ न इन्दो~ शतग्विन-ङ्गवां पोषं स्वश्व्यम्। वहा भगत्ति मूतये।।
卐 आ न स्सोम सहो जुवो- रूपन्न वर्चसे भर। सुष्वाणो देववीतये।।
卐 अर्षा सोम द्युमत्तमो-ऽभि द्रोणानि रोरुवत्। सीदञ्छ्येनो न योनिमा।।
卐 अप्सा^ इन्द्राय वायवे- वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे।।
❀07.02.05 卐इष न्तोकाय नो दध- दस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्।।
卐 ये सोमासः परावति- ये अर्वावति सुन्विरे। ये वाऽद श्शर्यणावति।।
卐 य आर्जीकेषु कृत्वसु- ये मध्ये पस्त्यानाम्। ये वा जनेषु पञ्चसु।।
卐 ते नो वृष्टि न्दिव स्परि- पवन्तामा सुवीर्यम्। सुवाना^ देवास^ इन्दवः।।
卐 पवते हर्यतो हरि- र्गृणानो जमदग्निना। हिन्वानो गोरऽधि त्वचि।।

❀07.02.06 卐प्र शुक्रासो वयोजुवो- हिन्वानासो न सप्तयः। श्रीणाना^ अप्सु मृञ्जत।।
卐 तन्त्वा सुतेष्वाभुवो- हिन्विरे देवतातये। स पवस्वाऽनया रुचा।।
卐 आ ते दक्षं मयोभुवँ- वह्नि मद्या वृणीमहे। पान्त.मा पुरुस्पृहम्।।
卐 आ मन्द्रमा वरेण्य- मा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम्।।
卐 आ रयि मा सुचेतुन- मा सुक्रतो~ तनूष्वा। पान्तमा पुरुस्पृहम्।।
9.66 पवस्वेति त्रिंशदृचस्य सूक्तस्य, शतं वैखानसाः-पवमान-स्सोमो-एकोनविंश्यादि तिसृणामग्निः-पवमानो गायत्र्यष्टादश्यनुष्टुप्- (शतं वैखानसा एते स्वायम्भुवाः- अत एषाङ्गोत्रं नास्ति-एवमग्रेऽपि नारायणादयऊह्याः)।।
❀07.02.07 卐पवस्व विश्वचर्षणे-ऽभि विश्वानि काव्या। सखा सखिभ्य^ ईड्यः।।
卐 ताभ्याँ विश्वस्य राजसि- ये~ पवमान धामनी~। प्रतीची~ सोम तस्थतुः।।
卐 परि धामानि यानि ते- त्वं सोमाऽसि विश्वतः। पवमान ऋतुभिः कवे।।
卐 पवस्व जनयन्निषो-ऽभि विश्वानि वार्या। सखा सखिभ्य^ ऊतये।।
卐 तव शुक्रासो अर्चयो- दिवस्पृष्ठे वि तन्वते। पवित्रं सोम धामभिः।।
❀07.02.08 卐तवेमे सप्त सिन्धवः- प्रशिषं सोम सिस्रते। तुभ्य न्धावन्ति धेनवः।।
卐 प्र सोम याहि धारया- सुत^ इन्द्राय मत्सरः। दधानो अक्षिति श्रवः।।
卐 समु त्वा धीभि रस्वर- न्हिन्वती स्सप्त जामयः। विप्र माजा विवस्वतः।।
卐 मृजन्ति त्वा समग्रुवो-ऽव्ये जीरा वधि ष्वणि। रेभो यदज्यसे वने।।
卐 पवमानस्य ते कवे- वाजि न्त्सर्गा^ असृक्षत। अर्वन्तो न श्रवस्यवः।।
❀07.02.09 卐अच्छा कोशं मधुश्चुत- मसृग्रँ वारे अव्यये। अवावशन्त धीतयः।।
卐 अच्छा समुद्र मिन्दवो-ऽस्तङ्गावो न धेनवः। अग्म.न्नृतस्य योनिमा।।
卐 प्र ण इन्दो~ महे रण-आपो अर्षन्ति सिन्धवः। यद्गोभि र्वासयिष्यसे।।
卐 अस्य ते सख्ये वय- मियक्षन्त स्त्वोतयः। इन्दो~ सखित्व मुश्मसि।।
卐 आ पवस्व गविष्टये- महे सोम नृचक्षसे। एन्द्रस्य जठरे विश।।
❀07.02.10 卐महा॰ असि सोम ज्येष्ठ-^ उग्राणा मिन्द ओजिष्ठः। युध्वा सञ्छश्व ज्जिगेथ।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 य^ उग्रेभ्य श्चिदोजीया-ञ्छूरेभ्य श्चिच्छूरतरः। भूरिदाभ्य श्चि.न्मंहीयान्।।

卐 त्वं सोम सूर^ एष- स्तोकस्य साता तनूनाम्। वृणीमहे सख्याय वृणीमहे युज्याय।।

卐 अग्न आयूंषि पवस -आ सुवोर्ज मिषञ्च नः। आरे बाधस्व दुच्छुनाम्।।

卐 अग्निर् ऋषिः पवमानः- पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्।।

❀07.02.11 卐अग्ने पवस्व स्वपा-^ अस्मे वर्च स्सुवीर्यम्। दध द्रयिं मयि पोषम्।।

卐 पवमानो अति स्रिधो-ऽभ्यर्षति सुष्टुतिम्। सूरो न विश्वदर्शतः।।

卐 स मर्मृजान^ आयुभिः- प्रयस्वा न्प्रयसे हितः। इन्दु रत्यो विचक्षणः।।

卐 पवमान^ ऋतं बृह- च्छुक्रञ्ज्योति रजीजनत्। कृष्णा तमांसि जङ्घनत्।।

卐 पवमानस्य जङ्घ्नतो- हरे श्चन्द्रा^ असृक्षत। जीरा^ अजिरशोचिषः।।

❀07.02.12 卐पवमानो रथीतम- श्शुभ्रेभि श्शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः।।

卐 पवमानो व्यश्नव- द्रश्मिभि र्वाजसातमः। दध त्स्तोत्रे सुवीर्यम्।।

卐 प्र सुवान^ इन्दु रक्षाः~- पवित्र मत्यव्ययम्। पुनान^ इन्दु रिन्द्र.मा।।

卐 एष सोमो अधि त्वचि- गवाङ्क्रीळ त्यद्रिभिः। इन्द्रं मदाय जोहुवत्।।

卐 यस्य ते द्युम्नव त्पयः- पवमाना ऽऽभृत न्दिवः। तेन नो मृळ जीवसे।।

☫ 9.67 त्वं सोमासीति द्वात्रिंशदृचस्य सूक्तस्याऽऽद्यानां सप्तानां तृचानां भरद्वाज कश्यप गोतमात्रि विश्वामित्र जमदग्नि वसिष्ठा ऋषयः-शिष्टानामाङ्गिरसः पवित्र ऋषिः (अत्र वसिष्ठो वा पवित्र वसिष्ठौ वेति विपक्षौ) पवमान-स्सोमो देवता-दशम्यादि तिसृणां पूषा वा यत्ते पवित्र मित्यादि पञ्चानामग्निः-अन्त्ययोर्द्वयोः पावमान्यधेता गायत्री-षोडश्याद्या स्तिस्रो द्विपदागायत्र्यः-त्रिंशी पुरउष्णिक्-सप्तविंश्येकत्रिंशी द्वात्रिंश्योऽनुष्टुभः (पञ्चविंश्यादि तिसृणां क्रमात्सविताऽग्निसवितारौ विश्वेदेवा इति देवता अग्निना सह विकल्पन्ते)।।

卐 ☫चतुर्थेनुवाकेऽष्टादशसूक्तानि

❀07.02.13 卐☞त्वं सोमाऽसि धारयु- र्मन्द्र^ ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः।।

卐 त्वं सुतो नृमादनो- दधन्वा न्मत्सरिन्तमः। इन्द्राय सूरि रन्धसा।।

卐 त्वं सुष्वाणो अद्रिभि- रभ्यऽर्ष कनिक्रदत्। द्युमन्तं शुष्म मुत्तमम्।।

卐 इन्दु र्हिन्वानो अर्षति- तिरो वारा ण्यव्यया। हरि र्वाज मचिक्रदत्।।

卐 इन्दो~ व्यव्यमर्षसि- वि श्रवांसि वि सौभगा। वि वाजा न्त्सोम गोमतः।।

❀07.02.14 卐आ न इन्दो~ शतग्विनं- रयिङ्गोमन्त मश्विनम्। भरा सोम सहस्रिणम्।।

卐 पवमानास^ इन्दव- स्तिरः पवित्र माशवः। इन्द्रँ यामेभि राशत।।

卐 ककुह स्सोम्यो रस-^ इन्दु रिन्द्राय पूर्व्यः। आयुः पवत आयवे।।

卐 हिन्वन्ति सूर मुस्रयः- पवमानं मधुश्चुतम्। अभि गिरा समऽस्वरन्न्।।

卐 अविता नो अजाश्वः- पूषा यामनियामनि। आ भक्ष त्कन्यासु नः।।

❀07.02.15 卐अयं सोमः कपर्दिने- घृतन्न पवते मधु। आ भक्ष त्कन्यासु नः।।

卐 अयन्त आघृणे सुतो- घृतन्न पवते शुचि। आ भक्ष त्कन्यासु नः।।

卐 वाचो जन्तुः कवीनां- पवस्व सोम धारया। देवेषु रत्नधा^ असि।।

卐 आ कलशेषु धावति- श्येनो वर्म वि गाहते। अभि द्रोणा कनिक्रदत्।।

卐 परि प्र सोम ते रसो-ऽसर्जि कलशे सुतः। श्येनो न तक्तो अर्षति।।

❀07.02.16 卐पवस्व सोम मन्दय- न्निन्द्राय मधुमत्तमः।।

卐 असृग्र न्देववीतये- वाजयन्तो रथाइव।।

卐 ते सुतासो मदिन्तमा- श्शुक्रा^ वायु मऽसृक्षत।।

卐 ग्राव्णा तुन्नो अभिष्टुतः- पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यम्।।

卐 एष तुन्नो अभिष्टुतः- पवित्र मति गाहते। रक्षोहा वार मऽव्ययम्।।

❀07.02.17 卐यदन्ति यच्च दूरके- भयँ विन्दति मामिह। पवमान वि तज्जहि।।

卐 पवमान स्सो अद्य नः- पवित्रेण विचर्षणिः। यः पोता स पुनातु नः।।

卐 यत्ते पवित्र मर्चिष्य-ऽग्ने वितत मन्तरा। ब्रह्म तेन पुनीहि नः।।

卐 यत्ते पवित्र मर्चिवद -ऽग्ने तेन पुनीहि नः। ब्रह्मसवैः पुनीहि नः।।

卐 उभाभ्या न्देव सवितः- पवित्रेण सवेन च। मां पुनीहि विश्वतः।।

❀07.02.18 卐त्रिभिष्ट्व न्देवसवित- र्वर्षिष्ठै स्सोम धामभिः। अग्ने दक्षैः पुनीहि नः।।

卐 पुनन्तु मा न्देवजनाः- पुनन्तु वसवो धिया। विश्वे देवाः पुनीत मा -जातवेदः पुनीहि मा।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 प्र प्यायस्व प्र स्यन्दस्व- सोम विश्वेभि रंशुभिः। देवेभ्य^ उत्तमं हविः।।

卐 उप प्रियं पनिप्नतँ- युवान माहुतीवृधम्। अगन्म बिभ्रतो नमः।।

卐 अलाय्यस्य परशु र्ननाश- तमा पवस्व देव सोम। आखुञ्चिद्देव देव सोम।।

卐 यः पावमानी रध्ये-त्यृषिभि स्सम्भृतं रसम्। सर्वं स पूत मश्नाति- स्वदितं मातरिश्वना।।

卐 पावमानीर्यो अध्ये -त्यृषिभि स्सम्भृतं रसम्। तस्मै सरस्वती दुहे- क्षीरं सर्पि र्मधूदकम्।

✡।। अथ परिशिष्टम्।।

卐 पावमानी स्स्वस्त्ययनी- स्सुदुघा हि घृतश्चुतः। ऋषिभि स्संभृतो रसो- ब्राह्मणेष्वमृतं हितम्।।

卐 पावमानी र्दिशन्तु न- इमँ लोक मथो अमुम्। कामा न्त्समर्धयन्तु नो- देवी र्देवै स्समाहिताः।।

卐 येन देवाः पवित्रेणा-ऽऽत्मानं पुनते सदा। तेन सहस्रधारेण- पावमान्यः पुनन्तु माम्।।

卐 प्राजापत्यं पवित्रं- शतोद्यामं हिरण्मयम्। तेन ब्रह्मविदो वयं- पूतं ब्रह्म पुनीमहे।।

卐 इन्द्र स्सुनीती सह मा पुनातु- सोम स्स्वस्त्या वरुण स्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा-
जातवेदा मूर्जयन्त्या पुनातु।।

卐 ऋषयस्तु तपस्तेपु- स्सर्वे स्वर्गजिगीषवः। तपसस्तपसोऽग्रियन्तु -पावमानीर् ऋचोऽब्रुवन्।।

卐 यन्मे गर्भे वसतः पाप मुग्रँ- यज्जायमानस्य च किञ्चिदन्यत्। जातस्य च यच्चापि च वर्धतो मे-
तत्पावमानीभि रहं पुनामि।।

卐 मातापित्रो र्यन्नकृतँ वचो मे- यत्स्थावरञ्जङ्गम माबभूव। विश्वस्य तत्प्रहृषितँ वचो मे- तत्पावमानीभि
रहं पुनामि।।

卐 गोघ्ना त्तस्करत्वा- त्स्त्रीवधा द्यच्च किल्बिषम्। पापकञ्च चरणेभ्य स्त-त्पावमानीभि रहं पुनामि।।

卐 ब्रह्मवधा त्सुरापाना त्स्वर्णस्तेया- द्वृषलि गमन मैथुन सङ्गमात्। गुरोर्दाराधिगमनाच्च-
तत्पावमानीभि रहं पुनामि।।

卐 बालघ्ना न्मातृपितृवधा द्भूमितस्करा- त्सर्ववर्ण गमनमैथुन सङ्गमात्। पापेभ्यश्च प्रतिग्रहा- त्सद्यः
प्रहरति सर्वदुष्कृत- न्तत्पावमानीभि रहं पुनामि।।

卐 क्रयविक्रया द्योनिदोषा- द्भक्षा द्भोज्या त्प्रतिग्रहात्। असंभोजनाच्चापि नृशंस- न्तत्पावमानीभि रहं
पुनामि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 दुरिष्ट न्दुरधीतं- पापँ यच्चाज्ञानतोऽकृतम्। अयाजिताश्चासँयाज्या -स्तत्पावमानीभि रहं पुनामि।।

卐 अमन्त्रमन्नँ यत्किञ्चि-द्धूयते च हुताशने। सँवत्सरकृतं पाप -न्तत्पावमानीभि रहं पुनामि।।

卐 ऋतस्य योनयोऽमृतस्य धाम- विश्वा देवेभ्यः पुण्यगन्धाः। ता न आपः प्र वहन्तु पापं- शुद्धा गच्छामि सुकृतामु लोक- न्तत्पावमानीभि रहं पुनामि।।

卐 पावमानी स्स्वस्त्ययनी- र्याभि र्गच्छति नान्दनम्। पुण्यांश्च भक्षा न्भक्षय –त्यऽमृतत्वञ्च गच्छति।।

卐 पावमानीः पितृन्देवा- न्ध्याये द्यश्च सरस्वतीम्। पितृंस्तस्योप वर्तेत- क्षीरं सर्पि र्मधूदकम्।।

卐 पावमानं परं ब्रह्म- शुक्रञ्ज्योति स्सनातनम्। ऋषींस्तस्योप तिष्ठेत- क्षीरं सर्पि र्मधूदकम्।।

卐 पावमानं परं ब्रह्म- ये पठन्ति मनीषिणः। सप्तजन्म भवे द्विप्रो- धनाढ्यो वेदपारगः।।

卐 दशोत्तराण्यृचांश्चैव- पावमानी श्शतानि षट्। एतज्जुहुन्जपे न्मन्त्र-ङ्घोरमृत्यु भयं हरेत्।।

卐 एत त्पुण्यं पापहरं- रोग मृत्यु भयापहम्। पठतां शृण्वताञ्चैव- ददाति परमाङ्गतिम्।।।। इति परिशिष्टम्।। मण्डलादितः इतः पर्यन्तं पवमान मन्त्राः।। इतःपरं, आ मण्डल परिसमाप्तेः पूयमान मन्त्राः।।

9.70 प्र देवमिति दशर्चस्य सूक्तस्य, भालन्दनोवत्सप्रिः-पवमान-स्सोमो-जगत्यन्त्या त्रिष्टुप्।।

❀07.02.19 卐प्र देव मच्छा मधुमन्त^ इन्दवो-ऽसिष्यदन्त गाव^ आ न धेनवः। बर्हिषदो वचनावन्त^ ऊधभिः- परिस्रुत मुस्रिया निर्णिज न्धिरे।।

卐 स रोरुव दभि पूर्वा^ अचिक्रद- दुपाऽऽरुह श्श्रथय न्त्स्वादते हरिः। तिरः पवित्रं परिय न्नुरु ज्रयो- नि शर्याणि दधते देव आ वरम्।।

卐 वि यो ममे यम्या सँयती मद- स्साकँवृधा पयसा पिन्वदक्षिता। मही~ अपारे~ रजसी~ विवेविद – दभिऽव्रजन्नक्षितं पाज^ आ ददे।।

卐 स मातरा विचर न्वाजयन्नपः- प्र मेधिर स्स्वधया पिन्वते पदम्। अंशुर्यवेन पिपिशे यतो नृभि- स्सञ्जामिभि र्नसते रक्षते शिरः।।

卐 सन्दक्षेण मनसा जायते कविर् -ऋतस्य गर्भो निहितो यमा परः। यूना ह सन्ता प्रथमँ वि जज्ञतु- र्गुहा हितञ्जनिम नेम मुद्यतम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

❀07.02.20 卐मन्द्रस्य रूपं विविदु र्मनीषिण- श्श्येनो यदन्धो अभर त्परावतः। तं मर्जयन्त सुवृधन्नदीष्वाँ॰- उशन्त मंशुं परियन्त मृग्मियम्।।

卐 त्वां मृजन्ति दश योषण स्सुतं- सोम ऋषिभि र्मतिभि र्धीतिभि र्हितम्। अव्यो वारेभि रुत देवहूतिभि- र्नृभि र्यतो वाजमा दर्षि सातये।।

卐 परिप्रयन्तँ वय्यं सुषंसदं- सोमं मनीषा^ अभ्य्ऽनूषत स्तुभः। यो धारया मधुमा॰ ऊर्मिणा दिव-^ इयर्ति वाचं रयिषाळमर्त्यः।।

卐 अय न्दिव^ इयर्ति विश्वमा रज- स्सोमः॰ पुनानः॰ कलशेषु सीदति। अद्भि र्गोभि र्मृज्यते अद्रिभि स्सुतः॰- पुनान^ इन्दु र्वरिवो विद त्प्रियम्।।

卐 एवा न स्सोम परिषिच्यमानो- वयो दध च्चित्रतमं पवस्व। अद्वेषे ~द्यावापृथिवी~ हुवेम -देवा^ धत्त रयि मस्मेसुवीरम्।।

⛬ 9.71 इषुर्नेति दशर्चस्य सूक्तस्याऽऽङ्गिरसो हिरण्यस्तूपः-पवमान-स्सोमो-जग-त्यन्त्ये द्वे त्रिष्टुभौ।।

❀07.02.21 卐इषुर्न धन्व न्प्रति धीयते मति- र्वत्सो न मातु रुप सर्ज्यूधनि। उरुधारेव दुहे अग्र आय- त्यऽस्य व्रतेष्वपि सोम^ इष्यते।।

卐 उपो~ मतिः॰ पृच्यते सिच्यते मधु- मन्द्राजनी चोदते अन्त रासनि। पवमान स्सन्तनिः॰ प्रघ्नतामिव- मधुमा न्द्रप्सः॰ परि वार मर्षति।।

卐 अव्ये वधूयुः॰ पवते परि त्वचि- श्रथ्नीते नप्ती रदितेर् ऋतँ यते। हरि रक्रा न्यजत स्सँयतो मदो- नृम्णा शिशानो महिषो न शोभते।।

卐 उक्षा मिमाति प्रति यन्ति धेनवो- देवस्य देवी रुप यन्ति निष्कृतम्। अत्यक्रमी दर्जुनँ वार मव्यय- मऽत्कन्न निक्तं परि सोमो अव्यत।।

卐 अमृक्तेन रुशता वाससा हरि- रऽमर्त्यो निर्णिजानः॰ परि व्यत। दिव स्पृष्ठं बर्हणा निर्णिजे कृ- तोपस्तरणञ्चम्वो र्नभस्मयम्।।

❀07.02.22 卐सूर्यस्येव रश्मयो द्रावयित्नवो- मत्सरासः॰ प्रसुप स्साक मीरते। तन्तुन्ततं परि सर्गास^ आशवो- नेन्द्रादृते पवते धाम किञ्चन।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 सिन्धोरिव प्रवणे निम्न आशवो- वृषच्युता मदासो गातु माशत। शन्नो निवेशे द्विपदे चतुष्पदे-ऽस्मे वाजा स्सोम तिष्ठन्तु कृष्टयः।।
卐 आ नः पवस्व वसुम द्धिरण्यव- द᳚श्वाव द्गोम द्यवम त्सुवीर्यम्। यूयं हि सोम पितरो मम स्थन- दिवो मूर्धानः प्रस्थिता वयस्कृतः।।
卐 एते सोमाः पवमानास इन्द्रं- रथाइव प्र ययु स्साति मच्छ। सुताः पवित्र मति यन्त्यव्यं- हित्वी वव्रिं हरितो वृष्टि मच्छ।।
卐 इन्द~ विन्द्राय बृहते पवस्व- सुमृळीको अनवद्यो रिशादाः। भरा चन्द्राणि गृणते वसूनि- देवै द्यावापृथिवी प्रावतन्नः।।
9.72 त्रिरस्मा इति दशर्चस्य सूक्तस्य, वैश्वामित्रो रेणुः-पवमान-स्सोमो-जगत्यन्या त्रिष्टुप्।।
❀07.02.23 卐त्रिरस्मै सप्त धेनवो दुदुह्रे- सत्या.माशिरं पूर्व्ये व्योमनि। चत्वार्यन्या भुवनानि निर्णिजे- चारूणि चक्रे यदृतै रवर्धत।।
卐 स भिक्षमाणो अमृतस्य चारुण- उभे~ द्यावा काव्येना वि शश्रथे। तेजिष्ठा अपो मंहना परि व्यत- यदी देवस्य श्रवसा सदो विदुः।।
卐 ते अस्य सन्तु केतवोऽमृत्यवो-ऽदाभ्यासो जनुषी~ उभे~ अनु। येभि र्नृम्णा च देव्या च पुनत- आदि द्राजानं मनना अगृभ्णत।।
卐 स मृज्यमानो दशभि स्सुकर्मभिः- प्र मध्यमासु मातृषु प्रमे सचा। व्रतानि पानो अमृतस्य चारुण- उभे~ नृचक्षा अनु पश्यते विशौ।।
卐 स मर्मृजान इन्द्रियाय धायस- ओभे~ अन्ता~ रोदसी हर्षते हितः। वृषा शुष्मेण बाधते वि दुर्मती- रादेदिशान श्शर्यहेव शुरुधः।।
❀07.02.24 卐स मातरा न ददृशान उस्रियो- नानद देति मरुतामिव स्वनः। जानन्नृतं प्रथमँ यत्स्वर्णरं- प्रशस्तये कमऽवृणीत सुक्रतुः।।
卐 रुवति भीमो वृषभ स्तविष्यया- श्रृङ्गे~ शिशानो हरिणी~ विचक्षणः। आ योनिं सोम स्सुकृत न्नि षीदति- गव्ययी त्वग्भवति निर्णि गव्ययी।।

卐 शुचि॰ पुनान स्तन्व मरेपस- मऽव्ये हरि न्र्यधाविष्ट सानवि। जुष्टो मित्राय वरुणाय वायवे- त्रिधातु मधु क्रियते सुकर्मभिः।।

卐 पवस्व सोम देववीतये वृषे-न्द्रस्य हार्दि सोमधान माविश। पुरा नो बाधा दुरिताऽति पारय- क्षेत्रविद्धि दिश^ आहा विपृच्छते।।

卐 हितो न सप्ति रभि वाज मर्षे-न्द्रस्येन्दो~ जठरमा पवस्व। नावा न सिन्धु मति पर्षि विद्वा-ञ्छूरो न युध्यन्नव नो निदस्स्पः~।।

9.73 आ दक्षिणेति नवर्चस्य सूक्तस्य, वैश्वामित्र ऋषभः-पवमान-स्सोमो-जगत्यन्त्या त्रिष्टुप्।।

❀07.02.25 卐आ दक्षिणा सृज्यते शुष्म्या3(आ)सदँ- वेति द्रुहो रक्षस॰ पाति जागृविः। हरि रोपशङ्कृणुते नभस्पय-^ उपस्तिरे चम्वो3(ओ)र्ब्रह्म निर्णिजे।।

卐 प्र कृष्टिहेव शूष^ एति रोरुव- दऽसुर्य1(अँ) वर्णन्नि रिणीते अस्य तम्। जहाति वव्रिं पितु रेति निष्कृत- मुपप्रुतङ्कृणुते निर्णिज न्तना।

卐 अद्रिभि स्सुत॰ पवते गभस्त्यो- वृषायते नभसा वेपते मती । स मोदते नसते साधते गिरा- नेनिक्ते अप्सु यजते परीमणि।।

卐 परि द्युक्षं सहस॰ पर्वतावृधं- मध्व स्सिञ्चन्ति हर्म्यस्य सक्षणिम्। आ यस्मिन्गाव स्सुहुताद^ ऊधनि- मूर्धञ्छ्रीण न्त्यग्रियँ वरीमभिः।।

卐 समी रथन्न भुरिजो रहेषत- दश स्वसारो अदिते रुपस्थ आ। जिगा दुप ज्रयति गोरपीच्यं- पदँ यदस्य मतुथा^ अजीजनन्न्।।

❀07.02.26 卐श्येनो न योनिं सदन न्धिया कृतं- हिरण्यय मासद न्देव^ एषति। ए रिणन्ति बर्हिषि प्रिय ङ्गिरा-ऽश्वो न देवा॰ अप्येति यज्ञियः।।

卐 परा व्यक्तो अरुषो दिव॰ कवि- वृषा त्रिपृष्ठो अनविष्ट गा अभि। सहस्रणीति र्यति॰ परायती- रेभो न पूर्वी रुषसो वि राजति।।

卐 त्वेषं रूपङ्कृणुते वर्णो अस्य स- यत्राऽशय त्समृता सेधति स्रिधः। अप्सा^ याति स्वधया दैव्यञ्जनं- सं सुष्टुती नसते सङ्गोअग्रया।।

卐 उक्षेव यूथा परियन्नरावी- दधि त्विषी रधित सूर्यस्य । दिव्य स्सुपर्णोऽव चक्षत क्षां- सोमः परि क्रतुना पश्यते जाः।।

☬ 9.74 हरिं मृजन्तीति नवर्चस्य सूक्तस्याऽङ्गिरसो हरिमन्तः-पवमान-स्सोमो-जगती।।

❀07.02.27 卐हरिं मृजन्त्यरुषो न युज्यते- सन्धेनुभिः कलशे सोमो अज्यते। उद्वाच मीरयति हिन्वते मती- पुरुष्टुतस्य कति चित्परिप्रियः।।

卐 साकँ वदन्ति बहवो मनीषिण-^ इन्द्रस्य सोमञ्जठरे यदादुहुः। यदी मृजन्ति सुगभस्तयो नर-स्सनीळाभि र्दशभिः काम्यं मधु।।

卐 अरममाणो अत्येति गा^ अभि- सूर्यस्य प्रिय न्दुहितु स्तिरो रवम्। अन्वस्मै जोष मभर द्विनङ्गस-स्सन्द्वयीभि स्स्वसृभिः≈क्षेति जामिभिः।।

卐 नृधूतो अद्रिषुतो बर्हिषि प्रियः- पति र्गवां प्रदिव^ इन्दुर् ऋत्वियः। पुरन्धिवा न्मनुषो यज्ञसाधन-श्शुचि र्धिया पवते सोम^ इन्द्र ते।।

卐 नृबाहुभ्या ञ्चोदितो धारया सुतो-ऽनुष्वधं पवते सोम^ इन्द्र ते। आऽप्राः क्रतू न्त्समजै रध्वरे मती-र्वेर्न द्रुषच्चम्वो3(ओ) रासदद्धरिः।।

❀07.02.28 卐अंशु न्दुहन्ति स्तनयन्त मक्षित-ङ्कविङ्कवयोऽपसो मनीषिणः। समी गावो मतयो यन्ति सँयत-^ ऋतस्य योना सदने पुनर्भुवः।।

卐 नाभा पृथिव्या धरुणो महो दिवो3(ओ)-ऽपा मूर्मौ सिन्धुष्वन्त रुक्षितः। इन्द्रस्य वज्रो वृषभो विभूवसु- स्सोमो हृदे पवते चारु मत्सरः।।

卐 स तू पवस्व परि पार्थिवं रज- स्स्तोत्रे शिक्ष न्नाधून्वते च सुक्रतो~। मा नो निर्भा ग्वसुन स्सादनस्पृशो- रयिं पिशङ्गं बहुलँ वसीमहि।।

卐 आ तू न इन्दो~ शतदात्वश्व्यं- सहस्रदातु पशुमद्धिरण्यवत्। उप मास्व बृहती रेवती रिषो-ऽधि स्तोत्रस्य पवमान नो गहि।।

☬ 9.76 स्रक्वे द्रप्सस्येति नवर्चस्य सूक्तस्याऽङ्गिरसः पवित्रः-पवमान-स्सोमो-जगती।।

❀07.02.29 卐स्रक्वे द्रप्सस्य धमत स्समस्वर- न्नृतस्य योना समरन्त नाभयः। त्रीन्त्स मूर्ध्नो असुर श्चक्र आरभे- सत्यस्य नाव स्सुकृत मपीपरन्न्।।

卐 सम्यक्सम्यञ्चो महिषा अहेषत- सिन्धो रूर्मा वधि वेना अवीविपन् । मधो र्धाराभि र्जनयन्तो अर्क- मित्प्रिया मिन्द्रस्य तन्व मवीवृधन्।।

卐 पवित्रवन्तः परि वाच मासते- पितैषां प्रत्नो अभि रक्षति व्रतम्। मह स्समुद्रं वरुण स्तिरो दधे- धीरा इच्छेकु र्धरुणेष्वारभम्।।

卐 सहस्रधारेऽव ते समस्वर- न्दिवो नाके मधुजिह्वा असश्चतः। अस्य स्पशो न नि मिषन्ति भूर्णयः- पदेपदे पाशिन स्सन्ति सेतवः।।

卐 पितु र्मातु रध्या ये समस्वर- न्नृचा शोचन्त स्सन्दहन्तो अव्रतान्। इन्द्रद्विष्टा मप धमन्ति मायया- त्वच मसिक्नीं भूमनो दिवस्परि।।

❀07.02.30 卐प्रत्नान्माना दध्या ये समस्वर-ञ्छ्लोकयन्त्रासो रभसस्य मन्तवः। अपानक्षासो बधिरा अहासत- ऋतस्य पन्थान्न तरन्ति दुष्कृतः।।

卐 सहस्रधारे वितते पवित्र आ- वाचं पुनन्ति कवयो मनीषिणः। रुद्रास एषा मिषिरासो अद्रुह- स्स्पश स्स्वञ्च स्सुदृशो नृचक्षसः।।

卐 ऋतस्य गोपा न दभाय सुक्रतु- स्त्री ष पवित्रा हृद्य1(अ)न्त रादधे। विद्वान्त्स विश्वा भुवनाऽभि पश्य- त्यऽवाजुष्टा न्विध्यति कर्ते अव्रतान्।।

卐 ऋतस्य तन्तु र्विततः पवित्र आ- जिह्वाया अग्रे वरुणस्य मायया। धीराश्चि त्तत्समिनक्षन्त आशता-ऽत्रा कर्त मव पदा त्यप्रभुः।।

9.76 शिशुर्नेति नवर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्-पवमान-स्सोमो-जग-त्यष्टमी त्रिष्टुप्।।

❀07.02.31 卐शिशुर्न जातोऽव चक्रद द्वने- स्व1(अ)र्य द्वाज्यरुष स्सिषासति। दिवो रेतसा सचते पयोवृधा- तमीमहे सुमती शर्म सप्रथः।।

卐 दिवो य स्स्कम्भो धरुण स्स्वातत- आपूर्णो अंशुः पर्येति विश्वतः। सेमे मही रोदसी यक्षदावृता- समीचीने दाधार समिषः कविः।।

卐 महि प्सर स्सुकृतं सोम्यं मधू-र्वी गव्यूति रदितेर् ऋतं यते। ईशे यो वृष्टे रित उस्रियो वृषा-ऽपान्नेता य इतऊतिर् ऋग्मियः।।

卐 आत्मन्वन्नभो दुह्यते घृतं पय- ऋतस्य नाभि रमृतँ वि जायते। समीचीना स्सुदानव॰ प्रीणन्ति-तन्नरो हित मव मेहन्ति पेरव॰।।

卐 अरावी दंशु स्सचमान ऊर्मिणा- देवाव्य1(अं) मनुषे पिन्वति त्वचम्। दधाति गर्भ मदिते रुपस्थ आ- येन तोकञ्च तनयञ्च धामहे।।

❀07.02.32 卐सहस्रधारेऽव ता असश्चत- स्तृतीये सन्तु रजसि प्रजावतीः। चतस्रो नाभो निहिता अवो दिवो- हवि भर न्त्यऽमृत.ङ्घृतश्चुतः।।

卐 श्वेतं रूपङ्कृणुते यत्सिषासति- सोमो मीढ्वा॰ असुरो वेद भूमनः। धिया शमी सचते सेमभि प्रव-द्दिवस्कवन्ध मव दर्ष दुद्रिणम्।।

卐 अध श्वेतङ्कलशं गोभिरक्त-ङ्कार्ष्मन्ना वाज्यऽक्रमीत्ससवान्। आ हिन्विरे मनसा देवयन्त॰- कक्षीवते शतहिमाय गोनाम्।।

卐 अद्भि स्सोम पपृचानस्य ते रसो-ऽव्यो वारँ वि पवमान धावति। स मृज्यमान॰ कविभि र्मदिन्तम-स्वदस्वेन्द्राय पवमान पीतये।।

9.77 अभि प्रियाणीति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः-पवमान-स्सोमो-जगती।।

❀07.02.33 卐अभि प्रियाणि पवते चनोहितो- नामानि यह्वो अधि येषु वर्धते। आ सूर्यस्य बृहतो बृहन्नधि- रथँ विष्वञ्च.मरुह द्विचक्षणः।।

卐 ऋतस्य जिह्वा पवते मधु प्रियँ- वक्ता पति र्धियो अस्या अदाभ्यः। दधाति पुत्र॰ पित्रो रपीच्य1(अ)-न्नाम तृतीय मधि रोचने दिवः।।

卐 अव द्युतान॰ कलशा॰ अचिक्रद- न्नृभि र्येमान॰ कोश आ हिरण्यये। अभी मृतस्य दोहना अनूषता-ऽधि त्रिपृष्ठ उषसो वि राजति।।

卐 अद्रिभि स्सुतो मतिभि श्चनोहित॰- प्ररोचय न्रोदसी मातरा शुचिः। रोमाण्यव्या समया वि धावति-मधो र्धारा पिन्वमाना दिवेदिवे।।

卐 परि सोम प्र धन्वा स्वस्तये- नृभि॰ पुनानो अभि वासयाऽऽशिरम्। ये ते मदा आहनसो विहायस-स्तेभि रिन्द्रञ्चोदय दातवे मघम्।।।। इति द्वितीयाध्याय स्समाप्तः।।

# ॐसप्तमाष्टके तृतीयाध्यायः (वर्गाः 1-26)

9.78 धर्तेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान सोमो जगती।

07.03.0 धर्ता दिवः पवते कृत्व्यो रसो- दक्षो देवाना मनुमाद्यो नृभिः। हरि स्सृजानो अत्यो न सत्वभि- र्वृथा पाजांसि कृणुते नदीष्वा।।

शूरो न धत्त आयुधा गभस्त्यो- स्स्व1(अ) स्सिषास न्रथिरो गविष्टिषु। इन्द्रस्य शुष्म मीरयन्नऽपस्युभि- रिन्दु र्हिन्वानो अज्यते मनीषिभिः।।

इन्द्रस्य सोम पवमान ऊर्मिणा- तविष्यमाणो जठरेष्वा विश। प्र णः पिन्व विद्यु दभ्रेव रोदसी- धिया न वाजाँ उप मासि शश्वतः।।

विश्वस्य राजा पवते स्वर्दृश- ऋतस्य धीति मृषिषाळऽवीवशत्। य स्सूर्यस्याऽसिरेण मृज्यते- पिता मतीना मऽसमष्टकाव्यः।।

वृषेव यूथा परि कोश मर्ष -स्यऽपा मुपस्थे वृषभः कनिक्रदत्। स इन्द्राय पवसे मत्सरिन्तमो- यथा जेषाम समिथे त्वोतयः।।

9.79 एष इति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान सोमो जगती।

07.03.02 एष प्र कोशे मधुमाँ अचिक्रद -दिन्द्रस्य वज्रो वपुषो वपुष्टरः। अभी मृतस्य सुदुघा घृतश्चुतो- वाश्रा अर्षन्ति पयसेव धेनवः।।

स पूर्व्यः पवते य न्दिवस्परि- श्येनो मथाय दिषित स्तिरो रजः। स मध्व आ युवते वेविजान- इत्कृशानो रस्तुर्मनसाऽह बिभ्युषा।।

ते नः पूर्वास उपरास इन्दवो- महे वाजाय धन्वन्तु गोमते। ईक्षेण्यासो अह्यो3(ओ) न चारवो- ब्रह्मब्रह्म ये जुजुषु र्हविर्हविः।।

अयन्नो विद्वा न्वनव द्वनुष्यत- इन्दु स्सत्राचा मनसा पुरुष्टुतः। इनस्य य स्सदने गर्भ मादधे- गवामुरुब्ज मभ्यऽर्षति व्रजम्।।

चक्रिर्दिवः पवते कृत्व्यो रसो- महाँ अदब्धो वरुणो हुरुग्यते। असावि मित्रो वृजनेषु यज्ञियो-ऽत्यो न यूथे वृषयुः कनिक्रदत्।।

9.80 प्र राजेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान सोमो जगती।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham
Mysore

❀07.03.03 卐प्र राजा वाचञ्जनय न्नसिष्यद -दऽपो वसानो अभि गा^ ईयक्षति। गृभ्णाति रिप्र मविरस्य तान्वा- शुद्धो देवाना मुप याति निष्कृतम्।।

卐 इन्द्राय सोम परि षिच्यसे नृभि- र्नृचक्षा^ ऊर्मिः कवि रज्यसे वने। पूर्वीर्हि ते स्रुतय स्सन्ति यातवे- सहस्र मश्वा हरय श्चमूषदः।।

卐 समुद्रिया^ अप्सरसो मनीषिण- मासीना^ अन्त रभि सोम मक्षरन्न्। ता^ ईं हिन्वन्ति हर्म्यस्य सक्षणिँ- याचन्ते सुम्नं पवमान मक्षितम्।।

卐 गोजिन्न स्सोमो रथजि द्धिरण्यजि- त्स्वर्जि दब्जि त्पवते सहस्रजित्। यन्देवास श्चक्रिरे पीतये मदं- स्वादिष्ठ न्द्रप्स मरुणं मयोभुवम्।।

卐 एतानि सोम पवमानो अस्मयु- स्सत्यानि कृण्व न्द्रविणा न्यर्षसि। जहि शत्रु मन्तिके दूरके च य^- उर्वीङ्गव्यूति मऽभयञ्च नस्कृधि।।

☬ 9.81 अचोदस इति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान सोमो जगती।

❀07.03.04 卐अचोदसो नो धन्व न्त्विन्दव- प्र सुवानासो बृहद्दिवेषु हरयः। वि च नशन्न^ इषो अरातयो-ऽर्यो नशन्त सनिषन्त नो धियः।।

卐 प्र णो धन्व न्त्विन्दवो मदच्युतो- धना वा येभि रर्वतो जुनीमसि। तिरो मर्तस्य कस्य चित्परिह्वृतिँ- वय न्धनानि विश्वधा भरेमहि।।

卐 उत स्वस्या^ अरात्या^ अरि र्हि ष-^ उतान्यस्या^ अरात्या^ वृको हि षः। धन्वन्न तृष्णा समरीत ताँ अभि- सोम जहि पवमान दुराध्यः।।

卐 दिवि ते नाभा परमो य^ आददे- पृथिव्यास्ते रुरुहु स्सानवि क्षिपः। अद्रयस्त्वा बप्सति गोरधि त्वच्य1-(अ)प्सु त्वा हस्तै र्दुदुहु र्मनीषिणः।।

卐 एवा त इन्दो~ सुभ्वं सुपेशसं- रस न्तुञ्जन्ति प्रथमा^ अभिश्रियः। निदन्निदं पवमान नि तारिष-^ आवि स्ते शुष्मो भवतु प्रियो मदः।।

☬ 9.82 सोमस्येति पञ्चर्चस्य सूक्तस्य, भारद्वाजो वसुः पवमान सोमो जगती।

❀07.03.05 卐सोमस्य धारा पवते नृचक्षस-^ ऋतेन देवा न्हवते दिवस्परि। बृहस्पते रवथेना वि दिद्युते- समुद्रासो न सवनानि विव्यचुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 यन्त्वा वाजिन्नघ्न्या^ अभ्यनूषता-ऽयोहतँ योनिमा रोहसि द्युमान्। मघोना मायुः प्रतिर न्महि श्रव-^
इन्द्राय सोम पवसे वृषा मदः।।

卐 एन्द्रस्य कुक्षा पवते मदिन्तम-^ ऊर्जँ वसान श्श्रवसे सुमङ्गलः। प्रत्यङ्स विश्वा भुवनाऽभि पप्रथे-
क्रीळ न्हरि रऽत्यस्स्यन्दते वृषा।।

卐 तन्त्वा देवेभ्यो मधुमत्तमन्नर- स्सहस्रधार न्दुहते दश क्षिपः। नृभि स्सोम प्रच्युतो ग्रावभि स्सुतो-
विश्वा न्देवाँ आ पवस्वा सहस्रजित्।।

卐 तन्त्वा हस्तिनो मधुमन्त मऽद्रिभि- र्दुहन्त्यऽप्सु वृषभ न्दश क्षिपः। इन्द्रं सोम मादय न्दैव्यञ्जनं-
सिन्धो रिवोर्मिः पवमानो अर्षसि।।

☸ 9.83 **प्र सोमस्येति पञ्चर्चस्य सूक्तस्य, भारद्वाजो वसुः पवमान सोमो जगत्यन्त्या त्रिष्टुप्।**

❀07.03.06 卐प्र सोमस्य पवमानस्योर्मय-^ इन्द्रस्य यन्ति जठरं सुपेशसः। दध्ना यदी मुन्नीता^
यशसा गवा- न्दानाय शूर मुदमन्दिषु स्सुताः।।

卐 अच्छा हि सोमः कलशाँ असिष्यद- दऽत्यो न वोळ्हा रघुवर्तनि र्वृषा। अथा देवाना मुभयस्य
जन्मनो- विद्वाँ अश्नो त्यऽमुत^ इतश्च यत्।।

卐 आ न स्सोम पवमानः किरा व-स्विन्दो~ भव मघवा राधसो महः। शिक्षा वयोधो वसवे सु चेतुना-
मा नो गयमारे अस्म त्परा सिचः।।

卐 आ नः पूषा पवमान स्सुरातयो- मित्रो गच्छन्तु वरुण स्सजोषसः। बृहस्पति र्मरुतो वायु रश्विना-
त्वष्टा सविता सुयमा सरस्वती।।

卐 उभे~ द्यावापृथिवी~ विश्वमिन्वे~- अर्यमा देवो अदिति र्विधाता। भगो नृशंस^ उर्व1(अ)न्तरिक्षँ-
विश्वे देवाः पवमानञ्जुषन्त।।

☸ 9.84 **असावीति पञ्चर्चस्य सूक्तस्य, भारद्वाजो वसुः पवमान सोमो जगत्यन्त्या त्रिष्टुप्।**

❀07.03.07 卐असावि सोमो अरुषो वृषा हरी- राजेव दस्मो अभि गा^ अचिक्रदत्। पुनानो वारं
पर्येत्यव्ययं- श्येनो न योनिङ्घृतवन्त माऽऽसदम्।।

卐 कवि र्वेधस्या पर्येषि माहिन- मऽत्यो न मृष्टो अभि वाज मर्षसि। अपसेध न्दुरिता सोम मृळय- घृतँ
वसानः परि यासि निर्णिजम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 पर्जन्यः पिता महिषस्य पर्णिनो- नाभा पृथिव्या^ गिरिषु क्षय न्दधे। स्वसार आपो अभि गा^ उताऽसर-न्त्सङ्ग्रावभि र्नसते वीते अध्वरे।।

卐 जायेव पत्यावधि शेव मंहसे- पज्राया^ गर्भ श्शृणुहि ब्रवीमि ते। अन्त र्वाणीषु प्र चरा सु जीवसे-ऽनिन्द्यो वृजने सोम जागृहि।।

卐 यथा पूर्वेभ्य श्शतसा^ अमृध्र- स्सहस्रसाः पर्यया वाज मिन्दो~। एवा पवस्व सुविताय नव्यसे- तव व्रत मन्वाप स्सचन्ते।।

9.85 **पवित्रन्त इति पञ्चर्चस्य सूक्तस्याऽङ्गिरसः पवित्रः पवमान सोमो जगती।**

❀07.03.08 卐पवित्रन्ते विततं ब्रह्मणस्पते- प्रभु र्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते- श्शृतास^ इद्वहन्त स्तत्समाशत।।

卐 तपो ष्पवित्रँ विंतत न्दिवस्पदे- शोचन्तो अस्य तन्तवो व्यऽस्थिरन्न्। अवन्त्यऽस्य पवीतार माशवो- दिवस्पृष्ठ मधि तिष्ठन्ति चेतसा।।

卐 अरूरुच दुषसः पृश्नि रग्रिय-^ उक्षा बिभर्ति भुवनानि वाजयुः। मायाविनो ममिरे अस्य मायया- नृचक्षसः पितरो गर्भमा दधुः।।

卐 गन्धर्व^ इत्था पद मस्य रक्षति- पाति देवानाञ्जनिमा न्यऽद्भुतः। गृभ्णाति रिपु न्निधया निधापति- स्सुकृत्तमा मधुनो भक्ष माशत।।

卐 हवि र्हविष्मो महि सद्म दैव्य-न्नभो वसानः परि यास्यऽध्वरम्। राजा पवित्ररथो वाज माऽरुह- स्सहस्रभृष्टि र्जयसि श्रवो बृहत्।।

9.86 **पवस्वेति पञ्चर्चस्य सूक्तस्य, वाच्यः प्रजापतिः पवमान सोमो जगती।**

❀07.03.09 卐पवस्व देवमादनो विचर्षणि- रप्सा^ इन्द्राय वरुणाय वायवे। कृधी नो अद्य वरिव स्स्वस्तिम- दुरुक्षितौ गृणीहि दैव्यञ्जनम्।।

卐 आ यस्तस्थौ भुवना न्यमर्त्यो- विश्वानि सोमः परि तान्यऽर्षति। कृण्वन्त्सञ्चृतँ विचृत मभिष्टय- इन्दु स्सिषक्त्युषसन्न सूर्यः।।

卐 आ यो गोभि स्सृज्यत ओषधीष्वा- देवानां सुम्न इषय न्नुपावसुः। आ विद्युता पवते धारया सुत-^ इन्द्रं सोमो मादय न्दैव्यञ्जनम्।।

卐 एष स्य सोमः॒ पवते सहस्रजि-द्धिन्वानो वाच मिषिरा मुंषर्बुधम्। इन्दु स्समुद्र मुदियर्ति वायुभि-रेन्द्रस्य हार्दि कलशेषु सीदति।।
卐 अभित्यङ्गावः॒ पयसा पयोवृधं- सोमं श्रीणन्ति मतिभि स्स्वर्विदम्। धनञ्जयः॒ पवते कृत्व्यो रसो-विप्रः॒ कविः॒ काव्येना स्वर्चनाः।।
9.87 इन्द्रायेति द्वादशर्चस्य सूक्तस्य, भार्गवो वेनः पवमान सोमो जगत्यन्त्ये द्वे त्रिष्टुभौ।
07.03.10 卐इन्द्राय सोम सुषुतः॒ परि स्रवा-ऽपामीवा भवतु रक्षसा सह। मा ते रसस्य मत्सत द्वयाविनो- द्रविणस्वन्त^ इह सन्त्विन्दवः।।
卐 अस्मा न्त्समर्ये पवमान चोदय- दक्षो देवाना मसि हि प्रियो मदः। जहि शत्रूं रभ्या भन्दनायतः॒-पिबेन्द्र सोम मव नो मृधो जहि।।
卐 अदब्ध इन्दो~ पवसे मदिन्तम-^ आत्मेन्द्रस्य भवसि धासि रुत्तमः। अभि स्वरन्ति बहवो मनीषिणो- राजान मस्य भुवनस्य निंसते।।
卐 सहस्रणीथ श्शतधारो अद्भुत^- इन्द्रायेन्दुः॒ पवते काम्यं मधु। जय न्क्षेत्र मभ्यऽर्षा जयन्नप-^ उरुन्नो गातुङ्कृणु सोम मीढ्वः।।
卐 कनिक्रद त्कलशे गोभि रज्यसे- व्य1(अ)व्ययं समया वार.मर्षसि। मर्मृज्यमानो अत्यो न सानसि-रिन्द्रस्य सोम जठरे समक्षरः।।
卐 स्वादुः॒ पवस्व दिव्याय जन्मने- स्वादु रिन्द्राय सुहवीतुनाम्ने। स्वादु र्मित्राय वरुणाय वायवे-बृहस्पतये मधुमां॒ अदाभ्यः।।
07.03.11 卐अत्यं मृजन्ति कलशे दश क्षिपः॒- प्र विप्राणां मतयो वाच^ ईरते। पवमाना^ अभ्यर्षन्ति सुष्टुति- मेन्द्रँ विशन्ति मदिरास^ इन्दवः।।
卐 पवमानो अभ्यर्षा सुवीर्य- मुर्वीङ्गव्यूतिं महि शर्म सप्रथः। माकिर्नो अस्य परिषूति रीशते-न्दो~ जयेम त्वया धनन्धनम्।।
卐 अधि द्यामस्था द्वृषभो विचक्षणो-ऽरूरुच द्विदिवो रोचना कविः। राजा पवित्र मत्येति रोरुव- द्दिवः॒ पीयूष न्दुहते नृचक्षसः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 दिवो नाके मधुजिह्वा^ असश्चतो- वेना दुह न्त्युऽक्षणङ्गिरिष्ठाम्। अप्सु द्रप्सँ वावृधानं समुद्र आ- सिन्धो रूर्मा मधुमन्तं पवित्र आ।।

卐 नाके सुपर्ण मुपपप्तिवांस-ङ्गिरो वेनाना मकृपन्त पूर्वीः। शिशुं रिहन्ति मतयः पनिप्नतं- हिरण्ययं शकुनङ्क्षामणि स्थाम्।।

卐 ऊर्ध्वो गन्धर्वो अधि नाके अस्था- द्विश्वा रूपा प्रतिचक्षाणो अस्य। भानु श्शुक्रेण शोचिषा व्यद्यौ- त्प्रारूरुच द्रोदसी~ मातरा शुचिः।।

**पञ्चमेऽनुवाके एकादशसूक्तानि**

**9.88 प्र त आशव इत्यष्टाचत्वारिंशदृचस्य सूक्तस्य, आद्यानां दशानामकृष्टामाषा ऋषयः, एकादश्यादि दशानां सिकतानिवावरी एकविंश्यादि दशानां पृश्नियोजाः, एकत्रिंश्यादि दशानामत्रयः एकचत्वारिंश्यादि पञ्चानां भौमोऽत्रिः, अन्त्यानां तिसृणां शौनको गृत्समदः, पवमान सोमो जगती।**

❀07.03.12 卐प्र त आशवः पवमान धीजवो- मदा^ अर्षन्ति रघुजाइव त्मना। दिव्या स्सुपर्णा^ मधुमन्त-^ इन्दवो मदिन्तमासः परि कोश मासते।।

卐 प्र ते मदासो मदिरास^ आशवो-ऽसृक्षत रथ्यासो यथा पृथक्। धेनुर्न वत्सं पयसाऽभि वज्रिण- मिन्द्र मिन्दवो मधुमन्त^ ऊर्मयः।।

卐 अत्यो न हियानो अभि वाज मर्ष- स्वर्वित्कोश न्दिवो अद्रिमातरम्। वृषा पवित्रे अधि सानो अव्यये- सोमः पुनान^ इन्द्रियाय धायसे।।

卐 प्र त आश्विनीः पवमान धीजुवो- दिव्या^ असृग्र न्पयसा धरीमणि। प्रान्तर् ऋषय स्स्थाविरी रऽसृक्षत- ये त्वा मृज न्त्यृषिषाण वेधसः।।

卐 विश्वा धामानि विश्वचक्ष^ ऋभ्वसः- प्रभोस्ते सतः परि यन्ति केतवः। व्यानशिः पवसे सोम धर्मभिः- पति विश्वस्य भुवनस्य राजसि।।

❀07.03.13 卐उभयतः पवमानस्य रश्मयो- ध्रुवस्य सतः परि यन्ति केतवः। यदी पवित्रे अधि मृज्यते हरि- स्सत्ता नि योना कलशेषु सीदति।।

卐 यज्ञस्य केतुः पवते स्वध्वर- स्सोमो देवाना मुप याति निष्कृतम्। सहस्रधारः परि कोश मर्षति- वृषा पवित्र मत्येति रोरुवत्।।

卐 राजा समुद्रन्नद्यो3(ओ) वि गाहते-ऽपा मूर्मिं सचते सिन्धुषु श्रितः। अध्यस्थात्सानु पवमानो अव्यय- न्नाभा पृथिव्या^ धरुणो महो दिवः।।

卐 दिवो न सानु स्तनयन्नचिक्रद्- द्यौश्च यस्य पृथिवी च धर्मभिः। इन्द्रस्य सख्यं पवते विवेविद- त्सोमः पुनानः कलशेषु सीदति।।

卐 ज्योतिर्यज्ञस्य पवते मधु प्रियं- पिता देवानाञ्जनिता विभूवसुः। दधाति रत्नं स्वधयो रपीच्यं- मदिन्तमो मत्सर^ इन्द्रियो रसः।।

❀07.03.14 卐अभिक्रन्द न्कलशँ वाज्यर्षति- पतिर्दिव श्शतधारो विचक्षणः। हरि र्मित्रस्य सदनेषु सीदति- मर्मृजानोऽविभि स्सिन्धुभि र्वृषा।।

卐 अग्रे सिन्धूनां पवमानो अर्षत्य -ऽग्रे वाचो अग्रियो गोषु गच्छति। अग्रे वाजस्य भजते महाधनं- स्वायुध स्सोतृभिः पूयते वृषा।।

卐 अयं मतवाञ्छकुनो यथा हितो-ऽव्ये ससार पवमान^ ऊर्मिणा। तव क्रत्वा रोदसी अन्तरा कवे- शुचि र्धिया पवते सोम^ इन्द्र ते।।

卐 द्रापिँ वसानो यजतो दिविस्पृशं- मऽन्तरिक्षप्रा^ भुवनेष्वऽर्पितः। स्वर्जज्ञानो नभसाऽभ्यक्रमी- त्प्रत्न मस्य पितर मा विवासति।।

卐 सो अस्य विशे महि शर्म यच्छति- यो अस्य धाम प्रथमँ व्यानशे। पदँ यदस्य परमे व्योम- न्यतो विश्वा^ अभि सँ याति सँयतः।।

❀07.03.15 卐प्रो~ अयासी दिन्दु रिन्द्रस्य निष्कृतं- सखा सख्युर्न प्र मिनाति सङ्गिरम्। मर्यइव युवतिभि स्समर्षति- सोमः कलशे शतयाम्ना पथा।।

卐 प्र वो धियो मन्द्रयुवो विपन्युवः- पनस्युव स्सँवसनेष्वक्रमुः। सोमं मनीषा^ अभ्यनूषत स्तुभो-ऽभि धेनवः पयसे मशिश्रयुः।।

卐 आ न स्सोम सँयतं पिप्युषी मिष- मिन्दो~ पवस्व पवमानो अस्रिधम्। या नो दोहते त्रिरहन्नऽसश्चुषी- क्षुम द्वाजव न्मधुमत्सुवीर्यम्।।

卐 वृषा मतीनां पवते विचक्षण- स्सोमो अह्नः प्रतरीतोषसो दिवः। क्राणा सिन्धूनाङ्कलशाँ अवीवश- दिन्द्रस्य हार्द्याविश न्मनीषिभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत्। त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोस्सख्याय कर्तवे।।

❀07.03.16 卐अयं पुनान उषसो वि रोचय-दयं सिन्धुभ्यो अभवदु लोककृत्। अयन्त्रिस्सप्त दुदुहान आशिरं- सोमो हृदे पवते चारु मत्सरः।।

卐 पवस्व सोम दिव्येषु धामसु- सृजान इन्दो कलशे पवित्र आ। सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतस्सूर्य मारोहयो दिवि।।

卐 अद्रिभिस्सुतः पवसे पवित्र आँ- इन्दविन्द्रस्य जठरेष्वाऽविशन्न्। त्वन्नृचक्षा अभवो विचक्षण- सोम गोत्र मङ्गिरोभ्योऽवृणो रप।।

卐 त्वां सोम पवमानं स्वाध्यो-ऽनु विप्रासो अमदन्नवस्यवः। त्वां सुपर्ण आभर द्दिवस्परी-न्दो विश्वाभिर्मतिभिः परिष्कृतम्।।

卐 अव्ये पुनानं परि वार ऊर्मिणा- हरिन्नवन्ते अभि सप्त धेनवः। अपा मुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत।।

❀07.03.13 卐इन्दुः पुनानो अति गाहते मृधो- विश्वानि कृण्वन्त्सुपथानि यज्यवे। गाः कृण्वानो निर्णिजं हर्यतः कवि- रत्यो न क्रीळन्परि वार मर्षति।।

卐 असश्चत श्शतधारा अभिश्रियो- हरिन्नवन्तेऽव ता उदन्युवः। क्षिपो मृजन्ति परि गोभि रावृतन्तृतीये पृष्ठे अधि रोचने दिवः।।

卐 तवेमाः प्रजा दिव्यस्य रेतस- स्त्वँ विश्वस्य भुवनस्य राजसि। अथेदँ विश्वं पवमान ते वशे- त्वमिन्दो प्रथमो धामधा असि।।

卐 त्वं समुद्रो असि विश्ववित्कवे- तवेमाः पञ्च प्रदिशो विधर्मणि। त्वन्द्याञ्च पृथिवीञ्चाति जभ्रिषे- तव ज्योतींषि पवमान सूर्यः।।

卐 त्वं पवित्रे रजसो विधर्मणि- देवेभ्य स्सोम पवमान पूयसे। त्वामुशिजः प्रथमा अगृभ्णत- तुभ्येमा विश्वा भुवनानि येमिरे।।

❀07.03.18 卐प्र रेभ एत्यति वार मव्ययँ- वृषा वनेष्वव चक्रदद्धरिः। सन्धीतयो वावाशाना अनूषत- शिशुं रिहन्ति मतयः पनिप्नतम्।।

卐 स सूर्यस्य रश्मिभिः परि व्यत- तन्तु न्तन्वान स्त्रिवृतँ यथा विदे। नयन्नृतस्य प्रशिषो नवीयसीः-
पति र्जनीना मुप याति निष्कृतम्।।
卐 राजा सिन्धूनां पवते पति र्दिव-^ ऋतस्य याति पथिभिः कनिक्रदत्। सहस्रधारः परि षिच्यते हरिः-
पुनानो वाचञ्जनय न्नुपावसुः।।
卐 पवमान मह्यर्णो वि धावसि- सूरो न चित्रो अव्ययानि पव्यया। गभस्तिपूतो नृभि रद्रिभि स्सुतो- महे
वाजाय धन्याय धन्वसि।।
卐 इष मूर्जं पवमानाभ्यऽर्षसि- श्येनो न वंसु कलशेषु सीदसि। इन्द्राय मद्वा मद्यो मद स्सुतो- दिवो
विष्टम्भ^ उपमो विचक्षणः।।
❀07.03.19 卐सप्त स्वसारो अभि मातर श्शिशु-न्नवञ्जज्ञानञ्जेन्यँ विपश्चितम्। अपाङ्गन्धर्व न्दिव्य
न्नृचक्षसं- सोमँ विश्वस्य भुवनस्य राजसे।।
卐 ईशान^ इमा भुवनानि वीयसे- युजान इन्दो~ हरित स्सुपर्ण्यः। तास्ते क्षरन्तु मधुम द्घृतं पय- स्तव
व्रते सोम तिष्ठन्तु कृष्टयः।।
卐 त्वन्नृचक्षा असि सोम विश्वतः- पवमान वृषभ ता वि धावसि। स नः पवस्व वसुम द्धिरण्यव- द्वयं
स्याम भुवनेषु जीवसे।।
卐 गोवि त्पवस्व वसुवि द्धिरण्यवि-द्रेतोधा^ इन्दो~ भुवनेष्वर्पितः। त्वं सुवीरो असि सोम विश्ववि-
त्तन्त्वा विप्रा^ उप गिरेम आसते।।
卐 उन्मध्व^ ऊर्मि र्वनना^ अतिष्ठिप- दपो वसानो महिषो वि गाहते। राजा पवित्ररथो वाज माऽरुह-
त्सहस्रभृष्टि र्जयति श्रवो बृहत्।।
❀07.03.20 卐स भन्दना उदियर्ति प्रजावती- र्विश्वाऽऽयु र्विश्वा स्सुभरा अहर्दिवि। ब्रह्म प्रजाव द्रयि
मश्वपस्त्यं- पीत इन्द~ विन्द्र मस्मभ्यँ याचतात्।।
卐 सो अग्रे अह्नां हरि र्हर्यतो मदः- प्र चेतसा चेतयते अनु द्युभिः। द्वा जना यातयन्नन्त रीयते- नरा च
शंस न्दैव्य ञ्च धर्तरि।।
卐 अञ्जते व्यञ्जते समञ्जते- क्रतुं रिहन्ति मधुनाऽभ्यञ्जते। सिन्धोरुच्छ्वासे पतयन्त मुक्षणं- हिरण्यपावाः
पशुमाऽऽसु गृभ्णते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 विपश्चिते पवमानाय गायत- मही न धाराऽत्यन्धो अर्षति। अहिर्न जूर्णा मति सर्पति त्वच- मत्यो न क्रीळन्नऽसर द्वृषा हरिः।।

卐 अग्रेगो राजाऽप्यस्तविष्यते- विमानो अह्नां भुवनेष्वर्पितः। हरि र्घृतस्नु स्सुदृशीको अर्णवो ज्योतीरथ॰ पवते राय ओक्यः।।

❀07.03.21 卐असर्जि स्कम्भो दिव^ उद्यतो मद॰- परि त्रिधातु र्भुवना न्यऽर्षति। अंशुं रिहन्ति मतय॰ पनिप्नत-ङ्गिरा यदि निर्णिज मृग्मिणो ययुः।।

卐 प्र ते धारा^ अत्यण्वानि मेष्य॰- पुनानस्य सँयतो यन्ति रंहयः। यद्गोभि रिन्दो~ चम्वो स्समज्यस - आ सुवान स्सोम कलशेषु सीदसि।।

卐 पवस्व सोम क्रतुविन्न^ उक्थ्यो-ऽव्यो वारे परि धाव मधु प्रियम्। जहि विश्वा न्रक्षस इन्दो~ अत्रिणो बृह द्वदेम विदथे सुवीराः।।

☸ 9.89 प्र तु द्रवेति नवर्चस्य सूक्तस्य, काव्य उशना पवमान सोमस्त्रिष्टुप्।

❀07.03.22 卐प्र तु द्रव परि कोशन्नि षीद- नृभि॰ पुनानो अभि वाज मर्ष। अश्वन्न त्वा वाजिनं मर्जयन्तो-ऽच्छा बर्ही रशनाभि र्नयन्ति।।

卐 स्वायुध॰ पवते देव^ इन्दु- रऽशस्तिहा वृजनं रक्षमाणः। पिता देवानाञ्जनिता सुदक्षो- विष्टम्भो दिवो धरुण॰ पृथिव्याः।।

卐 ऋषि र्विप्र॰ पुरएता जनाना- मृभु र्धीर^ उशना काव्येन। स चिद्विवेद निहितँ यदासा- मपीच्य1(अ)ङ्गुह्य न्नाम गोनाम्।।

卐 एष स्य ते मधुमा॰ इन्द्र सोमो- वृषा वृष्णे परि पवित्रे अक्षाः~। सहस्रसा श्शतसा भूरिदावा- शश्वत्तमं बर्हिरा वाज्यऽस्थात्।।

卐 एते सोमा^ अभि गव्या सहस्रा- महे वाजायाऽमृताय श्रवांसि। पवित्रेभि॰ पवमाना^ असृग्र- ञ्छ्रवस्यवो न पृतनाजो अत्याः।।

❀07.03.23 卐परि हि ष्मा पुरुहूतो जनानाँ- विश्वाऽसर द्भोजना पूयमानः। अथा भर श्येनभृत प्रयांसि- रयि न्तुञ्जानो अभि वाज मर्ष।।

卐 एष सुवानः परि सोमः पवित्रे- सर्गो न सृष्टो अदधाव दर्वा। तिग्मे~ शिशानो महिषो न शृङ्गे~ गा^ गव्यन्नभि शूरो न सत्वा।।

卐 एषाऽययौ परमा दन्त रद्रेः- कूचि त्सती रूर्वे गा^ विवेद। दिवो न विद्यु त्स्तनय न्त्यभ्रै- स्सोमस्य ते पवत इन्द्र धारा।।

卐 उत स्म राशिं परि यासि गोना- मिन्द्रेण सोम सरथं पुनानः। पूर्वी रिषो बृहती जीरदानो~ शिक्षा शचीव स्तव ता^ उपष्टुत्।।

**9.90 अयं सोम इत्यष्टर्चस्य सूक्तस्य, काव्य उशना पवमान सोम स्त्रिष्टुप्।**

❀07.03.24 卐अयं सोम^ इन्द्र तुभ्यं सुन्वे- तुभ्यं पवते त्वमस्य पाहि। त्वं ह यञ्चकृषे त्वँ ववृष -इन्दुं मदाय युज्याय सोमम्।।

卐 स ईं रथो न भुरिषा ळयोजि- महः पुरूणि सातये वसूनि। आदीं विश्वा नहुष्याणि जाता- स्वर्षाता वन ऊर्ध्वा नवन्त।।

卐 वायुर्न यो नियुत्वाँ इष्टयामा- नासत्येव हव आ शंभविष्ठः। विश्ववारो द्रविणोदाइव त्म-न्पूषेव धीजवनोऽसि सोम।।

卐 इन्द्रो न यो महा कर्माणि चक्रि- र्हन्ता वृत्राणा मसि सोम पूर्भित्। पैद्वो न हि त्वमहिनाम्नां- हन्ता विश्वस्याऽसि सोम दस्योः।।

卐 अग्निर्न यो वन आ सृज्यमानो- वृथा पाजांसि कृणुते नदीषु। जनो न युध्वा महत^ उपब्दि- रियर्ति सोमः पवमान^ ऊर्मिम्।।

卐 एते सोमा^ अति वाराण्यव्या- दिव्या^ न कोशासो अभ्रवर्षाः। वृथा समुद्रं सिन्धवो न नीची- स्सुतासो अभि कलशाँ असृग्रन्न्।।

卐 शुष्मी शर्धो न मारुतं पवस्वा-ऽनभिशस्ता दिव्या यथा विट्। आपो न मक्षू सुमति र्भवा न- स्सहस्राप्साः पृतनाषाण्ण यज्ञः।।

卐 राज्ञो नु ते वरुणस्य व्रतानि- बृहद्गभीर न्तव सोम धाम। शुचिष्ट्वमसि प्रियो न मित्रो- दक्षाय्यो अर्यमेवासि सोम।।

**9.91 प्रो स्य वह्निरिति सप्तर्चस्य सूक्तस्य, काव्य उशना पवमान सोमस्त्रिष्टुप्।**

❀07.03.25 卐प्रो~ स्य^ वह्निः पथ्याभि रस्या- न्दिवो न वृष्टिः पवमानो अक्षाः~। सहस्रधारो असदन्न्य1(अ)स्मे- मातु रुपस्थे वन आ च सोमः।।

卐 राजा सिन्धूना मवसिष्ट वासं-^ ऋतस्य नाव माऽरुह द्रजिष्ठाम्। अप्सु द्रप्सो वावृधे श्येनजूतो- दुह ई पिता दुह ई पितु र्जाम्।।

卐 सिंहन्नसन्त मध्वो अयासं- हरि मरुष न्दिवो अस्य पतिम्। शूरो युत्सु प्रथमः पृच्छते गा-^ अस्य चक्षसा परि पात्युक्षा।।

卐 मधुपृष्ठङ्घोर मयास मश्वं- रथे युञ्ज न्त्युरुचक्र ऋष्वम्। स्वसार^ ईञ्जामयो मर्जयन्ति- सनाभयो वाजिन मूर्जयन्ति।।

卐 चतस्र^ ईङ्घृतदुह स्सचन्ते- समाने अन्त र्धरुणे निषत्ताः। ता^ ईमर्षन्ति नमसा पुनाना- स्ता^ ईं विश्वतः परि षन्ति पूर्वीः।।

卐 विष्टम्भो दिवो धरुणः पृथिव्या- विश्वा^ उत क्षितयो हस्ते अस्य। असत्त उत्सो गृणते नियुत्वा- न्मध्वो अंशुः पवत इन्द्रियाय।।

卐 वन्वन्नवातो अभि देववीति- मिन्द्राय सोम वृत्रहा पवस्व। शग्धि महः पुरुश्चन्द्रस्य राय- स्सुवीर्यस्य पतय स्स्याम।।

☸ 9.92 प्र हिन्वान इति षडृचस्य सूक्तस्य, मैत्रावरुणि र्वसिष्ठः पवमान सोमस्त्रिष्टुप्।

❀07.03.26 卐प्र हिन्वानो जनिता रोदस्यो- रथो न वाजं सनिष्यन्नयासीत्। इन्द्रङ्गच्छ न्नायुधा संशिशानो- विश्वा वसु हस्तयो रादधानः।।

卐 अभि त्रिपृष्ठँ वृषणँ वयोधा- माङ्गूषाणा मवावशन्त वाणीः। वना वसानो वरुणो न सिन्धू-न्वि रत्नधा^ दयते वार्याणि।।

卐 शूरग्राम स्सर्ववीर स्सहावा- न्जेता पवस्व सनिता धनानि। तिग्माऽयुधः ≈ क्षिप्रधन्वा समत्स्व- ऽषाळ्ह स्साह्वा न्पृतनासु शत्रून्।।

卐 उरुगव्यूति रभयानि कृण्व-न्त्संमीचीने~ आ पवस्वा पुरन्धी~। अप ऽस्सिषास न्नुषस स्स्व1(अ)र्गा -स्सञ्चिक्रदो महो अस्मभ्यँ वाजान्।।

卐 मत्सि सोम वरुणं मत्सि मित्रं- मत्सीन्द्र मिन्दो~ पवमान विष्णुम्। मत्सि शर्धो मारुतं मत्सि देवा-न्मत्सि महा मिन्द्र मिन्दो~ मदाय।।

卐 एवा राजेव क्रतुमा॰ अमेन- विश्वा घनिघ्न दुरिता पवस्व। इन्दो~ सूक्ताय वचसे वयो धा-^ यूयं पात स्वस्तिभि स्सदा नः।।।। इति तृतीयाध्याय स्समाप्तः।।

## सप्तमाष्टके चतुर्थाध्यायः (वर्गाः 1-28)

9.93 **असर्जीति षड्चस्य सूक्तस्य, मारीचः कश्यपः पवमानसोम स्त्रिष्टुप्।**

❀07.04.01 卐असर्जि वक्वा रथ्ये यथाऽऽजौ- धिया मनोता प्रथमो मनीषी। दश स्वसारो अधि सानो अव्ये-ऽजन्ति वह्निं सदना न्यच्छ।।

卐 वीती जनस्य दिव्यस्य कव्यै- रधि सुवानो नहुष्येभि रिन्दुः। प्र यो नृभि रमृतो मर्त्येभि-र्मर्मृजानोऽविभि र्गोभि रद्भिः।।

卐 वृषा वृष्णे रोरुव दंशु रस्मै- पवमानो रुशदीर्ते पयो गोः। सहस्र मृक्वा पथिभि र्वचोवि दऽ-ध्वस्मभि स्सूरो अण्वँ वि याति।।

卐 रुजा दृळ्हा चिद्रक्षस स्सदांसि- पुनान^ इन्द्र~ ऊर्णुहि वि वाजान्। वृश्चोपरिष्टा त्तुजता वधेन- ये अन्ति दूरा दुपनाय मेषाम्।।

卐 स प्रत्नवन्नव्यसे विश्ववार- सूक्ताय पथ॰ कृणुहि प्राचः। ये दुष्षहासो वनुषा बृहन्त- स्ताँस्ते अश्याम पुरुकृ त्पुरुक्षो~।।

卐 एवा पुनानो अप स्स्व1(अ)र्गा- अस्मभ्य न्तोका तनयानि भूरि। शन्नः ≈ क्षेत्र मुरु ज्योतींषि सोम-ज्योङ्न स्सूर्य न्दृशये रिरीहि।।

9.94 **परि सुवान इति षड्चस्य सूक्तस्य, मारीचः कश्यपः पवमानसोम स्त्रिष्टुप्।**

❀07.04.02 卐परि सुवानो हरि रंशु॰ पवित्रे- रथो न सर्जि सनये हियानः। आपच्छ्लोक मिन्द्रियं पूयमान॰- प्रति देवा॰ अजुषत प्रयोभिः।।

卐 अच्छा नृचक्षा^ असर त्पवित्रे- नाम दधान॰ कवि रस्य योनौ। सीद न्होतेव सदने चमूषू-पेमग्मन्नृषय स्सप्त विप्राः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 प्र सुमेधा गातुवि द्विश्वदेव- स्सोमः पुनान स्सद एति नित्यम्। भुवद्विश्वेषु काव्येषुरन्ता-ऽनु जनान्यतते पञ्च धीरः।।

卐 तव त्ये सोम पवमान निण्ये- विश्वे देवा स्त्रय एकादशासः। दश स्वधाभि रधि सानो अव्ये- मृजन्ति त्वा नद्य स्सप्त यह्वीः।।

卐 तन्नु सत्यं पवमानस्याऽस्तु- यत्र विश्वे कारव स्सन्नसन्त। ज्योति र्यदह्ने अकृणोदु लोकं- प्राव न्मनु न्दस्यवे करभीकम्।।

卐 परि सद्मेव पशुमान्ति होता- राजा न सत्य स्समिती रियानः। सोमः पुनानः कलशाँ अयासी- त्सीद न्मृगो न महिषो वनेषु।।

9.95 साकमुक्ष इति पञ्चर्चस्य सूक्तस्य, गौतमो नोधाः पवमानसोम स्त्रिष्टुप्।

❀07.04.03 卐साकमुक्षो मर्जयन्त स्वसारो- दश धीरस्य धीतयो धनुत्रीः। हरिः पर्यद्रवज्जा स्सूर्यस्य- द्रोणन्ननक्षे अत्यो न वाजी।।

卐 सं मातृभि र्न शिशु र्वावशानो- वृषा दधन्वे पुरुवारो अद्भिः। मर्यो न योषा मभि निष्कृतँ य- न्त्सङ्गच्छते कलश उस्रियाभिः।।

卐 उत प्र पिप्य ऊध रघ्न्याया- इन्दु र्धाराभि स्सचते सुमेधाः। मूर्धानङ्गावः पयसा चमू ष्व-ऽभि श्रीणन्ति वसुभि र्न निक्तैः।।

卐 स नो देवेभिः पवमान रदे-न्दो रयि मश्विनँ वावशानः। रथिरायता मुशती पुरन्धि- रऽस्मद्र्य1(अ)गा दावने वसूनाम्।।

卐 नू नो रयि मुप मास्व नृवन्तं- पुनानो वाताप्यँ विश्वश्चन्द्रम्। प्र वन्दितु रिन्दो तार्यायुः- प्रात र्मक्षू धियावसु र्जगम्यात्।।

9.96 अधि यदिति पञ्चर्चस्य सूक्तस्य, घौरः कण्वः पवमानसोमस्त्रिष्टुप्।

❀07.04.04 卐अधि यदस्मि न्वाजिनीव शुभ- स्स्पर्धन्ते धिय स्सूर्ये न विशः। अपो वृणानः पवते कवीय- न्व्रजन्न पशुवर्धनाय मन्म।।

卐 द्विता व्यूर्णवन्नऽमृतस्य धाम- स्वर्विदे भुवनानि प्रथन्त। धियः पिन्वाना स्स्वसरे न गाव- ऋतायन्ती रभि वावश्र इन्दुम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 परि यत्कविः काव्या भरते- शूरो न रथो भुवनानि विश्वा। देवेषु यशो मर्ताय भूष- न्दक्षाय रायः पुरुभूषु नव्यः।।

卐 श्रिये जात श्श्रिय आ निरियाय- श्रियँ वयो जरितृभ्यो दधाति। श्रियँ वसाना^ अमृतत्व माय- न्भवन्ति सत्या समिथा मितद्रौ।।

卐 इष मूर्जे मभ्य1(अ)र्षाश्वङ्गा- मुरु ज्योतिः कृणुहि मत्सि देवान्। विश्वानि हि सुषहा तानि तुभ्यं- पवमान बाधसे सोम शत्रून्।।

**9.97 कनिक्रन्तीति पञ्चर्चस्य सूक्तस्य, कण्वः प्रस्कण्वः पवमानसोम स्त्रिष्टुप्।**

❀07.04.05 卐कनिक्रन्ति हरिरा सृज्यमान- स्सीद न्वनस्य जठरे पुनानः। नृभि र्यतः कृणुते निर्णिजङ्गा-^ अतो मती र्जनयत स्वधाभिः।।

卐 हरि स्सृजानः पथ्या मृतस्ये-यर्ति वाच मरितेव नावम्। देवो देवानाङ्गुह्यानि नामा-ऽविष्कृणोति बर्हिषि प्रवाचे।।

卐 अपामिवे दूर्मय स्तर्तुराणाः- प्र मनीषा^ ईरते सोम मच्छ। नमस्यन्ती रुप च यन्ति सञ्चा-ऽच विशन्त्युशती रुशन्तम्।।

卐 तं मर्मृजानं महिषन्न साना- वंशु न्दुह न्त्युक्षणङ्गिरिष्ठाम्। तँ वावशानं मतय स्सचन्ते- त्रितो बिभर्ति वरुणं समुद्रे।।

卐 इष्य न्वाच मुपवक्तेव होतुः- पुनान^ इन्दो ~वि ष्या मनीषाम्। इन्द्रश्च यत्क्षयथ स्सौभगाय- सुवीर्यस्य पतय स्स्याम।।

**9.98 प्र सेनानीरिति चतुर्विंशत्यृचस्य सूक्तस्य, दैवोदासिः प्रतर्दनः पवमानसोम स्त्रिष्टुप्।**

❀07.04.06 卐प्र सेनानी श्शूरो अग्रे रथाना-ङ्गव्यन्नेति हर्षते अस्य सेना। भद्रा न्कृण्व न्निन्द्रहवा न्त्सखिभ्य-^ आ सोमो वस्त्रा रभसानि दत्ते।।

卐 समस्य हरि हरयो मृज- न्त्यऽश्वहयै रनिशितन्नमोभिः। आ तिष्ठति रथ मिन्द्रस्य सखा- विद्वाँ एना सुमतिँ यात्यऽच्छ।।

卐 स नो देव देवताते पवस्व- महे सोम प्सरस इन्द्रपानः। कृण्वन्नपो वर्षयन्द्या मुतेमा- मुरोरा नो वरिवस्या पुनानः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अजीतयेऽहतये पवस्व- स्वस्तये सर्वतातये बृहते। तदुशन्ति विश्वे इमे सखाय- स्तदहं वश्मि पवमान सोम।।

卐 सोमः पवते जनिता मतीना-ञ्जनिता दिवो जनिता पृथिव्याः। जनिताऽग्ने र्जनिता सूर्यस्य- जनितेन्द्रस्य जनितोत विष्णोः।।

❀07.04.07 卐ब्रह्मा देवानां पदवीः कवीना- मृषि र्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणां स्वधिति र्वनानां- सोमः पवित्र मत्येति रेभन्न्।।

卐 प्रावीविप द्वाच^ ऊर्मिन्न सिन्धु- र्गिर स्सोमः पवमानो मनीषाः। अन्तः~ पश्य न्वृजनेमाऽवराण्या- ऽऽतिष्ठति वृषभो गोषु जानन्न्।।

卐 स मत्सरः पृत्सु वन्वन्नऽवात- स्सहस्ररेता^ अभि वाज मर्ष। इन्द्रायेन्दो~ पवमानो मनीष्य1- (अं)शो रूर्मि मीरय गा^ इषण्यन्न्।।

卐 परि प्रियः कलशे देववात-^ इन्द्राय सोमो रण्यो मदाय। सहस्रधार श्शतवाज^ इन्दु- र्वाजी न सप्ति स्समना जिगाति।।

卐 स पूर्व्यो वसुवि ज्जायमानो- मृजानो अप्सु दुदुहानो अद्रौ। अभिशस्तिपा^ भुवनस्य राजा- विद द्गातुं ब्रह्मणे पूयमानः।।

❀07.04.08 卐त्वया हि नः पितर स्सोम पूर्वे- कर्माणि चक्रुः पवमान धीराः। वन्वन्नवातः परिधी॰ रपोर्णु- वीरेभि रऽश्वै र्मघवा भवा नः।।

卐 यथाऽपवथा मनवे वयोधा-^ अमित्रहा वरिवोवि द्धविष्मान्। एवा पवस्व द्रविण न्दधान-^ इन्द्रे स न्तिष्ठ जनयाऽऽयुधानि।।

卐 पवस्व सोम मधुमा॰ ऋतावा-ऽपो वसानो अधि सानो अव्ये। अव द्रोणानि घृतवान्ति सीद- मदिन्तमो मत्सर^ इन्द्रपानः।।

卐 वृष्टि न्दिव श्शतधारः पवस्व- सहस्रसा^ वाजयु र्देववीतौ। सं सिन्धुभिः कलशे वावशान- स्समुस्त्रियाभिः प्रतिरन्न^ आयुः।।

卐 एष स्य सोमो मतिभिः पुनानो-ऽत्यो न वाजी तरतीदरातीः। पयो न दुग्ध मदिते रिषिर- मुर्विव गातु स्सुयमो न वोळ्हा।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

❀07.04.09 卐स्वायुध स्सोतृभिः॒ पूयमानो-ऽभ्यर्ष गुह्यञ्चारु नाम। अभि वाजं सप्तिरिव श्रवस्या-ऽभि वायु मभि गा॑ देव सोम।।

卐 शिशुञ्जज्ञानं हर्यतं मृजन्ति- शुम्भन्ति वह्निं मरुतो गणेन। कवि र्गीर्भिः॒ काव्येना कवि -स्सन्त्सोमः॒ पवित्र मत्येति रेभन्न्।।

卐 ऋषिमना य॑ ऋषिकृ त्स्वर्षा- स्सहस्रणीथः॒ पदवीः॒ कवीनाम्। तृतीयन्धाम महिष ॒स्सिषास-न्त्सोमो विराज मनु राजतिष्टुप्।।

卐 चमूष च्छ्येन श्शकुनो विभृत्वा- गोविन्दु र्द्रप्स॑ आयुधानि बिभ्रत्। अपा मूर्मिं सचमान स्समुद्र-न्तुरीय न्धाम महिषो विवक्ति।।

卐 मर्यो न शुभ्र स्तन्वं मृजानो-ऽत्यो न सृत्वा सनये धनानाम्। वृषेव यूथा परि कोश मर्ष- न्कनिक्रद च्चम्वो3(ओ)रा विवेश।।

❀07.04.10 卐पवस्वेन्दो~ पवमानो महोभिः॒- कनिक्रद त्परि वाराण्यऽर्ष। क्रीळञ्चम्वो3(ओ)रा विश पूयमान-॑ इन्द्रन्ते रसो मदिरो ममत्तु।।

卐 प्रास्य धारा बृहती रसृग्रन्न-ऽक्तो गोभिः॒ कलशाऽ॒ आ विवेश। साम कृण्व न्त्सामन्यो विपश्चि-त्क्रन्दन्नेत्यऽभि सख्युर्न जामिम्।।

卐 अपघ्नन्नेषि पवमान शत्रू- न्प्रियान्न जारो अभिगीत॑ इन्दुः। सीदन्वनेषु शकुनो न पत्वा- सोमः॒ पुनानः॒ कलशेषु सत्ता।।

卐 आ ते रुचः॒ पवमानस्य सोम- योषेव यन्ति सुदुघा स्सुधाराः। हरि रानीतः॒ पुरुवारो अप्स्व-ऽचिक्रद त्कलशे देवयूनाम्।।

**षष्ठेऽनुवोके सप्तसूक्तानि**

**9.99 अस्य प्रेषेत्यष्टपञ्चाशदृचस्य सूक्तस्याऽद्यानां तिसृणां मैत्रावरुणि र्वसिष्ठ श्चतुर्थ्यादि तिसृणां वासिष्ठ इन्द्रप्रमतिः, ततो द्वितीयादि नव तृचानां पवमान सोम स्त्रिष्टुप्, सप्तम्यादि तिसृणां वासिष्ठो वृषगणो दशम्यादि तिसृणां वासिष्ठो मन्युस्त्रयोदश्यादि तिसृणां वासिष्ठ उपमन्युः, षोडश्यादि तिसृणां वासिष्ठो व्याघ्रपादेकोनाविंशयादि तिसृणां वासिष्ठ श्शक्ति र्द्वाविंशयादि तिसृणां वासिष्ठः कर्णश्रुत्पञ्चविंशयादि तिसृणां वासिष्ठो मृळीकोऽष्टविंशयादि तिसृणां वासिष्ठो वसुक्र एकत्रिंशयादि**

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

चतुर्दशानां शाक्त्यः पराशरः, पञ्चचत्वारिंश्यादि चतुर्दशानामाङ्गिरसः कुत्स ऋषयः पवमान सोम स्त्रिष्टुप्।

❀07.04.11 卐अस्य प्रेषा हेमना पूयमानो- देवो देवेभि स्सम॑ऽपृक्त रसम्। सुतः॒ पवित्रं पर्येति रेभ- न्मितेव सद्म पशुमान्ति होता।।

卐 भद्रा वस्त्रा समन्या3(आ) वसानो- महा न्कवि र्निवचनानि शंसन्न्। आ वच्यस्व चम्वोः॒ पूयमानो- विचक्षणो जागृवि र्देववीतौ।।

卐 समु प्रियो मृज्यते सानो अव्ये- यशस्तरो यशसाङ्क्षैतो अस्मे। अभि स्वर धन्वा पूयमानो- यूयं पात स्वस्तिभि स्सदा नः।।

卐 प्र गायताभ्य॑ऽर्चाम देवा- न्त्सोमं हिनोत महते धनाय। स्वादुः॒ पवाते अति वार मव्य- माऽऽसीदाति कलश न्देवयुर्नः।।

卐 इन्दु र्देवाना मुप सख्य माय- न्त्सहस्रधारः॒ पवते मदाय। नृभि स्स्तवानो अनु धाम पूर्व- मऽगन्निन्द्रं महते सौभगाय।।

❀07.04.12 卐स्तोत्रे राये हरि रर्षा पुनान- इन्द्रं मदो गच्छतु ते भराय। देवै र्याहि सरथं राधो अच्छा -यूयं पात स्वस्तिभि स्सदा नः।।

卐 प्र काव्य मुशनेव ब्रुवाणो- देवो देवानाञ्जनिमा विवक्ति। महिव्रत श्शुचिबन्धुः॒ पावकः॒- पदा वराहो अभ्येति रेभन्न्।।

卐 प्र हंसास स्तृपलं मन्यु.म-ऽच्छामादस्तँ वृषगणा अयासुः। आङ्गूष्य1(अं) पवमानं सखायो- दुर्मर्षं साकं प्र वदन्ति वाणम्।।

卐 स रंहत उरुगायस्य जूतिँ- वृथा क्रीळन्तं मिमते न गावः। परीणसङ्कृणुते तिग्मश्रृङ्गो- दिवा हरि र्ददृशे नक्त मृज्रः।।

卐 इन्दु र्वाजी पवते गोन्योघा- इन्द्रे सोम स्सह इन्व न्मदाय। हन्ति रक्षो बाधते पर्यराती- र्वरिवः॒ कृण्व न्वृजनस्य राजा।।

❀07.04.13 卐अध धारया मध्वा पृचान- स्तिरो रोम पवते अद्रिदुग्धः। इन्दु रिन्द्रस्य सख्यञ्जुषाणो- देवो देवस्य मत्सरो मदाय।।

卐 अभि प्रियाणि पवते पुनानो- देवो देवान्त्स्वेन रसेन पृञ्चन्न्। इन्दु र्धर्मा.ण्यृतुथा वसानो- दश क्षिपो अव्यत सानो अव्ये।।

卐 वृषा शोणो अभिकनिक्रदद्गा-^ नदय न्नेति पृथिवी मुत द्याम्। इन्द्रस्येव वग्नुरा शृण्व आजौ- प्रचेतयन्नऽर्षति वाच मेमाम्।।

卐 रसाय्यः पयसा पिन्वमान-^ ईरय न्नेषि मधुमन्त मंशुम्। पवमान स्सन्तनि मेषि कृण्व- न्निन्द्राय सोम परिषिच्यमानः।।

卐 एवा पवस्व मदिरो मदायो-दग्राभस्य नमय न्वधस्नैः। परि वर्ण भरमाणो रुशन्त- ङ्गव्युर्नो अर्ष परि सोम सिक्तः।।

❀07.04.14 卐जुष्टी न^ इन्दो~ सुपथा सुगा- न्युरौ पवस्व वरिवांसि कृण्वन्न्। घनेव विष्व ग्दुरितानि विघ्न-न्नधि ष्णुना धन्व सानो अव्ये।।

卐 वृष्टिन्नो अर्ष दिव्याञ्जिगत्नु- मिळावतीं शङ्गयीञ्जीरदानुम्। स्तुकेव वीता धन्वा विचिन्व -न्बन्धूꣳ रिमाꣳ अवराꣳ इन्दो~ वायून्।।

卐 ग्रन्थिन्न वि ष्य ग्रथितं पुनान^- ऋजुञ्च गातुं वृजिनञ्च सोम। अत्यो न क्रदो हरिरा सृजानो- मर्यो देव धन्व पस्त्यावान्।।

卐 जुष्टो मदाय देवतात इन्दो~- परि ष्णुना धन्व सानो अव्ये। सहस्रधार स्सुरभि रदब्धः- परि स्रव वाजसातौ नृषह्ये।।

卐 अरश्मानो येऽरथा^ अयुक्ता-^ अत्यासो न ससृजानास^ आजौ। एते शुक्रासो धन्वन्ति सोमा-^ देवास स्ताꣳ उप याता पिबध्यै।।

❀07.04.15 卐एवा न इन्दो~ अभि देववीतिं- परि स्रव नभो अर्ण श्चमूषु। सोमो अस्मभ्यङ्काम्यं बृहन्तं- रयि न्ददातु वीरवन्त मुग्रम्।।

卐 तक्ष द्यदी मनसो वेनतो वा-ग्ज्येष्ठस्य वा धर्मणि क्षो रनीके। आदीमाय न्वरमा वावशाना-^ जुष्टं पतिङ्कलशे गाव इन्दुम्।।

卐 प्र दानुदो दिव्यो दानुपिन्व-^ ऋत मृताय पवते सुमेधाः। धर्मा भुव द्वृजन्यस्य राजा- प्र रश्मिभि र्दशभि र्भारि भूम।।

卐 पवित्रेभिः पवमानो नृचक्षा- राजा देवाना मुत मर्त्यानाम्। द्विता भुव द्रयिपती रयीणा- मृतं भर त्सुभृतश्चार्विन्दुः।।

卐 अर्वाऽइव श्रवसे साति मच्छे-न्द्रस्य वायो रभि वीति मर्ष। स न स्सहस्रा बृहती रिषो दा- भवा सोम द्रविणोवि त्पुनानः।।

❀07.04.16 卐देवाव्यो नः परिषिच्यमानाः-क्षयं सुवीर न्धन्वन्तु सोमाः। आयज्यव स्सुमतिँ विश्ववारा- होतारो न दिवियजो मन्द्रतमाः।।

卐 एवा देव देवताते पवस्व- महे सोम प्सरसे देवपानः। मह श्चिद्धि ष्मसि हिता स्समर्ये- कृधि सुष्ठाने रोदसी पुनानः।।

卐 अश्वो न क्रदो वृषभि र्युजान- स्सिंहो न भीमो मनसो जवीयान्। अर्वाचीनैः पथिभिर्ये रजिष्ठा- आ पवस्व सौमनसन्न इन्दो।।

卐 शत न्धारा देवजाता असृग्र- न्त्सहस्रमेनाः कवयो मृजन्ति। इन्दो सनित्र न्दिव आ पवस्व- पुरएताऽसि महतो धनस्य।।

卐 दिवो न सर्गा अससृग्र मह्नां- राजा न मित्रं प्र मिनाति धीरः। पितुर्न पुत्रः क्रतुभि र्यतान- आ पवस्व विशे अस्या अजीतिम्।।

❀07.04.18 卐प्र ते धारा मधुमती रसृग्र- न्वारा न्यत्पूतो अत्ये.ष्यव्यान्। पवमान पवसे धाम गोना- ञ्जज्ञान स्सूर्य मपिन्वो अर्कैः।।

卐 कनिक्रद दनु पन्था मृतस्य- शुक्रो वि भास्यमृतस्य धाम। स इन्द्राय पवसे मत्सरवा- न्हिन्वानो वाचं मतिभिः कवीनाम्।।

卐 दिव्य स्सुपर्णोऽव चक्षि सोम- पिन्व न्धाराः कर्मणा देववीतौ। एन्दो विश कलशं सोमधान- ङ्क्रन्दन्निहि सूर्यस्योप रश्मिम्।।

卐 तिस्रो वाच ईरयति प्र वह्नि- र्ऋतस्य धीतिं ब्रह्मणो मनीषाम्। गावो यन्ति गोपतिं पृच्छमाना- स्सोमँ यन्ति मतयो वावशानाः।।

卐 सोमङ्गावो धेनवो वावशाना- स्सोमँ विप्रा मतिभिः पृच्छमानाः। सोम स्सुतः पूयते अज्यमान- स्सोमे अर्का स्त्रिष्टुभ स्सन्नवन्ते।।

❀07.04.18 卐एवा न स्सोम परिषिच्यमान-^ आ पवस्व पूयमान स्स्वस्ति। इन्द्रमा विश बृहता रवेण- वर्धया वाचञ्जनया पुरन्धिम्।।

卐 आ जागृवि र्विप्र^ ऋता मतीनां- सोमः पुनानो असद च्चमूषु। सपन्ति यं मिथुनासो निकामा^- अध्वर्यवो रथिरास स्सुहस्ताः।।

卐 स पुनान^ उप सूरे न धातोऽ-भे~ अप्रा^ रोदसी वि ष आवः। प्रिया चिद्यस्य प्रियसास^ ऊती- स तू धनङ्कारिणे न प्र यंसत्।।

卐 स वर्धिता वर्धनः पूयमान- स्सोमो मीढ्वाँ अभि नो ज्योतिषाऽऽवीत्। येना नः पूर्वे पितरः पदज्ञा- स्स्वर्विदो अभि गा^ अद्रि मुष्णन्न्।।

卐 अक्रा न्त्समुद्रः प्रथमे विधर्म- न्जनय न्प्रजा^ भुवनस्य राजा। वृषा पवित्रे अधि सानो अव्ये- बृह त्सोमो वावृधे सुवान^ इन्दुः।।

❀07.04.19 卐मह त्तत्सोमो महिष श्चकारा-पाँ यद्गर्भोऽवृणीत देवान्। अदधा दिन्द्रे पवमान^ ओजो- ऽजनय त्सूर्ये ज्योति रिन्दुः।।

卐 मत्सि वायु मिष्टये राधसे च- मत्सि मित्रावरुणा पूयमानः। मत्सि शर्धो मारुतं मत्सि देवा- न्मत्सि द्यावापृथिवी~ देव सोम।।

卐 ऋजुः पवस्व वृजिनस्य हन्ता-ऽपामीवां बाधमानो मृधश्च। अभिश्रीण न्पयः पयसाऽभि गोना- मिन्द्रस्य त्वन्तव वयं सखायः।।

卐 मध्वस्सूदं पवस्व वस्व उत्सँ- वीरञ्च न^ आ पवस्वा भगञ्च। स्वदस्वेन्द्राय पवमान इन्दो~- रयिञ्च न^ आ पवस्वा समुद्रात्।।

卐 सोम स्सुतो धारयाऽत्यो न हित्वा- सिन्धुर्न निम्न मभि वाज्यक्षाः। आ योनिँ वन्य मसद त्पुनान- स्समिन्दु र्गोभि रसर त्समद्भिः।।

❀07.04.20 卐एष स्य ते पवत इन्द्र सोम- श्चमूषु धीर^ उशते तवस्वान्। स्वर्चक्षा रथिर स्सत्यशुष्मः- कामो न यो देवयता मसर्जि।।

卐 एष प्रत्नेन वयसा पुनान- स्तिरो वर्पांसि दुहितु र्दधानः। वसान श्शर्म त्रिवरूथ मऽप्सु- होतेव याति समनेषु रेभन्न्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 नू नस्त्वं रथिरो देव सोम- परि स्रव चम्वोः पूयमानः। अप्सु स्वादिष्ठो मधुमाꣳ ऋतावा- देवो न य स्सविता सत्यमन्मा।।

卐 अभि वायुं वीत्यर्षा गृणानो3(ओ)-ऽभि मित्रावरुणा पूयमानः। अभी नर न्धीजवनं रथेष्ठा- मभीन्द्रं वृषणं वज्रबाहुम्।।

卐 अभि वस्त्रा सुवसना न्यर्षा-ऽभि धेनू स्सुदुघाः पूयमानः। अभि चन्द्रा भर्तवे नो हिरण्या-ऽभ्यऽश्वा न्रथिनो देव सोम।।

❀07.04.21 卐अभी नो अर्ष दिव्या वसू- न्यभि विश्वा पार्थिवा पूयमानः। अभि येन द्रविण मश्नवा- माभ्यार्षेय.ञ्जमदग्निवन्नः।।

卐 अया पवा पवस्वैना वसूनि- माँश्चत्व इन्दो~ सरसि प्र धन्व। ब्रध्न श्चिदत्र वातो न जूतः- पुरुमेध श्चित्तकवे नरन्दात्।।

卐 उत न एना पवया पवस्वा-ऽधि श्रुते श्रवाय्यस्य तीर्थे। षष्टिं सहस्रा नैगुतो वसूनि- वृक्षन्न पक्व न्धूनव द्रणाय।।

卐 महीमे~ अस्य वृषनाम शूषे~ माँश्चत्वे वा पृशने वा वधत्रे~। अस्वापय न्निगुत स्स्नेहय- च्चापामित्राꣳअपाचितो अचेतः।।

卐 सन्त्री पवित्रा विततान्येष्य-न्वेक न्धावसि पूयमानः। असि भगो असि दात्रस्य दाता-ऽसि मघवा मघवद्भ्य इन्दो~।।

❀07.04.22 卐एष विश्ववि त्पवते मनीषी- सोमो विश्वस्य भुवनस्य राजा। द्रप्साꣳ ईरय न्विदथे ष्विन्दु-र्वि वारमव्यं समयाऽति याति।।

卐 इन्दुं रिहन्ति महिषा अदब्धाः- पदे रेभन्ति कवयो न गृध्राः। हिन्वन्ति धीरा दशभिः≈क्षिपाभि- स्समञ्जते रूप मपां रसेन।।

卐 त्वया वयं पवमानेन सोम- भरे कृतं वि चिनुयाम शश्वत्। तन्नो मित्रो वरुणो मामहन्ता- मदिति स्सिन्धुः पृथिवी उत द्यौः।।

9.100 **अभि न इति द्वादशर्चस्य सूक्तस्याम्बरीष ऋजिश्वानौ पवमान सोमोऽनुष्टुबेकादशी बृहती।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀07.04.23 卐अभि नो वाजसातमं- रयि मर्ष पुरुस्पृहम्। इन्दो~ सहस्रभर्णस- न्तुविद्युम्नँ विभ्वासहम्।।

卐 परि ष्य सुवानो अव्ययं- रथे न वर्माव्यत। इन्दुरभि द्रुणा हितो- हियानो धाराभि रक्षाः~।।

卐 परि ष्य सुवानो अक्षा~- इन्दु रव्ये मदच्युतः। धारा य^ ऊर्ध्वो अध्वरे- भ्राजा नैति गव्ययुः।।

卐 स हि त्वन्देव शश्वते- वसु मर्ताय दाशुषे। इन्दो~ सहस्रिणं रयिं -शताऽत्मानँ विवाससि।।

卐 वयन्ते अस्य वृत्रह- न्वसो~ वस्वः पुरुस्पृहः। नि नेदिष्ठतमा^ इष -स्स्याम सुम्नस्याध्रिगो~।।

卐 द्विर्यं पञ्च स्वयशसं- स्वसारो अद्रिसंहतम्। प्रिय मिन्द्रस्य काम्यं- प्रस्नापय-न्त्यूर्मिणम्।।

❀07.04.24 卐परि त्यं हर्यतं हरिं- बभ्रुं पुनन्ति वारेण। यो देवा न्विश्वाः इत्परि- मदेन सह गच्छति।।

卐 अस्य वो ह्यवसा- पान्तो दक्षसाधनम्। य स्सूरिषु श्रवो बृह- द्दधे स्व1(अ)र्ण हर्यतः।।

卐 स वाँ यज्ञेषु मानवी~- इन्दु र्जनिष्ट रोदसी~। देवो देवी~ गिरिष्ठा^ -अस्रेध न्तन्तुविष्वणि।।

卐 इन्द्राय सोम पातवे- वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते- देवाय सदनासदे।।

卐 ते प्रत्नासो व्युष्टिषु- सोमाः पवित्रे अक्षरन्न्। अपप्रोथन्त स्सनुत हुरश्चितः-प्रात~ स्ताः अप्रचेतसः।।

卐 तं सखायः पुरोरुचँ- यूयँ वयञ्च सूरयः। अश्याम वाजगन्ध्यं- सनेम वाजपस्त्यम्।।

9.101 आ हर्यतायेत्यष्टर्चस्य सूक्तस्य, काश्यपौ रेभसूनू पवमान सोमोऽनुष्टुबाद्या बृहती।

❀07.04.25 卐आ हर्यताय धृष्णवे- धनु स्तन्वन्ति पौंस्यम्। शुक्राँ वय न्त्यसुराय निर्णिजँ- विपा मग्रे महीयुवः।।

卐 अध क्षपा परिष्कृतो- वाजाः अभि प्र गाहते। यदी विवस्वतो धियो- हरिं हिन्वन्ति यातवे।।

卐 तमस्य मर्जयामसि- मदो य^ इन्द्रपातमः। यङ्गाव^ आसभि र्दधुः- पुरा नूनञ्च सूरयः।।

卐 तङ्गाथया पुराण्या- पुनान मभ्यनूषत। उतो~ कृपन्त धीतयो- देवाना न्नाम बिभ्रतीः।।

卐 तमुक्षमाण मव्यये- वारे पुनन्ति धर्णसिम्। दूतन्न पूर्वचित्तय -आ शासते मनीषिणः।।

❀07.04.2 卐स पुनानो मदिन्तम- स्सोम श्चमूषु सीदति। पशौ न रेत^ आदध- त्पति र्वचस्यते धियः।।

卐 स मृज्यते सुकर्मभि- र्देवो देवेभ्य स्सुतः। विदे यदासु सन्ददि- र्महो रपो वि गाहते।।

卐 सुत इन्दो~ पवित्र आ- नृभि र्यतो वि नीयसे। इन्द्राय मत्सरिन्तम -श्चमूष्वा नि षीदसि।।

9.102 **अभी नवन्त इति नवर्चस्य सूक्तस्य, काश्यपौ रेभसूनू पवमान सोमोऽनुष्टुप्।**

07.04.27 卐अभी नवन्ते अद्रुहः- प्रिय मिन्द्रस्य काम्यम्। वत्सन्न पूर्व आयुनि- जातं रिहन्ति मातरः।।

卐 पुनान इन्द~ वा भर- सोम द्विबर्हसं रयिम्। त्वँ वसूनि पुष्यसि~ विश्वानि दाशुषो गृहे।।

卐 त्वन्धियं मनोयुजं- सृजा वृष्टिन्न तन्यतुः। त्वँ वसूनि पार्थिवा- दिव्या च सोम पुष्यसि।।

卐 परि ते जिग्युषो यथा- धारा सुतस्य धावति। रंहमाणा व्य1(अ)व्ययँ -वारँ वाजीव सानसिः।।

卐 क्रत्वे दक्षाय नः कवे- पवस्व सोम धारया। इन्द्राय पातवे- सुतो मित्राय वरुणाय च।।

07.04.28 卐पवस्व वाजसातमः- पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे- देवेभ्यो मधुमत्तमः।।

卐 त्वां रिहन्ति मातरो- हरिं पवित्रे अद्रुहः। वत्स ञ्जात न्न धेनवः- पवमान विधर्मणि।।

卐 पवमान महि श्रव- श्चित्रेभि र्यासि रश्मिभिः। शर्ध न्तमांसि जिघ्नसे -विश्वानि दाशुषो गृहे।।

卐 त्वन्द्याञ्च महिव्रत- पृथिवीञ्चाऽति जभ्रिषे। प्रति द्रापि ममुञ्चथाः- पवमान महित्वना।।।। इति चतुर्थोध्याय स्समाप्तः।।

## ॐ ॐसप्तमाष्टके पञ्चमाध्यायः (वर्गाः 1-33)

9.103 **पुरोजितीति षोळशर्चस्य सूक्तस्याऽद्यानां तिसृणां श्यावाश्वि रन्धीगुश्चतुर्थ्यादि तिसृणां नाहुषो ययातिः सप्तम्यादि तिसृणां मानवो नहुषो दशम्यादि तिसृणां सांवरणो मनु स्त्रयोदश्यादि चतसृणां वैश्वामित्रः प्रजापतिः पवमान सोमोऽनुष्टुब्द्वितीया तृतीये गायत्र्यौ।**

07.05.01 卐पुरोजिती वो अन्धस- स्सुताय मादयित्नवे। अप श्वानं श्नथिष्टन- सखायो दीर्घजिह्व्यम्।।

卐 यो धारया पावकया- परिप्रस्यन्दते सुतः। इन्दु रऽश्वो न कृत्व्यः।।

卐 तन्दुरोष मभी नर- स्सोमँ विश्वाच्या धिया। यज्ञं हिन्व न्त्यद्रिभिः।।

卐 सुतासो मधुमत्तमा- स्सोमा^ इन्द्राय मन्दिनः। पवित्रवन्तो अक्षर- न्देवा न्गच्छन्तु वो मदाः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इन्दु रिन्द्राय पवत- इर्ति देवासो अब्रुवन्न्। वाचस्पति र्मखस्यते- विश्व स्येशान^ ओजसा।।

❀07.05.02 卐सहस्रधारः पवते- समुद्रो वाचमीङ्खयः। सोमः पती रयीणां- सखेन्द्रस्य दिवेदिवे।।

卐 अयं पूषा रयि र्भग- स्सोमः पुनानो अर्षति। पति र्विश्वस्य भूमनो- व्यऽख्य द्रोदसी उभे~।।

卐 समु प्रिया^ अनूषत- गावो मदाय घृष्वयः। सोमासः कृण्वते पथः- पवमानास^ इन्दवः।।

卐 य^ ओजिष्ठ स्तमा भर- पवमान श्रवाय्यम्। यः पञ्च चर्षणी रभि- रयिँ येन वनामहै।।

卐 सोमाः पवन्त इन्दवो-ऽस्मभ्य ङ्गातुवित्तमाः। मित्रा स्सुवाना अरेपस- स्स्वाध्य स्स्वर्विदः।।

❀07.05.03 卐सुष्वाणासो व्यद्रिभि- श्चिताना^ गोरधि त्वचि। इषं मस्मभ्य मभित- स्समस्वर न्वसुविदः।।

卐 एते पूता^ विपश्चित- स्सोमासो दध्याशिरः। सूर्यासो न दर्शतासो- जिगत्नवो ध्रुवा^ घृते।।

卐 प्र सुन्वानस्यान्धसो- मर्तो न वृत तद्वचः। अप श्वान मराधसं- हता मखन्न भृगवः।।

卐 आ जामि रत्के अव्यत- भुजे न पुत्र^ ओण्योः। सरज्जारो न योषणाँ- वरो न योनि मासदम्।।

卐 स वीरो दक्षसाधनो- वि य स्तस्तम्भ रोदसी। हरिः पवित्रे अव्यत- वेधा^ न योनि मासदम्।।

卐 अव्यो वारेभिः पवते- सोमो गव्ये अधि त्वचि। कनिक्रद द्वृषा हरि -रिन्द्रस्याऽभ्येति निष्कृतम्।।

9.104 **क्राणा शिशुरित्यष्टर्चस्य सूक्तस्याऽस्यत्रितः पवमान सोम उष्णिक्।**

❀07.05.04 卐क्राणा शिशु र्महीनां- हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुव दध द्विता।।

卐 उप त्रितस्य पाष्यो3(ओ)- रभक्त यद्गुहा पदम्। यज्ञस्य सप्त धामभि रध प्रियम्।।

卐 त्रीणि त्रितस्य धारया- पृष्ठेष्वेरया रयिम्। मिमीते अस्य योजना वि सुक्रतुः।।

卐 जज्ञानं सप्त मातरो- वेधा मशासत श्रिये। अय न्ध्रुवो रयीणाञ्चिकेत यत्।।

卐 अस्य व्रते सजोषसो- विश्वे देवासो अद्रुहः। स्पार्हा^ भवन्ति रन्तयो जुषन्त यत्।।

❀07.05.05 卐यमी गर्भ मृतावृधो- दृशे चारु मजीजनन्न्। कविं मंहिष्ठ मध्वरे पुरुस्पृहम्।।

卐 समीचीने~ अभि त्मना- यह्वी~ ऋतस्य मातरा। तन्वाना^ यज्ञ मानुष ग्यदञ्जते।।

卐 क्रत्वा शुक्रेभि रक्षभिर्- ऋणो रप व्रज न्दिवः। हिन्वन्नृतस्य दीधितिं प्राध्वरे।।

9.105 **प्र पुनानायेति षड्टचस्य सूक्तस्याऽस्यो द्वितः पवमान सोम उष्णिक्।।**

❀07.05.06 卐प्र पुनानाय वेधसे- सोमाय वच^ उद्यतम्। भृतिन्न भरा मतिभि र्जुजोषते।।

卐 परि वाराण्यव्यया- गोभिरञ्जानो अर्षति। त्री षधस्था पुनानः कृणुते हरिः।।
卐 परि कोशं मधुश्चुतं- मव्यये वारे अर्षति। अभि वाणीर् ऋषीणां सप्त नूषत।।
卐 परि णेता मतीनाँ- विश्वदेवो अदाभ्यः। सोमः पुनान श्चम्वो र्विशद्धरिः।।
卐 परि दैवी रनु स्वधा-^ इन्द्रेण याहि सरथम्। पुनानो वाघ द्वाघद्भि रमर्त्यः।।
卐 परि सप्तिर्न वाजयु- र्देवो देवेभ्य स्सुतः। व्यानशिः पवमानो वि धावति।।

**सप्तमेऽनुवाके एकादश सूक्तानि**

9.106 **सखाय इति षड्चस्य सूक्तस्य, काश्यपौ पर्वत नारदौ पवमान सोम उष्णिक् (शिखण्डिन्या वप्सरसा वृषिकेऽत्र पाक्षिके किञ्च पर्वतनारदौ काण्वावपि)।**

07.05.07 卐सखाय^ आ नि षीदत- पुनानाय प्र गायत। शिशुन्न यज्ञैः परि भूषत श्रिये।।
卐 समी वत्सन्न मातृभि- स्सृजता गयसाधनम्। देवाव्य1(अं) मदं मभि द्विशवसम्।।
卐 पुनाता दक्षसाधनँ- यथा शर्धाय वीतये। यथा मित्राय वरुणाय शन्तमः।।
卐 अस्मभ्यन्त्वा वसुविदं- मभि वाणी रनूषत। गोभिष्टे वर्णं मभि वासयामसि।।
卐 स नो मदानां पत- इन्दो~ देवप्सरा^ असि। सखेव सख्ये गातुवित्तमो भव।।
卐 सनेमि कृध्य1(अ)स्मदा- रक्षस.ङ्कञ्चि दत्रिणम्। अपादेव न्द्वयु मंहो युयोधि नः।।

9.107 **तं व इति षड्चस्य सूक्तस्य, पर्वतनारदौ पवमान सोम उष्णिक्।**

07.05.08 卐तँ व स्सखायो मदाय- पुनान मभि गायत। शिशुन्न यज्ञै स्स्वदयन्त गूर्तिभिः।।
卐 सँ वत्सइव मातृभि- रिन्दुर्हिन्वानो अज्यते। देवावी मदो मतिभिः परिष्कृतः।।
卐 अय न्दक्षाय साधनो-ऽयं शर्धाय वीतये। अय न्देवेभ्यो मधुमत्तम स्सुतः।।
卐 गोमन्न^ इन्दो~ अश्ववत्- स्सुत स्सुदक्ष धन्व। शुचिन्ते वर्ण मधि गोषु दीधरम्।।
卐 स नो हरीणां पत- इन्दो~ देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव।।
卐 सनेमि त्वमस्मदाँ- अदेवङ्क.ञ्चिदत्रिणम्। साह्वाँ इन्दो~ परि बाधो अप द्वयुम्।।

9.108 **इन्द्रमच्छेति चतुर्दशर्चस्य सूक्तस्याऽऽद्यानां तिसृणां चाक्षुषोऽग्निश्चतुर्थ्यादि तिसृणां मानवश्चक्षुः सप्तम्यादि तिसृणामाप्सवो मनुर्दशम्यादि पञ्चानां चाक्षुषोऽग्निः पवमान सोम उष्णिक्।**

07.05.09 卐इन्द्र मच्छ सुता^ इमे- वृषणँ यन्तु हरयः। श्रुष्टी जातास^ इन्दव स्स्वर्विदः।।

卐 अयं भराय सानसि- रिन्द्राय पवते सुतः। सोमो जैत्रस्य चेतति यथा विदे।।

卐 अस्ये दिन्द्रो मदेष्वा- ग्राभङ्गृभ्णीत सानसिम्। वज्रञ्च वृषणं भरत्समप्सुजित्।।

卐 प्र धन्वा सोम जागृवि- रिन्द्रायेन्दो~ परि स्रव। द्युमन्तं शुष्ममा भरा स्वर्विदम्।।

卐 इन्द्राय वृषणं मदं- पवस्व विश्वदर्शतः। सहस्रयामा पथिकृ द्विचक्षणः।।

❀07.05.10 卐अस्मभ्यङ्गातुवित्तमो- देवेभ्यो मधुमत्तमः। सहस्रँ याहि पथिभिः कनिक्रदत्।।

卐 पवस्व देववीतय- इन्दो~ धाराभि रोजसा। आ कलशं मधुमा न्त्सोम न स्सदः।।

卐 तव द्रप्सा^ उदप्रुत^- इन्द्रं मदाय वावृधुः। त्वान्देवासो अमृताय कं पपुः।।

卐 आ न^ स्सुतास^ इन्दवः- पुनाना^ धावता रयिम्। वृष्टिद्यावो रीत्याप स्वर्विदः।।

卐 सोमः पुनान^ ऊर्मिणा-ऽव्यो वारँ वि धावति। अग्रे वाचः पवमानः कनिक्रदत्।।

❀07.05.11 卐धीभि र्हिन्वन्ति वाजिनँ- वने क्रीळन्त मत्यविम्। अभि त्रिपृष्ठं मतय स्समस्वरन्न्।।

卐 असर्जि कलशाँ अभि- मीळ्हे सप्ति र्न वाजयुः। पुनानो वाचञ्जनय.न्नऽसिष्यदत्।।

卐 पवते हर्यतो हरि- रति ह्वरांसि रंह्या। अभ्यर्ष न्त्स्तोतृभ्यो वीरव द्यशः।।

卐 अया पवस्व देवयु- र्मधो र्धारा^ असृक्षत। रेभ न्पवित्रं पर्येषि विश्वतः।।

**9.109 परीत इति षड्विंशत्यृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो मारीचः कश्यपो राहूगणो गोतमो भौमोऽत्रिर्गाथिनो विश्वामित्रो भार्गवो जमदग्नि र्मैत्रावरुणि र्वसिष्ठ ऋषयः, पवमान सोमो देवता, आद्या चतुर्थी षष्ठ्यष्टमी नवमी दशमी चतुर्दश्य स्सप्तदश्याद्ययुजश्च बृहत्यः, द्वितीया पञ्चमी सप्तम्येकादशी त्रयोदशी पञ्चदश्योऽष्टादश्यादि युजश्च सतो बृहत्यः, तृतीया षोडशी च द्विपदाविराट्।**

❀07.05.12 卐परीतो षिञ्चता सुतं- सोमो य^ उत्तमं हविः। दधन्वाँ यो नर्यो अप्स्व1(अ)न्तरा- सुषाव सोम मद्रिभिः।।

卐 नूनं पुनानोऽविभिः परि स्रवा-ऽदब्ध स्सुरभिन्तरः। सुते चित्त्वाऽप्सु मदामो अन्धसा- श्रीणन्तो गोभि रुत्तरम्।।

卐 परि सुवान श्चक्षसे देवमादनः- क्रतु रिन्दु र्विचक्षणः।।

卐 पुनान स्सोम धारया-ऽपो वसानो अर्षसि। आ रत्नधा^ योनि मृतस्य- सीद स्युत्सो देव हिरण्ययः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 दुहान^ ऊधं दिव्यं मधु प्रियं- प्रत्नं सधस्थ मासदत्। आपृच्छ्य न्धरुणं वाज्यर्षति- नृभि र्धूतो विचक्षणः।।

❀07.05.13 卐पुनान स्सोम जागृवि- रव्यो वारे परि प्रियः। त्वं विप्रो अभवोऽङ्गिरस्तमो- मध्वा यज्ञं मिमिक्ष नः।।

卐 सोमो मीढ्वा न्पवते गातुवित्तम-^ ऋषि र्विप्रो विचक्षणः। त्वङ्कवि रभवो देववीतम-^ आ सूर्यं रोहयो दिवि।।

卐 सोम^ उषुवाण स्सोतृभि- रधिष्णुभि रवीनाम्। अश्वयेव हरिता याति धारया- मन्द्रया याति धारया।।

卐 अनूपे गोमा न्गोभि रक्षा~- स्सोमो दुग्धाभि रक्षाः~। समुद्रन्न संवरणा न्यग्म- न्मन्दी मदाय तोशते।।

卐 आ सोम सुवानो अद्रिभि- स्तिरो वारा.ण्यव्यया। जनो न पुरि चम्वो र्विशद्धरि- स्सदो वनेषु दधिषे।।

❀07.05.14 卐स मामृजे तिरो अण्वानि मेष्यो- मीळ्हे सप्तिर्न वाजयुः। अनुमाद्य॰ पवमानो मनीषिभि- स्सोमो विप्रेभिर् ऋक्वभिः।।

卐 प्र सोम देववीतये- सिन्धुर्न पिप्ये अर्णसा। अंशो॰ पयसा मदिरो न जागृवि- रच्छा कोशं मधुश्चुतम्।।

卐 आ हर्यतो अर्जुने अत्के अव्यत- प्रिय स्सूनुर्न मर्ज्यः। तमीं हिन्व न्त्यपसो यथा रथ-न्नदीष्वाऽऽ गभस्त्योः।।

卐 अभि सोमास^ आयव॰- पवन्ते मद्यं मदम्। समुद्रस्याधि विष्टपि मनीषिणो- मत्सरास स्स्वर्विदः।।

卐 तर त्समुद्रं पवमान^ ऊर्मिणा- राजा देव^ ऋतं बृहत्। अर्षन्मित्रस्य वरुणस्य धर्मणा- प्र हिन्वान^ ऋतं बृहत्।।

❀07.05.15 卐नृभि र्येमानो हर्यतो विचक्षणो- राजा देव स्समुद्रियः।।

卐 इन्द्राय पवते मद- स्सोमो मरुत्वते सुतः। सहस्रधारो अत्यव्य मर्षति -तमीं मृज न्त्यायवः।।

卐 पुनान श्चमू~ जनय न्मतिङ्कवि- स्सोमो देवेषु रण्यति। अपो वसानः परि गोभि रुत्तर- स्सीद न्वने.ष्वव्यत।।

卐 तवाहं सोम रारण- सख्य इन्दो~ दिवेदिवे। पुरूणि बभ्रो~ नि चरन्ति मामव- परिधीः रति ताः इहि।।

卐 उताहन्नक्त मुत सोम ते दिवा- सख्याय बभ्र~ ऊधनि। घृणा तपन्त मति सूर्य पर- श्शकुनाइव पप्तिम।।

❀07.05.16 卐मृज्यमान स्सुहस्त्य समुद्रे- वाच मिन्वसि। रयिं पिशङ्गं बहुलं पुरुस्पृहं- पवमानाभ्यऽर्षसि।।

卐 मृजानो वारे पवमानो अव्यये- वृषाऽव चक्रदो वने। देवानां सोम पवमान निष्कृत-ङ्गोभि रञ्जानो अर्षसि।।

卐 पवस्व वाजसातये-ऽभि विश्वानि काव्या। त्वं समुद्रं प्रथमो वि धारयो -देवेभ्य स्सोम मत्सरः।।

卐 स तू पवस्व परि पार्थिवं रजो- दिव्या च सोम धर्मभिः। त्वाँ विप्रासो मतिभि र्विचक्षण- शुभ्रं हिन्वन्ति धीतिभिः।।

卐 पवमाना^ असृक्षत- पवित्र मति धारया। मरुत्वन्तो मत्सरा^ इन्द्रिया^- हया मेधा मभि प्रयांसि च।।

卐 अपो वसानः परि कोश मर्षती-न्दु र्हियान स्सोतृभिः। जनयञ्ज्योति र्मन्दना^ अवीवश- द्गाः कृण्वानो न निर्णिजम्।।

9.110 **पवस्वेति षोळशर्चस्य सूक्तस्य, आद्ययोर्द्वयो श्शाक्त्यो गौरिविति स्तृतीयाया वसिष्ठः, शक्तिश्चतुर्थ्यादि द्वयोराङ्गिरस उरुः षष्ठ्यादि द्वयो र्भारद्वाज ऋजिश्वाऽष्टम्यादि द्वयोराङ्गिरस ऊर्ध्वसद्मा दशम्यादि द्वयोराङ्गिरसः कृतयशा द्वादश्यादि द्वयोर्ऋणञ्चयश्चतुर्दश्यादि तिसृणां वासिष्ठ श्शक्तिरित्यृषयः, पवमान सोमो देवता, अयुजः ककुभो युज स्सतोबृहत्यः, स सुन्वे य इति यवमध्या गायत्री।**

❀07.05.17 卐पवस्व मधुमत्तम^ इन्द्राय- सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः।।

卐 यस्य ते पीत्वा वृषभो वृषायते-ऽस्य पीता स्वर्विदः। स सुप्रकेतो अभ्यक्रमी दिषो-ऽच्छा वाज न्नैतशः।।

卐 त्वं ह्य1(अ)ङ्ग दैव्या- पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 येना नवग्वो दध्यङ्ङपोर्णुते- येन विप्रास^ आपिरे। देवानां सुम्ने अमृतस्य चारुणो- येन श्रवांस्याऽऽनशुः।।
卐 एष स्य धारया सुतो-ऽव्यो वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मि रपामिव।।
❀07.05.18 卐य^ उस्रिया^ अप्या^ अन्त रश्मनो- निर्गा^ अकृन्त दोजसा। अभि व्रज न्तत्निषे गव्य-मश्व्यँ वर्मीव धृष्ण~वा रुज।।
卐 आ सोता परि षिञ्चता-ऽश्वन्न स्तोममप्तुरं रजस्तुरम्। वनक्रक्ष मुदप्रुतम्।।
卐 सहस्रधारँ वृषभं पयोवृधं- प्रिय न्देवाय जन्मने। ऋतेन य^ ऋतजातो विवावृधे- राजा देव ऋतं बृहत्।।
卐 अभि द्युम्नं बृहद्यश-^ इषस्पते दिदीहि देव देवयुः। वि कोशं मध्यमँ युव।।
卐 आ वच्यस्व सुदक्ष चम्वो- स्सुतो विशाँ वह्निर्न विश्पतिः। वृष्टि न्दिवः पवस्व रीति मपा-ञ्जिन्वा गविष्टये धियः।।
❀07.05.19 卐एतमु त्यं मदच्युतं- सहस्रधारँ वृषभ न्दिवो दुहुः। विश्वा वसूनि बिभ्रतम्।।
卐 वृषा वि जज्ञे जनयन्नमर्त्यः- प्रतप न्ज्योतिषा तमः। स सुष्टुतः कविभि र्निर्णिज न्दधे- त्रिधात्वस्य दंससा।।
卐 स सुन्वे यो वसूनाँ- यो राया मानेता य^ इळानाम्। सोमो यस्सुक्षितीनाम्।।
卐 यस्य न^ इन्द्रः पिबाद्यस्य- मरुतो यस्य वाऽर्यमणा भगः। आ येन मित्रावरुणा करामह- एन्द्र मवसे महे।।
卐 इन्द्राय सोम पातवे- नृभि र्यत स्स्वायुधो मदिन्तमः। पवस्व मधुमत्तमः।।
卐 इन्द्रस्य हार्दि सोमधान मा विश- समुद्रमिव सिन्धवः। जुष्टो मित्राय वरुणाय वायवे- दिवो विष्टम्भ^ उत्तमः।।
9.111 **परि प्रेति द्वाविंशत्यृचस्य सूक्तस्यैश्वरयो धिष्ण्याऽग्नयः, पवमान सोमो द्विपदाविराट्।**
❀07.05.20 卐परि प्र धन्वेन्द्राय सोम- स्वादु र्मित्राय पूष्णे भगाय।।
卐 इन्द्रस्ते सोम सुतस्य पेयाः- क्रत्वे दक्षाय विश्वे च देवाः।।
卐 एवामृताय महे क्षयाय- स शुक्रो अर्ष दिव्यः पीयूषः।।

卐 पवस्व सोम महा न्त्समुद्रः- पिता देवानाँ विश्वाऽभि धाम।।

卐 शुक्रः पवस्व देवेभ्य स्सोम- दिवे पृथिव्यै शञ्च प्रजायै।।

卐 दिवो धर्तासि शुक्रः पीयूष- स्सत्ये विधर्म न्वाजी पवस्व।।

卐 पवस्व सोम द्युम्नी सुधारो- महा मवीना मनु पूर्व्यः।।

卐 नृभि र्येमानो जज्ञानः पूतः-≈क्षर द्विश्वानि मन्द्र स्स्वर्वित्।।

卐 इन्दुः पुनानः प्रजा मुराणः- कर द्विश्वानि द्रविणानि नः।।

卐 पवस्व सोम क्रत्वे दक्षाया-ऽश्वो न निक्तो वाजी धनाय।।

❀07.05.21 卐तन्ते सोतारो रसं मदाय- पुनन्ति सोमं महे द्युम्नाय।।

卐 शिशुञ्जज्ञानं हरिं मृजन्ति- पवित्रे सोम न्देवेभ्य इन्दुम्।।

卐 इन्दुः पविष्ट चारु र्मदाया-ऽपा मुपस्थे कवि र्भगाय।।

卐 बिभर्ति चार्विन्द्रस्य नाम- येन विश्वानि वृत्रा जघान।।

卐 पिबन्त्यऽस्य विश्वे देवासो- गोभि श्श्रीतस्य नृभि स्सुतस्य।।

卐 प्र सुवानो अक्षा~ स्सहस्रधार- स्तिरः पवित्रँ वि वार मव्यम्।।

卐 स वाज्यक्षा स्सहस्ररेता-^ अद्भि र्मृजानो गोभि श्श्रीणानः।।

卐 प्र सोम याहीन्द्रस्य कुक्षा- नृभि र्येमानो अद्रिभि स्सुतः।।

卐 असर्जि वाजी तिरः पवित्र- मिन्द्राय सोम स्सहस्रधारः।।

卐 अञ्जन्त्येनं मध्वो रसेने-न्द्राय वृष्ण इन्दुं मदाय।।

卐 देवेभ्यस्त्वा वृथा पाजसे-ऽपो वसानं हरिं मृजन्ति।।

卐 इन्दु रिन्द्राय तोशते नि तोशते- श्रीण न्नुग्रो रिणन्नपः।।

9.112 **पर्यूष्विति द्वादशर्चस्य सूक्तस्य, त्र्यरुणत्रसदस्यू राजानौ पवमान सोमः, आद्यास्तिस्त्रोऽनुष्टुभः पिपीलिकमध्याः चतुर्थ्यादि षळूर्ध्वबृहत्योऽन्त्यास्तिस्त्रो विराजः।**

❀07.05.22 卐पर्यू षु प्र धन्व वाजसातये- परि वृत्राणि सक्षणिः। द्विष स्तरध्या ऋणया^ न ईयसे।।

卐 अनु हि त्वा सुतं सोम मदामसि- महे समर्यराज्ये। वाजाँ अभि पवमान प्र गाहसे।।

卐 अजीजनो हि पवमान सूर्यं- विधारे शक्मना पयः। गोजीरया रंहमाणः पुरन्ध्या।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 अजीजनो अमृत मर्त्येष्वाँ- ऋतस्य धर्मन्नऽमृतस्य चारुणः। सदाऽसरो वाज मऽच्छा सनिष्यदत्।।

卐 अभ्यभि हि श्रवसा ततर्दिथो-त्सन्न कञ्चिज्जनपान मक्षितम्। शर्याभिर्न भरमाणो गभस्त्योः।।

卐 आदीङ्केचि त्पश्यमानास^ आप्यँ- वसुरुचो दिव्या^ अभ्यऽनूषत। वारन्न देव स्सविता व्यूर्णुते।।

❀07.05.23 卐त्वे सोम प्रथमा^ वृक्तबर्हिषो- महे वाजाय श्रवसे धियन्दधुः। स त्वन्नो वीर वीर्याय चोदय।।

卐 दिवः पीयूषं पूर्व्यँ यदुक्थ्यं- महो गाहा द्दिव^ आ निरधुक्षत। इन्द्र मभि जायमानं समऽस्वरन्न्।।

卐 अध यदिमे~ पवमान रोदसी-इमा च विश्वा भुवनाऽभि मज्मना। यूथे न निष्ठा वृषभो वि तिष्ठसे।।

卐 सोमः पुनानो अव्यये वारे- शिशुर्न क्रीळन्पवमानो अक्षाः~। सहस्रधार श्शतवाज^ इन्दुः।।

卐 एष पुनानो मधुमाः ऋतावे-न्द्रायेन्दुः पवते स्वादु रूर्मिः। वाजसनि र्वरिवोवि द्वयोधाः।।

卐 स पवस्व सहमानः पृतन्यू- न्त्सेध न्रक्षांस्यऽप दुर्गहाणि। स्वायुध स्ससँसह्वान्त्सोम शत्रून्।।

🏺 9.113 **अया रुचेति तृचस्य सूक्तस्य, पारुच्छेपिरनानतः पवमान सोमोऽत्यष्टिः।**

❀07.05.24 卐अया रुचा हरिण्या पुनानो- विश्वा द्वेषांसि तरति स्वयुग्वभि- स्सूरो न स्वयुग्वभिः। धारा सुतस्य रोचते- पुनानो अरुषो हरिः। विश्वा यद्रूपा परियात्यृक्वभि- स्सप्ताऽऽस्येभिर् ऋक्वभिः।।

卐 त्वन्त्यत्पणीनाँ विदो वसु- सं मातृभि मर्जयसि स्व आ दम- ऋतस्य धीतिभि र्दमे। परावतो न साम त-द्यत्रा रणन्ति धीतयः। त्रिधातुभि ररुषीभि र्वयो दधे- रोचमानो वयो दधे।।

卐 पूर्वा मनु प्रदिशँ याति चेकित- त्सं रश्मिभि र्यतते दर्शतो- रथो दैव्यो दर्शतो रथः। अग्मन्नुक्थानि पौंस्ये-न्द्रञ्जैत्राय हर्षयन्न्। वज्रश्च यद्भवथो अनपच्युता- सम त्स्वऽनपच्युता।।

🏺 9.114 **नानानमिति चतुर्ऋचस्य सूक्तस्याऽऽङ्गिरस श्शिशुः पवमान सोमः पङ्क्तिः।**

❀07.05.25 卐नानानँ वा उ नो धियो- वि व्रतानि जनानाम्। तक्षा रिष्टं रुतं भिष- ग्ब्रह्मा सुन्वन्त मिच्छती-न्द्रा येन्दो~परि स्रव।।

卐 जरतीभि रोषधीभिः- पर्णेभि श्शकुनानाम्। कार्मारो अश्मभि र्द्युभि- र्हिरण्यवन्त मिच्छती-न्द्रायेन्दो~परि स्रव।।

卐 कारु रह न्ततो भिष- गुपलप्रक्षिणी नना। नानाधियो वसूयवो-ऽनु गाइव तस्थिमे-न्द्रा येन्दो परि स्रव।।

卐 अश्वो वोऌहा सुखं रथं- हसना मुपमन्त्रिणः। शेपो रोमण्वन्तौ भेदौ- वारिन्मण्डूक इच्छती-न्द्रा येन्दो परि स्रव।।

9.115 **शर्यणावतीत्येकादशर्चस्य सूक्तस्य, मारीचः कश्यपः पवमान सोमः पङ्क्तिः।**

❀07.05.26 卐शर्यणावति सोम- मिन्द्रः पिबतु वृत्रहा। बल न्दधान^ आत्मनि- करिष्यन्वीर्यं मह – दिन्द्रा येन्दो परि स्रव।।

卐 आ पवस्व दिशां पत- आर्जीका त्सोम मीढ्वः। ऋतवाकेन सत्येन -श्रद्धया तपसा सुत-^ इन्द्रा येन्दो परि स्रव।।

卐 पर्जन्यवृद्धं महिष-न्तं सूर्यस्य दुहिताऽऽभरत्। तङ्गन्धर्वाः प्रत्यगृभ्ण-न्तं सोमे रस माऽदधु- रिन्द्रा येन्दो परि स्रव।।

卐 ऋतँ वदन्नृतद्युम्न- सत्यँ वद न्त्सत्यकर्मन्न्। श्रद्धाँ वद न्त्सोम- राज न्धात्रा सोम परिष्कृत^- इन्द्रा येन्दो परि स्रव।।

卐 सत्यमुग्रस्य बृहत- स्सं स्रवन्ति संस्रवाः। सँ यन्ति रसिनो रसाः- पुनानो ब्रह्मणा हर –इन्द्रा येन्दो परि स्रव।।

❀07.05.27 卐यत्र ब्रह्मा पवमान- छन्दस्या3(आँ) वाचँ वदन्न्। ग्राव्णा सोमे महीयते- सोमेनाऽऽनन्दञ्जनय- न्निन्द्रायेन्दो परि स्रव।।

卐 यत्र ज्योति रजस्रँ- यस्मिँल्लोके स्वर्हितम्। तस्मि न्मान्धेहि पवमाना-ऽमृते लोके अक्षित –इन्द्रा येन्दो परि स्रव।।

卐 यत्र राजा वैवस्वतो- यत्रा वरोधन न्दिवः। यत्रामू र्यह्वती राप- स्तत्र मा ममृत-ङ्कृ-धीन्द्रायेन्दो परि स्रव।।

卐 यत्रानुकामञ्चरण- न्त्रिनाके त्रिदिवे दिवः। लोका^ यत्र ज्योतिष्मन्त- स्तत्र माममृत-ङ्कृधीन्द्रायेन्दो परि स्रव।।

卐 यत्र कामा^ निकामाश्च- यत्र ब्रध्नस्य विष्टपम्। स्वधा च यत्र तृप्तिश्च- तत्र माममृत-ङ्कृधी-न्द्रायेन्दो परि स्रव।।

卐 यत्राऽऽनन्दाश्च मोदाश्च- मुदः॒ प्रमुद आसते। कामस्य यत्राऽऽप्ताः॒ कामा -स्तत्र माममृतङ्कृधी-न्द्रा येन्दो परि स्रव।।

☬ 9.116 य इन्दोरिति चतुर्ऋचस्य सूक्तस्य, मारीचः कश्यपः पवमान सोमः पङ्क्तिः।

❀07.05.28 卐य इन्दोः॒ पवमानस्या-ऽनु धामान्यऽक्रमीत्। तमाहु स्सुप्रजा^ इति- यस्ते सोमाविध न्मन- इन्द्रायेन्दो परि स्रव।।

卐 ऋषे मन्त्रकृतां स्तोमैः॒- कश्यपोद्वर्धय न्गिरः। सोमन्नमस्य राजानँ- यो जज्ञे वीरुधां पति- रिन्द्रायेन्दो परि स्रव।।

卐 सप्त दिशो नानासूर्या- स्सप्त होतार^ ऋत्विजः। देवा^ आदित्या ये सप्त- तेभि स्सोमाभि रक्ष न^- इन्द्रायेन्दो परि स्रव।।

卐 यत्ते राजञ्छृतं हवि- स्तेन सोमाऽभि रक्ष नः। अरातीवा मा न स्तारी-न्मो~ च नः॒ किञ्चनाममम- दिन्द्रा येन्दो परि स्रव।।

✡।। अथ परिशिष्टम्।।

卐 यत्र तत्परमं पदँ -विष्णो र्लोके महीयते। देवै स्सुकृतकर्मभि- स्तत्र मा ममृत-ङ्कृधी-न्द्रायेन्दो परि स्रव।।

卐 यत्र तत्परमाव्यं- भूताना मधिपतिम्। भावभावीश्च योगीश्च- तत्र मा ममृतङ्कृधी-न्द्रायेन्दो परि स्रव।।

卐 यत्र लोका स्तनूत्यज- श्श्रद्धया तपसा जिताः। तेजश्च यत्र ब्रह्म च- तत्र मा ममृतङ्कृधी-न्द्रा येन्दो परि स्रव।।

卐 यत्र गङ्गा च यमुना च- यत्र प्राची सरस्वती। यत्र सोमेश्वरो देव- स्तत्र मा ममृतङ्कृधी-न्द्रा येन्दो परि स्रव।।

卐 यत्र तद्विष्णु र्महीयते- नराणा मधिपतिम्। यत्र शङ्खचक्रगदाधर-स्मरणं मुक्तिश्च तत्र माममृत- .ङ्कृधीन्द्रायेन्दो परिस्रव।।

卐 ।। इति परिशिष्टम्।। ।। इति नवमं मण्डलम्।। विश्वेश्वराय नमः....

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

# ऽ()ऽ दशमं मण्डलम्।।

**दशमे मण्डले दशानुवाकाः। तत्र प्रथमेऽनुवाके षोडशसूक्तानि।**

10.01 **अग्ने बृहन्निति सप्तर्चस्य सूक्तस्याऽऽस्यस्त्रितोऽग्निस्त्रिष्टुप्।**

❀07.05.29 卐अग्ने बृहन्नुषसा मूर्ध्वो अस्था- न्निर्जगन्वा न्तमसो ज्योतिषाऽऽगात्। अग्नि र्भानुना रुशता स्वङ्ग-^ आ जातो विश्वा सद्मा न्यप्राः।।

卐 स जातो गर्भो असि रोदस्यो- रग्ने चारु र्विभृत^ ओषधीषु। चित्रश्शिशुः परि तमांस्यऽक्तू -न्प्र मातृभ्यो अधि कनिक्रदद्गाः।।

卐 विष्णु रित्था परम मस्य विद्वा- न्जातो बृहन्नऽभि पाति तृतीयम्। आसा यदस्य पयो अक्रत स्वं- सचेतसो अभ्यर्चन्त्यऽत्र।।

卐 अत^ उ त्वा पितुभृतो जनित्री- रन्नावृधं प्रति चरन्त्यऽन्नैः। ता^ ई प्रत्येषि पुन रन्यरूपा-^ असि त्वँ विक्षु मानुषीषु होता।।

卐 होतार.श्चित्ररथ मध्वरस्य- यज्ञस्ययज्ञस्य केतुं रुशन्तम्। प्रत्यर्धि न्देवस्यदेवस्य मह्ना- श्रिया त्व1(अ)ग्नि मतिथिञ्जनानाम्।।

卐 स तु वस्त्राण्यध पेशनानि- वसानो अग्नि र्नाभा पृथिव्याः। अरुषो जातः पद इळायाः पुरोहितो- राज न्यक्षीह देवान्।।

卐 आ हि द्यावापृथिवी~ अग्न उभे~ सदा पुत्रो न मातरा ततन्थ। प्र याह्यच्छोशतो यविष्ठा-ऽथा वह सहस्येह देवान्।।

10.02 **पिप्रीहीति सप्तर्चस्य सूक्तस्याऽऽस्यस्त्रितोऽग्निस्त्रिष्टुप्।**

❀07.05.30 卐पिप्रीहि देवाँ उशतो यविष्ठ- विद्वाँ ऋतूँर् ऋतुपते यजेह। ये दैव्या^ ऋत्विज स्तेभि रग्ने- त्वं होतृणा मस्याऽऽयजिष्ठः।।

卐 वेषि होत्र मुत पोत्रञ्जनानां- मन्धाताऽसि द्रविणोदा^ ऋतावा। स्वाहा वयङ्कृणवामा हवींषि- देवो देवा न्यजत्वऽग्नि रऽर्हन्।।[1]

---

[1] (1 **नात्र स्वाहाकारः, किन्तु मन्त्रान्त एव हविः प्रक्षेपः।**)

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 आ देवाना मपि पन्था मगन्म- यच्छक्रवाम तदनु प्रवोऽह्हुम्। अग्निर्विद्वान्त्स यजात्सेदु होता- सो अध्वरान्त्स ऋतून्कल्पयाति।।

卐 यद्वो वयं प्रमिनाम व्रतानि- विदुषा न्देवा^ अविदुष्टरासः। अग्निष्टद्विश्व मा पृणाति विद्वा- न्येभि र्देवा९ ऋतुभि ४ कल्पयाति।।

卐 यत्पाकत्रा मनसा दीनदक्षा-^ न यज्ञस्य मन्वते मर्त्यासः। अग्निष्टद्धोता क्रतुवि द्विजान- न्यजिष्ठो देवा९ ऋतुशो यजाति।।

卐 विश्वेषां ह्यध्वराणा मनीक-श्चित्रङ्केतु.ञ्जनिता त्वा जजान। स आ यजस्व नृवती रनु क्षा- स्पार्हा इषः≈क्षुमती विश्वजन्याः।।

卐 यन्त्वा द्यावापृथिवी~ यन्त्वाप- स्त्वष्टा यन्त्वा सुजनिमा जजान। पन्था मनु प्रविद्वा न्पितृयाण- न्द्युम दऽग्ने समिधानो वि भाहि।।

10.03 **इनो राजन्निति सप्तर्चस्य सूक्तस्याऽऽत्यस्त्रितोऽग्निस्त्रिष्टुप्।**

07.05.31 卐इनो राजन्नरति स्समिद्धो- रौद्रो दक्षाय सुषुमा९ अदर्शि। चिकिद्वि भाति भासा बृहताऽसिक्नी- मेति रुशती मपाजन्न्।।

卐 कृष्णाँ यदेनी मभि वर्पसा भू-ज्जनय न्योषां बृहत ४ पितु र्जाम्। ऊर्ध्वं भानुं सूर्यस्य स्तभाय- न्दिवो वसुभि ररतिर्वि भाति।।

卐 भद्रो भद्रया सचमान^ आऽगा- त्स्वसार ञ्जारो अभ्येति पश्चात्। सुप्रकेतै र्द्युभि रग्नि र्वितिष्ठ- न्रुशद्भि र्वर्णै रऽभि राम मऽस्थात्।।

卐 अस्य यामासो बृहतो न वग्नू- निन्धाना^ अग्ने स्सख्यु श्शिवस्य। ईड्यस्य वृष्णो बृहत स्स्वासो- भामासो यामन्नऽक्तव श्चिकित्रे।।

卐 स्वना^ न यस्य भामास ४ पवन्ते- रोचमानस्य बृहत स्सुदिवः। ज्येष्ठेभि र्यस्तेजिष्ठै ४ क्रीळुमद्भि- र्वर्षिष्ठेभि र्भानुभि र्नक्षति द्याम्।।

卐 अस्य शुष्मासो ददृशानपवे- र्जेहमानस्य स्वनय न्नियुद्भिः। प्रत्नेभि र्यो रुशद्भि र्देवतमो- वि रेभद्भि ररति र्भाति विभ्वा।।

卐 स आ वक्षि महि न आ च सत्सि- दिवस्पृथिव्यो ररति युवत्योः। अग्नि स्सुतुक स्सुतुकेभि रश्वै-
रभस्वद्भी रभस्वा एह गम्याः।।

10.04 प्र त इति सप्तर्चस्य सूक्तस्याऽऽस्यस्त्रितोऽग्निस्त्रिष्टुप्।

07.05.32 卐प्र ते यक्षि प्र त इयर्मि- मन्म भुवो यथा वन्द्यो नो हवेषु। धन्वन्निव प्रपा असि त्वमग्न-
इयक्षवे पूरवे प्रत्न राजन्।।

卐 यन्त्वा जनासो अभि सञ्चरन्ति- गाव उष्णमिव व्रजँ यविष्ठ। दूतो देवाना मसि मर्त्याना- मन्त र्महाँ
श्चरसि रोचनेन।।

卐 शिशुन्न त्वा जेन्यँ वर्धयन्ती- माता बिभर्ति सचनस्यमाना। धनोरधिऽ प्रवता यासि हर्य- ञ्जीगीषसे
पशुरिवाऽवसृष्टः।।

卐 मूरा अमूर न वयश्चिकित्वो- महित्व मग्ने त्वमङ्ग वित्से। शये वव्रि श्चरति जिह्वयाद -न्रेरिह्यते युवतिँ
विश्पति स्सन्।।

卐 कूचिज्जायते सनयासु नव्यो- वने तस्थौ पलितो धूमकेतुः। अस्नाताऽऽपो वृषभो न प्र वेति- सचेतसो
यं प्रणयन्त मर्ताः।।

卐 तनूत्यजेव तस्करा वनर्गू- रशनाभि र्दशभि रभ्यधीताम्। इयन्ते अग्ने नव्यसी मनीषा- युक्ष्वा रथन्न
शुचयद्भि रङ्गैः।।

卐 ब्रह्म च ते जातवेदो नमश्चे-यञ्च गीस्सदमिद्वर्धनी भूत्। रक्षा णो अग्ने तनयानि तोका- रक्षोत न
स्तन्वो3(ओ) अप्रयुच्छन्।।

10.05 एक स्समुद्र इति सप्तर्चस्य सूक्तस्याऽऽस्यस्त्रितोऽग्निस्त्रिष्टुप्।

07.05.33 卐एक स्समुद्रो धरुणो रयीणा- मस्म द्धृदो भूरिजन्मा वि चष्टे। सिषक्त्यूधर्निण्यो रुपस्थ-
उत्सस्य मध्ये निहितं पदँ वेः।।

卐 समान न्नीळँ वृषणो वसाना- स्सञ्जग्मिरे महिषा अर्वतीभिः। ऋतस्य पदङ्कवयो नि पान्ति- गुहा
नामानि दधिरे पराणि।।

卐 ऋतायिनी मायिनी सन्दधाते मित्वा शिशुञ्जज्ञतु र्वर्धयन्ती। विश्वस्य नाभिश्चरतो ध्रुवस्य-
कवेश्चि त्तन्तुं मनसा वियन्तः।।

卐 ऋतस्य हि वर्तनय स्सुजात- मिषो वाजाय प्रदिव स्सचन्ते। अधीवासं रोदसी वावसाने~- घृतै रन्नै र्वावृधाते~ मधूनाम्।।

卐 सप्त स्वसृ ररुषी र्वावशानो- विद्वा न्मध्व^ उज्जभारा दृशे कम्। अन्तर्येमे अन्तरिक्षे पुराजा-^ इच्छ न्वव्रि मऽविद त्पूषणस्य।।

卐 सप्त मर्यादा꞉ कवय स्ततक्षु- स्तासा मेका मिदभ्यंहुरो गात्। आयोर्ह स्कम्भ^ उपमस्य नीळे- पथाँ विसर्गे धरुणेषु तस्थौ।।

卐 असच्च सच्च परमे व्योम- न्दक्षस्य जन्मन्नदिते रुपस्थे। अग्निर्ह न꞉ प्रथमजा^ ऋतस्य- पूर्व आयुनि वृषभश्च धेनुः।।।। इति पञ्चमाध्याय स्समाप्तः।।

## ऽ०ऽ ऽ०ऽसप्तमाष्टके षष्ठाध्यायः (वर्गाः 1-28)

**10.06 अयं स इति सप्तर्चस्य सूक्तस्याऽऽप्त्यस्त्रितोऽग्निस्त्रिष्टुप्।**

07.06.01 卐अयं स यस्य शर्मन्नवोभि- रग्ने रेधते जरिताऽभिष्टौ। ज्येष्ठेभिर्यो भानुभिर् ऋषूणां- पर्येति परिवीतो विभावा।।

卐 यो भानुभि र्विभावा विभा- त्यग्नि र्देवेभिर् ऋतावाऽजस्रः। आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः।।

卐 ईशे यो विश्वस्या देववीते- रीशे विश्वाऽऽयु रुषसो व्युष्टौ। आ यस्मि न्मना हवींष्यग्ना- वरिष्टरथ स्स्कभ्नाति शूषैः।।

卐 शूषेभि र्वृधो जुषाणो अर्कै- र्देवा꞉ अच्छा रघुपत्वा जिगाति। मन्द्रो होता स जुह्वा3(आ) यजिष्ठ- स्संमिश्लो अग्निरा जिघर्ति देवान्।।

卐 तमुस्रा मिन्द्रन्न रेजमान मग्नि-ङ्गीर्भि र्नमोभि राऽऽकृणुध्वम्। आ यँ विप्रासो मतिभि र्गृणन्ति- जातवेदसञ्जुह्वं सहानाम्।।

卐 सँ यस्मि न्विश्वा वसूनि जग्मु- र्वाजे नाऽऽश्वा स्सप्तीवन्त एवैः। अस्मे ऊती रिन्द्रवाततमा- अर्वाचीना^ अग्न आ कृणुष्व।।

卐 अधा ह्यग्ने मह्ना निषद्या- सद्यो जज्ञानो हव्यो बभूथ। तन्ते देवासो अनु केतमायन्न-ऽधावर्धन्त प्रथमास^ ऊमाः।।

10.07 स्वस्ति न इति सप्तर्चस्य सूक्तस्याऽऽस्यस्त्रितोऽग्निस्त्रिष्टुप्।

07.06.02 卐स्वस्ति नो दिवो अग्ने पृथिव्या- विश्वाऽऽयु र्धेहि यजथाय देव। सचेमहि तव दस्म प्रकेतै- रुरुष्या ण उरुभि र्देव शंसैः।।

卐 इमा^ अग्ने मतय स्तुभ्यञ्जाता-^ गोभि रश्वै रभि गृणन्ति राधः। यदा ते मर्तो अनु भोग मान-ड्वसो~ दधानो मतिभि स्सुजात।।

卐 अग्निं मन्ये पितर मग्नि मापि- मग्निं भ्रातरं सदमि त्सखायम्। अग्ने रनीकं बृहत स्सपर्य- न्दिवि शुक्रं यजतं सूर्यस्य।।

卐 सिध्रा^ अग्ने धियो अस्मे सनुत्री- र्यन्त्रायसे दम आ नित्यहोता। ऋतावा स रोहिदश्वः पुरुक्षु- र्द्युभि रस्मा अहभि र्वाम मस्तु।।

卐 द्युभि र्हितं मित्रमिव प्रयोगं- प्रत्न मृत्विजं मध्वरस्य जारम्। बाहुभ्या मग्नि मायवोऽजनन्त- विक्षु होतार.न्न्यऽसादयन्त।।

卐 स्वयँ यजस्व दिवि देव देवा- न्किन्ते पाकः कृणव दप्रचेताः। यथाऽयज ऋतुभि र्देव देवा- नेवा यजस्व तन्वं सुजात।।

卐 भवा नो अग्नेऽवितोत गोपा- भवा वयस्कृ दुत नो वयोधाः। रास्वा च न स्सुमहो हव्यदाति- न्त्रास्वोत नस्तन्वो3(ओ) अप्रयुच्छन्न्।।

10.08 प्र केतुनेति नवर्चस्य सूक्तस्य, त्वाष्ट्रस्त्रिशिरा अग्निः, अन्त्यतृचस्येन्द्रस्त्रिष्टुप्।

07.06.03 卐प्र केतुना बृहता यात्यग्नि- रा रोदसी वृषभो रोरवीति। दिव श्चिदन्ता॰ उपमा॰ उदानळ-ऽपा मुपस्थे महिषो ववर्ध।।

卐 मुमोद गर्भो वृषभः ककुद्मा- नऽस्रेमा वत्स श्शिमीवा॰ अरावीत्। स देवतात्युद्यतानि कृण्व- न्त्स्वेषु क्षयेषु प्रथमो जिगाति।।

卐 आ यो मूर्धानं पित्रो ररब्ध- न्यऽध्वरे दधिरे सूरो अर्णः। अस्य पत्मन्नरुषी रश्वबुध्ना-^ ऋतस्य योनौ तन्वो जुषन्त।।

卐 उषउषो हि वसो~ अग्र मेषि- त्वँ यमयो रभवो विभावा। ऋताय सप्त दधिषे पदानि- जनय न्मित्र न्तन्वे3(ए) स्वायै।।

卐 भुवश्चक्षु र्मह ऋतस्य गोपा- भुवो वरुणो यदृताय वेषि। भुवो अपान्नपा ज्जातवेदो- भुवो दूतो यस्य हव्यञ्जुजोषः।।

❀07.06.04 卐भुवो यज्ञस्य रजसश्च नेता- यत्रा नियुद्भि स्सचसे शिवाभिः। दिवि मूर्धान न्दधिषे स्वर्षा-ञ्जिह्वा मग्ने चकृषे हव्यवाहम्।।

卐 अस्य त्रितः क्रतुना वव्रे- अन्त रिच्छ न्धीतिं पितुरेवैः परस्य। सचस्यमानः पित्रो रुपस्थे- जामि ब्रुवाण आयुधानि वेति।।

卐 स पित्र्याण्यायुधानि विद्वा- निन्द्रेषित आप्त्यो अभ्यऽयुध्यत्। त्रिशीर्षाणं सप्तरश्मिञ्जघन्वा - न्त्वाष्ट्रस्य चिन्नि.स्ससृजे त्रितो गाः।।

卐 भूरीदिन्द्र उदिनक्षन्त मोजो-ऽवाभिन त्सत्पति र्मन्यमानम्। त्वाष्ट्रस्य चिद्विश्वरूपस्य गोना-माचक्राण स्त्रीणि शीर्षा परा वर्क्।।

**☸ 10.09 आपो हि ष्ठेति नवर्चस्य सूक्तस्याम्बरीष स्सिन्धुद्वीप आपो गायत्री, पञ्चमी वर्धमाना सप्तमी प्रतिष्ठान्त्ये द्वे अनुष्टुभौ। आपो हि सिन्धुद्वीपो वां ऽबरीष इत्येवमनुक्रमण्यां सिन्धुद्वीपस्य पाक्षिकत्वस्वीकारे पूर्वोक्तस्त्रिशिराः प्राप्नोति तथाऽपि प्रयोक्तृभिः सिन्धुद्वीप एवाद्रियते।**

❀07.06.05 卐आपो हि ष्ठा मयोभुव- स्ता न ऊर्जे दधातन। महे रणाय चक्षसे।।

卐 यो व श्शिवतमो रस- स्तस्य भाजयतेह नः। उशतीरिव मातरः।।

卐 तस्मा अर.ङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।।

卐 शन्नो देवी रभिष्टय-आपो भवन्तु पीतये। शँ यो रभि स्रवन्तु नः।।

卐 ईशाना वार्याणा-ङ्क्षयन्ती श्चर्षणीनाम्। अपो याचामि भेषजम्।।

卐 अप्सु मे सोमो अब्रवी- दन्त र्विश्वानि भेषजा। अग्निञ्च विश्वशंभुवम्।।

卐 आपः पृणीत भेषजँ- वरूथ न्तन्वे3(ए) मम। ज्योक्च सूर्यन्दृशे।।

卐 इद मापः प्र वहत- यत्किञ्च दुरितं मयि। यद्वाऽह मभिदुद्रोह- यद्वा शेप उतानृतम्।।

卐 आपो अद्यान्वचारिषं- रसेन समगस्महि। पयस्वा नग्न आ गहि- तं मा सं सृज वर्चसा।।

✡।। अथ परिशिष्टम्।।

卐 सस्रुषी स्तदपसो- दिवा नक्तञ्च सस्रुषीः। वरेण्यक्रतू रह मा देवी- रवसे हुवे।।

卐 ।। इति परिशिष्टम्।।

10.10 ओ चिदिति चतुर्दशर्चस्य सूक्तस्य, नवमी वर्ज्यानामयुजां षष्ठ्याश्च वैवस्वती यमी ऋषिका यमो देवता, षष्ठी वर्ज्यानां युजां नवम्याश्च वैवस्वतो यमी त्रिष्टुप्।

❀07.06.06 卐ओ~ चित्सखायं सख्या ववृत्या- न्तिरः पुरू चिदर्णव.ञ्जगन्वान्। पितु र्नपात मादधीत वेधा-^ अधि क्षमि प्रतर न्दीध्यानः।।

卐 न ते सखा सख्यँ वष्ट्येत- त्सलक्ष्मा यद्विषुरूपा भवाति। मह स्पुत्रासो असुरस्य वीरा-^ दिवो धर्तार^ उर्विया परि ख्यन्न्।।

卐 उशन्ति घा ते अमृतास^ एत- देकस्य चित्त्यजसं मर्त्यस्य। नि ते मनो मनसि धाय्यस्मे- जन्युः पति स्तन्व1(अ) माविविश्याः।।

卐 न यत्पुरा चकृमा कद्ध नून- मृता वदन्तो अनृतं रपेम। गन्धर्वो अप्स्वप्या च योषा- सा नो नाभिः परमञ्जामि तन्नौ।।

卐 गर्भे नु नौ जनिता दम्पती~ क- र्देव स्त्वष्टा सविता विश्वरूपः। नकि रस्य प्र मिनन्ति व्रतानि- वेद नावस्य पृथिवी उत द्यौः।।

❀07.06.0 卐को अस्य वेद प्रथमस्याह्नः- क^ ईं न्ददर्श क^ इह प्र वोचत्। बृह न्मित्रस्य वरुणस्य धाम- कदु ब्रव^ आहनो वीच्या नॄन्।।

卐 यमस्य मा यम्य1(अ)ङ्काम^ आग- न्त्समाने योनौ सहशेय्याय। जायेव पत्ये तन्वं रिरिच्याँ- वि चिद्वृहेव रथ्येव चक्रा।।

卐 न तिष्ठन्ति न नि मिषन्त्येते- देवानां स्पश^ इह ये चरन्ति। अन्येन मदाहनो याहि तूय-न्तेन वि वृह रथ्येव चक्रा।।

卐 रात्रीभि रस्मा अहभि र्दशस्ये- त्सूर्यस्य चक्षु र्मुहु रुन्मिमीयात्। दिवा पृथिव्या मिथुना सबन्धू~- यमी र्यमस्य बिभृया दऽजामि।।

卐 आ घा ता गच्छा नुत्तरा युगानि- यत्र जामयः कृणवन्नऽजामि। उप बर्बृहि वृषभाय बाहु~- मन्य मिच्छस्व सुभगे पतिं मत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

❀07.06.08 卐किं भ्राताऽसद्यदनाथं भवाति- किमु स्वसा यन्निर्ऋतिर्निगच्छात्। काममूता बह्वे3(ए)त द्रपामि- तन्वा मे तन्व1(अं)सं पिपृग्धि।।

卐 न वा उ ते तन्वा तन्व1(अं) सं पपृच्यां- पाप माहुर्य स्स्वसार न्निगच्छात्। अन्येन मत्प्रमुदः कल्पयस्व- न ते भ्राता सुभगे वष्ट्येतत्।।

卐 बतो बतासि यम नैव ते- मनो हृदय.ञ्चाविदाम। अन्या किल त्वाङ्कक्ष्येव युक्तं- परिष्वजाते लिबुजेव वृक्षम्।।

卐 अन्यमू षु त्वँ यम्यन्य उ त्वां- परिष्वजाते लिबुजेव वृक्षम्। तस्य वा त्वं मन इच्छा स वा तवा-ऽधा कृणुष्व सँविदं सुभद्राम्।।

10.11 **वृषा वृष्ण इति नवर्चस्य सूक्तस्याऽऽगिर्हविर्धानोऽग्निर्जगती, अन्त्यास्तिस्त्रस्त्रिष्टुभः।**

❀07.06.09 卐वृषा वृष्णे दुदुहे दोहसा दिवः- पयांसि यह्वो अदिते रदाभ्यः। विश्वं स वेद वरुणो यथा धिया- स यज्ञियो यजतु यज्ञियाꣳ ऋतून्।।

卐 रपद्गन्धर्वी रप्या च योषणा- नदस्य नादे परि पातु मे मनः। इष्टस्य मध्ये अदिति र्नि धातु नो- भ्राता नो ज्येष्ठः प्रथमो वि वोचति।।

卐 सो~ चिन्नु भद्रा क्षुमती यशस्व- त्युषा उवास मनवे स्वर्वती। यदी मुशन्त मुशता मनु क्रतु- मग्निं होतारँ विदथाय जीजनम्।।

卐 अध त्य न्द्रप्सँ विभ्वं विचक्षणँ- वि रा ऽभर दिषित श्श्येनो अध्वरे। यदी विशो वृणते दस्म मार्या- अग्निं होतार मध धीरऽजायत।।

卐 सदासि रण्वो यवसेव पुष्यते- होत्राभि रऽग्ने मनुष स्स्वध्वरः। विप्रस्य वा यच्छशमान उक्थ्य1(अँ)- वाजं ससवाꣳ उपयासि भूरिभिः।।

❀07.06.10 卐उदीरय पितरा जार आ भग- मियक्षति हर्यतो हृत्त इष्यति। विवक्ति वह्नि स्स्वपस्यते मख- स्तविष्यते असुरो वेपते मती।।

卐 यस्ते अग्ने सुमतिं मर्तो अक्ष- त्सहस स्सूनो~ अति स प्र श्शृण्वे। इष न्दधानो वहमानो अश्वै-रा स द्युमाꣳ अमवा न्भूषति द्यून्।।

卐 यदंऽग्न एषा समिंति र्भवांति- देवी देवेषु यजता यंजत्र। रत्ना च यद्विभजाऽसि स्वधावो- भागन्नो अत्र वसुमन्तँ वीतात्।।
卐 श्रुधी नों अग्ने सदंने सधस्थे- युक्ष्वा रथं ममृतस्य द्रवित्नुम्। आ नों वह रोदंसी देवपुंत्रे~ माकिं र्देवाना मपं भूरिह स्याः।।
☬ 10.12 द्यावा हेति नवर्चस्य सूक्तस्य, हविर्धानोऽग्निस्त्रिष्टुप्।
❀07.06.11 卐द्यावा ह क्षामा प्रथमे~ ऋतेना-ऽभिश्रावे र्भवत स्सत्यवाचा। देवो यन्मर्ता न्यजथाय कृण्व- न्त्सीदद्धोता प्रत्यङ्स्वमसुँ यन्न्।।
卐 देवो देवा न्परिभूर् ऋतेन- वहा नो हव्यं प्रथम श्चिकित्वान्। धूमकेतु स्समिधा भार्ऋजीको- मन्द्रो होता नित्यो वाचा यजीयान्।।
卐 स्वावृ ग्देवस्यामृतँ यदी गोर-ऽतो जातासो धारयन्त उर्वी। विश्वे देवा^ अनु तत्ते यजुर्गु- र्दुहे यदेनी दिव्यङ्घृतँ वाः~।।
卐 अर्चामि वाँ वर्धायापो घृतस्नू~- द्यावाभूमी~ शृणुतं रोदसी~ मे। अहा यद्यावोऽसुंनीति मय -न्मध्वा नो अत्र पितरा शिशीताम्।।
卐 किं स्विन्नो राजा जगृहे कदस्या-ऽति व्रतञ्चकृमा को वि वेद। मित्रश्चिद्धि ष्मा जुहुराणो देवा-ञ्छ्लोको न याता मपि वाजो अस्ति।।
❀07.06.12 卐दुर्मन्त्वत्रामृतंस्य नाम- सलंक्ष्मा यद्विषुरूपा भवांति। यमस्य यो मनवंते सुमन्त्व-ऽग्ने तमृष्व पाह्यऽप्रयुच्छन्न्।।
卐 यस्मि न्देवा^ विदथे मादयन्ते- विवस्वंत स्सदंने धारयन्ते। सूर्ये ज्योति रंदधु र्मास्यं1(अ)क्तू- न्परि द्योतनिश्चरतो अजंस्रा।।
卐 यस्मि न्देवा^ मन्मंनि सञ्चर- न्त्यऽपीच्ये3(ए)न वय मंऽस्य विद्म। मित्रो नो अत्रा दितिं रनागा - न्त्सविता देवो वरुंणाय वोचत्।।
卐 श्रुधी नों अग्ने सदंने सधस्थे- युक्ष्वा रथं मऽमृतंस्य द्रवित्नुम्। आ नों वह रोदंसी देवपुंत्रे~-माकिं र्देवाना मपं भूरिह स्याः।।
☬ 10.13 युजेवामितिपञ्चर्चस्यसूक्तस्याऽऽदित्यो विवस्वान्हविर्धानस्त्रिष्टुबन्त्या जगती।

❀07.06.13 卐युजे वां ब्रह्म पूर्व्यन्नमोभि- र्वि श्लोक^ एतु पथ्येव सूरेः। शृण्वन्तु विश्वे अमृतस्य पुत्रा-^ आ ये धामानि दिव्यानि तस्थुः।।

卐 यमेइव~ यतमाने~ यदैतं- प्र वां भर न्मानुषा^ देवयन्तः। आ सीदतं स्वमु लोकँ विदाने-~ स्वासस्थे~ भवत मिन्दवे नः।।

卐 पञ्च पदानि रुपो अन्वरोह- ञ्चतुष्पदी.मन्वेमि व्रतेन। अक्षरेण प्रति मिम एता- मृतस्य नाभा वधि सं पुनामि।।

卐 देवेभ्य꣫ कमवृणीत मृत्युं- प्रजायै कममृत न्नाऽवृणीत। बृहस्पतिँ यज्ञ मकृण्वत ऋषिं- प्रियाँ यम स्तन्व1(अं) प्राऽरिरेचीत्।।

卐 सप्त क्षरन्ति शिशवे मरुत्वते- पित्रे पुत्रासो अप्यवीवत.न्नृतम्। उभे~ इद स्योभयस्य राजत- उभे~ यतेते~ उभयस्य पुष्यतः।।

🏺 10.14 **परेयिवांसमिति षोळशर्चस्य सूक्तस्य, वैवस्वतो यम ऋषिः, यमो देवता, षष्ठ्या अङ्गिरः पित्रथर्व भृगुसोमाः, दशम्यादि तिसृणां श्वानौ त्रिष्टुप्, त्रयोदशी चतुर्दशी षोडश्योऽनुष्टुभः, पञ्चदशी बृहती ( प्रेहि प्रेहीत्यादि तिसृणां पितृदेवता वैकल्पिकी)।**

❀07.06.14 卐परेयिवांसं प्रवतो महीरनु- बहुभ्य꣫ पन्था मनुपस्पशानम्। वैवस्वतं सङ्गमन.ञ्जनानाँ- यमं राजानं हविषा दुवस्य।।

卐 यमो नो गातुं प्रथमो विवेद- नैषा गव्यूति रपभर्तवा उ। यत्रा न꣫ पूर्वे पितर꣫ परेयु- रेना जज्ञाना꣫ पथ्या3(आ) अनु स्वाः।।

卐 मातली कव्यै यमो अङ्गिरोभि- र्बृहस्पतिर् ऋक्वभि र्वावृधानः। याँश्च देवा वावृधु र्ये च देवा- न्त्स्वाहाऽन्ये स्वधयाऽन्ये मदन्ति।।

卐 इमँ यम प्रस्तर मा हि सीदा-ऽङ्गिरोभि꣫ पितृभि स्सँविदानः। आ त्वा मन्त्रा꣫ कविशस्ता^ वह-न्त्वेना राज न्हविषा मादयस्व।।

卐 अङ्गिरोभि रागहि यज्ञियेभि- र्यम वैरूपै रिह मादयस्व। विवस्वन्तं हुवे य꣫ पिता ते-ऽस्मि न्यज्ञे बर्हिष्याऽऽ निषद्य।।

❀07.06.15 卐अङ्गिरसो नः पितरो नवग्वा- अथर्वाणो भृगव स्सोम्यासः। तेषाँ वयं सुमतौ यज्ञियाना- मपि भद्रे सौमनसे स्याम।।

卐 प्रेहि प्रेहि पथिभिः पूर्व्येभि- र्यत्रा नः पूर्वे पितरः परेयुः। उभा राजाना स्वधया मदन्ता- यमं पश्यासि वरुण ञ्च देवम्।।

卐 स.ङ्गच्छस्व पितृभि स्सँ यमेनेऽ-ष्टापूर्तेन परमे व्योमन्न्। हित्वायाऽवद्यं पुन रस्त.मेहि- स.ङ्गच्छस्व तन्वा सुवर्चाः।।

卐 अपेत वीत वि च सर्पतातो-ऽस्मा एतं पितरो लोक मक्रन्न्। अहोभि रद्भि रक्तुभि र्व्यक्तँ- यमो ददा त्यऽवसान मस्मै।।

卐 अति द्रव सारमेयौ श्वानौ- चतुरक्षौ शबलौ साधुना पथा। अथा पितृ न्त्सुविदत्राँ उपेहि- यमेन ये सधमादं मदन्ति।।

❀07.06.16 卐यौ ते श्वानौ यम रक्षितारौ- चतुरक्षौ पथिरक्षी नृचक्षसौ। ताभ्या मेनं परि देहि राज- न्त्स्वस्ति चास्मा अनमीव ञ्च धेहि।।

卐 उरूणसा वसुतृपा उदुम्बलौ- यमस्य दूतौ चरतो जनाँ अनु। ता वस्मभ्य न्दृशये सूर्याय- पुन र्दाता मसु मद्येह भद्रम्।।

卐 यमाय सोमं सुनुत- यमाय जुहुता हविः। यमं ह यज्ञो गच्छ त्य-ऽग्निदूतो अरङ्कृतः।।

卐 यमाय घृतवद्धवि- र्जुहोत प्र च तिष्ठत। स नो देवेष्वा यम- द्दीर्घ मायुः प्र जीवसे।।

卐 यमाय मधुमत्तमं- राज्ञे हव्यञ्जुहोतन। इदन्नम ऋषिभ्यः पूर्वजेभ्यः -पूर्वेभ्यः पथिकृद्भ्यः।।

卐 त्रिकद्रुकेभिः पतति- षळुर्वीरेक मिद्बृहत्। त्रिष्टु ब्गायत्री छन्दांसि- सर्वा ता यम आहिता।।

**10.15 उदीरतामिति चतुर्दशर्चस्य सूक्तस्य, यामायनः शङ्खः पितरस्त्रिष्टुबेकादशी जगती।**

❀07.06.17 卐उदीरता मवर उत्परास- उन्मध्यमाः पितर स्सोम्यासः। असुँ य ईयु रवृका ऋतज्ञा- स्ते नोऽवन्तु पितरो हवेषु।।

卐 इदं पितृभ्यो नमो अस्त्वद्य- ये पूर्वासो य उपरास ईयुः। ये पार्थिवे रजस्या निषत्ता- ये वा नूनं सुवृजनासु विक्षु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 आहं पितॄ न्त्सुविदत्राँ॥ अवित्सि- नपातञ्च विक्रमणञ्च विष्णोः। बर्हिषदो ये स्वधया सुतस्य- भजन्त पित्वस्त इहाऽगमिष्ठाः।।

卐 बर्हिषदः पितर ऊत्य1(अ)र्वा -गिमा वो हव्या चकृमा जुषध्वम्। त आ गतावसा शन्तमेना-ऽथा न श्शँ यो ररपो दधात।।

卐 उपहूताः पितर स्सोम्यासो- बर्हिष्येषु निधिषु प्रियेषु। त आ गमन्तु त इह श्रुवन्त्व-ऽधि ब्रुवन्तु तेवन्त्वस्मान्।।

❀07.06.18 卐आच्या जानु दक्षिणतो निषद्ये-मँ यज्ञ मभि गृणीत विश्वे। मा हिंसिष्ट पितरः केन चिन्नो-यद्व आगः पुरुषता कराम।।

卐 आसीनासो अरुणीना मुपस्थे- रयि न्धत्त दाशुषे मर्त्याय। पुत्रेभ्यः पितर स्तस्य वस्वः- प्र यच्छत त इहोर्ज न्दधात।।

卐 ये नः पूर्वे पितर स्सोम्यासो-ऽनूहिरे सोमपीथँ वसिष्ठाः। तेभि र्यम स्संरराणो हवींष्यु-श न्नुशद्भिः प्रतिकाम मत्तु।।

卐 ये तातृषु र्देवत्रा जेहमाना- होत्राविद स्स्तोमतष्टासो अर्कैः। आग्ने याहि सुविदत्रेभि रर्वा-ङ्सत्यैः कव्यैः पितृभि र्घर्मसद्भिः।।

卐 ये सत्यासो हविरदो हविष्पा- इन्द्रेण देवै स्सरथ न्दधानाः। आऽग्ने याहि सहस्र.न्देववन्दैः- परैः पूर्वैः पितृभि र्घर्मसद्भिः।।

❀07.06.19 卐अग्निष्वात्ताः पितर एह गच्छत- सदस्सद स्सदत सुप्रणीतयः। अत्ता हवींषि प्रयतानि बर्हिष्य-ऽथा रयिं सर्ववीर न्दधातन।।

卐 त्वमग्न ईळितो जातवेदो-ऽवाड्ढव्यानि सुरभीणि कृत्वी। प्रादाः पितृभ्य स्वधया ते अक्षन्न-ऽद्धि त्व न्देव प्रयता हवींषि।।

卐 ये चेह पितरो ये च नेह- याँश्च विद्म याँ॥ उ च न प्रविद्म। त्वँ वेत्थ यति ते जातवेद- स्वधाभि र्यज्ञं सुकृत.ञ्जुषस्व।।

卐 ये अग्निदग्धा ये अनग्निदग्धा- मध्ये दिव स्स्वधया मादयन्ते। तेभि स्स्वराळसुनीति मेताँ- यथावश न्तन्वङ्कल्पयस्व।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

10.16मैनमितिचतुर्दशर्चस्यसूक्तस्य,यामायनोदमनोऽग्निस्त्रिष्टुबन्त्याश्चतस्रोऽनुष्टुभः।

07.06.20 मैनमग्ने वि दहो माभि शोचो- मास्य त्वच.ञ्चिक्षिपो मा शरीरम्। यदा शृतङ्कृणवो जातवेदो-ऽथे मेनं प्र हिणुता त्पितृभ्यः।।

श‍ृतँ यदा करसि जातवेदो-ऽथेमेनं परि दत्ता त्पितृभ्यः। यदा गच्छा त्यसुनीति मेता- मथा देवानाँ वशनी र्भवाति।।

सूर्यञ्चक्षु र्गच्छतु वात मात्मा- द्याञ्च गच्छ पृथिवीञ्च धर्मणा। अपो वा गच्छ यदि तत्र ते हित- मोषधीषु प्रति तिष्ठा शरीरैः।।

अजो भाग स्तपसा तन्तपस्व- तन्ते शोचि स्तपतु तन्ते अर्चिः। यास्ते शिवा स्तन्वो जातवेद- स्ताभि र्वहैनं सुकृतामु लोकम्।।

अव सृज पुनरऽग्ने पितृभ्यो- यस्त आहुत श्चरति स्वधाभिः। आयु र्वसान^ उप वेतु शेष- स्सङ्गच्छता न्तन्वा जातवेदः।।

07.06.21 यत्ते कृष्ण श्शकुन आतुतोद- पिपील स्सर्प^ उत वा श्वापदः। अग्निष्टद्विश्वा दगद ङ्कृणोतु- सोमश्च यो ब्राह्मणा९ आविवेश।।

अग्ने र्वर्म परि गोभि र्व्ययस्व- सं प्रोर्णुष्व पीवसा मेदसा च। नेत्त्वा धृष्णु र्हरसा जर्हृषाणो- दधृ ग्विधक्ष्य न्पर्यङ्खयाते।।

इम.मग्ने चमसं मा वि जिह्वरः- प्रियो देवाना मुत सोम्यानाम्। एष यश्चमसो देवपान- स्तस्मि न्देवा^ अमृता^ मादयन्ते।।

क्रव्याद मग्निं प्र हिणोमि दूरँ- यमराज्ञो गच्छतु रिप्रवाहः। इहैवाय मितरो जातवेदा- देवेभ्यो हव्यँ वहतु प्रजानन्न्।।

यो अग्निः क्रव्या त्प्रविवेश वो गृह- मिमं पश्यन्नितर.ञ्जातवेदसम्। तं हरामि पितृयज्ञाय देवं- स घर्ममिन्वा त्परमे सधस्थे।।

07.06.22 यो अग्निः क्रव्यवाहनः- पितृ न्यक्ष दृतावृधः। प्रेदु हव्यानि वोचति- देवेभ्यश्च पितृभ्य^ आ।।

उशन्तस्त्वा नि धीम -ह्युशन्त स्समिधीमहि। उशन्नुशत^ आ वह- पितृ न्हविषे अत्तवे।।

卐 यन्त्वमग्ने समदह- स्तमु निर्वापया पुनः। कियाम्ब्वत्र रोहतु- पाकदूर्वा व्यल्कशा।।

卐 शीर्तिके शीर्तिकावति- ह्लादिके ह्लादिकावति। मण्डूक्या3(आ)सु सङ्गम- इमं स्व1(अ)ग्निं हर्षय।।

**द्वितीयेऽनुवाके त्रयोदशसूक्तानि**

10.17 **त्वष्टा दुहित्र इति चतुर्दशर्चस्य सूक्तस्य, यामायनो वेदश्रवा ऋषिः, आद्ययोर्द्वयो स्सरण्यू देवता, ततश्चतसृणां पूषा, ततस्तिसृणां सरस्वती, ततः पञ्चानामापस्त्रिष्टुप्, अन्त्ये द्वे अनुष्टुभौ (द्रप्सश्चस्कन्देति तिसृणां सोमो देवता वा, उपान्त्या पुरस्ताद्बृहती वेतिच)।**

07.06.23 卐त्वष्टा दुहित्रे वहतु.ङ्कृणोती-तीदं विश्वं भुवनं समेति। यमस्य माता पर्युह्यमाना- महो जाया विवस्वतो ननाश।।

卐 अपागूहन्नऽमृतां मर्त्येभ्यः- कृत्वी सवर्णा मददु र्विवस्वते। उताश्विना वभरद्य त्तदासी- दजहादु द्वा मिथुना सरण्यूः।।

卐 पूषा त्वेत श्च्यावयतु प्र विद्वा- ननष्टपशु र्भुवनस्य गोपाः। स त्वैतेभ्यः परि दद त्पितृभ्यो-ऽग्नि र्देवेभ्य स्सुविदत्रियेभ्यः।।

卐 आयु र्विश्वाऽऽयुः परि पासति त्वा- पूषा त्वा पातु प्रपथे पुरस्तात्। यत्राऽऽसते सुकृतो यत्र ते ययु- स्तत्र त्वा देव स्सविता दधातु।।

卐 पूषेमा आशा अनु वेद सर्वा- स्सो अस्माँ अभयतमेन नेषत्। स्वस्तिदा आघृणि स्सर्ववीरो-ऽप्रयुच्छ न्पुर एतु प्रजानन्न्।।

07.06.24 卐प्रपथे पथा मजनिष्ट पूषा- प्रपथे दिवः प्रपथे पृथिव्याः। उभे अभि प्रियतमे सधस्थे--आ च परा च चरति प्रजानन्न्।।

卐 सरस्वती न्देवयन्तो हवन्ते- सरस्वती मध्वरे तायमाने। सरस्वतीं सुकृतो अह्वयन्त- सरस्वती दाशुषे वार्यं न्दात्।।

卐 सरस्वति या सरथँ ययाथ- स्वधाभि र्देवि पितृभि र्मदन्ती। आसद्यास्मि न्बर्हिषि मादय-स्वानमीवा इष आ धेह्यस्मे।।

卐 सरस्वतीँ यां पितरो हवन्ते- दक्षिणा यज्ञ मऽभिनक्षमाणाः। सहस्रार्घ मिळो अत्र भागं- रायस्पोषँ यजमानेषु धेहि।।

卐 आपो अस्मा न्मातर श्शुन्धयन्तु- घृतेन नो घृतप्वः पुनन्तु। विश्वं हि रिप्रं प्रवहन्ति देवी- रुदिदाभ्य श्शुचिरा पूत एमि।।

❀07.06.25 卐द्रप्सश्चस्कन्द प्रथमाऽ अनु द्यू-निमञ्च योनि मनु यश्च पूर्वः। समानँ योनि मनु सञ्चरन्त-न्द्रप्सञ्जुहो म्यनु सप्त होत्राः।।

卐 यस्ते द्रप्स स्स्कन्दति यस्ते अंशु- र्बाहुच्युतो धिषणाया^ उपस्थात्। अध्वर्योर्वा परि वा यः पवित्रा - त्तन्ते जुहोमि मनसा वषट्कृतम्।।

卐 यस्ते द्रप्स स्स्कन्नो यस्ते अंशु- रवश्च यः पर स्स्रुचा। अय न्देवो बृहस्पति- स्सन्तं सिञ्चतु राधसे।।

卐 पयस्वती रोषधयः-पयस्व न्मामकँ वचः। अपां पयस्व दित्पय -स्तेन मा सह शुन्धत।।

**10.18 परं मृत्यो इति चतुर्दशर्चस्य सूक्तस्य, यामायनः सङ्कुसुकः, आद्यानां चतसृणां मृत्युः, पञ्चम्या धाता, षष्ठ्यास्त्वष्टा, शिष्टानां पितृमेधास्त्रिष्टुप्, एकादशी प्रस्तारपङ्क्तिः, त्रयोदशी जगत्यन्त्ये द्वे अनुष्टुभौ (अन्त्यायाः प्रजापतिर्वा देवता)।**

❀07.06.26 卐परं मृत्यो~ अनु परेहि पन्थाँ- यस्ते स्व^ इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि- मा नः प्रजां रीरिषो मोत वीरान्।।

卐 मृत्योः पदँ योपयन्तो यदैत- द्राघीय^ आयुः प्रतर न्दधानाः। आप्यायमानाः प्रजया धनेन- शुद्धाः पूता^ भवत यज्ञियासः।।

卐 इमे जीवा^ वि मृतै राऽववृत्रन्न-ऽभूद्भद्रा देवहूतिर्नो अद्य। प्राञ्चो अगाम नृतये हसाय- द्राघीय^ आयुः प्रतर न्दधानाः।।

卐 इमञ्जीवेभ्यः परिधि न्दधामि- मैषान्नुगा दपरो अर्थ मेतम्। शतञ्जीवन्तु शरदः पुरूची- रन्त मृत्यु न्दधतां पर्वतेन।।

卐 यथाऽहान्यनुपूर्वं भवन्ति- यथ ऋतव^ ऋतुभि र्यन्ति साधु। यथा न पूर्व मपरो जहा -त्येवा धात रायूंषि कल्पयैषाम्।।

❀07.06.27 卐आ रोहताऽऽयु र्जरसँ वृणाना- अनुपूर्वँ यतमाना यति ष्ठ। इह त्वष्टा सुजनिमा सजोषा- ^ दीर्घ मायुः करति जीवसे वः।।

卐 इमा^ नारी रविधवा स्सुपत्नी- राञ्जनेन सर्पिषा सँ विशन्तु। अनश्रवो नमीवा स्सुरत्ना- आ रोहन्तु जनयो योनि मग्रे।।

卐 उदीर्ष्व नार्यभि जीवलोक-ङ्गतासुमेत मुप शेष एहि। हस्तग्राभस्य दिधिषो स्तवेदं- पत्यु र्जनित्व मभि सं बभूथ।।

卐 धनु र्हस्ता दाददानो मृतस्या-ऽस्मे क्षत्राय वर्चसे बलाय। अत्रैव त्वमिह वयं सुवीरा^- विश्वा स्स्पृधो अभिमाती र्जयेम।।

卐 उप सर्प मातरं भूमि मेता- मुरुव्यचसं पृथिवीं सुशेवाम्। ऊर्णम्रदा^ युवति र्दक्षिणावत- एषा त्वा पातु निर्ऋते रुपस्थात्।।

❀07.06.27 卐उच्छ्वञ्चस्व पृथिवि मा नि बाधथा- स्सूपायनास्मै भव सूपवञ्चना। माता पुत्रँ यथा सिचा-ऽभ्येनं भूम ऊर्णुहि।।

卐 उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु- सहस्रं मित उप हि श्रयन्ताम्। ते गृहासो घृतश्चुतो भवन्तु- विश्वाहाऽस्मै शरणा स्सन्त्वत्र।।

卐 उत्ते स्तभ्नामि पृथिवी न्त्वत्परी-मँ लोग न्निदधन्मो अहं रिषम्। एतां स्थूणां पितरो धारयन्तु- तेऽत्रा यम स्सादना ते मिनोतु।।

卐 प्रतीचीने मामह-नीष्वाः- पर्णमिवा दधुः। प्रतीचीञ्जग्रभा वाच म-ऽश्वं रशनया यथा।।।। इति षष्ठाध्याय स्समाप्तः।।

## ऽ৩ऽ ऽ৩ऽसप्तमाष्टके सप्तमाध्यायः (वर्गाः 1-30)

🏺 10.19 **नि वर्तध्वमित्यष्टर्चस्य सूक्तस्य, यामायनो मथित ऋषिः, आपोदेवताः, आद्याया अबग्नीषोमा अनुष्टुप्षष्ठी गायत्री। (अत्र सूक्ते वारुणि भृगु र्भार्गव श्च्यवन श्चेमौ पाक्षिका वृषी गौर्वा देवता)।**

❀07.07.0 卐नि वर्तध्वं माऽनु गाता-ऽस्मा न्त्सिषक्त रेवतीः। अग्नीषोमा पुनर्वसू~ अस्मे धारयतं रयिम्।।

卐 पुनरेना नि वर्तय- पुन रेना न्याकुरु। इन्द्र^ एणा^ नि यच्छ- त्वऽ-ग्नि रेना^ उपाऽऽजतु।।

卐 पुन रेता नि वर्तन्ता- मऽस्मि न्पुष्यन्तु गोपतौ। इहैवाऽग्ने नि धार-येह तिष्ठतु या रयिः।।

卐 यन्नियान.न्न्ययनं- संज्ञानँ यत्परायणम्। आवर्तन न्निवर्तनँ- यो गोपा^ अपि तं हुवे।।

卐 य^ उदानड्व्यर्यनँ- य^ उदानद्दरार्यणम्। आवर्तन न्निवर्तन- मपि गोपा नि वर्तताम्।।

卐 आ निवर्त नि वर्तय- पुनर्न^ इन्द्र गा^ देहि। जीवाभि र्भुनजामहै।।

卐 परि वो विश्वतो दध- ऊर्जा घृतेन पर्यसा। ये देवाः के च यज्ञिया- स्ते रय्या सं सृजन्तु नः।।

卐 आ निवर्तन वर्तय- नि निवर्तन वर्तय। भूम्या श्चतस्रः प्रदिश- स्ताभ्य^ एना^ नि वर्तय।।

10.20 **भद्रमिति दशर्चस्य सूक्तस्यैन्द्रो विमदोऽग्निर्गायत्री, आद्यैकपदा विराड्विितीयाऽनुष्टूबन्त्ये विराड्विष्टुभौ (भद्रन्नः प्रभृति सप्तसूक्तेषु य ऐन्द्रो विमद स्स प्राजापत्यो वैकल्पिकः किञ्च वासुक्रो वसुकृद्वा)।**

❀07.07.02 卐भद्रन्नो अपि वातय मनः।।

卐 अग्निमीळे भुजाँ यविष्ठं- शासा मित्र न्दुर्धरीतुम्। यस्य धर्म न्त्स्व1(अ)रेनी- स्सपर्यन्ति मातु रूधः।।

卐 यमासा कृपनीळं- भासाकेतुँ वर्धयन्ति। भ्राजते श्रेणिदन्न्।।

卐 अर्यो विशाङ्गातु रेति- प्र यदाऽऽनड्दिवो अन्तान्। कवि रभ्र न्दीद्यानः।।

卐 जुषद्धव्या मानुष-स्योर्ध्व स्तस्था वृभ्वा यज्ञे। मिन्व न्त्सद्म पुर एति।।

卐 स हि क्षेमो हवि र्यज्ञ- श्श्रुष्टीदऽस्य गातु रेति। अग्नि न्देवा^ वाशीमन्तम्।।

❀07.07.03 卐यज्ञासाह न्दुव^ इषे-ऽग्निं पूर्वस्य शेवस्य। अद्रे स्सूनु मायु माहुः।।

卐 नरो ये के चाऽस्मदा- विश्वे त्ते वाम आ स्युः~। अग्निं हविषा वर्धन्तः।।

卐 कृष्ण श्श्वेतोऽरुषो यामो अस्य- ब्रध्न^ ऋज्र^ उत शोणो यशस्वान्। हिरण्यरूप.ञ्जनिता जजान।।

卐 एवा ते अग्ने विमदो मनीषा- मूर्जो नपा दऽमृतेभि स्सजोषाः। गिर^ आ वक्ष त्सुमती रियान-^ इष मूर्ज सुक्षितिँ विश्व माऽभाः~।।

10.21 **आग्निन्नेत्यष्टर्चस्य सूक्तस्यैन्द्रो विमदोऽग्निरास्तारपङ्क्तिः।**

❀07.07.04 卐आऽग्निन्न स्ववृक्तिभि- र्होतारन्त्वा वृणीमहे। यज्ञाय स्तीर्णबर्हिषे वि वो मदे- शीरं पावकशोचिषँ विवक्षसे।।

卐 त्वामु ते स्वाभुव- श्शुम्भ न्त्यऽश्वराधसः। वेति त्वामुपसेचनी वि वो मद –ऋजीति रग्न आहुति र्विवक्षसे।।

卐 त्वे धर्माण^ आसते- जुहूभि स्सिञ्चतीरिव। कृष्णा रूपाण्यर्जुना वि वो मदे- विश्वा^ अधि श्रियो धिषे विवक्षसे।।

卐 यमग्ने मन्यसे रयिं- सहसावन्नऽमर्त्य। तमा नो वाजसातये वि वो मदे- यज्ञेषु चित्रमा भरा विवक्षसे।।

卐 अग्नि र्जातो अथर्वणा- विद द्विश्वानि काव्या। भुवद्दूतो विवस्वतो वि वो मदे -प्रियो यमस्य काम्यो विवक्षसे।।

❀07.07.05 卐त्वाँ यज्ञेष्वीळते-ऽग्ने प्रयत्यध्वरे। त्वँ वसूनि काम्या वि वो मदे- विश्वा दधासि दाशुषे विवक्षसे।।

卐 त्वाँ यज्ञेष्वृत्विज-ञ्चारु.मग्ने नि षेदिरे। घृतप्रतीकं मनुषो वि वो मदे -शुक्रञ्चेतिष्ठ मक्षभि र्विवक्षसे।।

卐 अग्ने शुक्रेण शोचिषो-रु प्रथयसे बृहत्। अभिक्रन्दन्वृषायसे वि वो मदे -गर्भ न्दधासि जामिषु विवक्षसे।।

**☃ 10.22 कुह श्रुत इति पञ्चदशर्चस्य सूक्तस्यैन्द्रो विमद इन्द्रः, पुरस्ताद्बृहती पञ्चमी सप्तमी नवम्योऽनुष्टुभोऽन्त्या त्रिष्टुप्।**

❀07.07.06 卐कुह श्रुत^ इन्द्रः कस्मिन्नऽद्य- जने मित्रो न श्रूयते। ऋषीणाँ वा यः ≈ क्षये- गुहा वा चर्कृषे गिरा।।

卐 इह श्रुत^ इन्द्रो अस्मे-अद्य स्तवे वज्र्यृचीषमः। मित्रो न यो जनेष्वा-ऽऽ यश श्चक्रे असाम्या।।

卐 महो यस्पति श्शवसो असाम्या- महो नृम्णस्य तूतुजिः। भर्ता वज्रस्य धृष्णोः- पिता पुत्रमिव प्रियम्।।

卐 युजानो अश्वा^ वातस्य धुनी- देवो देवस्य वज्रिवः। स्यन्ता पथा विरुक्मता- सृजान स्स्तोष्यध्वनः।।

卐 त्वन्त्या चिद्वातस्याऽश्वागा-^ ऋज्रा त्मना वहध्यै। ययोर्देवो न मर्त्यो -यन्ता नकिर्विदाय्यः।।

❀07.07.07 卐अध ग्मन्तोशना पृच्छते- वा-ङ्कदर्था न^ आ गृहम्। आ जग्मथुः पराका- द्दिवश्च ग्मश्च मर्त्यम्।।

卐 आ न^ इन्द्र पृक्षसे-ऽस्माकं ब्रह्मोद्यतम्। तत्त्वा याचामहेऽव- श्शुष्णँ यद्धन्नमानुषम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अकर्मा दस्यु रभि नो अमन्तु- रऽन्यव्रतो अमानुषः। त्वन्तस्यामित्रह- न्वध दासस्य दम्भय।।

卐 त्वन्न^ इन्द्र शूर शूरै- रुत त्वोतासो बर्हणा। पुरुत्रा ते वि पूर्तयो- नवन्त क्षोणयो यथा।।

卐 त्व न्तान्वृत्रहत्ये चोदयो नृ-न्कार्पाणे शूर वज्रिवः। गुहा यदी कवीनाँ- विशा.न्नक्षत्रशवसाम्।।

❀07.07.08 卐मक्षू ता त इन्द्र दानाप्नस-^ आक्षाणे शूर वज्रिवः। यद्ध शुष्णस्य दम्भयो- जातँ विश्वं सयावभिः।।

卐 माऽकुध्र्यगिन्द्र शूर वस्वी- रस्मे भूवन्नभिष्टयः। वयँवयन्त आसां- सुम्ने स्याम वज्रिवः।।

卐 अस्मे ता त इन्द्र सन्तु सत्या-ऽहिंसन्ती रुपस्पृशः। विद्याम यासां भुजो- धेनूनान्न वज्रिवः।।

卐 अहस्ता यदपदी वर्धत -क्षा श्शचीभि र्वेद्यानाम्। शुष्णं परि प्रदक्षिणि -द्विश्वाऽऽयवे नि शिश्नथः।।

卐 पिबापिबेदिन्द्र शूर सोमं- मा रिषण्यो वसवान वसु स्सन्न्। उत त्रायस्व गृणतो मघोनो- महश्च रायो रेवत स्कृधी नः।।

☙ 10.23 **यजामह इति सप्तर्चस्य सूक्तस्यैन्द्रो विमद इन्द्रो जगत्याद्यान्त्ये त्रिष्टुभौ, पञ्चम्यभिसारिणी।**

❀07.07.09 卐यजामह इन्द्रँ वज्रदक्षिणं- हरीणां रथ्य1(अँ) विव्रतानाम्। प्र श्मश्रु दोधुव दूर्ध्वथा भू-द्विसेनाभि र्दयमानो वि राधसा।।

卐 हरी~ न्वस्य या वने विदे वस्वि-न्द्रो मघै र्मघवा वृत्रहा भुवत्। ऋभु र्वाज ऋभुक्षाः पत्यते शवो-ऽव क्ष्णौमि दासस्य नाम चित्।।

卐 यदा वज्रं हिरण्य मिदथा रथं- हरी~ यमस्य वहतो वि सूरिभिः। आ तिष्ठति मघवा सनश्रुत-^ इन्द्रो वाजस्य दीर्घश्रवसस्पतिः।।

卐 सो~ चिन्नु वृष्टि र्यूथ्या3(आ)स्वा सचाँ- इन्द्र श्श्मश्रूणि हरिताऽभि प्रुष्णुते। अव वेति सुक्षयं सुते मधू-दिद्धूनोति वातो यथा वनम्।।

卐 यो वाचा विवाचो मृध्रवाचः- पुरू सहस्राऽशिवा जघान। तत्तदिदस्य पौंस्यङ्गृणीमसि- पितेव यस्तविषीँ वावृधे शवः।।

卐 स्तोमन्त इन्द्र विमदा^ अजीजन-न्नपूर्व्यं पुरुतमं सुदानवे। विद्मा ह्यस्य भोजन मिनस्य- यदा पशुन्न गोपाः करामहे।।

卐 माकिर्न॑ एना सख्या वि यौषु- स्तव॑ चेन्द्र विमदस्य॑ च ऋषेः। विद्मा हि ते प्रम॑ति न्देव जामिव – दस्मे ते सन्तु सख्या शिवानि॑।।

☬ 10.24 **इन्द्र सोममिति षड्चस्य सूक्तस्यैन्द्रो विमद इन्द्रोऽन्त्यतिसृणामश्विनावास्तारपङ्क्ति रन्त्यास्तिस्त्रोऽनुष्टुभः ।**

❀07.07.10 卐इन्द्र सोम॑ मिमं पि॑ब- मधु॑मन्तञ्चमू~ सुतम्। अस्मे रयिन्नि धारय वि वो मदे- सहस्रिणं पुरूवसो~ विव॑क्षसे।।

卐 त्वाँ यज्ञेभि॑ रुक्थै- रुप॑ हव्येभि॑ रीमहे। शचीपते शचीनाँ वि वो मदे- श्रेष्ठन्नो धेहि वार्यँ विव॑क्षसे।।

卐 यस्पति॑ र्वार्याणा- मसि॑ रध्रस्य॑ चोदिता। इन्द्र स्स्तोतृणा म॑विता वि वो मदे- द्विषो नः॒ पाह्यंहसो विव॑क्षसे।।

卐 युवं शक्रा मायाविना- समीची~ नि॑रमन्थतम्। विमदेन यदीळिता -नासत्या निरमन्थतम्।।

卐 विश्वे देवा॑ अकृपन्त- समीच्यो नि॑ष्पतन्त्योः। नासत्या वब्रुव न्देवाः॒- पुन रा॑वहता दिति॑।।

卐 मधु॑मन्मे परायणं- मधु॑म त्पुनराऽयनम्। ता नो॑ देवा देवत॑या- युवं मधु॑मत स्कृतम्।।

☬ 10.25 **भद्रमित्येकादशर्चस्य सूक्तस्यैन्द्रो विमद स्सोम आस्तारपङ्क्तिः।**

❀07.07.11 卐भद्रन्नो अपि॑ वातय- मनो दक्ष॑मुत क्रतुम्। अधा ते सख्ये अन्ध॑सो वि वो मदे- रणन्गावो न यव॑से विव॑क्षसे।।

卐 हृदिस्पृश॑स्त आसते- विश्वेषु सोम धाम॑सु। अधा कामा॑ इमे मम वि वो मदे- वि ति॑ष्ठन्ते वसूयवो विव॑क्षसे।।

卐 उत व्रतानि॑ सोम ते- प्राहं मि॑नामि पाक्या। अधा पितेव॑ सूनवे वि वो मदे- मृळा नो॑ अभि चि॑द्वधा द्विव॑क्षसे।।

卐 समु प्र य॑न्ति धीतय- स्सर्गासोऽवताँ॑इव। क्रतुन्न स्सोम जीवसे वि वो मदे- धारया चमसाँ॑इव विव॑क्षसे।।

卐 तव त्ये सोम शक्ति॑भि- र्निकामासो व्यृण्विरे। गृत्सस्य धीरा स्तवसो वि वो मदे- व्रजङ्गोम॑न्त मश्विनँ विव॑क्षसे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀07.07.12 卐पशुन्न स्सोम रक्षसि- पुरुत्रा विष्ठितञ्जगत्। समाकृणोषि जीवसे वि वो मदे- विश्वा संपश्य न्भुवना विवक्षसे।।

卐 त्वन्न स्सोम विश्वतो- गोपा^ अदाभ्यो भव। सेध राजन्नप स्त्रिधो वि वो मदे -मा नो दुश्शंस^ ईशता विवक्षसे।।

卐 त्वन्न स्सोम सुक्रतु- र्वयोधेयाय जागृहि। क्षेत्रवित्तरो मनुषो वि वो मदे- द्रुहो नः पाह्यंहसो विवक्षसे।।

卐 त्वन्नो वृत्रहन्त-मेन्द्रस्येन्दो~ शिव स्सखा। यत्सीं हवन्ते समिथे वि वो मदे- युध्यमाना स्तोकसातौ विवक्षसे।।

卐 अयङ्घ स तुरो मद-^ इन्द्रस्य वर्धत प्रियः। अयङ्कक्षीवतो महो वि वो मदे -मतिं विप्रस्य वर्धय द्विवक्षसे।।

卐 अयँ विप्राय दाशुषे- वाजाँ इयर्ति गोमतः। अयं सप्तभ्य^ आ वरँ वि वो मदे- प्राऽन्धं श्रोणञ्च तारिष द्विवक्षसे।।

☙ 10.26 प्र ह्यच्छेति नवर्चस्य सूक्तस्यैन्द्रो विमदः पूषाऽनुष्टुप्, आद्या चतुर्थ्यावुष्णहौ।

❀07.07.13 卐प्र ह्यच्छा मनीषा- स्स्पार्हा यन्ति नियुतः। प्र दस्रा नियुद्रथः- पूषा अविष्टु माहिनः।।

卐 यस्य त्यन्महित्वँ- वाताप्य मयञ्जनः। विप्र^ आ वंस द्धीतिभि -श्चिकेत सुष्टुतीनाम्।।

卐 स वेद सुष्टुतीना- मिन्दुर्न पूषा वृषा। अभि प्सुरः प्रुषायति- व्रजन्न^ आ प्रुषायति।।

卐 मंसीमहि त्वा वय- मऽस्माक न्देव पूषन्न्। मतीनाञ्च साधनँ- विप्राणाञ्चाधवम्।।

卐 प्रत्यर्धि र्यज्ञाना- मऽश्वहयो रथानाम्। ऋषिस्स यो मनुर्हितो- विप्रस्य यावयत्सखः।।

❀07.07.14 卐आधीषमाणायाः पति- श्शुचायाश्च शुचस्य च। वासोवायोवीना- मा वासांसि मर्मृजत्।।

卐 इनो वाजानां पति- रिनः पुष्टीनां सखा। प्र श्मश्रु हर्यतो दूधो-द्वि वृथा यो अदाभ्यः।।

卐 आ ते रथस्य पूषन्न-ऽजा^ धुरँ ववृत्युः। विश्वस्यार्थिन स्सखा- सनोजा^ अनपच्युतः।।

卐 अस्माक मूर्जा रथं- पूषा अविष्टु माहिनः। भुव द्वाजानाँ वृध-^ इमन्न श्शृणव द्धवम्।।

☙ 10.27 असत्स्विति चतुर्विंशत्यृचस्य सूक्तस्यैन्द्रो वसुक्र इन्द्रस्त्रिष्टुप्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀07.07.15 卐असत्सु मे जरित स्साभिवेगो- यत्सुन्वते यजमानाय शिक्षम्। अनाशीर्दा मह मस्मि प्रहन्ता- सत्यध्वृतँ वृजिनायन्त माभुम्।।

卐 यदी दहँ युधये सन्नया-न्यऽदेवयू न्तन्वा3(आ)शूशुजानान्। अमा ते तुम्रँ वृषभं पचानि- तीव्रं सुतं पञ्चदशन्नि षिञ्चम्।।

卐 नाह न्तँ वेद य^ इति ब्रवी –त्यदेवयू न्त्समरणे जघन्वान्। यदाऽवाख्य त्समरण मृघाव- दादिद्ध मे वृषभा प्र ब्रुवन्ति।।

卐 यदज्ञातेषु वृजनेष्वासँ- विश्वे सतो मघवानो म आसन्न्। जिनामि वेत्क्षेम आ सन्त माभुं- प्र तङ्क्षिणां पर्वते पादगृह्य।।

卐 न वा उ माँ वृजने वारयन्ते- न पर्वतासो यदहं मनस्ये। मम स्वना त्कृधुकर्णो भयात -एवे दनु द्यून्किरण स्समेजात्।।

❀07.07.16 卐दर्शन्न्वत्र श्शृतपा९ अनिन्द्रा -न्बाहुक्षद श्शरवे पत्यमानान्। घृषुँ वा ये निनिदु स्सखाय- मध्यू न्वेषु पवयो ववृत्युः।।

卐 अभूर्वौक्षीव्र्यु1(उ) आयु रान -ड्दर्षन्नु पूर्वो अपरो नु दर्षत्। द्वे ~पवस्ते~ परि तन्न भूतो- यो अस्य पारे रजसो विवेष।।

卐 गावो यवं प्रयुता^ अर्यो अक्ष-न्ता^ अपश्यं सहगोपा श्चरन्तीः। हवा^ इदर्यो अभित स्समाय- न्कियदासु स्वपति श्छन्दयाते।।

卐 सँ यद्वयँ यवसादो जनाना- महँ यवाद^ उर्वज्रे अन्तः। अत्रा युक्तोऽवसातार मिच्छा- दथो~ अयुक्तँ युनज द्ववन्वान्।।

卐 अत्रेदु मे मंससे सत्य मुक्त- न्द्विपाच्च यच्चतुष्पा त्संसृजानि। स्त्रीभि र्यो अत्र वृषणं पृतन्या- दऽयुद्धो अस्य वि भजानि वेदः।।

❀07.07.17 卐यस्यानक्षा दुहिता जात्वास- कस्ताँ विद्वा९ अभि मन्याते अन्धाम्। कतरो मेनिं प्रति तं मुचाते- य^ ईं वहाते य^ ईं वा वरेयात्।।

卐 कियती योषा मर्यतो वधूयोः- परिप्रीता पन्यसा वार्येण। भद्रा वधू र्भवति यत्सुपेशा- स्स्वयं सा मित्रँ वनुते जने चित्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 पत्तो जगार प्रत्यञ्चं मत्ति- शीर्ष्णा शिरः प्रति दधौ वरूथम्। आसीन^ ऊर्ध्वा मुपसि क्षिणाति-
न्यङ्ङुत्ताना मन्वेति भूमिम्।।

卐 बृहन्नच्छायो अपलाशो अर्वा- तस्थौ माता विषितो अत्ति गर्भः। अन्यस्या^ वत्सं रिहती मिमाय-
कया भुवा नि दधे धेनु रूधः।।

卐 सप्त वीरासो अधरा दुदाय-न्नष्टोत्तरात्ता त्समजग्मि रन्ते। नव पश्चाता त्स्थिविमन्त^ आय- न्दश
प्राक्सानु वि तिरन्त्यश्नः।।

❀07.07.18 卐दशाना मेकङ्कपिलं समान-न्तं हिन्वन्ति क्रतवे पार्याय। गर्भं माता सुधितँ वक्षणा-
स्ववेनन्त न्तुषयन्ती बिभर्ति।।

卐 पीवानं मेष मपचन्त वीरा- न्युप्ता^ अक्षा^ अनु दीव आसन्न्। द्वा धनुं बृहती मप्स्व1(अ)न्तः~~-
पवित्रवन्ता चरतः पुनन्ता।।

卐 वि क्रोशनासो विष्वञ्च^ आय -न्पचाति नेमो नहि पक्ष दर्धः। अयं मे देव स्सविता तदाह -द्र्वन्न^
इद्वनव त्सर्पिरन्नः।।

卐 अपश्यङ्ग्रामँ वहमान मारा -दऽचक्रया स्वधया वर्तमानम्। सिषक्त्यर्यः प्र युगा जनानां- सद्य
शिश्ना प्रमिनानो नवीयान्।।

卐 एतौ मे गावौ प्रमरस्य युक्तौ- मो~ षु प्र सेधी र्मुहुरि न्ममन्धि। आप श्चिदस्य वि नशन्त्यर्थं- सूरश्च
मर्क^ उपरो बभूवान्।।

❀07.07.19 卐अयँ यो वज्रः पुरुधा विवृत्तो-ऽव स्सूर्यस्य बृहतः पुरीषात्। श्रव^ इदेना परो अन्य
दस्ति- तदव्यथी जरिमाण स्तरन्ति।।

卐 वृक्षेवृक्षे नियता मीमयद्गौ -स्ततो वयः प्र पता न्पूरुषादः। अथेदं विश्वं भुवनं भयात- इन्द्राय सुन्व
दृषये च शिक्षत्।।

卐 देवानां माने प्रथमा^ अतिष्ठ -न्कृन्तत्रा देषा मुपरा उदायन्न्। त्रयस्तपन्ति पृथिवी मनूपा- द्वा बृबूकँ
वहतः पुरीषम्।।

卐 सा ते जीवातु रुत तस्य विद्धि- मा ऽस्मैताद्दगप गूह स्समर्ये। आवि स्स्वः कृणुते गूहते बुसं- स
पादु रस्य निर्णिजो न मुच्यते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

☬ 10.28 विश्वो हीति द्वादशर्चस्य सूक्तस्य, आद्याया इन्द्रस्नुषा ऋषिका, द्वितीयादि चतुर्थी वर्जानां युजामिन्द्रऋषिः, चतुर्थी सहितानामयुजां वसुक्र ऋषिः, चतुर्थी वर्ज्यानां युजां वसुक्रो देवता शिष्टानामिन्द्रस्त्रिष्टुप्। (अत्र सूक्ते प्रथमर्चि इन्द्रस्नुषार्षत्वे विकल्पं शौनको मन्यते तत्पक्षे तत्र वसुक्रो विज्ञेयः)।

❀07.07.20 卐विश्वो ह्य1(अ)न्यो अरि राजगाम- ममे दह श्वशुरो ना जगाम। जक्षीया द्धाना उत सोमं पपीया- त्स्वाशितः पुन रऽस्तञ्जगायात्।।

卐 स रोरुव द्वृषभ स्तिग्मशृङ्गो- वर्ष्म न्तस्थौ वरिमन्ना ऽऽपृथिव्याः। विश्वेष्वेनँ वृजनेषु पामि- यो मे कुक्षी~ सुतसोमः पृणाति।।

卐 अद्रिणा ते मन्दिन इन्द्र तूया- न्त्सुन्वन्ति सोमा न्पिबसि त्वमेषाम्। पचन्ति ते वृषभाꣳ अत्सि तेषां- पृक्षेण यन्मघव न्हूयमानः।।

卐 इदं सु मे जरित रार्चिकिद्धि- प्रतीपं शापन्नद्यो वहन्ति। लोपाश स्सिंहं प्रत्यञ्च मत्साः-~ क्रोष्टा वराह न्निरतक्त कक्षात्।।

卐 कथा त एत दहमा चिकेत-ङ्गृत्सस्य पाक स्तवसो मनीषाम्। त्वन्नो विद्वाꣳ ऋतुथा वि वोचो- यमर्धन्ते मघव न्क्षेम्या धूः।।

卐 एवा हि मान्तवसँ वर्धयन्ति- दिवश्चिन्मे बृहत उत्तरा धूः। पुरू सहस्रा नि शिशामि साक- मशत्रुं हि मा जनिता जजान।।

❀07.07.21 卐एवा हि मान्तवसञ्जज्ञु रुग्र-ङ्कर्मन्कर्म न्वृषणमिन्द्र देवाः। वधीँ वृत्रँ वज्रेण मन्दसानो- ऽप व्रजं महिना दाशुषे वम्।।

卐 देवास आय न्परशूꣳ रबिभ्र- न्वना वृश्चन्तो अभि विड्भिरायन्न्। नि सुद्र्व1(अ) न्दधतो वक्षणासु- यत्रा कृपीट मनु तद्दहन्ति।।

卐 शशः ≈ क्षुरं प्रत्यञ्च.ञ्जगा-राद्रिँ लोगेन व्यभेद मारात्। बृहन्तञ्चि.द्दहते रन्धयानि- वय द्वत्सो वृषभं शूशुवानः।।

卐 सुपर्ण इत्था नखमा ऽसिषाया-ऽवरुद्धः परिपदन्न सिंहः। निरुद्धश्चि न्महिष स्तर्ष्यावा- न्गोधा तस्मा अयथङ्कर्ष देतत्।।

卐 तेभ्यो गोधा अयथङ्कर्ष- देत द्ये ब्रह्मणः प्रतिपीय न्त्यन्नैः। सिम उक्ष्णोऽवसृष्टा अदन्ति- स्वयं बलानि तन्व श्शृणानाः।।

卐 एते शमीभि स्सुशमी अभूव -न्ये हिन्विरे तन्व1(अ)स्सोम उक्थैः। नृवद्वद न्नुप नो माहि वाजा-न्दिवि श्रवो दधिषे नाम वीरः।।

☬ 10.29 **वने नेत्यष्टर्चस्य सूक्तस्यैन्द्रो वसुक्र इन्द्रस्त्रिष्टुप्।**

❀07.07.22 卐वने न वा यो न्यधायि चाक-ञ्छुचिर्वां स्तोमो भुरणा वजीगः। यस्ये दिन्द्रः पुरुदिनेषु होता- नृणान्नर्यो नृतमः क्षपावान्।।

卐 प्र ते अस्या उषसः प्रापरस्या- नृतौ स्याम नृतमस्य नृणाम्। अनु त्रिशोक श्शत मावहन्नॄ-न्कुत्सेन रथो यो अस त्ससवान्।।

卐 कस्ते मद इन्द्र रन्त्यो भू-द्दुरो गिरो अभ्यु1(उ)ग्रो वि धाव। कद्वाहो अर्वा गुप मा मनीषा- आ त्वा शक्या मुपमं राधो अन्नैः।।

卐 कदु द्युम्न मिन्द्र त्वावतो नृ-न्कया धिया करसे कन्न आगन्न्। मित्रो न सत्य उरुगाय भृत्या- अन्ने समस्य यदस न्मनीषाः।।

卐 प्रेरय सूरो अर्थन्न पारँ- ये अस्य कामञ्जनिधाइव ग्मन्न्। गिरश्च ये ते तुविजात पूर्वी- र्नर इन्द्र प्रतिशिक्ष न्त्यन्नैः।।

❀07.07.23 卐मात्रे नु ते सुमिते इन्द्र पूर्वी- द्यौ र्मज्मना पृथिवी काव्येन। वराय ते घृतवन्त स्सुतास- स्स्वाद्म न्भवन्तु पीतये मधूनि।।

卐 आ मध्वो अस्मा असिचन्नमत्र- मिन्द्राय पूर्णं स हि सत्याराधाः। स वावृधे वरिमन्ना पृथिव्या- अभि क्रत्वा नर्यः पौंस्यैश्च।।

卐 व्यानळिन्द्रः पृतना स्स्वोजा- आऽस्मै यतन्ते सख्याय पूर्वीः। आ स्मा रथन्न पृतनासु तिष्ठ- यं भद्रया सुमत्या चोदयासे।।

**तृतीयेऽनुवाके त्रयोदशसूक्तानि ।**

☬ 10.30 **प्र देवत्रेति पञ्चदशर्चस्य सूक्तस्यैलूषः कवष आपस्त्रिष्टुप्।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀07.07.24 卐प्र देवत्रा ब्रह्मणे गातुरे-त्वऽपो अच्छा मनसो न प्रयुक्ति। महीं मित्रस्य वरुणस्य धासिं- पृथुज्रयसे रीरधा सुवृक्तिम्।।

卐 अध्वर्यवो हविष्मन्तो हि भूता-ऽच्छाप इतोशती रुशन्तः। अव याश्चष्टे अरुण स्सुपर्ण-स्तमाऽस्यध्व मूर्मि मद्या सुहस्ताः।।

卐 अध्वर्यवोऽप^ इता समुद्र- मपान्नपातं हविषा यजध्वम्। स वो दद दूर्मि मद्या सुपूत- न्तस्मै सोमं मधुमन्तं सुनोत।।

卐 यो अनिध्मो दीदय दप्स्व1(अ)न्त-यँ विप्रास^ ईळते अध्वरेषु। अपान्नपा न्मधुमती रपो दा- याभि रिन्द्रो वावृधे वीर्याय।।

卐 याभि स्सोमो मोदते हर्षते च- कल्याणीभि र्युवतिभि र्न मर्यः। ता^ अध्वर्यो~ अपो अच्छा परेहि- यदासिञ्चा^ ओषधीभिः पुनीतात्।।

❀07.07.25 卐एवेद्यूने युवतयो नमन्त- यदी मुशन्नुशती रेत्यऽच्छ। सञ्जानते मनसा सञ्चिकित्रे-ऽध्वर्यवो धिषणापश्च देवीः।।

卐 यो वो वृताभ्यो अकृणोदु लोकँ- यो वो मह्या^ अभिशस्ते रमुञ्चत्। तस्मा इन्द्राय मधुमन्त मूर्मि-न्देवमादनं प्र हिणोतनापः।।

卐 प्रास्मै हिनोत मधुमन्त मूर्मि-ङ्गर्भो यो व स्सिन्धवो मध्व^ उत्सः। घृतपृष्ठ मीड्य मध्वरेष्वा-ऽऽपो रेवती श्शृणुता हवं मे।।

卐 तं सिन्धवो मत्सर मिन्द्रपान- मूर्मिं प्र हेत य^ उभे~ इयर्ति। मदच्युत मौशान.न्नभोजां- परि त्रितन्तुँ विचरन्त मुत्सम्।।

卐 आवर्वृतती रध नु द्विधारा^- गोषुयुधो न नियव.ञ्चरन्तीः। ऋषे जनित्री भुवनस्य पत्नी- रपो वन्दस्व सवृध स्सयोनीः।।

❀07.07.26 卐हिनोता नो अध्वर न्देवयज्या- हिनोत ब्रह्म सनये धनानाम्। ऋतस्य योगे वि ष्यध्व मूध- श्श्रुष्टीवरी र्भूतनाऽस्मभ्य मापः।।

卐 आपो रेवतीः≈क्षयथा हि वस्वः- क्रतुञ्च भद्रं बिभृथाऽमृतञ्च। रायश्च स्थ स्वपस्यस्य पत्नी-स्सरस्वती तद्गृणते वयो धात्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 प्रति यदापो अदृश्र मायती- र्घृतं पयांसि बिभ्रती मधूनि। अध्वर्युभि र्मनसा सँविदाना-^ इन्द्राय सोमं सुषुतं भरन्तीः।।

卐 एमा^ अग्म न्नेवती र्जीवधन्या^- अध्वर्यव स्सादयता सखायः। नि बर्हिषि धत्तन सोम्यासो-ऽपान्नप्त्रा सँविदानास एनाः।।

卐 आग्मन्नाप^ उशती र्बर्हिरेद-न्न्यध्वरे असद न्देवयन्तीः। अध्वर्यव स्सुनुतेन्द्राय सोम- मभूदु व स्सुशका देवयज्या।।

⚱ 10.31 **आ नो देवानामित्येकादशर्चस्य सूक्तस्यैलूषः कवषो विश्वेदेवास्त्रिष्टुप् (भेदपक्षे-विश्वेदेवाः** 9, **अश्वत्थगर्भाशमी** 1, **उषोऽग्नी** 1, **एवं** 11)।

❀07.07.27 卐आ नो देवाना मुप वेतु शंसो- विश्वेभि स्तुरै रवसे यजत्रः। तेभि र्वयं सुषखायो भवेम- तरन्तो विश्वा दुरिता स्याम।।

卐 परि चिन्मर्तो द्रविणं ममन्या- दृतस्य पथा नमसा ऽऽविवासेत्। उत स्वेन क्रतुना सँ वदेत -श्रेयांस न्दक्षं मनसा जगृभ्यात्।।

卐 अधायि धीति रससृग्र मंशा- स्तीर्थे न दस्म मुप यन्त्यूमाः। अभ्यानश्म सुवितस्य शूष-न्नवेदसो अमृताना मभूम।।

卐 नित्यश्चाकन्या त्स्वपति र्दमूना^- यस्मा उ देव स्सविता जजान। भगो वा गोभि रर्यमे.मनज्या-त्सो अस्मै चारुश्छदय दुत स्यात्।।

卐 इयं सा भूया^ उषसामिव क्षा^- यद्ध क्षुमन्त श्शवसा समायन्न्। अस्य स्तुति.ञ्जरितु र्भिक्षमाणा^- आ न श्शग्मास उप यन्तु वाजाः।।

❀07.07.28 卐अस्ये देषा सुमतिः॰ पप्रथाना-ऽभव त्पूर्व्या भूमना गौः। अस्य सनीळा^ असुरस्य योनौ- समान आ भरणे बिभ्रमाणाः।।

卐 किं स्विद्वनङ्क^ उ स वृक्ष^ आस- यतो द्यावापृथिवी~ निष्टतक्षुः। सन्तस्थाने~ अजरे~ इतऊती~- अहानि पूर्वी रुषसो जरन्त।।

卐 नैतावं देना परो अन्यद-स्त्युक्षा स द्यावापृथिवी~ बिभर्ति। त्वचं पवित्र.ङ्कृणुत स्वधावा- न्यदीं सूर्यन्न हरितो वहन्ति।।

卐 स्तेगो न क्षा मत्येति पृथ्वीं- मिहन्न वातो वि ह वाति भूम। मित्रो यत्र वरुणो अज्यमानो-ऽग्नि र्वने न व्यसृष्ट शोकम्।।

卐 स्तरी र्यत्सूत सद्यो अज्यमाना- व्यर्थि रव्यथीः कृणुत स्वगोपा। पुत्रो यत्पूर्वः पित्रो र्जनिष्ट शम्या-ङ्गौर्जगार यद्ध पृच्छान्।।

卐 उत कण्वन्नृषदः पुत्र माहु- रुत श्यावो धन मादत्त वाजी। प्र कृष्णाय रुश दपिन्वतोधर्- ऋत मत्र नकि रस्मा अपीपेत्।।

10.32 प्र सु ग्मन्तेति नवर्चस्य सूक्तस्यैलूषः कवष इन्द्रो जगती, अन्त्याश्चतस्रस्त्रिष्टुभः।

❀07.07.29 卐प्र सु ग्मन्ता धियसानस्य सक्षणि- वरेभि र्वराँ अभि षु प्रसीदतः। अस्माक मिन्द्र उभयञ्जुजोषति- यत्सोम्यस्याऽन्धसो बुबोधति।।

卐 वीन्द्र यासि दिव्यानि रोचना- वि पार्थिवानि रजसा पुरुष्टुत। ये त्वा वहन्ति मुहु रध्वराँ उप- ते सु वन्वन्तु वग्वनाँ अराधसः।।

卐 तदिन्मे छन्त्सद्वपुषो वपुष्टरं- पुत्रो यज्जानं पित्रो रधीयति। जाया पतिँ वहति वग्नुना सुम- त्पुंस इद्भद्रो वहतुः परिष्कृतः।।

卐 तदि त्सधस्थ मभि चारु दीधय- गावो यच्छास न्वहतुन्न धेनवः। माता यन्मन्तु र्यूथस्य पूर्व्या-ऽभि वाणस्य सप्तधातु रिज्जनः।।

卐 प्र वोऽच्छा रिरिचे देवयुष्पद- मेको रुद्रेभि र्याति तुर्वणिः। जरा वा येष्वमृतेषु दावने- परि व ऊमेभ्य स्सिञ्चता मधु।।

❀07.07.30 卐निधीयमान मपगूळ्ह मप्सु- प्र मे देवानाँ व्रतपा उवाच। इन्द्रो विद्वाँ अनु हि त्वा चचक्ष- तेनाऽह मग्ने अनुशिष्ट आ गाम्।।

卐 अक्षेत्रवि त्क्षेत्रविदं ह्यप्राट्- प्रैति क्षेत्रविदाऽनुशिष्टः। एतद्वै भद्र मनुशासनस्यो-त स्रुतिँ विन्द.त्यञ्जसीनाम्।।

卐 अद्येदु प्राणीदमम न्निमा-हापीवृतो अधय न्मातु रूधः। एमेन माप जरिमा युवान- महेळ न्वसु स्सुमना बभूव।।

卐 एतानि भद्रा कलश क्रियाम- कुरुश्रवण ददतो मघानि। दान^ इद्वो मघवान स्सो अस्त्व-ऽयञ्च सोमो हृदि यं बिभर्मि।। इति सप्तमाध्याय स्समाप्तः।।

## ऽ०ऽ ऽ०ऽसप्तमाष्टके अष्टमाध्यायः (1-29)

☸ 10.33 **प्र मा युयुज्र इति नवर्चस्य सूक्तस्यैलूषः कवष ऋषिः, आद्याया विश्वेदेवाः, ततो द्वयोरिन्द्रः चतुर्थी पञ्चम्योः कुरुश्रवणः, षष्ठ्यादि चतसृणामुपश्रवा आद्या त्रिष्टुप्, द्वितीया बृहती तृतीया सतोबृहती, शेषा ष्षड्गायत्र्यः।**

❀07.08.01 卐प्र मा युयुज्रे प्रयुजो जनानाँ- वहामि स्म पूषण मन्तरेण। विश्वे देवासो अध मामरक्ष- न्दुश्शासु रागा दिति घोष^ आसीत्।।

卐 सं मा तप न्त्यभित- स्सपत्नीरिव पर्शवः। नि बाधते अमति नग्नता जसु -र्वेर्न वेवीयते मतिः।।

卐 मूषो न शिश्ना व्यदन्ति माऽऽध्य- स्स्तोतारन्ते शतक्रतो~। सकृत्सु नो मघव न्निन्द्र मृळया-ऽधा पितेव नो भव।।

卐 कुरुश्रवण मावृणि- राजान न्त्रासदस्यवम्। मंहिष्ठँ वाघता मृषिः।।

卐 यस्य मा हरितो रथे- तिस्रो वहन्ति साधुया। स्तवै सहस्रदक्षिणे।।

❀07.08.02 卐यस्य प्रस्वादसो- गिर-^ उपमश्रवसः पितुः। क्षेत्रन्न रण्व मूचुषे।।

卐 अधि पुत्रोपमश्रवो- नपान्मित्रातिथे रिहि। पितुष्टे अस्मि वन्दिता।।

卐 यदीशीयामृताना- मुत वा मर्त्यानाम्। जीवेदिन्मघवा मम।।

卐 न देवाना मति व्रतं- शताऽऽत्मा चन जीवति। तथा युजा वि वावृते।।

☸ 10.34 **प्रावेपा इति चतुर्दशर्चस्य सूक्तस्य, मौजवानक्ष ऋषिः, आद्या सप्तमी नवमी द्वादशीना मक्षा देवताः, त्रयोदश्याः कृषिः, शिष्टानामक्षनिन्दा देवता त्रिष्टुप्, सप्तमी जगती।**

❀07.08.03 卐प्रावेपा^ मा बृहतो मादयन्ति- प्रवातेजा^ इरिणे वर्वृतानाः। सोमस्येव मौजवतस्य भक्षो- विभीदको जागृवि मह्य मच्छान्।।

卐 न मा मिमेथ न जिहीळ एषा- शिवा सखिभ्य^ उत मह्यमासीत्। अक्षस्याह मेकपरस्य हेतो- रनुव्रता मप जाया मरोधम्।।

卐 द्वेष्टि श्वश्रू रप जाया रुणद्धि- न नाथितो विन्दते मर्डितारम्। अश्वस्येव जरतो वस्न्यस्य- नाहँ विन्दामि कितवस्य भोगम्।।

卐 अन्ये जायां परि मृशन्त्यस्य- यस्याऽगृध द्वेदने वाज्य1(अ)क्षः। पिता माता भ्रातर^ एन माहु-र्न जानीमो नयता बद्ध मेतम्।।

卐 यदादीध्ये न दविषाण्येभिः- परायद्भ्योऽव हीये सखिभ्यः। न्युप्ताश्च बभ्रवो वाच मक्रतँ- एमीदेषा न्निष्कृत.ञ्जारिणीव।।

❀07.08.04 卐सभामेति कितवः पृच्छमानो- जेष्यामीति तन्वा3(आ)शूशुजानः। अक्षासो अस्य वि तिरन्ति कामं- प्रतिदीव्ने दधत^ आ कृतानि।।

卐 अक्षास^ इदङ्कुशिनो नितोदिनो- निकृत्वान स्तपना स्तापयिष्णवः। कुमारदेष्णा^ जयतः पुनर्हणो- मध्वा संपृक्ताः कितवस्य बर्हणा।।

卐 त्रिपञ्चाशः क्रीळति व्रात^ एषा- न्देवइव सविता सत्यधर्मा। उग्रस्य चिन्मन्यवे ना नमन्ते- राजा चिदेभ्यो नम^ इत्कृणोति।।

卐 नीचा वर्तन्त उपरि स्फुरन्त्य-ऽहस्तासो हस्तवन्तं सहन्ते। दिव्या^ अङ्गारा^ इरिणे न्युप्ता -श्शीता स्सन्तो हृदय न्निर्दहन्ति।।

卐 जाया तप्यते कितवस्य हीना- माता पुत्रस्य चरतः क्व स्वित्। ऋणावा बिभ्यद्धन मिच्छमानो- ऽन्येषा मस्त मुप नक्त मेति।।

❀07.08.05 卐स्त्रिय न्दृष्ट्वाय कितव न्ततापा-ऽन्येषा ञ्जायां सुकृतञ्च योनिम्। पूर्वाह्णे अश्वा न्युयुजे हि बभ्रू -न्त्सो अग्ने रन्ते वृषलः पपाद।।

卐 यो व स्सेनानी महतो गणस्य- राजा व्रातस्य प्रथमो बभूव। तस्मै कृणोमि न धना रुणध्मि- दशाहं प्राची स्तदृतँ वदामि।।

卐 अक्षै र्मा दीव्यः कृषि मित्कृषस्व- वित्ते रमस्व बहु मन्यमानः। तत्र गावः कितव तत्र जाया- तन्मे वि चष्टे सविताऽय मर्यः।।

卐 मित्रङ्कृणुध्वङ्खलु मृळता नो- मा नो घोरेण चरताभि धृष्णु। नि वो नु मन्यु र्विशता मराति- रन्यो बभ्रूणां प्रसितौ न्वस्तु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

🕉 10.35 **अबुध्रमितिचतुर्दशर्चस्य सूक्तस्य, धानाकोलुशो विश्वेदेवा जगत्यन्त्ये द्वे त्रिष्टुभौ ( भेदपक्षे- विश्वेदेवाः 3, उषसोऽग्निः 2, विश्वेदेवाः 9, एवं 14)**

❀07.08.06 卐अबुध्रमु त्य इन्द्रवन्तो अग्नयो- ज्योति भरन्त उषसो व्युष्टिषु। मही द्यावापृथिवी चेतता मपो-ऽद्या देवाना मव आ वृणीमहे।।

卐 दिवस्पृथिव्यो रव आ वृणीमहे- मातृ न्त्सिन्धू न्पर्वतांञ्छर्यणावतः। अनागास्त्वं सूर्य मुषास मीमहे- भद्रं सोम स्सुवानो अद्या कृणोतु नः।।

卐 द्यावा नो अद्य पृथिवी अनागसो- मही त्रायेतां सुविताय मातरा। उषा उच्छन्त्यप बाधता मघं- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 इयन्न उस्रा प्रथमा सुदेव्यं- रेव त्सनिभ्यो रेवती व्युच्छतु। आरे मन्यु न्दुर्विदत्रस्य धीमहि- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 प्र या स्सिस्रते सूर्यस्य रश्मिभि- र्ज्योति भरन्ती रुषसो व्युष्टिषु। भद्रा नो अद्य श्रवसे व्युच्छत – स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

❀07.08.07 卐अनमीवा उषस आ चरन्तु न- उदग्नयो जिहताञ्ज्योतिषा बृहत्। आयुक्षाता मश्विना तूतुजिं रथं- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 श्रेष्ठन्नो अद्य सवित वरेण्यं- भागमा सुव स हि रत्नधा असि। रायो जनित्री न्धिषणा मुप ब्रुवे- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 पिपर्तु मा तदृतस्य प्रवाचन- न्देवानाँ यन्मनुष्या3(आ) अमन्महि। विश्वा इदुस्रा स्स्पळुदेति सूर्य- स्स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 अद्वेषो अद्य बर्हिष स्तरीमणि- ग्राव्णाँ योगे मन्मन स्साध ईमहे। आदित्यानां शर्मणि स्था भुरण्यसि- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 आ नो बर्हि स्सधमादे बृह द्दिवि- देवाँ ईळे सादया सप्त होतॄन्। इन्द्रं मित्रं वरुणं सातये भगं- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

❀07.08.08 卐त आदित्या आ गता सर्वतातये- वृधे नो यज्ञ मवता सजोषसः। बृहस्पतिं पूषण मश्विना भगं- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 तन्नो देवा^ यच्छत सुप्रवाचन-ञ्छर्दि रादित्या स्सुभरन्नृपाय्यम्। पश्वे तोकाय तनयाय जीवसे- स्वस्त्य1(अ)ग्निं समिधान मीमहे।।

卐 विश्वे अद्य मरुतो विश्व ऊती- विश्वे भव न्त्वग्नय स्समिद्धाः। विश्वे नो देवा^ अवसाऽऽ गमन्तु- विश्व मस्तु द्रविणँ वाजो अस्मे।।

卐 यन्देवासोऽवथ वाजसातौ- यन्त्रायध्वे यं पिपृथात्यंहः। यो वो गोपीथे न भयस्य वेद- ते स्याम देववीतये तुरासः।।

10.36 **उषासानक्तेति चतुर्दशर्चस्य सूक्तस्य, धानाकोलुशो विश्वेदेवा जगत्यन्त्ये द्वे त्रिष्टुभौ ( भेदपक्षे- विश्वेदेवाः 13, सविता 1, एवं 14) ।**

❀07.08.09 卐उषासानक्ता बृहती सुपेशसा- द्यावाक्षामा वरुणो मित्रो अर्यमा। इन्द्रं हुवे मरुतः पर्वता॰ अप- आदित्या न्द्यावापृथिवी~ अप स्स्वः~।।

卐 द्यौश्च नः पृथिवी च प्रचेतस- ऋतावरी~ रक्षता मंहसो रिषः। मा दुर्विदत्रा निर्ऋति र्न^ ईशत- तद्देवाना मवो अद्या वृणीमहे।।

卐 विश्वस्मान्नो अदितिः पात्वंहसो- माता मित्रस्य वरुणस्य रेवतः। स्वर्व ज्ज्योति रवृकन्नशीमहि- तद्देवाना मवो अद्या वृणीमहे।।

卐 ग्रावा वदन्नप रक्षांसि सेधतु- दुष्ष्वप्न्यन्निर्ऋतिँ विश्व मऽत्रिणम्। आदित्यं शर्म मरुता मशीमहि- तद्देवाना मवो अद्या वृणीमहे ।।

卐 एन्द्रो बर्हि स्सीदतु पिन्वता मिळा- बृहस्पति स्सामभिर् ऋक्को अर्चतु। सुप्रकेतञ्जीवसे मन्म धीमहि तद्देवाना मवो अद्या वृणीमहे।।

❀07.08.10 卐दिविस्पृशँ यज्ञ मस्माक मश्विना- जीराध्वरङ्कृणुतं सुम्न मिष्टये। प्राचीनरश्मि माहुतङ्घृतेन -तद्देवाना मवो अद्या वृणीमहे।।

卐 उप ह्वये सुहवं मारुतङ्गणं- पावक मृष्वं सख्याय शंभुवम्। रायस्पोषं सौश्रवसाय धीमहि- तद्देवाना मवो अद्या वृणीमहे।।

卐 अपां पेरुञ्जीवधन्यं भरामहे- देवाव्यं सुहव मध्वरश्रियम्। सुरश्मिं सोम मिन्द्रियँ यमीमहि -तद्देवाना मवो अद्या वृणीमहे।।

卐 सनेम तत्सुसनिता सनित्वभि- र्वयञ्जीवा जीवपुत्रा अनागसः। ब्रह्मद्विषो विष्वगेनो भरेरत-
तद्देवाना मवो अद्या वृणीमहे।।
卐 ये स्था मनो र्यज्ञिया स्ते शृणोतन- यद्वो देवा ईमहे तद्ददातन। जैत्रङ्क्रतुं रयिम द्वीरव द्यश –
स्तद्देवाना मवो अद्या वृणीमहे।।
❀07.08.11 卐मह द्य महता मा वृणीमहे-ऽवो देवानां बृहता मनर्वणाम्। यथा वसु
वीरजातन्नशामहै- तद्देवाना मवो अद्या वृणीमहे।।
卐 महो अग्ने स्ससमिधानस्य शर्मण्य-ऽनागा मित्रे वरुणे स्वस्तये। श्रेष्ठे स्याम सवितु स्सवीमनि-
तद्देवाना मवो अद्या वृणीमहे।।
卐 ये सवितु स्सत्यसवस्य विश्वे- मित्रस्य व्रते वरुणस्य देवाः। ते सौभगँ वीरव द्गोम दप्नो- दधातन
द्रविणञ्चित्र मस्मे।।
卐 सविता पश्चातात्सविता पुरस्ता-त्सवितोत्तरात्ता त्सविताऽधरात्तात्। सविता न स्सुवतु सर्वतातिं-
सविता नो रासता न्दीर्घ मायुः।।
10.37 **नमो मित्रस्येति द्वादशर्चस्य सूक्तस्य, सौर्योऽभितपा स्सूर्यो जगती दशमी त्रिष्टुप्।**
❀07.08.12 卐नमो मित्रस्य वरुणस्य चक्षसे- महो देवाय तदृतं सपर्यत। दूरेदृशे देवजाताय केतवे-
दिवस्पुत्राय सूर्याय शंसत।।
卐 सा मा सत्योक्तिः परि पातु विश्वतो- द्यावा च यत्र ततनन्नहानि च। विश्व मन्य न्नि विशते यदेजति-
विश्वाहाऽऽपो विश्वाहोदेति सूर्यः।।
卐 न ते अदेवः प्रदिवो नि वासते- यदेतशेभिः पतरै रथर्यसि। प्राचीन मन्य दनु वर्तते रज- उदन्येन
ज्योतिषा यासि सूर्य।।
卐 येन सूर्य ज्योतिषा बाधसे तमो- जगच्च विश्व मुदियर्षि भानुना। तेनास्म द्विश्वा मनिरा मनाहुति-
मपामीवा मप दुष्ष्वप्न्यं सुव।।
卐 विश्वस्य हि प्रेषितो रक्षसि व्रत- महेळय न्नुच्चरसि स्वधा अनु। यदद्य त्वा सूर्योपब्रवामहै- तन्नो देवा
अनु मंसीरत क्रतुम्।।

卐 तन्नो द्यावापृथिवी~ तन्न^ आप-^ इन्द्र श्शृण्वन्तु मरुतो हवँ वचः। मा शूने भूम सूर्यस्य सन्दर्शि-भद्रञ्जीवन्तो जरणा मशीमहि।।

❀07.08.13 卐विश्वाहा त्वा सुमनस स्सुचक्षस४- प्रजावन्तो अनमीवा^ अनागसः। उद्यन्तन्त्वा मित्रमहो दिवेदिवे- ज्योग्जीवा४ प्रति पश्येम सूर्य।।

卐 महि ज्योति र्बिभ्रतन्त्वा विचक्षण- भास्वन्त.ञ्चक्षुषेचक्षुषे मयः। आरोहन्तं बृहत४ पाजसस्परि-वयञ्जीवा४ प्रति पश्येम सूर्य।।

卐 यस्य ते विश्वा भुवनानि केतुना- प्र चेरते नि च विशन्ते अक्तुभिः। अनागास्त्वेन हरिकेश सूर्याह्ना-ऽह्ना नो वस्यसावस्यसोदिहि।।

卐 शन्नो भव चक्षसा शन्नो अह्ना- शं भानुना शं हिमा शङ्घृणेन। यथा शमध्वञ्छमस दुरोणे- तत्सूर्य द्रविण न्धेहि चित्रम्।।

卐 अस्माक न्देवा^ उभयाय जन्मने- शर्म यच्छत द्विपदे चतुष्पदे। अद त्पिबदूर्जयमान माशित -न्तदस्मे शँ यो ररपो दधातन।।

卐 यद्वो देवा श्चकृम जिह्वया गुरु- मनसो वा प्रयुती देवहेळनम्। अरावा यो नो अभि दुच्छुनायते- तस्मि न्तदेनो वसवो नि धेतन।।

10.38 **अस्मिन्न इति पञ्चर्चस्य सूक्तस्य, मुष्कवानिन्द्र इन्द्रो जगती।**

❀07.08.14 卐अस्मिन्न^ इन्द्र पृत्सुतौ यशस्वति- शिमीवति क्रन्दसि प्राव सातये। यत्र गोषाता धृषितेषु खादिषु- विष्व क्पतन्ति दिद्यवो नृषाह्ये।।

卐 स नः≈क्षुमन्तं सदने व्यूर्णुहि- गोअर्णसं रयि मिन्द्र श्रवाय्यम्। स्याम ते जयत श्शक्र मेदिनो- यथा वय मुश्मसि तद्वसो~ कृधि।।

卐 यो नो दास^ आर्यो वा पुरुष्टु-ताऽदेव^ इन्द्र युधये चिकेतति। अस्माभिष्टे सुषहा स्सन्तु शत्रव-स्त्वया वय न्तान्वनुयाम सङ्गमे।।

卐 यो दभ्रेभि र्हव्यो यश्च भूरिभि- र्यो अभीके वरिवोवि न्नृषाह्ये। तँ विखादे सस्नि मद्य श्रुतन्नर- मर्वाञ्च मिन्द्र मवसे करामहे।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 स्ववृजं हि त्वा मह मिन्द्र शुश्रवा- ऽनानुदँ वृषभ रध्रचोदनम्। प्र मुञ्चस्व परि कुत्सा दिहा ऽऽगहि- किमु त्वावा न्मुष्कयो र्बद्ध^ आसते।।

10.39 यो वा मिति चतुर्दशर्चस्य सूक्तस्य, काक्षीवती घोषाऽश्विनौ जगत्यन्त्या त्रिष्टुप्।

❀07.08.15 卐यो वां परिज्मा सुवृ दश्विना रथो- दोषा मुषासो हव्यो हविष्मता। शश्वत्तमास स्तमु वामिदँ वयं- पितुर्न नाम सुहवं हवामहे।।

卐 चोदयतं सूनृताः पिन्वत न्धिय-^ उत्पुरन्धी रीरयत न्तदुश्मसि। यशसं भागङ्कृणुतन्नो अश्विना- सोमन्न चारुं मघवत्सु नस्कृतम्।।

卐 अमाजुरश्चि द्भवथो युवं भगो-ऽनाशो श्चिदवितारा ऽपमस्य चित्। अन्धस्य चिन्नासत्या कृशस्य - चिद्युवा मिदाहु र्भिषजा रुतस्य चित्।।

卐 युवञ्च्यवानं सनयँ यथा रथं- पुन र्युवानञ्चरथाय तक्षथुः। निष्टौग्र्य मूहथु रद्भ्यस्परि- विश्वेत्ता वां सवनेषु प्रवाच्या।।

卐 पुराणा वाँ वीर्या3(आ) प्र ब्रवा जने-ऽथो~ हासथु र्भिषजा मयोभुवा। ता वान्नु नव्या ववसे करामहे- ऽय न्नासत्या श्रदरि र्यथा दधत्।।

❀07.08.16 卐इयं वामह्वे शृणुतं मे अश्विना- पुत्रायेव पितरा मह्यं शिक्षतम्। अनापिरज्ञा^ असजात्याऽमतिः- पुरा तस्या^ अभिशस्ते रव स्पृतम्।।

卐 युवं रथेन विमदाय शुन्ध्युव- न्न्यूहथुः पुरुमित्रस्य योषणाम्। युवं हवँ वध्रिमत्या^ अगच्छतँ- युवं सुषुतिञ्चक्रथुः पुरन्धये।।

卐 युवँ विप्रस्य जरणा मुपेयुषः- पुनः कले रऽकृणुतँ युवद्वयः। युवँ वन्दन मृश्यदा दुदूपथु- र्युवं सद्यो विश्पला मेतवे कृथः।।

卐 युवं ह रेभँ वृषणा गुहा हित- मुदैरयतं ममृवांस मश्विना। युव मृबीस मुत तप्त मत्रय - ओमन्वन्तञ्चक्रथु स्सप्तवध्रये।।

卐 युवं श्वेतं पेदवेश्विनाश्व-न्नवभि र्वाजै र्नवती च वाजिनम्। चर्कृत्य न्ददथु र्द्रावयत्सखं- भगन्न नृभ्यो हव्यं मयोभुवम्।।

❀07.08.17 卐न तं राजाना वदिते कुतश्चन- नांहो अश्नोति दुरितन्नकिर्भयम्। यमश्विना सुहवा रुद्रवर्तनी~- पुरोरथङ्कृणुथः पत्न्या सह।।

卐 आ तेन यातं मनसो जवीयसा- रथँ यँ वा मृभव श्चक्रु रश्विना। यस्य योगे दुहिता जायते दिव-^ उभे ~अहनी~ सुदिने विवस्वतः।।

卐 ता वर्ति यातञ्जयुषा वि पर्वत- मऽपिन्वतं शयवे धेनु मश्विना। वृकस्य चिद्वर्तिका मन्त रास्या- द्युवं शचीभि र्ग्रसिता ममुञ्चतम्।।

卐 एतँ वां स्तोम मश्विनावक-र्मातक्षाम भृगवो न रथम्। न्यमृक्षाम योषणान्न मर्ये- नित्यन्न सूनु न्तनय न्दधानाः।।

☸ 10.40 रथं यान्तमिति चतुर्दशर्चस्य सूक्तस्य, काक्षीवती घोषाऽश्विनौ जगती।

❀07.08.18 卐रथँ यान्तङ्कुह को ह वान्नरा- प्रति द्युमन्तं सुविताय भूषति। प्रातर्यावाणँ विभ्वँ विशेविशे- वस्तोर्वस्तो र्वहमान न्धिया शमि।।

卐 कुह स्विद्दोषा कुह वस्तो रश्विना- कुहाभिपित्वङ्करतः कुहोषतुः। को वां शयुत्रा विधवेव देवरं- मर्यन्न योषा कृणुते सधस्थ आ।।

卐 प्रात जरेथे~ जरणेव कापया- वस्तोर्वस्तो र्यजता गच्छथो गृहम्। कस्य ध्वस्रा भवथः कस्य वा नरा- राजपुत्रेव सवनाव गच्छथः।।

卐 युवां मृगेव वारणा मृगण्यवो- दोषा वस्तोर्हविषा नि ह्वयामहे। युवं होत्रा मृतुथा जुह्वते नरे-षञ्जनाय वहथ श्शुभ स्पती~।।

卐 युवां ह घोषा पर्यश्विना यती- राज्ञ^ ऊचे दुहिता पृच्छे वान्नरा। भूतं मे अह्न उत भूत मक्तवे-ऽश्वावते रथिने शक्त मर्वते।।

❀07.08.19 卐युव ङ्कवी ष्ठः पर्यश्विना रथँ- विशो न कुत्सो जरितु र्नशायथः। युवोर्ह मक्षा पर्यश्विना- म-ध्वासा भरत निष्कृतन्न योषणा।।

卐 युवं ह भुज्युँ युव मश्विना वशँ- युवं शिञ्जार मुशना मुपारथुः। युवो ररावा परि सख्य मासते- युवो रह मवसा सुम्नमा चके।।

卐 युवं ह कृशँ युव मश्विना शयुँ- युवँ विधन्तँ विधवा मुरुष्यथः। युवं सनिभ्य स्स्तनयन्त मश्विना-ऽप व्रज.मूर्णुथ स्सप्तास्यम्।।

卐 जनिष्ट योषा पतय त्कनीनको- वि चारुह न्वीरुधो दंसना अनु। आस्मै रीयन्ते निवनेव सिन्धवो-ऽस्मा अह्ने भवति तत्पतित्वनम्।।

卐 जीवं रुदन्ति वि मयन्ते अध्वरे- दीर्घा मनु प्रसिति न्दीधियु नरः। वामं पितृभ्यो य इदं समेरिरे-मयः पतिभ्यो जनयः परिष्वजे।।

❀07.08.20 卐न तस्य विद्म तदु षु प्र वोचत- युवा ह यद्युवत्याः ≈ क्षेति योनिषु। प्रियोस्त्रियस्य वृषभस्य रेतिनो- गृहङ्गमेमाश्विना तदुश्मसि।।

卐 आ वामग न्त्सुमति र्वाजिनीवसू~- न्यश्विना हृत्सु कामा^ अयंसत। अभूतङ्गोपा मिथुना शुभस्पती~- प्रिया^ अर्यम्णो दुर्या॰ अशीमहि।।

卐 ता मन्दसाना मनुषो दुरोण आ- धत्तं रयिं सहवीरँ वचस्यवे। कृत न्तीर्थं सुप्रपाणं शुभस्पती~-स्थाणुं पथेष्ठा मप दुर्मतिं हतम्।।

卐 क्व स्विदद्य कतमा स्वश्विना- विक्षु दस्रा मादयेते~ शुभस्पती~। क^ ईन्नि येमे कतमस्य जग्मतु -र्विप्रस्य वा यजमानस्य वा गृहम्।।

10.41 **समानमिति तृचस्य सूक्तस्य, घोषेयः सुहस्त्योऽश्विनौ जगती।**

❀07.08.21 卐समानमु त्यं पुरुहूत मुक्थ्य1(अं)- रथ न्त्रिचक्रं सवना गनिग्मतम्। परिज्मानँ विदथ्यं सुवृक्तिभि- र्वयँ व्युष्टा उषसो हवामहे।।

卐 प्रातर्युज न्नासत्याऽधि तिष्ठथः- प्रातर्यावाणं मधुवाहनं रथम्। विशो येन गच्छथो यज्वरी नरा-कीरेश्चि द्यज्ञं होतृमन्त मश्विना।।

卐 अध्वर्युँ वा मधुपाणिं सुहस्त्य- मग्निधँ वा धृतदक्ष न्दमूनसम्। विप्रस्य वा यत्सवनानि गच्छथो-ऽत आ यातं मधुपेय मश्विना।।

10.42 **अस्तेवेत्येकादशर्चस्य सूक्तस्याऽऽङ्गिरसः कृष्ण इन्द्रस्त्रिष्टुप्।**

❀07.08.22 卐अस्तेव सु प्रतरँ लाय मस्य- न्भूषन्निव प्र भरा स्तोम मस्मै। वाचा विप्रा स्तरत वाच मर्यो- नि रा मय जरित~ स्सोम इन्द्रम्।।

卐 दोहेन गामुप शिक्षा सखायं- प्र बोधय जरित र्जार मिन्द्रम्। कोशन्न पूर्णँ वसुना न्यृष्ट- मा च्यावय मघदेयाय शूरम्।।

卐 किमङ्ग त्वा मघव न्भोज माहु- श्शिशीहि मा शिशयन्त्वा श्शृणोमि। अप्नस्वती मम धीरस्तु शक्र- वसुविदं भगमिन्द्राऽभरा नः।।

卐 त्वाञ्जना ममसत्येष्विन्द्र- सन्तस्थाना वि ह्वयन्ते समीके। अत्रा युजङ्कृणुते यो हविष्मा- न्नासुन्वता सख्यँ वष्टि शूरः।।

卐 धनन्न स्पन्द्रं बहुलँ यो अस्मै- तीव्रा न्त्सोमाँ आसुनोति प्रयस्वान्। तस्मै शत्रू न्त्सुतुका न्प्रात रह्नो- नि स्वष्ट्रा न्युवति हन्ति वृत्रम्।।

❀07.08.23 卐यस्मिन्वय न्दधिमा शंस मिन्द्रे- य श्शिश्राय मघवा काम मस्मे। आराच्चि त्सन्भयता मस्य शत्रु- न्र्यस्मै द्युम्ना जन्या नमन्ताम्।।

卐 आराच्छत्रु मप बाधस्व दूर- मुग्रो य श्शम्बः पुरुहूत तेन। अस्मे धेहि यवम द्गोमदिन्द्र- कृधी धियञ्जरित्रे वाजरत्नाम्।।

卐 प्र य.मन्त वृषसवासो अग्म- न्तीव्रा स्सोमा बहुलान्तास इन्द्रम्। नाह दामानं मघवा नि यंस- न्नि सुन्वते वहति भूरि वामम्।।

卐 उत प्रहा मतिदीव्या जयाति- कृतँ यच्छ्वघ्नी विचिनोति काले। यो देवकामो न धना रुणद्धि- समित्तं राया सृजति स्वधावान्।।

卐 गोभिष्टरेमामति न्दुरेवाँ- यवेन क्षुधं पुरुहूत विश्वाम्। वयं राजभिः प्रथमा धना- न्यऽस्माकेन वृजनेना जयेम।।

卐 बृहस्पतिर्नः परि पातु पश्चा- दुतोत्तरस्मा दधरा दघायोः। इन्द्रः पुरस्ता दुत मध्यतो न- स्सखा सखिभ्यो वरिवः कृणोतु।।

**चतुर्थेऽनुवाकेऽष्टादशसूक्तानि।**

**10.43 अच्छा म इत्येकादशर्चस्य सूक्तस्याऽङ्गिरसः कृष्ण इन्द्रो जगत्यन्त्ये द्वे त्रिष्टुभौ।**

❀07.08.24 卐अच्छा म इन्द्रं मतय स्स्वर्विद- स्सध्रीची र्विश्वा उशती रनूषत। परि ष्वजन्ते जनयो यथा पतिं- मर्यन्न शुन्ध्युं मघवान मूतये।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 न घा त्वद्रि गपं वेति मे मन-स्त्वे इत्कामं पुरुहूत शिश्रय। राजेव दस्म नि षदोधि बर्हि-ष्यस्मिन्त्सु सोमेवपान मस्तु ते।।

卐 विषूवृ दिन्द्रो अमंते रुत क्षुध- स्स इद्रायो मघवा वस्व ईशते। तस्येदिमे प्रवणे सप्त सिन्धवो- वयो वर्धन्ति वृषभस्य शुष्मिणः।।

卐 वयो न वृक्षं सुपलाश मासंद- न्त्सोमास^ इन्द्रं मन्दिनं श्चमूषदः। प्रैषा मनीकं शवसा दविद्युत- द्विद त्स्व1(अ)र्मनवे ज्योति रार्यम्।।

卐 कृतन्न श्वघ्नी वि चिनोति देवने- सँवर्गँ यन्मघवा सूर्यञ्जयत्। न तत्ते अन्यो अनु वीर्यं शक-न्न पुराणो मघवन्नोत नूतनः।।

❀07.08.25 卐विशँविशं मघवा पर्यशायत- जनाना न्धेना^ अवचाकश द्वृषा। यस्याह शक्र स्सवनेषु रण्यति- स तीव्रै स्सोमै स्सहते पृतन्यतः।।

卐 आपो न सिन्धु मभि यत्समक्षर- न्त्सोमास^ इन्द्रङ्कुल्याइव ह्रदम्। वर्धन्ति विप्रा महो अस्य सादने- यवन्न वृष्टि र्दिव्येन दानुना।।

卐 वृषा न क्रुद्धः पतय द्रजस्स्वा- यो अर्यपत्नी रकृणो दिमा अपः। स सुन्वते मघवा जीरदानवे-ऽविन्द ज्ज्योति र्मनवे हविष्मते।।

卐 उज्जायतां परशु र्ज्योतिषा सह- भूया^ ऋतस्य सुदुघा पुराणवत्। वि रोचता मरुषो भानुना शुचि- स्स्व1(अ)र्ण शुक्रं शुशुचीत सत्पतिः।।

卐 गोभिष्टरेमामतिं न्दुरेवाँ- यवेन क्षुधं पुरुहूत विश्वाम्। वयं राजभिः प्रथमा धना- न्यऽस्माकेन वृजनेना जयेम।।

卐 बृहस्पति र्नः परि पातु पश्चा- दुतोत्तरस्मा दधरा दघायोः। इन्द्रः पुरस्ता दुत मध्यतो न- स्सखा सखिभ्यो वरिवः कृणोतु।।

10.44 **आ यात्वित्येकादशर्चस्य सूक्तस्याऽङ्गिरसः कृष्ण इन्द्रो जगती, आद्यास्तिस्रोऽन्त्ये द्वे च त्रिष्टुभः।**

❀07.08.26 卐आ यात्विन्द्र स्स्वपति र्मदाय- यो धर्मणा तूतुजान स्तुविष्मान्। प्रत्वक्षाणो अति विश्वा सहांस्य-ऽपारेण महता वृष्ण्येन।।

卐 सु॒ष्ठामा॒ रथ॑ स्सु॒यमा॒ हरी॑ ते॒- मि॒म्यक्ष॒ वज्रो॑ नृपते॒ गभ॑स्तौ। शीभं॑ राज न्त्सु॒पथा॑ याह्य॒र्वा-ङ्वर्धा॑म ते॒ प॒पु॒षो वृष्ण्या॑नि।।

卐 एन्द्र॒वाहो॑ नृ॒पतिं॑ वज्र॑बाहु- मु॒ग्र मु॒ग्रास॑ स्त॒वि॒षास॑ एनम्। प्रत्व॑क्षसं॑ वृ॒ष॒भं स॒त्यशु॑ष्म॒- मेमं॑स्म॒त्रा स॑ध॒मादो॑ वहन्तु।।

卐 ए॒वा प॑तिं॑ न्द्रोणसाचं॑ सचे॑तस- मू॒र्ज स्स्क॒म्भ न्ध॒रु॒ण आ वृ॑षायसे। ओज॑ः कृष्व॒ सङ्गृ॑भाय॒ त्वे अप्य॒सो- यथा॑ केनि॒पाना॑ मि॒नो वृ॒धे।।

卐 गम॑न्न॒स्मे वसू॒न्या हि शंसि॑षं- स्वा॒शिषं॒ भर॒मा या॑हि सो॒मिन॑ः। त्वमी॑शिषे॒ सास्मिन्ना स॑त्सि ब॒र्हिष्य॒- ऽना॒धृष्या तव॒ पात्रा॑णि॒ धर्म॑णा।।

❀07.08.27 卐पृथ॒ क्प्राय॑ न्प्रथ॒मा दे॒वहू॑त॒यो-ऽकृ॑ण्वत श्र॒व॒स्या॑नि दु॒ष्टरा॑। न ये शे॒कु य॒ज्ञिया॒ न्नाव॒ मा॒रुह॒- मीर्मै॒व ते न्य॑विशन्त॒ केप॑यः।।

卐 ए॒वैवाप॒ाग॒प॑रे सन्तु दू॒ढ्यो-ऽश्वा॒ येषां॑ न्दु॒र्यु॑ज॑ आयुयु॒ज्रे। इ॒त्था ये प्रागु॒प॑रे॒ सन्ति॑ दा॒वने॑- पु॒रू॒णि॒ यत्र॑ व॒युना॑नि भोज॑ना।।

卐 गि॒रीँ॑ र॒ज्रा॒ न्रेज॑माना॑ँ अधारय॒- द्यौः॑ क्र॒न्द॒ द॒न्तरि॑क्षाणि कोपयत्। स॒मी॒ची॒ने॒ धि॒षणे॒ विष्क॑भायति- वृष्ण॑ः पी॒त्वा मद॑ उ॒क्थानि॑ शंसति।।

卐 इ॒मं बि॑भर्मि॒ सुकृ॑तन्ते अङ्कु॒शं- येना॑रु॒जासि॑ मघवञ्छफा॒रुज॑ः। अ॒स्मिन्त्सु॒ते॒ सव॑ने अस्त्वो॒क्यं॑- सु॒त इ॒ष्टौ म॑घव न्बो॒ध्याभ॑गः।।

卐 गोभि॑ष्टरे॒मा॒मतिं॑ न्दु॒रेवां॑- यवे॑न॒ क्षुधं॑ पुरुहू॒त॒ विश्वा॑म्। व॒यं राज॑भिः प्र॒थमा धना॑- न्य॒स्माके॑न वृ॒जने॑ना जयेम।।

卐 बृ॒ह॒स्पति॑र्न॒ः परि॑ पातु प॒श्चा- दु॒तोत्त॑रस्मा॒ दध॑रा दघा॒योः। इन्द्र॑ः पु॒रस्ता॑ दु॒त म॑ध्य॒तो न॒- स्सखा॒ सखि॑भ्यो॒ वरि॑वः कृणोतु।।

10.45 दिवस्परीति द्वादशर्चस्य सूक्तस्य, भालन्दनो वत्सप्रिरग्निस्त्रिष्टुप्।

❀07.08.28 卐दि॒वस्परि॑ प्रथ॒मञ्ज॑ज्ञे अ॒ग्नि- र॒स्म द्वि॒तीयं॒ परि॑ जा॒तवे॑दाः। तृ॒तीय॑ म॒प्सु नृ॒मणा॒ अज॑स्र॒- मि॒न्धा॑न एनञ्जरते स्वा॒धीः।।

卐 विद्मा ते अग्ने त्रेधा त्रयाणि- विद्मा ते धाम विभृता पुरुत्रा। विद्मा ते नाम परमङ्गुहा य-द्विद्मा तमुत्सँ यत आजगन्थ।।

卐 समुद्रे त्वा नृमणा अप्स्व1(अ)न्त- र्नृचक्षा ईधे दिवो अग्न ऊधन्न्। तृतीये त्वा रजसि तस्थिवांस - मपा मुपस्थे महिषा अवर्धन्न्।।

卐 अक्रन्द दग्नि स्स्तनयन्निव द्यौः≈क्षामा रेरिह द्वीरुध स्समञ्जन्न्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा- रोदसी भानुना भात्यन्तः।।

卐 श्रीणा मुदारो धरुणो रयीणां- मनीषाणां प्रार्पण स्सोमगोपाः। वसु स्सूनु स्सहसो अप्सु राजा-वि भात्यग्र उषसा मिधानः।।

卐 विश्वस्य केतु र्भुवनस्य गर्भ- आ रोदसी अपृणा ज्जायमानः। वीळुञ्चिदद्रि मभिन त्पराय- न्जना यदग्नि मऽयजन्त पञ्च।।

❀07.08.29 卐उशि क्पावको अरति स्सुमेधा- मर्तेष्वग्नि रमृतो नि धायि। इयर्ति धूम मरुषं भरिभ्रदु- च्छुक्रेण शोचिषा द्यामिनक्षन्न्।।

卐 दृशानो रुक्म उर्विया व्यद्यौ- द्दुर्मर्षं मायु श्श्रिये रुचानः। अग्नि रमृतो अभव द्वयोभि- र्यदेन न्द्यौर्जनय त्सुरेताः।।

卐 यस्ते अद्य कृणव द्भद्रशोचे-ऽपूप न्देव घृतवन्त मग्ने। प्र तन्नय प्रतरँ वस्यो अच्छा-ऽभि सुम्न न्देवभक्तँ यविष्ठ।।

卐 आ तं भज सौश्रवसेष्वऽग्न- उक्थउक्थ आ भज शस्यमाने। प्रिय स्सूर्ये प्रियो अग्ना भवा- त्युज्जातेन भिनद दुज्जनित्वैः।।

卐 त्वामग्ने यजमाना अनु -द्यून्विश्वा वसु दधिरे वार्याणि। त्वया सह द्रविण मिच्छमाना- व्रजङ्गोमन्त मुशिजो वि वव्रुः~।।

卐 अस्ताव्यग्नि र्नरां सुशेवो- वैश्वानर ऋषिभि स्सोमगोपाः। अद्वेषे द्यावापृथिवी~ हुवेम- देवा धत्त रयि मस्मेसुवीरम्।।।। इत्यष्टमाध्याय स्समाप्तः।।इति सप्तमाष्टकं समाप्तम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

## ऽ{}ऽ ❀अष्टमाष्टकम्

## ऽ{}ऽ ऽ{}ऽअष्टमाष्टके प्रथमाध्यायः (वर्गाः 1-30)

☫ 10.46 **प्र होतेति दशर्चस्य सूक्तस्य, भालन्दनो वत्सप्रिरग्निस्त्रिष्टुप्।**

❀08.01.0 卐प्र होता जातो महान्नभोविः नृषद्वा सीद दपा मुपस्थे। दधिर्यो धायि स ते वयांसि- यन्ता वसूनि विधते तनूपाः।।

卐 इमँ विधन्तो अपां सधस्थे- पशुन्न नष्टं पदै रऽनु ग्मन्न्। गुहा चतन्त.मुशिजो नमोभि- रिच्छन्तो धीरा^ भृगवोऽविन्दन्न्।।

卐 इम न्त्रितो भूर्यविन्द दिच्छ- न्वैभूवसो मूर्ध न्यघ्न्यायाः। स शेवृधो जात^ आ हर्म्येषु- नाभि र्युवा भवति रोचनस्य।।

卐 मन्द्रं होतार मुशिजो नमोभिः- प्राञ्चँ यज्ञ न्नेतार मध्वराणाम्। विशा मकृण्वन्नरतिं पावकं- हव्यवाह न्दधतो मानुषेषु।।

卐 प्र भू र्जयन्तं महाँ विपोधां- मूरा^ अमूरं पुरा न्दर्माणम्। नयन्तो गर्भं वना न्धियन्धु- र्हिरिश्मश्रु न्नार्वाण न्धनर्चम्।।

❀08.01.02 卐नि पस्त्यासु त्रित स्स्तभूय- न्परिवीतो योनौ सीददन्तः। अत स्सङ्गृभ्या^ विशा न्दमूना-^ विधर्मणा ऽयन्त्रै रीयते नॄन्।।

卐 अस्याऽजरासो दमा मरित्रा-^ अर्चद्धूमासो अग्नयः पावकाः। श्वितीचय श्श्वात्रासो भुरण्यवो- वनर्षदो वायवो न सोमाः।।

卐 प्र जिह्वया भरते वेपो अग्निः- प्र वयुनानि चेतसा पृथिव्याः। तमायव श्शुचयन्तं पावकं- मन्द्रं होतार न्दधिरे यजिष्ठम्।।

卐 द्यावा यमग्निं पृथिवी~ जनिष्ठा- माप स्त्वष्टा भृगवो यं सहोभिः। ईळेन्यं प्रथमं मातरिश्वा- देवा स्ततक्षु र्मनवे यजत्रम्।।

卐 यन्त्वा देवा^ दधिरे हव्यवाहं- पुरुस्पृहो मानुषासो यजत्रम्। स यामन्नग्ने स्तुवते वयो धाः- प्र देवयन्यशस स्सं हि पूर्वीः।।

☫ 10.47 **जगृम्भेत्यष्टर्चस्य सूक्तस्य, सप्तगुर्वैकुण्ठ इन्द्रस्त्रिष्टुप्।**

❀08.01.03 卐जगृभ्मा ते दक्षिण मिन्द्र हस्तं- वसूयवो वसुपते वसूनाम्। विद्मा हि त्वा गोपतिं शूर गोना- म.स्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

卐 स्वायुधं स्ववसं सुनीथ-ञ्चतुस्समुद्र न्धरुणं रयीणाम्। चर्कृत्यं शंस्यं भूरिवार –मस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

卐 सुब्रह्माण न्देववन्तं बृहन्तं- मुरुङ्गभीरं पृथुबुध्न मिन्द्र। श्रुतऋषि मुग्र मभिमातिषाहं- मस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

卐 सनद्वाजँ विप्रवीर न्तरुत्र- न्धनस्पृतं शूशुवांसं सुदक्षम्। दस्युहनं पूर्भिद मिन्द्र सत्य -मस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

卐 अश्वावन्तं रथिनँ वीरवन्तं- सहस्रिणं शतिनँ वाजमिन्द्र। भद्रव्रातँ विप्रवीरं स्वर्षा -मस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

❀08.01.04 卐प्र सप्तगु मृतधीतिं सुमेधां- बृहस्पतिं मति रऽच्छा जिगाति। य^ आङ्गिरसो नमसोपसद्यो-ऽस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

卐 वनीवानो मम दूतास^ इन्द्रं- स्तोमा श्चरन्ति सुमती रियानाः। हृदिस्पृशो मनसा वच्यमाना-^ अस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

卐 य त्त्वा यामि दद्धि तन्न^ इन्द्र- बृहन्तङ्क्षय मसमञ्जनानाम्। अभि तद्यावापृथिवी~ गृणीता -मस्मभ्यञ्चित्रँ वृषणं रयिन्दाः।।

☸ 10.48 **अहं भुवमित्येकादशर्चस्य सूक्तस्य, वैकुण्ठ इन्द्रो वैकुण्ठ इन्द्रो जगती, सप्तमी दशम्येकादश्यस्त्रिष्टुभः।**

❀08.01.05 卐अहं भुवँ वसुनः पूर्व्यस्पति- रह न्धनानि सञ्जयामि शश्वतः। मां हवन्ते पितरन्न जन्तवो-ऽह न्दाशुषे वि भजामि भोजनम्।।

卐 अह मिन्द्रो रोधो वक्षो अथर्वण- स्त्रिताय गा^ अजनय महे रधि। अह न्दस्युभ्यः परि नृम्णमा ददे- गोत्रा शिक्ष न्दधीचे मातरिश्वने।।

卐 मह्य न्त्वष्टा वज्र मतक्षदायसं- मयि देवासोऽवृजन्नपि क्रतुम्। ममाऽनीकं सूर्यस्येव दुष्टरं- मा.मार्यन्ति कृतेन कर्त्वेन च।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अह मेतङ्गव्यय मश्व्यं पशुं- पुरीषिणं सायकेना हिरण्ययम्। पुरू सहस्रा नि शिंशामि दाशुषे- यन्मा सोमास^ उक्थिनो अमन्दिषुः।।

卐 अह मिन्द्रो न परा जिग्य इद्धन-न्न मृत्यवेऽव तस्थे कदा चन। सोम मिन्मा सुन्वन्तो याचता- वसु न मे पूरव स्सख्ये रिषाथन।।

❀08.01.06 卐अह मेताञ्छाश्वसतो द्वा-द्वेन्द्रँ ये वज्रँ युधयेऽकृण्वत। आह्वयमानाँ अव हन्मनाऽहन- न्दृळ्हा वदन्नऽनमस्यु र्नमस्विनः।।

卐 अभी3(ई)दमेक मेको अस्मि निष्षा-ळभी द्वा किमु त्रयः करन्ति। खले न पर्षा न्प्रति हन्मि भूरि- किं मा निन्दन्ति शत्रवोऽनिन्द्राः।।

卐 अह.ङ्गुङ्गुभ्यो अतिथिग्व मिष्करं- मिषन्न वृत्रतुरँ विक्षु धारयम्। य त्पर्णयघ्न उत वा करञ्जहे- प्राहं महे वृत्रहत्ये अशुश्रवि।।

卐 प्र मे नमी साप्य^ इषे भुजे भू-द्गवा मेषे सख्या कृणुत द्विता। दिद्युँ यदस्य समिथेषु मंहय- मादि देनं शंस्य मुक्थ्यङ्करम्।।

卐 प्र नेमस्मि न्ददृशे सोमो अन्त- र्गोपा^ नेम मावि रऽस्था कृणोति। स तिग्मश्रृङ्गँ वृषभँ युयुत्स- न्द्रुह स्तस्थौ बहुले बद्धो अन्तः।।

卐 आदित्यानाँ वसूनां रुद्रियाणा- न्देवो देवानान्न मिनामि धाम। ते मा भद्राय शवसे ततक्षु- रपराजित मस्तृत मषाळ्हम्।।

10.49 अहं दामित्येकादशर्चस्य सूक्तस्य, वैकुण्ठ इन्द्रो वैकुण्ठ इन्द्रो जगती, द्वितीयाऽन्त्ये त्रिष्टुभौ।

❀08.01.07 卐अह न्दाङ्गृणते पूर्व्यँ व-स्वऽहं ब्रह्म कृणवं मह्यँ वर्धनम्। अहं भुवँ यजमानस्य चोदिता-ऽयज्वन स्साक्षि विश्वस्मि न्भरे ।।

卐 मान्धु रिन्द्र न्नाम देवता- दिवश्च ग्मश्चापा.ञ्च जन्तवः। अहं हरी~ वृषणा विव्रता रघू~- अहँ वज्रं शवसे धृष्ण्वा ददे।।

卐 अह मत्कङ्कवये शिश्नथं हथै- रहङ्कुत्स मावमाभि रूतिभिः। अहं शुष्णस्य श्नथिता वधर्यम-न्न यो रर आर्य न्नाम दस्यवे।।

卐 अहं पितेर्व वेतसू॰ रभिष्टये- तुग्रङ्कुत्साय स्मर्दिभञ्च रन्धयम्। अहं भुवँ यर्जमानस्य राजनि- प्र यद्भरे तुर्जये न प्रिया ऽऽधृषे।।

卐 अहं रन्धयं मृगयं श्रुतर्वणे- यन्मा ऽर्जिहीत वयुना चना ऽऽनुषक्। अहँ वेशन्नम्र मायवेऽकर- महं सव्याय पड्गृभि मऽरन्धयम्।।

❀08.01.08 卐अहं स यो नववास्त्वं बृहद्रथं- सँ वृत्रेव दासँ वृत्रहा ऽरुजम्। य द्वर्धयन्तं प्रथयन्त मानुष- ग्दूरे पारे रजसो रोचना ऽकरम्।।

卐 अहं सूर्यस्य परि याम्याशुभि॰- प्रैतशेभि र्वहमान ओजसा। यन्मा सावो मनुष^ आह निर्णिज- ऋधक्कृषे दासङ्कृत्व्यं हथैः।।

卐 अहं सप्तहा नहुषो नहुष्टर॰- प्राऽश्रावयं शवसा तुर्वशँ यदुम्। अह न्न्य1(अ)न्यं सहसा सहस्कर-न्नव व्राधतो नवतिञ्च वक्षयम्।।

卐 अहं सप्त स्रवतो धारयँ वृषा- द्रवित्न्व॰ पृथिव्यां सीरा^ अधि। अह मर्णांसि वि तिरामि सुक्रतु- र्युधा विदं मनवे गातु मिष्टये।।

卐 अह न्तदासु धारयँ यदासु- न देव श्चन त्वष्टा ऽधारय द्रुशत्। स्पार्हङ्गवा मूधस्सु वक्षणा स्वा- मधो र्मधु श्वात्र्यं सोम.माशिरम्।।

卐 एवा देवा॰ इन्द्रो विव्ये नॄ- न्प्र च्यौत्नेन मघवा सत्यराधाः। विश्वेत्ताते हरिव श्शचीवो-ऽभि तुरास स्स्वयशो गृणन्ति।।

🏺 10.50 **प्र वो मह इति सप्तर्चस्य सूक्तस्य, वैकुण्ठ इन्द्रो वैकुण्ठ इन्द्रो जगती, तृतीया चतुर्थ्यौ वभिसारिण्यौ पञ्चमी त्रिष्टुप्।**

❀08.01.09 卐प्र वो महे मन्दमानायाऽन्धसो-ऽर्चा विश्वानराय विश्वाभुवे। इन्द्रस्य यस्य सुमखं सहो महि- श्रवो नृम्णञ्च रोदसी सपर्यतः।।

卐 सो चिन्नु सख्या नर्य^ इन स्स्तुत- श्चर्कृत्य^ इन्द्रो मावते नरे। विश्वासु धूर्षु वाजकृत्येषु सत्पते- वृत्रे वाऽप्स्व1(अ)भि शूर मन्दसे।।

卐 के ते नर^ इन्द्र ये त इषे- ये ते सुम्नं सधन्य1(अ)मियक्षान्। के ते वाजायाऽसुर्याय हिन्विरे- के अप्सु स्वासूर्वरासु पौंस्ये।।

卐 भुव स्त्वमिन्द्र ब्रह्मणा महा- न्भुवो विश्वेषु सवनेषु यज्ञियः। भुवो नॄँ श्च्यौत्नो विश्वस्मि न्भरे- ज्येष्ठश्च मन्त्रो विश्वचर्षणे।।

卐 अवा नु कज्यायाा न्यज्ञवनसो- महीन्त ओमात्राङ्कृष्टयो विदुः। असो नु क मजरो वर्धाश्च- विश्वेदेता सवना तूतुमा कृषे।।

卐 एता विश्वा सवना तूतुमा कृषे- स्वयं सूनो~ सहसो यानि दधिषे। वराय ते पात्र न्धर्मणे तना- यज्ञो मन्त्रो ब्रह्मोद्यतँ वचः।।

卐 ये ते विप्र ब्रह्मकृत स्सुते सचा- वसूनाञ्च वसुनश्च दावने। प्र ते सुम्नस्य मनसा पथा भुव- न्मदे सुतस्य सोम्यस्याऽन्धसः।।

10.51 **महत्तदिति नवर्चस्य सूक्तस्य, द्वितीयादि युगृचां सौचीकोऽग्निर्ऋषिः, अयुजां देवा ऋषयः युजा न्देवा देवताः अयुजामग्निर्देवता त्रिष्टुप्।**

❀08.01.10 卐महत्तदुल्बं स्थविर न्तदासी- द्येनाऽऽविष्टितः प्र विवेशिथापः। विश्वा अपश्य द्बहुधा ते अग्ने- जातवेद स्तन्वो देव एकः।।

卐 को मा ददर्श कतम स्स देवो- यो मे तन्वो बहुधा पर्यऽपश्यत्। क्वाह मित्रावरुणा क्षिय -न्त्यऽग्ने विश्वा स्समिधो देवयानीः।।

卐 ऐच्छाम त्वा बहुधा जातवेदः- प्रविष्ट मग्ने अप्स्वोषधीषु। तन्त्वा यमो अचिके च्चित्रभानो~- दशान्तरुष्या दऽतिरोचमानम्।।

卐 होत्रा दहँ वरुण बिभ्यदाय -न्नेदेव मा युनजन्नत्र देवाः। तस्य मे तन्वो बहुधा निविष्टा- एत मर्थन्न चिकेताह मग्निः।।

卐 एहि मनु देवयु र्यज्ञकामो-ऽरङ्कृत्या तमसि क्षेष्यऽग्ने। सुगा न्पथः कृणुहि देवयाना- न्वह हव्यानि सुमनस्यमानः।।

❀08.01.11 卐अग्नेः पूर्वे भ्रातरो अर्थमेतं- रथीवाऽध्वान मन्वाऽवरीवुः~। तस्मा द्भिया वरुण दूरमाय-ङ्गौरो न क्षेप्नो रविजे ज्यायाः।।

卐 कुर्म स्त आयु रजरँ यदग्ने- यथा युक्तो जातवेदो न रिष्याः। अथा वहासि सुमनस्यमानो- भाग न्देवेभ्यो हविष स्सुजात।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 प्रयाजान्मे अनुयाजाँश्च केवला- नूर्जस्वन्तं हविषो दत्त भागम्। घृतञ्चापां पुरुषञ्चौषधीना- मग्नेश्च दीर्घ मायु रस्तु देवाः।।

卐 तव प्रयाजा॒ अनुयाजाश्च केवल- ऊर्जस्वन्तो हविष स्सन्तु भागाः। तवाग्ने यज्ञो3(ओ)ऽयमस्तु सर्व- स्तुभ्यन्नमन्तां प्रदिश श्चतस्रः।।

10.52 विश्वे देवा इति षड्टचस्य सूक्तस्य, सौचीकोऽग्निर्देवा स्त्रिष्टुप्।

❀08.01.12 卐विश्वे देवा श्शास्तन मा यथेह- होता वृतो मनवै यन्निषद्य। प्र मे ब्रूत भागधेयँ यथा वो- येन पथा हव्य.मा वो वहानि।।

卐 अहं होता न्यसीदँ यजीया- न्विश्वे देवा॒ मरुतो मा जुनन्ति। अहरह रश्विनाऽध्वर्यवँ वां- ब्रह्मा समिद्भवति साहुति वाम्।।

卐 अयँ यो होता किरु स यमस्य- कमप्यूहे यत्समञ्जन्ति देवाः। अहरह जायते मासिमा-स्यऽथा देवा॒ दधिरे हव्यवाहम्।।

卐 मान्देवा दधिरे हव्यवाह- मपम्लुक्तं बहु कृच्छ्रा चरन्तम्। अग्नि र्विद्वान् यज्ञन्नः कल्पयाति- पञ्चयाम न्त्रिवृतं सप्ततन्तुम्।।

卐 आ वो यक्ष्यमृतत्वं सुवीरँ- यथा वो देवा॒ वरिवः कराणि। आ बाह्वो र्वज्र मिन्द्रस्य धेया -मथेमा॒ विश्वाः पृतना जयाति।।

卐 त्रीणि शता त्री सहस्राण्यग्नि- न्त्रिंशच्च देवा नव चाऽसपर्यन्न्। औक्ष न्घृतै रस्तृण न्बर्हि रस्मा- आदि द्धोतार न्न्यसादयन्त।।

10.53 यमैच्छामेत्येकादशर्चस्य सूक्तस्य, देवा ऋषयः, चतुर्थी पञ्चम्योः सौचीकोऽग्निर्ऋषिः, अग्निर्देवता, चतुर्थी पञ्चम्यो र्देवा देवता जगती, अश्मन्वतीरिति त्रिष्टुप्।

❀08.01.13 卐यमैच्छाम मनसा सो3(ओ)ऽय माऽगा-द्यज्ञस्य विद्वा न्परुष श्चिकित्वान्। स नो यक्ष द्देवताता यजीया न्नि- हि षत्सदन्तरः पूर्वो अस्मत्।।

卐 अराधि होता निषदा यजीया- नभि प्रयांसि सुधितानि हि ख्यत्। यजामहै यज्ञिया न्हन्त देवाॅ- ईळामहा ईड्याॅ आज्येन।।

卐 साध्वी मक देववीतिन्नो अद्य- यज्ञस्य जिह्वा मविदाम गुह्याम्। स आयु राऽगा त्सुरभि वसानो- भद्रा मक देवहूतिन्नो अद्य।।

卐 तदद्य वाचः प्रथमं मसीय- येनाऽसुराँ अभि देवा असाम। ऊर्जाद उत यज्ञियासः- पञ्च जना मम होत्रञ्जुषध्वम्।।

卐 पञ्च जना मम होत्रञ्जुषन्ता-ङ्गोजाता उत ये यज्ञियासः। पृथिवी नः पार्थिवा त्पात्वंहसो-न्तरिक्ष न्दिव्यात्पात्वस्मान्।।

❀08.01.14 卐तन्तु न्तन्व न्नजसो भानु मन्विहि- ज्योतिष्मतः पथो रक्ष धिया कृतान्। अनुल्बणँ वयत जोगुवा मपो- मनु र्भव जनया दैव्यञ्जनम्।।

卐 अक्षानहो नह्यतनोत सोम्या- इष्कृणुध्वं रशना ओत पिंशत। अष्टावन्धुरँ वहताभितो रथँ- येन देवासो अनयन्नभि प्रियम्।।

卐 अश्मन्वती रीयते संरभध्व- मुत्तिष्ठत प्र तरता सखायः। अत्रा जहाम ये असन्नशेवा- श्शिवा न्वय मुत्तरेमाऽभि वाजान्।।

卐 त्वष्टा माया वेदपसा मपस्तमो- बिभ्र त्पात्रा देवपानानि शन्तमा। शिशीते नूनं परशुं स्वायसँ- येन वृश्चा देतशो ब्रह्मणस्पतिः।।

卐 सतो नूनङ्कवय स्सं शिशीत- वाशीभि र्याभि रमृताय तक्षथ। विद्वांसः पदा गुह्यानि कर्तन- येन देवासो अमृतत्व मानशुः।।

卐 गर्भे योषा मदधु र्वत्स मास- न्यपीच्येन मनसोत जिह्वया। स विश्वाहा सुमना योग्या अभि- ष्सिषासनि र्वनते कार इज्जितिम्।।

10.54 तां सु त इति षडृचस्य सूक्तस्य, वामदेव्यो बृहदुक्थ इन्द्रस्त्रिष्टुप्।

❀08.01.15 卐तां सु ते कीर्तिं मघव न्महित्वा- यत्त्वा भीते रोदसी अह्वयेताम्। प्रावो देवाँ आऽतिरो दास मोजः- प्रजायै त्वस्यै यदशिक्ष इन्द्र।।

卐 यदचर स्तन्वा वावृधानो- बलानीन्द्र प्रब्रुवाणो जनेषु। मायेत्साते यानि युद्धान्याहु- र्नाद्य शत्रुन्ननु पुरा विवित्से।।

卐 क उ नु ते महिमन स्सम-स्याऽस्मत्पूर्व ऋषयोऽन्तमापुः। यन्मातरञ्च पितरञ्च साक- मजनयथा स्तन्व1(अ)स्स्वायाः।।
卐 चत्वारि ते असुर्याणि ना-मादाभ्यानि महिषस्य सन्ति। त्वमङ्ग तानि विश्वानि वित्से- येभिः कर्माणि मघवञ्चकर्थ।।
卐 त्वँ विश्वा दधिषे केवलानि -यान्यावि र्या च गुहा वसूनि। काम मिन्मे मघव न्मा वि तारी- स्त्वमाज्ञाता त्वमिन्द्रासि दाता।।
卐 यो अदधा ज्योतिषि ज्योति रन्त- र्यो असृज न्मधुना सं मधूनि। अध प्रियं शूष मिन्द्राय मन्म- ब्रह्मकृतो बृहदुक्था दवाचि।।
10.55 दूरे तदित्यष्टर्चस्य सूक्तस्य, वामदेव्यो बृहदुक्थ इन्द्रस्त्रिष्टुप्।
❀08.01.16 卐दूरे तन्नाम गुह्यं पराचै- र्यत्त्वा भीते अह्वयेताँ वयोधै। उदस्तभ्नाः पृथिवीन्द्या मभीके- भ्रातुः पुत्रा न्मघव न्तित्विषाणः।।
卐 मह त्तन्नाम गुह्यं पुरुस्पृ- ग्येन भूतञ्जनयो येन भव्यम्। प्रत्नञ्जातञ्ज्योति र्यदस्य प्रियं- प्रिया स्समविशन्त पञ्च।।
卐 आ रोदसी अपृणा दोत मध्यं- पञ्च देवाꣳ ऋतुश स्सप्तसप्त। चतुस्त्रिंशता पुरुधा वि चष्टे- सरूपेण ज्योतिषा विव्रतेन।।
卐 यदुष औच्छः प्रथमा विभाना- मजनयो येन पुष्टस्य पुष्टम्। यत्ते जामित्व मवरं परस्या- मह न्महत्या॑ असुरत्व मेकम्।।
卐 विधु न्दद्राणं समने बहूनाँ- युवानं सन्तं पलितो जगार। देवस्य पश्य काव्यं महित्वा- ऽद्या ममार स ह्य स्समान।।
❀08.01.17 卐शाक्मना शाको अरुण स्सुपर्ण॑- आ यो मह श्शूर स्सना दनीळः। यच्चिकेत सत्य मित्तन्न मोघं- वसु स्पार्ह मुत जेतोत दाता।।
卐 ऐभि र्ददे वृष्ण्या पौंस्यानि- येभि रौक्ष द्वृत्रहत्याय वज्री। ये कर्मणः क्रियमाणस्य मह्न- ऋतेकर्म मुदजायन्त देवाः।।

卐 युजा कर्माणि जनय न्विश्वौजा^- अशस्तिहा विश्वमना स्तुराषाट्। पीत्वी सोमस्य दिव^ आ वृधान- श्शूरो नि युधा ऽधम दस्यून्।।

☙ 10.56 इदं त इति सप्तर्चस्य सूक्तस्य, वामदेव्यो बृहदुक्थो विश्वेदेवा स्त्रिष्टुप्, चतुर्थ्यादि तिस्रो जगत्यः।

❀08.01.18 卐इदन्त एकं पर^ ऊत एक- न्तृतीयेन ज्योतिषा सँ विशस्व। सँवेशने तन्व1(अ)श्चारुरेधि- प्रियो देवानां परमे जनित्रे।।

卐 तनूष्टे वाजि न्तन्व1(अ)न्नयन्ती- वाम मस्मभ्य न्धातु शर्म तुभ्यम्। अह्रुतो महो धरुणाय देवा- न्दिवीव ज्योति स्स्वमा मिमीयाः।।

卐 वाज्यसि वाजिनेना सुवेनी- स्सुवित स्स्तोमं सुवितो दिवङ्गाः। सुवितो धर्म प्रथमानु सत्या- स्सुवितो देवा न्त्सुवितोनु पत्म।।

卐 महिम्न एषां पितरश्चनेशिरे- देवा देवेष्वदधु रपि क्रतुम्। समविव्यचु रुत यान्यत्विषु- रैषा न्तनूषु नि विविशुः पुनः~।।

卐 सहोभि विश्वं परि चक्रमू रजः- पूर्वा धामा न्यऽमिता मिमानाः। तनूषु विश्वा भुवना नि येमिरे- प्रासारयन्त पुरुध प्रजा^ अनु।।

卐 द्विधा सूनवोऽसुरं स्वर्विद- माऽस्थापयन्त तृतीयेन कर्मणा। स्वां प्रजां पितरः पित्र्यं सह-^ आवरे ष्वदधु स्तन्तु मातंतम्।।

卐 नावा न क्षोदः प्रदिशः पृथिव्या- स्स्वस्तिभि रति दुर्गाणि विश्वा। स्वां प्रजां बृहदुक्थो महित्वा- ऽवरेष्वदधा दा परेषु।।

☙ 10.57 मा प्र गामेति षड्चस्य सूक्तस्य, गौपायना बन्धुः श्रुतबन्धु र्विप्रबन्धु र्विश्वेदेवा गायत्री। (भेदपक्षे - इन्द्रः 1, अग्निस्तन्तुः 1, विश्वेदेवाः 3, सोमः 1, एवं 6 । मा प्र गामेति सूक्तानां बन्ध्वाद्या ऋषय इत्यार्षानुक्रमण्यां शौनकः)।अत्रैषां गौपायनत्वमेव न लौपायनत्वं, तथा सुबन्धोर्लोपश्च सर्वा. भा.)।

❀08.01.19 卐मा प्र गाम पथो वयं- मा यज्ञा दिन्द्र सोमिनः। माऽन्तस्स्थुर्नो अरातयः।।

卐 यो यज्ञस्य प्रसाधन- स्तन्तु र्देवेष्वाऽऽततः। तमाहुत.न्नशीमहि।।

卐 मनो न्वा हुवामहे- नाराशंसेन सोमेन। पितृणाञ्च मन्मभिः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 आ त एतु मनः पुनः~- क्रत्वे दक्षाय जीवसे। ज्योक्क सूर्यं न्दृशे।।

卐 पुनर्नः पितरो मनो- ददातु दैव्यो जनः। जीवँ व्रातं सचेमहि।।

卐 वयं सोम व्रते तव- मन स्तनूषु बिभ्रतः। प्रजावन्त स्सचेमहि।।

10.58 यत्ते यममिति द्वादशर्चस्य सूक्तस्य, गौपायना बन्धुः श्रुतबन्धु र्विप्रबन्धुर्मनोऽनुष्टुप्।

❀08.01.20 卐यत्ते यमँ वैवस्वतं- मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते दिवँ यत्पृथिवीं- मनो जगाम दूरकम्। तत्त आ वर्तयामसीह- क्षयाय जीवसे।।

卐 यत्ते भूमिञ्चतुर्भृष्टिं -मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते चतस्त्रः प्रदिशो- मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते समुद्र मर्णवं -मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते मरीचीः प्रवतो -मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

❀08.01.21 卐यत्ते अपो यदोषधी -र्मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते सूर्यँ यदुषसं- मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते पर्वता न्बृहतो -मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते विश्वं मिदञ्जग -न्मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते पराः परावतो -मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

卐 यत्ते भूतञ्च भव्यञ्च -मनो जगाम दूरकम्। तत्त आ वर्तयामसी-ह क्षयाय जीवसे।।

10.59 प्र तार्यायुरिति दशर्चस्य सूक्तस्य, गौपायना बन्ध्वादय ऋषयः, आद्यानां चतसृणां निर्ऋतिर्देवता, चतुर्थ्या निर्ऋति सोमौ, पञ्चमी षष्ठ्योरसुनीतिदेवी सप्तम्याः पृथिवी द्यावन्तरिक्ष सोम पूष पथ्या स्वस्तयो देवताः, अन्त्यानां तिसृणां द्यावापृथिव्यौ त्रिष्टुप्। अन्त्याऽर्धर्चस्येन्द्रः, अन्त्यास्तिस्त्रः क्रमेण पङ्क्तिमहापङ्क्तिपङ्क्त्युत्तराः।

❀08.01.22 卐प्र तार्यायुः प्रतरन्नवीय- स्स्थातारेव क्रतुमता रथस्य। अध च्यवान^ उत्तवीत्यर्थं- परातरं सु निर्ऋति र्जिहीताम्।।

卐 सामन्नु राये निधिम न्वन्न-ङ्करामहे सु पुरुध श्रवांसि। ता नो विश्वानि जरिता ममत्तु- परातरं सु निर्ऋति र्जिहीताम्।।

卐 अभी ष्व1(अ)र्यः पौंस्यै र्भवेम- द्यौर्न भूमिङ्गिरयो नाज्रान्। ता नो विश्वानि जरिता चिकेत- परातरं सु निर्ऋ॑ति र्जिहीताम्।।
卐 मो षु ण स्सोम मृत्यवे परा दाः- पश्येम नु सूर्य मुच्चरन्तम्। द्युभिर्हितो जरिमा सू नो अस्तु- परातरं सु निर्ऋ॑ति र्जिहीताम्।।
卐 असुनीते मनो अस्मासु धारय- जीवातवे सु प्र तिरा न आयुः। रारन्धि न स्सूर्यस्य सन्दृशि- घृतेन त्व न्तन्वँ वर्धयस्व।।
❀08.01.23 卐असुनीते पुन रस्मासु चक्षुः- पुनः~ प्राण मिह नो धेहि भोगम्। ज्योक्पश्येम सूर्य मुच्चरन्त- मनुमते मृळया न स्स्वस्ति।।
卐 पुनर्नो असुं पृथिवी ददातु- पुन द्यौ र्देवी पुन रन्तरिक्षम्। पुनर्न स्सोम स्तन्व न्ददातु- पुनः~ पूषा पथ्या3(आँ) या स्वस्तिः।।
卐 शं रोदसी सुबन्धवे- यह्वी~ ऋतस्य मातरा। भरता मप यद्रपो- द्यौः पृथिवि क्षमा रपो –मो~ षु ते किञ्चनाऽऽममत्।।
卐 अव द्वके~ अव त्रिका- दिव श्चरन्ति भेषजा। क्षमा चरिष्ण्वेककं- भरता मप यद्रपो द्यौः- पृथिवि क्षमा रपो- मो षु ते किञ्चनाऽऽममत्।।
卐 समिन्द्रेरय गामनड्वाहँ- य आऽवह दुशीनराण्या अनः। भरता मप यद्रपो द्यौः- पृथिवि क्षमा रपो- मो षु ते किञ्चनाऽऽममत्।।
**10.60 आ जनमिति द्वादशर्चस्य सूक्तस्य, गौपायना बन्ध्वादय ऋषयः, षष्ठ्या अगस्त्यस्वसा ऋषिका, आद्यानां चतसृणां षष्ठ्याश्चासमाति र्देवता, पञ्चम्या इन्द्रः, सप्तम्यादि पञ्चानां जीवः, द्वादश्या हस्तोऽनुष्टुप्, आद्याः पञ्चगायत्र्यः अष्टमी नवम्यौ पङ्क्ती।**
**पञ्चमेऽनुवाकेऽष्टसूक्तानि।**
❀08.01.24 卐आ जन न्त्वेषसन्दृशं- माहीनाना मुपस्तुतम्। अगन्म बिभ्रतो नमः।।
卐 असमाति न्नितोशन- न्त्वेष न्नियथिनं रथम्। भजेरथस्य सत्पतिम्।।
卐 यो जना न्महिषाँइवा-ऽतितस्थौ पवीरवान्। उताऽपवीरवा न्युधा।।
卐 यस्येक्ष्वाकु रुप व्रते- रेवा न्मराय्येधते। दिवीव पञ्च कृष्टयः।।

卐 इन्द्र क्षत्रासमातिषु- रथप्रोष्ठेषु धारय। दिवीव सूर्य न्दृशे।।

卐 अगस्त्यस्य नद्ध्य- स्सप्ती~ युनक्षि रोहिता। पणी न्न्यक्रमी रभि- विश्वा न्राजन्नराधसः।।

❀08.01.25 卐अयं मातायं पिता-ऽयञ्जीवातु रागमत्। इदन्तव प्रसर्पणं -सुबन्ध~ वेहि निरिहि।।

卐 यथा युगँ वरत्रया- नह्यन्ति धरुणाय कम्। एवा दाधार ते मनो- जीवातवे न मृत्यवे-ऽथो~ अरिष्टतातये।।

卐 यथेयं पृथिवी मही- दाधारेमा न्वनस्पतीन्। एवा दाधार ते मनो -जीवातवे न मृत्यवे-ऽथो अरिष्टतातये।।

卐 यमादहँ वैवस्वता- त्सुबन्धो र्मन^ आऽभरम्। जीवातवे न मृत्यवे-ऽथो अरिष्टतातये।।

卐 न्य1(अ)ग्वातोव वाति- न्यक्तपति सूर्यः। नीचीन मघ्न्या दुहे- न्यग्भवतु ते रपः।।

卐 अयं मे हस्तो भगवा- नयं मे भगवत्तरः। अयं मे विश्वभेषजो-ऽयं शिवाभिमर्शनः।।

☸ 10.61 **इदमित्थेति सप्तविंशत्यृचस्य सूक्तस्य, मानवो नाभानेदिष्ठो विश्वेदेवास्त्रिष्टुप्।** (भेदपक्षे - **रुद्रः 2, अश्विनौ 2, रुद्रः 2, विश्वेदेवाः 1, वास्तोष्पतिरुद्रौ 1, वास्तोष्पत्यग्नी 1, अङ्गिरसः 1, इन्द्रः 3, अग्निः1, नासत्येन्द्राः 1, सोमः 1, अग्निः 1, आदित्य नाभानेदिष्ठौ 1, नाभानेदिष्ठ धेनू 1, अग्निः 1, इन्द्राग्नी 1, इन्द्रः 1, मित्रावरुण नाभानेदिष्ठाः 1, वरुणः 1, मित्रावरुणौ 1, वरुणः 1, देवाः 1, एवं 27**)

❀08.01.26 卐इद मित्था रौद्रङ्गूर्तवचा-^ ब्रह्म क्रत्वा शच्या मन्तराजौ। क्राणा यदस्य पितरा मंहनेष्ठाः- पर्ष त्पक्थे अहन्ना सप्त होतॄन्।।

卐 स इद्दानाय दभ्याय वन्व-न्च्यवान स्सूदै रमिमीत वेदिम्। तूर्वयाणो गूर्तवचस्तमः -≈ क्षोदो न रेत^ इतऊति सिञ्चत्।।

卐 मनो न येषु हवनेषु तिग्मँ- विपश्शच्या वनुथो द्रवन्ता। आ य श्शर्याभि स्तुविनृम्णो- अस्याश्रीणीता ऽऽदिश.ङ्गभस्तौ।।

卐 कृष्णा यद्गोष्वरुणीषु सीद- द्दिवो नपाताऽश्विना हुवे वाम्। वीतं मे यज्ञमा गतं मे अन्नँ- ववन्वांसा नेष मऽस्मृतध्रू~।।

卐 प्रथिष्ट यस्य वीरकर्म मिष्ण- दऽनुष्ठित न्नु नर्यो अपौहत्। पुन~ स्तदा वृहति यत्कनाया-^ दुहितु राऽऽ^ अनुभृत मनर्वा।।

❀08.01.27 卐मध्या यत्कर्त्व मभव दभीके- काममङ्कृण्वाने पितरि युवत्याम्। मनानग्रेतो जहतु र्वियन्ता- सानौ निषिक्तं सुकृतस्य योनौ।।

卐 पिता यत्स्वान्दुहितर ॒मधिष्कन्- क्ष्मया रेत स्सञ्जग्मानो नि षिञ्चत्। स्वाध्योऽजनय न्ब्रह्म देवा- वास्तोष्पतिँ व्रतपा न्निरऽतक्षन्न्।।

卐 स ईँ वृषा न फेन मस्य दाजौ- स्मदा परैदप दभ्रचेताः। सर त्पदा न दक्षिणा परावृङ्- ता^ नु मे पृशन्यो जगृभ्रे।।

卐 मक्षू न वह्निः प्रजाया^ उपब्दि- रग्निन्न नग्न^ उप सीद दूधः। सनितेध्मं सनितोत वाजं- स धर्ता जज्ञे सहसा यवीयुत्।।

卐 मक्षू कनाया स्सख्यन्नवग्वा^- ऋतँ वदन्त^ ऋतयुक्ति मग्मन्न्। द्विबर्हसो य उप गोपमाऽगु- रऽदक्षिणासो अच्युता ॒दुदुक्षन्न्।।

❀08.01.28 卐मक्षू कनाया स्सख्यन्नवीयो- राधो न रेत^ ऋतमि त्तुरण्यन्न्। शुचि यत्ते रेक्ण^ आऽयजन्त- सबर्दुघायाः पय^ उस्रियायाः।।

卐 पश्वा य त्पश्चा वियुता बुधन्ते-ति ब्रवीति वक्तरी रराणः। वसो वसुत्वा कारवोऽनेहा- विश्वँ विवेष्टि द्रविण मुप क्षु।।

卐 तदिन्न्वस्य परिषद्वानो अग्म- न्पुरू सदन्तो ॒नार्षदं बिभित्सन्न्। वि शुष्णस्य सङ्ग्रथित मनर्वा- विद त्पुरु प्रजातस्य गुहा यत्।।

卐 भर्गो ह नामोत यस्य देवा- स्स्व1(अ)र्ण ये त्रिषधस्थे निषेदुः। अग्नि र्ह नामोत जातवेदा- श्श्रुधी नो होतर् ऋतस्य होताध्रुक्।।

卐 उत त्या मे रौद्रावर्चिमन्ता- नासत्या विन्द्र गूर्तये यजध्यै। मनुष्व द्वृक्तबर्हिषे रराणा- मन्दू~ हितप्रयसा विक्षु यज्यू~।।

❀08.01.29 卐अयं स्तुतो राजा वन्दि वेधा^- अपश्च विप्र स्तरति स्वसेतुः। स कक्षीवन्तं रेजय त्सो अग्नि- र्नेमिन्न चक्र मर्वतो रघुद्रु।।

卐 स द्विबन्धु र्वैतरणो यष्टा- सबर्धु न्धेनु मस्व न्दुहध्यै। सँ यन्मित्रावरुणा वृञ्ज उक्थै- र्ज्येष्ठेभि रर्यमणँ वरूथैः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 तद्बन्धु स्सूरि र्दिवि ते धियन्धा- नाभानेदिष्ठो रपति प्र वेनन्न्। सा नो नाभिः परमाऽस्य वा घा-ऽह न्तत्पश्चा कतिथ श्चिदास।।

卐 इयं मे नाभि रिह मे सधस्थ- मिमे मे देवा अय मस्मि सर्वः। द्विजा अह प्रथमजा ऋतस्ये-द न्धेनु रदुह ज्जायमाना।।

卐 अधाऽऽसु मन्द्रो अरति र्विभावा-ऽव स्यति द्विवर्तनि र्वनेषाट्। ऊर्ध्वा यच्छ्रेणि र्न शिशुर्द -न्मक्षू स्थिरं शेवृधं सूत माता।।

❀08.01.30 卐अधा गाव उपमातिङ्कनाया- अनु श्वान्तस्य कस्य चित्परेयुः। श्रुधि त्वं सुद्रविणो नस्त्वँ- याळाश्वघ्नस्य वावृधे सूनृताभिः।।

卐 अध त्वमिन्द्र विद्ध्य1(अ)स्मा- न्महो राये नृपते वज्रबाहुः। रक्षा च नो मघोनः पाहि सूरी- ननेहस स्ते हरिवो अभिष्टौ।।

卐 अध यद्राजाना गविष्टौ- सर त्सरण्युः कारवे जरण्युः। विप्रः प्रेष्ठ स्स ह्येषां बभूव- परा च वक्ष दुत पर्ष देनान्।।

卐 अधा न्वस्य जेन्यस्य पुष्टौ- वृथा रेभन्त ईमहे तदू नु। सरण्यु रस्य सूनु रश्वो- विप्र श्चासि श्रवसश्च सातौ।।

卐 युवो र्यदि सख्यायास्मे- शर्धाय स्तोमञ्जुजुषे नमस्वान्। विश्वत्र यस्मि न्नागिर स्समीचीः- पूर्वीव गातु र्दाश त्सूनृतायै।।

卐 स गृणानो अद्भि र्देववा- निति सुबन्धु र्नमसा सूक्तैः। वर्ध दुक्थै र्वचोभि रा हि नूनँ- व्यऽध्वैति पयस उस्रियायाः।।

卐 त ऊ षु णो महो यजत्रा- भूतदेवास ऊतये सजोषाः। ये वाजाँ अनयता वियन्तो- ये स्था निचेतारो अमूराः।। इति प्रथमाध्यायः।।

## अष्टमाष्टके द्वितीयाध्यायः (वर्गाः 1-24)

**10.62 ये यज्ञेनेत्येकादशर्चस्य सूक्तस्य, मानवो नाभानेदिष्ठो विश्वेदेवाः, प्र नून मित्यादि चतसृणां सावर्णिर्जगती, पञ्चम्यष्टमी नवम्योऽनुष्टुभः, षष्ठी बृहती सप्तमी सतोबृहती दशमी गायत्री, अन्त्या त्रिष्टुप्। (भेदपक्षे-अङ्गिरसः 6, विश्वेदेवाः 1, सावर्णिः 4, एवं 11। अङ्गिरसोऽनुक्रमण्यां पाक्षिका उक्ताः)। ये**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

यज्ञेनेति चतसृणां त्रिष्टुप्छन्दस्त्वं कश्चिद्ब्रूते तद्बहुविरुद्धम्। विरोधास्तु- षळङ्गिरसां स्तुतिर्वाऽन्त्या त्रिष्टुबित्यनुक्रमाच्छेषा जगत्य इति परिभाषा व्याघात एकः। तासां त्रिष्टुप्छंदस्त्वे नादेश परिभाषया तासामन्त्यायाश्च त्रिष्टुप्त्वे सिद्धेऽन्त्या त्रिष्टुबिति सिद्धानुवाद लक्षणदोषा विष्करणं द्वितीयः। दशमी त्वस्य गायत्री जगत्यन्याविनोत्तमामिति शौनकवचना ज्ञानेन स्वेच्छया व्याख्यानामिति तृतीयश्चेति।)

❀08.02.01 卐ये यज्ञेन दक्षिणया समक्ता^- इन्द्रस्य सख्य मऽमृतत्व .मानश। तेभ्यो भद्र मङ्गिरसो वो अस्तु- प्रति गृभ्णीत मानवं सुमेधसः।।

卐य उदाज न्पितरो गोमयं व-स्वृतेनाऽभिन्द न्परिवत्सरे वलम्। दीर्घायुत्व मङ्गिरसो वो अस्तु- प्रति गृभ्णीत मानवं सुमेधसः।।

卐 य ऋतेन सूर्य मारोहय न्दि-व्यप्रथय न्पृथिवीं मातरं वि। सुप्रजास्त्व मङ्गिरसो वो अस्तु- प्रति गृभ्णीत मानवं सुमेधसः।।

卐 अय न्नाभा वदति वल्गु वो गृहे- देवपुत्रा^ ऋषय स्तच्छृणोतन। सुब्रह्मण्य मङ्गिरसो वो अस्तु- प्रति गृभ्णीत मानवं सुमेधसः।।

卐 विरूपास^ इदृषय- स्त इद्गम्भीरवेपसः। ते अङ्गिरस स्सूनव- स्ते अग्नेः परि जज्ञिरे।।

❀08.02.02 卐ये अग्नेः परि जज्ञिरे- विरूपासो दिव स्परि। नवग्वो नु दशग्वो- अङ्गिरस्तम स्सचा देवेषु मंहते।।

卐 इन्द्रेण युजा नि स्सृजन्त वाघतो- व्रजङ्गोमन्त मश्विनम्। सहस्रं मे ददतो अष्टकर्ण्य1(अ)- श्श्रवो देवे ष्वक्रत।।

卐 प्र नूनञ्जायता मयं- मनु स्तोक्मेव रोहतु। य स्सहस्रं शताश्वं- सद्यो दानाय मंहते।।

卐 न तमश्नोति कश्चन- दिवइव सान्वारभम्। सावर्ण्यस्य दक्षिणा- वि सिन्धुरिव पप्रथे।।

卐 उत दासा परिविषे- स्मद्दिष्टी~ गोपरीणसा। यदु स्तुर्वश्च मामहे।।

卐 सहस्रदा ग्रामणी र्मा रिष न्मनु- स्सूर्येणाऽस्य यतमानैतु दक्षिणा। सावर्णे र्देवाः प्र तिरन्त्वायु- र्यस्मिन्नऽश्रान्ता^ असनाम वाजम्।।

10.63 **परावत इति सप्तदशर्चस्य सूक्तस्य, गयः प्लातो विश्वेदेवाः पञ्चदशी षोडश्योः पथ्या स्वस्तिर्जगत्यन्त्ये द्वे त्रिष्टुभौ स्वस्ति स्त्रिष्टुब्वा। (भेदपक्षे-विश्वेदेवाः 9, दिवः 1, विश्वेदेवाः 4, पथ्या स्वस्ति2, विश्वेदेवाः 1, एवं 17)। गयः प्लात इत्यत्र प्लातो गयो विश्वेदेवा इत्यपि क्वचित्प्रयुञ्जते)**

❀08.02.03 卐परावतो ये दिधिषन्त आप्यं- मनुप्रीतासो जनिमा विवस्वतः। ययातेर्ये नहुष्यस्य बर्हिषि- देवा आसते ते अधि ब्रुवन्तु नः।।

卐 विश्वा हि वो नमस्यानि वन्द्या- नामानि देवा उत यज्ञियानि वः। ये स्थ जाता अदिते रद्भ्य स्परि- ये पृथिव्या स्ते म इह श्रुता हवम्।।

卐 येभ्यो माता मधुम त्पिन्वते- पयः पीयूष न्द्यौ रदिति रद्रिबर्हाः। उक्थशुष्मा न्वृषभरा न्त्स्वप्नस - स्ता आदित्या अनु मदा स्वस्तये।।

卐 नृचक्षसो अनिमिषन्तो अर्हणा- बृह द्देवासो अमृतत्व मानशुः। ज्योतीरथा अहिमाया अनागसो- दिवो वर्ष्माणँ वसते स्वस्तये।।

卐 सम्राजो ये सुवृधो यज्ञ माययु- रपरिह्वृता दधिरे दिवि क्षयम्। ता आ विवास नमसा सुवृक्तिभि- र्महो आदित्या अदितिं स्वस्तये।।

❀08.02.04 卐को व स्स्तोमं राधति यञ्जुजोषथ- विश्वे देवासो मनुषो यति ष्ठन। को वोऽध्वर न्तुविजाता अरङ्कर-द्यो नः पर्ष दत्यंह स्स्वस्तये।।

卐 येभ्यो होत्रां प्रथमा मायेजे मनु- स्समिद्धाग्नि र्मनसा सप्त होतृभिः। त आदित्या अभयं शर्म यच्छत- सुगा नः कर्त सुपथा स्वस्तये।।

卐 य ईशिरे भुवनस्य प्रचेतसो- विश्वस्य स्थातु र्जगतश्च मन्तवः। ते नः कृता दकृता देनस.स्प-र्यद्या देवासः पिपृता स्वस्तये।।

卐 भरेष्विन्द्रं सुहवं हवामहे-ऽंहोमुचं सुकृत न्दैव्यञ्जनम्। अग्निं मित्रं वरुणं सातये भग- न्द्यावापृथिवी~ मरुत स्स्वस्तये।।

卐 सुत्रामाणं पृथिवीन्द्या मनेहसं- सुशर्माण मदितिं सुप्रणीतिम्। दैवी न्नावं स्वरित्रा मनागस- मस्रवन्ती मा रुहेमा स्वस्तये।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀08.02.05 卐विश्वे यजत्रा^ अधि वोचतोतये- त्रायध्व न्नो दुरेवाया अभिह्रुतः। सत्यया वो देवहूत्या हुवेम- शृण्वतो देवा^ अवसे स्वस्तये।।

卐 अपामीवा मप विश्वा मनाहुति- मपाराति न्दुर्विदत्रा मघायतः। आरे देवा द्वेषो अस्म द्युयोतनो-रु ण श्शर्म यच्छता स्वस्तये।।

卐 अरिष्ट स्स मर्तो विश्व^ एधते- प्र प्रजाभि र्जायते धर्मणस्परि। यमादित्यासो नयथा सुनीतिभि- रति विश्वानि दुरिता स्वस्तये।।

卐 यन्देवासोऽवथ वाजसातौ- यं शूरसाता मरुतो हिते धने। प्रातर्यावाणं रथ मिन्द्र सानसि- मरिष्यन्त मा रुहेमा स्वस्तये।।

卐 स्वस्ति नः पथ्यासु धन्वसु- स्वस्त्य1(अ)प्सु वृजने स्वर्वति। स्वस्ति नः पुत्रकृथेषु योनिषु- स्वस्ति राये मरुतो दधातन।।

卐 स्वस्ति रिद्धि प्रपथे श्रेष्ठा- रेक्णस्वत्यभि या वाम मेति। सा नो अमा सो~ अरणे नि पातु- स्वावेशा भवतु देवगोपा।।

卐 एवा प्लते स्सूनु रवीवृधद्वो- विश्व आदित्या^ अदिते मनीषी। ईशानासो नरो अमर्त्येना-ऽस्तावि जनो दिव्यो गयेन।।

10.64 **कथादेवानामिति सप्तदशर्चस्य सूक्तस्य, गयः प्लातो विश्वेदेवा जगती, द्वादशी षोडशी सप्तदश्यस्त्रिष्टुभः (भेदपक्षे-विश्वेदेवाः 4, आदित्यार्यमणः 1, विश्वेदेवाः 3, नद्यः 1, विश्वेदेवाः 4 , द्यावापृथिव्यौ 1, विश्वेदेवाः 3, एवं 17)।**

❀08.02.06 卐कथा देवानाङ्कतमस्य यामनि- सुमन्तु नाम शृण्वतां मनामहे। को मृळाति कतमो नो मयस्कर-त्कतम^ ऊती अभ्या ववर्तति।।

卐 क्रतूयन्ति क्रतवो हृत्सु धीतयो- वेनन्ति वेनाः पतयन्त्या दिशः। न मर्डिता विद्यते अन्य एभ्यो- देवेषु मे अधि कामा^ अयंसत।।

卐 नरा वा शंसं पूषण मगोह्य- मग्नि न्देवेद्ध मभ्यऽर्चसे गिरा। सूर्यामासा चन्द्रमसा यम न्दिवि- त्रितँ वात मुषस मक्तु मश्विना।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 कथा कवि स्तुवीरवा न्कया गिरा- बृहस्पति र्वावृधते सुवृक्तिभिः। अज^ एकपा त्सुहवेभिर् ऋक्वभि-
रहि श्शृणोतु बुध्न्यो3(ओ) हवीमनि।।

卐 दक्षस्य वाऽदिते जन्मनि व्रते- राजाना मित्रावरुणाऽऽविवासति। अतूर्तपन्था॰ पुरुरथो अर्यमा-
सप्तहोता विषुरूपेषु जन्मसु।।

❀08.02.07 卐ते नो अर्वन्तो हवनश्रुतो हवँ- विश्वे शृण्वन्तु वाजिनो मितद्रवः। सहस्त्रसा^
मेधसाताविव त्मना- महो ये धनं समिथेषु जभ्रिरे।।

卐 प्र वो वायुं रथयुजं पुरन्धिं- स्तोमै॰ कृणुध्वं सख्याय पूषणम्। ते हि देवस्य सवितु स्सवीमनि- क्रतुं
सचन्ते सचित स्सचेतसः।।

卐 त्रि स्सप्त सस्रा नद्यो महो रपो- वनस्पती न्पर्वता॰ अग्नि मूतये। कृशानु मस्तृ न्तिष्यं सधस्थ आ-
रुद्रं रुद्रेषु रुद्रियं हवामहे।।

卐 सरस्वती सरयु स्सिन्धु रूर्मिभि- र्महो मही रवसा ऽऽयन्तु वक्षणीः। देवी रापो मातर स्सूदयित्न्वो-
घृतव त्पयो मधुमन्नो अर्चत।।

卐 उत माता बृहद्दिवा शृणोतु न- स्त्वष्टा देवेभि र्जनिभि॰ पिता वचः। ऋभुक्षा^ वाजो रथस्पति र्भगो-
रण्व श्शंस श्शशमानस्य पातु नः।।

❀08.02.08 卐रण्व स्सन्दृष्टौ पितुमा॰इव क्षयो- भद्रा रुद्राणां मरुता मुपस्तुतिः। गोभिष्ष्याम यशसो
जनेष्वा- सदा देवास^ इळया सचेमहि।।

卐 यां मे धियं मरुत^ इन्द्र देवा^- अददात वरुण मित्र यूयम्। तां पीपयत पयसेव धेनु-ङ्कुविद्गिरो अधि
रथे वहाथ।

卐 कुवि दङ्ग प्रति यथा चिदस्य न- स्सजात्यस्य मरुतो बुबोधथ। नाभा यत्र प्रथमं सन्नसामहे- तत्र
जामित्व मदिति र्दधातु नः।।

卐 ते हि द्यावापृथिवी~ मातरा मही~ देवी~ देवा न्जन्मना यज्ञिये~ इतः। उभे~ बिभृत^ उभयं
भरीमभि॰- पुरू रेतांसि पितृभिश्च सिञ्चतः।।

卐 वि षा होत्रा विश्व मश्नोति वार्यं- बृहस्पति रमति॰ पनीयसी। ग्रावा यत्र मधुषुदुच्यते बृह-
दऽवीवशन्त मतिभि र्मनीषिणः।।

卐 एवा कवि स्तुवीरवा॰ ऋतज्ञा^- द्रविणस्यु द्रविणस श्चकानः। उक्थेभि रत्र मतिभिश्च विप्रो-ऽपीपय द्वयो दिव्यानि जन्म।।

卐 एवा प्लते स्सूनु रवीवृधद्वो- विश्व आदित्या^ अदिते मनीषी। ईशानासो नरो अमर्त्येना-ऽस्तावि जनो दिव्यो गयेन।।

☸ 10.65 **अग्निरिन्द्र इति पञ्चदशर्चस्य सूक्तस्य, वासुक्रो वसुकर्णो विश्वेदेवा जगत्यन्त्या त्रिष्टुप्। (भेदपक्षे-विश्वेदेवाः 4, मित्रावरुणौ 1, गौः 1, विश्वेदेवाः 1, द्यावापृथिव्यौ 1, विश्वेदेवाः 3, अश्विनौ 1, विश्वेदेवाः 3, एवं 15)।**

❀08.02.09 卐अग्नि रिन्द्रो वरुणो मित्रो अर्यमा- वायुः पूषा सरस्वती सजोषसः। आदित्या^ विष्णु मरुत स्स्वर्बृह-त्सोमो रुद्रो अदिति ब्रह्मणस्पतिः।।

卐 इन्द्राग्नी~ वृत्रहत्येषु सत्पती~- मिथो हिन्वाना तन्वा3(आ) समोकसा। अन्तरिक्षं मह्या पप्रु रोजसा- सोमो घृतश्री महिमान मीरयन्न्।।

卐 तेषां हि मह्ना महता मनर्वणां- स्तोमा॰ इय र्म्यृतज्ञा^ ऋतावृधाम्। ये अप्सव मर्णव.श्चित्रराधस- स्ते नो रासन्तां महये सुमित्र्याः।।

卐 स्वर्णर मन्तरिक्षाणि रोचना- द्यावाभूमी~ पृथिवीं स्कम्भुरोजसा। पृक्षाइव महयन्त स्सुरातयो- देवा स्स्तवन्ते मनुषाय सूरयः।।

卐 मित्राय शिक्ष वरुणाय दाशुषे- या सम्राजा मनसा न प्रयुच्छतः। ययो र्धाम धर्मणा रोचते बृह- द्ययो रुभे~ रोदसी नाधसी~ वृतौ।।

❀08.02.10 卐या गौ वर्तनिं पर्येति निष्कृतं- पयो दुहाना व्रतनी रवारतः। सा प्रब्रुवाणा वरुणाय दाशुषे- देवेभ्यो दाशद्धविषा विवस्वते।।

卐 दिवक्षसो अग्निजिह्वा^ ऋतावृध- ऋतस्य योनिं विमृशन्त^ आसते। द्यां स्कभित्व्य1(अ)प^ आ चक्रु रोजसा- यज्ञञ्जनित्वी तन्वी3(ई) नि मामृजुः।।

卐 परिक्षिता पितरा पूर्वजावरी~- ऋतस्य योना क्षयत स्समोकसा। द्यावापृथिवी~ वरुणाय सव्रते~- घृतव त्पयो महिषाय पिन्वतः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 पर्जन्यावाता वृषभा पुरीषिणे-न्द्रवायू वरुणो मित्रो अर्यमा। देवा आदित्या अदितिं हवामहे- ये पार्थिवासो दिव्यासो अप्सु ये।।

卐 त्वष्टारँ वायु मृभवो य ओहते- दैव्या होतारा उषसं स्वस्तये। बृहस्पतिँ वृत्रखादं सुमेधस- मिन्द्रियं सोम न्धनसा उ ईमहे।।

❀08.02.11 卐ब्रह्म गामश्वञ्जनयन्त ओषधी- र्वनस्पती न्पृथिवीं पर्वता अपः। सूर्य न्दिवि रोहयन्त स्सुदानव- आर्या व्रता विसृजन्तो अधि क्षमि।।

卐 भुज्यु मंहस पिपृथो निरश्विना- श्यावं पुत्रँ वध्रिमत्या अजिन्वतम्। कमद्युवँ विमदायोहथु र्युवँ- विष्णाप्व1(अँ) विश्वकायाऽव सृजथः।।

卐 पावीरवी तन्यतु रेकपा दजो- दिवो धर्ता सिन्धु राप स्समुद्रियः। विश्वे देवास श्शृणव न्वचांसि मे- सरस्वती सह धीभि पुरन्ध्या।।

卐 विश्वे देवा स्सह धीभि पुरन्ध्या- मनो र्यजत्रा अमृता ऋतज्ञाः। रातिषाचो अभिषाच स्स्वर्विद- स्स्व1(अ)र्गिरो ब्रह्म सूक्तञ्जुषेरत।।

卐 देवा न्वसिष्ठो अमृता न्ववन्दे -ये विश्वा भुवनाऽभि प्रतस्थुः। ते नो रासन्ता मुरुगाय मद्य यूयं पात स्वस्तिभि स्सदा नः।।

10.66 देवान्हुव इति पञ्चदशर्चस्य सूक्तस्य, वासुक्रो वसुकर्णो विश्वेदेवा जगत्यन्त्या त्रिष्टुप्, (पक्षे- विश्वेदेवाः 6, अग्नीषोमौ1, विश्वेदेवाः 8, एवं 15)।

❀08.02.12 卐देवा न्हुवे बृहच्छ्रवस स्स्वस्तये- ज्योतिष्कृतो अध्वरस्य प्रचेतसः। ये वावृधु प्रतरँ विश्ववेदस- इन्द्रज्येष्ठासो अमृता ऋतावृधः।।

卐 इन्द्रप्रसूता वरुणप्रशिष्टा- ये सूर्यस्य ज्योतिषो भाग मानशुः। मरुद्गणे वृजने मन्म धीमहि- माघोने यज्ञञ्जनयन्त सूरयः।।

卐 इन्द्रो वसुभि परि पातु नो गय- मादित्यैर्नो अदिति श्शर्म यच्छतु। रुद्रो रुद्रेभि र्देवो मृळयाति न- स्त्वष्टा नो ग्नाभि स्सुविताय जिन्वतु।।

卐 अदिति र्द्यावापृथिवी ऋतं मह- दिन्द्राविष्णू मरुत स्स्वर्बृहत्। देवा आदित्या अवसे हवामहे- वसू न्रुद्रा न्त्सवितारं सुदंससम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 सरस्वा न्धीभि र्वरुणो धृतव्रतः- पूषा विष्णु र्महिमा वायु रश्विना। ब्रह्मकृतो अमृता विश्ववेदस-श्शर्म नो यंस न्त्रिवरूथ मंहसः।।

❀08.02.13 卐वृषा यज्ञो वृषण स्सन्तु यज्ञिया- वृषणो देवा वृषणो हविष्कृतः। वृषणा द्यावापृथिवी ऋतावरी- वृषा पर्जन्यो वृषणो वृषस्तुभः।।

卐 अग्नीषोमा वृषणा वाजसातये- पुरुप्रशस्ता वृषणा उपब्रुवे। यावीजिरे वृषणो देवयज्यया- ता नश्शर्म त्रिवरूथँ वि यंसतः।।

卐 धृतव्रताः≈क्षत्रिया यज्ञनिष्कृतो- बृहद्दिवा अध्वराणा मभिश्रियः। अग्निहोतार ऋतसापो अद्रुहो-ऽपो असृजन्ननु वृत्रतूर्ये।।

卐 द्यावापृथिवी जनयन्नभि व्रता-ऽप ओषधी र्वनिनानि यज्ञिया। अन्तरिक्षं स्व1(अ)रा पप्रु रूतये-वश न्देवास स्तन्वी3(ई) नि मामृजुः।।

卐 धर्तारो दिव ऋभव स्सुहस्ता- वातापर्जन्या महिषस्य तन्यतोः। आप ओषधीः प्र तिरन्तु नो गिरो-भगो राति र्वाजिनो यन्तु मे हवम्।।

❀08.02.14 卐समुद्र स्सिन्धू रजो अन्तरिक्ष- मज एकपा त्तनयित्नु रर्णवः। अहिर्बुध्न्य श्शृणव द्वचांसि मे- विश्वे देवास उत सूरयो मम।।

卐 स्याम वो मनवो देववीतये- प्राञ्चन्नो यज्ञं प्र णयत साधुया। आदित्या रुद्रा वसव स्सुदानव- इमा ब्रह्म शस्यमानानि जिन्वत।।

卐 दैव्या होतारा प्रथमा पुरोहित- ऋतस्य पन्था मन्वेमि साधुया। क्षेत्रस्य पतिं प्रतिवेश मीमहे- विश्वा न्देवाः अमृताः अप्रयुच्छतः।।

卐 वसिष्ठासः पितृव द्वाच मक्रत- देवाः ईळाना ऋषिव त्स्वस्तये। प्रीताइव ज्ञातयः काममेत्या-ऽस्मे देवासोव धूनुता वसु।।

卐 देवा न्वसिष्ठो अमृता न्ववन्दे- ये विश्वा भुवनाऽभि प्रतस्थुः। ते नो रासन्ता मुरुगाय मद्य- यूयं पात स्वस्तिभि स्सदा नः।।

10.67 **इमां धियमिति द्वादशर्चस्य सूक्तस्याऽङ्गिरसोऽयास्यो बृहस्पतिस्त्रिष्टुप्।**

❀08.02.15 卐इमा न्धियं सप्तशीर्ष्णीं पिता न- ऋतप्रजातां बृहती मविन्दत्। तुरीयं स्विज्जनय द्विश्वजन्यो-ऽयास्य उक्थ मिन्द्राय शंसन्न्।।

卐 ऋतं शंसन्त ऋजु दीध्याना- दिव स्पुत्रासो असुरस्य वीराः। विप्रं पद मङ्गिरसो दधाना- यज्ञस्य धाम प्रथमं मनन्त।।

卐 हंसैरिव सखिभि र्वावदद्भि- रश्मन्मयानि नहना व्यस्यन्न्। बृहस्पति रभिकनिक्रदद्गा- उत प्रास्तौ दुच्च विद्वा अगायत्।।

卐 अवो द्वाभ्यां पर एकया गा- गुहा तिष्ठन्ती रनृतस्य सेतौ। बृहस्पति स्तमसि ज्योति रिच्छ- न्नुदुस्रा आक र्वि हि तिस्र आवः~।।

卐 विभिद्या पुरं शयथे मपाची- न्नि स्त्रीणि साक मुदधे रकृन्तत्। बृहस्पति रुषसं सूर्यङ्गा -मर्कं र्विवेद स्तनयन्निव द्यौः।।

卐 इन्द्रो वलं रक्षितार न्दुघाना-ङ्करेणेव वि चकर्ता रवेण। स्वेदाञ्जिभि राशिर मिच्छमानो-ऽरोदय त्पणिमा गा अमुष्णात्।।

❀08.02.16 卐स ईं सत्येभि स्सखिभि श्शुचद्भि- र्गोधायसं वि धनसै रदर्दः~। ब्रह्मणस्पति र्वृषभि र्वराहै- र्घर्मस्वेदेभि र्द्रविणं व्यानट्।।

卐 ते सत्येन मनसा गोपतिङ्गा- इयानास इषणयन्त धीभिः। बृहस्पति र्मिथोअवद्यपेभि- रुदुस्त्रिया असृजत स्वयुग्भिः।।

卐 तं वर्धयन्तो मतिभि श्शिवाभि- स्सिंहमिव नानदतं सधस्थे। बृहस्पतिं वृषणं शूरसातौ- भरेभरे अनु मदेम जिष्णुम्।।

卐 यदा वाज मसन द्विश्वरूप- मा द्याम रुक्ष दुत्तराणि सद्म। बृहस्पतिं वृषणं वर्धयन्तो- नाना सन्तो बिभ्रतो ज्योतिरासा।।

卐 सत्या माशिषङ्कृणुता वयोधै- कीरि ञ्चिद्ध्यवथ स्वेभि रेवैः। पश्चा मृधो अप भवन्तु विश्वा- स्तद्रोदसी शृणुतं विश्वमिन्वे~।।

卐 इन्द्रो मह्ना महतो अर्णवस्य- वि मूर्धान मभिन दर्बुदस्य। अहन्नहि मरिणा त्सप्त सिन्धू- न्देवै र्द्यावापृथिवी प्रावतन्नः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

🕉 10.68 उदप्रुत इति द्वादशर्चस्य सूक्तस्याऽऽङ्गिरसोऽयास्यो बृहस्पतिस्त्रिष्टुप्।

❀08.02.17 卐उदप्रुतो न वयो रक्षमाणा^- वावदतो अभ्रियस्येव घोषाः। गिरिभ्रजो नोर्मयो मदन्तो- बृहस्पति मभ्य1(अ)र्का अनावन्न्।।

卐 सङ्गोभि राङ्गिरसो नक्षमाणो- भगइवे दर्यमण न्निनाय। जने मित्रो न दम्पती~ अनक्ति- बृहस्पते वाजयाऽऽशूᳲ रिवाजौ।।

卐 साध्वर्या^ अतिथिनी रिषिरा- स्स्पार्हा स्सुवर्णा^ अनवद्यरूपाः। बृहस्पतिᳲ पर्वतेभ्यो वितूर्या- निर्गा^ ऊपे यवमिव स्थिविभ्यः।।

卐 आप्रुषाय न्मधुन^ ऋतस्य- योनि मवक्षिपन्नर्क^ उल्कामिव द्योः। बृहस्पति रुद्धरन्नश्मनो गा^- भूम्या^ उद्नेव वि त्वचं बिभेद्।।

卐 अप ज्योतिषा तमो अन्तरिक्षा- दुद्र श्शीपालमिव वात^ आजत्। बृहस्पति रनुमृश्या वलस्या- ऽभ्रमिव वात^ आ चक्र आ गाः।।

卐 यदा वलस्य पीयतो जसुं -भेद्बृहस्पति रग्नितपोभि रर्कैः। दद्भि र्न जिह्वा परिविष्ट माद -दावि र्निधीᳲ रकृणो दुस्त्रियाणाम्।।

❀08.02.18 卐बृहस्पति रमत हि त्यदासा- न्नाम स्वरीणां सदने गुहा यत्। आण्डेव भित्त्वा शकुनस्य गर्भ- मुदुस्त्रियाᳲ पर्वतस्य त्मनाजत्।।

卐 अश्नापिनद्धं मधु पर्यपश्य- न्मत्स्यन्न दीन उदनि क्षियन्तम्। निष्टज्जभार चमसन्न वृक्षा- द्बृहस्पति र्विरवेणा विकृत्य।।

卐 सोषा मविन्द् त्स स्व1(अ)स्सो अग्निं- सो अर्केण वि बबाधे तमांसि। बृहस्पति र्गोवपुषो वलस्य- नि र्मज्जानन्न पर्वणो जभार।।

卐 हिमेव पर्णा मुषिता वनानि- बृहस्पतिना कृपय द्वलो गाः। अनानुकृत्य मपुन~ श्चकार या- त्सूर्यामासा मिथ^ उच्चरातः।।

卐 अभि श्यावन्न कृशनेभि रश्व-न्नक्षत्रेभिᳲ पितरो द्या मपिंशन्न्। रात्र्या न्तमो अदधु र्ज्योति रह- न्बृहस्पति र्भिन दद्रिं विदद्गाः।।

卐 इद मेकर्म नमो अभ्रियाय- य॰ पूर्वी रन्वा नोनवीति। बृहस्पति स्स हि गोभि स्सो अश्वै- स्स वीरेभि स्स नृभिर्नो वयो धात्।।

**षष्ठेऽनुवाके षोडशसूक्तानि**

10.69 **भद्रा अग्नेरिति द्वादशर्चस्य सूक्तस्य, वाध्र्यश्व स्सुमित्रोऽग्निस्त्रिष्टुबाद्ये द्वे जगत्यौ।**

❀08.02.19 卐भद्रा^ अग्ने वध्र्यश्वस्य सन्दृशो- वामी प्रणीति स्सुरणा^ उपेतयः। यदीं सुमित्रा विशो अग्र इन्धते- घृतेनाऽऽहुतो जरते दविद्युतत्।।

卐 घृत मग्ने वध्र्यश्वस्य वर्धन-ङ्घृत मन्नङ्घृतम्वस्य मेदनम्। घृतेनाहुत^ उर्विया वि पप्रथे- सूर्यइव रोचते सर्पिरासुतिः।।

卐 यत्ते मनु र्यदनीकं सुमित्र- स्समीधे अग्ने तदिदन्नवीयः। स रेवच्छोच स गिरो जुषस्व- स वाज न्दर्षि स इह श्रवो धाः।।

卐 यन्त्वा पूर्व मीळितो वध्र्यश्व- स्समीधे अग्ने स इदङ्गुषस्व। स नस्स्तिपा^ उत भवा तनूपा^- दात्रं रक्षस्व यदिदन्ते अस्मे।।

卐 भवा द्युम्नी वाध्र्यश्वोत गोपा^- मा त्वा तारी दऽभिमाति र्जनानाम्। शूरइव धृष्णु श्च्यवन स्सुमित्र॰- प्र नु वोचँ वाध्र्यश्वस्य नाम।।

卐 स.मज्र्या पर्वत्या3(आ) वसूनि- दासा वृत्राण्यार्या जिगेथ। शूरइव धृष्णु श्च्यवनो जनाना- न्त्वमग्ने पृतनायूँ॰ रभि ष्याः।।

❀08.02.20 卐दीर्घतन्तु र्बृहदुक्षाय मग्नि -स्सहस्रस्तरी श्शतनीथ^ ऋभ्वा। द्युमा न्द्युमत्सु नृभि र्मृज्यमान- स्सुमित्रेषु दीदयो देवयत्सु।।

卐 त्वे धेनु स्सुदुघा जातवेदो-ऽसश्चतेव समना सबर्धुक्। त्वन्नृभि र्दक्षिणावद्भि रग्ने- सुमित्रेभि रिध्यसे देवयद्भिः।।

卐 देवाश्चित्ते अमृता^ जातवेदो- महिमानँ वाध्र्यश्व प्र वोचन्न्। यत्संपृच्छं मानुषी र्विश^ आय -न्त्वन्नृभि र्रजय स्त्वावृधेभिः।।

卐 पितेव पुत्र मबिभ रुपस्थे- त्वामग्ने वध्र्यश्व स्सपर्यन्न्। जुषाणो अस्य समिधँ यविष्ठो-त पूर्वाँ॰ अवनो र्व्राधतश्चित्।।

卐 शर्ध दुग्नि र्वध्र्यश्वस्य शत्रू- न्नृभि र्जिगाय सुतसोमवद्भिः। सर्मनश्चि.ददह श्चित्रभानोऽव व्राधन्त मभिन द्बृधश्चित्।।

卐 अय मग्नि र्वध्र्यश्वस्य वृत्रहा- सनका त्प्रेद्धो नमसोपवाक्यः। स नो अजामीँ रुत वा विजामी- नऽभि तिष्ठ शर्धतो वाध्र्यश्व।।

10.70 **इमां म इत्येकादशर्चस्य सूक्तस्य, वाध्र्यश्व स्सुमित्र इध्मो नराशंस इळो बर्हि र्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचेतसौ सरस्वतीळा भारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतयस्त्रिष्टुप्।**

❀08.02.21 卐इमां मे अग्ने समिधञ्जुषस्वे-ळ स्पदे प्रति हर्या घृताचीम्। वर्ष्म न्पृथिव्या स्सुदिनत्वे अह्ना-मूर्ध्वो भव सुक्रतो देवयज्या।।

卐 आ देवाना मग्रयावेह यातु- नराशंसो विश्वरूपेभि रश्वैः। ऋतस्य पथा नमसा मियेधो- देवेभ्यो देवतम स्सुषूदत्।।

卐 शश्वत्तम मीळते दूत्याय- हविष्मन्तो मनुष्यासो अग्निम्। वहिष्ठै रश्वै स्सुवृता रथेना- ऽऽदेवान्वक्षि नि षदेह होता।।

卐 वि प्रथता न्देवजुष्ट न्तिरश्चा- दीर्घ न्द्राघ्मा सुरभि भूत्वस्मे। अहेळता मनसा देव बर्हि- रिन्द्रज्येष्ठाँ उशतो यक्षि देवान्।।

卐 दिवो वा सानु स्पृशता वरीयः- पृथिव्या वा मात्रया वि श्रयध्वम्। उशती द्वारो महिना महद्भि- र्देवं रथं रथयु र्धारयध्वम्।।

❀08.02.22 卐देवी दिवो दुहितरा सुशिल्पे- उषासानक्ता सदतान्नि योनौ। आ वा न्देवास उशती उशन्त- उरौ सीदन्तु सुभगे उपस्थे।।

卐 ऊर्ध्वो ग्रावा बृह दग्नि स्समिद्धः- प्रिया धामा न्यदिते रुपस्थे। पुरोहिता वृत्विजा यज्ञे अस्मि- न्विदुष्टरा द्रविणमा यजेथाम्।।

卐 तिस्रो देवी र्बर्हि रिदँ वरीय- आ सीदत चकृमा व स्स्योनम्। मनुष्व द्यज्ञं सुधिता हवीं-षीळा देवी घृतपदी जुषन्त।।

卐 देव त्वष्ट र्यद्ध चारुत्व मानड्य- दङ्गिरसा मभव स्सचाभूः। स देवानां पाथ उप प्र विद्वा- नुश न्यक्षि द्रविणोद स्सुरत्नः।।

卐 वनस्पते रशनया नियूया- देवानां पाथ^ उप वक्षि विद्वान्। स्वदाति देव꞉ कृणव द्धवीं-ष्यवता न्द्यावापृथिवी~ हवं मे।।

卐 आऽग्ने वह वरुण मिष्टये न-^ इन्द्र न्दिवो मरुतो अन्तरिक्षात्। सीदन्तु बर्हि विंश्व आ यजत्रा-स्स्वाहा देवा^ अमृता मादयन्ताम्।।

10.71 **बृहस्पत इत्येकादशर्चस्य सूक्तस्याऽङ्गिरसो बृहस्पतिर्ज्ञानं त्रिष्टुप्, नवमी जगती।**

❀08.02.23 卐बृहस्पते प्रथमं वाचो अग्रँ- यत्प्रैरत नामधेय न्दधानाः। यदेषां श्रेष्ठँ यदरिप्र मासी-त्प्रेणा तदेषा न्निहितङ्गुहाऽविः।।

卐 सक्तुमिव तितउना पुनन्तो- यत्र धीरा^ मनसा वाच मक्रत। अत्रा सखाय स्सख्यानि जानते- भद्रैषाँ लक्ष्मी र्निहिताऽधि वाचि।।

卐 यज्ञेन वाच꞉ पदवीय माय- न्ता मन्वविन्द न्नृषिषु प्रविष्टाम्। तामाभृत्या व्यदधु꞉ पुरुत्रा- तां सप्त रेभा^ अभि सन्नवन्ते।।

卐 उत त्व꞉ पश्यन्न ददर्श वाच- मुत त्व श्शृण्वन्न शृणोत्येनाम्। उतो~ त्वस्मै तन्व1(अँ) वि सस्रे-जायेव पत्य उशती सुवासाः।।

卐 उत त्वं सख्ये स्थिरपीत माहु- र्नैनं हिन्व न्त्यपि वाजिनेषु। अधेन्वा चरति माययैष- वाचं शुश्रुवाँ अफला मपुष्पाम्।।

❀08.02.24 卐यस्तित्याज सचिविदं सखाय-न्न तस्य वाच्यपि भागो अस्ति। यदीं शृणो त्यलकं शृणोति- नहि प्रवेद सुकृतस्य पन्थाम्।।

卐 अक्षण्वन्त꞉ कर्णवन्त स्सखायो- मनोजवेष्वसमा बभूवुः। आदघ्नास^ उपकक्षास उ त्वे- ह्रदाइव स्नात्वा^ उ त्वे ददृश्रे।।

卐 हृदा तष्टेषु मनसो जवेषु- यद्ब्राह्मणा स्सँयजन्ते सखायः। अत्राह त्वँ वि जहु र्वेद्याभि- रोहब्रह्माणो वि चरन्त्यु त्वे।।

卐 इमे ये नार्वाङ्ग पर श्चरन्ति- न ब्राह्मणासो न सुतेकरासः। त एते वाच मभिपद्य पापया- सिरी स्तन्त्र न्तन्वते अप्रजज्ञयः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सर्वे नन्दन्ति यशसाऽगतेन -सभासाहेन सख्या सखायः। किल्बिषस्पृ त्पितुषणि ह्येषा- मरं हितो भवति वाजिनाय।।

卐 ऋचान्त्वः पोषमास्ते पुपुष्वा- न्गायत्रन्त्वो गायति शक्करीषु। ब्रह्मा त्वो वदति जातविद्याँ- यज्ञस्य मात्राँ वि मिमीत उ त्वः।। ।। इति द्वितीयाध्यायः।।

## अष्टमाष्टके तृतीयाध्यायः (वर्गाः 1-28)

10.72 देवाना मिति नवर्चस्य सूक्तस्य, लौक्यो बृहस्पति र्देवा अनुष्टुप्। (आङ्गिरसो वा बृहस्पति र्ऋषि र्दाक्षायण्यदिति र्वा ऋषिका)।

08.03.01 卐देवानान्नु वयज्ञाना- प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः- पश्या दुत्तरे युगे।।

卐 ब्रह्मणस्पति रेता- सङ्कर्मारइवाधमत्। देवानां पूर्व्ये युगे-ऽसत स्सदजायत।।

卐 देवानाँ युगे प्रथमे-ऽसत स्सदजायत। तदाशा^ अन्वजायन्त- तदुत्तानपद स्परि।।

卐 भूर्जज्ञ उत्तानपदो- भुव^ आशा^ अजायन्त। अदिते र्दक्षो^ अजायत -दक्षाद्वदितिः परि।।

卐 अदिति र्ह्यजनिष्ट- दक्ष या दुहिता तव। तान्देवा^ अन्वजायन्त- भद्रा^ अमृतबन्धवः।।

08.03.02 卐यद्देवा^ अद स्सलिले- सुसंरब्धा^ अतिष्ठत। अत्रा वो नृत्यतामिव- तीव्रो रेणु रपाऽयत।।

卐 यद्देवा^ यतयो यथा- भुवना न्यऽपिन्वत। अत्रा समुद्र आ गूळ्ह- मा सूर्य मजभर्तन।।

卐 अष्टौ पुत्रासो अदिते-र्ये जाता स्तन्व1(अ)स्परि। देवाँ उप प्रैत्सप्तभिः- परा मार्ताण्ड मास्यत्।।

卐 सप्तभिः पुत्रै रदिति- रुप प्रैत्पूर्व्यँ युगम्। प्रजायै मृत्यवे त्व-त्पुनर्मार्ताण्ड माऽभरत्।।

10.73 जनिष्ठा इत्येकादशर्चस्य सूक्तस्य, शात्यो गौरिवीतिरिन्द्रस्त्रिष्टुप्।

08.03.03 卐जनिष्ठा^ उग्र स्सहसे तुराय- मन्द्र^ ओजिष्ठो बहुलाभिमानः। अवर्धन्निन्द्रं मरुत श्चिदत्र- माता यद्वीरन्दधन द्धनिष्ठा।।

卐 द्रुहो निषत्ता पृशनी चिदेवैः- पुरू शंसेन वावृधुष्ट इन्द्रम्। अभीवृतेव ता महापदेन- ध्वान्तात्प्रपित्वा दुदरन्त गर्भाः।।

卐 ऋष्वा ते पादा प्र यज्जिगा –स्यऽवर्धं न्वाजा^ उत ये चिदत्र। त्वमिन्द्र सालावृका न्त्सहस्रं- मास न्दधिषे अश्विनाऽऽववृत्याः।।

卐 समना तूर्णि रुप यासि यज्ञ- मा नासत्या सख्याय वक्षि। वसाव्या मिन्द्र धारय स्सहस्रा-ऽश्विना शूर ददतु मघानि।।

卐 मन्दमान^ ऋता दधि प्रजायै- सखिभि रिन्द्रं^ इषिरेभि रर्थम्। आऽऽभिर्हि माया^ उप दस्यु माऽगा- न्मिहः प्र तम्रा^ अवपत्तमांसि।।

❀08.03.04 卐सनामाना चिद्ध्वसयो न्यस्मा -अवाह न्निन्द्र^ उषसो यथाऽनः। ऋष्वै रगच्छ स्सखिभि र्निकामै- स्साकं प्रतिष्ठा हृद्या जघन्थ।।

卐 त्वञ्जघन्थ नमुचिं मखस्यु- न्दासङ्कृण्वान^ ऋषये विमायम्। त्वञ्चकर्थ मनवे स्योना-न्पथो देवत्राऽञ्जसेव यानान्।।

卐 त्वमेतानि पप्रिषे वि ना-मेशान^ इन्द्र दधिषे गभस्तौ। अनु त्वा देवा श्शवसा मदन्त्यु-परिबुध्ना न्वनिन श्चकर्थ।।

卐 चक्रं यदस्याप्स्वा निषत्त- मुतो~ तदस्मै मध्विच्चच्छद्यात्। पृथिव्या मतिषितं यदूधः- पयो गोष्वऽदधा ओषधीषु।।

卐 अश्वादियायेति यद्वदन्त्यो-जसो जात मुत मन्य एनम्। मन्यो रियाय हर्म्येषु तस्थौ- यतः प्रजज्ञ इन्द्रो अस्य वेद।।

卐 वय स्सुपर्णा^ उप सेदु रिन्द्रं- प्रियमेधा^ ऋषयो नाधमानाः। अप ध्वान्त मूर्णुहि पूर्धि चक्षु - र्मुमुग्ध्य1(अ)स्मा न्निधयेव बद्धान्।।

10.74 **वसूनामिति षड्चस्य सूक्तस्य, शाक्त्यो गौरिवीतिरिन्द्रस्त्रिष्टुप्।**

❀08.03.05 卐वसूनाँ वा चर्कृष इयक्ष- न्धिया वा यज्ञैर्वा रोदस्योः। अर्वन्तो वा ये रयिमन्त स्सातौ- वनुं वा ये सुश्रुणं सुश्रुतो धुः~।।

卐 हव^ एषा मसुरो नक्षत द्यां- श्रवस्यता मनसा निंसत क्षाम्। चक्षाणा^ यत्र सुविताय देवा- द्यौर्न वारेभिः कृणवन्त स्वैः।।

卐 इय मेषा ममृतानाङ्गी- स्सर्वताता ये कृपणन्त रत्नम्। धियञ्च यज्ञञ्च साधन्त- स्ते नो धान्तु वसव्य1(अ)मसामि।।

卐 आ तत्त इन्द्राऽयवः पनन्ता-ऽभि य ऊर्वङ्गोमन्त न्तितृत्सान्। सकृत्स्व1(अँ) ये पुरुपुत्रां महीं- सहस्रधारां बृहती ন্দुदुक्षन्न्।।

卐 शचीव^ इन्द्र मवसे कृणुध्व- मनानत न्दमयन्तं पृतन्यून्। ऋभुक्षणं मघवानं सुवृक्तिं- भर्ता यो वज्रन्नर्यं पुरुक्षुः।।

卐 यद्वावान पुरुतमं पुराषा-ळा- ऽवृत्रहेन्द्रो नामा न्यप्राः। अचेति प्रासहस्पति स्तुविष्मा- न्यदी मुश्मसि कर्तवे करत्तत्।।

10.75 प्र सु व इति नवर्चस्य सूक्तस्य, प्रैयमेध स्सिन्धुक्षिन्नद्यो जगती।

❀08.03.06 卐प्र सु व आपो महिमान मुत्तम-ङ्कारु वोचाति सदने विवस्वतः। प्र सप्तसप्त त्रेधा हि चक्रमुः- प्र सृत्वरीणा मति सिन्धु रोजसा।।

卐 प्र तेऽरद द्वरुणो यातवे पथ- स्सिन्धो~ यद्वाजा^ अभ्यद्रव स्त्वम्। भूम्या^ अधि प्रवता यासि सानुना- यदेषा मग्रञ्जगता मिरज्यसि।।

卐 दिवि स्वनो यतते भूम्योप-र्यनन्तं शुष्म मुदियर्ति भानुना। अभ्रादिव प्र स्तनयन्ति वृष्टय- स्सिन्धु र्यदेति वृषभो न रोरुवत्।।

卐 अभि त्वा सिन्धो~ शिशु मिन्न मातरो- वाश्रा^ अर्षन्ति पयसेव धेनवः। राजेव युध्वा नयसि त्वमित्सिचौ- यदासा मग्रं प्रवता मिनक्षसि।।

卐 इमं मे गङ्गे यमुने सरस्वति- शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तया-ऽऽर्जीकीये श्रृणुह्या सुषोमया।।

❀08.03.07 卐तृष्टामया प्रथमँ यातवे सजू- स्सुसर्त्वा रसया श्वेत्या त्या। त्वं सिन्धो~ कुभया गोमतीङ्क्रुमुं- मेहत्न्वा सरथँ याभि रीयसे।।

卐 ऋजीत्येनी रुशती महित्वा- परि ज्रयांसि भरते रजांसि। अदब्धा सिन्धु रपसा मपस्तमा-ऽश्वा न चित्रा वपुषीव दर्शता।।

卐 स्वश्वा सिन्धु स्सुरथा सुवासा- हिरण्ययी सुकृता वाजिनीवती। ऊर्णावती युवति स्सीलमाव - त्युताऽधि वस्ते सुभगा मधुवृधम्।।

卐 सुखं रथँ युयुजे सिन्धु रश्विन- न्तेन वाजं सनिष दस्मि न्नाजौ। महा न्ह्यस्य महिमा पनस्यते- ऽदब्धस्य स्वयशसो विरप्शिनः।।

✡।। अथ परिशिष्टम्।।

卐 सितासिते सरिते यत्र सङ्गथे- तत्राप्लुतासो दिवमुत्पतन्ति। ये वै तन्व1(अँ)वि सृजन्ति धीरा- स्ते जनासो अमृतत्वं भजन्ते।।

卐 ।। इति परिशिष्टम्।।

10.76 आ व ऋञ्जस इत्यष्टर्चस्य सूक्तस्यैरावतो जरत्कर्ण स्सर्पो ग्रावाणो जगती।

❀08.03.08 卐आ व ऋञ्जस ऊर्जा व्युष्टिष्वि-न्द्रं मरुतो रोदसी अनक्तन। उभे यथा नो अहनी सचाभुवा- सदस्सदो वरिवस्यात उद्भिदा।।

卐 तदु श्रेष्ठं सवनं सुनोतना-ऽत्यो न हस्तयतो अद्रिस्सोतरि। विदद्ध्य1(अ)र्यो अभिभूति पौंस्यं- महो राये चित्तरुते यदर्वतः।।

卐 तदिद्ध्यस्य सवनँ विवे रपो- यथा पुरा मनवे गातु मऽश्रेत्। गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि- प्रेमध्वरेष्वध्वरा॰ अशिश्रयुः।।

卐 अप हत रक्षसो भङ्गुरावत- स्स्कभायत निर्ऋतिं सेधतामतिम्। आ नो रयिं सर्ववीरं सुनोतन- देवाव्यं भरत श्लोकमद्रयः।।

卐 दिवश्चिदा वोऽमवत्तरेभ्यो- विभ्वना चिदाश्वपस्तरेभ्यः। वायोश्चिदा सोमरभस्तरेभ्यो-ऽग्नेश्चि दर्च पितुकृत्तरेभ्यः।।

❀08.03.09 卐भुरन्तु नो यशस स्सोत्वन्धसो- ग्रावाणो वाचा दिविता दिवित्मता। नरो यत्र दुहते काम्यं मध्वा-घोषयन्तो अभितो मिथस्तुरः।।

卐 सुन्वन्ति सोमं रथिरासो अद्रयो- निरस्य रसङ्गविषो दुहन्ति ते। दुहन्त्यूधः रुपसेचनाय क-न्नरो हव्या न मर्जयन्त आसभिः।।

卐 एते नर स्स्वपसो अभूतन- य इन्द्राय सुनुथ सोम मद्रयः। वामँवामँ वो दिव्याय धाम्ने- वसुवसु वꣳ पार्थिवाय सुन्वते।।

🏺 10.77 **अभ्रप्रुष इत्यष्टर्चस्य सूक्तस्य, भार्गव स्स्यूमरश्मि र्मरुतस्त्रिष्टुप्पञ्चमी जगती।**

❀08.03.10 卐अभ्रप्रुषो न वाचा प्रुषा वसु- हविष्मन्तो न यज्ञा^ विजानुषः। सुमारुतन्न ब्रह्माण मर्हसे- गण मस्तोष्येषान्न शोभसे।।

卐 श्रिये मर्यासो अञ्जीꣳ रकृण्वत- सुमारुतन्न पूर्वी रति क्षपः। दिवस्पुत्रास^ एता न येतिर- आदित्यासस्ते अक्रा^ न वावृधुः।।

卐 प्र ये दिवꣳ पृथिव्या न बर्हणा- त्मना रिरिच्रे अभ्रान्न सूर्यः। पाजस्वन्तो न वीराꣳ पनस्यवो- रिशादसो न मर्या अभिद्यवः।।

卐 युष्माकं बुध्ने अपान्न यामनि- विथुर्यति न मही श्रथर्यति। विश्वप्सु र्यज्ञो अर्वा गयं सु वꣳ- प्रयस्वन्तो न सत्राच आ गत।।

卐 यूय न्धूर्षु प्रयुजो न रश्मिभि- र्ज्योतिष्मन्तो न भासा व्युष्टिषु। श्येनासो न स्वयशसो रिशादसꣳ- प्रवासो न प्रसितासꣳ परिप्रुषः।।

❀08.03.11 卐प्र यद्वहध्वे मरुतꣳ पराका -द्यूयं मह स्सँवरणस्य वस्वः। विदानासो वसवो राध्यस्या- ऽऽराच्चिद्द्वेष स्सनुत र्युयोत।।

卐 य^ उदृचि यज्ञे अध्वरेष्ठा^- मरुद्भ्यो न मानुषो ददाशत्। रेवत्स वयो दधते सुवीरं- स देवाना मपि गोपीथे अस्तु।।

卐 ते हि यज्ञेषु यज्ञियास^ ऊमा^- आदित्येन नाम्ना शंभविष्ठाः। ते नोऽवन्तु रथतू र्मनीषां- महश्च यामन्नध्वरे चकानाः।।

🏺 10.78 **विप्रास इत्यष्टर्चस्य सूक्तस्य, भार्गव स्स्यूमरश्मि र्मरुतस्त्रिष्टुब्द्वितीया पञ्चम्याद्या श्चतस्रश्च जगत्यः।**

❀08.03.12 卐विप्रासो न मन्मभि स्स्वाध्यो- देवाव्यो3(ओ) न यज्ञै स्स्वप्नसः। राजानो न चित्रा स्सुसन्दृशः -≈ क्षितीनान्न मर्या अरेपसः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अग्निर्न ये भ्राजसा रुक्मवक्षसो- वातासो न स्वयुज स्सद्यऊतयः। प्रज्ञातारो न ज्येष्ठा स्सुनीतय-स्सुशर्माणो न सोमा^ ऋतँ यते।।

卐 वातासो न ये धुनयो जिगत्नवो-ऽग्नीनान्न जिह्वा विरोकिणः। वर्मण्वन्तो न योधा श्शिमीवन्त꞉-पितृणान्न शंसा स्सुरातयः।।

卐 रथानान्न ये1(ए)रा स्सनाभयो- जिगीवांसो न शूरा अभिद्यवः। वरेयवो न मर्या घृतप्रुषो-ऽभिस्वर्तारो अर्कन्न सुष्टुभः।।

卐 अश्वासो न ये ज्येष्ठास^ आशवो- दिधिषवो न रथ्य स्सुदानवः। आपो न निम्नै रुदभि र्जिगत्नवो-विश्वरूपा^ अङ्गिरसो न सामभिः।।

❀08.03.13 卐ग्रावाणो न सूरय स्सिन्धुमातर^- आदर्दिरासो अद्रयो न विश्वहा। शिशूला^ न क्रीळय स्सुमातरो- महाग्रामो न याम न्नुत त्विषा।।

卐 उषसान्न केतवोऽध्वरश्रिय- श्शुभँयवो नाञ्जिभि र्व्यश्वितन्न्। सिन्धवो न ययियो भ्राजदृष्टय꞉- परावतो न योजनानि ममिरे।।

卐 सुभागा न्नो देवा꞉ कृणुता सुरत्ना- नऽस्मान्त्स्तोतॄ न्मरुतो वावृधानाः। अधि स्तोत्रस्य सख्यस्य गात- सनाद्धि वो रत्नधेयानि सन्ति।।

☬ 10.79 **अपश्यमिति सप्तर्चस्य सूक्तस्य, सौचीकोऽग्निरग्निस्त्रिष्टुप्।( वैश्वानरोऽग्निर्वाजंभर स्सप्तिरितीमावृषी पाक्षिकौ)।**

❀08.03.14 卐अपश्यमस्य महतो महित्व- मऽमर्त्यस्य मर्त्यासु विक्षु। नाना हनू~ विभृते~ सं भरेते~ असिन्वती~ बप्सती~ भूर्यत्तः।।

卐 गुहा शिरो निहित मृधगक्षी- असिन्वन्नत्ति जिह्वया वनानि। अत्राण्यस्मै पड्भि स्सं भर - न्त्युत्तानहस्ता^ नमसाऽधि विक्षु।।

卐 प्र मातु꞉ प्रतरङ्गुह्य मिच्छ -न्कुमारो न वीरुध स्सर्पदुर्वीः। ससन्न पक्व मविद च्छुचन्तं- रिरिह्वांसं रिप^ उपस्थे अन्तः।।

卐 तद्वामृतं रोदसी~ प्र ब्रवीमि- जायमानो मातरा गर्भो अत्ति। नाह न्देवस्य मर्त्यश्चिकेता-ऽग्नि रङ्ग विचेता स्स प्रचेताः।।

卐 यो अस्मा अन्न न्तृष्वा3(आ)दधात्या-ऽज्यै घृतै र्जुहोति पुष्यति। तस्मै सहस्र मक्षभि र्वि चक्षे-ऽग्ने विश्वत꠰ प्रत्यङ्ङसि त्वम्।।

卐 किन्देवेषु त्यज एन श्चकर्था-ऽग्ने पृच्छामि नु त्वा मविद्वान्। अक्रीळ न्क्रीळन्हरि रत्तवे-ऽद- न्वि पर्वश श्चकर्त गामिवासिः।।

卐 विषूचो अश्वान्युयुजे वनेजा- ऋजीतिभी रशनाभि र्गृभीतान्। चक्षदे मित्रो वसुभि स्सुजात- स्समानृधे पर्वभि र्वावृधानः।।

10.80 **अग्नि स्सप्तिमिति सप्तर्चस्य सूक्तस्य, सौचीकोऽग्निरग्निस्त्रिष्टुप्। (वैश्वानरोऽग्निर्वाजंभर स्सप्तिरितीमावृषी पाक्षिकौ)।**

❀08.03.15 卐अग्नि स्सप्तिँ वाजंभर न्ददा -त्यऽग्नि र्वीरं श्रुत्यङ्कर्मनिष्ठाम्। अग्नी रोदसी वि चरत्समञ्ज-न्नग्नि र्नारीं वीरकुक्षिं पुरन्धिम्।।

卐 अग्ने रप्नस स्सामि दस्तु भद्रा-ऽग्नि र्मही~ रोदसी आ विवेश। अग्नि रेकञ्चोदय त्सम -त्स्वऽग्नि र्वृत्राणि दयते पुरूणि।।

卐 अग्नि र्ह त्यञ्जरत꠰ कर्णमा-वाग्नि रद्भ्यो निरदह ज्जरूथम्। अग्नि रत्रिङ्घर्म उरुष्य दन्त -रग्नि र्नृमेधं प्रजया ऽसृजत्सम्।।

卐 अग्नि र्दाद्द्रविणं वीरपेशा- अग्निर् ऋषिँ य स्सहस्रा सनोति। अग्निर्दिवि हव्यमा ततान-ऽग्ने र्धामानि विभृता पुरुत्रा।।

卐 अग्नि मुक्थैर् ऋषयो वि ह्वयन्ते-ऽग्निन्नरो यामनि बाधितासः। अग्निँ वयो अन्तरिक्षे पतन्तो-ऽग्नि स्सहस्रा परि याति गोनाम्।।

卐 अग्निँ विश॒ ईळते मानुषी र्या- अग्निं मनुषो नहुषो वि जाताः। अग्नि र्गान्धर्वीं पथ्या मृतस्या-ऽग्ने र्गव्यूति र्घृत आ निषत्ता।।

卐 अग्नये ब्रह्म ऋभव स्ततक्षु- रग्निं महा मवोचामा सुवृक्तिम्। अग्ने प्राव जरितारँ यविष्ठा-ऽग्ने महि द्रविण मा यजस्व।।

10.81 **य इमा विश्वेति सप्तर्चस्य सूक्तस्य, भौवनो विश्वकर्मा विश्वकर्मा त्रिष्टुप्, द्वितीया विराड्रूपा।**

❀08.03.16 卐य॑ इमा विश्वा भुव॑नानि जुह्व॑- दृषि॒र्होता न्यसी॑दत्पि॒ता न॑ः। स आ॒शिषा॒ द्रवि॑ण मि॒च्छमा॑नः- प्रथम॒च्छ द॒व॑रा॒ आविवेश।।

卐 किं स्वि॑दासी द॒धिष्ठान॑ मा॒रम्भ॑ण-ङ्कत॒मत्स्वि॑ त्क॒थाऽऽसीत्। यतो॒ भूमि॑ञ्ज॒नय॒ न्वि॒श्वक॑र्मा॒- वि द्या मौर्णो॑ न्म॒हि॒ना विश्व॑चक्षाः।।

卐 वि॒श्वत॑श्चक्षु रु॒त वि॒श्वतो॑मुखो- वि॒श्वतो॑बाहु रु॒त वि॒श्वत॑स्पात्। सं बा॒हुभ्या॒ न्धम॑ति सं पत॑त्रै- द्या॒वा॒भूमी॑ ज॒नय॑न्दे॒व एक॑ः।।

卐 किं स्वि॒द्वन॒ङ्क॑ उ॒ स वृ॒क्ष॑ आ॑स- यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः। मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ - तद्यद॒ध्यति॑ष्ठ द्भुव॑नानि धा॒रय॑न्न्।।

卐 या ते॒ धामा॑नि प॒रमाणि॒ याऽव॒मा- या म॑ध्य॒मा वि॑श्वकर्म न्नु॒तेमा। शिक्षा॒ सखि॑भ्यो ह॒विषि॑ स्वधाव- स्स्व॒यँ॑ य॑जस्व त॒न्व॑ँ वृ॒धा॒नः।।

卐 विश्व॑कर्म न्ह॒विषा॒ वा॑वृधा॒न- स्स्व॒यँ॑ य॑जस्व पृ॒थि॒वी मु॒त द्याम्। मुह्य॑न्त्व॒न्ये अ॒भितो॒ जना॑स॑- इ॒हाऽस्माक॑ं म॒घवा॑ सू॒रि र॑स्तु।।

卐 वा॒चस्पति॑ँ वि॒श्वक॑र्माण मू॒तये- मनो॒जुव॑ँ वाजे॒ अद्या॑ हु॑वेम। स नो॑ विश्वा॒नि ह॒व॑नानि जोष –द्वि॒श्वश॑म्भू॒ र॑वसे सा॒धुक॑र्मा।।

10.82 **चक्षुष इति सप्तर्चस्य सूक्तस्य, भौवनो विश्वकर्मा विश्वकर्मा त्रिष्टुप्।**

❀08.03.17 卐चक्षु॑षः पि॒ता मन॑सा हि धीरो॑- घृ॒तमे॑ने अजन॒न्नम्न॑माने। य॒देदन्ता॒ अद॑दृहन्त पूर्व॒- आदिद्यावा॑पृथि॒वी अ॑प्रथेताम्।।

卐 वि॒श्वक॑र्मा॒ विम॑ना॒ आ द्वि॒हाया॒- धा॒ता वि॑धा॒ता प॑र॒मोत स॒न्दृक्। तेषा॑ मि॒ष्टानि॒ सम॒िषा म॑दन्ति॒- यत्रा॑ सप्त॒ऋ॒षी न्प॒र॒ एक॑ मा॒हुः।।

卐 यो न॑ः पि॒ता ज॑नि॒ता यो वि॑धा॒ता- धामा॑नि॒ वेद॒ भुव॑नानि॒ विश्वा॑। यो दे॒वाना॑ न्नाम॒धा॒ एक॑ ए॒व- तं स॑म्प्र॒श्नं भुव॑ना य॒न्त्यन्या।।

卐 त॒ आऽय॑जन्त॒ द्रवि॑णं॒ सम॑स्मा॒- ऋ॒ष॑य॒ः पूर्वे॑ ज॒रि॒तारो॒ न भू॒ना। अ॒सूर्ते॒ सूर्ते॒ रज॑सि नि॒षत्ते- ये भू॒तानि॑ सम॑कृण्व न्नि॒मानि।।

卐 परो दिवा पर एना पृथिव्या- परो देवेभि रसुरै र्यदस्ति। कं स्विद्गर्भं प्रथम न्दध्र आपो- यत्र देवा स्समपश्यन्त विश्वे।।

卐 तमिद्गर्भं प्रथम न्दध्र आपो- यत्र देवा स्समगच्छन्त विश्वे। अजस्य नाभा वध्येक मर्पितँ- यस्मि न्विश्वानि भुवनानि तस्थुः।।

卐 न तँ विदाथ य इमा जजाना-ऽन्य द्युष्माक मन्तरं बभूव। नीहारेण प्रावृता जल्प्या चा-ऽसुतृप उक्थशास श्चरन्ति।।

10.83 यस्ते मन्यविति सप्तर्चस्य सूक्तस्य, तापसो मन्युर्मन्युस्त्रिष्टुबाद्या जगती।

❀08.03.18 卐यस्ते मन्यो~विध द्वज्र सायक- सह ओजः पुष्यति विश्व मानुषक्। साह्याम दास मार्य न्त्वया युजा- सहस्कृतेन सहसा सहस्वता।।

卐 मन्यु रिन्द्रो मन्यु रेवास देवो- मन्यु होता वरुणो जातवेदाः। मन्युँ विश ईळते मानुषी र्याः- पाहि नो मन्यो~ तपसा सजोषाः।।

卐 अभीहि मन्यो~ तवस स्तवीया- न्तपसा युजा वि जहि शत्रून्। अमित्रहा वृत्रहा दस्युहा च- विश्वा वसून्या ऽऽभरा त्वन्नः।।

卐 त्वं हि मन्यो~ अभिभूत्योजा- स्स्वयम्भू र्भामो अभिमातिषाहः। विश्वचर्षणि स्सहुरि स्सहावा- नस्मा स्वोजः पृतनासु धेहि।।

卐 अभाग स्सन्नप परेतो अस्मि- तव क्रत्वा तविषस्य प्रचेतः~। तन्त्वा मन्यो अक्रतु र्जिहीळाहं- स्वा तनू र्बलदेयाय मेहि।।

卐 अयन्ते अस्म्युप मेह्यर्वा-ङ्क्प्रतीचीन स्सहुरे विश्वधायः। मन्यो~ वज्रिन्नभि मामा ववृत्स्व- हनाव दस्यूँ रुत बोध्यापेः।।

卐 अभि प्रेहि दक्षिणतो भवा मे-ऽधा वृत्राणि जङ्घनाव भूरि। जुहोमि ते धरुणं मध्वो अग्र- मुभा उपांशु प्रथमा पिबाव।।

10.84 त्वया मन्यविति सप्तर्चस्य सूक्तस्य, तापसो मन्युर्मन्युर्जगती, आद्यास्तिस्रस्त्रिष्टुभः।

सप्तमेऽनुवाकेषट् सूक्तानि।

❀08.03.19 卐त्वया मन्यो~ सरथं मारुजन्तो- हर्षमाणासो धृषिता मरुत्वः। तिग्मेषव आयुधा संशिशाना- अभि प्र यन्तु नरो अग्निरूपाः।।

卐 अग्निरिव मन्यो~ त्विषित स्सहस्व- सेनानीर्न स्सहुरे हूत एधि। हत्वाय शत्रू न्वि भजस्व वेद- ओजो मिमानो वि मृधो नुदस्व।।

卐 सहस्व मन्यो~ अभिमाति मस्मे-~रुज न्मृण न्प्रमृण न्प्रेहि शत्रून्। उग्रन्ते पाजो नन्वा रुरुध्रे- वशी वशन्नयस एकज त्वम्।।

卐 एको बहूना मसि मन्य~ वीळितो- विशँविशँ युधये सं शिशाधि। अकृत्तरुत्त्वया युजा वय- न्द्युमन्तङ्घोषँ विजयाय कृण्महे।।

卐 विजेषकृ दिन्द्रइवानवब्रवो3(ओ)-ऽस्माकं मन्यो~ अधिपा भवेह। प्रियन्ते नाम सहुरे गृणीमसि- विद्मा तमुत्सँ यत आबभूथ।।

卐 आभूत्या सहजा वज्र सायक- सहो बिभर्ष्यभिभूत उत्तरम्। क्रत्वा नो मन्यो~ सह मेद्येधि- महाधनस्य पुरुहूत संसृजि।।

卐 संसृष्ट न्धन मुभयं समाकृत- मस्मभ्यन्दत्ताँ वरुणश्च मन्युः। भिय न्दधाना हृदयेषु शत्रव- परा जितासो अप नि लयन्ताम्।।

**10.85 सत्येनेति सप्तचत्वारिंशदृचस्य सूक्तस्य, सूर्या सावित्री ऋषिका, पञ्चानां सोमो देवता, तत एकादशानां सूर्या विवाहः, सप्तदश्या देवाः, अष्टादश्याः सोमार्कौ, एकोनविंश्याश्चन्द्रमाः, ततो नवानां नृणां विवाहमन्त्रा आशीः प्रायाः, ततो द्वयो र्वधूर्वासो देवता, एकत्रिंश्या यक्ष्महा शिष्टानामृचां सूर्या सावित्री अनुष्टुप्, चतुर्दशी एकोनविंश्यादि तिस्रस्त्रयोविंशी चतुर्विंशी षड्विंशी षट्त्रिंशी सप्तत्रिंशी चतुश्चत्वारिंश्यश्च त्रिष्टुभः, अष्टादशी सप्तविंशी त्रिचत्वारिंश्यश्च जगत्यः, चतुस्त्रिंश्युरोबृहती।**

❀08.03.20 卐सत्येनोत्तभिता भूमि- स्सूर्येणोत्तभिता द्यौः। ऋतेनादित्या स्तिष्ठन्ति- दिवि सोमो अधि श्रितः।।

卐 सोमेनाऽऽदित्या बलिन- स्सोमेन पृथिवी मही। अथो~ नक्षत्राणा मेषा- मुपस्थे सोम आहितः।।

卐 सोमं मन्यते पपिवान्य-त्संपिंषन्त्योषधिम्। सोमँ यं ब्रह्माणो विदु- र्न तस्याऽश्नाति कश्चन।।

卐 आच्छद्विधानै र्गुपितो- बार्हतै स्सोम रक्षितः। ग्राव्णा मिच्छृण्व न्तिष्ठसि- न ते अश्नाति पार्थिवः।।

卐 यत्त्वा देव प्रपिबन्ति- तत^ आप्यायसे पुनः~। वायु स्सोमस्य रक्षिता- समानां मास^ आकृतिः।।
❀08.03.21 卐रैभ्यासी दनुदेयी- नाराशंसी न्योचनी। सूर्याया भद्र मिद्वासो -गाथयैति परिष्कृतम्।।
卐 चित्ति राऽऽ^ उपबर्हण-ञ्चक्षु राऽऽ^ अभ्यञ्जनम्। द्यौर्भूमिः कोश^ आसी- द्यदया त्सूर्या पतिम्।।
卐 स्तोमा^ आस न्प्रतिधयः- कुरीर ञ्छन्द^ ओपशः। सूर्याया^ अश्विना वरा-ऽग्नि रासी त्पुरोगवः।।
卐 सोमो वधूयु रभव -दश्विना ऽऽस्ता मुभा वरा। सूर्यां यत्पत्ये शंसन्तीं- मनसा सविता ऽददात्।।
卐 मनो अस्या^ अन^ आसी- द्यौरासी दुत च्छदिः। शुक्रा वनड्वाहा वास्ताँ –यदया त्सूर्या गृहम्।।
❀08.03.22 卐ऋक्सामाभ्या मभिहितौ- गावौ ते सामनावितः। श्रोत्रन्ते चक्रे~ आस्ता- न्दिवि पन्था श्चराचरः।।
卐 शुची~ ते चक्रे~ यात्या- व्यानो अक्ष आहतः। अनो मनस्मयं सूर्या-ऽरोह त्प्रयती पतिम्।।
卐 सूर्याया वहतुः प्रागा- त्सविता यमवासृजत्। अघासु हन्यन्ते -गावोऽर्जुन्योः पर्युह्यते।।
卐 यदश्विना पृच्छमाना वयात- न्त्रिचक्रेण वहतुं सूर्यायाः। विश्वे देवा^ अनु तद्वा मजान- न्पुत्रः पितरा ववृणीत पूषा।।
卐 यदयातं शुभस्पती~- वरेयं सूर्या मुप। क्वैकञ्चक्रं वा मासी- त्क्व देष्ट्राय तस्थथुः।।
❀08.03.23 卐द्वे~ ते चक्रे~ सूर्ये- ब्रह्माण^ ऋतुथा विदुः। अथैकञ्चक्रं यद्गुहा- तदद्धातय इद्विदुः।।
卐 सूर्यायै देवेभ्यो- मित्राय वरुणाय च। ये भूतस्य प्रचेतस^- इद न्तेभ्योऽकरन्नमः।।
卐 पूर्वापरञ्चरतो माययैतौ- शिशू~ क्रीळन्तौ परि यातो अध्वरम्। विश्वा न्यन्यो भुवना ऽभिचष्ट- ऋतूं रन्यो विदध ज्जायते पुनः~।।
卐 नवोनवो भवति जायमानो-ऽह्ना-ङ्केतु रुषसा मेत्यग्रम्। भाग न्देवेभ्यो वि दधा त्याय -न्प्र चन्द्रमा स्तिरते दीर्घ मायुः।।
卐 सुकिंशुकं शल्मलिं विश्वरूपं- हिरण्यवर्णं सुवृतं सुचक्रम्। आ रोह सूर्ये अमृतस्य लोकं- स्योनं पत्ये वहतुङ्कृणुष्व।।
❀08.03.24 卐उदीर्ष्वातः पतिवती ह्ये3(ए)षा- विश्वावसुन्नमसा गीर्भिरीळे। अन्या मिच्छ पितृषदं व्यक्तां- स ते भागो जनुषा तस्य विद्धि।।
卐 उदीर्ष्वातो विश्वावसो~ -नमसेळामहे त्वा। अन्या मिच्छ प्रफर्व्य1(अं)- सञ्जायां पत्या सृज।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अनृक्षरा^ ऋजवं स्सन्तु पन्था^- येभि स्सखायो यन्ति नो वरेयम्। समर्यमा सं भगो नो निनीया-त्स.ञ्जास्पत्यं सुयम मस्तु देवाः।।

卐 प्र त्वा मुञ्चामि वरुणस्य पाशा- द्येन त्वाऽबध्ना त्सविता सुशेवः। ऋतस्य योनौ सुकृतस्य लोके-ऽरिष्टान्त्वा सह पत्या दधामि।।

卐 प्रेतो मुञ्चामि नामुत- स्सुबद्धा ममुतस्करम्। यथेय मिन्द्र मीढ्व- स्सुपुत्रा सुभगाऽसति।।

❀08.03.25 卐पूषा त्वेतो नयतु हस्तगृह्या-ऽश्विना त्वा प्र वहतां रथेन। गृहान्गच्छ गृहपत्नी यथासो-वशिनी त्वँ विदथमा वदासि।।

卐 इह प्रियं प्रजया ते समृध्यता- मस्मि न्गृहे गार्हपत्याय जागृहि। एना पत्या तन्व1(अं) सं सृजस्वा-ऽधा जिव्री~ विदथमा वदाथः।।

卐 नीललोहितं भवति- कृत्यासक्ति र्व्यज्यते। एधन्ते अस्या^ ज्ञातयꣳ- पति र्बन्धेषु बध्यते।।

卐 परा देहि शामुल्यं- ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्व्या- जाया विशते पतिम्।।

卐 अश्रीरा तनूर्भवति- रुशती पापयाऽमुया। पति र्यद्वध्वो3(ओ) वाससा-1 स्वमङ्ग मभिधित्सते।।

❀08.03.26 卐ये वध्व श्चन्द्रं वहतुँ- यक्ष्मा^ यन्ति जना दनु। पुन~ स्ता न्यज्ञिया-^ देवा^ नयन्तु यत^ आगताः।।

卐 मा विद न्परिपन्थिनो- य आसीदन्ति दम्पती~। सुगेभि र्दुर्ग मतीता- मप द्रान्त्वरातयः।।

卐 सुमङ्गली रियँ वधू- रिमां समेत पश्यत। सौभाग्य मस्यै दत्त्वाया-ऽथास्तँ वि परेतन।।

卐 तृष्ट मेत त्कटुक मेत- दपाष्ठव द्विषव न्नैत दत्तवे। सूर्याँ यो ब्रह्मा विद्या- त्स इद्वाधूय मर्हति।।

卐 आशसनँ विशसन- मथो~ अधिविकर्तनम्। सूर्यायाꣳ पश्य रूपाणि- तानि ब्रह्मा तु शुन्धति।।

❀08.03.27 卐गृभ्णामि ते सौभगत्वाय हस्तं- मया पत्या जरदष्टि र्यथासः। भगो अर्यमा सविता पुरन्धि- र्मह्य न्त्वादु र्गार्हपत्याय देवाः।।

卐 तां पूषञ्छिवतमा मेरयस्व- यस्यां बीजं मनुष्या3(आ) वपन्ति। या न ऊरू~ उशती विश्रयाते-यस्या मुशन्तꣳ प्रहराम शेपम्।।

卐 तुभ्य मग्रे पर्यवह- न्त्सूर्याँ वहतुना सह। पुनꣳ~ पतिभ्यो जायान्दा^- अग्ने प्रजया सह।।

卐 पुनꣳ~ पत्नी मग्नि रदा- दायुषा सह वर्चसा। दीर्घायु रस्या यꣳ पति- र्जीवाति शरद श्शतम्।।

卐 सोमः प्रथमो विविदे- गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पति -स्तुरीयस्ते मनुष्यजाः।।

❀08.03.28 卐सोमो दद द्गन्धर्वाय- गन्धर्वो दद दग्नये। रयिञ्च पुत्राँश्चादा द-ऽग्नि र्मह्य मथो~ इमाम्।।

卐 इहैव स्तं मा वि यौष्टं- विश्वमायु र्व्यश्नुतम्। क्रीळन्तौ पुत्रै र्नप्तृभि- र्मोदमानौ स्वे गृहे।।

卐 आ नः प्रजाञ्जनयतु प्रजापति- राजरसाय समन त्तवर्यमा। अदुर्मङ्गलीः पतिलोक मा विश- शन्नो भव द्विपदे शञ्चतुष्पदे।।

卐 अघोरचक्षु रपतिघ्न्येधि- शिवा पशुभ्य स्सुमना स्सुवर्चाः। वीरसू र्देवकामा स्योना- शन्नो भव द्विपदे शञ्चतुष्पदे।।

卐 इमा न्त्वमिन्द्र मीढ्व- स्सुपुत्रां सुभगाङ्कृणु। दशास्यां पुत्राना धेहि- पति मेकादशङ्कृधि।।

卐 सम्राज्ञी श्वशुरे भव- सम्राज्ञी श्वश्र्वां भव। ननान्दरि सम्राज्ञी- भव सम्राज्ञी अधि देवृषु।।

卐 समञ्जन्तु विश्वे देवा- स्समापो हृदयानि नौ। सं मातरिश्वा सन्धाता- समु देष्ट्री दधातु नौ।।

✡।। अथ परिशिष्टम्।।

卐 अविधवा भव वर्षाणि- शतं साग्रन्तु सव्रता। तेजस्वी च यशस्वी च -धर्मपत्नी पतिव्रता।।

卐 जनय द्बहुपुत्राणि- मा च दुःखं लभे त्क्वचित्। भर्ता ते सोमपा नित्यं- भवे द्धर्मपरायणः।।

卐 अष्टपुत्रा भव त्वञ्च- सुभगा च पतिव्रता। भर्तुश्चैव पितु र्भ्रातु- र्हृदयानन्दिनी सदा।।

卐 इन्द्रस्य तु यथेन्द्राणी- श्रीधरस्य यथा श्रिया। शङ्करस्य यथा गौरी- तद्भर्तु रपि भर्तरि।।

卐 अत्रे र्यथानुसूया स्या -द्वसिष्ठस्याप्यरुन्धती। कौशिकस्य यथा सती- तथा त्वमपि भर्तरि।।

卐 ध्रुवैधि पोष्या मयि- मह्य न्त्वाऽदा द्बृहस्पतिः। मया पत्या प्रजावती- सञ्जीव शरद श्शतम्।। ।। इति परिशिष्टम्।। इति अष्टमाष्टके तृतीयाध्यायः।

## अष्टमाष्टके चतुर्थाध्यायः (वर्गाः 1-31)

10.86 वि हि सोतोरिति त्रयोविंशत्यृचस्य सूक्तस्य, आद्याऽष्टम्येकादशी द्वादशी चतुर्दशीनामेकोनविंश्यादि चतसृणां चेन्द्रऋषिः, सप्तमी त्रयोदशी त्रयोविंशीनामैन्द्रोवृषाकपिर्ऋषिः, शिष्टानामेकादशर्चामिन्द्राणी ऋषिका, इन्द्रः पङ्क्तिः। (अत्र यस्य वाक्यमिति परिभाषां स्वीकृत्य, इन्द्रेन्द्राणी वृषाकपीनां विभागशो देवता त्वं केचिन्मन्यन्ते तद्भाष्यकारादि विरुद्धं)।

❀08.04.01 卐वि हि सोतो रसृक्षत- नेन्द्र न्देव ममंसत। यत्रामद द्वृषाकपि -रर्यः पुष्टेषु मत्सखा- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 परा हीन्द्र धावसि- वृषाकपे रति व्यथिः। नो~ अह प्रविन्दस्य-ऽन्यत्र सोमपीतये- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 किमय न्त्वाँ वृषाकपि- श्चकार हरितो मृगः। यस्मा इरस्यसीदु -न्व1(अ)र्यो वा पुष्टिमद्वसु- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 यमिमन्त्वँ वृषाकपिं- प्रियमिन्द्राभिरक्षसि। श्वा न्वस्य जम्भिष- दपि कर्णे वराहयु- विंश्वस्मा दिन्द्र^ उत्तरः।।

卐 प्रिया तष्टानि मे कपि- र्व्यक्ता व्यदूदुषत्। शिरो न्वस्य राविष-न्न सुग न्दुष्कृते भुवँ- विश्वस्मा दिन्द्र^ उत्तरः।।

❀08.04.02 卐न मत्स्त्री सुभसत्तरा- न सुयाशुतरा भुवत्। न मत्प्रतिच्यवीयसी- न सक्थ्युद्यमीयसी - विश्वस्मा दिन्द्र^ उत्तरः।।

卐 उवे अम्ब सुलाभिके- यथेवाङ्ग भविष्यति। भसन्मे अम्ब सक्थि मे- शिरो मे वीव हृष्यति- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 किं सुबाहो~ स्वङ्गुरे- पृथुष्टो~ पृथुजाघने। किं शूरपत्नि नस्त्व- मभ्यमीषि वृषाकपिं -विश्वस्मा दिन्द्र^ उत्तरः।।

卐 अवीरामिव मामयं- शरारु रभि मन्यते। उताह मस्मि वीरिणी-न्द्रपत्नी मरुत्सखा- विश्वस्मा दिन्द्र^ उत्तरः ।।

卐 संहोत्रं स्म पुरा नारी- समनँ वाव गच्छति। वेधा^ ऋतस्य वीरिणी-न्द्रपत्नी महीयते- विश्वस्मा दिन्द्र^ उत्तरः।।

❀08.04.03 卐इन्द्राणी मासु नारिषु- सुभगा मह मश्रवम्। नह्यस्या^ अपरञ्चन- जरसा मरते पति- र्विश्वस्मा दिन्द्र^ उत्तरः।।

卐 नाह मिन्द्राणि रारण- सख्यु र्वृषाकपेर् ऋते। यस्ये दमप्यं हविः- प्रिय न्देवेषु गच्छति- विश्वस्मा दिन्द्र^ उत्तरः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 वृषाकपायि रेवति- सुपुत्र आदु सुस्नुषे। घसत्त इन्द्र^ उक्षण॰- प्रियङ्काचित्करं हवि- र्विश्वस्मा दिन्द्र^ उत्तरः।।

卐 उक्ष्णो हि मे पञ्चदश- साकं पचन्ति विंशतिम्। उताहमद्मि पीव^- इदुभा कुक्षी पृणन्ति मे- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 वृषभो न तिग्मश्रृङ्गो-ऽन्त यूथेषु रोरुवत्। मन्थस्त इन्द्र शं हृदे- यन्ते सुनोति भावयु- र्विश्वस्मा दिन्द्र^ उत्तरः।।

❀08.04.04 卐न सेशे यस्य रम्बते-ऽन्तरा सक्थ्या3(आ)कपृत्। सेदीशे यस्य रोमश- न्निषेदुषो विजृम्भते- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 न सेशे यस्य रोमश- न्निषेदुषो विजृम्भते। सेदीशे यस्य रम्बते-ऽन्तरा सक्थ्या3(आ)कपृ- द्विश्वस्मा दिन्द्र^ उत्तरः।।

卐 अय मिन्द्र वृषाकपि॰- परस्वन्तं हतँ विदत्। असिं सूनान्नवञ्चरु -मादेधस्यान आचितँ- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 अयमेमि विचाकश- द्विचिन्व न्दास मार्यम्। पिबामि पाकसुत्वनो-ऽभि धीर मचाकशँ -विश्वस्मा दिन्द्र^ उत्तरः।।

卐 धन्व च यत्कृन्तत्रञ्च- कति स्वित्ता वि योजना। नेदीयसो वृषाकपे-ऽस्त मेहि गृहा॰ उप -विश्वस्मा दिन्द्र^ उत्तरः ।।

卐 पुन रेहि वृषाकपे- सुविता कल्पयावहै। य^ एष स्वप्ननंशनो-ऽस्त मेषि पथा पुन –र्विश्वस्मा दिन्द्र^ उत्तरः।।

卐 यदुदञ्चो वृषाकपे- गृह मिन्द्राजगन्तन। क्व1(अ)स्य पुल्वघो मृग॰- कमग न्जनयोपनो- विश्वस्मा दिन्द्र^ उत्तरः।।

卐 पर्शुर्ह नाम मानवी- साकं ससूव विंशतिम्। भद्रं भल त्यस्या^ अभू- द्यस्या^ उदर मामय- द्विश्वस्मा दिन्द्र^ उत्तरः।।

10.87 **रक्षोहणमिति पञ्चविंशत्यृचस्य सूक्तस्य, भारद्वाजः पायू रक्षोहाऽग्निस्त्रिष्टुप्, अन्त्याश्चतस्रोऽनुष्टुभः।**

❀08.04.05 卐रक्षोहणँ वाजिन मा जिघर्मि- मित्रं प्रथिष्ठ मुप यामि शर्म। शिशानो अग्निः क्रतुभि स्समिद्ध- स्स नो दिवा स रिषः पातु नक्तम्।।

卐 अयोदंष्ट्रो अर्चिषा यातुधाना- नुप स्पृश जातवेद स्समिद्धः। आ जिह्वया मूरदेवा न्रभस्व- क्रव्यादो वृक्त्व्यऽपि धत्स्वाऽऽसन्न्।।

卐 उभोभयावि न्नुप धेहि दंष्ट्रा- हिंस्र श्शिशानोऽवरं परञ्च। उतान्तरिक्षे परि याहि राज- न्जम्भै स्सन्धेह्यऽभि यातुधानान्।।

卐 यज्ञै रिषू स्सन्नममानो अग्ने- वाचा शल्याँ अशनिभि र्दिहानः। ताभि र्विध्य हृदये यातुधाना- न्प्रतीचो बाहू न्प्रति भङ्ध्येषाम्।।

卐 अग्ने त्वचँ यातुधानस्य भिन्धि- हिंस्राऽशनि र्हरसा हन्त्वेनम्। प्र पर्वाणि जातवेद श्शृणीहि- क्रव्या त्क्रविष्णु र्वि चिनोतु वृक्णम्।।

❀08.04.06 卐यत्रेदानीं पश्यसि जातवेद- स्तिष्ठन्त मग्न उत वा चरन्तम्। यद्वाऽन्तरिक्षे पथिभिः पतन्त- न्तमस्ता विध्य शर्वा शिशानः।।

卐 उतालब्धं स्पृणुहि जातवेद^- आलेभाना दृष्टिभि र्यातुधानात्। अग्ने पूर्वो नि जहि शोशुचान^- आमादः ≈ क्ष्विङ्का स्तमदन्त्वेनीः।।

卐 इह प्र ब्रूहि यतम स्सो अग्ने- यो यातुधानो य^ इदङ्कृणोति। तमा रभस्व समिधा यविष्ठ- नृचक्षस श्चक्षुषे रन्धयैनम्।।

卐 तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं- प्राञ्चँ वसुभ्यः प्रणय प्रचेतः। हिंस्रं रक्षांस्यभि शोशुचानं- मा त्वा दभ न्यातुधाना नृचक्षः।।

卐 नृचक्षा रक्षः परि पश्य विक्षु- तस्य त्रीणि प्रति श्शृणीह्यग्रा। तस्याग्ने पृष्टी र्हरसा श्शृणीहि- त्रेधा मूलँ यातुधनस्य वृश्च।।

❀08.04.07 卐त्रिर्यातुधानः प्रसितिं न्त -एत्वृतँ यो अग्ने अनृतेन हन्ति। तमर्चिषा स्फूर्जय न्जातवेद- स्समक्ष मेनङ्गृणते नि वृङ्धि।।

卐 तदग्ने चक्षुः प्रति धेहि रेभे- शफाऽऽरुजँ येन पश्यसि यातुधानम्। अथर्ववज्ज्योतिषा दैव्येन- सत्य न्धूर्वन्त मचित न्न्योष।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यदग्ने अद्य मिथुना शपातो- यद्वाच स्तृष्टञ्जनयन्त रेभाः। मन्यो र्मनस श्शरव्या3(आ) जायते- या तया विध्य हृदये यातुधानान्।।

卐 परा श्शृणीहि तपसा यातुधाना- न्पराऽग्ने रक्षो हरसा श्शृणीहि। पराऽर्चिषा मूरदेवाञ्छृणीहि- पराऽसुतृपो अभि शोशुचानः।।

卐 पराऽद्य देवा^ वृजिनं श्शृणन्तु- प्रत्यगेनं शपथा^ यन्तु तृष्टाः। वाचास्तेनं शरव^ ऋच्छन्तु मर्म- न्विश्वस्यैतु प्रसितिँ यातुधानः।।

❀08.04.08 卐यः पौरुषेयेण क्रविषा समङ्क्ते- यो अश्व्येन पशुना यातुधानः। यो अघ्न्याया भरति क्षीर मग्ने- तेषां शीर्षाणि हरसाऽपि वृश्च।।

卐 सँवत्सरीणं पय^ उस्रियाया- स्तस्य माऽऽशी द्यातुधानो नृचक्षः। पीयूष मग्ने यतम स्तितृप्सा-त्तं प्रत्यञ्च मर्चिषा विध्य मर्मन्न्।।

卐 विषङ्गवाँ यातुधानाः पिबन्त्वा-ऽऽ वृश्च्यन्ता मदितये दुरेवाः। परैना न्देव स्सविता ददातु- परा भाग मोषधीनाञ्जयन्ताम्।।

卐 सनादग्ने मृणसि यातुधाना-न्न त्वा रक्षांसि पृतनासु जिग्युः। अनु दह सहमूरा न्क्रव्यादो- मा ते हेत्या^ मुक्षत दैव्यायाः।।

卐 त्वन्नो अग्ने अधरा दुदक्ता- त्त्वं पश्चा दुत रक्षा पुरस्तात्। प्रति ते ते अजरास स्तपिष्ठा^- अघशंसं शोशुचतो दहन्तु।।

❀08.04.09 卐पश्चा त्पुरस्ता दधरा दुदक्ता- त्कविः काव्येन परि पाहि राजन्न्। सखे सखाय मजरो जरिम्णे-ऽग्ने मर्ताः अमर्त्य स्त्वन्नः।।

卐 परि त्वाऽग्ने पुरँ वयँ- विप्रं सहस्य धीमहि। धृषद्वर्ण न्दिवेदिवे- हन्तारं भङ्गुरावताम्।।

卐 विषेण भङ्गुरावतः- प्रति ष्म रक्षसो दह। अग्ने तिग्मेन शोचिषा- तपुरग्राभिर् ऋष्टिभिः।।

卐 प्रत्यग्ने मिथुना दह- यातुधाना किमीदिना। सन्त्वा शिशामि जागृह्य-ऽदब्धँ विप्र मन्मभिः।।

卐 प्रत्यग्ने हरसा हर- श्शृणीहि विश्वतः प्रति। यातुधानस्य रक्षसो- बलँ वि रुज वीर्यम्।।

10.88 हविष्पान्तमित्येकोनविंशत्यृचस्य सूक्तस्याऽऽङ्गिरसो मूर्धन्वान्त्सूर्य वैश्वानरौ त्रिष्टुप्। (मरीचिः- हविष्पान्तं द्विदैवत्यं सौर्यं वैश्वानरीयकमिति द्वे देवते अत्र। तेन सूर्यवैश्वानर इत्यदग्नेर्गुण इति वदन्तः परास्ताः)।

❀08.04.10 卐हविष्पान्त मजरं स्वर्विदि- दिविस्पृश्याऽऽहुतञ्जुष्ट म.ग्नौ। तस्य भर्मणे भुवनाय देवा- धर्मणे कं स्वधया पप्रथन्त।।

卐 गीर्णं भुवन न्तमसापगूळ्ह- माविः स्स्वरभव ज्जाते अग्नौ। तस्य देवाः पृथिवी द्यौ रुताऽऽपो-ऽरणय न्नोषधी स्सख्ये अस्य।।

卐 देवेभि र्न्विषितो यज्ञियेभि- रग्निं स्तोषाण्यजरं बृहन्तम्। यो भानुना पृथिवीन्द्या मुतेमा- ऽऽमाततान रोदसी अन्तरिक्षम्।।

卐 यो होतासीत्प्रथमो देवजुष्टो- यं समाञ्ज न्नाज्येना वृणानाः। स पतत्रीत्वरं स्था जगद्य-च्छ्वात्र मग्नि रकृणो ज्जातवेदाः।।

卐 यज्जातवेदो भुवनस्य मूर्धन्न-तिष्ठो अग्ने सह रोचनेन। तन्त्वाहेम मतिभि र्गीर्भि रुक्थैः- स्स यज्ञियो अभवो रोदसिप्राः।।

❀08.04.11 卐मूर्धा भुवो भवति नक्त मग्नि- स्तत स्सूर्यो जायते प्रात रुद्यन्न्। मायामू तु यज्ञियाना मेता- मपो यत्तूर्णि श्चरति प्रजानन्न्।।

卐 दृशेन्यो यो महिना समिद्धो-ऽरोचत दिवियोनि र्विभावा। तस्मिन्नऽग्नौ सूक्तवाकेन देवा- हवि र्विश्व आऽजुहवु स्तनूपाः।।

卐 सूक्तवाकं प्रथम मादि दग्नि- मादि द्धवि रजनयन्त देवाः। स एषाँ यज्ञो अभव त्तनूपाऽ स्तन्द्यौ र्वेद तं पृथिवी तमापः।।

卐 यन्देवासोऽजनयन्ताग्निँ- यस्मि न्नाजुहवु र्भुवनानि विश्वा। सो अर्चिषा पृथिवी न्द्या मुतेमा- मृजूयमानो अतप न्महित्वा।।

卐 स्तोमेन हि दिवि देवासो अग्नि- मजीजनञ्छक्तिभी रोदसिप्राम्। तमू अकृण्व न्त्रेधा भुवे कं- स ओषधीः पचति विश्वरूपाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

❀08.04.12 卐यदेदेन मदधु र्यज्ञियासो- दिवि देवा स्सूर्य मादितेयम्। यदा चरिष्णू~ मिथुना वभूता.- मादि त्प्रापश्य न्भुवनानि विश्वा॥

卐 विश्वस्मा अग्निं भुवनाय देवा^- वैश्वानरङ्केतु मह्ना मऽकृण्वन्न्। आ य स्ततानोषसो विभाती- रपो~ ऊर्णोति तमो अर्चिषा यन्न्॥

卐 वैश्वानरङ्कवयो यज्ञियासो-ऽग्नि न्देवा^ अजनयन्नजुर्यम्। नक्षत्रं प्रत्न ममिन च्चरिष्णु- यक्षस्याऽध्यक्ष न्तविषं बृहन्तम्॥

卐 वैश्वानरँ विश्वहा दीदिवांसं- मन्त्रै रग्निङ्कवि मच्छा वदामः। यो महिम्ना परिबभूवोर्वी~- उतावस्ता दुत देवꣳ परस्तात्॥

卐 द्वे~ स्रुती~ अश्रृणवं पितृणा- मह न्देवाना मुत मर्त्यानाम्। ताभ्या मिदँ विश्व मेज त्समेति- यदन्तरा पितरं मातरञ्च॥

❀08.04.13 卐द्वे~ समीची~ बिभृत श्चरन्तं- शीर्षतो जातं मनसा विमृष्टम्। स प्रत्यङ्विश्वा भुवनानि तस्था- वप्रयुच्छ न्तरणि र्भ्राजमानः॥

卐 यत्रा वदेते~ अवरꣳ परश्च- यज्ञन्योꣳ कतरो नौ वि वेद। आ शेकु रित्सधमादं सखायो- नक्षन्त यज्ञङ्^ इदँ विवोचत्॥

卐 कत्यग्नयꣳ कति सूर्यासꣳ- कत्युषासꣳ कत्यु स्विदापः। नोपस्विजँ वꣳ पितरो वदामि- पृच्छामि वꣳ कवयो विद्मने कम्॥

卐 यावन्मात्र मुषसो न प्रतीकं- सुपर्ण्यो3(ओ) वसते मातरिश्वः। ताव द्दधात्युप यज्ञ माय- न्ब्राह्मणो होतु रवरो निषीदन्न्॥

☸ 10.89 **इन्द्रं स्तवेत्यष्टादशर्चस्य सूक्तस्य, वैश्वामित्रो रेणुरिन्द्रः, पञ्चम्या इन्द्रासोमौ त्रिष्टुप्।**

❀08.04.14 卐इन्द्रं स्तवा नृतमँ यस्य मह्ना- विबबाधे रोचना वि ज्मो अन्तान्। आ यꣳ पप्रौ चर्षणीधृ द्वरोभिꣳ- प्र सिन्धुभ्यो रिरिचानो महित्वा॥

卐 स सूर्यꣳ पर्युरू वरांस्ये-न्द्रो ववृत्या द्रथ्येव चक्रा। अतिष्ठन्त मपस्य1(अ)न्न सर्ग-ङ्कृष्णा तमांसि त्विष्या जघान।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 समान मस्मा अनपावृ दर्च- क्ष्मया दिवो असमं ब्रह्म नव्यम्। वि यः पृष्ठेव जनिमा न्यर्य- इन्द्र श्चिकाय न सखाय मीषे।।

卐 इन्द्राय गिरो अनिशितसर्गा- अपः प्रेरयं सगरस्य बुध्नात्। यो अक्षेणेव चक्रिया शचीभि- र्विष्वक्तस्तम्भ पृथिवी मुत द्याम्।।

卐 आपान्तमन्यु स्तृपलप्रभर्मा- धुनि शिमीवाञ्छरुमाꣳ ऋजीषी। सोमो विश्वा न्यतसा वनानि- नार्वा गिन्द्रं प्रतिमानानि देभुः।।

❀08.04.15 卐न यस्य द्यावापृथिवी~ न धन्व- नाऽन्तरिक्ष न्नाद्रय स्सोमो अक्षाः~। यदस्य मन्यु रधिनीयमान- श्शृणाति वीळु रुजति स्थिराणि।।

卐 जघान वृत्रं स्वधिति र्वनेव- रुरोज पुरो अरदन्न सिन्धून्। बिभेद गिरिन्नवमिन्न कुम्भ- मा गा इन्द्रो अकृणुत स्वयुग्भिः।।

卐 त्वं ह त्यदृणया इन्द्र धीरो-ऽसि र्न पर्व वृजिना श्रृणासि। प्र ये मित्रस्य वरुणस्य धाम- युजन्न जना मिनन्ति मित्रम्।।

卐 प्र ये मित्रं प्रार्यमण न्दुरेवाः- प्र सङ्गिरः प्र वरुणं मिनन्ति। न्य1(अ)मित्रेषु वधमिन्द्र तुम्रँ- वृष न्वृषाण मरुषं शिशीहि।।

卐 इन्द्रो दिव इन्द्र ईशे पृथिव्या- इन्द्रो अपा मिन्द्र इत्पर्वतानाम्। इन्द्रो वृधा मिन्द्र इन्मेधिराणा- मिन्द्रः≈क्षेमे योगे हव्य इन्द्रः।।

❀08.04.16 卐प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः- प्राऽन्तरिक्षा त्प्रसमुद्रस्य धासेः। प्र वातस्य प्रथसः प्र ज्मो अन्ता- त्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः।।

卐 प्र शोशुचत्या उषसो न केतु- रसिन्वा ते वर्तता मिन्द्र हेतिः। अश्मेव विध्य दिव आ सृजान- स्तपिष्ठेन हेषसा द्रोघमित्रान्।।

卐 अन्वह मासा अन्विद्वना- न्यन्वोषधी रनु पर्वतासः। अन्विन्द्रं रोदसी वावशाने~- अन्वापो अजिहत जायमानम्।।

卐 कर्हि स्वित्सात इन्द्र चेत्यास- दघस्य यद्भिनदो रक्ष एषत्। मित्रक्रुवो यच्छसने न गावः- पृथिव्या आपृ गमुया शयन्ते।।

卐 शत्रूयन्तो अभि ये न स्ततस्रे- महि व्राधन्त^ ओघनास^ इन्द्र। अन्धेनामित्रा स्तमसा सचन्तां- सुज्योतिषो अक्तव स्ता९ अभि ष्युः~।।

卐 पुरूणि हि त्वा सवना जनानां- ब्रह्माणि मन्द न्गृणता मृषीणाम्। इमा माघोषन्नवसा सहूतिं- न्तिरो विश्वा९ अर्चतो याह्यर्वाङ्।।

卐 एवा ते वय मिन्द्र भुञ्जतीनाँ- विद्याम सुमतीनान्नवानाम्। विद्याम वस्तो रवसा गृणन्तो- विश्वामित्रा^ उत त इन्द्र नूनम्।।

卐 शुनं हुवेम मघवान मिन्द्र- मऽस्मिन्भरे नृतमँ वाजसातौ। शृण्वन्त मुग्र मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित न्धनानाम्।।

10.90 **सहस्रशीर्षेति षोळशर्चस्य सूक्तस्य, नारायणः पुरुषोऽनुष्टुबन्त्या त्रिष्टुप्।**

❀08.04.17 卐सहस्रशीर्षा पुरुष- स्सहस्राक्ष स्सहस्रपात्। स भूमिँ विश्वतो वृत्वा-ऽत्यतिष्ठ द्दशाङ्गुलम्।।

卐 पुरुष एवेदं सर्वँ- यद्भूतँ यच्च भव्यम्। उतामृतत्व स्येशानो –यदन्नेनातिरोहति।।

卐 एतावानस्य महिमा ऽतोज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि- त्रिपादस्यामृत न्दिवि।।

卐 त्रिपा दूर्ध्व उदैत्पुरुषᳵ- पादोऽस्येहाभवत्पुनः~। ततो विष्वङ्व्यक्राम -त्साशनानशने~ अभि।।

卐 तस्मा द्विराळजायत- विराजो अधि पूरुषः। स जातो अत्यरिच्यत~ पश्चा द्भूमि मथो~ पुरः।।

❀08.04.18 卐यत्पुरुषेण हविषा- देवा^ यज्ञ मतन्वत। वसन्तो अस्यासीदाज्य- ङ्ग्रीष्म^ इध्म श्शरद्धविः।।

卐 तँ यज्ञं बर्हिषि प्रौक्ष- न्पुरुषञ्जात मग्रतः। तेन देवा^ अयजन्त- साध्या^ ऋषयश्च ये।।

卐 तस्माद्यज्ञा त्सर्वहुत- स्सम्भृतं पृषदाज्यम्। पशूँन्ताँश्चक्रे वायव्याना-ऽऽरण्यान्ग्राम्याश्च ये।।

卐 तस्माद्यज्ञा त्सर्वहुत^-ऋच स्सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्मा- द्यजु स्तस्मा दजायत।।

卐 तस्मा दश्वा^ अजायन्त- ये के चोभयादतः। गावो ह जज्ञिरे तस्मा- त्तस्मा ज्जाता^ अजावयः।।

❀08.04.19 卐यत्पुरुषँ व्यदधुᳵ- कतिधा व्यकल्पयन्न्। मुखङ्किमस्य कौ बाहू~ का ऊरू~ पादा उच्येते~।।

卐 ब्राह्मणोस्य मुख मासी- द्बाहू~ राजन्यᳵ कृतः। ऊरू~ तदस्य यद्वैश्यᳵ- पद्भ्यां शूद्रो अजायत।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 चन्द्रमा मनसो जात- श्चक्षो स्सूर्यो अजायत। मुखा दिन्द्र श्चाग्निश्च- प्राणा द्वायु रजायत।।

卐 नाभ्या आसी दन्तरिक्षं- शीर्ष्णो द्यौ स्समऽवर्तत। पद्भ्यां भूमि र्दिश श्श्रोत्रा- त्तथा लोकाऽ अकल्पयन्न्।।

卐 सप्तास्यास न्परिधय- स्त्रिस्सप्त समिधः कृताः। देवा यद्यज्ञ न्तन्वाना- अबध्न न्पुरुषं पशुम्।।

卐 यज्ञेन यज्ञ मयजन्त देवा- स्तानि धर्माणि प्रथमा न्यासन्न्। ते ह नाकं महिमान स्सचन्त- यत्र पूर्वे साध्या स्सन्ति देवाः।।

10.91 सं जागृवद्भिरिति पञ्चदशर्चस्य सूक्तस्य, वैतहव्योऽरुणोऽग्निर्जगत्यन्त्या त्रिष्टुप्।

❀08.04.20 卐सञ्जागृवद्भि र्जरमाण इध्यते- दमे दमूना इषयन्निळस्पदे। विश्वस्य होता हविषो वरेण्यो- विभुर्विभावा सुषखा सखीयते।।

卐 स दर्शतश्री रतिथि र्गृहेगृहे- वनेवने शिश्रिये तक्ववीरिव। जनञ्जनञ्जन्यो नाति मन्यते- विश आ क्षेति विश्यो3(ओ) विशँविशम्।।

卐 सुदक्षो दक्षैः क्रतुनाऽसि सुक्रतु- रग्ने कविः काव्येनासि विश्ववित्। वसु र्वसूनाङ्क्षयसि त्वमेक- इद्यावा च यानि पृथिवी~ च पुष्यतः।।

卐 प्रजानन्नग्ने तव योनि मृत्विय- मिळायास्पदे घृतवन्त मासदः। आ ते चिकित्र उषसामिवेतयो-ऽरेपस स्सूर्यस्येव रश्मयः।।

卐 तव श्रियो वर्ष्यस्येव विद्युत- श्चित्रा श्चिकित्र उषसान्न केतवः। यदोषधी रभिसृष्टो वनानि च- परि स्वयञ्चिनुषे अन्न मास्ये।।

❀08.04.21 卐तमोषधी र्दधिरे गर्भ मृत्विय- न्तमापो अग्निञ्जनयन्त मातरः। तमित्समानँ वनिनश्च वीरुधो-ऽन्तर्वतीश्च सुवते च विश्वहा।।

卐 वातोपधूत इषितो वशाऽ अनु- तृषु यदन्ना वेविष द्वितिष्ठसे। आ ते यतन्ते रथ्यो3(ओ) यथा पृथ- क्शर्धांस्यग्ने अजराणि धक्षतः।।

卐 मेधाकारँ विदथस्य प्रसाधन- मग्निं होतारं परिभूतमं मतिम्। तमिदर्भे हविष्या समान- मि-त्तमि न्महे वृणते नान्यन्त्वत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 त्वामि दत्रे वृणते त्वायवो- होतार मग्ने विदथेषु वेधसः। यद्देवयन्तो दधति प्रयांसि ते- हविष्मन्तो मनवो वृक्तबर्हिषः।।

卐 तवाग्ने होत्र न्तव पोत्र मृत्विय- न्तव नेष्ट्र न्त्वमग्नि दृतायतः। तव प्रशास्त्र न्त्वमध्वरीयसि- ब्रह्मा चासि गृहपतिश्च नो दमे।।

❀08.04.21 卐यस्तुभ्य मग्ने अमृताय मर्त्य- स्समिधा दाश दुत वा हविष्कृति। तस्य होता भवसि यासि दूत्य1(अ)-मुप ब्रूषे यजस्यध्वरीयसि।।

卐 इमा^ अस्मै मतयो वाचो अस्मदाँ- ऋचो गिर स्सुष्टुतय स्समग्मत। वसूयवो वसवे जातवेदसे- वृद्धासु चिद्वर्धनो यासु चाकनत्।।

卐 इमां प्रत्नाय सुष्टुतिन्नवीयसीँ- वोचेय मस्मा उशते शृणोतु नः। भूया^ अन्तरा हृद्यस्य निस्पृशे- जायेव पत्य उशती सुवासाः।।

卐 यस्मिन्नश्वास^ ऋषभास^ उक्षणो- वशा^ मेषा^ अवसृष्टास^ आहुताः। कीलालपे सोमपृष्ठाय वेधसे- हृदा मतिञ्जनये चारु मग्नये।।

卐 अहाव्यग्ने हवि रास्ये ते- स्रुचीव घृतञ्चम्वीव सोमः। वाजसनिं रयि मस्मेसुवीरं- प्रशस्त न्धेहि यशसं बृहन्तम्।।

10.92 यज्ञस्येति पञ्चदशर्चस्य सूक्तस्य, मानवः शार्यातो विश्वेदेवा जगती।

❀08.04.23 卐यज्ञस्य वो रथ्यँ विश्पतिँ विशां- होतार मक्तो रतिथिँ विभावसुम्। शोचञ्छुष्कासु हरिणीषु जर्भुर- द्वृषा केतुर्यजतो द्यामशायत।।

卐 इम मञ्जस्पा मुभये अकृण्वत- धर्माण मग्निँ विदथस्य साधनम्। अक्तुन्न यह्व मुषसः पुरोहित- न्तनूनपात मरुषस्य निंसते।।

卐 बळस्य नीथा वि पणेश्च मन्महे- वया^ अस्य प्रहुता^ आसु रत्तवे। यदा घोरासो अमृतत्व माशता- ऽऽदिज्जनस्य दैव्यस्य चर्किरन्न्।।

卐 ऋतस्य हि प्रसितिर्द्यौ रुरु व्यचो- नमो मह्य1(अ)रमतिः पनीयसी। इन्द्रो मित्रो वरुण स्सञ्चिकित्रिरे-ऽथो~ भग स्सविता पूतदक्षसः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 प्र रुद्रेण ययिना यन्ति सिन्धव- स्तिरो मही.मरमति न्दधन्विरे। येभिः परिज्मा परियन्नुरु ज्रयो- वि रोरुवज्जठरे विश्व मुक्षते।।

❀08.04.24 卐क्राणा^ रुद्रा^ मरुतो विश्वकृष्टयो- दिवश्श्येनासो असुरस्य नीळयः। तेभिश्चष्टे वरुणो मित्रो अर्यमे-न्द्रो देवेभि र्वशेभि र्वशः।।

卐 इन्द्रे भुजं शशमानास^ आशत- सूरो दृशीके वृषणश्च पौंस्ये। प्र ये न्वस्यार्हणा ततक्षिरे- युजँ वज्र न्नृषदनेषु कारवः।।

卐 सूरश्चिदा हरितो अस्य रीरम- दिन्द्रादा कश्चिद्भयते तवीयसः। भीमस्य वृष्णो जठरा दभिश्वसो- दिवेदिवे सहुरिस्स्तन्नबाधितः।।

卐 स्तोमँ वो अद्य रुद्राय शिक्वसे- क्षयद्वीराय नमसा दिदिष्टन। येभिश्शिव स्स्ववाँ एवयावभि- र्दिव स्सिषक्ति स्वयशा निकामभिः।।

卐 ते हि प्रजाया^ अभरन्त वि श्रवो- बृहस्पति र्वृषभ स्सोमजामयः। यज्ञै रथर्वा प्रथमो वि धारय- द्देवा दक्षै र्भृगव स्सञ्चिकित्रिरे।।

❀08.04.25 卐ते हि द्यावापृथिवी~ भूरिरेतसा- नराशंस श्चतुरङ्गो यमोऽदितिः। देवस्त्वष्टा द्रविणोदा^ ऋभुक्षणः- प्र रोदसी~ मरुतो विष्णु रर्हिरे।।

卐 उत स्य न^ उशिजा मुर्विया कवि- रहिश्शृणोतु बुध्न्यो3(ओ) हवीमनि। सूर्यामासा विचरन्ता दिविक्षिता- धिया शमीनहुषी~ अस्य बोधतम्।।

卐 प्र नः पूषा चरथँ विश्वदेव्यो-ऽपान्नपा दवतु वायु रिष्टये। आत्मानँ वस्यो अभि वात मर्चत- तदश्विना सुहवा यामनि श्रुतम्।।

卐 विशा मासा मभयाना मधिक्षित-ङ्गीर्भिरु स्वयशस.ङ्गृणीमसि। ग्नाभि र्विश्वाभि रदिति मनर्वण- मक्तो र्युवान न्नृमणा अधा पतिम्।।

卐 रेभदत्र जनुषा पूर्वो अङ्गिरा^- ग्रावाण^ ऊर्ध्वा^ अभि चक्षु रध्वरम्। येभि र्विहाया^ अभव द्विचक्षणः- पाथ स्सुमेकं स्वधिति र्वनन्वति।।

10.93 **महीति पञ्चदशर्चस्य सूक्तस्य, पार्थ्यस्तान्वो विश्वेदेवाः प्रस्तारपङ्क्ति र्द्वितीया त्रयोदश्यनुष्टुभौ नवम्यक्षरैः पङ्क्तिरेकादशी न्यङ्कुसारिण्यन्त्या पुरस्ताद्बृहती।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀08.04.26 卐महि द्यावापृथिवी~ भूत मुर्वी~ नारी~ यह्वी~ न रोदसी सदन्नः। तेभिर्नः पातं सह्यस^- एभिर्नः पातं शूषणि।।

卐 यज्ञेयज्ञे स मर्त्यो- देवान्त्सपर्यति। यस्सुम्नै र्दीर्घश्रुत्तम^- आविवासा त्येनान्।।

卐 विश्वेषा मिरज्यवो- देवानाँ वार्महः। विश्वे हि विश्वमहसो- विश्वे यज्ञेषु यज्ञियाः।।

卐 ते घा राजानो अमृतस्य मन्द्रा^- अर्यमा मित्रो वरुणः परिज्मा। कद्रुद्रो नृणां स्तुतो- मरुतः पूषणो भगः।।

卐 उत नो नक्त मपाँ वृषण्वसू~- सूर्यामासा सदनाय सधन्या। सचा य त्साद्येषा- महि र्बुध्नेषु बुध्न्यः।।

❀08.04.27 卐उत नो देवा वश्विना शुभस्पती~- धामभि र्मित्रावरुणा उरुष्यताम्। महस्स राय एषते-ऽति धन्वेव दुरिता।।

卐 उत नो रुद्रा चिन्मृळता मश्विना- विश्वे देवासो रथस्पति र्भगः। ऋभु र्वाज^ ऋभुक्षणः- परिज्मा विश्ववेदसः।।

卐 ऋभुर् ऋभुक्षा^ ऋभु र्विधतो- मद आ ते हरी~ जूजुवानस्य वाजिना। दुष्टरँ यस्य साम -चिदृध ग्यज्ञो न मानुषः।।

卐 कृधी नो अह्रयो देव सवित~- स्स च स्तुषे मघोनाम्। सहो~ न^ इन्द्रो वह्निभि र्न्येषा-ञ्चर्षणीनाञ्चक्रं रश्मिन्न योयुवे।।

卐 ऐषु द्यावापृथिवी~ धातं मह -दस्मे वीरेषु विश्वचर्षणि श्रवः। पृक्षँ वाजस्य सातये- पृक्षं रायोत तुर्वणे।।

❀08.04.28 卐एतं शंस मिन्द्रास्मयुष्ट्व-ङ्कूचि त्सन्तं सहसावन्नभिष्टये- सदा पाह्यभिष्टये। मेदताँ वेदता वसो~।।

卐 एतं मे स्तोमन्तना न सूर्ये- द्युतद्यामानँ वावृधन्त नृणाम्। सँवननन्नाश्व्य -न्तष्टे.वानपच्युतम्।।

卐 वावर्त येषां राया- युक्तैषां हिरण्ययी। नेमधिता न पौंस्या- वृथेव विष्टान्ता।।

卐 प्र तद्दुश्शीमे पृथवाने वेने- प्र रामे वोच मसुरे मघवत्सु। ये युक्त्वाय पञ्च शता-ऽस्मयु पथा विश्राव्येषाम्।।

卐 अधीन्न्वत्र सप्ततिञ्च सप्त च। सद्यो दिदिष्ट तान्व- स्सद्यो दिदिष्ट पार्थ्य- स्सद्यो दिदिष्ट मायवः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

☬ 10.94 प्रैत इति चतुर्दशर्चस्य सूक्तस्य, काद्रवेयोऽर्बुदः सर्पो ग्रावाणो जगती, पञ्चमी सप्तमी चर्तुदश्यस्त्रिष्टुभः।

❀08.04.29 卐प्रैते वदन्तु प्र वयँ वदाम- ग्रावभ्यो वाचँ वदता वदद्भ्यः। यदद्रयः पर्वता स्साक माशव- श्श्लोकङ्घोषं भरथेन्द्राय सोमिनः।।

卐 एते वदन्ति शतव त्सहस्रव- दभि क्रन्दन्ति हरितेभि रासभिः। विष्वी ग्रावाण स्सुकृत स्सुकृत्यया- होतुश्चि त्पूर्वे हविरद्य माशत।।

卐 एते वदन्त्यविदन्नना मधु- न्यूङ्खयन्ते अधि पक्व आमिषि। वृक्षस्य शाखा मरुणस्य बप्सत- स्ते सूभर्वा वृषभाः प्रेमराविषुः।।

卐 बृह द्वदन्ति मदिरेण मन्दि-नेन्द्रङ्क्रोशन्तोऽविदन्नना मधु। संरभ्या धीरा स्स्वसृभि रनर्तिषु- राघोषयन्तः पृथिवी मुपब्दिभिः।।

卐 सुपर्णा वाच मक्रतोप द्य-व्याखरे कृष्णा इषिरा अनर्तिषुः। न्य1(अ)ङ्नि यन्त्युपरस्य निष्कृतं- पुरू रेतो दधिरे सूर्यश्वितः।।

❀08.04.30 卐उग्राइव प्रवहन्त स्समायमु- स्साकँ युक्ता वृषणो बिभ्रतो धुरः। यच्छ्वसन्तो जग्रसाना अराविषु- श्श्रृण्व एषां प्रोथथो अर्वतामिव।।

卐 दशावनिभ्यो दशकक्ष्येभ्यो -दशयोक्त्रेभ्यो दशयोजनेभ्यः। दशाभीशुभ्यो अर्चताजरेभ्यो- दश धुरो दश युक्ता वहद्भ्यः।।

卐 ते अद्रयो दशयन्त्रास आशव- स्तेषामाधानं पर्येति हर्यतम्। त ऊ सुतस्य सोम्यस्यान्धसो-ऽंशोः पीयूषं प्रथमस्य भेजिरे।।

卐 ते सोमादो हरी~ इन्द्रस्य निंसते-ऽंशु न्दुहन्तो अध्यासते गवि। तेभिर्दुग्धं पपिवा न्त्सोम्यं मध्वि -न्द्रो वर्धते प्रथते वृषायते।।

卐 वृषा वो अंशुर्न किला रिषाथने-ळावन्त स्सदमि त्स्थनाशिताः। रैवत्येव महसा चारव स्स्थन- यस्य ग्रावाणो अजुषध्व मध्वरम्।।

❀08.04.31 卐तृदिला अतृदिलासो अद्रयो-ऽश्रमणा अशृथिता अमृत्यवः। अनातुरा अजरा स्स्थाऽमविष्णव- स्सुपीवसो अतृषिता अतृष्णजः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 ध्रुवा^ एव वः पितरो युगेयुगे- क्षेमकामास स्सदसो न युञ्जते। अजुर्यासो हरिषाचो हरिद्रव^- आ द्यां रवेण पृथिवी मशुश्रवुः।।

卐 तदिद्वदन्त्यद्रयो विमोचने- यामन्नञ्जस्पाइव घेदुपब्दिभिः। वपन्तो बीजमिव धान्याकृतः- पृञ्चन्ति सोमन्न मिनन्ति बप्सतः।।

卐 सुते अध्वरे अधि वाच मक्रता-क्रीळयो न मातर न्तुदन्तः। वि षू मुञ्चा सुषुवुषो मनीषाँ –वि वर्तन्ता मद्रय श्वायमानाः।। इति चतुर्थाध्यायः

## अष्टमाष्टके पञ्चमाध्यायः (वर्गाः 1-27)

10.95 **हये जाय इत्यष्टादशर्चस्य सूक्तस्य, आद्या तृतीया षष्ठी नवम्यादि चतसृणां चतुर्दशी सप्तदशीत्येवं नवानामैलः पुरूरवा ऋषि रुर्वशी देवता, शिष्टानामुर्वशी ऋषिका पुरूरवा देवता त्रिष्टुप्।**

❀ 08.05.2 卐हये जाये मनसा तिष्ठ घोरे- वचांसि मिश्रा कृणवावहै नु। ननौ मन्त्रा^ अनुदितास^ एते- मयस्कर न्परतरे चनाऽहन्न्।।

卐 किमेता वाचा कृणवा तवाहं- प्राक्रमिष मुषसा मग्रियेव। पुरूरवः पुन रस्तं परेहि- दुरापना वातइवाहमऽस्मि।।

卐 इषुर्न श्रिय इषुधे रसना- गोषा श्शतसा न रंहिः। अवीरे क्रतौ वि दविद्युत-न्नोरा न मायु.श्चितयन्त धुनयः।।

卐 सा वसु दधती श्वशुराय- वय^ उषो यदि वष्ट्यन्तिगृहात्। अस्तन्ननक्षे यस्मिन्चाक- न्दिवा नक्तं श्नथिता वैतसेन।।

卐 त्रिस्स्म माह्न.श्श्नथयो वैतसेनो-त स्म मेऽव्यत्यै पृणासि। पुरूरवोनु ते केतमायं- राजा मे वीर तन्व1(अ)स्तदासीः।।

❀08.05.02 卐या सुजूर्णि श्श्रेणि स्सुम्नआपि- ह्रदेचक्षु र्न ग्रन्थिनी चरण्युः। ता^ अञ्जयोऽरुणयो न सस्रु- श्श्रिये गावो न धेनवोऽनवन्त।।

卐 समस्मिन्जायमान आसत ग्ना^- उतेमवर्धन्नद्य1(अ)स्स्वगूर्ताः। महे यत्त्वा पुरूरवो रणाया-ऽवर्धय न्दस्युहत्याय देवाः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सचा यदासु जहतीष्वत्क –ममानुषीषु मानुषो निषेवे। अप स्म मत्तरसन्ती न भुज्यु- स्ता^ अत्रस न्त्रथस्पृशो नाश्वाः।।

卐 यदासु मर्तो अमृतासु निस्पृ- क्सङ्क्षोणीभिः क्रतुभिर्न पृङ्क्ते। ता^ आतयो न तन्वश्शुम्भत स्वा^- अश्वासो न क्रीळयो दन्दशानाः।।

卐 विद्युन्न या पतन्ती दविद्यो-द्भरन्ती मे अप्या काम्यानि। जनिष्टो~अपो नर्य स्सुजातः- प्रोर्वशी तिरत दीर्घमायुः।।

❀08.05.03 卐जज्ञिष इत्था गोपीथ्याय हि- दधाथ तत्पुरूरवो म ओजः। अशासन्त्वा विदुषी सस्मिन्नहन्न- म आश्रृणोः किमभुग्वदासि।।

卐 कदा सूनुः पितरञ्जात^ इच्छा-च्चक्रन्नाऽश्रु वर्तयद्विजानन्न्। को दम्पती~ समनसा वि यूयो- दध यदऽग्नि श्श्वशुरेषु दीदयत्।।

卐 प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न- क्रन्ददाध्ये शिवायै। प्र तत्ते हिनवा यत्ते अस्मे-परेह्यस्तन्नहि मूर मापः।।

卐 सुदेवो अद्य प्रपदेदनावृ -त्परावतं परमाङ्गन्तवा उ। अधा शयीत निर्ऋते रुपस्थे-ऽधैनं वृका रभसासो अद्युः।।

卐 पुरूरवो मा मृथा^ मा प्र पप्तो- मा त्वा वृकासो अशिवास^ उ क्षन्न्। न वै स्त्रैणानि सख्यानि सन्ति- सालावृकाणां हृदयान्येता।।

❀08.05.04 卐यद्विरूपाऽचरं मर्त्येष्ववसं- रात्री श्शरद श्चतस्रः। घृतस्य स्तोकं सकृदह्न^ आश्ना- न्ता देवेद.न्तातृपाणा चरामि।।

卐 अन्तरिक्षप्रां रजसो विमानी- मुप शिक्षाम्युर्वशीं वसिष्ठः। उप त्वा राति स्सुकृतस्य तिष्ठा-न्नि वर्तस्व हृदय न्तप्यते मे।।

卐 इति त्वा देवा^ इम आहुरैळ- यथेमेत द्भवसि मृत्युबन्धुः। प्रजा ते देवान्हविषा यजाति- स्वर्ग उ त्वमपि मादयासे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

10.96 प्र त इति त्रयोदशर्चस्य सूक्तस्याऽऽङ्गिरसो बरुर्हरिर्जगत्यन्त्ये द्वे त्रिष्टुभौ, (ऐन्द्रः सर्वहरिर्वेषिरत्र । हरिरितीन्द्रनाम। शौनकस्तु मुखत एवैतत्सूक्तमैन्द्रमित्याह। हरिरितीन्द्राश्वनामेति च कश्चित्। एवं हरिशब्दार्थे वि प्रतिपत्तावप्याकरोदित हरिशब्दोच्चारणं युक्तमुत्पश्यामः)।

08.05.05 प्र ते महे विदथे शंसिषं हरी-~ प्र ते वन्वे वनुषो हर्यतं मदम्। घृतन्न यो हरिभि श्चारु सेचत- आ त्वा विशन्तु हरिवर्पसङ्गिरः।।

हरिं हि योनि मभि ये समस्वर-न्हिन्वन्तो हरी~ दिव्यँ यथा सदः। आ यं पृणन्ति हरिभि र्न धेनव^- इन्द्राय शूषं हरिवन्त मर्चत।।

सो अस्य वज्रो हरितो य^ आयसो- हरि र्निकामो हरिरा गभस्त्योः। द्युम्नी सुशिप्रो हरिमन्युसायक^ - इन्द्रे नि रूपा हरिता मिमिक्षिरे।।

दिवि न केतुरधि धायि हर्यतो- विव्यच द्वज्रो हरितो न रंह्या। तुददहिं हरिशिप्रो य^ आयस- स्सहस्रशोका^ अभवद्धरिम्भरः।।

त्वन्त्वं महर्यथा^ उपस्तुतः- पूर्वेभि रिन्द्र हरिकेश यज्वभिः। त्वं हर्यसि तव विश्व मुक्थ्य1(अ)- मसामि राधो हरिजात हर्यतम्।।

08.05.06 ता वज्रिणं मन्दिनं स्तोम्यं मद- इन्द्रं रथे वहतो हर्यता हरी~। पुरूण्यस्मै सवनानि हर्यत- इन्द्राय सोमा^ हरयो दधन्विरे।।

अरङ्कामाय हरयो दधन्विरे- स्थिराय हिन्वन्हरयो हरी~ तुरा। अर्वद्भिर्यो हरिभिर्जोष मीयते- सो अस्य कामं हरिवन्त मानशे।।

हरिश्मशारु र्हरिकेश^ आयस- स्तुरस्पेये यो हरिपा^ अवर्धत। अर्वद्भिर्यो हरिभि र्वाजिनीवसु- रति विश्वा दुरिता पारिषद्धरी।।

स्रुवेव यस्य हरिणी विपेततु- शिप्रे~ वाजाय हरिणी~ दविध्वतः। प्र यत्कृते चमसे मर्मृजद्धरी~- पीत्वा मदस्य हर्यतस्याऽन्धसः।।

उत स्म सद्म हर्यतस्य पस्त्यो3(ओ)-रत्यो न वाजं हरिवा॰ अचिक्रदत्। मही चिद्धि धिषणाहर्य दोजसा- बृह द्वयो दधिषे हर्यत श्चिदा।।

❀08.05.07 卐आ रोदसी हर्यमाणो महित्वा- नव्यन्नव्यं हर्यसि मन्म नु प्रियम्। प्र पस्त्य मसुर हर्यतङ्गो- राऽविष्कृधि हरये सूर्याय।।

卐 आ त्वा हर्यन्तं प्रयुजो जनानां- रथे वहन्तु हरिशिप्र मिन्द्र। पिबा यथा प्रतिभृतस्य मध्वो -हर्यन्यज्ञं सधमादे दशोणिम्।।

卐 अपाः पूर्वेषां हरिव स्सुताना- मथो~ इदं सवनङ्केवलन्ते। ममद्धि सोमं मधुमन्त मिन्द्र- सत्रा वृष न्जठर आ वृषस्व।।

**10.97 या ओषधीरिति त्रयोविंशत्यृचस्य सूक्तस्याऽथर्वणो भिषगोषधयोऽनुष्टुप्।**

❀08.05.08 卐या^ ओषधीः पूर्वा^ जाता^- देवेभ्य स्त्रियुगं पुरा। मनै नु बभ्रूणा महं- शत न्धामानि सप्त च।।

卐 शतँ वो अम्ब धामानि- सहस्र मुत वो रुहः। अधा शतक्रत्वो- यूय मिमं मे अगदङ्कृत।।

卐 ओषधीः प्रति मोदध्वं- पुष्पवतीः प्रसूवरीः। अश्वाइव सजित्वरी- वीरुधः पारयिष्णवः।।

卐 ओषधी रिति मातर- स्तद्वो देवी रुप ब्रुवे। सनेय मश्वङ्गाँ वास^- आत्मान न्तव पूरुष।।

卐 अश्वत्थे वो निषदनं- पर्णे वो वसतिष्कृता। गोभाज^ इत्किलासथ -यत्सनवथ पूरुषम्।।

❀08.05.09 卐यत्रौषधी स्समग्मत- राजान स्समिताविव। विप्र स्स उच्यते भिष- ग्रक्षोहाऽमीवचातनः।।

卐 अश्वावतीं सोमावती-.मूर्जयन्ती मुदोजसम्। आवित्सि सर्वा^ ओषधी- रस्मा अरिष्टतातये।।

卐 उच्छुष्मा^ ओषधीना-ङ्गावो गोष्ठादिवेरते। धनं सनिष्यन्तीना- मात्मान न्तव पूरुष।।

卐 इष्कृति र्नाम वो माता-ऽथो~ यूयं स्थ निष्कृतीः। सीराः पतत्रिणी स्स्थन- यदामयति निष्कृथ।।

卐 अति विश्वाः परिष्ठा- स्स्तेनइव व्रज मक्रमुः। ओषधीः प्राचुच्यवु- र्यत्किञ्च तन्वो3(ओ) रपः।।

❀08.05.10 卐यदिमा^ वाजयन्नह- मोषधी र्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति- पुरा जीवगृभो यथा।।

卐 यस्यौषधीः प्रसर्प-थाऽङ्गमङ्गं परुष्परुः। ततो यक्ष्मँ वि बाधध्व- उग्रो मध्यमशीरिव।।

卐 साकँ यक्ष्म प्र पत- चाषेण किकिदीविना। साकँ वातस्य ध्राज्या- साकन्नश्य निहाकया।।

卐 अन्या वो अन्या मव- त्वन्याऽन्यस्या^ उपावत। ता स्सर्वा स्सँविदाना-^ इदं मे प्रावता वचः।।

卐 याः फलिनीर्या अफला- अपुष्पा यार्श्च पुष्पिणीः। बृहस्पतिप्रसूता- स्ता नो मुञ्चन्त्वंहसः।।

❀08.05.11 卐मुञ्चन्तु मा शपथ्या3(आ)- दथो~ वरुण्या दुत। अथो ~यमस्य पड्बीशा- त्सर्वस्मा द्देवकिल्बिषात्।।

卐 अवपतन्ती रवद- न्दिव ओषधयस्परि। यञ्जीव मश्नवामहै- न स रिष्याति पूरुषः।।

卐 या ओषधी स्सोमराज्ञी- र्बह्वी श्शतविचक्षणाः। तासा न्त्वमस्युत्तमा -ऽरङ्कामाय शं हृदे।।

卐 या ओषधी स्सोमराज्ञी- र्विष्ठिताः पृथिवी मनु। बृहस्पतिप्रसूता- अस्यै सन्दत्त वीर्यम्।।

卐 मा वो रिष त्खनिता- यस्मै चाहङ्खनामि वः। द्विप च्चतुष्प दस्माकं- सर्व मस्त्वनातुरम्।।

卐 याश्चेद मुपशृण्वन्ति- यार्श्च दूरं परागताः। सर्वा स्सङ्गत्य वीरुधो-ऽस्यै सन्दत्त वीर्यम्।।

卐 ओषधय स्सँ वदन्ते- सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मण-स्तं राज न्पारयामसि।।

卐 त्व मुत्तमाऽस्योषधे- तव वृक्षा उपस्तयः। उपस्ति रस्तु सो3(ओ)-ऽस्माकँ यो अस्मा अभिदासति।।

☃ 10.98 **बृहस्पत इति द्वादशर्चस्य सूक्तस्याऽर्ष्टिषेणो देवापिर्देवास्त्रिष्टुप्। (शौनकस्त्वस्मिन्सूक्ते आद्यानां चतसृणां बृहस्पति स्तत श्चतसृणां देवास्ततः पञ्चानामग्निरित्येवं देवता व्यवस्थामाह)।**

❀08.05.12 卐बृहस्पते प्रति मे देवता मिहि- मित्रो वा यद्वरुणो वासि पूषा। आदित्यैर्वा यद्वसुभि र्मरुत्वा-न्त्स पर्जन्यं शन्तनवे वृषाय।।

卐 आ देवो दूतो अजिर श्चिकित्वा-न्त्वद्देवापे अभि मामगच्छत्। प्रतीचीनः प्रति मा.मा ववृत्स्व- दधामि ते द्युमतीँ वाच मासन्न्।।

卐 अस्मे धेहि द्युमतीँ वाच मास-न्बृहस्पते अनमीवा मिषिराम्। यया वृष्टिं शन्तनवे वनाव- दिवो द्रप्सो मधुमा आ विवेश।।

卐 आ नो द्रप्सा मधुमन्तो विशन्त्वि-न्द्र देह्यधिरथं सहस्रम्। नि षीद होत्र मृतुथा यजस्व- देवा न्देवापे हविषा सपर्य।।

卐 आर्ष्टिषेणो होत्र मृषि र्निषीद- न्देवापि र्देव सुमतिञ्चिकित्वान्। स उत्तरस्मा दधरं समुद्र- मपो दिव्या असृज द्वर्ष्या अभि।।

卐 अस्मि न्त्समुद्रे अध्युत्तरस्मि -न्नापो देवेभि र्निर्वृता^ अतिष्ठन्न्। ता^ अद्रव न्नार्ष्टिषेणेन सृष्टा-देवाऽपिना प्रेषिता^ मृक्षिणीषु।।

❀08.05.13 卐यद्देवापि श्शन्तनवे पुरोहितो- होत्राय वृतः कृपयन्नदीधेत्। देवश्रुतँ वृष्टिवनिं रराणो- बृहस्पतिर्वाच मस्मा अयच्छत्।।

卐 यन्त्वा देवापि श्शुशुचानो अग्न- आर्ष्टिषेणो मनुष्य स्समीधे। विश्वेभि र्देवै रनुमद्यमानः- प्र पर्जन्य मीरया वृष्टिमन्तम्।।

卐 त्वां पूर्व ऋषयो गीर्भि राय-न्त्वा मध्वरेषु पुरुहूत विश्वे। सहस्रा.ण्यधिरथान्यस्मे- आ नो यज्ञं रोहिदश्वोप याहि।।

卐 एतान्यग्ने नवतिर्नव त्वे- आहुतान्यधिरथा सहस्रा। तेभिर्वर्धस्व तन्व श्शूर पूर्वी- र्दिवो नो वृष्टि मिषितो रिरीहि।।

卐 एतान्यग्ने नवतिं सहस्रा- सं प्र यच्छ वृष्ण इन्द्राय भागम्। विद्वान्पथ ऋतुशो देवयाना- नप्यौलान न्दिवि देवेषु धेहि।।

卐 अग्ने बाधस्व वि मृधो वि दुर्गहा-ऽपामीवा मप रक्षांसि सेध। अस्मान्त्समुद्रा द्बृहतो दिवो- नोपां भूमान मुप नस्सृजेह।।

☸ 10.99 कन्न इति द्वादशर्चस्य सूक्तस्य, वैखानसो वम्र इन्द्रस्त्रिष्टुप्।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

नवमेऽनुवाके त्रयोदशसूक्तानि

❀08.05.14 卐कन्नश्चित्र मिषण्यसि चिकित्वा- न्पृथुग्मानँ वाश्रँ वावृधध्यै। कत्तस्य दातु शवसो व्युष्टौ- तक्षद्वज्रँ वृत्रतुर मपिन्वत्।।

卐 स हि द्युता विद्युता वेति साम- पृथुँ योनि मसुरत्वा ससाद। स सनीळेभिः प्रसहानो अस्य- भ्रातु र्न ऋते सप्तथस्य मायाः।।

卐 स वाजँ यातापदुष्पदा य-न्त्स्वर्षाता परि षद त्सनिष्यन्न्। अनर्वा यच्छतदुरस्य वेदो- घ्न.ञ्छिश्नदेवाँ अभि वर्पसा भूत्।।

卐 स यह्व्यो3(ओ)ऽवनी र्गो-ष्वर्वा-ऽऽजुहोति प्रधन्यासु सस्त्रिः। अपादो यत्र युज्यासोरथा^- द्रोण्यश्वास^ ईरते घृतँ वाः~।।

卐 स रुद्रेभि रशस्तवार ऋभ्वा- हित्वी गयं मारे अवद्य आऽगात्। वम्रस्य मन्ये मिथुना वि वव्री-~ अन्न मभीत्या रोधय न्मुषायन्न्।।

卐 स इद्दास न्तुवीरवं पतिर्द-न्त्षळक्ष न्त्रिशीर्षाण न्दमन्यत्। अस्य त्रितो न्वोजसा वृधानो- विपा वराह मयो अग्रयाहन्न्~।।

❀08.05.15 卐स द्रुह्वणे मनुष^ ऊर्ध्वसान^- आ साविष दर्शसानाय शरुम्। स नृतमो नहुषोऽस्मत्सुजात॰- पुरोभिन दर्हन्दस्युहत्ये।।

卐 सो अभ्रियो न यवस उदन्य-न्क्षयाय गातुं विदन्नो अस्मे। उप यत्सीद दिन्दुं शरीरै-श्श्येनोयोपाष्टिर्हन्ति दस्यून्।।

卐 स व्राधत श्शवसानेभि रस्य- कुत्साय शुष्णङ्कृपणे परादात्। अयङ्कवि मनय च्छस्यमान -मत्कँ यो अस्य सनितोत नृणाम्।।

卐 अयन्दशस्यन्नर्येभि रस्य- दस्मो देवेभि र्वरुणो न मायी। अयङ्कनीन^ ऋतुपा^ अवे-द्यऽमिमी.तारुँ यश्चतुष्पात्।।

卐 अस्य स्तोमेभि रौशिज^ ऋजिश्वा- व्रज न्दरयद्वृषभेण पिप्रोः। सुत्वा यद्यजतो दीदयद्गी॰- पुर^ इयानो अभि वर्पसा भूत्।।

卐 एवा महो असुर वक्षथाय- वम्रक॰ पड्भि रुप सर्प दिन्द्रम्। स इयान॰ करति स्वस्ति मस्मा- इष मूर्ज सुक्षितिँ विश्वमाभाः।।

10.100 **इन्द्र दृह्येति द्वादशर्चस्य सूक्तस्य, वान्दनो दुवस्युर्विश्वेदेवा जगत्यन्त्या त्रिष्टुप् (भेदपक्षे- विश्वेदेवाः 10, इन्द्रादिती 1, इन्द्रः 1, एवं 12)।**

❀08.05.16 卐इन्द्र दृह्य मघव.न्त्वावदि द्भुज- इह स्तुत स्सुतपा^ बोधि नो वृधे। देवेभिर्न स्सविता प्रावतु श्रुत- मा सर्वताति मदितिँ वृणीमहे।।

卐 भराय सु भरत भाग मृत्वियं- प्र वायवे शुचिपे क्रन्ददिष्टये। गौरस्य य॰ पयस॰ पीति मानश -आ सर्वताति मदितिँ वृणीमहे।।

卐 आ नो देव स्सविता साविषद्वय^- ऋजूयते यजमानाय सुन्वते। यथा देवान्प्रतिभूषेम पाकव – दासर्वताति मदितिँ वृणीमहे।।

卐 इन्द्रो अस्मे सुमना^ अस्तु विश्वहा- राजा सोम स्सुवितस्याऽध्येतु नः। यथायथा मित्रधितानि सन्दधुरा- सर्वताति मदितिँ वृणीमहे।।

卐 इन्द्र^ उक्थेन शवसा परु र्दधे- बृहस्पते प्रतरीतास्यायुषः। यज्ञो मनुꣳ प्रमतिर्नꣳ पिता हि क- मा सर्वताति मदितिँ वृणीमहे।।

卐 इन्द्रस्य नु सुकृतन्दैव्यं सहो-ऽग्निर्गृहे जरिता मेधिरꣳ कविः। यज्ञश्च भूद्विदथे चारुरन्तम^ -आ सर्वताति मदितिँ वृणीमहे।।

❀08.05.17 卐न वो गुहा चकृम भूरि दुष्कृत- न्नाऽऽविष्ट्यँ वसवो देवहेळनम्। माकिर्नो देवा^ अनृतस्य वर्पस-^ आ सर्वताति मदितिँ वृणीमहे।।

卐 अपामीवां सविता साविषन्न्य1(अ)-ग्वरीय^ इदप सेधन्त्वद्रयः। ग्रावा यत्र मधुषुदुच्यते बृह-दा सर्वताति मदितिँ वृणीमहे।।

卐 ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि- विश्वा द्वेषांसि सनुत र्युयोत। स नो देव स्सविता पायु रीड्य^ -आ सर्वताति मदितिँ वृणीमहे।।

卐 ऊर्जङ्गावो यवसे पीवो अत्तन -ऋतस्य यास्सदने कोशे अङ्ग्ध्वे। तनूरेव तन्वो अस्तु भेषज- मासर्वताति मदितिँ वृणीमहे।।

卐 क्रतुप्रावा जरिता शश्वता मव^- इन्द्र^ इद्भद्रा प्रमति स्सुतावताम्। पूर्ण मूध र्दिव्यँ यस्य सिक्तय आ - सर्वताति मदितिँ वृणीमहे।।

卐 चित्रस्ते भानुꣳ क्रतुप्रा^ अभिष्टि-स्सन्ति स्पृधो जरणिप्रा^ अधृष्टाः। रजिष्ठया रज्या पश्व^ आ गो-स्तूतूर्षति पर्यग्र न्दुवस्युः।।

**10.101 उद्बुध्यध्वमिति द्वादशर्चस्य सूक्तस्य, सौम्यो बुधो विश्वेदेवा स्त्रिष्टुप्चतुर्थी षष्ठ्यौ गायत्र्यौ, पञ्चमी बृहती नवमी द्वादश्यौ जगत्यौ (ऋत्विजो देवता वा)।**

❀08.05.18 卐उद्बुध्यध्वं समनस स्सखाय- स्समग्निमिन्ध्वं बहव स्सनीळाः। दधिक्रा मग्नि मुषसञ्च देवी- मिन्द्रावतोऽवसे नि ह्वये वः।।

卐 मन्द्रा कृणुध्व न्धिय^ आ तनुध्व- न्नाव मरित्रपरणी.ङ्कृणुध्वम्। इष्कृणुध्व मायुधाऽरङ्कृणुध्वं- प्राञ्चँ यज्ञं प्र णयता सखायः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 युनक्त सीरा वि युगा तनुध्व-ङ्कृते योनौ वपतेह बीजम्। गिरा च श्रुष्टि स्सभरा^ असन्नो- नेदीय^ इत्सृण्यः पक्व मेयात्।।

卐 सीरा युञ्जन्ति कवयो- युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया।।

卐 निराहावा न्कृणोतन- सँ वरत्रा दधातन। सिञ्चामहा अवत मुद्रिणँ- वयं सुषेक मनुपक्षितम्।।

卐 इष्कृताहाव मवतं- सुवरत्रं सुषेचनम्। उद्रिणं सिञ्चे अक्षितम्।।

❀08.05.19 卐प्रीणीताश्वा न्हितञ्जयाथ- स्वस्तिवाहं रथमि त्कृणुध्वम्। द्रोणाहाव मवत मश्मचक्र-मंसत्रकोशं सिञ्चता नृपाणम्।।

卐 व्रजङ्कृणुध्वं स हि वो नृपाणो- वर्म सीव्यध्वं बहुला पृथूनि। पुरः कृणुध्व मायसी रधृष्टा- मा व स्सुस्रो चमसो दृंहता तम्।।

卐 आ वो धियँ यज्ञियाँ वर्त ऊतये- देवा^ देवीँ यजताँ यज्ञिया मिह। सा नो दुहीय द्यवसेव गत्वी-सहस्रधारा पयसा मही गौः।

卐 आ तू षिञ्च हरिमीन्द्रोरुपस्थे- वाशीभि स्तक्षताश्मन्मयीभिः। परि ष्वजध्व न्दश कक्ष्याभि –~रुभे धुरौ प्रति वह्निं युनक्त।।

卐 उभे~ धुरौ वह्नि रापिब्दमा-नोन्त र्योनेव चरति द्विजानिः। वनस्पतिँ वन आ स्थापयध्व- न्नि षू दधिध्व मखनन्त उत्सम्।।

卐 कपृन्नरः कपृथ मुद्दधातन- चोदयत खुदत वाजसातये। निष्टिग्र्यः पुत्रमा च्यावयोतय- इन्द्रं सबाध^ इह सोमपीतये।।

10.102 **प्र ते रथमिति द्वादशर्चस्य सूक्तस्य, भार्म्यश्वो मुद्गलो द्रुघणस्त्रिष्टुप्, आद्या तृतीयाऽन्त्याबृहत्यः। (प्र ते रथमिति सूक्तदेवतात्वे विप्रतिपत्तिः परस्परमाचार्याणाम्। उक्तं च शौनकेन – प्रेतीति हाससूक्तं तु मन्यते शाकटायनः। यास्को द्रौघणमैन्द्रं वा वैश्वदेवं तु शौनकः। आजानवेनं भार्म्यश्व इंन्द्रासोमौ तु मुद्गल इति।)**

❀08.05.20 卐प्र ते रथं मिथूकृत मि-न्द्रोऽवतु धृष्णुया। अस्मि न्नाजौ पुरुहूत श्रवाय्ये- धनभक्षेषु नोऽव।।

卐 उत्स्म वातो वहति वासो अस्या- अधिरथँ यदजय त्सहस्रम्। रथी रभू न्मुद्गलानी गविष्टौ- भरे कृतँ व्यचे दिन्द्रसेना।।

卐 अन्तर्यच्छ जिघांसतो- वज्र मिन्द्राऽभिदासतः। दासस्य वा मघव न्नार्यस्य वा- सनुत र्यवया वधम्।।

卐 उद्नो ह्रद मपिब ज्जर्हृषाणः- कूटं स्म तृंह दभिमाति मेति। प्र मुष्कभार श्श्रव इच्छमानो-ऽजिरं बाहू अभव त्सिषासन्न्।।

卐 न्यक्रन्दय न्नुपयन्त एन- ममेहय न्वृषभं मध्य आजेः। तेन सूभर्वं शतव त्सहस्र-ङ्गवां मुद्गलः प्रधने जिगाय।।

卐 ककर्दवे वृषभो युक्त आसी- दवावची त्सारथि रस्य केशी। दुधेर्युक्तस्य द्रवत स्सहानस- ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम्।।

❀08.05.21 卐उत प्रधि मुदहन्नस्य विद्वा- नुपायुन ग्वंसग मत्र शिक्षन्न्। इन्द्र उदाव त्पति मघ्न्याना- मरंहत पद्याभिः ककुद्मान्।।

卐 शुन मष्ट्राव्यचर त्कपर्दी- वरत्राया न्दार्वानह्यमानः। नृम्णानि कृण्व न्बहवे जनाय- गाः पस्पशान स्तविषी रधत्त।।

卐 इम न्तं पश्य वृषभस्य युञ्ज-ङ्काष्ठाया मध्ये द्रुघणं शयानम्। येन जिगाय शतव त्सहस्र-ङ्गवां मुद्गलः पृतनाज्येषु।।

卐 आरे अघा को न्वि1(इ)त्था ददर्श- यँ युञ्जन्ति तम्वा स्थापयन्ति। नास्मै तृण न्नोदकमा भर-न्त्युत्तरो धुरो वहति प्रदेदिशत्।।

卐 परिवृक्तेव पतिविद्यमान-ट्पीप्याना कूचक्रेणेव सिञ्चन्न्। एषैष्या चिद्रथ्या जयेम- सुमङ्गलं सिनव दस्तु सातम्।।

卐 त्वँ विश्वस्य जगत-श्चक्षु रिन्द्रासि चक्षुषः। वृषा यदाजिँ वृषणा ऽसिषाससि -चोदय न्वध्रिणा युजा।।

☙ 10.103 **आशुश्शिशान इति त्रयोदशर्चस्य सूक्तस्यैन्द्रोऽप्रतिरथ इन्द्रश्चतुर्थ्या बृहस्पति र्द्वादश्या अप्वादेव्यन्त्याया मरुतस्त्रिष्टुबन्त्याऽनुष्टुप्। (आशुःशिशान स्सूक्तोऽपान्त्याया अप्वादेवीत्यनुक्रमण्यामप्वा देवीति शोनकीये)।**

❀08.05.22 卐आशु शिशानो वृषभो न भीमो- घनाघनः ≈ क्षोभण श्चर्षणीनाम्। सङ्क्रन्दनोऽनिमिष^ एकवीर- श्शतं सेना^ अजय त्साक मिन्द्रः।।

卐 सङ्क्रन्दनेनानिमिषेण जिष्णुना- युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहध्वँ- युधो नर^ इषुहस्तेन वृष्णा।।

卐 स इषुहस्तै स्स निषङ्गिभि र्वशी- संस्रष्टा स युध^ इन्द्रो गणेन। संसृष्टजि त्सोमपा^ बाहुशर्ध्यु1(उ)-ग्रधन्वा प्रतिहिताभि रस्ता।।

卐 बृहस्पते परिदीया रथेन- रक्षोहाऽमित्रा॰ अपबाधमानः। प्रभञ्ज न्त्सेनाः प्रमृणो युधा जयन्नऽ-स्माक मेध्यविता रथानाम्।।

卐 बलविज्ञाय स्स्थविरः प्रवीर- स्सहस्वा न्वाजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा-जैत्रमिन्द्र रथमा तिष्ठ गोवित्।।

卐 गोत्रभिद.ङ्गोविदँ वज्रबाहु-ञ्जयन्त मज्म प्रमृणन्त मोजसा। इमं सजाता^ अनुवीरयध्व- मिन्द्रं सखायो अनु सं रभध्वम्।।

❀08.05.23 卐अभि गोत्राणि सहसा गाहमानो-ऽदयो वीर श्शतमन्यु रिन्द्रः। दुश्च्यवनः पृतनाषाळयुध्यो3(ओ)-ऽस्माकं सेना^ अवतु प्र युत्सु।।

卐 इन्द्र^ आसा न्नेता बृहस्पति- र्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनाना मभिभञ्जतीना-ञ्जयन्तीनां मरुतो यन्त्वग्रम्।।

卐 इन्द्रस्य वृष्णो वरुणस्य राज्ञ^- आदित्यानां मरुतां शर्ध उग्रम्। महामनसां भुवनच्यवाना-ङ्घोषो देवानाञ्जयता मुदस्थात्।।

卐 उद्धर्षय मघव न्नायुधा-न्युत्सत्वनां मामकानां मनांसि। उद्वृत्रहन्वाजिनाँ वाजिना-न्युद्रथानाञ्जयताँ यन्तु घोषाः।।

卐 अस्माक मिन्द्र स्समृतेषु ध्वजे-ष्वऽस्माकँ या^ इषव स्ता जयन्तु। अस्माकँ वीरा^ उत्तरे भव-न्त्वऽस्मा॰ उ देवा^ अवता हवेषु।।

卐 अमीषाञ्चित्तं प्रतिलोभयन्ती- गृहा.णाऽङ्गा.न्यऽप्वे परेहि। अभि प्रेहि निर्दह हृत्सु शोकै- रन्धेनामित्रा स्तमसा जयन्ताम्।।

卐 प्रेता जयता नर- इन्द्रो व श्शर्म यच्छतु। उग्रा व स्सन्तु बाहवो-ऽनाधृष्या यथाऽसथ।।

✡।। अथ परिशिष्टम्।।

卐 असौ या सेना मरुतः परेषा- मभ्यैति न ओजसा स्पर्धमाना। ताङ्गूहत तमसाऽपव्रतेन- यथाऽमीषा मन्यो अन्यन्न जानात्।।

卐 अन्धा अमित्रा भव-ताशीर्षाणा अहयइव। तेषाँ वो अग्निदग्धाना -मग्निमूळ्हाना मिन्द्रो हन्तु वरँवरम्।। ।। इति परिशिष्टम्।।

10.104 **असावीत्येकादशर्चस्य सूक्तस्य, वैश्वामित्रोऽष्टक इन्द्रस्त्रिष्टुप्।**

❀08.05.24 卐असावि सोमः पुरुहूत तुभ्यं- हरिभ्याँ यज्ञ मुप याहि तूयम्। तुभ्यङ्गिरो विप्रवीरा इयाना- दधन्विर इन्द्र पिबा सुतस्य।।

卐 अप्सु धूतस्य हरिवः पिबेह- नृभि स्सुतस्य जठरं पृणस्व। मिमिक्षु र्यमद्रय इन्द्र तुभ्य- न्तेभि र्वर्धस्व मद मुक्थवाहः।।

卐 प्रोग्रां पीतिँ वृष्ण इयर्मि सत्यां- प्रयै सुतस्य हर्यश्व तुभ्यम्। इन्द्र धेनाभि रिह मादयस्व- धीभि र्विश्वाभि श्शच्या गृणानः।।

卐 ऊती शचीव स्तव वीर्येण- वयो दधाना उशिज ऋतज्ञाः। प्रजाव दिन्द्र मनुषो दुरोणे- तस्थु र्गृणन्त स्सधमाद्यासः।।

卐 प्रणीतिभिष्टे हर्यश्व सुष्टो- स्सुषुम्नस्य पुरुरुचो जनासः। मंहिष्ठामूतिँ वितिरे दधाना- स्स्तोतार इन्द्र तव सूनृताभिः।।

❀08.05.25 卐उप ब्रह्माणि हरिवो हरिभ्यां- सोमस्य याहि पीतये सुतस्य। इन्द्र त्वा यज्ञः≈क्षममाण- मानड्दाश्वा अस्यध्वरस्य प्रकेतः।।

卐 सहस्रवाज मभिमातिषाहं- सुतेरणं मघवानं सुवृक्तिम्। उप भूषन्ति गिरो अप्रतीत- मिन्द्रन्नमस्या जरितुः पनन्त।।

卐 सप्तापो देवी स्सुरणा अमृक्ता- याभि स्सिन्धु मतर इन्द्र पूर्भित्। नवतिं स्रोत्या नव च स्रवन्ती- र्देवेभ्यो गातुं मनुषे च विन्दः।।

卐 अपो मही रभिशस्ते रमुञ्चो-ऽजागरास्वधि देव एकः। इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ- ताभि विश्वायु स्तन्वं पुपुष्याः।।

卐 वीरेण्यः क्रतु रिन्द्र स्सुशस्ति -रुतापि धेना पुरुहूत मीट्टे। आर्दय द्वृत्र मकृणोदु लोकं- ससाहे शक्रः पृतना अभिष्टिः।।

卐 शुनं हुवेम मघवान मिन्द्र- मस्मि न्भरे नृतमँ वाजसातौ। शृण्वन्त मुग्र मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित न्धनानाम्।।

☬ 10.105 **कदेत्येकादशर्चस्य सूक्तस्य, कौत्सो दुर्मित्र इन्द्र उष्णिक्, आद्या गायत्री वा द्वितीया सप्तम्यौ पिपीलिकमध्ये अन्त्या त्रिष्टुप्।**

❀08.05.26 卐कदा वसो~ स्तोत्रं हर्यत- आऽव श्मशा रुधद्वाः~। दीर्घं सुतँ वाताप्याय।।

卐 हरी~ यस्य सुयुजा- विव्रता वे रर्वन्ताऽनु शेपा। उभा रजी~ न केशिना पति र्दन्न्।।

卐 अप योरिन्द्रः पापज आ मर्तो- न शश्रमाणो बिभीवान्। शुभे यद्युयुजे तविषीवान्।।

卐 सचायो रिन्द्र श्चर्कृष -आँ उपानस स्सपर्यन्न्। नदयो विव्रतयो श्शूर इन्द्रः।।

卐 अधि यस्तस्थौ केशवन्ता- व्यचस्वन्ता न पुष्ट्यै। वनोति शिप्राभ्यां शिप्रिणीवान्।।

❀08.05.27 卐प्रास्तौ दृष्वौजा^ ऋष्वेभि- स्ततक्ष शूर श्शवसा। ऋभुर्न क्रतुभि र्मातरिश्वा।।

卐 वज्रँ यश्चक्रे सुहनाय दस्यवे- हिरीमशो हिरीमान्। अरुतहनु रद्भुतन्न रजः।।

卐 अव नो वृजिना शिशी- ह्यृचा वनेमानृचः। नाब्रह्मा यज्ञ^ ऋध ग्जोषति त्वे।।

卐 ऊर्ध्वा यत्ते त्रेतिनी भू-द्यज्ञस्य धूर्षु सद्मन्न्। सजू र्नावं स्वयशसं सचाऽयोः।।

卐 श्रिये ते पृश्नि रुपसेचनी भू -च्छ्रिये दर्वि रेपाः। यया स्वे पात्रे सिञ्चस उत्।।

卐 शतँ वा यदसुर्य प्रति त्वा- सुमित्र^ इत्थाऽस्तौ दुर्मित्र^ इत्थाऽस्तौत्। आवो यद्दस्युहत्ये कुत्सपुत्रं- प्रावो यद्दस्युहत्ये कुत्सवत्सम्।।।। इति पञ्चमाध्यायः।।

## अष्टमाष्टके षष्ठाध्यायः (वर्गाः 1-27)

☬ 10.106 **उभा उ नूनमित्येकादशर्चस्य सूक्तस्य, काश्यपो भूतांशोऽश्विनौ त्रिष्टुप्।**

❀08.06.01 卐उभा उ नून न्तादि दर्थयेथे~- वि तन्वाथे~ धियो वस्त्रापसेव। सध्रीचीना यातवे प्रेमजीग~- स्सुदिनेव पृक्ष^ आ तंसयेथे~।।

卐 उष्टारेव फर्वरेषु श्रयेथे~- प्रायोगेव श्वात्र्या शासु रेथः। दूतेव हि ष्ठो यशसा जनेषु- माप स्थातं महिषेवावपानात्।।

卐 साकँयुजा शकुनस्येव पक्षा- पश्वेव चित्रा यजुरा गमिष्टम्। अग्निरिव देवयो र्दीदिवांसा- परिज्मानेव यजथः पुरुत्रा।।

卐 आपी~ वो अस्मे पितरेव पुत्रो-ग्रेव रुचा नृपतीव~ तुर्यै। इर्येव पुष्ट्यै किरणेव भुज्यै- श्रुष्टीवानेव हवमाऽऽ गमिष्टम्।।

卐 वंसगेव पूषर्या शिम्बाता- मित्रेव ऋता शतरा शातपन्ता। वाजेवोच्चा वयसा घर्म्येष्ठा- मेषेवेषा सपर्या3(आ) पुरीषा।।

❀08.06.02 卐सृण्येव जर्भरी~ तुर्फरीतू~-नैतोशेव तुर्फरी~ पर्फरीका। उदन्यजेव जेमना मदेरू-~ ता मे जराय्वजरं मरायु।।

卐 पज्रेव चर्चरं.ज्ञारं मरायु- क्षद्मेवाऽर्थेषु तर्तरीथ^ उग्रा। ऋभू ~नाप.त्खरमज्रा खरज्रु- र्वायु र्न पर्फरत्क्षय द्रयीणाम्।।

卐 घर्मेव मधु जठरे सनेरू~-भगेऽविता तुर्फरी~ फारिवाऽरम्। पतरेव चचरा चन्द्रनिर्णि-र्मनऋङ्गा मनन्या3(आ) न जग्मी~।।

卐 बृहन्तेव गम्भरेषु प्रतिष्ठां- पादेव गाध न्तरते विदाथः। कर्णेव शासु रनु हि स्मराथो-ऽंशेव नो भजत.ञ्चित्र मप्नः।।

卐 आरङ्गरेव मध्वेरयेथे~-सारघेव गवि नीचीनबारे। कीनारेव स्वेद मासिष्विदाना- क्षामेवोर्जा सूयवसात्सचेथे~।।

卐 ऋध्याम स्तोमं सनुयाम वाज- मा नो मन्त्रं सरथेहोप यातम्। यशो न पक्वं मधु गोष्वन्तरा- भूतांशो अश्विनोः काममप्राः।।

✡।। अथ परिशिष्टम्।।

卐 हविर्भिरेके स्वरित स्सचन्ते- सुन्वन्त एके सवनेषु सोमान्। शची र्मदन्त उत दक्षिणाभि- र्नेञ्जिह्मायन्त्यो नरके पताम।। ।। इति परिशिष्टम्।।

☬ 10.107 आविरित्येकादशर्चस्य सूक्तस्याऽऽङ्गिरसो दिव्यो दक्षिणा त्रिष्टुप्चतुर्थी जगती। (प्राजापत्या दक्षिणा नाम्नी ऋषिका वा दक्षिणा दातारो वा देवता)।

❀08.06.03 卐आवि रभू न्महि माघोन मेषाँ- विश्वञ्जीव न्तमसो निरमोचि। महि ज्योतिः पितृभि र्दत्त माऽगा- दुरुः पन्था दक्षिणाया^ अदर्शि।।

卐 उच्चा दिवि दक्षिणावन्तो अस्थु- र्ये अश्वदा स्सह ते सूर्येण। हिरण्यदा^ अमृतत्वं भजन्ते- वासोदा स्सोम प्र तिरन्त आयुः।।

卐 दैवी पूर्ति र्दक्षिणा देवयज्या- न कवारिभ्यो नहि ते पृणन्ति। अथा नरः प्रयतदक्षिणासो-ऽवद्यभिया बहवः पृणन्ति।।

卐 शतधाराँ वायु.मर्क स्स्वर्विद- न्नृचक्षस स्ते अभि चक्षते हविः। ये पृणन्ति प्र च यच्छन्ति सङ्गमे- ते दक्षिणा न्दुहते सप्तमातरम्।।

卐 दक्षिणावा न्प्रथमो हूत^ एति- दक्षिणावा न्ग्रामणी रग्र मेति। तमेव मन्ये नृपतिञ्जनानाँ- यः प्रथमो दक्षिणा माविवाय।।

❀08.06.04 卐तमेव ऋषि न्तमु ब्रह्माण माहु- र्यज्ञन्यं सामगा मुक्थशासम्। स शुक्रस्य तन्वो वेद तिस्रो- यः प्रथमो दक्षिणया रराध।।

卐 दक्षिणाश्व न्दक्षिणा गा न्ददाति- दक्षिणा चन्द्र मुत यद्धिरण्यम्। दक्षिणान्नँ वनुते यो न^ आत्मा- दक्षिणाँ वर्म कृणुते विजानन्न्।।

卐 न भोजा^ मम्रु र्न न्यर्थ मीयु- र्न रिष्यन्ति न व्यथन्ते ह भोजाः। इदँ यद्विश्वं भुवनं स्व~श्चै-त त्सर्व न्दक्षिणैभ्यो ददाति।।

卐 भोजा^ जिग्यु स्सुरभिँ योनि मग्रे- भोजा^ जिग्यु र्वध्व1(अँ)या सुवासाः। भोजा^ जिग्यु रन्तःपेयं सुराया^- भोजा^ जिग्यु र्ये अहूताः प्रयन्ति।।

卐 भोजायाऽश्वं सं मृज न्त्याशुं- भोजायाऽऽस्ते कन्या3(आ) शुम्भमाना। भोजस्येदं पुष्करिणीव वेश्म- परिष्कृत न्देवमानेव चित्रम्।।

卐 भोज मश्वा स्सुष्टुवाहो वहन्ति- सुवृ द्रथो वर्तते दक्षिणायाः। भोज न्देवासोऽवता भरेषु- भोज श्शत्रू न्त्समनीकेषु जेता।।

☸ 10.108 **किमिच्छन्तीत्येकादशर्चस्य सूक्तस्यायुजां पणिनामासुरा ऋषयः, युजामेकादश्याश्च सरमा नाम्नी देवशुनी ऋषिका, अयुजां सरमा देवता, युजामेकादश्याश्च पणयस्त्रिष्टुप्।**

❀08.06.05 卐किमिच्छन्ती सरमा प्रेद मान- ड्डूरे ह्यऽध्वा जगुरिः पराचैः। कास्मेहितिः का परितक्म्याऽऽसी- त्कथं रसाया अतरः पयांसि।।

卐 इन्द्रस्य दूती रिषिता चरामि- मह इच्छन्ती पणयो निधी न्वः। अतिष्कदो भियसा तन्न आव- त्तथा रसाया अतरं पयांसि।।

卐 कीदृङ्ङिन्द्र स्सरमे का दृशीका- यस्येद न्दूती रसरः पराकात्। आ च गच्छा न्मित्र मेना दधामा-ऽथा गवाङ्गोपति र्नो भवाति।।

卐 नाह न्तँ वेद दभ्य न्दभ- त्स यस्येद न्दूती रसरं पराकात्। न तङ्गूहन्ति स्रवतो गभीरा- हता इन्द्रेण पणय श्शयध्वे।।

卐 इमा गाव स्सरमे या ऐच्छः- परि दिवो अन्ता न्त्सुभगे पतन्ती। कस्त एना अव सृजा दयु - ध्व्युतास्माक मायुधा सन्ति तिग्मा।।

❀08.06.06 卐असेन्या वः पणयो वचां-स्यनिषव्या स्तन्व स्सन्तु पापीः। अधृष्टो व एतवा अस्तु पन्था- बृहस्पति र्व उभया न मृळात्।।

卐 अय न्निधि स्सरमे अद्रिबुध्नो- गोभि रऽश्वेभि र्वसुभि न्यृष्टः। रक्षन्ति तं पणयो ये सुगोपा- रेकु पद मलक.माजगन्थ।।

卐 एह गम न्नृषय स्सोमशिता- अयास्यो अङ्गिरसो नवग्वाः। त एत मूर्वँ वि भजन्त गोना- मथैत द्वचः पणयो वमन्नित्।।

卐 एवा च त्वं सरम आजगन्थ- प्रबाधिता सहसा दैव्येन। स्वसारन्त्वा कृणवै मा पुनर्गा- अप ते गवां सुभगे भजाम।।

卐 नाहँ वेद भ्रातृत्व न्नो स्वसृत्व- मिन्द्रो विदु रङ्गिरसश्च घोराः। गोकामा मे अच्छदय न्यदाय- मपात इत पणयो वरीयः।।

卐 दूर मित पणयो वरीय- उद्गावो यन्तु मिनतीर् ऋतेन। बृहस्पतिर्या अविन्द न्निगूळ्हा-स्सोमो ग्रावाण ऋषयश्च विप्राः।।

Sri Sachchidananda Avadhoota Datta Peetham Mysore

☸ 10.109 **तेऽवदन्निति सप्तर्चस्य सूक्तस्य, ब्रह्मजाया जुहूर्विश्वेदेवा स्त्रिष्टुबन्त्ये द्वे अनुष्टुभौ। (ब्राह्मो वोर्ध्वनाभ ऋषिः)**

❀08.06.07 卐तेऽवद न्प्रथमा ब्रह्मकिल्बिषे-ऽकूपार स्सलिलो मातरिश्वा। वीळुहरा स्तप उग्रो मयोभू- रापो देवीः प्रथमजा ऋतेन।।

卐 सोमो राजा प्रथमो ब्रह्मजायां- पुनः~ प्राऽयच्छ दहृणीयमानः। अन्वर्तिता वरुणो मित्र आसी- दग्निर्होता हस्तगृह्या ऽऽनिनाय।।

卐 हस्तेनैव ग्राह्य आधि रस्या- ब्रह्मजायेय मिति चेदवोचन्न्। न दूताय प्रह्ये तस्थ एषा- तथा राष्ट्र.ङ्गुपित.क्षत्रियस्य।

卐 देवा एतस्या मवदन्त पूर्वे- सप्तऋषय स्तपसे ये निषेदुः। भीमा जाया ब्राह्मणस्योपनीता- दुर्धा न्दधाति परमे व्योमन्न्।।

卐 ब्रह्मचारी चरति वेविष द्विष- स्स देवानां भव त्येक मङ्गम्। तेन जाया मन्वविन्द न्बृहस्पति- स्सोमेन नीता.ञ्जुह्व1(अ)न्न देवाः।।

卐 पुनर्वै देवा अददुः- पुन र्मनुष्या उत। राजान स्सत्यङ्कृण्वाना- ब्रह्मजायां पुन र्ददुः।।

卐 पुनर्दाय ब्रह्मजाया-ङ्कृत्वी देवै र्निकिल्बिषम्। ऊर्जं पृथिव्या भक्त्वायो-रुगाय मुपासते।

☸ 10.110 **समिद्ध इत्येकादशर्चस्य सूक्तस्य, भार्गवो जमदग्निरिध्मस्तनूनपादिळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ सरस्वतीळाभारत्य स्त्वष्टा वनस्पति स्वाहाकृतयस्त्रिष्टुप्। (जमदग्निः परशुरामो वा)।**

❀08.06.08 卐समिद्धो अद्य मनुषो दुरोणे- देवो देवा न्यजसि जातवेदः। आ च वह मित्रमह श्चिकित्वा- न्त्वन्दूतः कवि रऽसि प्रचेताः।।

卐 तनूनपा त्पथ ऋतस्य याना- न्मध्वा समञ्ज न्त्स्वदया सुजिह्व। मन्मानि धीभि रुत यज्ञ मृन्ध- न्देवत्रा च कृणु ह्यध्वर न्नः।।

卐 आजुह्वान ईड्यो वन्द्यश्चा- याह्यऽग्ने वसुभि स्सजोषाः। त्वन्देवाना मसि यह्व होता- स एना न्यक्षीषितो यजीयान्।।

卐 प्राचीनं बर्हिः प्रदिशा पृथिव्या^- वस्तो रस्या^ वृज्यते अग्रे अह्नाम्। व्यु प्रथते वितरँ वरीयो- देवेभ्यो अदितये स्योनम्।।

卐 व्यचस्वती रुर्विया वि श्रयन्तां- पतिभ्यो न जनय श्शुम्भमानाः। देवी द्वारो बृहती विश्वमिन्वा^- देवेभ्यो भवत सुप्रायणाः।।

❀08.06.09 卐आ सुष्वयन्ती~ यजते~ उपाके~- उषासानक्ता सदतान्नि योनौ। दिव्ये~ योषणे~ बृहती~ सुरुक्मे~- अधि श्रियं शुक्रपिश न्दधाने~।।

卐 दैव्या होतारा प्रथमा सुवाचा- मिमाना यज्ञं मनुषो यजध्यै। प्रचोदयन्ता विदथेषु कारू~- प्राचीनञ्ज्योतिः प्रदिशा दिशन्ता।।

卐 आ नो यज्ञं भारती तूयमे- त्विळा मनुष्व दिह चेतयन्ती। तिस्रो देवी बर्हि रेदं स्योनं- सरस्वती स्वपस स्सदन्तु।।

卐 य^ इमे~ द्यावापृथिवी~ जनित्री~- रूपै रपिंश द्भुवनानि विश्वा। तमद्य होत रिषितो यजीया- न्देव न्त्वष्टार मिह यक्षि विद्वान्।।

卐 उपावसृज त्मन्या समञ्ज- न्देवानां पाथ^ ऋतुथा हवींषि। वनस्पति श्शमिता देवो अग्नि- स्स्वदन्तु हव्यं मधुना घृतेन।।

卐 सद्यो जातो व्यमिमीत यज्ञ- मग्नि र्देवाना.मभव त्पुरोगाः। अस्य होतुः प्रदिश्यृतस्य वाचि- स्वाहाकृतं हवि रदन्तु देवाः।।

10.111 **मनीषिण इति दशर्चस्य सूक्तस्य, वैरूपोऽष्टादंष्ट्र इन्द्रस्त्रिष्टुप्।**

❀08.06.10 卐मनीषिणः प्र भरध्वं मनीषाँ- यथायथा मतय स्सन्ति नृणाम्। इन्द्रं सत्यै रेरयामा कृतेभि- स्स हि वीरो गिर्वणस्यु र्विदानः।।

卐 ऋतस्य हि सदसो धीति रद्यौ- त्सङ्गार्ष्टेयो वृषभो गोभि रानट्। उदतिष्ठ त्तविषेणा रवेण- महान्ति चित्सँ विव्याचा रजांसि।।

卐 इन्द्रः किल श्रुत्या अस्य वेद- स हि जिष्णुः पथिकृ त्सूर्याय। आन्मेनाङ्कृण्व.न्नच्युतो भुवद्गोः- पति र्दिव स्सनजा^ अप्रतीतः।।

卐 इन्द्रो मह्ना महतो अर्णवस्य- व्रतामिना दङ्गिरोभि गृणानः। पुरूणि चिन्नि ततानां रजांसि- दाधार यो धरुणं सत्यताता।।

卐 इन्द्रो दिवः प्रतिमानं पृथिव्या- विश्वा वेद सवना हन्ति शुष्णम्। मही.श्चिद्या मातनो त्सूर्येण- चास्कम्भ चित्कम्भनेन स्कभीयान्।।

❀08.06.11 卐वज्रेण हि वृत्रहा वृत्र मस्त- रदेवस्य शूशुवानस्य मायाः। वि धृष्णो~ अत्र धृषता जघन्था-ऽथाभवो मघव न्बाह्वोजाः।।

卐 सचन्त यदुषस स्सूर्येण चित्रा- मस्य केतवो रामविन्दन्। आ यन्नक्षत्र न्ददृशे दिवो न- पुनर्यतो नकि रद्धा नु वेद।।

卐 दूरङ्किल प्रथमा जग्मु रासा- मिन्द्रस्य याः प्रसवे सस्रुरापः। क्व स्विदग्र.ङ्क्व बुध्न आसा- मापो मध्यङ्क्व वो नून मन्तः।।

卐 सृज स्सिन्धूं रहिना जग्रसानां- आदिदेताः प्र विविज्रे जवेन। मुमुक्षमाणा उत या मुमुच्रे- ऽधेदेता न रमन्ते नितिक्ताः।।

卐 सध्रीची स्सिन्धु मुशतीरिवाय- न्त्सना ज्जार आरितः पूर्भि दासाम्। अस्तमा ते पार्थिवा वसू - न्यस्मे जग्मु स्सूनृता इन्द्र पूर्वीः।।

10.112 **इन्द्र पिबेति दशर्चस्य सूक्तस्य, वैरूपो नभः प्रभेदन इन्द्रस्त्रिष्टुप्।**

❀08.06.12 卐इन्द्र पिब प्रतिकामं सुतस्य- प्रातस्साव स्तव हि पूर्वपीतिः। हर्षस्व हन्तवे शूर शत्रू- नुक्थेभिष्टे वीर्या3(आ) प्र ब्रवाम।।

卐 यस्ते रथो मनसो जवीया- नेन्द्र तेन सोमपेयाय याहि। तूयमा ते हरयः प्र द्रवन्तु- येभि र्यासि वृषभि र्मन्दमानः।।

卐 हरित्वता वर्चसा सूर्यस्य- श्रेष्ठै रूपै स्तन्वं स्पर्शयस्व। अस्माभि रिन्द्र सखिभि र्हुवान- स्सध्रीचीनो मादयस्वा निषद्य।।

卐 यस्य त्यत्ते महिमानं मदेष्वि-मे~ मही~ रोदसी नाविविक्ताम्। तदोक आ हरिभि रिन्द्र युक्तैः- प्रियेभि र्याहि प्रिय मन्न मऽच्छ।।

卐 यस्य शश्वं त्पपिवाँ इन्द्र शत्रून॑ऽनानुकृत्या रण्या चकर्थं। स ते पुरन्धि न्तविषी मियर्ति- स ते मदाय सुतᳪ इन्द्र सोमः।।

❀08.06.13 卐इदन्ते पात्रं सनवित्त मिन्द्र- पिबा सोम मेना शतक्रतो। पूर्णᳪ आहावो मदिरस्य मध्वो- यँ विश्व इदभिहर्यन्ति देवाः।।

卐 वि हि त्वामिन्द्र पुरुधा जनासो- हितप्रयसो वृषभ ह्वयन्ते। अस्माकन्ते मधुमत्तमा-नीमा भुव न्त्सवना तेषु हर्य।।

卐 प्र तँ इन्द्र पूर्व्याणि प्र नूनँ- वीर्या वोचं प्रथमा कृतानि। सतीनमन्यु रश्रथायो अद्रिं- सुवेदना मकृणो ब्रह्मणे गाम्।।

卐 नि षु सीद गणपते- गणेषु त्वामाहु र्विप्रतमङ्कवीनाम्। न ऋते त्वत्क्रियते किञ्चना-ऽऽरे महा मर्कं मघव न्चित्रमर्च।।

卐 अभिख्या नो मघव न्नाधमाना- न्त्सखे बोधि वसुपते सखीनाम्। रणङ्कृधि रणकृ त्सत्यशुष्मा-ऽभक्ते चिदा भजा राये अस्मान्।।

10.113 तमस्येति दशर्चस्य सूक्तस्य, वैरूप श्शतप्रभेदनो जगत्यन्त्या त्रिष्टुप्।

❀08.06.14 卐तमस्य द्यावापृथिवी~ सचेतसा- विश्वेभि र्देवै रनु शुष्म मावताम्। यदै त्कृण्वानो महिमान मिन्द्रियं- पीत्वी सोमस्य क्रतुमाँ अवर्धत।।

卐 तमस्य विष्णु र्महिमान मोजसा-ऽंशु न्दधन्वा न्मधुनो वि रप्शते। देवेभि रिन्द्रो मघवा सयावभि- र्वृत्रञ्जघन्वाँ अभव द्वरेण्यः।।

卐 वृत्रेण यदहिना बिभ्र दायुधा- समस्थिथाᳪ युधये शंस माविदे। विश्वे ते अत्र मरुत स्सह त्मना-ऽवर्ध न्नुग्र महिमान मिन्द्रियम्।।

卐 जज्ञानᳪ एव व्यबाधत स्पृधः- प्राऽपश्य द्वीरो अभि पौंस्यं रणम्। अवृश्च दद्रि मव सस्यद स्सृज- दस्तभ्ना न्नाकं स्वपस्यया पृथुम्।।

卐 आदिन्द्र स्सत्रा तविषी रपत्यत- वरीयो द्यावापृथिवी~ अबाधत। अवाभर द्धृषितो वज्र मायसं- शेवं मित्राय वरुणाय दाशुषे।।

❀08.06.15 卐इन्द्रस्यात्र तविषीभ्यो विरप्शिन^- ऋघायतो अरंहयन्त मन्यवे। वृत्रँ यदुग्रो व्यवृश्च दोजसा-ऽपो बिभ्रत न्तमसा परीवृतम्।।

卐 या वीर्याणि प्रथमानि कर्त्वा- महित्वेभि र्यतमानौ समीयतुः। ध्वान्त न्तमोव दध्वसे हत- इन्द्रो मह्ना पूर्वहूता वपत्यत।।

卐 विश्वे देवासो अध वृष्ण्यानि ते-ऽवर्धय न्त्सोमवत्या वचस्यया। रद्धँ वृत्र महि मिन्द्रस्य हन्मना-ऽग्निर्न जम्भै स्तृष्वन्न मावयत्।।

卐 भूरि दक्षेभि र्वचनेभिर् ऋक्वभि- स्सख्येभि स्सख्यानि प्र वोचत। इन्द्रो धुनिञ्च चुमुरिञ्च दम्भय-ञ्छ्रद्धामनस्या श्रृणुते दभीतये।।

卐 त्वं पुरूण्या भरा स्वश्व्या- येभि र्मंसै निवचनानि शंसन्न्। सुगेभि र्विश्वा दुरिता तरेम- विदों~ षु ण^ उर्विया गाध मद्य।।

☃ 10.114 घर्मेति दशर्चस्य सूक्तस्य, वैरूप स्सध्रिर्विश्वेदेवा स्त्रिष्टुप्चतुर्थी जगती। (तापसो घर्मो वा ऋषिः)

❀08.06.16 卐घर्मा समन्ता त्रिवृतँ व्यापतु- स्तयो र्जुष्टिं मातरिश्वा जगाम। दिवस्पयो दिधिषाणा^ अवेष- न्विदु र्देवा स्सहसामान मर्कम्।।

卐 तिस्रो देष्ट्राय निर्ऋती रुपासते- दीर्घश्रुतो वि हि जानन्ति वह्नयः। तासा न्नि चिक्युः कवयो निदानं- परेषु या गुह्येषु व्रतेषु।।

卐 चतुष्कपर्दा युवति स्सुपेशा^- घृतप्रतीका वयुनानि वस्ते। तस्यां सुपर्णा वृषणा नि षेदतु- र्यत्र देवा^ दधिरे भागधेयम्।।

卐 एक स्सुपर्ण स्स समुद्र माविवेश- स इदँ विश्वं भुवनँ वि चष्टे। तं पाकेन मनसापश्य मन्तित- स्तं माता रेऴ्हि स उ रेऴ्हि मातरम्।।

卐 सुपर्णँ विप्राः कवयो वचोभि- रेकं सन्तं बहुधा कल्पयन्ति। छन्दांसि च दधतो अध्वरेषु- ग्रहा न्त्सोमस्य मिमते द्वादश।।

❀08.06.17 卐षट्त्रिंशाँश्च चतुरः कल्पयन्त- श्छन्दांसि च दधत^ आद्वादशम्। यज्ञँ विमाय कवयो मनीष- ऋक्सामाभ्यां प्र रथँ वर्तयन्ति।।

卐 चतुर्दशान्ये महिमानो अस्य- तन्धीरा^ वाचा प्रणयन्ति सप्त। आप्नान न्तीर्थङ्क^ इह प्र वोच- द्येन पथा प्रपिबन्ते सुतस्य।।

卐 सहस्रधा पञ्चदशान्युक्था- यावद्द्यावापृथिवी~ तावदित्तत्। सहस्रधा महिमानस्सहस्रँ- यावद्ब्रह्म विष्ठित न्तावती वाक्।।

卐 कश्छन्दसाँ योग मावेद धीर॰- को धिष्ण्यां प्रति वाचं पपाद। कमृत्विजा मष्टमं शूरमाहु- र्हरी~ इन्द्रस्य नि चिकाय क स्स्वित्।।

卐 भूम्या^ अन्तं पर्येके चरन्ति- रथस्य धूर्षु युक्तासो अस्थुः। श्रमस्य दायँ वि भजन्त्येभ्यो- यदा यमो भवति हर्म्ये हितः।।

10.115 **चित्र इति नवर्चस्य सूक्तस्य, वार्ष्टिहव्य उपस्तुतोऽग्निर्जगती, अष्टमी नवम्यौ त्रिष्टुप्शक्कर्यौ।**

❀08.06.18 卐चित्र^ इच्छिशो स्तरुणस्य वक्षथो- न यो मातरा वप्येति धातवे। अनूधा यदि जीजन दधा च नु- ववक्ष सद्यो महि दूत्य1(अ)ञ्चरन्न्।।

卐 अग्निर्ह नाम धायि दन्नपस्तम- स्सँ यो वना युवते भस्मना दता। अभिप्रमुरा जुह्वा स्वध्वर^- इनो न प्रोथमानो यवसे वृषा।।

卐 तँ वो विन्न द्रुषद न्देव मन्धस^- इन्दुं प्रोथन्तं प्रवपन्त मर्णवम्। आसा वह्निन्न शोचिषा विरप्शिनं- महिव्रतन्न सरजन्त मध्वनः।।

卐 वि यस्य ते ज्रयसानस्याजर- धक्षो न वाता॰ परि सन्त्यच्युताः। आ रण्वासो युयुधयो न सत्वन- न्त्रितन्नशन्त प्र शिषन्त^ इष्टये।।

卐 स इदग्नि॰ कण्वतम॰ कण्वसखा-ऽर्य॰ परस्यान्तरस्य तरुषः। अग्नि॰ पातु गृणतो अग्नि स्सूरी- नग्नि र्ददातु तेषा मवो नः।।

❀08.06.19 卐वाजिन्तमाय सह्यसे सुपित्र्य- तृषु च्यवानो अनु जातवेदसे। अनुद्रे चिद्यो धृषता वरं सते- महिन्तमाय धन्वने दऽविष्यते।।

卐 एवाग्नि मर्तै स्सह सूरिभि- र्वसु ष्टवे सहस स्सूनरो नृभिः। मित्रासो न ये सुधिता^ ऋतायवो- द्यावो न द्युम्नै रभि सन्ति मानुषान्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ऊर्जो नपा त्सहसाव न्निति -त्वोपस्तुतस्य वन्दते वृषा वाक्। त्वां स्तोषाम त्वया सुवीरा- द्राघीय^ आयुः प्रतर न्दधानाः।।

卐 इति त्वाग्ने वृष्टिहव्यस्य पुत्रा^- उपस्तुतास^ ऋषयोऽवोचन्न्। ताँश्च पाहि गृणतश्च सूरी- न्वष ड्वषळि.त्यूर्ध्वासो अनक्ष-न्नमो नम^ इत्यूर्ध्वासो अनक्षन्न्।।

**10.116 पिबेति नवर्चस्य सूक्तस्य, स्थौरोऽग्नियुत इन्द्रस्त्रिष्टुप्। (अग्नियूपो वा ऋषिः)।**

08.06.20 卐पिबा सोमं महत इन्द्रियाय- पिबा वृत्राय हन्तवे शविष्ठ। पिब राये शवसे हूयमानः- पिब मध्व स्तृपदिन्द्रा ऽवृषस्व।।

卐 अस्य पिब क्षुमतः प्रस्थितस्ये-न्द्र सोमस्य वरमा सुतस्य। स्वस्तिदा^ मनसा मादय-स्वाऽर्वाचीनो रेवते सौभगाय।।

卐 ममत्तु त्वा दिव्य स्सोम^ इन्द्र- ममत्तु य स्सूयते पार्थिवेषु। ममत्तु येन वरिव श्चकर्थ- ममत्तु येन निरिणासि शत्रून्।।

卐 आ द्विबर्हा^ अमिनो यात्विन्द्रो- वृषा हरिभ्यां परिषिक्त मन्धः। गव्या सुतस्य प्रभृतस्य मध्व- स्सत्रा खेदामरुशहा वृषस्व।।

卐 नि तिग्मानि भ्राशय न्भ्राश्या –न्यव स्थिरा तनुहि यातुजूनाम्। उग्राय ते सहो बल न्ददामि- प्रतीत्या शत्रू न्विगदेषु वृश्च।।

08.06.21 卐व्य1(अ)र्य^ इन्द्र तनुहि श्रवां-स्योज स्स्थिरेव धन्वनोऽभिमातीः। अस्मद्र्य ग्वावृधान स्सहोभि- रनिभृष्ट स्तन्वँ वावृधस्व।।

卐 इदं हवि र्मघव न्तुभ्यं रातं- प्रति सम्रा ळऽहृणानो गृभाय। तुभ्यं सुतो मघव न्तुभ्यं पक्वो3(ओ)- ऽद्धीन्द्र पिब च प्रस्थितस्य।।

卐 अद्धीदिन्द्र प्रस्थितेमा हवींषि- चनो दधिष्व पचतोत सोमम्। प्रयस्वन्तः प्रति हर्यामसि त्वा- सत्या स्सन्तु यजमानस्य कामाः।।

卐 प्रेन्द्राग्निभ्यां सुवचस्या मियर्मि- सिन्धाविव प्रेरय न्नावमर्कैः। अयाइव परि चरन्ति देवा^- ये अस्मभ्य न्धनदा^ उद्भिदश्च।।

**10.117 न वा इति नवर्चस्य सूक्तस्याऽङ्गिरसो भिक्षुर्धनान्नदानं त्रिष्टुबाद्ये जगत्यौ।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

❀08.06.22 卐न वा उ देवाः≈क्षुध मिद्वध न्ददु- रुताऽशित मुप गच्छन्ति मृत्यवः। उतो~ रयिः पृणतो नोप दस्य-त्युताऽपृण न्मर्डितारन्न विन्दते।।

卐 य^ आध्राय चकमानाय पित्वो-ऽन्नवा न्त्सन्रफिता.योपजग्मुषे। स्थिरं मनः कृणुते सेवते पुरोतो~-चित्स मर्डितारन्न विन्दते ।।

卐 स इद्भोजो यो गृहवे ददा –त्यऽन्नकामाय चरते कृशाय। अरमस्मै भवति यामहूता -उतापरीषु कृणुते सखायम्।।

卐 न स सखा यो न ददाति सख्ये- सचाभुवे सचमानाय पित्वः। अपास्मा त्प्रेयान्न तदोको अस्ति- पृणन्त मन्य मरणञ्चिदिच्छेत्।।

卐 पृणीयादि न्नाधमानाय तव्या- न्द्राघीयांस मनु पश्येत पन्थाम्। ओ~ हि वर्तन्ते रथ्येव चक्रा-ऽन्यमन्य मुप तिष्ठन्त रायः।।

❀08.06.23 卐मोघ मन्नँ विन्दते अप्रचेता- स्सत्यं ब्रवीमि वध^ इत्स तस्य। नार्यमणं पुष्यति नो~ सखाय-ङ्केवलाघो भवति केवलादी।।

卐 कृशन्नि त्फाल^ आशित ङ्कृणोति- यन्नध्वान मप वृङ्क्ते चरित्रैः। वद न्ब्रह्मा वदतो वनीया- न्पृणन्नापि रपृणन्त मभि ष्यात्।।

卐 एकपा द्भूयो द्विपदो वि चक्रमे- द्विपा त्त्रिपाद मभ्येति पश्चात्। चतुष्पादेति द्विपदा मभिस्वरे- संपश्य न्पङ्क्ती रुपतिष्ठमानः।।

卐 समौ चिद्धस्तौ न समँ विविष्ट- स्संमातरा चि.न्न सम न्दुहाते। यमयो श्चिन्न समा वीर्याणि- ज्ञाती~ चित्सन्तौ न समं पृणीतः।।

☙ 10.118 अग्ने हंसीति नवर्चस्य सूक्तस्यामहीयव उरुक्षयो रक्षोहाऽग्निर्गायत्री।

❀08.06.24 卐अग्ने हंसि न्य1(अ)त्रिण- न्दीद्य न्मर्त्येष्वा। स्वे क्षये शुचिव्रत।।

卐 उत्तिष्ठसि स्वाहुतो- घृतानि प्रति मोदसे। यत्त्वा स्रुच स्सम.ऽस्थिरन्न्।।

卐 स आहुतो वि रोचते-ऽग्नि रीळेन्यो गिरा। स्रुचा प्रतीक मज्यते।।

卐 घृतेनाग्नि स्समज्यते- मधुप्रतीक^ आहुतः। रोचमानो विभावसुः।।

卐 जरमाण स्समिध्यसे- देवेभ्यो हव्यवाहन। तन्त्वा हवन्त मर्त्याः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀08.06.25 卐तं मर्ता अमर्त्य-ङ्घृतेनाऽग्निं सपर्यत। अदाभ्य.ङ्गृहपतिम्।।

卐 अदाभ्येन शोचिषा-ऽग्ने रक्षस्त्व न्दह। गोपा ऋतस्य दीदिहि।।

卐 स त्वमग्ने प्रतीकेन- प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत्।।

卐 तन्त्वा गीर्भि रुरुक्षया- हव्यवाहं समीधिरे। यजिष्ठं मानुषे जने।।

10.119 **इति वा इति त्रयोदशर्चस्य सूक्तस्यैन्द्रो लबो गायत्री।**

❀08.06.26 卐☞इति वा इति मे मनो- गामश्वं सनुया.मिति। कुवि त्सोमस्यापा.मिति।।

卐 प्र वाताइव दोधत- उन्मा पीता अयंसत। कुवि त्सोमस्यापा मिति।।

卐 उन्मा पीता अयंसत- रथ मश्वाइवाऽऽशवः। कुवि त्सोमस्याऽपा मिति।।

卐 उप मा मति रस्थित- वाश्रा पुत्रमिव प्रियम्। कुवि त्सोमस्याऽपा मिति।।

卐 अहन्तष्टेव वन्धुरं- पर्यचामि हृदा मतिम्। कुवि त्सोमस्याऽपा मिति।।

卐 नहि मे अक्षिप च्च-नाच्छान्त्सुः पञ्च कृष्टयः। कुवि त्सोमस्याऽपा मिति।।

❀08.06.27 卐☞नहि मे रोदसी-उभे अन्यं पक्षञ्चन प्रति। कुवि त्सोमस्याऽपा मिति।।

卐 अभि द्यां महिना भुव-मभी3(ई)मां पृथिवीं महीम्। कुवि त्सोमस्याऽपा मिति।।

卐 हन्ताहं पृथिवी मिमा-न्निदधानीह वेह वा। कुवि त्सोमस्याऽपा मिति।।

卐 ओषमि त्पृथिवी मह-ञ्जङ्घना नीह वेह वा। कुवि त्सोमस्याऽपा मिति।।

卐 दिवि मे अन्यः पक्षो3(ओ)-ऽधो अन्य मचीकृषम्। कुवि त्सोमस्याऽपा मिति।।

卐 अहमस्मि महामहो-ऽभिनभ्य मुदीषितः। कुवि त्सोमस्याऽपा मिति।।

卐 गृहो याम्यरङ्कृतो- देवेभ्यो हव्यवाहनः। कुवि त्सोमस्याऽपा मिति।।।।इति षष्ठाध्यायः।।

## अष्टमाष्टके सप्तमाध्यायः (वर्गाः 1-30)

10.120 **तदिदिति नवर्चस्य सूक्तस्याऽऽथर्वणो बृहद्दिव इन्द्रस्त्रिष्टुप्।**

❀08.07.01 卐तदिदास भुवनेषु ज्येष्ठँ- यतो जज्ञ उग्र स्त्वेषनृम्णः। सद्यो जज्ञानो नि रिणाति शत्रू-ननु यँ विश्वे मदन्त्यूमाः।।

卐 वावृधान श्शवसा भूर्योजा- श्शत्रु र्दासाय भियस न्दधाति। अव्यनच्च व्यनच्च सस्नि- सन्ते नवन्त प्रभृता मदेषु।।

卐 त्वे क्रतु॒ मपि॑ वृञ्जन्ति॒ विश्वे॒- द्विर्य॑ दे॒ते त्रिर्भव॒ न्त्यूमाः। स्वा॒दो स्स्वादी॑य स्स्वा॒दुना᳚ सृजा॒-ँसम॒द स्सु मधु॒ मधु॑ना॒ऽभि यो᳚धीः।।
卐 इति॑ चि॒द्धि त्वा॒ धना॒ जय॑न्तं॒- मदे॑मदे अनु॒मद॑न्ति॒ विप्रा᳚ः। ओजी᳚यो धृष्णो~ स्थि॒र मात॑नुष्व॒- मा त्वा᳚ दभ न्यातुधाना᳚ दु॒रेवाः।।
卐 त्वया᳚ व॒यं शा᳚शद्महे॒ रणे᳚षु- प्र॒पश्य॑न्तो यु॒धेन्या᳚नि॒ भूरि॑। चो॒दया᳚मि त॒ आयु॑धा॒ वचो᳚भि॒- स्सन्ते᳚ शिशामि॒ ब्रह्म॑णा॒ वयां᳚सि।।
❀08.07.02 卐स्तुषेय्यं᳚ पुरु॒वर्प॑स मृभ्व॑- मि॒नत॑म मा॒प्त्य मा॒प्त्याना᳚म्। आ द॑र्षते॒ शव॑सा स॒प्त दानू॒-न्प्र सा᳚क्षते प्र॒तिमाना᳚नि भूरि॑।।
卐 नि त॒द्दधि॒षेऽव॑रं॒ पर᳚ञ्च- यस्मि॒न्नावि॒थाऽव॑सा दु॒रोणे। आ मा॒तरा᳚ स्थापयसे जिग॒त्नू~- अत॑^ इनोषि॒ कर्व॑रा पु॒रूणि॑।।
卐 इ॒मा ब्रह्म॑ बृ॒हद्दि॑वो विव॒-क्तीन्द्रा᳚य शू॒ष म॑ग्रि॒य स्स्व॒र्षाः। म॒हो गो॒त्रस्य॑ क्षयति स्व॒राजो॒- दुर॑श्च॒ विश्वा॑^ अवृ॒णो॒ द॒प स्वाः।।
卐 ए॒वा म॒हा न्बृ॒हद्दि॑वो अथ॒र्वा-ऽवो॑च॒ स्वा॒.न्तन्व॑1(अ)मिन्द्र॒मेव। स्वसा᳚रो मा॒तरि॒भ्व॑री रि॒प्रा- हि॒न्वन्ति॑ च॒ शव॑सा व॒र्धय᳚न्ति च।।
☙ 10.121 **हिरण्यगर्भ इति दशर्चस्य सूक्तस्य, प्राजापत्यो हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्।**
❀08.07.03 卐हि॒र॒ण्य॒ग॒र्भ स्सम॑वर्तता॒ग्रे᳚- भू॒तस्य॑ जा॒तः पति॒ रेक॑^ आसीत्। स दा᳚धार पृथि॒वीन्द्या मु॒तेमा-ङ्कस्मै॑ दे॒वाय॑ ह॒विषा᳚ विधेम।।
卐 य^ आ᳚त्म॒दा^ ब॑ल॒दा^ यस्य॒ विश्व॑ -उपा॒ऽऽस॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः। यस्य॑ छा॒याऽमृ॒तं यस्य॑ मृ॒त्युः- कस्मै॑ दे॒वाय॑ ह॒विषा᳚ विधेम।।
卐 यः प्रा᳚ण॒तो नि॑मिष॒तो म॑हि॒-त्वैक॑^ इद्राजा॒ जग॑तो ब॒भूव॑। य^ ईशे᳚ अ॒स्य द्वि॒पद॒ श्चतु॑ष्पदः- कस्मै᳚ दे॒वाय॑ ह॒विषा᳚ विधेम।।
卐 यस्ये॒मे हि॒मव᳚न्तो महि॒त्वा- यस्य॑ समु॒द्रँ र॒सया᳚ स॒हाहुः। यस्ये॒माः प्र॒दिशो॒ यस्य॑ बा॒हू~कस्मै᳚ दे॒वाय॑ ह॒विषा᳚ विधेम।।

卐 येन द्यौरुग्रा पृथिवी च दृळ्हा- येन स्व~ स्स्तभितँ येन नाकः। यो अन्तरिक्षे रजसो विमानः- कस्मै देवाय हविषा विधेम।।

❀08.07.04 卐यङ्क्रन्दसी~ अवसा तस्तभाने~- अभ्यैक्षेतां मनसा रेजमाने~। यत्राधि सूर^ उदितो विभाति- कस्मै देवाय हविषा विधेम।।

卐 आपो ह यद्बृहती र्विश्व माय- न्गर्भ न्दधाना^ जनयन्ती रग्निम्। ततो देवानां समवर्ततासु रेकः- कस्मै देवाय हविषा विधेम।।

卐 यश्चिदापो महिना पर्यपश्य- द्दक्ष न्दधाना^ जनयन्तीर्यज्ञम्। यो देवेष्वधि देव^ एक^ आसी –त्कस्मै देवाय हविषा विधेम।।

卐 मा नो हिंसी ज्जनिता यः पृथिव्या- यो वा दिवं सत्यधर्मा जजान। यश्चाप श्चन्द्रा बृहती र्जजान- कस्मै देवाय हविषा विधेम।।

☞प्रजापते न त्वदेतान्यन्यो- विश्वा जातानि परि ता बभूव। यत्कामा स्ते जुहुम स्तन्नो अस्तु- वयं स्याम पतयो रयीणाम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

🏺 10.122 वसुमित्यष्टर्चस्य सूक्तस्य, वासिष्ठश्चित्रमहा अग्निर्जगती आद्या पञ्चम्यौ त्रिष्टुभौ।

❀08.07.05 卐वसुन्न चित्र महसङ्गृणीषे- वामं शेव मतिथि मद्विषेण्यम्। स रासते शुरुधो विश्वधायसो-ऽग्नि र्होता गृहपति स्सुवीर्यम्।।

卐 जुषाणो अग्ने प्रति हर्य मे वचो- विश्वानि विद्वा न्वयुनानि सुक्रतो~। घृतनिर्णि ग्ब्रह्मणे गातु मेरय- तव देवा^ अजनयन्ननु व्रतम्।।

卐 सप्त धामानि परियन्नमर्त्यो- दाश द्दाशुषे सुकृते मामहस्व। सुवीरेण रयिणाग्ने स्वाभुवा- यस्त आनट्त्समिधा तज्जुषस्व।।

卐 यज्ञस्य केतुं प्रथमं पुरोहितं- हविष्मन्त^ ईळते सप्त वाजिनम्। शृण्वन्त मग्नि.ङ्घृतपृष्ठ मुक्षणं- पृणन्त न्देवं पृणते सुवीर्यम्।।

卐 त्वन्दूतः प्रथमो वरेण्य- स्स हूयमानो अमृताय मत्स्व। त्वां मर्जय न्मरुतो दाशुषो गृहे- त्वां स्तोमेभि र्भृगवो वि रुरुचुः।।

❀08.07.06 卐इषं न्दुह न्त्सुदुघाँ विश्वधायसँ- यज्ञप्रिये यजमानाय सुक्रतो~। अग्ने घृतस्नुस्त्रिर् ऋतानि दीद्य- द्वर्ति र्यज्ञं परियं न्त्सुक्रतूयसे।।

卐 त्वामि दस्या^ उषसो व्युष्टिषु- दूतङ्कृण्वाना^ अयजन्त मानुषाः। त्वान्देवा^ महयाय्याय वावृधु- राज्य मग्ने निमृजन्तो अध्वरे।।

卐 नि त्वा वसिष्ठा^ अह्वन्त वाजिन-ङ्गृणन्तो अग्ने विदथेषु वेधसः। राय स्पोषँ यजमानेषु धारय -यूयं पात स्वस्तिभि स्सदा नः।।

10.123 **अयमित्यष्टर्चस्य सूक्तस्य, भार्गवो वेनो वेनस्त्रिष्टुप्।**

❀08.07.07 卐अयँ वेन श्चोदय त्पृश्निगर्भा- ज्योति र्जरायू रजसो विमाने। इम मपां सङ्गमे सूर्यस्य- शिशुन्न विप्रा^ मतिभी रिहन्ति।।

卐 समुद्रा दूर्मि मुदियर्ति वेनो- नभोजाः पृष्ठं हर्यतस्य दर्शि। ऋतस्य सानाँ वधि विष्टपि भ्रा-ट्त्समानँ योनि मभ्यनूषत व्राः।।

卐 समानं पूर्वी रभि वावशाना- स्तिष्ठ न्वत्सस्य मातर स्सनीळाः। ऋतस्य साना वधि चक्रमाणा- रिहन्ति मध्वो अमृतस्य वाणीः।।

卐 जानन्तो रूप मकृपन्त विप्रा^- मृगस्य घोषं महिषस्य हि ग्मन्न्। ऋतेन यन्तो अधि सिन्धु मस्थु- र्विद द्गन्धर्वो अमृतानि नाम।।

卐 अप्सरा^ जार मुपसिष्मियाणा- योषा बिभर्ति परमे व्योमन्न्। चरत्प्रियस्य योनिषु प्रिय स्स- न्त्सीदत्पक्षे हिरण्यये स वेनः।।

❀08.07.08 卐नाके सुपर्ण मुप यत्पतन्तं- हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षँ वरुणस्य दूतँ- यमस्य योनौ शकुनं भुरण्युम्।।

卐 ऊर्ध्वो गन्धर्वो अधि नाके अस्था- त्प्रत्यङ्चित्रा बिभ्र दस्याऽऽयुधानि। वसानो अत्कं सुरभि न्दृशे कं- स्व1(अ)र्ण नाम जनत प्रियाणि।।

卐 द्रप्स स्समुद्र मभि यज्जिगाति- पश्य न्गृध्रस्य चक्षसा विधर्मन्न्। भानु श्शुक्रेण शोचिषा चकान- स्तृतीये चक्रे रजसि प्रियाणि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☃ 10.124 **इमं न इति नवर्चस्य सूक्तस्याऽद्यायाः पञ्चम्यादि चतसृणां चाग्निवरुणसोमा ऋषयः, द्वितीयादि तिसृणामग्निर्ऋषिः, आद्यानां चतसृणामग्निः, पञ्चमी सप्तम्यष्टमीनां वरुणः षष्ठ्याः सोमो नवम्याः सोमेन्द्रौ त्रिष्टुप्सप्तमी जगती।**

❀08.07.09 卐इमन्नो अग्न उप यज्ञ मेहि- पञ्चयाम न्त्रिवृतं सप्ततन्तुम्। असो हव्यवाळुत नः पुरोगा- ज्योगेव दीर्घ न्तम^ आऽशयिष्ठाः।।

卐 अदेवा द्देवः प्रचता गुहा य-न्प्रपश्यमानो अमृतत्व मेमि। शिवँ यत्सन्त मशिवो जहामि- स्वा त्सख्या दऽरणी.न्नाभि मेमि।।

卐 पश्यन्नन्यस्या^ अतिथिँ वयाया^- ऋतस्य धाम वि मिमे पुरूणि। शंसामि पित्रे असुराय शेव- मयज्ञिया द्यज्ञियं भाग मेमि।।

卐 बह्वी स्समा^ अकर मन्त रस्मि- न्निन्द्रँ वृणानः पितर.ञ्जहामि। अग्नि स्सोमो वरुणस्ते च्यवन्ते- पर्यावर्द्राष्ट्र न्तदवा म्याऽऽयन्न्।।

卐 निर्माया^ उ त्ये असुरा^ अभूव-न्त्वञ्च मा वरुण कामयासे। ऋतेन राजन्ननृतँ विविञ्च- न्मम राष्ट्रस्याऽऽधिपत्य मेहि।।

❀08.07.10 卐इदं स्वरिद मिदास वाम- मयं प्रकाश^ उर्व1(अ)न्तरिक्षम्। हनाव वृत्र न्निरेहि सोम हविष्ट्वा- सन्तं हविषा यजाम।।

卐 कविः कवित्वा दिवि रूप माऽसज- दऽप्रभूती वरुणो निरऽप स्सृजत् । क्षेमङ्कृण्वाना^ जनयो न सिन्धव- स्ता^ अस्य वर्ण शुचयो भरिभ्रति।।

卐 ता^ अस्य ज्येष्ठ मिन्द्रियं सचन्ते- ता^ ईमा क्षेति स्वधया मदन्तीः। ता^ ईं विशो न राजानँ वृणाना- बीभत्सुवो अप वृत्रा दतिष्ठन्न्।।

卐 बीभत्सूनां सयुजं हंस माहु- रपा न्दिव्यानां सख्ये चरन्तम्। अनुष्टुभ मनु चर्चूर्यमाण- मिन्द्र न्नि चिक्युः कवयो मनीषा।।

☃ 10.125 **अहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्याऽऽम्भृणिर्वागाम्भृणिर्वाक्त्रिष्टुप् द्वितीया जगती।**

❀08.07.12 卐अहं रुद्रेभि र्वसुभि श्चरा-म्यह मादित्यै रुत विश्वदेवैः। अहं मित्रावरुणोभा बिभ -र्म्यह मिन्द्राग्नी~ अह मश्विनोभा।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अहं सोम माहनसं बिभ-र्म्यह न्त्वष्टार मुत पूषणं भगम्। अह न्दधामि द्रविणं हविष्मते-सुप्राव्ये3(ए) यजमानाय सुन्वते।।

卐 अहं राष्ट्री सङ्गमनी वसूना-श्चिकितुषी प्रथमा यज्ञियानाम्। तां मा देवा^ व्यदधुः पुरुत्रा- भूरिस्थात्रां भूर्यावेशयन्तीम्।।

卐 मया सो अन्न मत्ति यो विपश्यति- यः प्राणिति य^ ईं शृणो त्युक्तम्। अमन्तवो मान्त उप क्षियन्ति-श्रुधि श्रुत श्रद्धिवन्ते वदामि।।

卐 अह मेव स्वय मिदं वदामि- जुष्ट न्देवेभि रुत मानुषेभिः। यङ्कामये तन्त मुग्र.ङ्कृणोमि- तं ब्रह्माण न्तमृषिन्तं सुमेधाम्।।

❀08.07.12 卐अहं रुद्राय धनु रातनोमि- ब्रह्मद्विषे शरवे हन्तवा उ। अहञ्जनाय समद.ङ्कृणो-म्यह न्द्यावापृथिवी~ आविवेश।।

卐 अहं सुवे पितर मस्य मूर्ध- न्मम योनि रप्स्व1(अ)न्त~ स्समुद्रे। ततो वि तिष्ठे भुवनानु विश्वो-तामून्द्यां वर्ष्मणोप स्पृशामि।।

卐 अह मेव वातइव प्र वाम्या-ऽरभमाणा भुवनानि विश्वा। परो दिवा पर^ एना पृथिव्यै-तावती महिना सं बभूव।।

10.126 **न तमित्यष्टर्चस्य सूक्तस्य, शैलूषिः कुल्मल बर्हिषो विश्वेदेवा उपरिष्टा द्बृहत्यन्त्या त्रिष्टुप्।**
**(अत्र वामदेव्योंऽहोमुक्पाक्षिक ऋषिः। कुल्मल बर्हिष इत्यदन्तं प्रातिपदिकम्)।**

❀08.07.13 卐न तमंहो न दुरित- न्देवासो अष्ट मर्त्यम्। सजोषसो यमर्यमा- मित्रो नयन्ति वरुणो अति द्विषः।।

卐 तद्धि वयँ वृणीमहे- वरुण मित्रार्यमन्न्। येना निरंहसो यूयं- पाथ नेथा च मर्त्य मति द्विषः।।

卐 ते नून न्नोऽय मूतये वरुणो मित्रो अर्यमा। नयिष्ठा^ उ नो नेषणि- पर्षिष्ठा^ उ नः पर्षण्यति द्विषः।।

卐 यूयँ विश्वं परि पाथ- वरुणो मित्रो अर्यमा। युष्माकं शर्मणि प्रिये- स्याम सुप्रणीतयोऽति द्विषः।।

卐 आदित्यासो अति स्रिधो- वरुणो मित्रो अर्यमा। उग्रं मरुद्भी रुद्रं हुवेमे-न्द्र मग्निं स्वस्तयेऽति द्विषः।।

卐 नेतार^ ऊ षु ण स्तिरो- वरुणो मित्रो अर्यमा। अति विश्वानि दुरिता- राजान श्चर्षणीना मति द्विषः।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 शुन मस्मभ्यं मूतये- वरुणो मित्रो अर्यमा। शर्म यच्छन्तु सप्रथ^ -आदित्यासो यदीमहे अति द्विषः।।

卐 यथा ह त्य द्वसवो गौर्यञ्चि- त्पदि षिता ममुञ्चता यजत्राः। एवो ष्व1(अ)स्म न्मुञ्चता व्यंहः- प्र तार्यग्ने प्रतरन्न आयुः।।

**10.127 रात्रीत्यष्टर्चस्य सूक्तस्य, सौभरः कुशिको रात्रिर्गायत्री। (अत्र भारद्वाजी रात्रिऋषिका पाक्षिकी)।**

❀08.07.14 卐 रात्री व्यख्य दायती- पुरुत्रा देव्य1(अ)क्षभिः। विश्वा^ अधि श्रियोधित।।

卐 ओर्वप्रा^ अमर्त्या निवतो- देव्यु1(उ)द्वतः। ज्योतिषा बाधते तमः।।

卐 निरु स्वसार मस्कृतो-षस न्देव्यायती। अपेदु हासते तमः।।

卐 सा नो अद्य यस्या^ वय-न्नि ते यामन्नविक्ष्महि। वृक्षे न वसतिँ वयः।।

卐 नि ग्रामासो अविक्षत- नि पद्वन्तो नि पक्षिणः। नि श्येनास श्चिदर्थिनः।।

卐 यावया वृक्य1(अँ)वृकँ- यवय स्तेन मूर्म्ये। अथा न स्सुतरा भव।।

卐 उप मा पेपिश त्तमः- कृष्णँ व्यक्त मस्थित। उष^ ऋणेव यातय।।

卐 उप ते गाइवाकरँ- वृणीष्व दुहित र्दिवः। रात्रि स्तोमन्न जिग्युषे।।

卐 ।। अथ परिशिष्टम्।।

卐 आ रात्रि पार्थिवं रजः- पितरः प्रायु धामभिः। दिव स्सदांसि बृहती वि तिष्ठस- आ त्वेषँ वर्तते तमः।।

卐 ये ते रात्रि नृचक्षसो- युक्तासो नवति र्नव। अशीति स्सन्त्वष्टा- उतो ते सप्त सप्ततीः।।

卐 रात्रीं प्रपद्ये जननीं- सर्वभूतनिवेशनीम्। भद्रां भगवतीङ्कृष्णाँ- विश्वस्य जगतो निशाम्।।

卐 सँवेशिनीं सँयमिनी-ङ्ग्रहनक्षत्रमालिनीम्। प्रपन्नोऽहं शिवां रात्रीं- भद्रे पार मशीमहि।। [भद्रे पार मशीमह्योन्नमः]

卐 स्तोष्यामि प्रयतो देवीं- शरण्यां बह्वृचप्रियाम्। सहस्रसंमिता न्दुर्गा।।जातवेदसे सुनवाम सोमम्।।

卐 शान्त्यर्थ न्तद्द्विजातीना- मृषिभि स्सोमपाश्रिताः। ऋग्वेदे त्वं समुत्पन्ना-ऽरातीयतो नि दहाति वेदः।।

卐 ये त्वान्देवि प्रपद्यन्ति- ब्राह्मणा हव्यवाहनीम्। अविद्या बहुविद्या वा- स नः पर्ष दति दुर्गाणि विश्वा।।

卐 ये अग्निवर्णां शुभां सौम्या-ङ्कीर्तयिष्यन्ति ये द्विजाः। तां स्तारयति दुर्गाणि- नावेव सिन्धु न्दुरिताऽत्यग्निः।।

卐 दुर्गेषु विषमे घोरे- सङ्ग्रामे रिपुसङ्कटे। अग्निचोरनिपातेषु -दुष्टग्रहनिवारिणि।। (दुष्टग्रहनिवारिण्योन्नमः)।

卐 दुर्गेषु विषमेषु त्वं- सङ्ग्रामेषु वनेषु च। मोहयित्वा प्रपद्यन्ते- तेषां मे अभयङ्कुरु।। [तेषां मे अभयङ्कुर्वोन्नमः]।।

卐 केशिनीं सर्वभूतानां- पञ्चमीति च नाम च। सा मां समा निशा देवी- सर्वतः परि रक्षतु।। [सर्वतः परि रक्षत्वोन्नमः]।।

卐 ता मग्निवर्णा न्तपसा ज्वलन्तीं- वैरोचनीङ्कर्मफलेषु जुष्टाम्। दुर्गा न्देवीं शरण महं प्रपद्ये- सुतरसि तरसे नम- स्सुतरसि तरसे नमः।।

卐 दुर्गा दुर्गेषु स्थानेषु- शन्नो देवी रभिष्टये। य इम न्दुर्गास्तवं पुण्यं- रात्रौरात्रौ सदा पठेत्।।

卐 रात्रिः कुशिक स्सौभरो- रात्रिर्वा भारद्वाजी रात्रिस्तवङ्गायत्रम्।। रात्रीसूक्तञ्जपे न्नित्य- न्तत्काल मुपपद्यते। न योनिं पुन रायाति- सर्वपापैः प्रमुच्यते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 क्षीरेण स्नापिता -दुर्गा चन्दनेन विलेपिता। बिल्वपत्र कृतापीडा- नमो दुर्गे नमो नमः।।

卐 सर्वभूतपिशाचेभ्य- स्सर्वसर्पसरीसृपैः। दैवेभ्यो मानुषेभ्यश्च- उभयेभ्योऽभिरक्ष माम्।।

卐 या ऋग्वेदे स्तुता- देवी काश्यपेन उदाहृता। जातवेदप्रभा गौरी- जातवेदसे सुनवाम सोमम्।।

卐 सुरासुरै द्विजवरैः- पिशाचोरगराक्षसैः। अरातिभय उत्पन्ने- अरातीयतो नि दहाति वेदः।।

卐 गजद्वारेऽपथे घोरे- सङ्ग्रामेषु च गौतमी। सर्व रक्षतु दुरितं स नः- पर्षदति दुर्गाणि विश्वा।।

卐 महाभये समुत्पन्ने- स्मरन्ति च जपन्ति च। सर्व न्तारयते दुर्गा- नावेव सिन्धुन्दुरिताऽत्यग्निः।।

卐 य इम न्दुर्गास्तवं- पुण्यं श्रृण्वन्ति च जपन्ति च। त्रिषु लोकेषु विख्यात -न्त्रिषु लोकेषु पूजितम्।।

卐 अपुत्रो लभते पुत्रा- न्धनहीनो धनँ लभेत्। अचक्षु र्लभते चक्षु र्बद्धो- मुच्येत बन्धनात्।।

卐 व्याधितो मुच्यते- रोगा दरोगी श्रिय माप्नुयात्। ददाति कामितं सर्व।।ङ्कात्यायनि नमोऽस्तु ते।।

卐 [उलूकयातुं शुशुलूकयातुञ्जहि- श्वयातु मुत कोकयातुम्। सुपर्णयातु मुत गृध्रयातु -न्दृष इव प्रमृण रक्ष इन्द्र।।

卐 पिशङ्गभृष्टि मम्भृणं- पिशाचि मिन्द्र सं मृण। सर्वं रक्षो नि बर्हय]।।

卐 ।। इति परिशिष्टम्।।

10.128 **ममाग्ने इति नवर्चस्य सूक्तस्याऽऽङ्गिरसो विहव्यो विश्वेदेवास्त्रिष्टुबन्त्या जगती।**

❀08.07.15 卐ममाग्ने वर्चो विहवेष्वऽस्तु- वय न्त्वेन्धाना स्तन्वं पुषेम। मह्यन्नमन्तां प्रदिश श्चतस्र- स्त्वयाऽध्यक्षेण पृतना^ जयेम।।

卐 मम देवा^ विहवे सन्तु सर्व- इन्द्रवन्तो मरुतो विष्णु रग्निः। ममान्तरिक्ष मुरुलोक मस्तु- मह्यं वात꞉ पवताङ्कामे अस्मिन्न्।।

卐 मयि देवा^ द्रविणमा यजन्तां- मय्याऽऽशी रस्तु मयि देवहूतिः। दैव्या^ होतारो वनुषन्त पूर्वे-ऽरिष्टा स्स्याम तन्वा सुवीराः।।

卐 मह्यं यजन्तु मम यानि हव्याऽऽकूति- स्सत्या मनसो मे अस्तु। एनो मा नि गा.ङ्कतम.च्चनाहं- विश्वे देवासो अधि वोचता नः।।

卐 देवीष्षळुर्वी रुरुण꞉ कृणोत- विश्वे देवास^ इह वीरयध्वम्। मा हास्महि प्रजया मा तनूभि- र्मा रधाम द्विषते सोम राजन्न्।।

❀08.07.16 卐अग्ने मन्युं प्रतिनुद न्परेषा- मदब्धो गोपा꞉ परि पाहि न स्त्वम्। प्रत्यञ्चो यन्तु निगुत꞉ पुन~स्ते3(ए)-ऽमैषाञ्चित्तं प्रबुधा वि नेशत्।।

卐 धाता धातॄणां भुवनस्य यस्पति- र्देव न्त्रातार मभिमातिषाहम्। इमं यज्ञ मश्विनोभा बृहस्पति- र्देवा꞉ पान्तु यजमान न्न्यर्थात्।।

卐 उरुव्यचा^ नो महिष श्शर्म यंस- दस्मि न्हवे पुरुहूत꞉ पुरुक्षुः। स न꞉ प्रजायै हर्यश्व मृळये-न्द्र मा नो रीरिषो मा परा दाः।।

卐 ये न स्सपत्ना^ अप ते भव -न्त्विन्द्राग्निभ्या मव बाधामहे तान्। वसवो रुद्रा^ आदित्या^ उपरिस्पृशं- मोग्रञ्चेत्तार मधिराज मक्रन्न्।।

।। अथ परिशिष्टम्-1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अर्वाञ्च मिन्द्र ममुतो हवामहे- यो गोजि द्धनजि दश्वजिद्यः। इम न्नो हव्यँ विहवे जुषस्वा-ऽस्य कुल्मो हरिवो मेदिनन्त्वा।।

卐 ।। इति परिशिष्टम्।।

卐 ।। अथ परिशिष्टम्-2।।

卐 आयुष्यँ वर्चस्यं- रायस्पोष मौद्भिदम्। इदं हिरण्यँ वर्चस्व- ज्जैत्राया ऽऽविशता दिमाम्।।

卐 उच्चैर्वाजि पृतनाषा-ट्त्सभासाह न्धनञ्जयम्। सर्वा स्समग्रा ऋद्धयो- हिरण्येऽस्मि न्त्समाहिताः।।

卐 शुन महं हिरण्यस्य- पितु र्मानेव जग्रभ। तेन मां सूर्यत्वच- मकरं पूरुषु प्रियम्।।

卐 सम्राजञ्च विराजञ्चा-ऽभिष्टि र्या च मे ध्रुवा। लक्ष्मी राष्ट्रस्य या मुखे- तया मामिन्द्र सं सृज।।

卐 अग्नेः प्रजातं परि यद्धिरण्य- ममृतँ यज्ञे अधि मर्त्येषु। य एन द्वेद स इदेन मर्हति- जरामृत्यु र्भवति यो बिभर्ति।।

卐 यद्वेद राजा वरुणो- यद्वु देवी सरस्वती। इन्द्रो यद्वृत्रहा वेद- तन्मे वर्चस आयुषे।।

卐 न तद्रक्षांसि न पिशाचा श्चरन्ति- देवाना मोजः प्रथमजं ह्ये3(ए)तत्। यो बिभर्ति दाक्षायणा हिरण्यं- स देवेषु कृणुते दीर्घ मायु -स्स मनुष्येषु कृणुते दीर्घ मायुः।।

卐 यदाबध्न न्दाक्षायणा हिरण्यं- शतानीकाय सुमनस्यमानाः। तन्न आ बध्नामि शतशारदा- ऽऽयायुष्माञ्जरदष्टि र्यथाऽसत्।।

卐 घृतादुल्लुप्तं मधुम त्सुवर्ण- न्धनञ्जय न्धरुण न्धारयिष्णु। ऋणक्सपत्ना दधरांश्च कृण्वदा- रोह मां महते सौभगाय।।

卐 प्रियं मा कुरु देवेषु- प्रियं राजसु मा कुरु। प्रियँ विश्वेषु गोत्रेषु- मयि धेहि रुचा रुचम्।।

卐 अग्नि र्येन विराजति- सूर्यो येन विराजति। विराज्येन विराजति- तेनास्मा न्ब्रह्मणस्पते विराज समिधङ्कुरु।।

卐 ।। इति परिशिष्टम्।।

卐 ।। अथ परिशिष्टम्-3।।

卐 याङ्कल्पयन्ति नोऽरयः- क्रूराङ्कृत्याँ वधूमिव। तां ब्रह्मणाऽप निर्णुद्मः- प्रत्य क्कर्तार मृच्छतु।।

卐 शीर्षण्वतीङ्कर्णवतीँ- विषुरूपां भयङ्करीम्। यः प्राहिणो दिहाद्य- त्वाँ वि तन्त्वँ योजयासुभिः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 येन दिष्टेह वहसि- प्रतिकूल मघार्यिनि। तमेवेतो नि वर्तस्व- माऽस्मा न्मृच्छो अनागसः।।

卐 अभिवर्तस्व कर्तार- न्निरस्तास्माभि रोजसा। आयु रस्य नि कृन्तस्व -प्रजाञ्च पुरुषादिनि।

यस्त्वा कृत्ये चकारेह- तन्त्वङ्गच्छ पुनर्नवे। अरातीः कृत्ये नाशय- सर्वाश्च यातुधान्यः।।

卐 क्षिप्रङ्कृत्ये नि वर्तस्व- कर्तुरेव गृहान्प्रति। पशूंश्चैवास्य नाशय- वीरांश्चास्य नि बर्हय।।

卐 यस्त्वा कृत्ये प्रजिघाय- विद्वाँ अविदुषो गृहान्। तस्यैवेतः परेत्याशु- तनुङ्कृधि परुष्परुः।।

卐 प्रतीची न्त्वाऽपसेधतु- ब्रह्म रोचिष्णवमित्रहा। अग्निश्च कृत्ये रक्षोहा- रिप्रहा चार्ज एकपात्।।

卐 यथा त्वाऽङ्गिरसः- पूर्वे भृगव श्चाप सेधिरे। अत्रयश्च वसिष्ठाश्च- तथैव त्वाऽप सेधिम।।

卐 यस्ते परूंषि सन्दधौ- रथस्येव विभु र्धिया। तङ्गच्छ तत्र तेऽयन- मज्ञातस्ते अयञ्जनः।।

❀ यो नः कश्चि द्रणस्थो- वा कश्चि द्वाऽन्योऽभि हिंसति। तस्य त्वन्द्रोरिवेद्धो-ऽग्नि स्तनू मृच्छस्व हेळिता।।

卐 भवाशर्वा देवहेळि- मस्यत पापकृत्वने। हरस्वती त्वञ्च कृत्ये- मोच्छिष स्तस्य किञ्चन।।

卐 यो नः कश्चि द्रुहाराति- र्मनसा प्रतिभूषति। दूरस्थो वाऽन्तिकस्थो- वा तस्य हृद्य मसृक्पिब।।

卐 येनासि कृत्ये प्रहिता- दूढ्येनास्म जिघांसया। तस्य व्यानञ्चाव्यानञ्च- हिनस्तु हरसाऽशनिः।।

卐 ये न शिवासः पन्थानः- परायन्ति परावतम्। तैर्दिवि रात्र्याः कृत्या -नो गमय स्वानुकृत्तये।।

❀ यदि वैषि द्विप द्यस्मा- न्यदि वैषि चतुष्पदी। निरस्तेतो व्रजास्माभिः -कर्तु रष्टापदी गृहान्।।

卐 यो न श्शपा दशपतो- यश्च न श्शपत श्शपात्। वृक्षमिव विद्यु दाशु -तमामूला दनु शोषय।।

卐 यन्द्विष्मो यश्च नो द्वेष्ट्यघायु- र्यश्च न श्शपात्। शुने पिष्टमिव क्षाम- न्तं प्रत्यस्य स्वमृत्यवे।।

卐 यश्च सापत्न श्शपथो- यश्च यामी शपाति नः। ब्रह्मा च यत्क्रुद्ध श्शपा- त्सर्व न्तत्कृध्यधस्पदम्।।

卐 सबन्धु श्चाप्यबन्धुश्च- यो अस्माँ अभिदासति। तस्य त्वं भिन्ध्यधिष्ठाय- पदा विस्फूर्य तच्छिरः।।

卐 अभि प्रेहि सहस्राक्षँ- युक्त्वा तु शपथं रथे। शत्रू नन्विच्छन्ती कृत्ये- वृकीवा विमतो गृहान्।।

卐 परि णो वृङ्ग्धिशपथा- न्दहन्नग्निरिव ह्रदम्। शत्रू नेवाभितो जहि- दिव्या वृक्षमिवाशनिः।।

卐 शत्रून्मे प्रोथ शपथा-त्कृत्याश्च सुहृदोऽसुहृत्। जिह्वा श्श्लक्ष्णाश्च- दुर्हृद स्समिद्ध.ञ्जातवेदसम्।।

卐 असपत्नं पुरस्तान्न- श्शिव न्दक्षिणतः कृधि। अभयं सततं पश्चा- द्भद्र मुत्तरतो गृहे।।

卐 परेहि कृत्ये मा तिष्ठ- विद्धस्येव पदन्नय। मृगस्य हि मृगारिप्रो- न त्वा नीकर्तु मर्हति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀ अघ्यास्येव घोररूपे- विषुरूपेऽविनाशिनि। जृम्भिता प्रतिगृभ्णीष्व- स्वय मादाय चाद्भुतम्।।

卐 त्वमिन्द्रो यमो वरुण- स्त्वमापोऽग्नि रथानिलः। त्वं ब्रह्मा चैव रुद्रश्च- त्वष्टा चैव प्रजापतिः।।

卐 आवर्तध्व न्निवर्तध्व मृतवꣳ- परिवत्सराः। अहोरात्रा श्चाब्दाश्च- त्वन्दिशꣳ प्रदिश श्च मे।।

卐 त्वँ यमँ वरुणं सोम- न्त्वमापोऽग्नि मथानिलम्। अत्राहृत्य पशूंश्चैव -मुत्पादयसि चाद्भुतम्।।

卐 ये मे दमे दारुगर्भे- शयान न्धिया सहितं पुरुष न्नि जह्नुः। कुम्भीपाकन्नरक ङ्ग्रीवबद्धं -हता एवं पुरुषासो यमस्य।।

❀ अभ्यक्ताक्ता स्वलङ्कृता- सर्वं न्नो दुरित न्दह। जानीथा श्चैव कृत्याना-ङ्कर्तॄ न्नृन्पापचेतसः।।

卐 यथा हन्ति पुराऽऽसीन- न्तथैवेष्वा सुकृन्नरः। तथा त्वया युजा वय- न्निकृण्म स्थास्नु जङ्गमम्।।

卐 उत्तिष्ठैव परेहीतोऽज्ञाते- किमिहेच्छसि। ग्रीवा स्ते कृत्ये पादौ- चाभि कर्त्स्यामि वि द्रव।।

卐 स्वायसा स्सन्ति नो-ऽसयो विद्म चैव परूंषि ते। तैस्ते निकृण्म स्तान्युग्रे- यदि नो जीवयस्वरीन्।।

卐 मास्योच्छिषो द्विपदं- मोत किञ्चिच्चतुष्पदम्। मा ज्ञाती ननुजा- न्पूर्वा न्मा वेशि प्रतिवेशिनौ।।

卐 शत्रूयता प्रहिताऽसि- दूढ्येनाभि यथायतः। तत स्तथा त्वा नुदतु- योऽय मन्त मयि श्रितः।।

卐 एव न्त्वन्निकृताऽस्माभि- र्ब्रह्मणा देवि सर्वशः। यथेत माश्रिता गत्वा -पापधीनिव नो जहि।।

卐 यथा विद्युद्धतो वृक्ष- आमूला दनु शुष्यति। एवं स प्रतिशुष्यतु- यो मे पापञ्चिकीर्षति।।

卐 यथा प्रतिशुको भूत्वा- तमेव प्रतिधावति। पाप न्तमेव न्धावतु- यो मे पाप ञ्चिकीर्षति।।

卐 यो न स्स्वो अरणो- यश्च निष्ट्यो जिघांसति। देवा स्तं सर्वे धूर्वन्तु- ब्रह्म वर्म ममान्तरम्।।

卐 उत्त्वा मन्दन्तु स्तोमाꣳ- कृणुष्व राधो अद्रिवः। अव ब्रह्म द्विषो जहि।।

卐 कुबेर ते मुखं- रौद्रन्नन्दि न्नानन्द मावह। ज्वरमृत्युभयङ्घोरँ विश- नाशय मे ज्वरम्।।

卐 यो मे करोति प्रद्वारे- यो गृहे यो निवेशने। यो मे केशनखे कुर्या- दञ्जने दन्तधावने।।

卐 प्रतिसर प्रतिधाव- कुमारीव पितुर्गृहान्। मूर्धान मेषां स्फोटय- पद मेषाङ्कुले कृधि।।

卐 ये नो रयि न्दुश्चरितासो- अग्ने जह्नु र्मर्तासो अनृतँ वदन्तः। तेषाँ वपूंष्यर्चिषा जातवेद -श्शुष्कन्न वृक्ष मभि सन्दहस्व।।

卐 कृष्णवर्णे महद्रूपे- बृहत्कर्णे महद्भये। देवि देवि महादेवि- मम शत्रू न्विनाशय।।

卐 खड्ग ट्जहि महाकृत्ये -विधूमाग्निसमप्रभे। जहि शत्रूंस्त्रिशूलेन- क्रुध्यस्व पिब शोणितम्।।

卐 ये द्रुह्युर् ऋजवे -मह्यं मग्ने कदाधियो दुर्मदा अश्र्मनासः। आबध्यैतान्छोचिषा विध्य- तन्तू न्वैवस्वतस्य सदनन्नयस्व।।

卐 ।। इति परिशिष्टम्।।

10.129 **नासदिति सप्तर्चस्य सूक्तस्य, परमेष्ठी प्रजापतिर्भाववृत्तिस्त्रिष्टुप्।**

08.07.17 卐नासदासी न्नो सदासी -त्तदानी न्नासी द्रजो नो~ व्योमा परो यत्। किमाऽवरीवः कुह कस्य शर्म-न्नम्भः किमासी द्गहनङ्गभीरम्।।

卐 न मृत्यु रासी दमृतन्न तर्हि- न रात्र्या अह्न आसी त्प्रकेतः। आनीदवातं स्वधया तदेक-. न्तस्मा द्धान्यन्न परः किञ्चनाऽऽस।।

卐 तम आसी त्तमसा गूळ्ह मग्रे-ऽप्रकेतं सलिलं सर्वमा इदम्। तुच्छ्येनाभ्वपिहितँ यदासी- त्तपस स्तन्महिना जायतैकम्।।

卐 काम स्तदग्रे समवर्तताधि- मनसो रेतः प्रथमँ यदासीत्। सतो बन्धु मसति निरविन्द- न्हृदि प्रतीष्या कवयो मनीषा।।

卐 तिरश्चीनो विततो रश्मि रेषा-.मधः स्विदासी '3' दुपरि स्विदासी '3' त्। रेतोधा आस न्महिमान आस- न्त्स्वधा अवस्ता त्प्रयतिः परस्तात्।।

卐 को अद्धा वेद क इह प्र वोच- त्कुत आजाता कुत इयँ विसृष्टिः। अर्वा ग्देवा अस्य विसर्जने- नाऽथा को वेद यत आबभूव।।

卐 इयँ विसृष्टि र्यत आबभूव- यदि वा दधे यदि वा न। यो अस्याध्यक्षः परमे व्योम न्त्सो -अङ्ग वेद यदि वा न वेद।।

10.130 **यो यज्ञ इति सप्तर्चस्य सूक्तस्य, प्राजापत्यो यज्ञो भाववृत्तिस्त्रिष्टुबाद्या जगती।**

08.07.18 卐यो यज्ञो विश्वत स्तन्तुभि स्तत- एकशत न्देवकर्मेभि रायतः। इमे वयन्ति पितरो य आययुः- प्र वयाप वयेत्यासते तते।।

卐 पुमाँ एन न्तनुत उत्कृणत्ति- पुमा न्वि तत्ने अधि नाके अस्मिन्न्। इमे मयूखा उप सेदुरू सद- स्सामानि चक्रु स्तसराण्योतवे।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 कासी त्प्रमा प्रतिमा किन्निदान- माज्यङ्किमासी त्परिधिः क^ आसीत्। छन्दः किमासी त्प्रउग.ङ्किमुक्थँ- यद्देवा^ देव मयजन्त विश्वे।

卐 अग्नेर्गायत्र्यभव.त्सयु-ग्वो-ष्णिहया सविता सं बभूव। अनुष्टुभा सोम^ उक्थै र्महस्वा- न्बृहस्पते र्बृहती वाच मावत्।।

卐 विराण्मित्रावरुणयो रभिश्री- रिन्द्रस्य त्रिष्टु बिह भागो अह्नः। विश्वा न्देवान्जगत्याविवेश- तेन चाक्लृप्र ऋषयो मनुष्याः।।

卐 चाक्लृप्रे तेन ऋषयो मनुष्या^- यज्ञे जाते पितरो नः पुराणे। पश्य न्मन्ये मनसा चक्षसा तान्य- इमँ यज्ञ मयजन्त पूर्वे।।

卐 सहस्तोमा स्सहछन्दस^ आवृत- स्सहप्रमा^ ऋषय स्सप्त दैव्याः। पूर्वेषां पन्था मनुदृश्य धीरा^- अन्वालेभिरे रथ्यो3(ओ) न रश्मीन्।।

🏺 10.131 **अप प्राच इति सप्तर्चस्य सूक्तस्य, काक्षीवतः सुकीर्ति रिन्द्रश्चतुर्थी पञ्चम्यो रश्विनौ त्रिष्टुप्चतुर्थ्यनुष्टुप्।**

❀08.07.19 卐अप प्राच^ इन्द्र विश्वाँ अमित्रा- नपापाचो अभिभूते नुदस्व। अपोदीचो अप शूराधराच^- उरौ यथा तव शर्म न्मदेम।।

卐 कुविदङ्ग यवमन्तो यवञ्चि-द्यथा दान्त्यनुपूर्वँ वियूय। इहेहैषा.ङ्कृणुहि भोजनानि ये- बर्हिषो नमोवृक्तिन्न जग्मुः।।

卐 नहि स्थूर्यृतुथा यात मस्ति -नोत श्रवो विविदे सङ्गमेषु। गव्यन्त^ इन्द्रं सख्याय विप्रा^- अश्वायन्तो वृषणँ वाजयन्तः।।

卐 युवं सुराम मश्विना- नमुचा वासुरे सचा। विपिपाना शुभस्पती ~-इन्द्रङ्कर्मस्वावतम्।।

卐 पुत्रमिव पितरा वश्विनो-भेन्द्रावथुः काव्यै र्दंसनाभिः। यत्सुरामँ व्यपिब श्शचीभि- स्सरस्वती त्वा मघवन्नभिष्णक्।।

卐 इन्द्र स्सुत्रामा स्ववाँ अवोभि- स्सुमृळीको भवतु विश्ववेदाः। बाधतान्द्वेषो अभयङ्कृणोतु- सुवीर्यस्य पतय स्स्याम।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 तस्य वयं सुमतौ यज्ञियस्यापि- भद्रे सौमनसे स्याम। स सुत्रामा स्ववा॰ इन्द्रो अस्मे- आराच्चि द्वेष स्सनुत र्युयोतु।।

☬ 10.132 **ईजानमिति सप्तर्चस्य सूक्तस्य, नार्मेध श्शकपूतो मित्रावरुणावाद्याया द्युभूम्यश्विनो विराड्रूपाः, आद्या न्यङ्कुसारिणी, द्वितीया षष्ठ्यौ प्रस्तारपङ्क्ती, अन्त्या महासतोबृहती।**

❀08.07.20 卐**ईजान** मिद्यौ र्गूर्तावसु- रीजानं भूमि रभि प्रभूषणि। ईजान न्देवा वश्विना- वभि सुम्नै रवर्धताम्।।

卐 ता वां मित्रावरुणा धारयत्क्षिती~- सुषुम्नेषितत्वता यजामसि। युवोः॰ क्राणाय सख्यै- रभि ष्याम रक्षसः।।

卐 अधा चिन्नु यद्दिधिषामहे- वा मभि प्रियं रेक्णः॰ पत्यमानाः। दद्वा॰ वा यत्पुष्यति रेक्ण- स्सम्वारन्नकिरस्य मघानि।।

卐 असा वन्यो असुर सूयत द्यौ- स्त्वं विश्वेषाँ वरुणासि राजा। मूर्धा रथस्य चाक - न्नैतावतैनसान्तकध्रुक्।।

卐 अस्मि न्त्स्वे3(ए)त च्छकपूत- एनो हिते मित्रे निगता न्हन्ति वीरान्। अवोर्वा यद्धा.त्तनू.ष्ववः॰- प्रियासु यज्ञिया स्ववा।।

卐 युवो र्हि मातादिति र्विचेतसा- द्यौर्न भूमिः॰ पयसा पुपूतनि। अव प्रिया दिदिष्टन -सूरो निनिक्त रश्मिभिः।।

卐 युवं ह्यप्नराजा वसीदत- न्तिष्ठ द्रथन्न धूर्षदँ वनर्षदम्। ता^ नः॰ कणूकयन्ती -र्नृमेध स्तत्रे अंहस- स्सुमेध स्तत्रे अंहसः।।

☬ 10.133 **प्रो ष्विति सप्तर्चस्य सूक्तस्य, सुदाः पैजवन इन्द्रः शक्वरी, चतुर्थ्यादि तिस्रो महापङ्क्तयोऽन्त्या त्रिष्टुप्।**

❀08.07.21 卐☞प्रो~ ष्वस्मै पुरोरथ- मिन्द्राय शूष मर्चत। अभीके चिदु लोककृ -त्सङ्गे समत्सु वृत्रहा- ऽस्माकं बोधि चोदिता- नभन्ता मन्यकेषा.-ञ्याका^ अधि धन्वसु।।

卐 त्वं सिन्धू॰ रवासृजो-ऽधराचो अहन्नहिम्। अशत्रु रिन्द्र जज्ञिषे- विश्वं पुष्यसि वार्य -न्तन्त्वा परिष्वजामहे- नभन्ता मन्यकेषा.-ञ्याका^ अधि धन्वसु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 वि षु विश्वा^ अरातयो-ऽर्यो नशन्त नो धियः। अस्ताऽसि शत्रवे वधँ- यो न^ इन्द्र जिघांसति- या ते राति र्ददि र्वसु- नभन्ता मन्यकेषा.-ञ्ज्याका^ अधि धन्वसु।।

卐 यो न^ इन्द्राभितो जनो- वृकायु राऽऽदिदेशति। अधस्पद न्तमीङ्कृधि -विबाधो असि सासहि- र्नभन्ता मन्यकेषा.-ञ्ज्याका^ अधि धन्वसु।।

卐 यो न^ इन्द्राभिदासति- सनाभि र्यश्च निष्ट्यः। अव तस्य बल न्तिर- महीव द्यौ रध त्मना- नभन्ता मन्यकेषा.-ञ्ज्याका^ अधि धन्वसु।।

卐 वय मिन्द्र त्वायव- स्सखित्व मा रभामहे। ऋतस्य नᳶ पथा नया-ऽति विश्वानि दुरिता- नभन्ता मन्यकेषा.-ञ्ज्याका^ अधि धन्वसु।।

卐 अस्मभ्यं सु त्वमिन्द्र तां शिक्ष- या दोहते प्रति वरञ्जरित्रे। अच्छिद्रोध्नी पीपय द्यथा न- स्सहस्रधारा पयसा मही गौः।।

**10.134 उभे यदिति सप्तर्चस्य सूक्तस्य, यौवनाश्वो मान्धातेन्द्रः, अन्त्यानां तिसृणामर्धर्चाग्गोधेन्द्रो महापङ्क्तिरन्त्या पङ्क्तिः ।**

❀08.07.22 ☞卐उभे~ यदिन्द्र रोदसी-आपप्राथोषाइव। महान्तन्त्वा महीनां- सम्राज.ञ्चर्षणीना- न्देवी जनित्र्यजीजन- द्भद्रा जनित्र्यऽजीजनत्।।

卐 अव स्म दुर्हणायतो- मर्तस्य तनुहि स्थिरम्। अधस्पद न्तमीङ्कृधि- यो अस्माँ आदिदेशति- देवी जनि त्र्यजीजन- द्भद्रा जनित्र्यजीजनत्।।

卐 अव त्या^ बृहती रिषो- विश्वश्चन्द्रा^ अमित्रहन्न्। शचीभि श्शक्र धूनु-हीन्द्र विश्वाभि रूतिभि- र्देवी जनित्र्यजीजन-द्भद्रा जनित्र्यजीजनत्।।

卐 अव यत्त्वं शतक्रत~- विन्द्र विश्वानि धूनुषे। रयिन्न सुन्वते सचा -सहस्रिणीभि रूतिभि- र्देवी जनित्र्यजीजन-द्भद्रा जनित्र्यजीजनत्।।

卐 अव स्वेदाइ.वाभितो- विष्वक्पतन्तु दिद्यवः। दूर्वायाइव तन्तवो -व्य1(अ)स्म देतु दुर्मति- र्देवी जनि त्र्यजीजन- द्भद्रा जनित्र्यजीजनत्।।

卐 दीर्घं ह्यङ्कुशँ यथा- शक्तिं बिभर्षि मन्तुमः। पूर्वेण मघव न्पदा-ऽजो वयाँ यथा यमो- देवी जनित्र्यजीजन- द्भद्रा जनित्र्यजीजनत्।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 नकिं दैवा^ मिनीमसि- नकि रा योपयामसि- मन्त्रश्रुत्य.ञ्चरामसि। पक्षेभि रपिकक्षेभि- रत्राभि सं रभामहे।।

☬ 10.135 यस्मिन्निति सप्तर्चस्य सूक्तस्य, यामायनः कुमारो यमोऽनुष्टुप्।

❀08.07.23 卐यस्मि न्वृक्षे सुपलाशे- देवै स्संपिबते यमः। अत्रा नो विश्पतिः पिता- पुराणा अनु वेनति।।

卐 पुराणा अनुवेनन्त-ञ्चरन्तं पापयामुया। असूयन्नभ्यचाकश- न्तस्मा अस्पृहयं पुनः~।।

卐 यङ्कुमार नवं रथ- मचक्रं मनसाकृणोः। एकेषँ विश्वतः प्राञ्च- मपश्यन्नधि तिष्ठसि।।

卐 यङ्कुमार प्रावर्तयो- रथँ विप्रेभ्य स्परि। तं सामानु प्रावर्तत- समितो नाव्याहितम् ।।

卐 कः कुमार मजनय- द्रथङ्को निरऽवर्तयत्। कस्स्वि त्तदद्य नो ब्रूया- दनुदेयी यथाभवत्।।

卐 यथाभव दनुदेयी- ततो अग्र मजायत। पुरस्ता द्बुध्न^ आततः- पश्चा न्निरयणङ्कृतम्।।

卐 इदँ यमस्य सादन -न्देवमानँ यदुच्यते। इय मस्य धम्यते- नाळी रय ङ्गीर्भिः परिष्कृतः।।

☬ 10.136 केशीति सप्तर्चस्य सूक्तस्य, वातरशना जूति र्वातजूति र्विप्रजूति र्वृषाणकः करिक्रत एतश ऋष्यश्रृंग इति क्रमेणैकर्चा ऋषयः, केश्यग्नि सूर्य वायवो देवता अनुष्टुप्।

❀08.07.24 卐केश्य1(अ)ग्निङ्केशी विष-ङ्केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे- केशीदञ्ज्योति रुच्यते।।

卐 मुनयो वातरशनाः- पिशङ्गा वसते मला। वातस्यानु ध्राजिँ यन्ति- यद्देवासो अविक्षत।।

卐 उन्मदिता^ मौनेयेन- वाताआ तस्थिमा वयम्। शरीरेदस्माकँ यूयं -मर्तासो अभि पश्यथ।।

卐 अन्तरिक्षेण पतति- विश्वा रूपावचाकशत्। मुनि र्देवस्यदेवस्य -सौकृत्याय सखा हितः।।

卐 वातस्याश्वो वायो- स्सखाथो~ देवेषितो मुनिः। उभौ समुद्रावा क्षेति -यश्च पूर्व^ उतापरः।।

卐 अप्सरसा.ङ्गन्धर्वाणां- मृगाणा.ञ्चरणे चरन्न्। केशी केतस्य विद्वा- न्त्सखा स्वादु र्मदिन्तमः।।

卐 वायु रस्मा उपामन्थ- त्पिनष्टि स्मा कुनन्नमा। केशी विषस्य पात्रेण- यद्रुद्रेणापिब त्सह।।

☬ 10.137 उतेति सप्तर्चस्य सूक्तस्य, भरद्वाजः कश्यपो गौतमोऽत्रिर्विश्वामित्रो जमदग्नि र्वसिष्ठ इति क्रमेणैकर्चा ऋषयो विश्वेदेवा अनुष्टुप्। (भेदपक्षे-देवाः 1, वातः 3, विश्वेदेवाः 1, आपः 2, एवं 7)

Sri Ganapathi Sachchidananda Avadhoota Peetham Mysore

❀08.07.25 卐उत देवा^ अवहित- न्देवा^ उन्नयथा पुनः~। उताग श्चक्रुषन्देवा^- देवा जीवयथा पुनः~।।

卐 द्वाविमौ वातौ वात^- आ सिन्धोरा परावतः। दक्षन्ते अन्य^ आ वातु -परान्यो वातु यद्रपः।।

卐 आ वात वाहि भेषजँ- वि वात वाहि यद्रपः। त्वं हि विश्वभेषजो- देवाना न्दूत^ ईयसे।।

卐 आत्वागमं शन्तातिभि- रथो~ अरिष्टतातिभिः। दक्षन्ते भद्र माभार्षं- परा यक्ष्मं सुवामि ते।।

卐 त्रायन्ता मिह देवा- स्त्रायतां मरुताङ्गणः। त्रायन्ताँ विश्वा भूतानि -यथाय.मरपा^ असत्।।

卐 आप^ इद्वा उ भेषजी- रापो अमीवचातनीः। आप स्सर्वस्य भेषजी- स्तास्ते कृण्वन्तु भेषजम्।।

卐 हस्ताभ्या न्दशशाखाभ्या-ञ्जिह्वा वाचः पुरोगवी। अनामयित्नुभ्या न्त्वा-ताभ्या-न्त्वोप स्पृशामसि।।

☃ 10.138 **तव त्य इति षड्चस्य सूक्तस्यौरवोङ्ग इन्द्रो जगती।**

❀08.07.26 卐तव त्य इन्द्र सख्येषु वह्नय^- ऋतं मन्माना^ व्यऽदर्दिरु वलम्। यत्रा दशस्य न्नुषसो रिणन्नपः- कुत्साय मन्मन्नह्यश्च दंसयः।।

卐 अवासृजः प्रस्व श्श्वञ्चयो गिरी- नुदाज^ उस्रा^ अपिबो मधु प्रियम्। अवर्धयो वनिनो अस्य दंससा- शुशोच सूर्य^ ऋतजातया गिरा।।

卐 वि सूर्यो मध्ये अमुच द्रथ-न्दिवो विद द्दासाय प्रतिमान मार्यः। दृळ्हानि पिप्रो रसुरस्य मायिन^- इन्द्रो व्यास्य चकृवाः ऋजिश्वना।।

卐 अनाधृष्टानि धृषितो व्यास्य -न्निधीः रदेवाः अमृण दयास्यः। मासेव सूर्यो वसु पुर्य मार्ददे- गृणान श्शत्रूः रश्रृणा द्विरुक्मता।।

卐 अयुद्धसेनो विभ्वा विभिन्दता- दाश द्वृत्रहा तुज्यानि तेजते। इन्द्रस्य वज्रा दबिभे दभिश्नथः- प्राक्राम च्छुन्ध्यू रजहा दुषा^ अनः।।

卐 एता त्या ते श्रुत्यानि केवला- यदेक^ एक.मकृणो रयज्ञम्। मासाँ विधान मदधा^ अधि द्यवि- त्वया विभिन्नं भरति प्रधिं पिता।।

☃ 10.139 **सूर्यरश्मिरिति षड्चस्य सूक्तस्य, देवगन्धर्वो विश्वावसुः सविताऽन्त्यतिसृणां देवगन्धर्वो विश्वावसुस्त्रिष्टुप्।**

❀08.07.27 卐सूर्यरश्मि र्हरिकेशः पुरस्ता- त्सविता ज्योति रुदया॑ अजस्रम्। तस्य पूषा प्रसवे याति विद्वा -न्त्संपश्य न्विश्वा भुवनानि गोपाः।।

卐 नृचक्षा^ एष दिवो मध्य आस्त- आपप्रिवा न्रोदसी~ अन्तरिक्षम्। स विश्वाची रभि चष्टे घृताची- रन्तरा पूर्व मपरञ्च केतुम्।।

卐 रायो बुध्न स्सङ्गमनो वसूनाँ- विश्वा रूपाभि चष्टे शचीभिः। देवइव सविता सत्यधर्मे-न्द्रो न तस्थौ समरे धनानाम्।।

卐 विश्वावसुं सोम गन्धर्व मापो- ददृशुषी स्तदृतेना व्यायन्न्। तदन्ववै दिन्द्रो रारहाण^ आसां- परि सूर्यस्य परिधी॑ रपश्यत्।।

卐 विश्वावसु रभि तन्नो गृणातु- दिव्यो गन्धर्वो रजसो विमानः। यद्वा घा सत्य मुत यन्न विद्म- धियो हिन्वानो धिय^ इन्नो अव्याः।।

卐 सस्नि मविन्द ञ्चरणे नदीना- मपावृणो दुरो अश्मव्रजानाम्। प्रासाङ्गन्धर्वो अमृतानि वोच- दिन्द्रो दक्षं परि जाना दहीनाम्।।

10.140 अग्ने तवेति षडृचस्य सूक्तस्य, पावकोऽग्निरग्निः सतोबृहती आद्ये विष्टार पङ्क्ती अन्त्योपरिष्टाज्ज्योतिः।

❀08.07.28 卐अग्ने तव श्रवो वयो- महि भ्राजन्ते अर्चयो विभावसो~। बृहद्भानो~ शवसा वाज मुक्थ्य1(अ)- न्दधासि दाशुषे कवे।।

卐 पावकवर्चा श्शुक्रवर्चा-^ अनूनवर्चा^ उदियर्षि भानुना। पुत्रो मातरा विचर न्नुपावसि- पृणक्षि रोदसी उभे~।।

卐 ऊर्जो नपा ज्जातवेद स्सुशस्तिभि- र्मन्दस्व धीतिभिर्हितः। त्वे इष स्सन्दधु र्भूरिवर्पस- श्चित्रोतयो वामजाताः।।

卐 इरज्यन्नग्ने प्रथयस्व जन्तुभि- रस्मे रायो अमर्त्य। स दर्शतस्य वपुषो वि राजसि- पृणक्षि सानसिङ्क्रतुम्।।

卐 इष्कर्तार मध्वरस्य प्रचेतस-ङ्क्षयन्तं राधसो महः। रातिँ वामस्य सुभगां मही मिष- न्दधासि सानसिं रयिम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 ऋतावानं महिषँ विश्वदर्शत-मग्निं सुम्नाय दधिरे पुरो जनाः। श्रुत्कर्णं सप्रथस्तमन्त्वा- गिरा दैव्यं मानुषा युगा।।

☸ 10.141 **अग्ने अच्छेति षड्ऋचस्य सूक्तस्य, तापसोऽग्निर्विश्वेदेवा अनुष्टुप्।**

❀08.07.29 卐अग्ने अच्छा वदेह नः- प्रत्यङ्ङ्स्सुमना^ भव। प्र नो यच्छ विशस्पते- धनदा^ असि नस्त्वम्।।

卐 प्र नो यच्छ त्वर्यमा- प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता- रायो देवी ददातु नः।।

卐 सोमं राजान मवसे-ऽग्निङ्गीर्भि र्हवामहे। आदित्या न्विष्णुं सूर्यं- ब्रह्माणञ्च बृहस्पतिम्।।

卐 इन्द्रवायू~ बृहस्पतिं- सुहवेह हवामहे। यथा न स्सर्व^ इज्जन- स्सङ्गत्यां सुमना^ असत्।।

卐 अर्यमणं बृहस्पति- मिन्द्र न्दानाय चोदय। वातँ विष्णुं सरस्वतीं -सवितारञ्च वाजिनम्।।

卐 त्वन्नो अग्ने अग्निभि- र्ब्रह्म यज्ञञ्च वर्धय। त्वन्नो देवतातये- रायो दानाय चोदय।।

☸ 10.142 **अयमग्न इत्यष्टर्चस्य सूक्तस्य, प्रथमयोः शार्ङ्गो जरिता, तृतीया चतुर्थ्योः शार्ङ्गो द्रोणः पञ्चमी षष्ठ्यो श्शार्ङ्गः, सारिसृक स्सप्तम्यष्टम्यो श्शार्ङ्गस्तम्बमित्रोऽग्निस्त्रिष्टुप्, आद्ये जगत्यावन्त्ये अनुष्टुभौ।**

❀08.07.30 卐अयमग्ने जरिता त्वे अभूदपि- सहस स्सूनो~ नह्य1(अ)न्य दस्त्याप्यम्। भद्रं हि शर्म त्रिवरूथ मस्ति त -आरे हिंसाना मप दिद्युमा कृधि।।

卐 प्रवत्ते अग्ने जनिमा पितूयत- स्साचीव विश्वा भुवना न्यृञ्जसे। प्र सप्तयः प्र सनिषन्त नो धियः- पुर श्चरन्ति पशुपाइव त्मना।।

卐 उत वा उ परि वृणक्षि बप्स -द्बहो रग्न उलपस्य स्वधावः। उत खिल्या^ उर्वराणां भवन्ति- मा ते हेति न्तविषी.श्चुक्रुधाम।।

卐 यदुद्वतो निवतो यासि बप्स-त्पृथगेषि प्रगर्धिनीव सेना। यदा ते वातो अनुवाति शोचि- र्वप्तेव श्मश्रु वपति प्र भूम।।

卐 प्रत्यस्य श्रेणयो ददृश्र एकं- न्नियानं बहवो रथासः। बाहू~ यदग्ने अनुमर्मृजानो- न्यङ्ङुत्ताना मन्वेषि भूमिम्।।

卐 उत्ते शुष्मा^ जिहता मुत्ते अर्चि- रुत्ते अग्ने शशमानस्य वाजाः। उच्छ्वञ्चस्व नि नम वर्धमान-^ आ त्वाद्य विश्वे वसव स्सदन्तु।।

Sri Sachchidananda Avadhoota Datta Peetham Mysore

卐 अपा मिद न्न्ययनं- समुद्रस्य निवेशनम्। अन्यङ्कृणुष्वेतः -पन्था न्तेन याहि वशा॰ अनु।।

卐 आयने ते परायणे- दूर्वा रोहन्तु पुष्पिणीः। हृदाश्च पुण्डरीकाणि -समुद्रस्य गृहा^ इमे।।

✡।। अथ परिशिष्टम्।।

卐 हिमस्य त्वा जरायुणा- शाले परि व्ययामसि। उत हृदो हि नो धियो-ऽग्नि र्ददातु भेषजम्।।

卐 शीतहृदो हि नो धियोऽ-ग्नि र्ददातु भेषजम्। अन्तिका मग्नि मजनय -दूर्वाद् श्शशहाऽगमत्।।

卐 अजातपुत्रपक्षाया- हृदयं मम दूयते। विपुलँ वनं बह्वाकाश-श्चर जातवेदः कामाय।।

卐 माञ्च रक्ष पुत्रांश्च- शरण मभू त्तव। पिङ्गाक्ष लोहितग्रीव- कृष्णवर्ण नमोऽस्तुते।।

卐 अस्मान्नि बर्हस्येनां- सागरस्योर्मयो यथा। इन्द्रः ≈ क्षत्र न्ददातु- वरुण मभिषिञ्चतु।।

卐 शत्रवो निर्धनँ यान्तु- जय त्वं ब्रह्मतेजसा। कपिलजटीं सर्वभक्षञ्चा-ग्निं प्रत्यक्षदैवतम्।

卐 वरुणञ्च वशा म्यग्रे- मम पुत्रांश्च रक्षतु।। (मम पुत्रांश्च रक्ष त्वोन्नमः)।

卐 साग्रँ वर्षशतञ्जीव- पिब खाद च मोद च। दुःखितांश्च द्विजांश्चैव- प्रजाञ्च पशु पालय।।

卐 यावदादित्य स्तपति- यावद्भ्राजति चन्द्रमाः। यावद्वायुः प्लवायति- ताव ज्जीव जया जय।।

卐 येन केन प्रकारेण- को हि नाम नु जीवति। परेषा मुपकारार्थँ- यज्जीवति स जीवति।।

卐 एताँ वैश्वानरीं- सर्वदेवान्नमोऽस्तु ते।।

卐 न चोरभयन्न च सर्पभयन्न- च व्याघ्रभयन्न च मृत्युभयम्। यस्यापमृत्यु र्न च मृत्यु- स्सर्वँ लभते सर्वञ्जयते।। ।। इति परिशिष्टम्।। ।। इति सप्तमाध्यायः।

## अष्टमाष्टके अष्टमाध्यायः (वर्गाः 1-49)

10.143 त्यञ्चिदिति षड्चस्य सूक्तस्य, साङ्ख्योऽत्रिरश्विनावनुष्टुप्।

❀08.08.01 卐त्यञ्चिदत्रिं मृतजुर- मर्थ मश्वन्न यातवे। कक्षीवन्तँ यदी पुना~- रथन्न कृणुथो नवम्।।

卐 त्यञ्चिदश्वन्न वाजिन- मरेणवो यमत्नत। दृळ्ह ङ्ग्रन्थिन्न वि ष्यत- मत्रिँ यविष्ठ मा रजः।।

卐 नरा दंसिष्ठा वत्रये- शुभ्रा सिषासत न्धियः। अथा हि वान्दिवो नरा- पुन~ स्स्तोमो न विशसे।।

卐 चिते तद्वां सुराधसा- राति स्सुमति रश्विना। आ यन्न स्सदने पृथौ- समने पर्षथो नरा।।

卐 युवं भुज्युं समुद्र आ- रजसः पार ईङ्खितम्। यात मच्छा पतत्रिभि- र्नासत्या सातये कृतम्।।

卐 आ वां सुम्नै श्शँयू इव~- मंहिष्ठा विश्ववेदसा। समस्मेभूषतन्न-रोत्सन्न पिप्युषी रिषः।।

☫ 10.144 **अयं हीति षड़ृचस्य सूक्तस्य, तार्क्ष्यपुत्रः सुपर्ण इन्द्रो गायत्री, द्वितीया बृहती पञ्चमी सतोबृहती षष्ठी विष्टारपङ्क्तिः। (यामायन ऊर्ध्वकृशनो वाऽत्र ऋषिः)।**

❀08.08.01 卐अयं हि ते अमर्त्य^- इन्दु रत्यो न पत्यते। दक्षो विश्वायु र्वेधसे।।

卐 अय मस्मासु काव्य^- ऋभु र्वज्रो दास्वते। अयं बिभ र्त्यूर्ध्वकृशनं- मदं मृभु र्न कृत्व्यं मदम्।।

卐 घृषु श्श्येनाय कृत्वन- आसु स्वासु वंसगः। अव दीधे दहीशुवः।।

卐 यं सुपर्णः परावत- श्श्येनस्य पुत्र^ आऽभरत्। शतचक्रं यो3(ओ)ऽह्यो वर्तनिः।।

卐 यन्ते श्येन श्चारु मवृकं- पदाभर दरुणं मान मन्धसः। एना वयो वि तार्यायु र्जीवस- एना जागार बन्धुता।।

卐 एवा तदिन्द्र^ इन्दुना- देवेषु चिद्धारयाते महि त्यजः। क्रत्वा वयो वि तार्यायु स्सुक्रतो-~ क्रत्वायमस्मदा सुतः।।

☫ 10.145 **इमामिति षड़ृचस्य सूक्तस्येन्द्राणी सपत्नीनाशन मनुष्टुबन्त्या पङ्क्तिः।**

❀08.08.03 卐इमाङ्खना म्योषधिँ- वीरुधं बलवत्तमाम्। यया सपत्नीं बाधते- यया सँविन्दते पतिम्।।

卐 उत्तानपर्णे सुभगे- देवजूते सहस्वति। सपत्नीं मे परा धम- पतिं मे केवलङ्कुरु।।

卐 उत्तराह मुत्तर- उत्तरे दुत्तराभ्यः। अथा सपत्नी या ममा-धरा साधराभ्यः।।

卐 नह्यस्या^ नाम गृभ्णामि- नो~ अस्मि न्त्रमते जने। परा मेव परावतं- सपत्नी.ङ्गमयामसि।।

卐 अह मस्मि सहमाना-ऽथ त्वमसि सासहिः। उभे~ सहस्वती~ भूत्वी -सपत्नीं मे सहावहै।।

卐 उप तेधां सहमाना- मभि त्वाधां सहीयसा। मा मनु प्र ते मनो- वत्सङ्गौरिव धावतु- पथा वारिव धावतु।।

☫ 10.146 **अरण्यानीति षड़ृचस्य सूक्तस्यैरंमदो देवमुनि ररण्यान्यनुष्टुप्।**

❀08.08.04 卐अरण्यान्यरण्या -न्यसौ या प्रेव नश्यसि। कथा ग्रामन्न पृच्छसि- न त्वा भीरिव विन्दतीँ '3।।

卐 वृषारवाय वदते- यदुपावति चिच्चिकः। आघाटिभिरिव धावय-न्नऽरण्यानि महीयते।।

卐 उत गाव^ इवाद-न्त्युत वेश्मेव दृश्यते। उतो~ अरण्यानि स्सायं- शकटीरिव सर्जति।।

卐 गामङ्गैष^ आ ह्वयति- दार्वङ्गैषो^ अपावधीत्। वसन्नरण्यान्यां साय- मक्रुक्ष दिति मन्यते।।

卐 न वा अरण्यानि र्हन्त्य-ऽन्य श्चेन्नाभिगच्छति। स्वादोः फलस्य जग्ध्वाय- यथाकाम न्नि पद्यते।।

卐 आञ्जनगन्धिं सुरभिं- बह्वन्ना मकृषीवलाम्। प्राहं मृगाणां मातर- मरण्यानि मशंसिषम्।।

10.147 श्रत्त इति पञ्चर्चस्य सूक्तस्य, शैरीषिः सुवेदा इद्रो जगत्यन्त्या त्रिष्टुप्।

❀08.08.05 卐श्रत्ते दधामि प्रथमाय मन्यवे-ऽहन्यद्वृत्र.न्नयँ विवे रपः। उभे ~यत्त्वा भवतो रोदसी अनु- रेजते शुष्मा त्पृथिवी चिदद्रिवः।।

卐 त्वं मायाभि रनवद्य मायिनं- श्रवस्यता मनसा वृत्र मर्दयः। त्वामिन्नरो वृणते गविष्टिषु- त्वाँ विश्वासु हव्या स्विष्टिषु।।

卐 ऐषु चाकन्धि पुरुहूत सूरिषु- वृधासो ये मघव न्नानशु र्मघम्। अर्चन्ति तोके तनये परिष्टिषु- मेधसाता वाजिन मह्रये धने।।

卐 स इन्नु राय स्सुभृतस्य चाकन- न्मदँ यो अस्य रंह्य.ञ्चिकेतति। त्वावृधो मघव न्दाश्वध्वरो- मक्षू स वाजं भरते धना नृभिः।।

卐 त्वं शर्धाय महिना गृणान- उरु कृधि मघवञ्छग्धि रायः। त्वन्नो मित्रो वरुणो न मायी- पित्वो न दस्म दयते विभक्ता।।

10.148 सुष्वाणास इति पञ्चर्चस्य सूक्तस्य, वैन्यः पृथुरिन्द्रस्त्रिष्टुप्।

❀08.08.06 卐सुष्वाणास इन्द्र स्तुमसि त्वा- ससवांसश्च तुविनृम्ण वाजम्। आ नो भर सुवितँ यस्य चाक-न्त्मना तना सनुयाम त्वोताः।।

卐 ऋष्व स्त्वमिन्द्र शूर जातो- दासी र्विश स्सूर्येण सह्याः। गुहा हित.ङ्गुह्य.ङ्गूळ्ह मप्सु- बिभृमसि प्रस्रवणे न सोमम्।।

卐 अर्यो वा गिरो अभ्यर्च विद्वा- नृषीणाँ विप्र स्सुमतिञ्चकानः। ते स्याम ये रणयन्त सोमै- रेनोत तुभ्यं रथोळ्ह भक्षैः।।

卐 इमा ब्रह्मेन्द्र तुभ्यं शंसि- दा नृभ्यो नृणां शूर शवः। तेभि र्भव सक्रतु र्येषु चाक -न्नुत त्रायस्व गृणत उत स्तीन्।।

卐 श्रुधी हव मिन्द्र शूर पृथ्या- उत स्तवसे वेन्यस्यार्कैः। आ यस्ते योनिङ्घृतवन्त मस्वा- रूर्मि र्न निम्नै र्द्रवयन्त वक्ताः।।

☬ 10.149 **सवितेति पञ्चर्चस्य सूक्तस्य, हैरण्यस्तूपोऽर्चन्त्सविता त्रिष्टुप्।**

❀08.08.07 卐सविता यन्त्रैः पृथिवी मरम्णा- दऽस्कम्भने सविता द्यामदृंहत्। अश्वमिवाधुक्ष द्धुनि मन्तरिक्ष- मतूर्ते बद्धं सविता समुद्रम्।।

卐 यत्रा समुद्र स्स्कभितो व्यौन –दपान्नपा त्सविता तस्य वेद। अतो भूरत^ आ^ उत्थितं रजो-ऽतो द्यावापृथिवी~ अप्रथेताम्।।

卐 पश्चेद मन्य दभव द्यजत्र- ममर्त्यस्य भुवनस्य भूना। सुपर्णो अङ्ग सवितु गरुत्मा- न्पूर्वो जात स्स उ अस्यानु धर्म।।

卐 गावइव ग्रामँ यूयुधिरिवाश्वा -न्वाश्रेव वत्सं सुमना दुहाना। पतिरिव जाया मभि नो न्येतु- धर्ता दिव स्सविता विश्ववारः।।

卐 हिरण्यस्तूप स्सवित यथा त्वा-ऽऽङ्गिरसो जुह्वे वाजे अस्मिन्न्। एवा त्वाऽर्चन्नवसे वन्दमान- स्सोमस्येवांऽशुं प्रति जागराऽहम्।।

☬ 10.150 **समिद्ध इति पञ्चर्चस्य सूक्तस्य, वासिष्ठो मृळीकोऽग्निर्बृहती, अन्त्ये द्वे उपरिष्टाज्ज्योतिषी ( उपान्त्या जगती वा)**

❀08.08.08 ☞卐समिद्धश्चि त्समिध्यसे- देवेभ्यो हव्यवाहन। आदित्यै रुद्रै र्वसुभिर्न^ आ गहि- मृळीकाय न आ गहि।।

卐 इमँ यज्ञ मिदँ वचो- जुजुषाण^ उपाऽऽगहि। मर्तासस्त्वा समिधान हवामहे- मृळीकाय हवामहे।।

卐 त्वामु जातवेदसँ- विश्ववारङ्गृणे धिया। अग्ने देवाँ आ वह नः प्रियव्रता -न्मृळीकाय प्रियव्रतान्।।

卐 अग्नि र्देवो देवाना मभव त्पुरोहितो-ऽग्निं मनुष्या3(आ) ऋषय स्समीधिरे। अग्निं महो धनसाता वहं हुवे- मृळीक न्धनसातये।।

卐 अग्नि रत्रिं भरद्वाज.ङ्गविष्ठिरं- प्रावन्नः कण्व न्त्रसदस्यु माहवे। अग्निँ वसिष्ठो हवते पुरोहितो- मृळीकाय पुरोहितः।।

☬ 10.151 **श्रद्धयेति पञ्चर्चस्य सूक्तस्य, श्रद्धा कामायनी श्रद्धाऽनुष्टुप्।**

❀08.08.09 ☞卐श्रद्धयाऽग्नि स्समिध्यते- श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्धनि- वचसा ऽऽवेदयामसि।।

卐 प्रियं श्रद्धे ददतः- प्रियं श्रद्धे दिदासतः। प्रियं भोजेषु यज्व-स्विदं म उदितङ्कृधि।।

卐 यथा देवा असुरेषु- श्रद्धा मुग्रेषु चक्रिरे। एवं भोजेषु यज्व-स्वस्माक मुदितङ्कृधि।।

卐 श्रद्धा न्देवा यजमाना- वायुगोपा उपाऽऽसते। श्रद्धां हृदय्य1 (अ)याऽऽकूत्या- श्रद्धया विन्दते वसु।।

卐 श्रद्धां प्रात र्हवामहे- श्रद्धां मध्यन्दिनं परि। श्रद्धां सूर्यस्य निम्रुचि- श्रद्धे श्रद्धापयेह नः।।

✡ ।। अथ परिशिष्टम्।।

卐 मेधां मह्य मङ्गिरसो- मेधां सप्तऋषयो ददुः। मेधा मिन्द्रश्चाग्निश्च -मेधान्धाता ददातु ते।।

卐 मेधान्ते वरुणो राजा- मेधा न्देवी सरस्वती। मेधान्ते अश्विनौ -देवा वाधत्तां पुष्करस्रजा।।

卐 या मेधा अप्सरस्सु- गन्धर्वेषु च यन्मनः। दैवी या मानुषी मेधा- सा मा माविशता दिमाम्।।

卐 यन्मे नोक्त न्तद्रमतां- शकेयँ यदनुब्रुवे। निशामत न्निशामहै- मयि व्रतं सह व्रतेषु भूयासं -ब्रह्मणा सङ्गमेमहि।

卐 शरीरं मे विचक्षणँ- वाङ्मे मधुम द्दुहाम्। अवृद्ध मह मसौ सूर्यो- ब्रह्मणानी स्थ श्श्रुतं मे मा प्र हासीः।।

卐 मेधा न्देवीं मनसा रेजमाना-ङ्गन्धर्वजुष्टां प्रति नो जुषस्व। मह्यं मेधाँ वद मह्यं श्रियं वद- मेधावी भूयास मजरा जरिष्णु।।

卐 सदसस्पति मद्भुतं- प्रिय मिन्द्रस्य काम्यम्। सनिं मेधा मयासिषम्।।

卐 यां मेधा न्देवगणाः- पितर श्चोपाऽऽसते। तया मामद्य मेधया-ऽग्ने मेधाविनङ्कुरु।।

卐 मेधाव्य1(अ)हं सुमना- स्सुप्रतीक श्श्रद्धामना स्सत्यमति स्सुशेवः। महायशा धारयिष्णुः प्रवक्ता- भूयास मस्मै शरया प्रयोगे।।

卐 नाशयित्री पलाशस्या-रुषसौ पथिकामसु। अथो ततस्य यक्ष्माण- मपापा रोगनाशिनी।।

卐 ब्रह्मवृक्ष पलाश त्वं- श्रद्धां मेधाञ्च देहि मे। वृक्षाधिप नमस्ते-ऽस्तु अत्र त्वं सन्निधौ भव।।

卐 ।। इति परिशिष्टम्।।

10.152 **शास इति पञ्चर्चस्य सूक्तस्य, भारद्वाजः शास इन्द्रोऽनुष्टुप्।**

❀08.08.10 卐शास^ इत्था महा॰ अस्यमित्रखादो अद्भुतः। न यस्य हन्यते सखा- न जीयते कदा चन।।

卐 स्वस्तिदा^ विशस्पति- र्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर^ एतु न- स्सोमपा^ अभयङ्करः।।

卐 वि रक्षो वि मृधो जहि- वि वृत्रस्य हनू~ रुज। वि मन्यु मिन्द्र वृत्रहन्न-मित्रस्याभिदासतः।।

卐 वि न^ इन्द्र मृधो जहि- नीचा यच्छ पृतन्यतः। यो अस्मा॰ अभिदास त्य-धरङ्गमया तमः।।

卐 अपेन्द्र द्विषतो मनो-ऽप जिज्यासतो वधम्। वि मन्यो श्शर्म यच्छ- वरीयो यवया वधम्।।

10.153 **ईङ्खयन्तीरिति पञ्चर्चस्य सूक्तस्य, देव जामय इन्द्र मातर इन्द्रो गायत्री।**

❀08.08.11 卐ईङ्खयन्ती रपस्युव^- इन्द्रञ्जात मुपाऽऽसते। भेजानास स्सुवीर्यम्।।

卐 त्वमिन्द्र बला दधि- सहसो जात^ ओजसः। त्वँ वृष न्वृषेदसि।।

卐 त्वमिन्द्रासि वृत्रहा -व्य1(अ)न्तरिक्ष मतिरः। उद्या मस्तभ्ना ओजसा।।

卐 त्वमिन्द्र सजोषस- मर्कं बिभर्षि बाह्वोः। वज्रं शिशान^ ओजसा।।

卐 त्वमिन्द्राभिभू रसि- विश्वा जाता न्योजसा। स विश्वा भुव^ आऽभवः।।

10.154 **सोम इति पञ्चर्चस्य सूक्तस्य, वैवस्वती यमी भाववृत्तिरनुष्टुप्।**

❀08.08.12 卐सोम^ एकेभ्यः पवते- घृत मेक उपाऽऽसते। येभ्यो मधु प्रधावति- ताँश्चि देवापि गच्छतात्।।

卐 तपसा ये अनाधृष्या- स्तपसा ये स्वर्ययुः। तपो ये चक्रिरे मह- स्ताँश्चि देवापि गच्छतात्।।

卐 ये युध्यन्ते प्रधनेषु- शूरासो ये तनूत्यजः। ये वा सहस्रदक्षिणा- स्ताँश्चि देवापि गच्छतात्।।

卐 ये चित्पूर्व ऋतसाप^- ऋतावान^ ऋतावृधः। पितॄ न्तपस्वतो यम- ताँश्चि देवापि गच्छतात्।।

卐 सहस्रणीथाः कवयो- ये गोपायन्ति सूर्यम्। ऋषी न्तपस्वतो यम -तपोजा॰ अपि गच्छतात्।।

10.155 **अरायीति पञ्चर्चस्य सूक्तस्य, भारद्वाज शिरिम्बिठोऽलक्ष्मीनाशनो द्वितीया तृतीययोर्ब्रह्मणस्पति रन्त्याया विश्वेदेवा अनुष्टुप्।**

❀08.08.13 卐अरायि काणे विकटे- गिरिङ्गच्छ सदान्वे। शिरिम्बिठस्य सत्वभि- स्तेभिष्ट्वा चातयामसि।।

卐 चत्तो इत श्चत्ताऽमुत- स्सर्वा भ्रूणान्याऽऽरुषी। अराय्यं ब्रह्मणस्पते- तीक्ष्णश्रृङ्गो दृश न्निहि।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अदो यद्दारु प्लवते- सिन्धोः पारे अपूरुषम्। तदा रभस्व दुर्हणो-~ तेन गच्छ परस्तरम्।।

卐 यद्ध प्राची रजगन्तो-रो मण्डूरधाणिकीः। हता^ इन्द्रस्य शत्रव- स्सर्वे बुद्बुदयाशवः।।

卐 परीमे गामनेषत- पर्यग्नि.महृषत। देवेष्वक्रत श्रवः- क^ इमा॰ आ दधर्षति।।

10.156 **अग्निमिति पञ्चर्चस्य सूक्तस्याऽऽग्नेयः केतुरग्निर्गायत्री।**

❀08.08.14 卐अग्निं हिन्वन्तु नो धिय- स्सप्तिं माशुमिवाऽऽजिषु। तेन जेष्म धनन्धनम्।।

卐 यया गा^ आकरामहे- सेनयाऽग्ने तवोत्या। तान्नो हिन्व मघत्तये।।

卐 आग्ने स्थूरं रयिं भर- पृथुङ्गोमन्त मश्विनम्। अङ्धि खँ वर्तया^ पणिम्।।

卐 अग्ने नक्षत्र मजर- मा सूर्यं रोहयो दिवि। दधज्ज्योति र्जनेभ्यः।।

卐 अग्ने केतु र्विशा मसि- प्रेष्ठ श्श्रेष्ठ^ उपस्थसत्। बोधा^ स्तोत्रे वयो दधत्।।

10.157 **इमा न्विति पञ्चर्चस्य सूक्तस्याऽऽप्त्यो भुवनो विश्वेदेवा द्विपदा त्रिष्टुप्। (अत्र भौवनः साधनो वैकल्पिकः)**

❀08.08.15 卐इमा नु कं भुवना ॰सीषधा-मेन्द्रश्च विश्वे च देवाः।।

卐 यज्ञञ्च न स्तन्वञ्च प्रजाञ्चा-ऽऽदित्यै रिन्द्र स्सह चीक्लृपाति।।

卐 आदित्यै रिन्द्र स्सगणो मरुद्भि- रस्माकं भूत्वऽविता तनूनाम्।।

卐 हत्वाय देवा^ असुरा न्यदाय- न्देवा^ देवत्व मभि रक्षमाणाः।।

卐 प्रत्यञ्च मर्क मनयञ्छचीभि- रादि त्स्वधा मिषिरां पर्यपश्यन्न्।।

10.158 **सूर्यो न इति पञ्चर्चस्य सूक्तस्य, सौर्यश्चक्षुर्मानवः सूर्यो गायत्री।**

❀08.08.16 卐सूर्यो नो दिवस्पातु- वातो अन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः।।

卐 जोषा सवित र्यस्य ते हर- श्शतं सवा॰ अर्हति। पाहि नो दिद्युतः पतन्त्याः।।

卐 चक्षुर्नो देव स्सविता- चक्षुर्न^ उत पर्वतः। चक्षु र्धाता दधातु नः।।

卐 चक्षुर्नो धेहि चक्षुषे- चक्षुर्विख्यै तनूभ्यः। सञ्चेदँ वि च पश्येम।।

卐 सुसन्दृशन्त्वा वयं- प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः।।

10.159 **उदसाविति षड्चस्य सूक्तस्य, पौलोमी शचीशच्यनुष्टुप्।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀08.08.16 卐☞उदसौ सूर्यो अगा -दुदयं मामको भगः। अह न्तद्विद्वला पति -मभ्यसाक्षि विषासहिः।।

卐 अहङ्केतु रहं मूर्धा-ऽह मुग्रा विवाचनी। ममेदनु क्रतुं पति- स्सेहानाया^ उपाऽऽचरेत्।।

卐 मम पुत्रा श्शत्रुहणो-ऽथो~ मे दुहिता विराट्। उताह मस्मि सञ्जया- पत्यौ मे श्लोक^ उत्तमः।।

卐 येनेन्द्रो हविषा कृत्व्य-ऽभव द्युम्न्युत्तमः। इद न्तदक्रि देवा^- असपत्ना किलाभुवम्।।

卐 असपत्ना सपत्नघ्नी- जयन्त्यऽभिभूवरी। आऽवृक्ष मन्यासाँ वर्चो- राधो अस्थेयसामिव।।

卐 समजैष मिमा^ अहं- सपत्नी रभिभूवरी। यथाऽह मस्य वीरस्य- विराजानि जनस्य च।।

☸ 10.160 **तीव्रस्येति पञ्चर्चस्य सूक्तस्य, वैश्वामित्रः पूरण इन्द्रस्त्रिष्टुप्।**

❀08.08.18 卐तीव्रस्याभिवयसो अस्य पाहि- सर्वरथा वि हरी~ इह मुञ्च। इन्द्र मा त्वा यजमानासो अन्ये- नि रीरम न्तुभ्य मिमे सुतासः।।

卐 तुभ्यं सुता स्तुभ्यमु सोत्वास- स्त्वाङ्गिर श्श्वात्र्या^ आ ह्वयन्ति। इन्द्रेद मद्य सवनञ्जुषाणो- विश्वस्य विद्वाँ इह पाहि सोमम्।।

卐 य उशता मनसा सोम मस्मै- सर्वहृदा देवकाम स्सुनोति। न गा^ इन्द्र स्तस्य परा ददाति- प्रशस्त मिच्चारु मस्मै कृणोति।।

卐 अनुस्पष्टो भवत्येषो अस्य- यो अस्मै रेवान्न सुनोति सोमम्। निररत्नौ मघवा तन्दधाति- ब्रह्मद्विषो हन्त्यऽनानुदिष्टः।।

卐 अश्वायन्तो गव्यन्तो वाजयन्तो- हवामहे त्वोपगन्तवा उ। आभूषन्त स्ते सुमतौ नवायाँ- वय मिन्द्र त्वा शुनं हुवेम।।

☸ 10.161 **मुञ्चामि त्वेति पञ्चर्चस्य सूक्तस्य, प्राजापत्यो यक्ष्मनाशन इन्द्राग्नी त्रिष्टबन्त्याऽनुष्टुप्। (मुञ्चामीति सूक्ते राजयक्ष्ममघ्नमित्युक्ते राजयक्ष्मनाशनो देवतेति केचित् अन्ये प्रजापतिमाहुः, इन्द्राग्नी इति तु यास्कः इत्थं मत वैविध्येऽपि षळाहुतिश्चरुर्मुञ्चामि त्वा हविषा जीवनाय कमित्येतेनेति गृह्यसूत्रानुसारि वृत्तिकृत्कारिका कारादिभिरस्य सूक्तस्यैन्द्राग्नि देवतात्व निर्देशात्ते एवास्माभिरुक्ते।**

❀08.08.19 卐मुञ्चामि त्वा हविषा जीवनाय- क मऽज्ञातयक्ष्मा दुत राजयक्ष्मात्। ग्राहि जग्राह यदि वैतदेन- न्तस्या इन्द्राग्नी~ प्र मुमुक्त मेनम्।।

卐 यदि क्षिताऽऽयु र्यदि वा परेतो- यदि मृत्यो रन्तिक न्नीत एव। तमा हरामि निर्ऋते रुपस्था- दस्पार्षमेनं शतशारदाय।।

卐 सहस्राक्षेण शतशारदेन- शताऽऽयुषा हविषाऽहार्ष मेनम्। शतँ यथेमं शरदो नयाती-न्द्रो विश्वस्य दुरितस्य पारम्।।

卐 शतञ्जीव शरदो वर्धमान- श्शतं हेमन्ताञ्छतमु वसन्तान्। शत मिन्द्राग्नी~ सविता बृहस्पति- श्शताऽऽयुषा हविषेमं पुनर्दुः।।

卐 आहार्ष न्त्वाऽविदन्त्वा- पुन राऽगाः पुनर्नव। सर्वाङ्ग सर्वन्ते चक्षु- स्सर्व मायुश्च ते ऽविदम्।।

✡।। अथ परिशिष्टम्।।

卐 ऊर्ध्वरेखा प्र दहन्ते विष्णु- रिम मिन्द्राग्नी अमृतञ्जुषेथाम्। मह्य न्दधाना उप दीर्घमायु- रस्मे धत्तं पुरुभुजा पुरन्धिः।। ।। इति परिशिष्टम्।।

**10.162 ब्रह्मणाग्निरिति षडृचस्य सूक्तस्य, ब्राह्मो रक्षोहा प्रजापतिरनुष्टुप्। (अत्र सूक्तेऽनुक्रमण्यवष्टम्भेन देवता निर्णयो न भवति। यतस्तत्र गर्भस्रावे प्रायश्चित्तिरित्युक्तं तेन सूक्तस्य, प्रभावमात्रं द्योत्यते न तु देवता। अतोऽत्र प्रजापतिर्दैवता ग्राह्या। तथा च शौनकः, मन्त्रेषु ह्यनिरुक्तेषु देवताङ्कर्मतो वदेत्। मन्त्रतः कर्मणा चैव प्रजापतिरसंभवे इति । भाष्यकारैरपि प्रजापति रेवोक्तः। बृहद्देवतायां तु राक्षोघ्नाग्नेयमित्युक्तं तत्र युक्तायुक्तं सद्भिर्विचारणीयम्)।**

❀08.08.20 ☞卐ब्रह्मणाऽग्नि स्सँविदानो- रक्षोहा बाधता मितः। अमीवा यस्ते गर्भ- न्दुर्णामा योनि माशये।।

卐 यस्ते गर्भ ममीवा- दुर्णामा योनि माशये। अग्निष्टं ब्रह्मणा सह -निष्क्रव्याद.मनीनशत्।।

卐 यस्ते हन्ति पतयन्त-.न्निषत्स्नुँ य स्सरीसृपम्। जातँ यस्ते जिघांसति -तमितो नाशयामसि।।

卐 यस्त ऊरू~ विहरत्य-ऽन्तरा दम्पती~ शये। योनिँ यो अन्त रारेळ्हि –तमितो नाशयामसि।।

卐 यस्त्वा भ्राता पति र्भूत्वा- जारो भूत्वा निपद्यते। प्रजाँ यस्ते जिघांसति -तमितो नाशयामसि।।

卐 यस्त्वा स्वप्नेन तमसा- मोहयित्वा निपद्यते। प्रजाँ यस्ते जिघांसति- तमितो नाशयामसि।।

**10.163 अक्षीभ्यामिति षडृचस्य सूक्तस्य, काश्यपो विवृहा यक्ष्महाऽनुष्टुप्।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

❀08.08.21 卐अक्षीभ्यान्ते नासिकाभ्या-ङ्कर्णाभ्याञ्छुबुका दधि। यक्ष्मं शीर्षण्यं- मस्तिष्का ज्जिह्वाया वि वृहामि ते।।

卐 ग्रीवाभ्यस्त उष्णिहाभ्य॰- कीकसाभ्यो अनूक्यात्। यक्ष्म न्दोषण्य1(अ) मंसाभ्यां- बाहुभ्याँ वि वृहामि ते।।

卐 आन्त्रेभ्यस्ते गुदाभ्यो- वनिष्ठो र्हृदया दधि। यक्ष्मं मतस्नाभ्याँ- यक्न॰ प्लाशिभ्यो वि वृहामि ते।।

卐 ऊरुभ्यान्ते अष्ठीवद्भ्यां- पार्ष्णिभ्यां प्रपदाभ्याम्। यक्ष्मं श्रोणिभ्यां भासदा -द्भंससो वि वृहामि ते।।

卐 मेहना द्वनङ्करणा- ल्लोमभ्यस्ते नखेभ्यः। यक्ष्मं सर्वस्मा दात्मन- स्तमिदँ वि वृहामि ते।।

卐 अङ्गादङ्गा ल्लोम्नोलोम्नो- जातं पर्वणिपर्वणि। यक्ष्मं सर्वस्मा दात्मन- स्तमिदँ वि वृहामि ते।।

**10.164 अपेहीति पञ्चर्चस्य सूक्तस्याऽऽगिरसः प्रचेता दुःस्वप्ननाशनोऽनुष्टुप् तृतीया त्रिष्टुप् अन्त्या पङ्क्तिः।**

❀08.08.22 卐अपेहि मनसस्पते-ऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व- बहुधा जीवतो मनः।।

卐 भद्रँ वै वरँ वृणते- भद्रँ युञ्जन्ति दक्षिणम्। भद्रँ वैवस्वते चक्षु- र्बहुत्रा जीवतो मनः।।

卐 यदाशसा निश्शसाऽभिशसो-पारिम जाग्रतो यत्स्वपन्तः। अग्नि र्विश्वा न्यप दुष्कृता –न्यजुष्टा न्यारे अस्म द्दधातु।।

卐 यदिन्द्र ब्रह्मणस्पते-ऽभिद्रोह.ञ्चरामसि। प्रचेता न आङ्गिरसो- द्विषतां पात्वंहसः।।

卐 अजैष्माद्यासनाम-चाभूमाऽनागसो वयम्। जाग्रत्स्वप्न स्सङ्कल्प॰- पापो यन्द्विष्म स्तं स ऋच्छतु- यो नो द्वेष्टि तमृच्छतु।।

**10.165 देवा इति पञ्चर्चस्य सूक्तस्य, नैर्ऋतः कपोतो विश्वेदेवास्त्रिष्टुप्।**

❀08.08.23 卐देवा॰ कपोत इषितो यदिच्छ- न्दूतो निर्ऋत्या इद माजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं- शन्नो अस्तु द्विपदे शञ्चतुष्पदे।।

卐 शिव॰ कपोत इषितो नो अस्त्व-ऽनागा देवा श्शकुनो गृहेषु। अग्निर्हि विप्रो जुषतां हविर्न॰- परि हेति॰ पक्षिणी नो वृणक्तु।।

卐 हेति॰ पक्षिणी न दभा त्यस्मा- नाष्ट्र्यां पदङ्कृणुते अग्निधाने। शन्नो गोभ्यश्च पुरुषेभ्य श्चास्तु- मा नो हिंसी दिह देवा॰ कपोतः।।

卐 यदुलूको वदति मोघ मेत- द्यत्कपोतः पद मग्नौ कृणोति। यस्य दूतः प्रहित^ एष एत- त्तस्मै यमाय नमो अस्तु मृत्यवे।।

卐 ऋचा कपोत न्नुदत प्रणोद- मिषं मदन्तः परि गान्नयध्वम्। सँयोपयन्तो दुरितानि विश्वा- हित्वा न^ ऊर्ज प्र पतात्पतिष्ठः।।

10.166 **ऋषभमिति पञ्चर्चस्य सूक्तस्य, वैराज ऋषभः सपत्ननाशनोऽनुष्टुबन्त्या महापङ्क्तिः। (शाक्वरो वा ऋषिः)।**

08.08.24 卐ऋषभं मा समानानां- सपत्नानाँ विषासहिम्। हन्तारं शत्रूणाङ्कृधि- विराज.ङ्गोपतिङ्गवाम्।।

卐 अह मस्मि सपत्नहे-न्द्र^ इवारिष्टो अक्षतः। अध स्सपत्ना मे पदो- रिमे सर्वे अभिष्ठिताः।।

卐 अत्रैव वोपि नह्या -म्युभे~ आर्त्नीइव~ ज्यया। वाचस्पते नि षेधेमा -न्यथा मदधरँ वदान्।।

卐 अभिभू रह मा गमँ- विश्वकर्मेण धाम्ना। आ व श्चित्त मावो व्रत- मा वोहं समिति न्ददे।।

卐 योगक्षेमँ व^ आदायाहं भूयास- मुत्तम^ आ वो मूर्धान मक्रमीम्। अधस्पदान्म उद्वदत- मण्डूकाइवोदका- न्मण्डूका^ उदकादिव।।

।। अथ परिशिष्टम्।।

卐 येनेदं भूतं भुवनं भविष्य- त्परिगृहीत ममृतेन सर्वम्। येन यज्ञ स्तायते सप्तहोता- तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 येन कर्माण्यपसो मनीषिणो- यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वँ यक्षमन्तः प्रजाना- न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 यज्जाग्रतो दूर मुदैति दैव- न्तदु सुप्तस्य तथैवेति। दूरङ्गम.ञ्ज्योतिषा.ञ्ज्योति रेक -न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 यत्प्रज्ञान मुत चेतो धृतिश्च- यज्ज्योति रन्त रमृतं प्रजासु। यस्मान्न ऋते किञ्चन कर्म क्रियते- तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 यस्मिन्नृच स्साम यजूंषि- यस्मि न्प्रतिष्ठिता रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजाना -न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 सुषारथि रश्वानिव- यन्मनुष्या न्नेनीयतेऽभीशुभि र्वाजिनइव। हृत्प्रतिष्ठँ यदजिरँ यविष्ठ- न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 ये पञ्च पञ्चाशत -श्शतञ्च सहस्रञ्च नियुतञ्चार्बुदञ्च। ते यज्ञचित्तेष्टकाटं शरीर -न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 वेदाह मेतं पुरुषं महान्त- मादित्यवर्ण न्तमसः परस्तात्। तस्य योनिं परि पश्यन्ति धीरा- स्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 येन कर्माणि प्रचरन्ति धीरा- विप्रा वाचा मनसा कर्मणा वा। यत्स्वा न्दिशं मनु सँयन्ति प्राणिन -स्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 ये मे मनो हृदयँ ये च- देवा ये अन्तरिक्षं बहुधा कल्पयन्ति। ये श्रोत्रञ्च चक्षुषी सञ्चरन्ति -तन्मे मन शिवसङ्कल्प मस्तु।।

卐 यस्येद न्धीराः पुनन्ति कवयो- ब्रह्माणं मेतँ व्यावृणत इन्दुम्। स्थावर ञ्जङ्गमञ्च द्यौराकाश -न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 येन द्यौरुग्रा पृथिवी चा-न्तरिक्षँ येन पर्वताः प्रदिशो दिशश्च। येनेदं सर्वञ्जगद्व्याप्तं प्रजान- न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 अव्यक्तञ्चाप्रमेयञ्च -व्यक्ताव्यक्तपरं शिवम्। सूक्ष्मा त्सूक्ष्मतरञ्ज्ञेय -न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 कैलास शिखरे रम्ये- शङ्करस्य गृहालयम्। देवता स्तत्प्रमोदन्ते- तन्मे मन शिवसङ्कल्प मस्तु।।

卐 आदित्यवर्ण न्तपसा- ज्वलन्तँ यत्पश्यसि गुहासु जायमानः। शिवरूपं शिव मुदितं शिवालय- न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 येनेदं सर्वञ्जगतो बभूव- यद्देवा अपि महतो जातवेदाः। यदेवाग्य्र न्तपसो ज्योति रेक- न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 गोभि र्जुष्टो धनेन- ह्यायुषा च बलेन च। प्रजया पशुभिः पुष्कराक्ष-न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 योऽसौ सर्वेषु वेदे-षु पठ्यतेऽनद ईश्वरः। अकार्यो निर्व्रणो ह्यात्मा- तन्मे मन शिवसङ्कल्प मस्तु।।

卐 यो वेदादिषु गायत्री- सर्वव्यापी महेश्वरः। तदुक्तञ्च यदा ज्ञेय- न्तन्मे मन शिवसङ्कल्प मस्तु।।

卐 प्रयतप्राणं ओङ्कारं- प्रणवञ्च महेश्वरम्। यस्सर्वँ यस्य चित्सर्व -न्तन्मे मन शिवसङ्कल्प मस्तु।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यो वै वेद महादेवं- प्रणवं पुरुषोत्तमम्। ओङ्कारं परमाऽऽत्मान -न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 ओंकारश्चतुर्भुजँ- लोकनाथ न्नारायणम्। सर्वस्थितं सर्वगतं सर्वव्याप्त- न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 तत्परात्परतो ब्रह्मा- तत्परा त्परतो हरिः। परा त्परतर ज्ञान -न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 य इदं शिवसङ्कल्पं- सदा ध्यायन्ति ब्राह्मणाः। ते परं मोक्ष माप्स्यन्ति -तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 अस्ति नास्ति शयित्वा- सर्वे मिद न्नास्ति पुन- स्तथैव दृष्ट न्ध्रुवम्। अस्ति नास्ति हितं- मध्यमं पद -न्तन्मे मन शिशवसङ्कल्प मस्तु।।

卐 अस्ति नास्ति विपरीतो -प्रवादोऽस्ति नास्ति गुह्यँ वा इदं सर्वम्। अस्ति नास्ति परा त्परो यत्पर -न्तन्मे मन शिशवसङ्कल्प मस्तु।। ।। इति परिशिष्टम्।।

**10.167 तुभ्येदमिति चतुर्ऋचस्य सूक्तस्य, गाथिभार्गवौ विश्वामित्र जमदग्नी इन्द्रस्तृतीयायाः सोम वरुण बृहस्पत्यनुमति धातृ विधातारो जगती।**

❀08.08.25 卐तुभ्येद मिन्द्र परि षिच्यते- मधु त्वं सुतस्य कलशस्य राजसि। त्वं रयिं पुरुवीरामु नस्कृधि- त्वन्तपः परितप्याऽजय स्वः।।

卐 स्वर्जितं महि मन्दान मन्धसो- हवामहे परि शक्रं सुता उप। इमन्नो यज्ञ मिह बोध्यागहि- स्पृधो जयन्तं मघवान मीमहे।।

卐 सोमस्य राज्ञो वरुणस्य धर्मणि- बृहस्पते रनुमत्या उ शर्मणि। तवाह मद्य मघव न्नुपस्तुतौ- धात र्विधातः कलशा अभक्षयम्।।

卐 प्रसूतो भक्ष मकरञ्चरावपि- स्तोमञ्चेमं प्रथम स्सूरि रुन्मृजे। सुते सातेन यद्यागमँ वां- प्रति विश्वामित्रजमदग्नी दमे।।

**10.168 वातस्येति चतुर्ऋचस्य सूक्तस्य, वातायनोऽनिलो वायुस्त्रिष्टुप्।**

❀08.08.26 卐वातस्य नु महिमानं रथस्य- रुज न्नेति स्तनयन्नस्य घोषः। दिविस्पृ ग्यात्यरुणानि कृण्व- न्नुतो एति पृथिव्या रेणु मस्यन्न्।।

卐 सं प्रेरते अनु वातस्य विष्ठा^- ऐनङ्गच्छन्ति समनन्न योषाः। ताभि स्सयु क्सरथ न्देव^ ईयते-ऽस्य विश्वस्य भुवनस्य राजा।।

卐 अन्तरिक्षे पथिभि रीयमानो- न नि विंशते कतमच्चनाहः। अपां सखा प्रथमजा^ ऋतावा- क्व स्विज्जातᳵ कुत^ आ बभूव।।

卐 आत्मा देवानां भुवनस्य गर्भो- यथावश.ञ्चरति देव^ एषः। घोषा^ इदस्य शृण्विरे न रूप- न्तस्मै वाताय हविषा विधेम।।

10.169 **मयोभूरिति चतुर्ऋचस्य सूक्तस्य, काक्षीवत श्शम्बरो गावस्त्रिष्टुप्।**

❀08.08.27 卐मयोभू र्वातो अभि वातूस्रा^- ऊर्जस्वती रोषधी रा रिशन्ताम्। पीवस्वती र्जीवधन्याᳶ पिब- न्त्वऽवसाय पद्वते रुद्र मृळ।।

卐 या स्सरूपा^ विरूपा^ एकरूपा^- यासा मग्नि रिष्ट्या नामानि वेद। या^ अङ्गिरस स्तपसेह चक्रु- स्ताभ्यᳶ पर्जन्य महि शर्म यच्छ।।

卐 या देवेषु तन्व1(अ)मैरयन्त- यासां सोमो विश्वा रूपाणि वेद। ता^ अस्मभ्यं पयसा पिन्वमानाᳶ- प्रजावती रिन्द्र गोष्ठे रिरीहि।।

卐 प्रजापति र्मह्य मेता रराणो- विश्वै र्देवैᳶ पितृभि स्सँविदानः। शिवा स्सती रुप नो गोष्ठ माऽक-~ स्तासाँ वयं प्रजया सं सदेम।।

10.170 **विभ्राडिति चतुर्ऋचस्य सूक्तस्य, सौर्यो विभ्राट् सूर्यो जगत्यन्त्याऽऽस्तारपङ्क्तिः।**

❀08.08.28 卐विभ्रा ड्बृह त्पिबतु सोम्यं -मध्वायु र्दध द्यज्ञपता वविहुतम्। वातजूतो यो अभिरक्षति त्मना- प्रजाᳶ पुपोष पुरुधा वि राजति।।

卐 विभ्रा ड्बृह त्सुभृतँ वाजसातम- न्धर्म न्दिवो धरुणे सत्य मर्पितम्। अमित्रहा वृत्रहा दस्युहन्तम- ञ्ज्योति र्जज्ञे असुरहा सपत्नहा।।

卐 इदं श्रेष्ठञ्ज्योतिषाञ्ज्योति रुत्तमँ- विश्वजि द्धनजि दुच्यते बृहत्। विश्वभ्रा ड्भ्राजो महि सूर्यो दृश- उरु पप्रथे सह^ ओजो अच्युतम्।।

卐 विभ्राजञ्ज्योतिषा स्व1(अ)-रगच्छो रोचन न्दिवः। येनेमा विश्वा भुवना न्याभृता- विश्वकर्मणा विश्वदेव्यावता।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☙ 10.171 त्वं त्यमिति चतुर्ऋचस्य सूक्तस्य, भार्गव इट इन्द्रो गायत्री।

❀08.08.19 卐त्वन्त्य मिटतो रथमि-न्द्र प्राव स्सुतावतः। अशृणो स्सोमिनो हवम्।।

卐 त्वं मखस्य दोधत- श्शिरोऽव त्वचो भरः। अगच्छ स्सोमिनो गृहम्।।

卐 त्वन्त्य मिन्द्र मर्त्य- माऽऽस्त्रबुध्नाय वेन्यम्। मुहु श्श्रथ्ना^ मनस्यवे।।

卐 त्वन्त्य मिन्द्र सूर्य- पश्चा सन्तं पुर स्कृधि। देवानाञ्चित्तिरो वशम्।।

☙ 10.172 आ याहीति चतुर्ऋचस्य सूक्तस्याऽऽङ्गिरसः संवर्त उषा द्विपदाविराट्।

❀08.08.30 卐आ याहि वनसा सह- गाव स्सचन्त वर्तनिं यदूधभिः।।

卐 आ याहि वस्व्या धिया- मंहिष्ठो जारयन्मख स्सुदानुभिः।।

卐 पितुभृतो न तन्तुमित्सुदानव॰- प्रति दध्मो यजामसि।।

卐 उषा^ अप स्वसु स्तम- स्सँ वर्तयति वर्तनिं सुजातता।।

☙ 10.173 आ त्वेति षडृचस्य सूक्तस्याऽऽङ्गिरसो ध्रुवो राजाऽनुष्टुप्।

❀08.08.31 卐आ त्वाऽहार्ष मन्त रेधि- ध्रुव स्तिष्ठाऽविचाचलिः। विशस्त्वा सर्वा वाञ्छन्तु- मा त्वद्राष्ट्र मधि भ्रशत्।।

卐 इहैवैधि माप च्योष्ठा॰- पर्वत इवाऽविचाचलिः। इन्द्रइवेह ध्रुव स्तिष्ठे-ह राष्ट्रमु धारय।।

卐 इम मिन्द्रो अदीधर- द्ध्रुव न्ध्रुवेण हविषा। तस्मै सोमो अधि ब्रव- त्तस्मा उ ब्रह्मणस्पतिः।।

卐 ध्रुवा द्यौ र्ध्रुवा पृथिवी- ध्रुवास॰ पर्वता^ इमे। ध्रुवँ विश्व मिदञ्जग- द्ध्रुवो राजा विशा मयम्।।

卐 ध्रुवन्ते राजा वरुणो- ध्रुव न्देवो बृहस्पतिः। ध्रुवन्त इन्द्रश्चाग्निश्च- राष्ट्र न्धारयता न्ध्रुवम्।।

卐 ध्रुव न्ध्रुवेण हविषा-ऽभि सोमं मृशामसि। अथो~ त इन्द्र॰ केवली- र्विशो बलिहृत स्करत्।।

☙ 10.174 अभीवर्तेनेति पञ्चर्चस्य सूक्तस्याऽऽङ्गिरसोऽभीवर्तो राजाऽनुष्टुप्।

❀08.08.32 卐अभीवर्तेन हविषा- येनेन्द्रो अभिवावृते। तेनास्मा न्ब्रह्मणस्पते-ऽभि राष्ट्राय वर्तय।।

卐 अभिवृत्य सपत्ना- नभि या नो अरातयः। अभि पृतन्यन्त न्तिष्ठा-ऽभि यो न^ इरस्यति।।

卐 अभि त्वा देव स्सविता-ऽभि सोमो अवीवृतत्। अभि त्वा विश्वा भूता -न्यभीवर्तो यथाऽससि।।

卐 येनेन्द्रो हविषा कृत्व्य-ऽभव द्द्युम्न्युत्तमः। इद न्तदक्रि देवा^- असपत्न॰ किलाभुवम्।।

卐 असपत्न स्सपत्नहा-ऽभिराष्ट्रो विषासहिः। यथाऽह मेषां भूतानाँ- विराजानि जनस्य च।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

☸ 10.175 **प्र व इति चतुर्ऋचस्य सूक्तस्योर्ध्वग्रावाऽर्बुदः सर्प ऋषिपुत्रो ग्रावाणो गायत्री।**

❀08.08.33 卐☞प्र वो ग्रावाण स्सविता- देव स्सुवतु धर्मणा। धूर्षु युज्यध्वं सुनुत।।

卐 ग्रावाणो अप दुच्छुना- मप सेधत दुर्मतिम्। उस्राः कर्तन भेषजम्।।

卐 ग्रावाण^ उपरेष्वाऽऽ- महीयन्ते सजोषसः। वृष्णे दधतो वृष्ण्यम्।।

卐 ग्रावाण स्सविता नु वो- देव स्सुवतु धर्मणा। यजमानाय सुन्वते।।

☸ 10.176 **प्र सूनव इति चतुर्ऋचस्य सूक्तस्यार्भवः सूनुरग्निराद्याया ऋभवोऽनुष्टुप्, द्वितीया गायत्री।**

❀08.08.34 卐प्र सूनव^ ऋभूणां- बृहन्नवन्त वृजना। क्षामा ये विश्वधायसो-ऽश्न न्धेनुन्न मातरम्।।

卐 प्र देव न्देव्या धिया- भरता जातवेदसम्। हव्या नो वक्ष दानुषक्।।

卐 अयमु ष्य प्र देवयु- होता यज्ञाय नीयते। रथो न यो रभीवृतो -घृणीवान्चेतति त्मना।।

卐 अय मग्नि रुरुष्य –त्यऽमृतादिव जन्मनः। सहसश्चि त्सहीया-न्देवो जीवातवे कृतः।।

☸ 10.177 **पतङ्गमिति तृचस्य सूक्तस्य, प्राजापत्यः पतङ्गो मायाभेदस्त्रिष्टुप् आद्या जगती।**

❀08.08.35 卐पतङ्ग मक्त मसुरस्य मायया- हृदा पश्यन्ति मनसा विपश्चितः। समुद्रे अन्तः~ कवयो वि चक्षते- मरीचीनां पद मिच्छन्ति वेधसः।।

卐 पतङ्गो वाचं मनसा बिभर्ति- ताङ्गन्धर्वोऽवद द्गर्भे अन्तः। तान्द्योतमानां स्वर्यं मनीषा- मृतस्य पदे कवयो नि पान्ति।।

卐 अपश्यङ्गोपा मनिपद्यमान -मा च परा च पथिभि श्चरन्तम्। स सध्रीची स्स विषूची र्वसान^- आ वरीवर्ति भुवने ष्वन्तः~।।

☸ 10.178 **त्यमूष्विति तृचस्य सूक्तस्य, तार्क्ष्योऽरिष्टनेमिस्तार्क्ष्यस्त्रिष्टुप्।**

❀08.08.36 卐त्यमू षु वाजिन न्देवजूतं- सहावान न्तरुतारं रथानाम्। अरिष्टनेमिं पृतनाज माशुं- स्वस्तये तार्क्ष्य मिहा ऽऽहुवेम।।

卐 इन्द्रस्येव राति माजोहुवाना- स्स्वस्तये नावमिवा ऽऽरुहेम। उर्वी~ न पृथ्वी~ बहुले~ गभीरे~- मा वामेतौ मा परेतौ रिषाम।।

卐 सद्य श्चिद्य श्शवसा पञ्च कृष्टी- स्सूर्यइव ज्योतिषाऽप स्ततान। सहस्रसा श्शतसा^ अस्य रंहि- र्न स्मा वरन्ते युवतिन्न शर्याम्।।

Sri Ganapathi Sachchidananda Avadhoota Peetham • Mysore •

☸ 10.179 उत्तिष्ठतेति तृचस्य सूक्तस्यौशीनरःशिबिः1, काशिराजः प्रतर्दनः2, रोहिदश्वो वसुमनाः 3, इति क्रमेणैकर्चा इन्द्रस्त्रिष्टुबाद्याऽनुष्टुप्।

❀08.08.37 卐उत्तिष्ठतावं पश्य-तेन्द्रस्य भाग मृत्वियम्। यदि श्रातो जुहोतन- यद्यऽश्रातो ममत्तन।।

卐 श्रातं हविरो~ ष्विन्द्र प्र याहि- जगाम सूरो अध्वनो विमध्यम्। परि त्वासते निधिभि स्सखायः- कुलपा^ न व्राजपतिञ्चरन्तम्।।

卐 श्रातं मन्य ऊधनि श्रात मग्नौ- सुश्रातं मन्ये तदृतन्नवीयः। माध्यन्दिनस्य सवनस्य दध्नः- पिबेन्द्र वज्रि न्पुरुकृ ज्जुषाणः।।

☸ 10.180 प्र ससाहिष इति तृचस्य सूक्तस्यैन्द्रिर्जय इन्द्रस्त्रिष्टुप्।

❀08.08.38 卐प्र ससाहिषे पुरुहूत शत्रू -न्ज्येष्ठस्ते शुष्म^ इह राति रस्तु। इन्द्रा ऽऽभर दक्षिणेना वसूनि- पति स्सिन्धूना मसि रेवतीनाम्।।

卐 मृगो न भीमः कुचरो गिरिष्ठाः- परावत^ आ जगन्था परस्याः। सृकं संशाय पवि मिन्द्र तिग्मँ- वि शत्रू न्ताळ्हि वि मृधो नुदस्व।।

卐 इन्द्र क्षत्र मभि वाम मोजो-ऽजायथा^ वृषभ चर्षणीनाम्। अपानुदो जन ममित्रयन्त- मुरु न्देवेभ्यो अकृणोरु लोकम्।।

☸ 10.181 प्रथश्चेति तृचस्य सूक्तस्य, वासिष्ठः प्रथो1, भारद्वाजः सप्रथ2, सौर्योघर्म3, श्चैकर्चा विश्वेदेवा स्त्रिष्टुप्।

❀08.08.39 卐प्रथश्च यस्य सप्रथश्च नामा-ऽऽनुष्टुभस्य हविषो हविर्यत्। धातु र्द्युताना त्सवितुश्च विष्णो- रथन्तर मा जभारा वसिष्ठः।।

卐 अविन्दन्ते अतिहितँ यदासी- द्यज्ञस्य धाम परमङ्गुहा यत्। धातु र्द्युताना त्सवितुश्च विष्णो- र्भरद्वाजो बृहदाऽऽ चक्रे अग्नेः।।

卐 तेऽविन्द न्मनसा दीध्याना- यजु ष्ष्कन्नं प्रथम न्देवयानम्। धातु र्द्युताना त्सवितुश्च विष्णो- रा सूर्या दभर न्घर्म मेते।।

☸ 10.182 बृहस्पतिरिति तृचस्य सूक्तस्य, बार्हस्पत्यस्तपुर्मूर्धा बृहस्पति स्त्रिष्टुप्।

❀08.08.40 卐बृहस्पति र्नयतु दुर्गहा- तिरः पुनर्नेश दघशंसाय मन्म। क्षिप दशस्ति मर्प दुर्मतिं ह-न्नऽथा कर द्यजमानाय शँयोः।।

卐 नराशंसो नोऽवतु प्रयाजे- शन्नो अस्त्वऽनुयाजो हवेषु। क्षिप दशस्ति मर्प दुर्मतिं ह-न्नथा कर द्यजमानाय शँयोः।।

卐 तपुर्मूर्धा तपतु रक्षसो- ये ब्रह्मद्विष श्शरवे हन्तवा उ। क्षिप दशस्ति मर्प दुर्मतिं ह-न्नथा कर द्यजमानाय शँ योः।।

10.183 **अपश्यमिति तृचस्य सूक्तस्य, प्राजापत्यः प्रजावानृषिः, यजमानो यजमानपत्नी होता, इति क्रमेण देवता स्त्रिष्टुप्। (अपश्यन्त्वेत्येतस्याद्यया यजमानमीक्षते, द्वितीयया पत्नीं तृतीययाऽऽत्मानम्।।आ।।श्रौ।।)**

❀08.08.41 卐अपश्यन्त्वा मनसा चेकितान- न्तपसो जात न्तपसो विभूतम्। इह प्रजा मिह रयिं रराणः- प्र जायस्व प्रजया पुत्रकाम।।

卐 अपश्यन्त्वा मनसा दीध्यानां- स्वाया न्तनू ऋत्व्ये नाधमानाम्। उप मामुच्चा युवति र्बभूयाः- प्र जायस्व प्रजया पुत्रकामे।।

卐 अहङ्गर्भ मदधा मोषधी- ष्वहँ विश्वेषु भुवनेष्वन्तः। अहं प्रजा अजनयं पृथिव्या- महञ्जनिभ्यो अपरीषु पुत्रान्।।

10.184 **विष्णुरिति तृचस्य सूक्तस्य, गर्भकर्ता, त्वष्टा, आद्याया, विष्णु त्वष्टृ प्रजापति धातारो द्वितीयायाः सिनीवालि सरस्वत्यश्विन स्तृतीयाया अश्विना वनुष्टुप्। (प्राजापत्यो विष्णुर्वा ऋषिः)**

❀08.08.42 卐विष्णु र्योनिङ्कल्पयतु- त्वष्टा रूपाणि पिंशतु। आ सिञ्चतु प्रजापति- र्धाता गर्भ न्दधातु ते।।

卐 गर्भ न्धेहि सिनीवालि- गर्भन्धेहि सरस्वति। गर्भन्ते अश्विनौ देवा- वा धत्तां पुष्करस्रजा।।

卐 हिरण्ययी अरणी-यन्निर्मन्थतो अश्विना। तन्ते गर्भं हवामहे- दशमे मासि सूतवे।।

।। अथ परिशिष्टम्।।

卐 नेजमेष परा पत- सुपुत्रः पुन रापत। अस्यै मे पुत्रकामायै- गर्भ मा धेहि यः पुमान्।।

卐 यथेयं पृथिवी मह्यु-त्ताना गर्भ मादधे। एव न्तङ्गर्भ मा धेहि- दशमे मासि सूतवे।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 विष्णो श्श्रेष्ठेन रूपेणा-स्या न्नार्याङ्गवीन्याम्। पुमांसं पुत्रा नाधेहि- दशमे मासि सूतवे।।

卐 ।। इति परिशिष्टम्।।

10.185 **महीति तृचस्य सूक्तस्य, वारुणिः सत्यधृतिरादित्या गायत्री। (महि सत्यधृतिर्वारुणि रादित्यं स्वस्त्ययनमित्यनुक्रमण्या अदिति र्देवता, यस्येत्यादित्यं, आदित्यो देवता यस्तेत्यादित्यमिति द्वैविध्येन प्राप्तावप्यत्रादित्यानामेव देवतात्वं नादितेः माहित्रं यन्महि त्रीणामादित्यानां स्तुतिं बिदुः इति शौनकोक्तेः)।**

❀08.08.43 卐महि त्रीणा मवोस्तु- द्युक्षं मित्रस्याऽर्यम्णः। दुराधर्षं वरुणस्य।।

卐 नहि तेषा ममा चन- नाध्वसु वारणेषु। ईशे रिपु रघशंसः।।

卐 यस्मै पुत्रासो अदितेः- प्र जीवसे मर्त्याय। ज्योति र्यच्छन्त्यऽजस्रम्।।

10.186 **वात इति तृचस्य सूक्तस्य, वातायन उलो वायुर्गायत्री।**

❀08.08.44 卐वात^ आ वातु भेषजं- शम्भु मयोभु नो हृदे। प्र ण^ आयूंषि तारिषत्।।

卐 उत वात पिताऽसि न^- उत भ्रातोत न स्सखा। स नो जीवातवे कृधि।।

卐 यददो वात ते गृहे3(ए)-ऽमृतस्य निधि र्हितः। ततो नो देहि जीवसे।।

10.187 **प्राग्नाय इति पञ्चर्चस्य सूक्तस्याऽऽग्नेयो वत्सोऽग्निर्गायत्री।**

❀08.08.45 卐प्राग्नये वाच मीरय- वृषभाय क्षितीनाम्। स नः पर्ष दति द्विषः।।

卐 यः परस्याः परावत- स्तिरो धन्वाऽतिरोचते। स नः पर्ष दति द्विषः।।

卐 यो रक्षांसि निजूर्वति- वृषा शुक्रेण शोचिषा। स नः पर्ष दति द्विषः।।

卐 यो विश्वाऽभि विपश्यति- भुवना सञ्च पश्यति। स नः पर्ष दति द्विषः।।

卐 यो अस्य पारे रजस- श्शुक्रो अग्नि रजायत। स नः पर्ष दति द्विषः।।

✡।। अथ परिशिष्टम्।।

卐 अनीकवन्त मूतये-ऽग्निङ्गीर्भि र्हवामहे। स नः पर्ष दति द्विषः।।

卐 ।। इति परिशिष्टम्।।

10.188 **प्र नूनमिति तृचस्य सूक्तस्याऽऽग्नेयः श्येनो जातवेदा अग्नि र्गायत्री।**

❀08.08.46 卐प्र नूनञ्जातवेदस-.मऽश्वं हिनोत वाजिनम्। इदन्नो बर्हि रासदे।।

卐 अस्य प्र जातवेदसो- विप्रवीरस्य मीऴ्हुषः। मही मियर्मि सुष्टुतिम्।।
卐 या रुचो जातवेदसो- देवत्रा हव्यवाहनीः। ताभिर्नो यज्ञ मिन्वतु।।
10.189 आऽयं गौरिति तृचस्य सूक्तस्य, सार्पराज्ञी सूर्यो गायत्री। (अत्र यद्यपि सार्पराज्ञ्यात्म दैवतमित्यनेन प्रकृता सार्पराज्ञी देवता प्राप्नोति तथाऽपि प्रयोक्तृभिः सूर्यस्य ग्रहणात्पाक्षिकोऽपि सूर्योऽस्माभिरुपात्तः)।
❀08.08.47 卐आऽयङ्गौः पृश्नि रक्रमी- दऽसद न्मातरं पुरः। पितरञ्च प्रयन्त्स्वः~।
卐 अन्त~ श्चरति रोचना-ऽस्य प्राणा दपानती। व्यख्य न्महिषो दिवम्।।
卐 त्रिंश द्धाम वि राजति- वाक्पतङ्गाय धीयते। प्रति वस्तो रह द्युभिः।।
10.190 ऋतं चेति तृचस्य सूक्तस्य, माधुच्छन्दसोऽघमर्षणो भाववृत्तिरनुष्टुप्।
❀08.08.48 卐ऋतञ्च सत्यञ्चाभीद्धा- त्तपसोऽध्यजायत। ततो रात्र्यजायत -तत स्समुद्रो अर्णवः।।
卐 समुद्रा दर्णवा दधि- सँवत्सरो अजायत। अहोरात्राणि विदध- द्विश्वस्य मिषतो वशी।
卐 सूर्याचन्द्रमसौ धाता- यथा पूर्व मकल्पयत्। दिवञ्च पृथिवीञ्चा-ऽन्तरिक्ष मथो स्वः।।
10.191 संसमिति चतुर्ऋचस्य सूक्तस्याऽङ्गिरसः संवननः, आद्याया अग्निस्ततस्तिसृणां संज्ञानमनुष्टुप्तृतीया त्रिष्टुप्।
❀08.08.49 卐संसमि द्युवसे वृषन्न-ऽग्ने विश्वा न्यर्य^ आ। इळ स्पदे समिध्यसे- स नो वसून्या ऽऽभर।।
卐 सङ्गच्छध्वं सँ वदध्वं- सँ वो मनांसि जानताम्। देवा^ भागँ यथा पूर्वे- सञ्जानाना^ उपाऽऽसते।।
卐 समानो मन्त्र स्समिति स्समानी- समानं मन स्सह चित्त मेषाम्। समानं मन्त्र मभि मन्त्रये व- स्समानेन वो हविषा जुहोमि।।
卐 समानी व^ आकूति- स्समाना हृदयानि वः। समान.मस्तु वो मनो- यथा व स्सुसहाऽसति।।
✡।। अथ परिशिष्टम्।।
卐 संज्ञान मुशनाऽवद- त्संज्ञानँ वरुणोऽवदत्। संज्ञान मिन्द्र श्चाग्निश्च- संज्ञानं सविताऽवदत्।।
卐 संज्ञानँ व स्स्वेभ्य- स्संज्ञान मरणेभ्यः। संज्ञान मश्विना युव- मिहास्मासु नि यच्छताम्।।
卐 यत्कक्षीवां सँवननं- पुत्रो अङ्गिरसां भवेत्। तेन नोऽद्य विश्वे देवा- स्सं प्रियां समजीजनन्।।

卐 सँ वो मनांसि जानतां- समाकूति र्मनामसि। असौ यो विर्मना मन- स्सं समा वर्तयामसि।।

卐 नैर्हस्त्यं सेनादरणं- परि वर्त्मैतु यद्ध्विः। तेनामित्राणां बाहू- न्हविषा शोषयामसि।।

卐 परि वर्त्मान्येषा- मिन्द्रः पूषा च सस्रतुः। तेषाँ वो अग्निदग्धाना -मग्निमूळ्हाना मिन्द्रो हन्तु वरँवरम्।।

卐 ऐषु नह्यवृषाजिनं- हरिणस्य धियँ यथा। परा॰ अमित्रा॰ ऐष -त्वऽर्वाची गौरुपाऽऽजेतु।।

卐 प्राध्वराणां पते वसो- होत वरेण्यक्रतो। तुभ्यङ्गायत्र मुच्यते।।

卐 गोकामो अन्नकामः- प्रजाकाम उत कश्यपः। भूतं भविष्य त्प्रस्तौति- सह ब्रह्मैक मक्षरं- बहु ब्रह्मैक मक्षरम्।।

卐 यदक्षरं भूतकृतँ- विश्वे देवा उपाऽऽसते। महऋषि मस्य गोप्तार-ञ्जमदग्नि रकुर्वतम्।।

卐 जमदग्नि राप्यायते- छन्दोभि श्चतु रुत्तरैः। राजा सोमस्य भक्षेण- ब्रह्मणा वीर्यावता।।

卐 शिवा^ नः प्रदिशो दिश-स्सत्या नः प्रदिशो दिशः। अजो यत्तेजो ददृश्रे- शुक्र.ज्योतिः परो गुहा।।

卐 यदृषिः कश्यप स्स्तौति- सत्यं ब्रह्म चराचर- न्ध्रुवं ब्रह्म चराचरम्। त्र्यायुषञ्जमदग्नेः- कश्यपस्य त्र्यायुष -.मगस्त्यस्य त्र्यायुषम्।।

卐 यद्देवाना न्त्र्यायुष- न्तन्मे अस्तु त्र्यायुषं- सर्वे मस्तु शताऽऽयुषं बलाऽऽयुषम्।।

卐 तच्छँयोरा वृणीमहे- गातुँ यज्ञाय- गातुँ यज्ञपतये। दैवी स्वस्ति रस्तु न -स्स्वस्ति र्मानुषेभ्यः। ऊर्ध्वञ्जिगातु भेषजं- शन्नो अस्तु द्विपदे शञ्चतुष्पदे।। 卐 ।। ओं शान्ति श्शान्ति श्शान्तिः।।।।

इत्यष्टमाध्यायः ।।

इत्यष्टमाष्टकम्।।

**ऋग्वेद संहिता समाप्ता**

यदक्षरपदभ्रष्टं मात्राहीनन्तु यद्भवेत्।

तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तुते।।